श्रीसोमनाथसंस्कृतविश्वविद्यालयशास्त्रग्रन्थमाला - १
प्रधानसम्पादकः - प्रो. वेम्पटिकुटुम्बशास्त्री

महामहोपाध्याय श्री कौण्डभट्टविरचितः

वैयाकरणसिद्धान्तभूषणसारः

नरसिंहप्रियाव्याख्योपेतः

प्रथमभागः

धात्वाख्यातार्थनिर्णयात्मकः



व्याख्याता
महामहोपाध्यायः शास्त्रविद्वन्मणिः व्याकरणशास्त्रविशारदः
कन्दाळ वेङ्कट रामकृष्णमाचार्यः

श्रीसोमनाथसंस्कृतयुनिवर्सिटी - वेरावलम् - गुजरातम्
Shree Somnath Sanskrit University-Veraval-Gujarat
2015

श्रीसोमनाथसंस्कृतविश्वविद्यालयशास्त्रग्रन्थमाला - १
प्रधानसम्पादकः - प्रो. वेम्पटिकुटुम्बशास्त्री

महामहोपाध्याय श्री कौण्डभट्टविरचितः

वैयाकरणसिद्धान्तभूषणसारः

नरसिंहप्रियाव्याख्योपेतः

प्रथमभागः

धात्वाख्यातार्थनिर्णयात्मकः

व्याख्याता
महामहोपाध्यायः शास्त्रविद्वन्मणिः व्याकरणशास्त्रविशारदः
कन्दाळ वेङ्कट रामकृष्णमाचार्यः

श्रीसोमनाथसंस्कृतयुनिवर्सिटी-वेरावलम्- गुजरातम्

प्रकाशकः -

डॉ. दशरथजादवः
कुलसचिवः
श्रीसोमनाथसंस्कृतयुनिवर्सिटी
राजेन्द्रभुवन रोड, वेरावलम् - ३६२ २६६
गीर-सोमनाथजनपदम्, गुजरातम्
दूरभाषः - ०२८७६ - २४४५३२, फेक्स : २४४४१७
E-mail: sssu.veraval@gmail.com
www.shreesomnathsanskrituniversity.info

समन्वयकः -

डॉ. कार्तिकपण्ड्या
संशोधनाधिकारी
श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

प्रथमं संस्करणम् - मई - २०१५

प्रतयः - ३५०

ISBN - 978-93-83097-14-2

मूल्यम् - रु. ८२०/-

मुद्रकः -

एच. के. ऑफसेट
५, पहली मंजिल, मद्रेसा बिल्डींग,
महात्मा गांधी रोड, वेरावल - ३६२ २६५
जिला - गीर-सोमनाथ, गुजरात, भारत
दूरभाष - ०२८७६-२४६६१९

Shree Somnath Sanskrit University Shastragrantha Series - 1
Chief Editor - Prof. Vempaty Kutumba Sastry

VAIYĀKARAṆASIDDHĀNTABHŪṢAṆASĀRAḤ

of

Mahāmahopādhyāya Śrī Kauṇḍabhaṭṭa

With the commentary of

Narasiṁhapriyā

by

Mahāmahopādhyāyaḥ Śāstravidvanmaṇiḥ

Vyākaraṇaśāstraviśāradaḥ

Kandala Venkata Ramakrishnamacharya

Volume - I

(*Dhātvarthanirṇaya and Ākhyātārthanirṇaya*)

Shree Somnath Sanskrit University - Veraval - Gujarat

Published by:

Dr. Dashrath Jadav
The Registrar
Shree Somnath Sanskrit University
Rajendra Bhuvan Road, Veraval - 362 266.
Dist.: Gir-Somnath, Gujarat, India.
Phone: 02876-244532, Fax: 02876-244417
E-mail: sssu.veraval@gmail.com
www.shreesomnathsanskrituniversity.info

Co-ordinator:

Dr. Kartik Pandya
Research Officer
Shree Somnath Sanskrit University, Veraval.

Edition : First

Year : May 2015


Copies : 350

Price : Rs. 820 /-


ISBN : 978-93-83097-14-2

Printed by:

H. K. Offset
5, 1st Floor, Madressa Building,
M. G. Road, Veraval - 362 265.
Dist.: Gir-Somnath, Gujarat, India.
Phone: 02876-246619



पदवाक्यप्रमाणज्ञं वेदवेदान्तपारगम् ।
नरसिंहगुरुं वन्दे सर्वदा शिष्यवत्सलम् ।।



नारयणमहाराजकरकमले समर्पिता ।
व्यख्येयं हि सदा भूयात् विदुषां प्रीतिभाजानम् ।।

।। शुभाशंसनम् ।।

भगवतः आदिशेषस्य अवतारभूतस्य पतञ्जलिमहर्षेः महाभाष्यग्रन्थाविर्भाव-कालमारभ्य प्रकृतकालपर्यन्तं अनुस्यूततयात्र भारते वर्षे शाब्दबोधविषयकः विचारः प्रवृत्तः, यः खलु विचारः भारतेतरवर्षेष्वचिरप्रवृत्तोऽस्ति। न केवलमेतावदेव। किन्तु, येऽपि भारतेतरदेशेषु शाब्दबोधविचारविशेषज्ञाः ते सर्वे भारतीयचिन्तनधारायाः गाम्भीर्यं, विशदतां, सुपरिष्कृततताञ्च अवगम्य चकिताः मुदिताश्च सन्तः विचारमेनमध्येतुं तत्तद्देशेषु यथायोग्यं प्रवर्तन्ते। विचारोऽसौ व्याकरण-शास्त्रातिरिक्ततया मीमांसकैः, नैयायिकैश्चापि प्रवर्तितः प्रवर्धितश्च चकास्ति। वस्तुतः, त्रयाणामेषां शास्त्रकाराणां आदानप्रदानद्वारा, खण्डनमण्डनद्वारा च प्रवृद्धोऽसौ विचारः अद्य सुविशालकायेन दरीदृश्यते।

प्राचीनवैयाकरणामन्तिमे नव्यवैयाकरणानामादिमे च समये विराजमानानां महामहोपाध्यायानां कौण्डभट्टमहोदयानां ग्रन्थरत्नद्वयं भूषण-भूषणसार-नामकं देहलीदत्तदीपन्यायेन परम्पराद्वयस्यापि प्रकाशकं सत् सेतुरिव विधारकमस्ति। विशिष्य, भूषणसारस्य प्रामाणिकता सर्वातिशायिनी विराजते यत्कारणं न केवलं परवर्तिनो वैयाकरणाः, किन्तु, नैयायिकाः मीमांसकाश्च वैयाकरणमतानुवादसन्दर्भे ग्रन्थमेनमेवाश्रयन्ते। किञ्च, कालक्रमेण प्रायः द्वादशव्याख्यानानि ग्रन्थस्यास्य विरचितानीत्येतदपि प्रख्यापयति ग्रन्थस्यास्य प्रामाणिकतां, विद्वदुपादेयताञ्च।

आचार्याः रामकृष्णमाचार्याः प्रायः विगतचत्वारिंशतोऽप्यधिकेभ्यो वर्षेभ्यः अध्ययनाध्यापनशोधकर्मणां माध्यमेन ग्रन्थमेनं सुनिशिततया परिशील्य ग्रन्थस्योपरि पूर्णं स्वस्वातन्त्र्यं प्राप्य विराजन्ते। वामनालङ्कारझलकीकरमहोदयाः

बहुटीकासुशोभितस्य काव्यप्रकाशस्येव, आचार्या इमे उपलभ्यमानसर्वव्याख्यानसारं सङ्गृह्य, स्वमेधया तस्य परीक्षणं च विधाय, स्वीयाभिप्रायप्रकटनपूर्वकं ग्रन्थस्यास्योपादेयतां वर्धितवन्तः। किञ्च, विद्यार्थिनां शोधार्थिनां च भूषणसारावगमने नरसिंहप्रियाव्याख्येयं सामस्त्येन ग्रन्थार्थं विवृण्वती विशेषाधिगमाय अपेक्षितं मार्गदर्शनमपि विदधाति। मदीयगुरुचरणेभ्यः आचार्यरामकृष्णमाचार्येभ्यः कृतज्ञताविष्करणपूर्वकं प्रणामाञ्जलिं घटयामि।

सर्वतन्त्रस्वतन्त्राः राष्ट्रपतिपुरस्कारभाजः फ्रान्स्-देशस्य सर्वोच्चनागरिकसम्मानेन चावलियर्-पुरस्कारेण सभाजिताः व्याख्यातुः ममापि च गुरवः आचार्याः रामानुजताताचार्यमहाभागाः शुभाशंसनात्मिकायां स्वीयपुरोवाचि ग्रन्थवैशिष्ट्यं प्रतिपाद्यान्वग्रहीषुः। तेषां चरणकमलयोः प्रणतिततीः विनिवेदयामि।

श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य कुलसचिवः डॉ. दशरथजादवः, वित्ताधिकारी श्री ब्रिजेशमहेता, संशोधनाधिकारी प्रकाशनकर्मणि समन्वयकः डॉ. कार्तिकपण्ड्या, मुद्रकः श्री हमीरसोलंकी च साधुवादैः, कृतज्ञतावचनैश्च विभूष्यन्ते।

नितरां प्रसीदति मे चित्तं यदद्यैषा 'श्रीसोमनाथसंस्कृतविश्वविद्यालयशास्त्र-ग्रन्थमाला' भगवतः श्रीसोमनाथस्यानुकम्पया ऐदम्प्राथम्येनाविर्भवतीति, तत्र च शास्त्रग्रन्थशिरोमणेः भूषणसारस्य अभिनवा काचित् व्याख्या नरसिंहप्रियानाम्नी प्रथमकलिकारूपेण प्रादुर्भवतीति।

वेरावलम्
१४-०५-२०१५

संस्कृतसेवकः
वेम्पटि कुटुम्ब शास्त्री

दर्शनकलानिधिः-पण्डितराज-सर्वतन्त्रवाचस्पति
-तर्कपञ्चानन-पण्डितरत्न-शास्त्ररत्नाकर-महामहोपाध्याय-
इत्यादिबिरुदावलीविभ्राजमानाः, राष्ट्रपतिपुरस्कार-श्रीवाणीदाल्मिया-
पुरस्कार-वाचस्पतिपुरस्कार-गोपालोपायनादिनैकपुरस्कारपुरस्कृताः
अद्वितीयं वैदुष्यमुपलक्ष्य फ्रान्सदेशीयात्युन्नत-
नागरिकपुरस्कारेण चावलियर्-आख्येन सम्मानिताः,
तिरुपतिराष्ट्रियसंस्कृतविद्यापीठस्य प्रथमकुलपतयः
आचार्याः उ.वें.श्रीमन्तः यन्. यस्. रामानुजताताचार्याः।

श्रीरस्तु।

पुरोवाक् (शुभाशंसनम्)

श्रीमच्छङ्करभगवत्पादैः ब्रह्मसूत्रभाष्ये ईक्षत्यधिकरणावतारिकायां ब्रह्मसूत्रकर्तारं व्यासमधिकृत्य "पदवाक्यप्रमाणज्ञेनाचार्येण" इति कथितम्। तत्र **पदं** व्याकरणम्, **वाक्यं** मीमांसा, **प्रमाणं** न्यायशास्त्रम्। एतेन एतच्छास्त्रत्रयपारङ्गतेनैव सूत्रं वा भाष्यादिकं वा निर्मातुं शक्यम् इति सूचितम्। " संस्कृत्य संस्कृत्य पदान्युत्सृज्यन्ते, तेषां यथेष्टमभिसम्बन्धो भवति" इति महाभाष्ये पतञ्जलिः प्राह। तेन पदार्थविवेको व्याकरणात् भवतीति लभ्यते। जैमिनिना मीमांसासूत्रकारेण "अर्थैकत्वादेकं वाक्यं साकाङ्क्षं चेद्विभागे स्यात्" इति सूत्रेण वाक्यलक्षणमुक्तम्। तत्र प्राचीनैः कुमारिल-भट्टादिभिः बहु विचारितमस्ति।

प्राचीनेन भर्तृहरिणा अतिप्रशस्ते वाक्यपदीये पदलक्षणं वाक्यलक्षणं पदार्थवाक्यार्थबोधं चाधिकृत्य निष्कर्षः कृतोऽस्ति। प्राक्तनस्य मण्डनमिश्रस्य विधिविवेकभावनाविवेक-ग्रन्थयोः शाब्दबोधविचारो वर्तते। षट्दर्शनीप्रणेतारः वाचस्पतिमिश्राश्च तत्त्वबिन्दु-नामके ग्रन्थेऽपि शाब्दबोधविचारं कृतवन्तः।

तदनन्तरकाले नव्यन्यायप्रवर्तकत्वेन प्रख्याताः गङ्गेशोपाध्यायाश्च तत्त्वचिन्तामणि-ग्रन्थे शब्दखण्डे सप्रकरणं शाब्दबोधमधिकृत्य निरूपयांबभूवुः। तद्भागव्याख्यान-दीधित्यादिषु च शाब्दबोधविचारो वर्तते।

तदनन्तरकाले प्रायः षोडशसप्तदशशतकसमये स्थिताः वैयाकरणाः, मीमांसकाः, नैयायिकाः, आलङ्कारिकाश्च पदवाक्यार्थबोधविषयकान् भूषणसारः शब्दशक्ति-प्रकाशिका भाट्टरहस्यम् व्युत्पत्तिवादः पदवाक्यरत्नाकरः इत्यादीन् प्रौढान् ग्रन्थान्

निर्ममुः। तेषां कालतः पौर्वापर्यं निर्णेतुं न शक्यते। तत्र भूषणसारः प्राचीनः स्यात् इति केचित् आशेरते। अस्त्वयं विचारः।

तत्र भूषणसारः कारिकातद्व्याख्यानोभयात्मकः गम्भीरो ग्रन्थः। तत्र कारिकाः भट्टोजी-कृताः तद्व्याख्यानं कौण्डभट्टकृतम् इत्याहुः। अस्य प्रतिवाक्यं यथावस्थिततात्पर्यं न्यायमीमांसाव्याकरणग्रन्थेषु तलस्पर्शिपाण्डित्यवतामेव सुज्ञानमिति वस्तुस्थितिः। अत एवास्य अनेकानि व्याख्यानानि प्राचीनैः निर्मितानि, यथा – दर्पणः काशिका कान्तिः शाङ्करी तत्त्वदर्शिनी प्रभा इत्यादीनि।

अस्यां स्थितौ अद्यतनानां विदुषां विद्यार्थिनां च यथावस्थितार्थबोधसम्पादनं मनसि-कृत्य विद्वत्प्रवराः श्रीरामकृष्णमाचार्याः स्वगुरुप्रख्यापकनामाङ्कितां नरसिंहप्रियाख्यां व्याख्यां विरचय्य तस्य प्रथमभागं धात्वाख्यातार्थनिर्णयाख्यं प्रकाशयन्तीति महतः प्रमोदस्य स्थानम्।

अस्यां व्याख्यायाम् अस्ति किंचित् नवीनत्वं, यत् पूर्वतनानां व्याख्यानानां प्रतिपदं परिशीलनम्, तत्र युक्तायुक्तविवेचनम् स्वकीयविवरणस्य युक्तत्वप्रतिपादनेन मूलार्थस्य सुलभया शैल्या स्पष्टीकरणमिति।

यथा आदौ मङ्गलश्लोके **श्रीलक्ष्मीरमणम्** इत्यस्य विवरणम् –

"वस्तुतः श्रीश्चासौ लक्ष्मीश्च श्रीलक्ष्मीः, तस्याः रमणः श्रीलक्ष्मीरमणः इत्येव युक्तम्। अत्र च श्रीशब्दः यौगिकः तन्त्रेण श्रयति विष्णुम्, श्रीयते च तेन इति लक्ष्म्याः नित्यानपायित्वं सूचयति। ततश्च नित्यानपायिनी या लक्ष्मीः तस्याः रमण इत्यर्थः। किं च सैव पुरुषकाररूपिणी, तस्याः प्रेरणयैव विष्णुः सर्वजगद्रक्षकः भक्तानुग्राहक इति संप्रदायः। अतः कौण्डभट्टोऽपि तादृशलक्ष्म्याः साहाय्येन परमात्मनो विष्णोरनुग्रहं प्रार्थयते" इति।

तस्मिन्नेव श्लोके – "गौरीरमणम्" इत्यस्य पूर्वव्याख्यानेषु विद्यमानमनौचित्यं– "अत्रेदं विचारणीयम्" इत्यादिना विस्तरेण यत् प्रतिपादितं तद् एतेषामाचार्याणां गभीरं पाण्डित्यं, युक्तायुक्तविवेचनपूर्वकं सविवादार्थनिर्धारणकौशलं च तदनुगुणनानाग्रन्थपरिशीलनजन्यव्युत्पत्तिविशेषं च सूचयति।

"फलव्यापारयोर्धातुः" इति कारिकाव्याख्यानावसरे – "धातोः फलव्यापारयोः पृथक् शक्तिः अथ वा एका शक्तिः" इति विचारः, तत्र पक्षद्वयेऽपि गुणदोषचर्चा पृथक् शक्तिः इति सिद्धान्तस्य समर्थनम् इत्यादिकं विदुषां तोषाय कल्पते।
एवं प्रतिविषयम् अनेकमतविवरणं स्वमतस्थापनम् मूलग्रन्थानुगुण्योपपादनम् इत्यादिकं सुबोधपदवाक्यगर्भम् इदं व्याख्यानं जिज्ञासूनां विदुषां च उपकारकम् अनुसन्धातृणां मार्गदर्शकं च इतरव्याख्यानैरचरितार्थं चेति ममाभिप्रायः। इदानीं धात्वाख्यातार्थनिर्णयपर्यन्तो भागः प्रकाश्यते। अवशिष्टभागानामपि ईदृशरीत्यैव व्याख्यानेन प्रकाशनाय आयुरारोग्यादिकमनुगृह्णातु पण्डितवराणामेषामिति श्रीवेङ्कटेशं प्रार्थये।

मुम्बई रामानुजताताचार्यः
27-09-2014

नरसिंहप्रियोपेतः - वैयाकरणसिद्धान्तभूषणसारः - धात्वाख्यातार्थनिर्णयः

विषयानुक्रमणिका

विषयानुक्रमणिका

विषयानुक्रमणिका

श्रीगुरुभ्यो नमः

श्रीश्रीनिवासपरब्रह्मणे नमः

मङ्गलम्

शुक्लांबरधरं विष्णुं शशिवर्णं चतुर्भुजम्।
प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये॥
ज्ञानानन्दमयं देवं निर्मलस्फटिकाकृतिम्।
आधारं सर्वविद्यानां हयग्रीवमुपास्महे॥
यस्य द्विरदवक्त्राद्याः पारिषद्याः परः शतम्।
विघ्नं निघ्नन्ति सततं विष्वक्सेनं तमाश्रये॥
विघ्नेशं वैष्णवं नौमि शंखचक्रविशोभितम्।
गजाननं हीष्टकार्यविघ्नध्वंसाय सर्वदा॥
शारदा शारदाम्भोजवदना वदनाम्बुजे।
सर्वदा सर्वथास्माकं सन्निधिः सन्निधिं क्रियात्॥
श्रीवेंकटाचलाधीशं श्रियाध्यासितवक्षसम्।
श्रितचेतनमन्दारं श्रीनिवासं श्रये सदा॥
श्रीरामानुजभागिनेयममलं वाधूलगोत्रोद्भवं
कन्दाडान्वयमूलभूतमनघं श्रीदाशरथ्याह्वयम्।
तद्वंश्यं वरदार्यदेशिकमनुप्राप्तं हि काञ्चीपुरात्
श्रीरामानुजदर्शनं हि वितनितुं ह्यान्ध्रांश्च, सेवेऽनघम्॥
प्रादुर्भूतं च वंशेऽस्मिन्ननघं प्रपितामहम्।
पद्मनाभस्वामिवर्यं, वदान्यं च पितामहम्॥
श्रीवेंकटनृसिंहार्यं सम्प्रदायप्रवर्तकम्।
जगन्नायकीतिमान्यां प्रणमामि पितामहीम्॥
मातामहं तिरुमलार्यमादर्शाध्यापकं गुरुम्।
मातामहीं सदास्मासु वत्सलां नरसाम्बिकाम्॥
यतिराजवल्लीमम्बां तां पितरं वीरराघवम्।
रामनाम्ना च विख्यातं भ्रातरं भ्रातृवत्सलम्।

नरसिंहाचार्यनामानं साहित्याध्यापकं गुरुम्॥
नरसिंहभाष्यकारेत्यभिधं शाब्दिकं गुरुम्।
रामानुजाचार्यवर्यं न्यायशास्त्रविशारदम्।
प्रणमामि तथैवान्यान् बाल्ये ज्ञानप्रदान् गुरून्॥
प्राप्तसंस्कृतसंस्कारं शास्त्राध्ययनतत्परम्।
पुत्रवन्मामनुगृह्य समग्रं पाणिनीयकम्॥
यो ह्यध्यजीगपत्तं हि लङ्कवंशाब्धिकौस्तुभम्।
वैयाकरणपञ्चास्यं वेदवेदान्तपारगम्॥
वरदार्यस्य सच्छिष्यं नरसिंहाभिधं गुरुम्।
प्रणिपत्याथ तत्प्रीत्यै व्याख्यां विद्वन्मनोरमाम्॥
नरसिंहप्रियेत्याख्यां सर्वव्याख्याविमर्शिनीम्।
सरलां भूषणसारस्य कर्तुं चाहं समुद्यतः॥
कौशिकं वेंकटार्यं च वेदान्तोभयपरगम्।
साष्टाङ्गं प्रणिपत्याथ गुरुमध्यात्मसंपदाम्॥
नारायणगुरुं नौमि त्रिवेणीधामसंस्थितम्।
समुद्धर्तुमुपक्रान्तम् रामानन्दार्यदर्शनम्॥
पाणिन्यादिमुनीन् प्रणम्य विबुधं श्रीसूर्यनारायणं,
ताताचार्यगुरुं च सन्नुतगुणं कोटीश्वराख्यं तथा।
गोडाशास्त्र्यभिधं गुरूपमगुरुं, श्रीरामचन्द्रार्यकम्
विद्वद्वर्यगणं गुरूपममहं सम्प्रार्थये सिद्धये॥
कुटुम्बशास्त्रिणं मित्रं वसुधैककुटुम्बकम्।
सभाजये साधुवादैः ज्योत्स्नाप्राणं सुधीवरम्॥
हरेकृष्णं कुलपतिं विद्यापीठस्य नौमि तम्।
यस्यापि ह्यभ्यनुज्ञानं निदानं ह्यत्र प्रक्रमे॥
छात्रान् सर्वान् मयि स्निग्धानाशीर्भिश्च समेधये।
येषामुपकृतिः स्मर्या निदानं ह्यत्र प्रक्रमे॥
साम्राज्यलक्ष्मीं पत्नीमप्यनुरक्तां पतिव्रताम्।
तिरुमलार्यं लक्ष्मणं च कनिष्टभ्रातरौ तथा॥

अपत्यानि च स्निग्धानि तदपत्यानि वै पुनः।
परिवारजनान् सर्वानभिनन्द्य समारभे॥
रामकृष्णेति ख्यातोऽद्य प्रार्थये विबुधान् पुनः।
इष्टसाफल्यसिद्ध्यर्थमनुग्राह्योऽहमाशिषा॥

प्रास्ताविकम्

विदितचरमेवैतत्समेषां विदुषां यदिदानीं शब्दसाधुत्वसम्पादकं पाणिनीयमेवेति। अतस्तदेवोपजीव्य बहुभिर्विद्वद्भिः बहवो ग्रन्थाः रचिताः। व्याकरणस्य प्राधान्येन साधुशब्दनिरूपकत्वेन प्रकृतिप्रत्ययविभागेन पदानि प्रविभज्य लोपागमवर्णविकारैः कार्यैः परिनिष्ठितस्वरूपप्रतिपादकाः तत्तत्सूत्रार्थविवेचन परा एव ग्रन्थाः अत्र अधिकाः ये च प्रक्रियाग्रन्थाः इत्यपि विख्याताः। यद्यपि शब्दशास्त्रमिति प्रथितस्यास्य व्याकरणस्य साधुशब्दानुशासनमेव मुख्यं प्रयोजनम्, अथापि -

"यदधीतमविज्ञातं निगदेनैव शब्द्यते।
अनग्नाविव शुष्कैधो न तज्ज्वलति कर्हिचित्"॥

"अनर्थकं माधिगीष्महीत्यध्येयं व्याकरणम्"। "उतत्वः पश्यन्नददर्श वाचम्, उतत्वः शृण्वन्नशृणोत्येनाम्" इत्यादि भाष्योक्त्या, शब्दार्थयोरविनाभावाच्च अर्थज्ञानसहितं साधुशब्दज्ञानमेव व्याकरणस्य प्रयोजनं सिद्ध्यति।

अतश्चास्मिन् शास्त्रे प्रतिपाद्यप्राधान्यमनुसृत्य उपलभ्यमानाः ग्रन्थाः द्विधा विभज्यन्ते शब्दग्रन्थाः (प्रक्रियाग्रन्थाः), अर्थग्रन्थाः(आर्थिकग्रन्थाः)इति।

अथार्थविचारपराः व्याकरणस्य दर्शनत्वप्रतिपादकाश्च ग्रन्था अत्यन्तप्राचीनकालादेव आविर्भूताः, यद्यप्येषां संख्या अङ्गुलिगणनीयास्ति। तत्र च प्राथम्येन कीर्तनीयः ग्रन्थः व्याडिरचितः सङ्ग्रहग्रन्थः लक्षश्लोकात्मकः यश्च महा - भाष्यस्यैव आधारभूतः, असकृत् सादरं महाभाष्ये तत्तत्सन्दर्भे समुल्लिखितः, दौर्भाग्यात् इदानीं नोपलभ्यते। भर्तृहरिणाप्ययं ग्रन्थः परामृष्ट इति तावत्पर्यन्त मयमुपलभ्यमान आसीदित्यूहितुं शक्यम्।

यद्यपि महाभाष्येऽपि सर्वे विचाराः तत्तत्सन्दर्भेषु कृताः, यानेव प्रमाणीकृत्य समनन्तरैः अर्थविचारपराः ग्रन्थाः रचिताः, अथापि तस्य सर्वग्रन्थाकरत्वेन इदमित्थन्तया शब्दग्रन्थ इति वा अर्थग्रन्थः इति वा व्यपदेशः अशक्य एव।

ततः परं भर्तृहरिरेव वाक्यपदीयनाम्ना अर्थविचारपरं ग्रन्थं निर्ममे, य एव व्याकरणे आर्थिकग्रन्थेषु उपलभ्यमानः प्राचीनतमः भवति। ततः क्री.श.सप्तमशतकमारभ्य षोडशशतकपर्यन्तं व्याकरणे तथा प्रसिद्धः कोऽपि आर्थिकग्रन्थः नोद्भूतः।

अत्रान्तरे दर्शनान्तरीयैः स्वस्वग्रन्थेषु स्वस्वमतनिरूपणावसरे आर्थिकविचारान् कुर्वद्भिः शाब्दिकमतं हि प्रसङ्गादवतार्य कुत्रचिन्निराकृतं, कुत्रचिच्च तद्विरुद्धतया स्वमतमाविष्कृतम्। तथा पाणिनीयसूत्राणामपि अन्यार्थत्वमापादितम्।

एतत्सर्वं दर्शनान्तरीयैः क्रियमाणं वैयाकरणानामुद्वेगकारिनिरूपणमसहमानः सर्वतन्त्रस्वतन्त्रः श्रीमान् भट्टोजिदीक्षितः फणिभाषितभाष्याब्धेः शब्दकौस्तुभ - मुद्धृत्य तत्र तत्र प्रसङ्गवशात् दर्शनान्तरीयराद्धान्तविमर्शनपुरस्सरं तत्प्रदर्शितवैयाकरणसिद्धान्तखण्डनं निराकृत्य शब्दशास्त्रीयसिद्धान्तान् पुनः प्रतिष्ठापयामास।

शब्दकौस्तुभे च तत्र तत्र विप्रकीर्णान् वैयाकरणसिद्धान्तान् वैयाकरणाः सुखेन गृह्णीयुरिति बुद्ध्या सर्वान् शाब्दबोधसिद्धान्तान् समाकलय्य द्वासप्ततिकारिकामयं वैयाकरणसिद्धान्तमतोन्मज्जनं नाम कारिकाग्रन्थमनुजग्राह भट्टोजिदीक्षितः।

अस्य च कारिकाग्रन्थस्य अत्यन्तलघ्वी व्याख्या भट्टोजिशिष्येण वनमालिमिश्रेण रचिता,या च यद्यपि तथा न प्रसिद्धा तथापि कौण्डभट्टेन स्वभूषणे तत्र तत्र समुल्लिखिता।

अतीव लघुभूतया तया व्याख्यया असन्तुष्टः, विस्तृतव्याख्यां विना दुर्बोधममुं ग्रन्थं शिष्यसुखबोधाय भट्टोजिदीक्षितशिष्यः, तद्भ्रातुः रङ्गोजिभट्टस्य सुतः, पदवाक्यप्रमाणपारावारीणः कोण्डभट्टः,यश्चेदानीं कौण्डभट्ट इति ख्यातः वैयाकरणसिद्धान्तभूषणव्याख्यया वैयाकरणमतोन्मज्जनं समलञ्चकार। सा च

व्याख्या अतिविस्तृतेति मन्वानः, पुनस्तामेव सङ्क्षिप्य भूषणसारनाम्ना, या च रच्यमानैव नितरां प्राचुर्यमाप। अत्र च प्रमाणं क्री.श.1602 वर्षे लिखिता उपलभ्यमाना मातृकैव। इदानीमपि अस्य ग्रन्थस्य शतशः मातृकाः तत्तत्तालपत्रग्रन्थालयेषूपलभ्यन्ते। अयमेव ग्रन्थः दर्शनान्तरीयाणां कृते वैयाकरणसिद्धान्तप्रदर्शनपरः आसीत्। अस्य ग्रन्थस्यातिप्रचुरत्वादेव अस्य दशाधिकाः व्याख्याः उत्पन्नाः इतोऽपि रच्यमानश्च सन्ति। अयमेव ग्रन्थः उत्पत्तिकालमारभ्यैतावत् पर्यन्तं पठनपाठनेषु वरीवर्ति, यदध्ययनं विना वैयाकरणत्वमेव न सिध्यति। अथेदानीं कौण्डभट्टमधिकृत्य किञ्चिदत्र प्रस्तूयते।

महामहोपाध्यायः कौण्डभट्टः

दार्शनिकवैयाकरणेष्वग्रगण्यः, प्राचीननव्यवैयाकरणसिद्धान्ततीरयोः सेतुः, आन्ध्रदेशरत्नेष्वेकः कौण्डभट्टो वैयाकरणैस्सदाऽऽराध्यत एव। यतो ह्यस्य भूषणसारग्रन्थस्याध्ययनं विना वैयाकरणत्वमेव न सिध्यति इति पूर्वमेव प्रतिपादितम्।

अयं च कौण्डभट्टः काश्यपगोत्रो वह्वृचशाखाध्यायी। आन्ध्रदेशे[1] कृष्णानद्यास्तीरे स्थितश्चरुकूरुनामाग्रहारः एतत्पूर्वजानां निवासः। अत एवास्य वंशस्य चरुकूरुवंश इति नाम। इदानीमपि एतद्वंश्याः ब्राह्मणाः आन्ध्रदेशे तत्र तत्र निवसन्ति। अस्य पितामहो लक्ष्मीधरः सर्वविद्वत्कविसम्मतो मीमांसाद्वयपारगश्चासीत्। अयं लक्ष्मीधरः षड्भाषाचन्द्रिकेति प्राकृतव्याकरणम्, अनर्घराघवनाटकस्य इष्टार्थकल्पवल्लरी[2] व्याख्यां, गीतगोविन्दस्य श्रुतिरञ्जनी व्याख्यां, जयदेवप्रसन्नराघवस्य अभीष्टार्थदायिनीव्याख्यां, नलवर्णनकाव्यञ्च अरचयत्। अयं षड्भाषाचन्द्रिकायाः उपोद्घाते आरम्भे स्ववंशपरिचयमित्थमकरोत् –

[3](ओङ्कारार्थाय विज्ञानदायिने लोकसाक्षिणे ।

---

[1] द्र. षड्भाषाचन्द्रिकायाः प्रकाशितायाः प्रस्तावनम्। इयं मुम्बय्याम् ईस्वी1916 वर्षे के.पी. त्रिवेदिना आमुखेन सह प्रकाशिता। आन्ध्राक्षरैः मैसूर्नगरादपि प्रकाशिता।

[2] अनर्घराघवव्याख्या- इष्टार्थकल्पवल्लरी-Tanjore Des, Cat. Vol. viii No. 4269

[3] इष्टार्थकल्पवल्लरीप्रारम्भे मङ्गलश्लोकः

करुणामयवीक्षाय दक्षिणामूर्तये नमः ॥)
अस्त्यान्ध्रदेशे चरकूरिवंशः कृष्णातटे काश्यपगोत्ररूढः ।
यो बह्वृचानां बहुमाननीयो धत्ते सदा कीर्तिं सुवैजयन्तीम् ॥
यत्र नामादिमशिशोरङ्कितं **वेङ्कटेशितुः**।
सलक्ष्मीकस्स एवाद्यो भगवान् गृहदेवता॥
आसप्तपूरुषं यत्र लक्ष्मीवाण्योरवस्थितिः।
आसीत् **कपोतनाथस्य** वरात् **कदळवासिनः**॥
तत्रोदभू**त्तिम्मयसोमयाजी** बुधोऽष्टभाषाकविपट्टभद्रः(बन्धः)[4] ।
नित्यान्नदाता निजभक्तिलब्ध**वृषाकपायीरमण**प्रसादः॥
तस्मादुदै(दभू)द्बह्वृचचक्रवर्ती **यज्ञेश्वरः** पण्डितसार्वभौमः ।
सर्वाम्बिका सर्वगुणोपपन्ना तस्य द्वितीया भवदम्बिकाभा(म्बा) ॥
ताभ्यामुदभवन्पुत्राः सर्वाचारनियामकाः(चत्वारः श्रीनिकेतनाः) ।
विधिमन्त्रार्थवादज्ञा(निपुणा)श्चत्वारो निगमा इव ॥
षड्दर्शनीतत्त्वविवेककर्ता स्वशिष्यसम्पादितदिग्जयश्रीः।
तेष्वादिमः पण्डितसार्वभौमः(पट्टबन्धः) श्रीकोण्डभट्टो जयतीह लोके
लक्ष्मीधरस्तदनुजो दक्षिणामूर्तिकिङ्करः ।
सर्वविद्वत्कविमतः सज्जनाप्तो विराजते(जयति क्ष्मातले सुधीः) ॥
तेन लक्ष्मीधरार्येण षड्भाषाचन्द्रिकानघा।
विद्वत्कविचकोराणां प्रीतये क्रियतेधुना॥
(स गार्हस्थ्ये चिरं स्थित्वा जित्वा सर्वदिशः सुधीः ।
सन्यस्याजनि योगीन्द्रो **रामानन्दाश्रमा**भिधः ॥) इति।

लक्ष्मीधरस्य ज्येष्ठभ्रातुः कोण्डभट्टस्य द्वितीयः सुतः श्रीयज्ञनारायणः शास्त्रदीपिकायाः प्रभामण्डलव्याख्यामकरोत्। तत्प्रस्तावनायां सोऽपि स्वपरिचयमित्थमकरोत् -

वन्देऽस्मत्प्रपितामहं **तिरुमलश्रीयज्वराजं**[5] तथा।

---

[4] एतेषु श्लोकेषु ( ) एतत्कोष्टकान्तर्गतः पाठः इष्टार्थकल्पवल्लरीप्रस्तावे।


[5] आन्ध्रदेशे तिरुमल इति शब्दस्य तिम्मय इति आख्यान्तरम् प्रसिद्धम्। तिम्मयसोमयाजी तिरुमलयज्वराजश्च अभिन्नौ इति विमर्शकानामाशयः।

यज्ञेशं च पितामहं स्वपितरं **श्रीकोण्डभट्टारकम्**॥
तस्यानुजनिं पितृव्यतिलकं श्रीलक्ष्मणार्यं गुरुम्।
ज्येष्ठं श्रेष्ठगुणान्वितं **तिरुमलाख्यानं** वरं यज्वनाम्॥ [6]

अयमेव लक्ष्मीधरः कौण्डभट्टस्य पितामहः भट्टोजिदीक्षितस्य पिता चेति भट्टोजिदीक्षितेनैव स्वीये शब्दकौस्तुभमङ्गलाचरणे तत्त्वकौस्तुभपादान्तगद्येषु च स्पष्टमित्थमभिहितम् –

नत्वा **लक्ष्मीधरं** तातं सुमनोबृन्दवन्दितम्।
फणिभाषितभाष्याब्धेः **शब्दकौस्तुभमुद्धरे**॥ इति,

"इति श्रीमद्विद्वन्मकुटमाणिक्य**लक्ष्मीधरभट्ट**सूनुभट्टोजिभट्टविरचिते **तत्त्व-कौस्तुभे**" इति च। कौण्डभट्टस्तु भट्टोजिदीक्षितं स्वपितृव्यत्वेन ख्यापितवानेव। तथा च कौण्डभट्टस्य वंशवृक्षः इत्थं निरूपयितुं शक्यः –



---

6 यज्ञनारायणेन स्वपितृव्यस्य नाम लक्ष्मण इत्युल्लिखितम्। अयं लक्ष्मणः लक्ष्मीधरश्चाभिन्नाविति सप्रमाणं निरूपयन्ति पि.के.गोडे प्रभृतयः। द्र. षड्भाषाचन्द्रिकायाः के.पि. त्रिवेदिनामामुखम्। (1916)

अयं लक्ष्मीधरः लक्ष्मणार्यनामान्तरेणापि प्रसिद्धः आन्ध्रदेशं पालयतः विजयनगराधिपस्य अरवीडुवंशजस्य तिरुमलरायस्य (क्री. श.1570-73)आस्थानपण्डित[7] आसीत्। वेल्लूर्[8] पालकः चिनबोम्मभूपालः, यस्य आस्थानपण्डितः अप्पय्यदीक्षितः, स्वरचितप्राकृतमणिदीपिकायां षड्भाषा-चन्द्रिकां समुल्लिलेख। अतोऽयम् अप्पय्यदीक्षितसमसामयिकः अप्पय्य-दीक्षितात् ज्येष्ठश्चेत्यूह्यते। भट्टोजिदीक्षितस्य अप्पय्यदीक्षितशिष्यत्वमपि अनयोः सुदृढं स्नेहमभिव्यनक्ति। अयञ्च लक्ष्मीधरः सुचिरं गृहस्थाश्रमे स्थित्वा सन्न्यस्य रामानन्दाश्रमनाम्ना प्रसिद्धोऽभूत्। सन्न्यासस्वीकारात् पूर्वमेवानेन षड्भाषाचन्द्रिका रचिता। अस्य वंशस्य तिरुपतिवेङ्कटेशः गृहदेवता इति, अत एव एतद्वंशमूलपुरुषः तन्नाम्ना (तिरुमलनाम्ना) प्रसिद्ध इति, अयं दक्षिणा-मूर्त्युपासक इति च स्पष्टं ज्ञायते। अस्य लक्ष्मीधरस्य भट्टोजिदीक्षित-रङ्गोजिभट्टाभिधौ द्वौ पुत्रौ आस्ताम्।

न कोऽप्यस्तीदानीं वैयाकरणस्तादृशो यस्सिद्धान्तकौमुदीं न पठति। अयंञ्च भट्टोजिदीक्षितः आत्मना वंशेन च पाणिनीयं स्वायत्तं चकार। न केवलमयं पाणिनीये व्याकरणे, किन्तु अन्यतन्त्रेष्वपि महापण्डित आसीत्। भट्टोजि-दीक्षितः इक्केरीं पालयतः केलदिवेङ्कटाद्रिनाम्नः आन्ध्रभूपस्य (ईस्वी 1582-1629) आस्थानपण्डितो[9] भूत्वा तत्प्रेरणया तत्त्वकौस्तुभग्रन्थं वेदान्ते रचयामास। एवं न्याये तर्कामृतम्, पूर्वमीमांसायां तन्त्रसिद्धान्तदीपिका, तन्त्राधिकारनिर्णयः, धर्मादिशास्त्रेषु गोत्रप्रवरनिर्णयः, कालनिर्णयः,

---

[7] द्र.-प्रभामण्डलः – यज्ञनारायणकृतः – Tanjore Des. Cat. Vol.xii, कविविवेकटिप्पणी।

[*] लक्ष्मीधरानुजस्य तद् भ्रातृषु तृतीयस्य चतुर्थस्य च नाम तद्विषयकः परिचयो वा नोपलभ्यते।

[8] वेल्लूर्पत्तनम् इदानीं तमिलनाडुराज्ये आन्ध्रसीमायामस्ति।

[9] See- A contact of Bhattoji and some members of his family with keladi rulers of ikkeri-P.K.Gode, Studies of Indian literary history vol iii p.206.

तिथिनिर्णय इत्याद्यनेकान् ग्रन्थानरचयत्। अस्य दीक्षितस्य समयः ईस्वी 1535 तः 1625 पर्यन्तमिति डा. महेशदत्तशर्माणो[10] निरूपयन्ति।

भट्टोजिदीक्षितस्यानुजो रङ्गोजिभट्टोऽपि महाविद्वानासीत्। अस्य रङ्गोजिभट्टस्य वेदान्तविद्यागुरुर्नरसिंहाश्रमी। इक्केरीप्रभोः केलदिवेङ्कटाद्रेरास्थानेऽयमप्यासीत्। अनेनाद्वैतवेदान्ते अद्वैतचिन्तामणिः, अद्वैतसारोद्धारः (व्याससूत्रव्याख्या) इति द्वौ ग्रन्थौ रचितौ। अयं न केवलं पण्डितः, अपि तु कविपुङ्गवोऽपि। अनेन हि शिवोल्लासकाव्यं रचितम्। अयम् इक्केरीराजसभायाम् ईस्वी 1629 वर्षे विद्याधीशवडेरुनामानं माध्वयतिं वादे जित्वा प्रभुणा आन्दोलिकादानेन[11] सत्कृत इति ज्ञायते। अयं माध्वसिद्धान्तखण्डनमप्यलिखदिति ज्ञायते। अयं रङ्गोजिभट्टः आन्ध्रदेशे तिरुपतिक्षेत्रसमीपे स्थिते श्रीकालहस्तिक्षेत्रे विराजमानस्य कालहस्तीश्वरस्य भक्तः। अयं चेश्वरः वायुलिङ्गरूपेण प्रसिद्धः। रङ्गोजिभट्टः स्वीये शिवोल्लासकाव्ये स्वेष्टदेवतामित्थमस्तौत् –

ग्रन्थे चास्मिन् तव विलसिते कालहस्तीश नित्यं
कृत्वाभ्यासं भवति विजयी भक्तिभावैकनिष्ठः॥

श्रीकालहस्तिक्षेत्रमाहात्म्यमेव काव्येऽस्मिन् इतिवृत्तभूतम्। अतश्च रङ्गोजिभट्टस्य निवासः कालहस्तिपरिसरे स्यात्। अस्य कालः 1540 खैस्ताब्दतः 1635 पर्यन्तमित्यूह्यते।

अद्वैतशास्त्रव्यवस्थापनेन लब्धप्रतिष्ठस्य रङ्गोजिभट्टस्य पुत्रः, भट्टोजिदीक्षितस्य शिष्यःकौण्डभट्टोऽपि न्यायव्याकरणाद्वैतवेदान्तमीमांसादिषु शास्त्रेषु निष्णातः, व्याकरणशास्त्रीयार्थिकग्रन्थकर्तृषु मुख्यं स्थानमलङ्करोति। यतोऽयमान्ध्रस्ततोऽस्य नाम **कोण्डभट्टः** इति स्यात्। अस्य पितामहस्याग्रजः कोण्डभट्टारक इति ख्यातः, यस्मादस्य पितामहेन[12] विद्या गृहीता। किञ्च पदार्थदीपिकाया अन्ते कोण्डभट्ट इति नामैव दृश्यते[13]। भूषणारम्भेऽपि कोण्डभट्ट इति नामैव दृश्यते। अयं च कोण्डभट्टः केलदिभूपस्य वेङ्कटाद्रेः

[10] द्र. काशिकावृत्तिसिद्धान्तकौमुद्योस्तुलनात्मकमध्ययनम्, पूना-1074

[11] द्र. विद्याधीशवडेरुसंज्ञकयतिं इत्यादिभूषणसारश्लोकः।

[12] अनर्घराघवव्याख्या-इष्टार्थकल्पवल्लरीप्रस्तावः-Tanjore. Des. Cot. No.viii 4269

[13] (i) पदार्थदीपिकायां पृ.5। कोण्डभट्टेन निर्मिता कोण्डभट्टकृता (ii) श्रीकोण्डभट्टः कुर्वेऽहं वैयाकरणभूषणम्-5 श्लोकः।

पौत्रस्य वीरभद्रस्य (ईस्वी 1629-1645) आस्थाने आसीत्[14]। तस्य भूपस्य प्रेरणया तर्कप्रदीप इति तर्कग्रन्थमरचयत्। अनेन कौण्डभट्टेन रचिता ग्रन्थाः श्री पि. के. गोडेमहोदयैः स्वीये लेखे एवमुल्लिखिताः –

1. तर्कप्रदीपः – वीरभद्रभूपप्रेरणया लिखितः – Hall P 79 Ben 165
2. तर्करत्नम् - Hall P 78
3. (न्याय) पदार्थदीपिका- वाराणस्यां प्रकाशिता, ईस्वी 1900
4. वैयाकरणसिद्धान्तभूषणम् – वाराणस्यां प्रकाशितम्, ईस्वीये -1900
5. वैयाकरणसिद्धान्तभूषणसारः
6. लघुवैयाकरणसिद्धान्तभूषणसारः Oppert 5397
7. वैयाकरणसिद्धान्तदीपिका – K 88
8. स्फोटवादः –Peters I-21

तत्रैव तैः प्रतिपादितं यत् न्यायपदार्थदीपिकायां कौण्डभट्टो वैयाकरणसिद्धान्तभूषणं तर्करत्नं च समुल्लिलेखेति। अतश्च भूषणरचना तर्करत्नरचना वा प्रथमेति वक्तव्यम्। वाराणस्याः सरस्वतीभवनग्रन्थालये वैयाकरणसिद्धान्तभूषणसारस्यैको हस्तलेखो[15] दरीदृश्यते, यस्य कालः 1637 खैस्ताब्द इति उल्लिखितः। अतश्चास्मात् कालात् पूर्वमेव भूषणसारो रचितश्चेद् भूषणरचना ततोऽपि पूर्वैव भवति। गुरुप्रसादशास्त्रिभिः स्वसम्पादितभूषणसारारम्भे भूषणसारलेखनकालः1660 विक्रमाब्दः (ईस्वी 1602) निर्दिष्ट इति संस्कृतव्याकरणशास्त्रेतिहासे युधिष्ठिरमीमांसकाः[16]। प्रायोऽयं कालो भूषणस्य स्यात्, न तु भूषणसारस्य। पदार्थदीपिकायां भूषणसारस्यानुल्लेखाद् भूषणसाररचना पदार्थदीपिकातः परैवेति कौण्डभट्टग्रन्थानां क्रम इत्थं निर्देष्टुं शक्यते –

1.वैयाकरणसिद्धान्तभूषणम्, 2.तर्करत्नम्, 3.पदार्थदीपिका, 4. वैयाकरणसिद्धान्तभूषणसारः लघुभूषणसारश्च, 5. तर्कप्रदीपः, 6.वैयाकरणसिद्धान्त-

---

[14] P.K.Gode – The Chronology of the works of kondabhatta- p.207-211. Studies in Indian litarery History Vol.iii, 1956.

[15] सरस्वतीभवनसूचीपत्रे – क्रमसंख्या 39558 वै. भू. सारः, लिपिकालः – सं. 1695

[16] संस्कृतव्याकरणशास्त्रेतिहासः – द्वितीयभागः, पृ. 393

दीपिका, 7. स्फोटवाद इति। अस्य ग्रन्थरचनाकाल ईस्वी. 1610-1660 इति गोडेमहाशयैरुक्तम्, परन्तु ईस्वी. 1600-1650 इति निर्देशो युक्त इति मे मतिः। तस्मादस्य काल ईस्वी.1570-1650 इत्यूहितुं शक्यते।
अस्य च कौण्डभट्टस्य गुरुः शेषकृष्णपण्डितसूनुर्वीरेश्वर इति केचन। ते त्वत्र प्रमाणतया भूषणसारगतमिदं मङ्गलश्लोकमुदाहरन्ति-

अशेषफलदातारमपि सर्वेश्वरं गुरुम्।
श्रीमद्भूषणसारेण भूषये शेषभूषणम् ॥

परन्त्वेषश्लोको न गुरुस्तोत्रपरः, किन्तु इष्टदेवतास्तुतिपर एव। दर्पणादि-व्याख्यासु तथैव व्याख्यातत्वात्। यश्शेषभूषणः पूर्वं स्तुतः तस्यैव कृति-समर्पणस्य युक्तत्वात्। पदार्थदीपिकाया आरम्भे मङ्गलश्लोकोऽप्येतत्तुल्य[17] एवास्ति। हरिदीक्षितेनापि शब्दरत्नारम्भे एतादृश एव श्लोकः[18]कृतः। अतश्चायमिष्टदेवतास्तुतिपर एव। स चेष्टदेवो हरिहरनाथः। एते च दीक्षित-वंश्या हरिहराद्वैतवादिनः।लक्ष्मीधरोऽपि षड्भाषाचन्द्रिकायाः प्रस्तावे स्ववंशवर्णनसन्दर्भे स्वयं स्वपितामहं वृषाकपायीरमणप्रसादं ख्यापयति। एतादृशो हरिहराद्वैतवादो बहोः कालात्पूर्वमेव आन्ध्रदेशे प्रसिद्धः। ईस्वीय-त्रयोदशशतके नेल्लूरुमण्डलं पालयतो मनुमसिद्धेर्मन्त्री, भारतान्ध्रीकर्तृष्वेकः **तिक्कन** महाकविः स्वीयं भारतं हरिहरनाथस्यैव समर्पितवान्। यदा स्वप्नेऽयं स्वेष्टदैवं हरिहरनाथमपश्यत्, तदा स तमित्थमपृच्छत्-

किमस्थिमालां किमु कौस्तुभं वा परिष्क्रियायां बहुमन्यसे त्वम्।
किं कालकूटं किमु वा यशोदास्तन्यं तव स्वादु वद प्रभो[19]मे ॥ इति।
श्रीलक्ष्मीरमणं नौमि गौरीरमणरूपिणम्।
स्फोटरूपं यतस्सर्वं जगदेतद्विवर्तते॥

इति भूषणसारमङ्गलश्लोकोऽप्येतादृश एव खलु।तस्मादयं कौण्डभट्टः पितृव्य-जनकयोस्सविध एव सर्वा विद्या जग्राहेति युक्तम्। तत्रापि व्याकरणं स्व-पितृव्यादेव। अत एव तमपि भूषणेऽस्तौत्[20]।

---

[17] श्रीमत्सिद्धिकरं कान्तं रमोमारमणात्मकम्। दयासिन्धुं चिदानन्दं सितासितमुपास्महे॥

[18] शेषविभूषणमीडे शेषशेषार्थलाभाय। दातुं सकलमभीष्टं फलमीष्टे यत्कृपादृष्टिः॥

[19] आन्ध्रमहाभारते उद्योगपर्वणि पीठिकायामस्ति।

कौण्डभट्टस्य ग्रन्थाः

अनेन रचितेषु ग्रन्थेषु त्रय एव प्रकाशिताः समुपलभ्यन्ते। अन्येषां नाममात्रावशेषता वा, हस्तलिखितमातृकारूपता वा स्यात्। तत्र प्रकाशितानां सङ्क्षिप्तः परिचयोऽत्र प्रस्तूयते।

पदार्थदीपिका

अयं न्यायग्रन्थो यद्यपि अन्नंभट्टकृततर्कसङ्ग्रहतुल्यः, अथापि तस्मादस्य वैलक्षण्यं बह्वस्ति। स च तर्कसङ्ग्रहोऽत्यन्तं सङ्क्षिप्तः, अयं तु न तथा। किञ्च, पृथिव्यादिलक्षणेष्वव्याप्त्यादिदोषपरिहाराय जातिपर्यन्तानुधावनं कर्तव्यमेवेत्ययं पृथिवीत्वजातिमती गन्धवती वा पृथिवीत्यादिना सम्यक् प्राकाशयत्। तत्र मीमांसकानामन्येषाञ्च मतानि प्रदर्शितानि। यथा वायोरनुमानगम्यतेति नैयायिकसिद्धान्तमुक्त्वा तस्य प्रत्यक्षत्वमेवेति मीमांसकानां मतं सम्यगत्र प्राकाशयत्। यद्यप्यस्मिन् ग्रन्थे न्यायवैशिषकयोः पदार्थाः निरूपिताः, तथापि नायं ग्रन्थः केवलन्यायवैशेषिकसम्बद्धः, किन्तु सर्वदर्शनसम्बद्धः। अत्र भाट्टप्राभाकरतान्त्रिकादिमतेष्वपि प्रमाणादिविचारः पदार्थविचारश्च कृतोऽस्ति। यद्यप्ययं ग्रन्थो बालव्युत्पत्तिसिद्धये कृतः, अथापि सर्वैरपि दर्शनशास्त्राध्यायिभिरवश्यमध्येतव्यः। अयमेव ग्रन्थः कौण्डभट्टस्य सुनिशिते सर्वशास्त्रपाण्डित्ये प्रमाणभूतः।

अस्त्यन्यदपि किञ्चिदत्रावधेयम्। तर्कसङ्ग्रहकारोऽन्नम्भट्टः, पदार्थदीपिकाकारः कौण्डभट्टः, उभावप्यान्ध्रदेशीयौ। कौण्डभट्टवदन्नम्भट्टोऽपि व्याकरणादिशास्त्रादिष्वपि ग्रन्थानरचयत्। पदार्थदीपिकाकारः कौण्डभट्टः ख्रैस्ताब्दीयषोडशशतकान्तिमार्धे सप्तदशशतकपूर्वार्धे चासीदिति पूर्वमेव निर्णीतम्। अन्नम्भट्टस्तु ईस्वीयाष्टादशशतकप्रथमपादे आसीदिति श्रीमद्भिर्बोडस[21] महोदयैर्न्यरूपि। तस्माद् द्वयोः कौण्डभट्ट एव पूर्वः। न्यायशास्त्रप्रविविक्षूणां बालानामुपकारायैव हि पदार्थदीपिकापि कृता । तस्मादुभयोर्मध्ये प्राथमिकस्तादृशः प्रयासः कौण्डभट्टस्यैवेति सिद्धम्। यद्यपि पदार्थदीपिका बालव्युत्पत्ति-

---

[20] भट्टोजिदीक्षितमहं पितृव्यं नौमि सिद्धये।

[21] Tarka-samgraha, Bobay Sanskrit Series No. Lv. P. LVI. 5

सिद्धये कृता, तथापि प्रथमं बालानां तस्य अध्ययने क्लेशस्तदानुभूतः स्यात्, येनानुभवेन प्रेरितोऽन्नम्भट्टस्तस्या एव पदार्थदीपिकायाः सङ्ग्रहं कृतवानित्यप्यूहितुं सन्ति प्रमाणानि। पदार्थतर्कशब्दौ पर्यायौ। सङ्ग्रहपदं कौण्डभट्टेन नोपयुक्तम्, तस्य प्राथमिकत्वात्। पदार्थदीपिकाया एव तर्कसङ्ग्रहस्य मूलत्वात् तर्कसङ्ग्रहस्य तत्सङ्क्षेपरूपत्वात् सङ्ग्रहपदं अन्नंभट्टेन प्रयुक्तम्। यद्यपि तेन सङ्ग्रहः कृतः प्रथमसोपाने वर्तमानानां बालानामुप -काराय, अथापि पदार्थदीपिकोक्ता विषयास्सर्वेऽपि तस्मिन् न सङ्गृहीता इति बुद्ध्यैव स पुनर्दीपिकानाम्ना तस्य पूरकं टीकाग्रन्थमरचयत्। यद्यस्माभिः पदार्थदीपिका तर्कसङ्ग्रहदीपिकाभ्यां तोल्यते, तर्ह्ययमर्थो निश्चितो भवति। जगदीश-गदाधरादितार्किकाणां प्रभावात् केचन विशेषाः सङ्ग्रहदीपिकयोर्भवन्तु नाम, तयोर्जीवातुभूतत्वं पदार्थदीपिकाया एवेति निश्चप्रचम्। ग्रन्थेऽस्मिन् वैयाकरणसिद्धान्तभूषणस्यासकृदुल्लेखोऽस्ति। तस्मात् भूषणरचनैव प्राथमिकी स्यादित्यूह्यम्।

वैयाकरणसिद्धान्तभूषणम्

भट्टोजिदीक्षितेन शब्दकौस्तुभरचनानन्तरमार्थिकपराणां वैयाकरणसिद्धान्तानां प्रदर्शनाय कारिकामयः कश्चन ग्रन्थो रचितः। यश्च वैयाकरणमतोन्मज्जनी-नाम्ना प्रथितः।शब्दकौस्तुभे योऽर्थो निर्णीतः, स एवात्र सङ्क्षेपेण कथ्यते इति प्रतिज्ञापि तेनादौ कृता। तत्कारिकाग्रन्थस्य व्याख्यारूपमिदं भूषणम्। यतोऽयं कौण्डभट्टो भट्टोजिदीक्षितस्य साक्षाच्छिष्यः, तस्माद् तस्य हृदयगता भावा सम्यगनेन ज्ञाता आविष्कृताश्च। "गौतमजैमिनीयवचनव्याख्यातृभि-र्दूषितान् सिद्धान्तानुपपत्तिभिः प्रकटये तेषां वचो दूषये" इति हि कौण्डभट्टस्य प्रतिज्ञा।[22] अनया प्रतिज्ञया कौण्डभट्टस्येतरशास्त्रज्ञेषु तत्सिद्धान्तेषु चावज्ञेति नैव मन्तव्यम्। शास्त्रमूलभूतसिद्धान्तापरित्यागेन यावत्पर्यन्तं सर्वेषां शास्त्राणामैकमत्यं संपादयितुं शक्यम्, तावत्पर्यन्तमैकमत्यमनेन भूषणे प्रति - पादितम्। अत एवायं ग्रन्थो न केवलं वैयाकरणैः, किन्तु तन्त्रान्तरीयैरपि शिरसि धार्यते। उक्तञ्च शाब्दतरङ्गिण्यां श्रीमद्भिः सुब्रह्मण्यशास्त्रिभिः[23] –

---

[22] भूषणारम्भे **पाणिन्यादिमुनीन्** इत्यादि चतुर्थः श्लोकः।

[23] शाब्दतरङ्गिणी – P.25, Sanskrit Education Society, Madras 1969.

"नव्यवैयाकरणसिद्धान्तानपेक्ष्य प्राचीनवैयाकरणसिद्धान्ताः नैयायिकसिद्धान्त -सन्निकृष्टा वर्तन्ते" इति। अत्रैकमुदाहरणं प्रदीयते - वैयाकरणसिद्धान्तभूषणे सुबर्थनिर्णये[24]धर्मी एव सुबर्थ इति निर्णीय, सम्बन्धस्य षष्ठ्यर्थतामुक्त्वा ओदनस्य पाक इत्यादौ कर्मतायां षष्ठीत्यादि कथमिति विशङ्क्य "आश्रयोऽपि न विभक्त्यर्थः। घटादिरूपस्य तस्य प्रकृत्यैव लाभात्। एवमवधिर्वृक्षादिरूपो न विभक्त्यर्थः। उद्देश्योऽपि ब्राह्मणादिर्न विभक्त्यर्थः। तथा चाश्रयत्वादिकमेवार्थः। अनन्यलभ्यत्वात्। तच्च निरूपकत्वादिना धात्वर्थेऽन्वेति। कर्मणि द्वितीयेत्यादेश्शक्तिशक्तिमतोस्तादात्म्याभ्युपगमेनोपपत्तिः।अन्यथा द्व्येकयोरिति विहितैकवचनादेरपि सङ्ख्याविशिष्टाश्रयवाचकत्वापत्तिः" इत्यादिना धर्मवाचकत्वमेव सुपां व्यवस्थापितवान् कौण्डभट्टः।अयमेव नव्यनैयायिकसिद्धान्त इति सर्वैर्विद्वद्भिर्ज्ञायत एव।

किञ्चात्र कौण्डभट्टेन नव्यमार्गबीजावापोऽपि कृतः। अभेदैकत्वसङ्ख्यानिर्णये[25] प्राचीनं मतद्वयमुपपाद्य अन्ते नव्यमतमित्थं स प्राचीकटत् –"नव्यास्तु पदार्थैकदेशत्वात् राजपुरुष इत्यत्र राज्ञः, तत्र सङ्ख्यात्वरूपेणापि न तदन्वय इत्याहुः" इति। अत्राहुरित्यनेनारुचिरेव ग्रन्थकर्तुः सूचितेति मन्येरन्। परन्त्वत्र नव्यमते एवेष्टतां तत्रैव स इत्थं प्राकाशयत् – "समासादौ शक्तिः कल्प्यमाना सङ्ख्याविशिष्टे एव सा कल्प्येत्यभ्युपगमे तु नायं दोषः। परन्त्वनुभवविरहात् जिज्ञासानुरोधेन शक्तौ तु ज्ञानेच्छयोः समानप्रकारत्वेन हेतुहेतुमद्भावात् विशिष्यैव वाच्यतापत्तेः, इष्टापत्तौ जिज्ञासोच्छेदापत्तेः। मूलोच्छेदात् शक्तिकल्पनमेवानर्थकमिति विभावयाम इति दिक्" इति। वैयाकरणसिद्धान्तदीपिकेति कश्चन ग्रन्थः स्वतन्त्रः यद्यैतत्कृतः स्यात्, तर्हि तत्र कौण्डभट्टहृदयं नव्यमार्गावलम्बि वा न वेति सम्यग् ज्ञातुं शक्येत। परन्त्वयं ग्रन्थः नैतावता समुपलब्धः।

यतो ह्ययं भट्टोजिदीक्षितकारिकाग्रन्थस्य व्याख्याग्रन्थः, तस्मात् भट्टोजिदीक्षितस्याशय एव शब्दकौस्तुभाद्युक्तः परिष्कृत्यात्र प्रतिपादितः। उदाहरणार्थम् –"तद्विश्लेषजनकतत्क्रियानाश्रयत्वे सति विभागाश्रयत्वम्" इति

---

[24] वै.सि. भूषणम् सुबर्थनिर्णयः –p.143, 144।

[25] वै.सि.भूषणे p.286.

लक्षणं न दीक्षितेन कण्ठत उक्तम्। तथैवान्ये च विषयाः शब्दकौस्तुभे सूक्ष्मतया निर्दिष्टाः अस्मिन् विशदीकृताः। धात्वर्थनिर्णयादिषु कृतं नैयायिक-मीमांसकादिमतवर्णनम्, तत्खण्डनञ्चास्य सर्वतन्त्रस्वतन्त्रतामभिव्यनक्ति। तथैव "कर्मकर्तृव्यपदेशाच्च" इत्यादिवेदान्तसूत्रार्थनिर्णयादिषु तस्याद्वैतशास्त्र-पाण्डित्यं स्फुटीभवति।

अनेन च भूषणे वहवो ग्रन्थाः ग्रन्थकर्तारश्च समुल्लिखिताः। ते च यथा –
अद्वैतसारोद्धारः, अनुव्याख्यानं, <u>अप्पय्यदीक्षितः</u>, अमरः, आख्यातवाद-शिरोमणिः, आचार्यः, उदयनाचार्यः, ऋषभः, कर्कटी, कलापः, कल्पतरुः, कल्पतरुकारः, काव्यप्रकाशकारः, कुसुमाञ्जलिः, कैयटः, खण्डनकारः, गार्ग्यः, गीता, गुरुः, गौतमः, जयतीर्थः, जैमिनिः, तत्त्वविवेकः, दुर्गसिंहः, धातुवृत्तिः, नयविवेकटीका, नयविवेकवरदराजीयं, निरुक्तम्, निरुक्तकारः, <u>नृसिंहाश्रमः</u>, न्यायतात्पर्यटीका, न्यायरक्षामणिः, न्यायसुधा, पञ्चशिखा -चार्यः, पतञ्जलिः, पतञ्जलियोगशास्त्रम्, पराशरः, परिमलः, पाणिनिः, पार्थसारथिमिश्रः, प्रभाकरः, ब्रह्मोत्तरखण्डः, भट्टः, <u>भट्टोजि</u>, भर्तृहरिः, भागवतं, भामती, भाष्याकारः, भीमसेनः, मण्डनमिश्रः, मध्वः, <u>मनोरमा</u>, महाभारतं, माधवाचार्यः, माध्वः, मिश्रः, मुकुटः, <u>रङ्गोजि</u>, रामकृष्णभट्टाचार्यः, लीलावत्युपायः, <u>वरदराजः</u>, वसिष्ठः, वाक्यपदीयं, वाचस्पतिमिश्रः, विवरणं, विवरणटिप्पणी, विवरणाचार्यः, वेदान्तभूषणकृत्, व्यासः, शङ्कराचार्यः, शबरः, <u>शब्दकौस्तुभः</u>, शाकटायनः, शास्त्रदीपिका, श्रीधरस्वामी, संक्षेपशारीरकृत्, <u>सिद्धान्तकौमुदी</u>, <u>सिद्धान्तलेशः</u>, <u>सुधा</u>, स्कन्दपुराणं, हरदत्तः, हरिः, हेलाराजः

एवं तर्कप्रदीपे कौण्डभट्टः स्वपितुः अद्वैतचिन्तामणिग्रन्थमुल्लिलेख। एतैः ग्रन्थानां ग्रन्थकर्तृणां चोद्धरणैरेव ज्ञायते यत् कौण्डभट्टः सर्वशास्त्रपारङ्गत इति। मीमांसा शास्त्रे तु निरुपममेव पाण्डित्यं तस्य। बहुषु सन्दर्भेषु भट्टपादानां वचनान्यपि खण्डितानि। न्यायसुधाशास्त्रदीपिके च सुनिशितं परिशीलिते। अस्य न्यायशास्त्रवैशारदी च न्यायलीलावत्यादिग्रन्थस्थविषयाणां विमर्शने दीधितिकारादीनां मतखण्डनादिषु सुव्यक्ता।

वैयाकरणसिद्धान्तभूषणसारः

अयमपि भूषणस्य सारग्रन्थः कौण्डभट्टेनैव रचितः। लघुत्वात् पठनपाठनेषु प्रचारोऽस्यैवासीन्महान्। विषयस्य निर्दुष्टता, सङ्क्षेपश्चात्र कारणीभूतौ। पदवाक्यप्रमाणशास्त्रीयेषु सर्वेषु शाब्दबोधविचारपरेषु आर्थिकग्रन्थेषु प्रसिद्धतमोऽयं भूषणसार इति विदितचरमेव समेषां विदुषाम्। अस्य ग्रन्थस्य रचनासमयमारभ्य एतावत्पर्यन्तं न केवलं वैयाकरणैः अपि तु नैयायिकैः मीमांसकैश्च सश्रद्धम् अधीयमानोऽयम् आरम्भत एव शास्त्राध्ययनपाठ्यक्रमे विशिष्टं स्थानमधितिष्ठति। शास्त्रान्तरीयेषु ग्रन्थेषु वैयाकरणमतोल्लेखसन्दर्भेषु एतद्ग्रन्थस्थः न केवलं विषयः अपि तु पङ्क्तिश अस्य ग्रन्थस्य भागाः तत्र तत्र समुल्लिखिताः समुपलभ्यन्ते।

एवं पठनपाठनेषु स्थानं प्राप्तवतोऽस्य ग्रन्थस्य प्रचारानुगुणं बह्व्यः व्याख्याः समुत्पन्नाः,याश्च प्राचीनाःअर्वाचीनाश्चेति द्विधा विभक्तुं शक्यन्ते। क्रि.श.ऊन-विंशशतकपर्यन्तं उत्पन्नाः प्राचीना इति, ततः परं विंशे शतके समुत्पन्नाः अर्वाचीना इति स्वीकुर्मस्तर्हि ग्रन्थस्यास्य व्याख्याः पञ्च प्राचीनाः पञ्च अर्वाचीनाश्च उपलभ्यन्ते। ताश्च क्रमशः –

प्राचीनाः व्याख्याः -

1.कृष्णमित्रीया – नागेशसमकालिकेन दुर्बलाचार्यापरनामधेयेन कृष्णमित्रेण कृता अत्यन्तलघ्वी टिप्पणीरूपा।

2.दर्पणव्याख्या – हरिवल्लभविरचिता - संवत् 1800(क्रि.श.1743)।

3.कान्तिव्याख्या – गोपालदेव(मन्नुदेव)कृता संवत् 1856(क्रि.श.1799) तः पूर्वम्।

4.काशिकाव्याख्या – हरिरामकाले –संवत् 1858(क्रि.श.1797)

5.परीक्षाव्याख्या –भैरवमिश्रः –संवत् 1881 (क्रि.श.1824)

अर्वाचीनाः व्याख्याः –

6.सरलाव्याख्या – गोपालशास्त्री नेने –क्रि.श.1919

7.प्रभाव्याख्या - बालकृष्णपञ्चोली –क्रि.श. 1947

8.सुबोधिनी – रामप्रसादत्रिपाठी – संवत् 2009 क्रि.श.1952

9.शाङ्करी – शङ्करशास्त्री – क्रि.श.1959

10.तत्त्वदर्शिनी – पेरिसूर्यनारायणशास्त्री क्रि.श.1970

एताः अतिरिच्य श्रीसभापतिशर्मोपाध्यायरचिता टिप्पणी (क्रि.श.1915) काशिकया सह प्रकाशिता तथा रुद्रदेवत्रिपाठिकृता विवृतिः (नाममात्रं श्रूयते उपलब्धौ यत्नः कर्तव्यः) इति द्वयमपि योजितं तर्हि द्वादश व्याख्याः भवन्ति। एतासु पूर्वोद्दिष्टासु कान्तिं विना अन्याः सर्वाः कथंचित् प्रकाशिता एव। कान्तेः प्रकाशनं तु नासीत्। तत्र कारणं भारते तस्याः सम्पूर्णतया अनुपलब्धिः। अस्याः मातृका प्रायः संपूर्णा लण्डननगरे भारतीयकार्यालयग्रन्थागारे उपलभ्यते यस्य लेखनकालः संवत् 1856 (क्रि.श.1799) निर्दिष्टः। तथा च अस्मात् कालात् पूर्वमेव अस्य ग्रन्थस्य रचना जातेति स्पष्टं ज्ञायते। अस्याः पञ्च मातृकाः उपलभ्यन्ते। एतासु नैकापि स्वयं पूर्णा परन्तु सर्वासां मेलनेन कान्तिः पूर्णा संपादनयोग्या च भवत्येव।

एवं पञ्च मातृकाः परिशील्य संपूर्णां व्याख्यां संपाद्य विद्यावारध्युपाधिं प्राप्तवान् चि.श्रीनिवासनामा शोधच्छात्रः मदीये मार्गदर्शने। इदानीमियं व्याख्या प्रकाशनाय सिद्धा वर्तते। इयं च नातिविस्तृतापि मूलग्रन्थानुगुणा ग्रन्थकृदा-शयप्रकाशने समर्था च।

उपलभ्यमानासु प्राचीनासु व्याख्यासु कृष्णमित्रस्य व्याख्या अत्यन्तं लघ्वी। अतः अस्याः व्याख्यानाम्ना व्यवहारापेक्षया लघुटिप्पणीति व्यवहारः समुचितः। ततः तिस्रः व्याख्याः एव स्वतन्त्रा इति वक्तव्यम्। यतः एतासु तिसृषु व्याख्यासु दर्पणव्याख्या प्राचीनापि नास्ति महान् कालव्यत्यासः अन्यव्याख्ययोः कालस्य दर्पणकालस्य च। कान्तिकाशिके तु समकाल-मुत्पन्ने। अतः एतासु तिसृषु परस्परप्रभावः मृग्य एव। यद्यपि स्यात् अभिप्रायैक्यं कश्चन च अभिप्रायः कुत्रचित् सङ्क्षेपेण दृष्टः, तस्यैव कुत्रचित् विस्तरः तथापि परस्परप्रभावः तत्र आपादयितुं न शक्यः, न वा तद्युक्तम्। अत एव एतासु तिसृषु अभिप्रायभेदोऽपि महान् तत्र तत्र दृश्यते।

अथ परीक्षाकृता भैरवमिश्रेण तु दर्पणव्याख्या दृष्टेव लक्ष्यते। यतः प्रायः तदीया एव अभिप्रायाः अत्र लक्ष्यन्ते। कुत्रचित् ग्रन्थभागाः अपि यथावत्

उपलभ्यन्ते। परीक्षापि दर्पणकाशिकाभ्यां कायेन अल्पा कान्तिसमकायेति वक्तुं शक्या। एतासु चतसृषु अत्यन्तं विस्तृता काशिका।

अथ अर्वाचीनव्याख्यासु प्रभा प्रायः दर्पणस्यैवानुवादरूपा, यद्यपि तत्र तत्र काशिकाया अपि अनुवादः दृश्यते। एतदुभयं पृथक्कृतं तर्हि तथा नावीन्यं मृग्यमेव अथापि पङ्क्तिसमन्वयः सम्यगस्ति। अत एवेयं व्याख्या प्रचारे समागता। अत्यन्तं विस्तृतैवेयं व्याख्या। यथा च प्रभा दर्पणानुसारिणी, तथा शाङ्करी काशिकानुसारिणी। परन्तु भाषा सरला, प्रतिपादनमपि हृदयङ्गमम्। यदि च प्रभाशाङ्कर्योः तोलनं कुर्मः तर्हि शाङ्करी एव स्पष्टतरेति वक्तुं शक्यते। सरलायाः उद्देश्यं तु यत्र यत्र ग्रन्थे भूषणे स्पष्टमिति ग्रन्थकारेणोक्तं तत्र तत्र भूषणे किमस्तीति प्रतिपादनम्। तथैव मतान्तरस्वरूपप्रतिपादनं च। सरलाकाराणामयं प्रयासः यत् दर्पणादिप्राचीनव्याख्यासु ये विषयाः न प्रकटीकृताः तेषामेव स्पष्टीकरणम्। दर्पणकारेण तु भूषणग्रन्थः नावलोकित इत्येव अन्यव्याख्यातॄणां विचारः। अतः सरला तस्य पूरिकेत्यपि वक्तुं शक्या। सुबोधिनी तु टिप्पणीरूपा। यद्यपि रामप्रसादत्रिपाठिभिः विस्तृता एव व्याख्या रचिता अथापि तस्मिन् समये प्रकाशकानामनुरोधेन सा टिप्पणीरूपेणैव तैरेव सङ्क्षिप्ता, टिप्पणीरूपेण प्रकाशितेति ते एव स्वयं स्वीयं खेदं प्राकाशयन्। वस्तुत एतत् वैयाकरणलोकस्य दौर्भाग्यम्। अथ तत्त्वदर्शिनी अस्मद्गुरूणां म. म. पेरिसूर्यनारायणशास्त्रिणाम्। दर्पणादि-व्याख्यातॄणां मूलग्रन्थानवलोकनात् महान् भ्रम इति तेषु तेषु सन्दर्भेषु सप्रमाणम् उपपादयितुं तैः प्रयासः कृतः। **न तत्त्वमग्रहीषुस्ते मूलग्रन्थानवलोकनात्** इति तेषां वचनम्। बहवः सन्दर्भाः तैः स्वव्याख्यायां प्रदर्शिताः। इयमन्वर्थनामधेयैव। गुरुभिः महान् उपकार एव कृतः वैयाकरणलोकस्य कृते। यद्यपि एतैः कान्तिव्याख्या न दृष्टा अथापि तया सह अभिप्रायसंवादा अपि दृश्यन्ते।

अथात्र व्याख्यानां व्याख्यातॄणां सङ्क्षिप्तः परिचयः प्रस्तूयते।

प्राचीनाः व्याख्याः

रत्नप्रभा – कृष्णमित्रः

तत्र प्राचीनासु भूषणसारव्याख्यासु उपलभ्यमानासु प्राचीनतमा रत्नप्रभानाम्नी व्याख्या दुर्बलाचार्यापरनामधेयेन कृष्णमित्रेण रचिता। इयं च व्याख्या काश्यां हरिदाससंस्कृतग्रन्थमालायाः एकोनशतपुष्परूपेण **वैयाकरणभूषणनिबन्ध-सङ्ग्रहः** इति नाम्ना प्रकाशिता, यत्र खुद्दी झा रचितः तिङर्थवादसारोऽप्यस्ति। इयञ्च व्याख्या अत्यन्तलघ्वी। अस्याञ्च मूलकारस्य आशयाः नैव स्पष्टतया अवगन्तुं पार्यन्ते। एतद्व्याख्यात्रा वैयाकरणसिद्धान्तभूषणग्रन्थ एव न दृष्टो वेत्यपि सन्देहो भवति। तत्र तत्र मूलकाराशयविरुद्धतयापि व्याख्या रचिता। अयं च व्याख्याता नागेशानुयायी। अतः नव्यवैयाकरणसिद्धान्तान् मनसि - कृत्य तदनुसारं व्याख्यामकरोत्।

अयञ्च कृष्णमित्रः[26] नागेशभट्टसमकालिकः, तस्य साक्षात् परम्परया वा शिष्यः, सुलतानपुरमण्डलान्तर्गतलक्ष्मणपुराभिजनः, पण्डितदेवीदत्तशर्मणः पौत्रः, भाष्यप्रदीपस्य व्याख्याकर्तुः रामसेवकत्रिपाठिनः पुत्रः, वैदिकः, न्याये व्याकरणे धर्मशास्त्रे कर्मकाण्डे अलङ्कारादिषु च निष्णातः स्वतन्त्रश्च। अस्य पितुः त्रिपाठिनः कालः वि.सं. 1650-1700 मध्ये इति युधिष्ठिरमीमांसकाः कथयन्ति।

अभ्यङ्करोपाह्ववासुदेवशास्त्रिसम्पादितसर्वदर्शनसङ्ग्रहस्थपाणिनीयव्याकरणग्रन्थ कारसमयग्रन्थनामकसूचीपत्रात् क्रि.श.1750 अस्य समय इति निर्धार्यते।

न्यू केटलागस् केटलागरम्[27] अनुसृत्य अनेन उपचत्वारिंशत् ग्रन्थाः रचिताः। व्याकरणे कारकवादः, प्रौढमनोरमाव्याख्या कल्पलता, सिद्धान्तकौमुदीव्याख्या रत्नार्णवः, भूषणसारव्याख्या रत्नप्रभा, लघुमञ्जूषाव्याख्या कुञ्चिका, शब्दकौस्तुभव्याख्या भावप्रदीपः, सुबन्तवादः, सुबन्तसङ्ग्रहः इति ग्रन्थाः अनेन रचिताः। न्यायेऽपि अनुमिति परामर्शः, गदाधरीटीका, तत्त्वचिन्तामणिदीधितेः प्रकाशटीका, तर्कप्रतिबन्धकरहस्यम्, तर्कसुधाप्रकाशः, बाधबुद्धिप्रतिबन्धकतावादः, बृहत्तर्कतरङ्गिणी,

---

26 .सं.व्या.शा.इ.द्वि.भा.पृ.366. दर्पणपरीक्षासहितभूषणसारस्य आमुखञ्च पृ.5.

27 न्यू.का.का.भा.4.पृ.345,344

भावानन्दीप्रदीपः, युक्तिरत्नाकरः, लघुतर्कसुधा, लघुन्यायसुधा, लघुसामग्रीव्याप्तिः, वादचूडामणिः, वादसङ्ग्रहः, वादसुधायाः रत्नावलीव्यख्या, वादसुधाकरः, वायुप्रत्यक्षतावादः, शक्तिवादटीका, सामग्रीवादार्थः, सामग्रीव्याप्तिः, सिद्धान्तरहस्यमित्यादिग्रन्थाः रचिताः। एवं कर्मकाण्डे प्रेतदीपः, श्राद्धदीपः, कृत्यदीपः,धर्मशास्त्रे तिथिनिर्णयः, अशौचत्रिंशच्छ्लोकीव्याख्या, अन्यत्र काव्यप्रकाशटीका, कुमारसम्भवटीका, तत्त्वमीमांसा इत्यादिग्रन्थाः रचिताः।

दर्पणव्याख्या - हरिवल्लभः[28]

भूषणसारस्य प्राचीनतमासु व्याख्यासु द्वितीया, विस्तृता, बहुलप्रचारा च दर्पणनाम्नी हरिवल्लभेन रचिता। अस्य च हरिवल्लभस्य परिचयः दर्पणान्तश्लोकेभ्यः इत्थमवगम्यते -

अयं कूर्माचलाभिजनः धरणीसुरवरः। अस्य पिता श्रीवल्लभः वेदान्ते विनोदमञ्जरीग्रन्थमरचयत्। अयं च हरिवल्लभः वि.सं. 1800 प्रान्ते काशी-मध्यतिष्ठदिति श्रीमन्तः गुरुप्रसादशास्त्रिणः स्वसम्पादितभूषणसारप्रस्तावे अकथयन्। किञ्च भूषणसारस्य काशिकाव्याख्यायां दर्पणकारमतमुल्लिखितम्। तद्व्याख्याता हरिरामः वि.सं.1854 प्रान्ते आसीदिति निर्धार्यते। अतश्च हरिवल्लभः क्रि.श.अष्टादशशतकस्योत्तरभागे आसीदित्यूह्यते।

अयञ्च हरिवल्लभः उत्प्रभातीयापरनाम्ना व्याकरणे तर्के मीमांसायाञ्च निष्णातः गदाधरभट्टाचार्यसरणिमनुसृत्य दर्पणव्याख्यामकरोत्। अस्याञ्च मूलवाक्याव-तरणम्, तदर्थाविष्करणम्, तदुपरि प्रसक्ताक्षेपसमाधानादिकञ्च अस्य प्रौढत्वं स्फुटयन्ति। व्युत्पत्तिवादादिनैयायिकग्रन्थेषु कृतपरिश्रमाणामेव सुबोधमिदं व्याख्यानम्। प्रतिप्रकरणमयं व्याकरणसिद्धान्तान् प्रथमं समर्थयति। अन्ते नैयायिकसिद्धान्तमपि प्रकाशयति।व्याकरणसिद्धान्तसमर्थनापेक्षया नैयायिक-सिद्धान्तसमर्थने एवास्य श्रद्धा वेत्यपि संशयो भवति। यः कोऽपि विषयः सम्यक् युक्त्यात्र प्रतिपाद्यते। यद्यप्ययं नैयायिकः तत्सिद्धान्तपक्षपातीव च दृश्यते, अथापि सत्यनौचित्ये नैयायिकसिद्धान्तमपि तिरस्कर्तुं न विचलति।

---

[28] सं.व्या.इ.द्वि.भा.पृ.364. शाब्दतरङ्गिणी- प्रस्तावना पृ.26

पश्यत। शक्तिनिर्णये अत्र वदन्तीत्यादिना इच्छा शक्तिः इति तार्किकमतं देषप्रदर्शनपुरस्सरं निराकृतम्। एवं सुबर्थनिर्णये यूपाय दारु इत्यत्र गदाधर-भट्टाचार्यमतमपि तिरस्कृतम्।

यद्यप्यस्यां व्याख्यायां विषयविवेचनमतिविपुलतया कृतं, पूर्वतनकृष्णमित्र-व्याख्यानापेक्षया व्याख्येयमत्यन्तमुपयुज्यते छात्राणामुपाध्यायानाञ्च, अथापि तत्र तत्र अवतरणिकासु, अन्यत्र च मूलकाराशयप्रकाशने व्याख्येयमसमर्थैव जातेति परिशीलनेन ज्ञायते। एतत्सर्वं मनसिकृत्यैव एनां व्याख्यां दृष्ट्वापि हरिरामकाले महाशयः पुनः काशिकेति नाम्ना भूषणसारस्य विस्तृतव्याख्यामकरोत्।

इयं च व्याख्या काशिका-परीक्षा-प्रभाव्याख्याभिस्सह प्रकाशिता। अर्वाचीनानां शाङ्करीत्यादिव्याख्यानानाम्, भाषान्तरानुवादानाम्, च आधारभूता इयम् इदानीमपि विस्तृतप्रचारा चकास्ति।

कान्तिव्याख्या - मन्नुदेवः[29]

भूषणसारस्य प्राचीनव्याख्यासु तृतीया, एतावत्पर्यन्तमप्रकाशिता नाति-विस्तृता कान्तिनाम्नी इयं टीका गोपालदेवापरनाम्ना मन्नुदेवेन कृता। अयं दुर्गाशम्भ्वोः सुतः। कृष्णदेवस्य अनुजश्च। नागेशशिष्यस्य वैद्यनाथ-पायगुण्डस्य सुतः बालकृष्णपायगुण्डः अस्य गुरुः। वैद्यनाथपायगुण्डस्य पुत्रः बालकृष्णः, मन्नुदेवस्य महादेवस्य च साहाय्यं स्वीकृत्य हेन्रीकोलब्रूक् अभ्यर्थनामनुसृत्य धर्मशास्त्रसङ्ग्रहमरचयत्। अयं हेन्रीकोलब्रूक् भारते क्रि.श. 1783-1815 मध्ये न्यवसत्। अतश्च समये स्मिन् एव मन्नुदेवोऽप्यासीदिति ज्ञायते।

अस्य च मन्नुदेवस्य नैकोऽपि ग्रन्थः प्रकाशितः। अस्य नाम्नि न्यू काटलागस् काटलागोरुम् मध्ये चत्वारः ग्रन्थाः उल्लिखिताः। ते च 1.गजसूत्रविचारे नव्यमतपरिष्कारः 2.परिभाषेन्दुशेखरदोषोद्धारः 3.लघुभूषणकान्तिः 4.शब्देन्दुशेखरदोषोद्धारश्च।

---

[29] .सं.व्या.शा.इ.द्वि.भा.पृ.365. न्यू.का.का.ष.भा.पृ.142.

काशिका – हरिरामकाले

भूषणसारस्य प्राचीनव्याख्यासु चतुर्थी, प्रतिपाद्यविषयेण व्याख्यापद्धत्या च अद्वितीया काशिकानाम्नी टीका। एतद्रचयिता हरिरामभट्टः[30] कालोपनामकः केशवदीक्षितात्मजः, सखीदेव्याः सुतः, धनराजानुजः, काश्यां विक्रमशके 1854 वर्षे मार्गशीर्षशुक्लपक्षपौर्णमास्यां सोमवासरे, रोहिणीनक्षत्रे वृश्चिकगते रवौ इमां टीकां समापयत्[31]। तस्मादयं क्री.श. अष्टादशशतकान्तिमभागे एकोनविंशशतकपूर्वभागे च आसीदिति निश्चीयते।

व्याख्येयम् अतिविपुलापि दर्पणापेक्षया सुलभा। अस्याम् अतिसमीचीनया पद्धत्या अवतरणिकादिभिः मूलार्थः प्रकाशितः। उपलभ्यमानासु प्राचीनव्याख्यासु इयमेकैव व्याख्या मूलकृत्तात्पर्यवर्णनसमर्थास्ति। अस्यां भूषणकृन्मतप्रदर्शनात्परं नव्यमतमपि प्रदर्शितमस्ति। आधुनिकव्याख्यानां सर्वासामियमुपजीविनी। यद्यपीयं द्विः प्रकाशिता केवला, दर्पणेन सहिता च परन्त्विदानीं नोपलभ्यते। दर्पणस्य यावान् प्रचारः तावान् अस्याः नासीत्। कारणं तत्र किमिति न जानीमः। वस्तुतः भूषणसाराध्येतृभिः अध्यापकैश्च व्याख्येयमवश्यं द्रष्टव्या। अस्यां सुबर्थनिर्णये शाब्दिकमर्यादया बहूनां वाक्यानां प्रामाणिकतत्तद्ग्रन्था -नुरोधेन नव्यनैयायिकसरण्या शाब्दबोधो वर्णितः। इयञ्च व्याख्या एकैव हरिरामभट्टस्य न्यायव्याकरणादिशास्त्रेषु निरतिशयं पाण्डित्यमभिव्यनक्ति। अयञ्च हरिरामः हरिवल्लभवत् न नैयायिकपक्षपाती।

अयञ्च हरिरामभट्टः न केवलं व्याकरणे एव ग्रन्थानरचयत्, किन्तु धर्मशास्त्रादिष्वपि। तद्धितचन्द्रिका, परिभाषाभास्करटीका, परिभाषेन्दुशेखरटीका, महाभाष्यप्रदीपटीका, वैयाकरणसिद्धान्तमञ्जूषाटीका, शब्देन्दुशेखरटीका, इत्येवमष्टौ ग्रन्थाः व्याकरणेऽनेन रचिताः[32]। एवं धर्मशास्त्रादौ अत्रिस्मृतिटीका, आह्निकसारः, परिशिष्टप्रकाशटीका, प्रायश्चित्तसारः, बुधस्मृतिटीका, मलमासतत्त्वविवेकः, व्यवहारप्रकाशः, श्रद्धावर्णनम्,

---

[30] काशिकाव्याख्यान्तश्लोकाः

[31] काशिकायाः अन्ते – युगभूतदिगीशात्म(1854) संमिते वत्सरे गते इत्यादिश्लोकः। काशिकासमापनदिवसः 4.12.1797

[32] का.का.प्र.भा.पृ.759

गङ्गामाहात्म्यम्, षट्कर्मविवेकः, भैरवीसपर्याविधिः इत्येकादश ग्रन्थाः रचिताः।

परीक्षा - भैरवमिश्रः

उपलभ्यमानासु प्राचीनव्याख्यासु अन्तिमापि विषयेणान्वर्थनामधेया प्रायः मूलकाराशयानुगुणा, काशिकाटीकातः परं कीर्तनीया च परीक्षाव्याख्या। इयं यद्यपि नातिविस्तृता अथापि दर्पणादिग्रन्थपर्यालोचनयैव इयं[33] रचितेति तत्परि- शीलनेन अवगम्यते।

एतद्व्याख्याता च माननीयो महामहोपाध्यायः अगस्त्यकुलमणिः, श्रीमद्भव-देवात्मजः भैरवमिश्रः। अयञ्च सनाढ्यब्राह्मणः इति केचित्। परे तु सरयू-पारीण इति कथयन्ति। अनेन रचिताः व्याख्याः उपजीव्यैव कोऽपि नव्यः वैयाकरणः भवितुं प्रभवतीति नातिशयोक्तिः। नागेशग्रन्थयोः परिभाषेन्दु-शब्देन्दुशेखरयोः, तद्गुरोर्हरिदीक्षितस्य शब्दरत्नस्य च अत्यन्तमहत्त्वपूर्णाः व्याख्याः अनेन कृताः। तत्रापि संपूर्णस्य शेखरग्रन्थस्य अस्य व्याख्यां विना अन्या व्याख्यैव नास्ति। तत्र शब्दरत्नस्यापि अस्य भैरवीव्याख्यैव नातिविस्तृता अर्थबोधनक्षमा चेति अध्यापकैरध्येतृभिश्च आद्रियते।

अनेन चन्द्रकलायाः (शब्देन्दुशेखरव्याख्यायाः) अन्ते लेखनसमयः इत्थं निर्दिष्टः।

शश्यष्टभूतिचन्द्राख्ये मन्मथे शुभवत्सरे।
माघे मास्यसिते पक्षे मूले कामतिथौ शुभा ॥
पूर्णा वारे दिनमणेः इयञ्चन्द्रकलाभिधा।

1881 वैक्रमे वर्षे मन्मथनामसंवत्सरमाघकृष्णकामतिथौ[34] मूलानक्षत्रे रविवारे च (A.D. 13-2-1824) चन्द्रकला समाप्तेति। अनेनायं क्रि.श. एकोनविंशे शतके आसीदिति ज्ञायते।

---

[33] I.का.का.प्र.भा.पृ.417 II. सं.व्या.शा.इ.द्वि.भा.पृ. 365 III.भूषणसारः(दर्पण परीक्षा) प्रस्तावनादि। IV.भैरवमिश्रः – BY M.S.BHATTA JHR 35 PP 76-78.

[34] त्रयोदश्यां

अनेन च स्वजीवनं सर्वं व्याकरणशास्त्रायैव अङ्कितमिति वक्तव्यं भवति। सत्यपि बहुमुखे शास्त्रपाण्डित्ये अनेन केवलं व्याकरणे एव ग्रन्थाः रचिताः। ते च कारकटीका, गदा(परिभाषेन्दुशेखरटीका), चन्द्रकला(लघुशब्देन्दुशेखर-टीका), चन्द्रकलानिर्णयः, परिभाषावृत्तिर्बृहती, परीक्षा (भूषणसारव्याख्या), भैरवीयपञ्चसन्धिः, भैरवी(शब्दरत्नटीका), भैरवमिश्रीयम् इत्यादि।

अनुपलब्धाः व्याख्याः

भूषणसारस्यास्य अप्रकाशिता तत्र तत्र तालपत्रग्रन्थालयेषु अंशतः उपलभ्यमाना अपि काचन व्याख्यास्ति या विवृतिरिति[35] नाम्ना कथ्यते। इयञ्च रुद्रनाथापरनाम्ना रुद्रदेवेन कृता इति ज्ञायते। इतः परं व्याख्यातारमधिकृत्य किमपि न ज्ञायते।

केचन भूषणसारस्य मतोन्मज्जा[36]इति वैयाकरणमतोन्मज्जिनीति वा नाम्नी कापि व्याख्या आसीदिति सापि नोपलभ्यते इति कथयन्ति। भट्टोजिदीक्षित-रचितकारिकाः एव तन्नाम्ना केचन व्यवहरन्ति। भट्टोजीशिष्येन वनमालि-मिश्रेण कारिकाणां भूषणसारवत् स्वतन्त्रा व्याख्या मतोन्मज्जनीटीकेति नाम्ना विहिता, या च डा.ललितकुमारत्रिपाठिना सम्पादिता प्रकाशिता च। एवमन्याः अपि काश्चन व्याख्याः स्युः याः कालगर्भे विलीनाः।

अर्वाचीनव्याख्याः

क्रिस्तुशके विंशे शतकेऽपि अस्य भूषणसारस्य पञ्चषाः व्याख्याः समुत्पन्नाः। पूर्वतनव्याख्यापेक्षया आसु व्याख्यासु विषयविवेचने सारल्यमधिकम्। तत्र काश्चन व्याख्याः मूलकृत्तात्पर्यवर्णनार्थमेव समुत्पन्नाः, काश्चन तेन सह प्राचीनविषयानपि विवेचयितुम्।

सरला – गोपालकृष्णशास्त्री नेने

आसु प्रकाशितासु व्याख्यासु नेने इत्युपाह्वगोपालशास्त्रिरचिता सरला नाम्नी अन्वर्थाभिधा व्याख्या प्रथमतयोपादानमर्हति। अनया व्याख्यया सह भूषणसारः काश्यां श्रीहरिकृष्णनिबन्धमणिमालायाः सप्तममणिरूपेण

---

[35] का.का.प्र.भा.पृ.530, सं.व्या.शा.इ.द्वि.भा.पृ.366

[36] शाङ्करीव्याख्या प्रस्तावना। सरलाव्याख्या प्रस्तावना च।

प्रकाशितः। अस्याश्च व्याख्यायाः बहूनि संस्करणानि जातानि। प्रथमं संस्करणं क्रि.श.1919 वर्षे। काचन सुबोधिन्याख्या विषमस्थलटिप्पणी अपि अनया व्याख्यया सह संयोजिता।

अयञ्च नेने इत्युपाह्वः गोपालशास्त्री काशीस्थराजकीयसंस्कृतपाठशालायां व्याकरणवेदान्तधर्मशास्त्राध्यापनकर्म कृत्वा, व्याकरणेऽस्मिन् शतके प्रकाशितानां बहूनां व्याकरणग्रन्थानां सम्पादनं कृत्वा, दुरूहाणां ग्रन्थानाम् इत्थमेव व्याख्याः विरचय्य कीर्तिसुभगोऽस्ति।

भूषणसारस्य सरलेयम् अन्वर्थनाम्नी अध्येतॄणां महते उपकाराय कल्पते। एषा व्याख्या कुतो रचिता सत्सु अन्यासु व्याख्यासु इति प्रश्नस्योत्तरं द्वितीयसंस्करणामुखे इत्थमुक्तम् – भूषणसारस्य तिस्रः टीकाः सन्ति दर्पण-काशिका-वैयाकरणमतोन्मज्जनीनामधेयाः। तत्र तृतीया न समुपलभ्यते इदानीम्। द्वितीया च अतिविस्तृता। प्रथमापि न्यायघटितपदार्थबहुलेत्यति-कठिना वर्तते इति मया भूषणसारस्य तदीयाक्षरयोजनाप्रदर्शयित्री सरले-त्यन्वर्थाभिधेया टीका विरचिता इति।

अस्य महोदयस्य एषा उक्तिः अक्षरशः सत्या। इयं टीका अत्यन्तं सरला। अत्र सन्दर्भपातिनां मीमांसाधिकरणानां स्वरूपं सरलया रीत्या सङ्ग्रहेणोपपादितम्, यच्च प्रायः अन्यासु व्याख्यासु नास्ति। तथा यत्र यत्र मूले विस्तरेण भूषणे प्रपञ्चितमित्युक्तं तत्र सर्वत्र भूषणे किमुक्तमिति तद्ग्रन्थ-पर्यालोचनया तद्गतः सर्वोऽप्युपयुक्तविषयः सङ्गृह्य व्याख्यायां संयोजितः। इयं व्याख्या विद्यार्थिनामत्यन्तमुपयुक्तेति तस्याः बहुसंस्करणैरेवावगम्यते। अयं महोदयः शब्दरत्नस्यापि सरलाव्याख्यामकरोत्।

प्रभा – बालकृष्णपञ्चोली

आसु व्याख्यासु द्वितीया प्रभेति नाम्ना ख्याता बालकृष्णपञ्चोलिना रचिता, आदर्शग्रन्थमालायाः द्वितीयपुष्परूपेण क्रि.श.1947 वर्षे प्रकाशिता। इयं प्राचीनव्याख्यासु वर्तमानानामतिगहनानामपि विषयाणां विशदतया प्रकाशने प्रभैवेति अन्वर्थनाम्नी। दर्पणकाशिकादिप्राचीनव्याख्यासु ये ये विषयाः प्रपञ्चिताः, ते सर्वे पि विषयाः सरलया रीत्या अस्यां प्रकाशिताः। यद्यपि तेषां विषयाणां तदीयत्वेन च विभागे बालकृष्णीयं किमपि नास्तीति भावः मनसि

उदियात्, अथापि शैली, सरलतमा च भाषा पञ्चोलिनः कीर्तिमावहतः। किञ्चास्यां सर्वोऽपि मूलग्रन्थः पदशः व्याख्यातः। येन विद्यार्थिनां नव्याध्यापकानाञ्च महानुपकारो भवति। एवं स्फोटनिर्णये पि व्याख्यान्तरैः अचुम्बिताः अपि विषयाः प्रतिपादिताः। अत एव चेयमस्य शतकस्य अतिविस्तृतव्याख्यारूपेण कीर्त्यते।

अयञ्च व्याख्याता गुर्जरदेशीयबडौदाराज्यान्तर्गतवसाईग्रामाभिजनः लघुमञ्जूषायाः रत्नप्रभाव्याख्यातुः श्रीसभापतिशर्मोपाध्यायस्य शिष्यः, सोमनाथानुजः, नीलकण्ठरामशास्त्रिणः सुतः, काश्यां खेतानसंस्कृतमहाविद्यालये प्राचार्यः आसीत्।

हरिवल्लभस्य दर्पणेन सह प्रकाशिता इयं व्याख्या पण्डिततारकेश्वर-चतुर्वेदिशास्त्रिणा संशोध्य सम्पादिता।

सुबोधिनी – रामप्रसादत्रिपाठी

सरलाव्याख्यायाः तृतीयसंस्करणे क्रि.श.1952 वर्षे सरलया सह काचन विषमस्थलटिप्पणी सुबोधिनी नाम्नी प्रकाशिता। इयं च काशीस्थश्रीराजस्थान-संस्कृतमहाविद्यालयप्राध्यापकेन गोपालशास्त्रिणः शिष्येण व्याकरणाचार्येण न्यायशास्त्रिणा पण्डितरामप्रसादत्रिपाठिना रचिता। अस्यां सरलाया-मचुम्बितानां विषयाणां विद्यार्थिनः उपयुक्तानां लघुविवरणं दृश्यते। यद्यपि इयम् अनेन त्रिपाठिना समग्रव्याख्यारूपेण लिखिता, तथापि ग्रन्थमुद्रणव्यय-कर्तनाय विषमस्थलटीप्पणीरूपेणैव प्रकाशिता।

शाङ्करी -- शङ्करशास्त्री

पूर्वोक्तं व्याख्यात्रयं काश्यामुद्भूतम्। ततः परं भूषणसारव्याख्यानोद्यमः पूनापट्टणेऽपि सञ्जातः। सुप्रसिद्धपण्डितानां महामहोपाध्यायानाम् अभ्यङ्करो-पाह्ववासुदेवशास्त्रिणां शिष्यः रङ्गभट्टतनूजः, चिरं यावत् व्याकरणशास्त्रो-द्ग्रन्थानां महाभाष्यादीनाम् अध्ययनाध्यापनाभ्यां लब्धसुप्रतिष्ठितविशकलित-व्याकरणसिद्धान्तधीः, श्रीमान् मारुलङ्कर उपाह्वः शङ्करशास्त्री, गुरुमुखं विनैव स्वतः भूषणसारं ज्ञातुं प्रयतमानानां छात्राणाम्, पाठयतामध्यापकानाञ्च मातरमिव हितकारिणीं शाङ्करीति यथार्थनाम्नीं व्याख्यामरचयत्।

श्रीमता शास्त्रिवर्येण स्वाध्ययनकाले भूषणसारे समागच्छन्तीः अनुपपत्तीः सम्यक् मनसि निधाय इयं टीका लिखिता। अतो विद्यार्थिनां येषां विषयाणाम् अवगमने क्लेशो भवति, तेषां विषयाणां सुगमया पद्धत्या यथावत् यावच्च अपेक्षितं स्पष्टीकरणम् अत्र विद्यते। अस्यां प्राचीनव्याख्यान्तर्गताः अपि विषयाः तत्तत्सन्दर्भानुसारं स्वीकृत्य विवृताः। अस्य महोदयस्य काशिका-टीकाकारे गौरवमधिकमिव भाति। व्याख्या चेयं शा.श. 1873 वर्षे, अर्थात् क्रिस्तु शके 1951 वर्षे रचिता।नातिविस्तृता नातिसङ्क्षिप्ता चेयं व्याख्या स्पष्टाक्षरैः पूनापट्टणे आनन्दाश्रमसंस्थया क्रि.श. 1957 वर्षे भूषणसारेण सह प्रकाशिता।

तत्त्वदर्शिनी – पेरिसूर्यनारायणशास्त्री

पूनापट्टणात् अयमुद्यमः आन्ध्रदेशं प्रविष्टः। प्रसिद्धानां महामहोपाध्यायानां तातासुब्बरायशास्त्रिणाम्, तच्छिष्याणां महामहोपाध्यायानां पेरिवेङ्कटेश्वर-शास्त्रिणां च परिचरणेन लब्धशेमुषीविभवः,चिरकालं विजयनगरसंस्थानाधीश -संस्कृतपाठशालायां व्याकरणशास्त्रे उद्ग्रन्थानध्याप्य, व्याकरणशास्त्रे आर्थिक -ग्रन्थानां समुचितव्याख्याऽभावेन, स्थितानामपि व्याख्यानां मूलकाराशया-विष्करणे अक्षमत्वेन च व्याकरणशास्त्राध्येतृभिः अनुभूयमानं क्लेशं परिजिहीर्षुः पेरिवंशाम्बुधिचन्द्रमाः सर्वेश्वरशास्त्रितनूजन्मा, राष्ट्रपतिसम्मान-भाक्, महामहोपाध्यायः श्री सूर्यनारायणशास्त्रिमहोदयः भूषणसारस्य तत्त्वदर्शिनीव्याख्याम्, लघुमञ्जूषायाः गूढार्थदीपिकाव्याख्याञ्च अरचयत्।

स्थितासु भूषणसारस्य बह्वीषु व्याख्यासु किमर्थं पुनः भूषणसारस्य व्याख्येत्याशङ्कायाः समाधिमित्थं वदति तत्र भवान्[37]- सन्ति बह्व्यः व्याख्याः। परन्तु ते व्याख्यातारः मूलग्रन्थं भूषणमदृष्ट्वैव व्याख्यां कृतवन्तः। तस्मात् ग्रन्थकृतोऽभिप्रायः तैः न ज्ञातः। अतः स्वोत्प्रेक्षितानुसारं ग्रन्थयोजनं कृतवन्तः। तथा तत्तन्मतप्रदर्शनेऽपि ते व्याख्यातारः नैव शेकुः। यथा भावप्रधानमाख्यातम् इति वाक्ये आख्यातपदार्थतया धातुरेवाभिप्रेतः कौण्डभट्टस्य। परन्तु व्याख्यातृभिः सर्वैः नागेशकृतां व्याख्यां मनसि निधाय तिङन्तपरतया व्याख्यातम्। एतादृशाः सन्ति बह्व्यः ग्रन्थपङ्क्तयः यत्र

---

[37] तत्त्वदर्शिनी 24-25श्लोकौ

मूलकाराशयः अन्यथा व्याख्यातः। अतो मूलकारस्य तत्त्वं प्रदर्शयितुमेवेयं व्याख्या क्रियते - इति।

तत्त्वदर्शिनीव्याख्यापरिशीलनेन इयमुक्तिस्सत्येति ज्ञातुं शक्यते। अतश्च अन्वर्थनाम्नीयं टीका। अस्यां टीकायां सम्यक् तत्तत्प्रमाणप्रदर्शनपुरस्सरं मूलकारस्य तात्पर्यं प्रतिपादितम्। यदि च नागेशेन सहास्ति मूलकारस्य मतभेदः तर्हि सोऽपि भेदः सम्यक् प्रदर्शितः। विमर्शकानाम् अत्यन्तमुपयुज्यते इयं व्याख्या। एतच्छिष्यत्वमाप्तोऽहं मन्ये धन्यमात्मानम्। तद्बलेनैव हि भूषणसारपरिशीलनरूपः प्रयासः मया कृतः। इयं व्याख्या क्रि.श. 1970 वर्षे विजयनगरे (आन्ध्रप्रदेशे) व्याख्यात्रैव प्रकाशिता।

एवमिदानीं व्याकरणशास्त्रार्थिकग्रन्थेषु भूषणसारस्य प्रधानतमत्वात् तस्मिन् विमर्शः बोभूयते। हिन्द्याम् आङ्ग्लेय्यां च पूर्णतया खण्डशश्च व्याख्याः प्रकाशिताः।

शिवरामदत्तात्रेयजोशीमहाभागेन[38] भूषणसारस्य स्फोटनिर्णयः आङ्ग्लभाषायां व्याख्यया सह अनूदितः। पूनाविश्वविद्यालयेन क्री.श. 1967 वर्षे प्रकाशितश्च। अत्र वर्तमानः सुनिशितः प्रस्तावः अत्यन्तोपयुक्तः विमर्शकानाम्। तथा धात्वर्थनिर्णयमधिकृत्य अनेन महाभागेन कश्चन ग्रन्थः रचितः अप्रकाशितश्च।

जयश्री[39] गुणे महाशया लकारार्थनिर्णये विमर्शनं कृतवती। आङ्ग्लभाषायाम् इदमपि प्रकाशितम्। यम्.यम्. पाण्डे महाशयः तथा नामार्थनिर्णये विमर्शनमकरोत्। एवं बहवः अस्मिन् भूषणसारे प्रयासं कृतवन्तः कुर्वन्ति चेति इदमेवास्य माहात्म्यं प्रकटयति इत्यलमतिविस्तरेण।

कौण्डभट्टस्य सतीर्थ्याः विद्वांसः

यतोऽयं कौण्डभट्टः भट्टोजिशिष्यः अतः लघुसिद्धान्तकौमुदीकारः वरदराजः, वैयाकरणमतोन्मज्जनव्याख्याकारः वनमालिमिश्रः, चिमनीचरितादिग्रन्थकर्ता

---

[38] GEORGE CORDONA : PANINI A SURVEY OF RESEARCH P.305-307.

[39] GEORGE CORDONA : PANINI A SURVEY OF RESEARCH P.305-307.

नीलकण्ठशुक्लः, अमरकोशस्य व्याख्यासुधाकारः भानुदीक्षितश्च सतीर्थ्याः। एतेषु वनमालिमिश्रः भट्टोजिकारिकाणां वैयाकरणमतोन्मज्जनव्याख्येति नाम्ना संक्षिप्तां व्याख्यामकरोत् या च भूषणे कौण्डभट्टेन तत्र तत्र उल्लिखिता।

कौण्डभट्टसमकालिकाः विद्वांसः

जगदीशः

पदवाक्यप्रमाणपारावारीणस्यास्य कौण्डभट्टस्य नैयायिकाग्रणी**र्जगदीशः** समकालिकः। अयं जगदीशः ईस्वीये 1635 वर्षे शब्दशक्ति-प्रकाशिकां[40]निबद्धवान्। शब्दसङ्क्षेपे उभावपि समानौ। यद्यपि शब्दशक्ति-प्रकाशिकातः पूर्वमेव भूषणरचना आसीत्, तथाप्युभयोः परस्परप्रभावः स्वग्रन्थयोर्न दृश्यते। अथापि कुत्रचिद्भावसादृश्यमप्यस्ति। परसमवेतत्वस्य द्वितीया वाच्यत्वं नोभयोरिष्टम्। तथा तस्य कर्मलक्षणघटकतापि नेष्टा। चैत्रश्चैत्रं गच्छतीति प्रयोगो द्वितीयार्थसंयोगे प्रकृत्यर्थस्य स्वप्रतियोगिकत्व-संबन्धेनैव साकाङ्क्षतया द्वितीयान्तलभ्यस्य चैत्रीयत्वविशिष्टसंयोगस्य जनकत्व -स्वाश्रयवृत्तित्वोभयसंबन्धेनैव क्रियायामन्वयेन चैत्रप्रतियोगिकसंयोगाश्रय-वृत्तिगतेश्चैत्रे बाधाद्वारितः[41]। परया कर्तृसंज्ञया कर्मसंज्ञाया बाधात् न तादृशः प्रयोग इति कौण्डभट्टः। तत्र शाब्दबोधप्रसङ्गस्तु द्वितीयार्थफल-प्रकारकबोधं प्रति तादृशव्यापारोपस्थितिर्हेतुरिति कार्यकारणभावेनैव वारयितुं शक्य इति तदाशयः[42]। एतादृशं भावसादृश्यं तात्कालिकशास्त्रज्ञानां विचारसरणावैकमत्यं प्रदर्शयति।

गागाभट्टः

एवं भाट्टमीमांसकाग्रणीः खण्डदेवस्य गुरुर्गागाभट्टोऽपि कौण्डभट्ट-समकालिकः। अस्य भाट्टचिन्तामणिग्रन्थे प्रायशो वैयाकरणमतं कौण्डभट्टो-क्तमेवास्ति।

खण्डदेवः

---

[40] शब्दशक्तिप्रकाशिका-KASHI SANSKRIT SERIES NO. 109. उपोद्घातः, पृ०3

[41] शब्दशक्तिप्रकाशिका-P.320 KASHI SANSKRIT SERIES NO. 109.

[42] वै०भूषणम् P.130,

एवं खण्डदेवोऽप्यस्य समकालिक एव। अयं खण्डदेवः ईस्वीये 1965 वर्षे[43]दिवंगत इति श्रूयते। तदीये भाट्टरहस्ये यदनूदितं वैयाकरणमतं तत्सर्वं भूषणोक्तमेव। कुत्रचित्तानि वाक्यानि तथैव भूषणादुद्धृतानि लभ्यन्ते। नव्यमीमांसकमार्गद्रष्टा खण्डदेवो यद्यपि सर्वत्र सुबर्थमखण्डोपाधिरूपमङ्गीकरोति, तथापि तत्किमिति तत्स्वरूपविचारे भूषणाद्युक्तलक्षणसमनियत्वं तस्य प्रपञ्चयति।

अनन्तरेष्वस्य कौण्डभट्टस्य प्रभावः

गदाधरः ईस्वीये 1709 वर्षे[44] मृत इति कथयन्ति। तस्मात् गदाधरेण कौण्डभट्टः साक्षात्कृतो वा न वेति वक्तुं न शक्यते। परन्तु भूषणग्रन्थोऽवश्यं तेन दृष्ट एव। तत्सिद्धान्तेषु तस्यादरोऽपि महान्। धातोः फलावच्छिन्नव्यापारवाचित्वमिति नव्यमतं तिरस्कृत्य कौण्डभट्टोक्तं फलम् व्यापार उभयमपि पृथगेकवृन्तगतफलद्वयन्यायेन, पुष्पवन्तादिवद्वा धातुशक्यमिति मतं समर्थयति। न क्वापि भूषणस्य वा, कौण्डभट्टस्य वा खण्डनं तिरस्कारश्च दृश्यते तद्ग्रन्थे।

गोकुलनाथस्तु पदवाक्यरत्नाकरे वैयाकरणमतानुवादरूपेण भूषणसारव्याख्यामेवाकरोत्। भूषणसारे सूक्ष्मतया प्रपञ्चितानां विषयाणां सम्यक् प्रकाशनं वर्तते पदवाक्यरत्नाकरे वैयाकरणमतानुवादे। अयञ्च पदवाक्यरत्नाकरो वस्तुतः सर्वसिद्धान्तानामाकर एव। अतश्च गोकुलनाथे कौण्डभट्टस्य प्रभावो महानिति ज्ञायते।

एवं नव्यवैयाकरणे **नागेशो**ऽपि तस्य प्रभावोऽस्ति महान्। नव्यमार्गस्य बीजावापः कौण्डभट्टेन कृत इति पूर्वमेवोक्तम्। प्रायशो नागेशस्य गुरुः हरिदीक्षितः कौण्डभट्टस्य सन्निधौ व्याकरणमधीतवान् स्यात्। यद्यप्यस्मिन् विषये प्रमाणं नोपलभ्यते, तथापि बान्धव्यमेव प्रमाणतया स्वीकर्तुं शक्यम्। मञ्जूषादिग्रन्थेषु तत्तन्मतनिराकरणसमये प्रायशो नागेशेन कौण्डभट्टप्रदर्शिता युक्तय एव प्रदर्शिताः। परमलघुमञ्जूषायां तु प्रायशस्सर्वाणि लक्षणानि भूषण-

---

[43] P.K.Gode – INDIAN LITERARY HISTORY VOL III –P.81.

[44] HISTORY OF NAVYA NYAYA IN MITHILA – P. 197 PROF. D.C. BHATTACHARYA.

सारीयान्येव, परन्तु नागेशे खण्डदेवस्यापि प्रभावोऽस्ति महान्। तस्मात् तत्र तत्र भूषणाभिप्रायभिन्नं स्वाभिप्रायं प्रकाशयति। समनन्तरेषु वैयाकरणेषु नैयायिकेषु मीमांसकेषु चास्य कौण्डभट्टस्य प्रभावोऽस्त्येव परम्परया। एवं स्वपाण्डित्यप्रभावेण शास्त्रज्ञलोकं प्रभाव्य, भूषण-भूषणसार-पदार्थदीपिका-दिग्रन्थरचनया यशःकायेनामृतस्सन् वैयाकरणानां सर्वेषां सदा पूजनीयो राराजतेतरामयम् ।

प्रकृतस्य प्रयासस्य औचित्यम्

एवं सत्सु बह्वीषु व्याख्यासु पुनः व्याख्यायाः अपेक्षा केति जिज्ञास उदियादेव। अस्याः व्याख्यायाः रचना प्रयासे उद्देश्यं सर्वव्याख्यासमीक्षणं कृत्वा सर्वेषामभिप्रायाणामेकत्र सङ्ग्रहः। यथा च काव्यप्रकाशस्य झलकीकर महाशयेन सर्वव्याख्यासङ्ग्रहात्मिका व्याख्या रचिता तथैव भूषणसारस्यापि अपेक्ष्यत इति विचार एव अत्र प्रवृत्तिनिमित्तम्। अथायं पुनः प्रश्नः समुदेति तत्तद्व्याख्यासु वर्तमाना विचाराः तत्तद्व्याख्याभ्य एव अवगन्तुं शक्या एव अतः पुनः सङ्ग्रहस्य का वा अपेक्षेति, सत्यम्, यदि सर्वाः ता इदानीमुपलभ्यन्ते। परन्तु स एव क्लेशः। प्राचीनानां व्याख्यानां पुनः पुनः प्रकाशनं कर्तुमिदानीं कोऽपि न सिद्धः। किन्तु केवलं हिन्दी-आङ्ग्लभाषयोः अनुवादादिकमेव प्रकाशयितुं सर्वे प्रकाशकाः सन्नद्धाः। किञ्च ताः ताः व्याख्याः तेषु तेषु प्रदेशेष्वेव प्रसिद्धाः न तु सर्वत्र। यथा शाङ्करी महाराष्ट्रेष्वेव। तत्त्वदर्शिनी आन्ध्रेष्वेव। कान्तिः नैव प्रकाशिता। दर्पणप्रभे एव चौखाम्भातः द्वित्रिवारं प्राकाश्यं नीते। अस्यां स्थितौ अन्यव्याख्यागताः विचाराः सर्वं वैयाकरणकुलं प्रापणीयाश्चेत् एतादृश एव कश्चन प्रयासः अपेक्षितः, येन प्रयासेन तत्तत्सन्दर्भानुगुणाः सर्वे विचाराः एकत्र स्थापिताः अनायासेन तत्तद्ग्रन्थानां पृथगवलोकनं विनैव वैयाकरणैः छात्रैः, अध्यापकैः, गवेषकैश्च अवगता भवेयुः तथा अत्र नैयायिकमीमांसकादीनां प्राचीनानां मतानाम्, तथा एकदेशिमतानां च सप्रमाणं तत्तद्ग्रन्थभागसमुल्लेखपूर्वकं प्रदर्शनेन तेऽपि नैयायिकाः मीमांसकाश्च विद्यार्थिनः अध्यापकाश्च उपकृता भवेयुः। अतः इयं व्याख्या सर्वसङ्ग्रहात्मिका मूलग्रन्थसमुल्लेखनपुरस्सरं तत्तन्मतपरिचायिकेति वक्तुं शक्या। न केवलमेतत्। अत्र च बहुषु सन्दर्भेषु युक्तियुक्तस्य मतस्य

समर्थनं तत्तत्प्रमाणप्रदर्शनपुरस्सरं विहितं येन यस्मिन् सन्दर्भे या व्याख्या उपादेयेति सुस्पष्टं भवति। किञ्च बहुत्र भूषणादिमूलग्रन्थप्रामाण्येन व्याख्यापि अन्यव्याख्याविलक्षणा सन्दर्भानुगुणा च विहिता। विषयप्रतिपादनमपि सरलया शैल्या कर्तुं प्रयासः विहितः, यत्र पाठका एव प्रमाणम्। अथास्यां व्याख्यायां पूर्वोक्तविचारोपष्टम्भकतया कानिचित् स्थलानि दृष्टान्तरूपेण प्रदर्श्यन्ते यत्र व्याख्यासमीक्षणेन सह अस्यां नूतनत्वमपि अवगतं स्यात्।

अथात्र धात्वर्थनिर्णये विवेचिताः केचन विशिष्टाः विषयाः अत्र संगृह्यन्ते।

मङ्गलाचरणम् – अत्र ग्रन्थारम्भे श्लोकद्वयेन मङ्गलं विहितम्। तत्रैकं स्फोटरूपस्य शिवाभिन्नस्य लक्ष्मीरमणस्य परब्रह्मणः स्तुतिः। द्वितीयं शेषाशेषार्थलाभाय शेषभूषणस्य स्तुतिः। आर्थिकग्रन्थरूपस्यास्य भूषणसारस्य प्रतिपाद्यः विषयः, पदार्थः, तत्संसर्गरूपः वाक्यार्थश्च। संसर्गश्च विशेषणविशेष्यभावः। ततश्च प्रथमश्लोकेन वर्णस्फोटस्य, परेषां मते पदस्य तदर्थविशिष्टस्य एतद्ग्रन्थविषयत्वं द्वितीयेन च शेषशेषसम्बन्धस्य विशेषण-विशेष्यभावस्य एतद्ग्रन्थविषयत्वं च सूचितम्। श्री लक्ष्मीरमण इत्यत्र व्याख्यान्तरप्रदर्शनपुरस्सरं श्रीशब्दः लक्ष्म्याः विशेषणमिति तेन च नित्यानपायित्वं लक्ष्म्याः बोध्यते इति प्रतिपादितम्। गौरीरमणरूपिणमित्यत्र एका वृत्तिर्वा वृत्तिद्वयं वा तत्र लाघवगौरवविचारादि, तत्र च व्याख्यातृ-मतभेदः, कृद्वृत्तौ लाघवमित्याद्यंशानां प्रतिपादनम्, श्लोकद्वयेनापि भगवतो वेङ्कटेश्वरस्यैव स्तुतिरिति प्रतिपादनम्, शेषभूषणशब्दः तत्पुरुषबहुव्रीहिभ्यां वेङ्कटेश्वरमेव बोधयतीति सूचनम् च। अत्र सर्वत्र व्याख्यान्तरपरामर्शोऽपि विहितः। यश्च व्याख्यान्तराचुम्बितः स नूतनतया प्रतिपादितः। अनन्तरश्लोकद्वये पितृव्यस्य मूलकारिकाकर्तुः भट्टोजीदीक्षितस्य स्तुतिः, ततः मुनित्रयस्य पितुः रङ्गोजिभट्टस्य गणपतेः च स्तुतिः ग्रन्थप्रतिपाद्यप्रतिपादनं च विहितम्। अत्र ऐतिह्यं समाश्रित्य विद्याधीश इति मध्वयतिना सह रङ्गोजिभट्टस्य अद्वैतसिद्धान्ते वादः अद्वैतसिद्धान्तप्रतिष्ठापनमित्यादिविषयाः प्रस्तुताः। अथ धात्वख्यातार्थनिर्णय एव प्रथमं कुत इत्यादिजिज्ञासायां सङ्गतिः प्रदर्शिता। सम्पूर्णे भूषणसारे धात्वाख्यातार्थनिर्णय एव सारतमः यतः शाब्दबोधविषये यावन्ति मतानि प्रसिद्धानि अप्रसिद्धानि वा तानि सर्वाणि

सुनिशितं पर्यालोचितानि। अत एव सर्वैः व्याख्यातृभिः अत्रैव बहु पराक्रान्तम्। सर्वासु व्याख्यासु प्रायः अर्धभागः ग्रन्थः केवलं धात्वाख्यातार्थनिर्णयव्याख्यापर एव भवति। यद्यपि उपविंशतिः कारिका एव अथापि अयमेव भागः भूषणसारग्रन्थस्य प्रतिष्ठावहः इति वैयाकरणकुले विदितमेव। कौण्डभट्टस्य चायमभिसन्धिः यत् पदवाक्यप्रमाणशास्त्रेषु मूलभूत-मुनीनाम् वाक्यार्थमुख्यविशेष्यनिर्धारणे ऐकमत्यमेव। परन्तु तद्व्याख्यातारः एव तत्र अन्यथा गृहीतवन्तः इति। एतच्च सत्यमिति तत्तन्मतपरिशीनेन ज्ञायते। वैयाकरणाः मीमांसकाश्च भावना(व्यापार)मुख्यविशेष्यकमेव बोधमङ्गीकुर्वन्ति। नैयायिकास्तु प्रथमान्तार्थमपरव्यविशेष्यकं बोधमङ्गीकर्वन्ति यश्च तन्मुनिवचनविरुद्धः। न्यायवार्तिके हि **क्रियाकालयोगाभिधायि क्रियाप्रधानमाख्यातम्** इति तिङन्ते क्रियायाः प्राधान्यमेवोक्तम्। एतदेव सूचितं कोण्डभट्टेन चतुर्थे श्लोके **गौतमजैमिनीयवचनव्याख्यातृभिर्दूषितान्** इत्यनेन।

अथात्र धात्वाख्यातार्थविषये कौण्डभट्टेन परिशीलितानि मतानि –

1.व्यापार एव धात्वर्थः, फलं द्वितीयार्थः, कृतिः, कालः, संख्या च आख्यातार्थ इति प्राचीननैयायिकमतम्।

2.फलं धात्वर्थः, तिङर्थः व्यापारः(भावना) कालः संख्या च, कर्तृकर्मणोः आख्यातलक्ष्यता, अथवा आक्षेप इति प्राचीनभट्टमीमांसकमतम्।

3.पलं धात्वर्थः, तिङर्थः संख्या कालश्च लिङतिरिक्तलकारे भावना वाच्यैव न, केवलं लिङि एव भावनायाः प्रतीतिः धात्वर्थस्य स्वजनकव्यापारा-श्रयत्वसम्बन्धेन प्रथमान्तार्थे अन्वय इत्यादि प्राचीनप्राभाकरमतम्।

4.फलं धात्वर्थः, कृतिः कालः संख्या च आख्यातार्थः प्रथमान्तमुख्य-विशेष्यको बोध इति नैयायिकैकदेशिमतम्।

5.फलव्यापारौ धात्वर्थः, कृतिः कालः संख्या च आख्यातार्थः कृतिमुख्यविशेष्यको बोधः तिङन्ते। वाक्ये प्रथमान्तमेव मुख्यविशेष्यसमर्पकं पदमिति नैयायिकमतम्।

6.फलव्यापारौ धात्वर्थः कर्तृकर्मसंख्याकालाः आख्यातार्थाः,तत्र तिङन्ते सर्वत्र व्यापारमुख्यविशेष्यक एव बोघ इति वैयाकरणमतम्।

7. फलव्यापारौ धात्वर्थः कर्तृकर्मसंख्याकालाः आख्यातार्थः, तिङर्थकर्तृकर्ममुख्यविशेष्यको बोध इति विशिष्टाद्वैतिनां मतम् (उत्प्रेक्षाप्रकरणे रसगङ्गाधरे जगन्नाथेनापि प्रदर्शितमिदम्)

8.जानातीच्छति यतते इत्यादि सविषयकधातुस्थले सकर्मकत्वं भाक्तमिति नैयायिकमतम्।

9.फलव्यापारौ धात्वर्थः, भावना आख्यातार्थः, धात्वर्थव्यापारः सिद्धरूप एव तस्य तिङन्ते भावनासंस्पर्शादेव साध्यत्वेन प्रतीतिरिति नव्यभाट्टमीमांसक-मतम्, एतादृशं लिङतिरिक्तलकारस्थले फलव्यापारौ धात्वर्थः कालः संख्या च तिङर्थ इति नव्यप्राभाकरमतम् ।

एवं सत्सु अनेकेषु मतेषु आख्यातार्थकर्तृकर्मविशेष्यकबोधवादिमतं, फलं धात्वर्थः, लिङतिरिक्तस्थले भावना न कस्याप्यर्थ इति प्राचीनप्राभाकरमतं, फलं धात्वर्थः कृतिराख्यातार्थः इति नैयायिकैकदेशिमतं च प्रायः बहुभिः न ज्ञातानि, प्रसिद्ध्यभावात्। भूषणसारव्याख्यातारः अपि अत्र भ्रान्ताः। अतः एतादृशेषु सन्दर्भेषु तैरन्यथैव व्याख्यातम्। अतः तत्तत्सन्दर्भानुसारं एतेषां एतेषां समेषां मतानाम् आकरप्रदर्शनपुरस्सरं स्वरूपमत्र विवेचितम्। अत्र च तत्तदाकरग्रन्थभागा अपि यथावदत्र उल्लिखिताः, येन पाठकानां सन्देहः न भवेत्, सत्यां च विचिकित्सायां मूलग्रन्थमेव परामृष्टुं तेषामानुकूल्यं च भवेत्। अत्र प्राचीनप्राभाकरमतं प्रकरणपञ्चिका, शब्दशक्तिप्रकाशिका, वाक्यार्थरत्नादिग्रन्थेषु उल्लिखितं भूषणेऽपि स्पष्टतया उल्लिखितम् – व्यापारो भावनेतिकारिकायाः अवतरणग्रन्थव्याख्यावसरे समूलोल्लेखं प्रदर्शितम्।

फलं धात्वर्थः, कृतिः आख्यातार्थः, व्यापारस्तु न कस्याप्यर्थ इति नैयायिकैकदेशिमतं आख्यातवाददीधिति-न्यायकुसुमाञ्जलिव्याख्यानेषु च प्रदर्शितं सप्रमाणं तस्यामेव कारिकायां प्राभाकरादीन् इति आदिपद-व्याख्यावसरे स्पष्टतया प्रतिपादितम्।

अथ फलव्यापारौ धात्वर्थः, कर्तृकर्मसंख्याकालाः आख्यातार्थाः, परन्तु आख्यातार्थकर्तृकर्मविशेष्यक एव बोध इति आख्यातार्थप्राधान्यवादि-

मतमपि द्वितीयकारिकाव्याख्याने "अपि चाख्यातार्थप्राधान्ये" इति वाक्य-व्याख्याप्रसङ्गे प्रस्तुतम्।

एवं मण्डनमिश्रेण भावनाविवेकग्रन्थे प्रस्तुतं प्राचीनभाट्टमीमांसकमतमपि तस्मात् करोति(कारिका 8) रिति कारिकायाः अवतरणिकाव्याख्यासन्दर्भे सविस्तरं प्रदर्शितम्। तथैव मतान्तराण्यपि तत्तत्सन्दर्भे एव सुविशदं प्रदर्शितानि।

अथ वैयाकरणाः मीमांसकाः नैयायिकाश्च स्वस्वमतोपष्टम्भकतया "भावप्रधानमाख्यातम्" इति निरुक्तमेव प्रमाणयन्ति। वस्तुतः एतन्निरुक्त-वचनस्य वास्तविकोऽर्थः कः? आख्यातशब्दार्थः कः? तस्य अर्थविपरिणामः कथमासीदित्याद्यपि सप्रमाणमत्रोपपादितम्।

व्याख्याप्रणाली

अस्याः व्याख्यायाः संरचनार्थं मया पूर्वोक्तासु द्वादशसु व्याख्यासु टिप्पणीषु रुद्रदेवविवृतिं विहाय सर्वाः सुनिशितं परिशीलिताः। तासु तासु लक्षितः अल्पोऽपि अभिप्रायभेदः सोऽपि **दर्पणे, इति दर्पणः, इति दर्पणकारः दर्पणकारस्तु** इत्येतादृशैः निर्देशैः अनूदितः। यत्र च कस्याश्चित् व्याख्यायाः कश्चन ग्रन्थभागः अवश्यमुपादेय इति सम्भावितः, स च तद्ग्रन्थानुवादेन सह यथावदक्षरशः अत्र च समुल्लिखितः। यथा 226 पुटे काशिकायाः अक्षरशः उल्लेखः – द्र.- **अत्र अकर्तृतापत्ताविति प्रतीकमुपादाय कृतं काशिकायाः तदुपपादनम् अवश्यमेव ज्ञातव्यम् – अतस्तदेवात्र यथावत् निर्दिश्यते .... इत्यादि**। तथैव यत्र मीमांसकनैयायिकादीनां मतं व्याख्यातृभिः अन्यथा अन्यथैव गृहीतं, तत्र वस्तुस्थितिं बोधयितुं तत्तद्ग्रन्थभागा एव यथावदत्र स्थापिताः। यथा प्राचीनप्राभाकरमतप्रदर्शने प्रकरणपञ्चिकाग्रन्थः। यत्र च व्याख्यासु सूचनारूपेण ग्रन्थः व्याख्यातः, तादृशेष्वपि स्थलेषु तद्ग्रन्थाशयः विस्तरेण प्रकाशितः। यत्र च व्याख्यासु अभिप्रायभेद एव नास्ति, सर्वाः व्याख्याः एकविधाः तत्र तु नामनिर्देशं विना व्याख्यासु प्रतिपादित एव विषयः स्वयमनुवादरूपेण स्थापितः। यत्र च व्याख्यासु वैषम्यं तत्र युक्ता च व्याख्या सप्रमाणं निरूपिता। कुत्रचिच्च सर्वव्याख्यावैलक्षण्येनैव ग्रन्थकाराशयः सप्रमाणं प्रकाशितः। यानि च स्थलानि कानिचित् पूर्वमेवोदाहृतानि।

प्रवृत्तिनिमित्तम्

इदं मे भागधेयं यत् व्याकरणशास्त्रपारदृश्वनां, पदवाक्यप्रमाणपारावारीणानां, वरदय्यसम्प्रदायप्रवर्तकचिलुकूरिवरदय्यशास्त्रिणां सच्छिष्यानां, ब्रह्मीभूतानां **लब्धा नरसिंहशास्त्रिगुरुचरणानां** प्राथमिकं शिष्यत्वं मया आप्तम्। एते च महानुभावाः चुलुकीकृतव्याकरणशास्त्राः सत्सम्प्रदायनिष्ठाः शिष्यवत्सलाश्च प्रक्रियाप्रक्रमे ख्यातवैदुष्याः आसन्। राजमहेन्द्रवरस्थे श्रीगौतमीविद्यापीठ-संस्कृतकलाशालायां व्याकरणाचार्यपदवीमधिष्ठाय बहून् वैयाकरणान् समुदपादयन् येषु अहं प्रथमः। बहुमुखप्रज्ञाः महामहोपाध्यायाः प्रथितयशसः विश्वनाथगोपालकृष्णशास्त्रिणः,तथान्ये च बहवः मत्सतीर्थ्याः तेषां व्याकरण-शास्त्रपरम्परां सर्वत्र प्रसारयन्तः विराजन्ते। एते च गुरवः नरसिंहशास्त्रिवर्याः आन्ध्रदेशे गुण्टूरुमण्डलान्तर्गते यलनाडुसमीपस्थचिन्नाग्रहाराभिजनाः क्रि.श. 1901 वर्षे लब्धजन्मानः कृष्णामण्डले आकिरिपल्लि ग्रामे स्थितायां संस्कृतपाठशालायां श्रीमद्भ्यः चिलुकूरि वरदय्यशास्त्रिभ्यः व्याकरणं, वेमूरि रामब्रह्मशास्त्रिभ्यो न्यायशास्त्रं, श्री देन्दुकूरि नरसिंहशास्त्रिभ्यो वेदान्तशास्त्रं चाध्यगीषत। इत्थं समधिगतशास्त्रसमुदायाः, पश्चिमगोदावरीमण्डलान्त-र्गतसरिपल्ले ग्रामे, यत्र स्वगुरवः वरदय्यशास्त्रिणः अध्यापकाः आसन्, तत्रैव किञ्चित् कालमध्यापकत्वं निरुह्य, ततः कृष्णामण्डलान्तर्गतगुडिवाड-नगरसंस्कृतकलाशालायां किञ्चित्कालं कार्यं कृत्वा क्रि.श. 1957 वर्षतः विंशतेः परं वर्षाणि राजमहेन्द्रवरस्थश्रीगौतमीविद्यापीठसंस्कृतकलाशालायां व्याकरणाध्यापकत्वं निरुह्य, तत्रैव बहून् उत्तमान् वैयाकरणान् समुदभावयन्। श्रीसदाशिवशास्त्रितनूजा एते क्रि.श. 1984 वर्षे ब्रह्मीभूता आसन्। एतेषां प्राथमिके शिष्ये मयि महती प्रीतिरासीत्। स्वसुतादप्यधिकप्रेम्णा मह्यं सम्पूर्णं व्याकरणशास्त्रं समन्वगृह्णन्। न केवलमेतत्। यदा मम मातृसंस्थायां श्रीगौतमीविद्यापीठसंस्कृतकलाशालायां व्याकरणाध्यापकपदं रिक्तमासीत्, तदा साग्रहं मां तत्र नियोज्य सिद्धान्तकौमुदीमारभ्य महाभाष्यं यावत् सर्वान् ग्रन्थान् स्वमार्गदर्शने अध्यापयितुं मह्यम् अवसरं दत्तवन्तः आसन्। यावदहं स्वयं स्वकुटुम्बपोषणसमर्थः भवामि, तावत् स्वसुतनिर्विशेषं मम योगक्षेमं विचारयन्तः आसन्। तादृशानां गुरूणां प्राप्तिः कतीनां जन्मनां पुण्यफलमिति

नाहं सम्भावयितुमप्यीशे। तथा अधीतायां संस्थायामेवाध्यापकत्वं गुरूणां मार्गदर्शने निर्वहता मया, विजयनगरसंस्कृतकलाशालायां बहुकाल-मध्यापकत्वं निरुह्य, तत्र पदवीविरमणात् परं मन्मातृसंस्थायां व्याकरणाध्यापकत्वेन प्रविष्टानां ब्रह्मश्री पेरि सूर्यनारायणशास्त्रिणां शिष्यत्व-माप्तम्, ये खलु स्वनामधन्यानां ताता सुब्बरायशास्त्रिणां शिष्याः, आर्थिकग्रन्थेषु कृतभूरिपरिश्रमाः, भूषणसारस्य तत्त्वदर्शिनीव्याख्या-काराःआसन्। तेषां सविधे भूषणसारः, मञ्जूषा च मयाधीते। ततः परमहं तिरुपतिस्थसंस्कृतविद्यापीठं प्रविष्टः यत्र च मया महामहोपाध्यायानां चतुस्तन्त्रिणां श्रीमतां रामानुजताताचार्यपादानाम् आध्यक्ष्ये अध्यापनकार्यं कर्तुमवकाशः प्राप्तः। इदं चान्यदेव भागधेयं यत् **वैयाकरणभूषणसारस्य विशिष्टमध्ययनम्** इति शीर्षकेन शोधप्रबन्धः आचार्यपादानां मार्गदर्शने एव विद्यावारिध्युपाधये विलिख्य समर्पितः आसीत् यश्च विद्वद्वरेण्यैः यस्. डि. जोशी, विधातमिश्रादिभिः परीक्षितः प्रशंसितश्चासीत्। कालेन स प्रबन्धः 1996 वर्षे नञर्थादिसप्तकं विहाय **भूषणसारसमीक्षे**ति नाम्ना प्रकाशितः, यश्च महामहोपाध्यायानां श्रीरङ्गनाथशर्मणाम् , गोडासुब्रह्मण्यशास्त्रिगुरुवर्याणा-मन्येषां च प्रशंसापात्रमभवत्।

गणकयन्त्रविज्ञानक्षेत्रे शोधप्रक्रमेषु अन्वयाद्धेतोः मया असकृत् भारतीय-तान्त्रिकसंस्थाः (IIT) दृष्टाः यत्र च भूषणसारमाश्रित्यैव मया भाषणानि विहितानि, यत्र च गणकयन्त्रविज्ञानिनः, भाषावैज्ञानिकाश्च श्रोतारः आसन्। तदर्थं पुनः पुनः तद्व्याख्यानैः सह भूषणसारमसकृत् दर्शं दर्शं तत्र काममपि ममतां प्राप्तवान्। अस्मिन्नेवान्तरे भूषणसारस्य कान्तिव्याख्या, या च अप्रकाशिताः प्राचीनाः मातृकाः विविधेभ्यः तालपत्रग्रन्थालयेभ्यःसम्पाद्य विद्यावारिध्युपाधये पाठसंशोधनपुरस्सरं सम्पादिता मदीये मार्गदर्शने। तस्मिन्नपि समये भूषणसारस्य प्रकाशिताः अप्रकाशिताः व्याख्याः सुनिशितं परिशीलयितुमवकाशः प्राप्तः। तथा व्याख्यापरिशीलनेन अवगतं यत् बहुषु प्रदेशेषु भूषणसारव्याख्यातृणां मतभेदः वरीवर्तीति, कुत्रचिच्च मूलकाराशया-ननुगुणतयैव कैश्चित् व्याख्यातमिति च। प्रदर्शितान्यपि च तादृशानि कानि-

चित् स्थलानि अस्मद्गुरुवर्यैः पेरिसूर्यनारायणशास्त्रिचरणैः स्वव्याख्यायां तत्त्वदर्शिन्याम् ।

यदा चाहं जयपुरस्थजगद्गुरुरामानन्दाचार्यराजस्थानसंस्कृतविश्वविद्यालयस्य कुलपतिः आसं, तदा तत्रत्यव्याकरणविभागेन भूषणसारविषये सङ्गोष्ठी काचिदायोजिता, यत्र गुरुभिः पेरिसूर्यनारायणशास्त्रिभिः आविष्कृताः व्याख्याविरोधाः केचित् मया प्रस्तुताः। एते च विषयाः औत्तराहाणां पण्डितानां नूतनाः आसन्। एते च विषयाः सप्रमाणम् उपस्थापिताः सादरमभिनन्दिताः आसन्। तदा मम मनसि काचिदिच्छा जागृता, यत् काचित् भूषणसारव्याख्या रचनीया, यत्र सर्वव्याख्याविषयः सङ्गृहीतः स्यात्, मतभेदाश्च एकत्रैवोपस्थापिताः भवेयुः, येन पठितृणाम् अध्यापकानां चोपकारः स्यात्। तथैव यत्र व्याख्यातृणां भ्रमः, तत्र तत्र तत्तत्सन्दर्भानुगुणमूलग्रन्थानां यथावदक्षरशः निवेशनमपि आवश्यकं येन पठितृणां भ्रान्तिः परिहृता स्यात्।

कुलपतिपदावधिसमाप्तेःपरं पुनः तिरुपतिविद्यापीठं प्रविष्टोऽहं एतादृशविशिष्टव्याख्यालेखनाय विशिष्टं विरामं प्रार्थितवान्, यश्च विरामः सहृदयतल्लजेन कुलपतिना हरेकृष्णशतपथिमहाशयेन सादरम् अङ्गीकृतः। यदर्थं कुलपतेः हरेकृष्णमहोदयस्य कृते कार्तज्ञमावहामि।

इमां च व्याख्याम् अस्माकं प्राथमिकव्याकरणशास्त्राचार्याणां श्रीलङ्का नरसिंहशास्त्रिवर्याणां, येषां विषये पूर्वमेव प्रतिपादितं, दिव्यस्मृतौ तेषां प्रीतिकरीं नरसिंहप्रियेति नाम्ना विधाय गुरुऋणं किञ्चिदंशेन वा निर्यातयितुमुत्सहे। अत्र च नरसिंहशब्दः साभिप्रायः, एकतः सर्वान् गुरून् प्रतिपादयति,विशिष्य च तन्नाम्ना प्रथितान् गुरुचरणान्। अतश्चेयं समेषां गुरूणामेव तोषकारिणी भवेत् इति मम हार्दं चिन्तनम्।

कृतज्ञताविष्करणम् –

अथास्य प्रकाशनार्थं स्वीयां सम्मतिं दत्त्वा गुर्जरदेशसोमनाथसंस्कृतविश्वविद्यालयप्रकाशनरूपेण इमां प्रकाशयितुं सन्नद्धाः मन्मित्रमणयः तस्य विश्वविद्यालयस्य कुलपतयः श्री वेंपटि कुटुम्बशास्त्रिणः, ये खलु सर्वदा मयि अकारणं स्निग्धाः, यैश्च मैत्री पूर्वपुण्यफलरूपा । अतस्तेभ्यः सादरं कार्तज्ञं विनिवेदयामि। अथेमां व्याख्यां परिशील्य, तत्र तत्र परिष्कारादिसूचनया

बहुधा उपकृतवान् ममानुजः सतीर्थ्यश्च वेंकटरामतिरुमलाचार्यः। अतस्तमपि आशीर्भिः समेधये।

अथास्याः प्रकाशनरूपमानेतुं बहुभिः साहाय्यं विहितम्। तत्र विशिष्य उल्लेखमर्हन्ति मम ज्येष्ठजामाता श्री बालाजी, मम शिष्या श्री उषाराणी, शिष्योत्तमः श्रीनिवासनारायणः। अतस्तेभ्यः हार्दाः अभिनन्दनपुरस्सराः आशिषः। अन्ये चास्य प्रकाशनप्रक्रियायां सहयोगिनः, सोमनाथसंस्कृतविश्वविद्यालयकुलसचिवाः, प्रकाशनाधिकारिणः, मुद्रापकाः, तथा अन्ये च ये केचन तेभ्यः सर्वेभ्यः, मत्परिवाराय च हार्दानि अभिनन्दनानि, कार्तज्ञानि च प्रकाश्यन्ते। इमां व्याख्यामापाततः दृष्ट्वा साधुवादैरभिनन्द्य स्वीयाशीर्वचनरूपां पुरोवाचमनुगृहीतवन्तः गुरुचरणाः श्रीरामानुजताताचार्यवर्याः। येषां पदे पदे प्रोत्साह एवात्र निदानम्। तेषां चरणसन्निधौ पुनः पुनः साष्टाङ्गप्रणतिततीः समर्पयामि। इदं तु सत्यम् –

यदत्र सौष्ठवं किञ्चित् रामानुजगुरोर्हि तत्।
यदत्रासौष्ठवं किञ्चित् तन्ममैव गुरोर्नहि॥

कृतिसमर्पणम् –

सद्भिः सङ्गः कथमपि हि पुण्येन भवति इति हि आर्योक्तिः। इयं च सत्या। मदीयेन भाग्यविशेषेण जयपुरं गतवता मया रामानन्दाचार्यमतप्रवर्तकानां विश्वविद्यालयस्य तन्नाम्ना ख्यापयितुं महान्तं श्रमं स्वीकृत्य सफलानां, त्रिवेणीधाम अधितिष्ठतां महाराजानां श्रीश्रीश्रीनारायणदासमहाभागानां दर्शनं, तेषां परिपूर्णः अनुग्रहश्च प्राप्तः, यश्चेदानीमपि अनुवर्तते।

ऋषीणां पुनराद्यानां वाचमर्थोऽनुधावतीति सूक्तेः अक्षरशः उदाहरणभूताः एते महान्तः निराडम्बराः अपि असङ्ख्याकैः शिष्यगणैः समाराध्यमानाः विराजन्ते। तेषां परिपूर्णः अनुग्रह एव मम जयपुरकौलपत्यसाफल्ये निदानम्। स च मम जीवनचरिते सुवर्णाध्याय एव। यत इदानीमपि तत्रत्याः मां स्मरन्ति। अतश्च ममगुरुसंस्मरणे गुरूणां प्रीत्यै विरचितेयं व्याख्या गुरूणां महाराजानां नारायणदासमहाभागानां करकमलेषु समर्पयितुं

समुत्सुकं मे चेतः। महाराजाश्च शिष्यवत्सलाः अवश्यमेव मत्प्रार्थनामङ्गीकरिष्यन्तीति निश्चित्य तेषां करकमलयोः इयं कृतिः समर्प्यते।

नारायणमहाराजकरकमले समर्पिता।
व्याख्येयं हि सदा भूयात् विदुषां प्रीतिभाजनम्॥

विबुधेभ्यो निवेदनम्

गच्छतः स्खलनमिति न्यायेन अज्ञानात् अनवधानाच्च केचन दोषाः भवेयुरेव। सहृदयतल्लजाः महेश्वरसदृशाः तत्र भवन्तो भवन्तः

गुणदोषौ बुधो गृह्णन् इन्दुक्ष्वेडाविवेश्वरः।
शिरसा श्लाघते पूर्वं परं कण्ठे नियच्छति॥

इत्यार्योक्तिमनुरुध्य गुणग्राहिणः सन्तः मां कृतार्थयन्त्विति सप्रश्रयं प्रार्थये।

तिरुपतिः
आश्वयुजकृष्णैकादशी
(कार्तिककृष्णैकादशी)
19-10-2014

इत्थं
सप्रश्रयं निवेदयिता,
विबुधतल्लजश्रीपादरेणुः,
वेङ्कटरामकृष्णमाचार्यः।

****

श्रीगुरुभ्यो नमः

नरसिंहप्रियाख्यव्याख्योपेतः

वैयाकरणसिद्धान्तभूषणसारः

0. मङ्गलम्

श्रीलक्ष्मीरमणं नौमि गौरीरमणरूपिणम्।

स्फोटरूपं यतस्सर्वं जगदेतत् विवर्तते ॥ 1 ॥

0.1 मङ्गलश्लोकस्य व्याख्यानानां विमर्शः

चिकीर्षितस्य ग्रन्थस्य निर्विघ्नपरिसमाप्त्यर्थं शिष्यशिक्षार्थं च आदौ मङ्गलमाचरति - **श्रीलक्ष्मीरमणमित्यादिना**। श्रीः लोकोत्तरा शोभा तद्युक्ता या श्रीमहालक्ष्मीः निखिलप्रकृतिः तस्याः रमणं दयितं विष्णुं नौमि स्तौमीत्यर्थः। यद्वा श्रीः पूर्वोक्ता नित्यत्वादिधर्मोपेता विलक्षणा बुद्धिर्वा तद्युक्तः, यद्वा श्रीः सरस्वती सा च लक्ष्मीश्च तयोः रमण इत्यर्थः "श्रीश्च ते लक्ष्मीश्च पत्न्यौ" इति पुरुषसूक्तमन्त्रात् इति **काशिका**। श्रीः लोकोत्तरा कान्तिः तया सहितः लक्ष्मीरमणः विष्णुः।सशक्तिकस्य परमात्मनो जगत्कारणत्वादिकं सूचयितुं श्रीग्रहणम् । तथा च मायाशबलितं निर्गुणमात्मानमिति भाव इति **तत्त्वदर्शिनी**। श्रीः सरस्वती लक्ष्मी च पत्न्यौ यस्य सः श्रीलक्ष्मीरमण इति **शाङ्करी**। **दर्पणकार**स्तावत् रमन्तेऽस्मिन् रमण इति अधिकरणल्युडन्तेन रमणशब्देन श्रीलक्ष्मीशब्दस्य कर्तरि षष्ठ्यन्तस्य समासेन श्रीलक्ष्मीकर्तृकरमणक्रियाधिकरणत्वं विष्णोः बोध्यते। श्रीलक्ष्मीशब्दे तु श्रीसहिता लक्ष्मीरिति विग्रहे मध्यमपदलोपः। ततश्च सशक्तिकस्यैव परमात्मनः जगत्कारणत्वमिति व्याख्यामकरोत्। **प्रभाकार**स्तु तत्र बहुधा व्युत्पत्तीः प्रदर्शितवान्। तत्र प्रथमं श्रीलक्ष्मीशब्दविषये श्रीसहिता लक्ष्मीः इति शाकपार्थिवादित्वात् मध्यमपदलोपी समासः। अथवा श्रीशब्दस्य श्रीमति लक्षणा, श्रीश्च लक्ष्मीश्चेति कर्मधारयः, शाकपार्थिवादित्वकल्पने गौरवात्।अथवा श्रीः इति लक्ष्म्याः न विशेषणम् किन्तु लक्ष्मीरमणस्य विशेषणम् इत्येवं बहुधा विकल्पान् कृतवान्। दर्पणकारप्रदर्शिता व्युत्पत्तिरपि प्रदर्शिता। रमणशब्दस्य नन्द्यादित्वात् कर्तरि ल्युडन्तत्वं स्वीकृत्य कर्मषष्ठ्यन्तश्रीलक्ष्मीशब्देन समास इत्यपि तेन

प्रदर्शितम्। वस्तुतः श्रीश्च असौ लक्ष्मीः श्रीलक्ष्मीः, तस्याः रमणः श्रीलक्ष्मीरमण इत्येव युक्तम्। अत्र च श्रीशब्दः यौगिकः तन्त्रेण "श्रयति विष्णुं, श्रीयते च तेन" इति लक्ष्म्याः नित्यानपायित्वं सूचयति। ततश्च नित्यानपायिनी या लक्ष्मीः तस्याः रमणः इत्यर्थः। किञ्च सैव पुरुषकाररूपिणी तस्याः प्रेरणयैव विष्णुः सर्व-जगद्रक्षकः भक्तानुग्राहक इति संप्रदायः। अतः कौण्डभट्टोऽपि तादृशलक्ष्म्याः साहाय्येन परमात्मनः विष्णोः अनुग्रहं प्रार्थयते।

गौरीरमणरूपिणमिति। कौण्डभट्टस्य अद्वैतसिद्धान्तानुयायित्वेन "कुर्याद्धरिहरा-र्चनम्, यथा विष्णुस्तथा शिव" इत्यादिवचनाच्च हरिहरयोः अभेदेनैवोपासना करणीयेति तेषां नियमात् तदनुसारं लक्ष्मीरमणस्य गौरीरमणाभेदं प्रस्तौति। "अत्र गौरी पार्वती। सा च कालिका। तस्यां विनिर्गतायां तु कृष्णाभूत् सापि पार्वती। कालिकेति समाख्याता" इति मार्कण्डेयपुराणात्। अतः महाकाल्यादित्रयस्यापि स्तुतिः कृता भवती"ति **काशिका**। **अन्ये** तु गौरीरमणः शिवः तदभिन्नमित्येव व्याख्यां कृतवन्तः।

अथ गौरीरमणरूपिणमित्यस्य व्युत्पत्तिविचारोऽपि बहुधा कृतः व्याख्यासु। **कान्तिव्याख्यायां** "गौरीरमणं रूपयति तच्छीलः" इति ताच्छील्ये णिनिरेव, न तु गौरीरमणस्य रूपम् इति षष्ठीतत्पुरुषात् मत्वर्थीय इनिः, रसादिगणे रूपशब्द-पाठेन "रसादिभ्यश्चे"(पा. 5-2-95)ति पुनः मतुब्विधानेन रूपशब्दात् मतुबेवेति नियमेन अन्यमत्वर्थीयनिवृत्तेः। अत एव बहुव्रीहिणैव सिद्धे वृत्तिद्वयकल्पना-वैयर्थ्यशङ्कापि कृता" इति प्रथमम् इनिप्रत्ययस्य अप्राप्तिमुक्त्वा, वस्तुतस्तु "एभ्यः इनिठनावपीष्येते" इति "रसादिभ्यश्चे"(पा.5-2-95)ति सूत्रभाष्यमुल्लिख्य षष्ठी-तत्पुरुषात् इनिर्मत्वर्थीय इत्यपि युक्तमिति सूचितम्। **काशिकाकारो**ऽपि "तस्य रूपं तदस्यास्तीत्यर्थः। गौरीरमणेन रूपयति तदभिन्नतया गृह्णातीति वार्थः। कर्मकर्तरि णिनिः। गौरीरमणं स्वाभिन्नतया रूपयति ग्राहयतीति वार्थः। कर्तरि णिनिः।" इति व्युत्पत्तित्रयं प्रदर्शितवान्। **शाङ्कर्यां** तु प्रथमम् इनिप्रत्यया-न्तत्वमुक्त्वा अन्ये तु इत्यादिना णिनिप्रत्ययान्तत्वपक्षः उक्तः, तदुपष्टम्भकतया "रसादिभ्यश्चे"(पा. 5-2-95)ति पुनः मतुब्विधानात् इनिठनोः न प्राप्तिरित्युक्तम्। **तत्त्वदर्शिन्यामपि** व्युत्पत्तिद्वयं प्रदर्शितम्। **प्रभाकारेणापि** व्युत्पत्तिद्वयं प्रदर्शितम्। तत्र इनिप्रत्ययान्तत्वपक्षे अप्राप्तस्य इनेः "एभ्यः इनिठनावपीष्येते" इति भाष्योक्त्या

साधनप्रयासः वृथैवेति तस्याशयः। यतः "ग्रहणवता प्रातिपदिकेन तदन्तविधि - र्नास्ती"ति परिभाषया "रसादिभ्यश्चे"(पा. 5-2-95)ति सूत्रेण रसादिभ्यः केवलेभ्य एव मतुब्विधीयते न तु तदन्तेभ्य इति तस्य सूत्रस्य नियामकत्वेऽपि तस्य नियमस्य रूपशब्दान्तेऽप्रवृत्तिरेव। केवलेभ्योऽपि इनिठनाविष्येते इत्येव तद्भाष्याशयः। अतः इनेः अप्राप्तिरेव नास्तीति तादृश्यः सर्वाः व्याख्याः चिन्त्याः इति तदाशयः।

अथ इन्यन्तत्वे वृत्तिद्वयं णिन्यन्तत्वे तु एका वृत्तिरिति णिन्यन्तत्वपक्षसाधनमपि न युक्तम्। तत्रापि उपपदसमासस्य कर्तव्यतया वृत्तिद्वयसत्वात्। पक्षद्वयस्य समत्वात् इत्यपि **प्रभाकारस्य** मतम्। एतच्च विचार्यते।

0.2 न कर्मधारयान्मत्वर्थीयः इत्यादि न्यायविचारः

"न कर्मधारयान्मत्वर्थीयः बहुव्रीहिश्चेत्तदर्थप्रतिपत्तिकरः" इति न्यायः लाघवमूलकः। अत्र कर्मधारयशब्दः उपलक्षणम् समासान्तरस्यापि। अतश्च यत्र समासान्तरं प्रथमं कृत्वा ततः मत्वर्थप्रत्यययोजनेन योऽर्थः सम्पद्यते स च यदि केवलबहुव्रीहिसमासेनैव सम्पद्येत तर्हि तादृशस्थले बहुव्रीहिरेवोचितः इति। यथा गौरीरमणरूपिणमित्यत्र "गौरीरमणस्य रूपं गौरीरमणरूपम्" इति प्रथमं षष्ठीतत्पुरुषार्थमनुसन्धाय ततः तदस्यास्तीति तद्धितवृत्त्या तद्विशिष्टस्यानुसन्धाने सोपानद्वयस्यापेक्षेति गौरवम्। गौरीरमणस्य रूपमिव रूपं यस्येति बहुव्रीहौ तु वृत्तिद्वयलभ्योऽर्थः एकया वृत्त्यैव अर्थात् एकवृत्त्यनुसन्धानेनैव एकस्मिन्नेव सोपाने सिद्ध्यति इति ज्ञानलाघवम्। अथेदानीं सोपपदकृद्वृत्तौ "गौरीरमणं रूपयती"त्यर्थे णिनिप्रत्ययेन साधितेऽपि गौरीरमणरूपीति शब्दे उपपदसमासः कृद्वृत्तिरिति वृत्तिद्वयमस्त्येवेति इन्यन्तस्य णिन्यन्तस्य च साम्यमेवेति अनयोर्मध्ये लाघवगौरवविचारः न युक्त इति प्रभाकारस्याशयः। अन्ये सर्वे च व्याख्यातारः णिन्यन्तत्वपक्षे लाघवमेव अभिप्रयन्ति।

अत्रेदं विचारणीयम्। यत्र सोपानद्वयेन अर्थात् वृत्तिद्वयार्थानुसन्धानेन योऽर्थः साध्यते स चैकया एव वृत्त्या साध्यते चेत् लाघवम्। इन्यन्ते तु प्रथमं षष्ठीतत्पुरुषार्थः ततः परं मत्वर्थः इति अर्थद्वयस्य विवक्षा तत्र षष्ठीतत्पुरुषस्य तद्धित-वृत्त्युपजीवकत्वं चास्तीति ज्ञाने कश्चन क्रमः अवश्यमपेक्ष्यते। अतः गौरवम्। णिन्यन्तपक्षे यद्यपि कृद्वृत्तिः उपपदसमासः इति शास्त्रमर्यादया

वृत्तिद्वयमिव भासते परन्त्वत्र वृत्तिद्वयं मिलित्वैव एकार्थबोधको भवति। नह्यत्र इन्यन्तत्वपक्षे इव प्रतिवृत्ति अर्थस्फुरणम्। अत एव एकेनैव विग्रहेण तदर्थः बोध्यते न तु पूर्ववत् विग्रहद्वयेन। सोपपदकृद्वृत्तिः उपपदसमासं विना नास्त्येवेति उपपदसमासस्य कृद्वृत्त्यन्तर्गतत्वात् न तदर्थस्य पृथक्विवक्षा यथा "द्यह्नजात" इत्यादि उत्तरपदनिमित्तकद्विगोः। तत्र तत्तत्कार्यलाभार्थमेव तद्विवक्षा नत्वर्थविशेषानु-सन्धानाय। अतश्च इन्यन्तत्वापेक्षया णिन्यन्तत्वे लाघवमस्त्येव। किंच यत्र बहुव्रीहिसमासस्य प्राप्तिः तत्रैव किल लाघवगौरवचिन्ता। यथा गौरीरमणस्य रूपमिति षष्ठीतत्पुरुषान्वितपदाभ्यामेव बहुव्रीहिरपि शक्यत इति अतस्तत्र बहुव्रीहियोग्यतास्तीति तत्र लाघवगौरवविचारः। कृद्वृत्तौ तु कृत्प्रत्ययवेलायां वा ततः परं वा बहुव्रीहेः प्राप्तिरेव नेति न तन्न्यायेनात्र लाघवगौरवविचारः युक्तः। अतः कृद्वृत्तौ लाघवमप्यस्ति तन्न्यायस्य प्राप्तिरपि नास्तीति प्रभावचनं चिन्त्यमेव।

अत्र यद्यपि द्वे अपि व्युत्पत्ती समीचीने तथापि तयोर्मध्ये का युक्ततरेति विचारस्तु कर्तव्यः। तत्र प्रथमव्युत्पत्तौ "गौरीरमणस्य रूपम्" इति षष्ठीतत्पुरुषः अनन्तरं पुनः मत्वर्थीयः इनिः इति वृत्तिद्वयं कल्पनीयम्। वृत्तिद्वयकल्पनारूपं गौरव-मत्रास्ति। गौरीरमणं रूपयतीति व्युत्पत्तौ गौरीरमणोपपदरूपधातोः णिनिप्रत्यय इति एका एव वृत्तिरिति लाघवम्। यद्यपि "असुब्वत" इति भाष्यप्रयोगेण एतादृशलाघवगौरवविचारे औचित्यं नास्ति अथापि णिनिप्रत्ययान्तत्वमेव युक्तमिति भासते। गौरीरमणस्य रूपमस्मिन्नस्तीति कथनापेक्षया लक्ष्मीरमण एव आत्मनः गौरीरमणेन सह अभेदं ग्राहयतीति कथनस्य सन्दर्भानुगुणत्वात्। अयमेव भावः "यद्वा गौरीरमणं स्वाभिन्नतया रूपयति ग्राहयतीति" इत्यादिना **तत्त्वदर्शिन्यां** प्रतिपादितः।

आधुनिकास्तु गौरीरमणरूपमिति षष्ठीतत्पुरुषात् मत्वर्थीय एव इनिः। परन्तु नायमस्तिविवक्षायाम्। किन्तु

भूमनिन्दाप्रशंसासु नित्ययोगेऽतिशायने।
सम्बन्धेऽस्ति विवक्षायां भवन्ति मतुबादयः॥ इति। (महाभाष्य-5.2.94)

नित्ययोगेऽपि मतुपो विधानात् इनिरत्र नित्ययोगे। तथा च गौरीरमणरूपेण नित्य-युक्तः लक्ष्मीरमण इत्यर्थः। अयं चार्थः बहुव्रीहिणा असाध्य इति नात्र पूर्वोक्तः

लाघवमूलकः न कर्मधारयादिति न्यायः न प्रवर्तते। तथा चात्र बहुव्रीहिणा न निर्वाह इति वृत्तिद्वयमाश्रयणीयमेव। यथा - कृष्णसर्पवद् वल्मीकमित्यत्र कृष्णः सर्पो यस्मिन्निति बहुव्रीहिणा सर्पविशेषवद् वल्मीकाप्रतीतेः, कृष्णसर्प इत्यत्र नित्यसमासानन्तरम् मतुप्। कृष्णः सर्पो यस्मिन्निति विग्रहे तु कृष्णगुणविशिष्ट-सर्पसम्बन्धिवल्मीकस्यैव प्रतीतिः स्यान्न तु सर्पविशेषविशिष्टस्य वल्मीकस्य। ततश्च बहुव्रीहेरिष्टालाभात् न्यायाप्रवृत्तिः। एवं वृत्तिद्वयस्वीकारस्य फलं नित्याभेद -प्रतीतिः। इति।

अस्य प्रयोगस्य शिवकेशवयोः नित्याभेदबोधने एव तात्पर्यम्। परन्तु गौरीरमण-रूपमिति षष्ठीतत्पुरुषात् नित्ययोगे मतुपि विष्णोः गौरूरमणरूपेण शिवशरीरेण शिवाकृत्या वा नित्ययोग इति वक्तव्यम्। उभयथापि विष्णुः सर्वदा शिवाकृतिः शिवशरीरो वा इति वक्तव्यम्। तथा च विष्णोः पृथक् स्वीयं शरीरम् आकृतिः वा नास्तीति वक्तव्यं यच्च सर्वसंप्रदायविरुद्धम्। अतोऽत्र णिन्यन्तत्वपक्ष एव युक्ततम इति भाति।

अद्वैतसिद्धान्तानुसारं निर्गुणमेव ब्रह्म परतत्त्वम्। परन्तु मायोपहितस्य तस्य जगदुपादानत्वमिति बोधनार्थमेव लक्ष्मीगौरीग्रहणम्। अतश्च निर्गुणस्यैव तस्य परत्वबोधनार्थं स्फोटरूपमिति विशेषणम्। स्फोटस्य वासुदेवात्मकत्वं भागवते दशमस्कन्धे (85 अध्याये), द्वादशस्कन्धे (6 अध्याये), “अक्षराणामकारस्त्वं स्फोटस्त्वं वर्णसंश्रयः” इति भगवद्गीतायां चोक्तमिति **तत्त्वदर्शिनी**।

0.3 लक्ष्मीरमणशब्दः भगवतः श्रीवेङ्कटेश्वरस्य वाचक इति प्रतिपादनम्

वस्तुतस्तु अत्र श्रीलक्ष्मीरमणशब्दः कौण्डभट्टस्येष्टदेवस्य वेङ्कटेश्वरस्य बोधकः । अयं च भगवान् “कलौ वेङ्कटनायकः” इति प्रसिद्धः तिरुमलक्षेत्रे विराजमानः । अयं च भगवान् वक्षसि लक्ष्मीं वहन् स्वीयां विष्णुतां ख्यापयन्नपि भुजाभरणरूपेण शेषप्रतिकृतिरूपं पञ्चशीर्षं नागं धारयन् ईश्वरं स्मारयन् भक्तान् भ्रामयति। भगवतः उत्सवेषु उपयुज्यमानस्य आदिशेषवाहनस्यापि पञ्च सप्त वा शीर्षाणि भवन्ति। ततश्च पञ्चशीर्षस्सप्तशीर्षो वा नागप्रतिकृतिविशेषः आदिशेषस्य प्रतीक-भूतः। ततश्च शेषनागाभरणेन गौरीरमणं रूपयति बुद्धिविषयं करोतीति तथाभूत इति व्याख्या अत्र युक्ततमेति भाति । विस्तरस्तु द्वितीयश्लोकव्याख्यायां द्रष्टव्यः।

नौमीति। नुधात्वर्थस्तु उत्कृष्टगुणवत्त्वप्रकारकबोधानुकूलो व्यापारः। स च नुति-

कर्तृनिष्ठः। बोधस्तु ईश्वरादिनिष्ठ इति लक्ष्मीरमणस्य तदाश्रयत्वात् कर्मत्वमिति **दर्पणः**। स्वाभीष्टसाधकाशीर्वचनानुकूलो व्यापार एव नुधात्वर्थः। स च व्यापारः करशिरस्संयोगादिरूपः"नमस्करोमी"त्यादि शब्दरूपश्चेति **प्रभा**। **स्फोटरूपमिति**। स्फोटरूपमिति जगतः परब्रह्मणश्च द्वयोरपि विशेषणमिति **काशिकाप्रभा-दर्पणशाङ्कर्यः**। अन्ये तु परब्रह्मण एव विशेषणमिति मन्यन्ते। अत्र स्फोटरूपमि-त्यस्य जगतः विशेषणत्वे स्फुटत्यर्थोऽस्मादितिव्युत्पत्त्या स्फोटशब्दो वाचकपरः। रूप्यते बोध्यते इति रूपम् इति अर्थपरः । तयोः स्फोटरूपयोः शब्दार्थयोः समाहारद्वन्द्वः।तथाच वाच्यवाचकरूपं नामरूपात्मकं जगत् इत्यर्थः इति **दर्पणः**। **प्रभाशाङ्करी**व्याख्याभ्यां दर्पणस्य एव अनुवादः कृतः।

काशिकाकारेणापि स्फोटरूपमित्यस्य जगद्विशेषणत्वमङ्गीकृतम्। परन्तु तस्य व्याख्या अन्यथैव कृता। तथा हि - स्फुटत्यर्थोऽस्मादिति व्युत्पत्त्या बाहुलकाद-पादाने घञि निष्पन्नः स्फोटशब्दः वाचकशब्दपरः। तथा च तादृशवर्णस्फोटादि-रूपं जगत् यस्य विवर्तः तादृशपरावाग्रूपस्फोटरूपपरमात्मानं नौमीत्यर्थः। ग्रन्थे चास्मिन् उभयविधोऽपि स्फोटो विषयः। तथाचानेनैव अनुबन्धचतुष्टयमपि सूचितं भवतीति एष चाशयः युक्त एवाभाति। किंचानेन व्याडिभर्तृहर्याद्यभिमतशब्द-ब्रह्माद्वैतवादं सूचयन्नपि कौण्डभट्टः आत्मनः शाङ्कराद्वैतसिद्धान्तानुयायित्वं सूचयति - **लक्ष्मीरमणं नौमीत्यादिना**। अनेन पञ्चायतनपूजायां विष्णोरेव प्राधान्यमङ्गीकरोति कौण्डभट्ट इति ज्ञायते। ऐतिह्यादपि अस्य कुलदैवतं तिरुपति श्रीवेङ्कटेश्वर इति ज्ञायते।

॥**यत इति**॥ यत इति "जनिकर्तुः प्रकृतिः"(पा. 1-4-30) इति अपादानसंज्ञायां पञ्चमी। ततः तसिल्प्रत्ययः। तेन "यतो वा इमानि भूतानि जायन्ते" इत्यादि भृगुवल्ल्युपपादितं ब्रह्मण उपादानकारणत्वं सूचयति। यद्वा यत इत्यस्य यस्मिन्नि-त्यर्थः। आद्यादित्वात् तसिः सप्तम्यन्तात्। तेन विवर्तस्य अधिष्ठानभूतत्वं ब्रह्मणः सिद्ध्यति। यथा च शुक्तौ रजतत्वभानं तथा ब्रह्मणि जगतः भानमित्यर्थः। न्यायादिनये तु यत इति निमित्तपञ्चमी। "विभाषा गुणेऽस्त्रियाम्" (पा. 2-3-25) इति सूत्रे विभाषेति योगविभागेन अगुणेऽपि पञ्चम्याः साधनात्।"द्यावाभूमी जनयन् देव एकः, विश्वस्य कर्ता भुवनस्य गोप्ता" इत्यादिश्रुतिः ब्रह्मणः निमित्तकारणत्वे प्रमाणम्। जगतः ब्रह्मणो विवर्तरूपत्वेन एकस्मिन्नेव ब्रह्मणि

अशेषफलदातारं भवाब्धितरणे तरिम्।
शेषाशेषार्थलाभार्थं प्रार्थये शेषभूषणम्॥ 2 ॥

अधिष्ठातृत्वेन उपादानकारणत्वं तद्धेतुत्वेन निमित्तकारणत्वं चोपपादयितुं शक्यमिति न द्वयोः निमित्तोपादानकारणबोधकश्रुत्योः विरोधः इति **प्रभा**। अयमेवाशयः **दर्पणकारेण** सङ्ग्रहेण प्रदर्शितः। **शाङ्कर्यां** तु यत इति आद्यादित्वात् षष्ठ्यर्थे तसिरित्युक्तम्। जगदेतत् यस्य विवर्तते - यस्य विवर्तो भवति इत्येवं च व्याख्यातम्। **काशिकाकारस्यैवायमाशयः शाङ्कर्यामनूदितः**। परन्तु सप्तम्यर्थे तसिः इत्येव युज्यते। अन्ये तु यत इति "जनिकर्तुः प्रकृतिः" (पा.1-4-30) इत्यपादानार्थकपञ्चम्यन्तात् तसिल् इत्येव स्वीकृतवन्तः।

विवर्तश्च अतात्त्विकः अन्यथाभावः। स च पूर्वरूपापरित्यागेन असत्त्वनानाकारप्रविभासः। अनेन च श्लोकेन कौण्डभट्टः अखण्डस्फोटरूपं "ब्रह्म पुच्छं प्रतिष्ठे"ति आनन्दमयकोशादपि अन्यम् आन्तरम् परमात्मानं स्फोटशब्देन सूचयन् तद्विवर्त-रूपवर्णस्फोटादिकमेवास्य ग्रन्थस्य विषय इति सूचयति॥ 1 ॥

"यथोत्तरं मुनीनां प्रामाण्यमि"ति मुनित्रये महाभाष्यकारस्यैव परमं प्रामाण्यं सम्प्रदायेनाभ्युपगतम्। यतः सूक्ष्मरूपेण सूचनामात्ररूपेण च स्थितानां वैयाकरणसिद्धान्तानां स्पष्टतया प्रतिपादनं तेषां समेषामपि सूत्रवार्तिकाभ्यामेवोन्नयनं च महाभाष्यकारेण पतञ्जलिनैव कृतम्। अतश्च महाभाष्यं विना तेषां ज्ञातुमशक्यत्वात् तदनन्तरग्रन्थानां समेषां तस्यैव भाष्यस्य जीवातुभूतत्वाच्च तत्र प्रतिपादितानां समेषां वैयाकरणसिद्धान्तानां तत्त्वतः प्रतिपत्तिः आवश्यकीति तदर्थं शेषावताभूतस्य पतञ्जलेः स्मरणपूर्वकं तत्प्रतिपत्त्यर्थं शेषभूषणं स्तौति – **अशेषफलदातारमिति**॥

0.4 शेषभूषणपदार्थविमर्शः

अत्र शेषभूषणशब्देन अभिप्रेतः विष्णुः अथवा शिवो वेत्यत्र व्याख्यातृषु विप्रतिपत्तिः। शेषः भूषणं यस्य अलङ्कारत्वेन पर्यङ्कत्वेन वेति शेषभूषणशब्दः शिव-केशवयोरुभयोरपि प्रतीतिं जनयति। तत्र **दर्पणे** शेषभूषणशब्देन विष्णुरेव विवक्षितः। यतः शेषः आदिशेषः विष्णोरेव सेवकः शेषभूतश्चेति विष्णोराराधनेन तच्छेषभूतस्याराधनमपि कृतप्रायमिति, स्वामी यदि सन्तुष्टः तर्हि सेवकादभीष्टं

साधयिष्यतीति विष्णुप्रेरितः शेषः तदवताररूपः पतञ्जलिः प्रसन्नस्सन् अभीष्टदो भवतीति सम्यक् व्याख्यातम्। उक्तं च -“शेषोऽनन्तः। स भूषणं यस्येत्यर्थः” इति।

अन्ये च प्रायः सर्वे व्याख्यातारोऽस्य श्लोकस्य शिवस्तुतिपरत्वं वदन्ति। प्रथमश्लोकेन लक्ष्मीरमणः स्तुतः इदानीं व्याकरणशास्त्रमूलभूतस्य शिवस्य स्तुतिः क्रियते इति च तेषां व्याख्या। अत्रेदं विचारणीयम्। प्रथमश्लोकस्य सर्वैरपि व्याख्यातृभिः “कुर्याद्धरिहरार्चनम्” इत्यादिवचनैः द्वयोरपि स्तुतिपरत्वमेव उक्तम्। तदेव हि युज्यते। अतएव “गौरीरमणरूपिणमि”ति विशेषणमपि सङ्गच्छते। “शिवाय विष्णुरूपाय शिवरूपाय विष्णवे” इत्यादिवचनात् तदुभयरूपमद्वयं च ब्रह्म स्तुत्यमिति प्रथमश्लोक एव शिवस्तुतिपरोऽपीति तदकरणरूपां न्यूनतां प्रदर्श्य तन्निवारणार्थं शिवं स्तौति इति द्वितीयकारिकायाः अवतरणिकाग्रन्थोऽपि न युक्तः।

अत्र सर्वैरपि “शेषस्य पतञ्जलेः अशेषार्थलाभार्थं पतञ्जलिरेव प्रार्थनीयःकथं शेषभूषणः प्रार्थ्यते” इत्याशङ्क्य “स्वामी यदि सन्तुष्टः तर्हि सेवकात् स्वनियोज्यात् सर्वं कारयिष्यती”ति शेषभूषणस्य स्तुतिः समर्थिता। अतश्च सेव्यसेवकभावः ययोः प्रसिद्धः तयोरेवात्र शेषशेषभूषणशब्दाभ्यां ग्रहणमिति स च सेव्यसेवकभावः आदिशेषनारायणयोरेव प्रसिद्ध इति अत्र शेषभूषणपदं विष्णुपरमित्येव युक्तम्। पतञ्जलिस्तु सहस्रफणस्य आदिशेषस्यैव अवतार इत्यत्र न कस्यचित् भ्रमः।

इदानीमत्र अन्या शङ्का उदियात् यत् शेषः शय्यारूपः कथमलङ्कारः स्यादिति। शेषः भूषणं यस्येति बहुव्रीहिसमासे खलु इयं शङ्का। अत्र “शेषस्य भूषणम्” इति षष्ठीतत्पुरुषोऽपीति शेषस्यैव अलङ्कारभूतः परमात्मा नारायणः बोध्यते इति न काप्यनुपपत्तिः।

किञ्च शेषभूषणशब्दस्य बहुव्रीहित्वेऽपि विष्णुरेव बोध्यते। स च तिरुमलक्षेत्रस्थः श्रीवेङ्कटेश्वरः। अयं च कौण्डभट्टवंशीयानां कुलदैवतमिति ऐतिह्यात् ज्ञायते । अयं च वेङ्कटेश्वरः वक्षसि लक्ष्मीं धारयन्स्वस्य नारायणत्वं ख्यापयति। भुजाभरणरूपेण शेषप्रतिकृतिं नागं धरति। अस्य द्वयोरपि भुजयोः नागमुद्राङ्कितभुजकीर्तीस्तः। तथैव कटिसूत्ररूपेणापि नागमेव धत्ते । वैखानसागममनुसृत्य वेङ्कटेश्वरस्य उत्सवेषु भगवता मणिबन्धे धार्यमाणे रक्षासूत्रे आदिशेषस्य आवाहनं क्रियते।

किञ्च श्रीमन्नारायणस्य सर्वेषु भृत्येषु शेष एव अत्यन्तसन्निहितत्वेन संभाव्यते सम्प्रदाये। उक्तं च –

"निवासशय्यासनपादुकांशुकोपधानवर्षातपवारणादिभिः।
शरीरभेदैस्तव शेषतां गतैः यथोचितं शेष इतीर्यते जनैः॥"

- (आलवन्दार् स्तोत्रं-40)

शेष इति च अन्वर्थं नाम। ततश्च द्वयोः परस्परं भूषणभूष्यभावः। एतादृशं सान्निहित्यं शिवशेषयोः न प्रसिद्धम्। अतः शेषभूषणः वेङ्कटेश्वरः स्वकुलदैवतमत्र स्तोत्रविषय इति न काप्यनुपपत्तिः।

भवाब्धिः - भवः अब्धिरिव इति रूपकसमासः। संसाररूपः सागरः तस्य **तरणे**-पारगमने **तरिः** - नौरिव साधनम्। भगवन्तं विना साधनान्तरा -भावात्। अत एव सः अशेषफलदाता - सर्वफलदाता। मोक्षपर्यन्तं यानि फलानि तेषां समेषामपि दातृत्वं केवलं परब्रह्मण्येवास्तीति सूचनाय तद्विशेषणम्। स्तुतिरियं किमर्थम्? प्रीतः स भगवान् शेषस्य पतञ्जलेः महाभाष्यकारस्य ये अशेषाः अर्थाः वैयाकरणसिद्धान्ताः तेषां समेषां ज्ञानं प्रयच्छेदिति ।स्वानुग्रहेण सह पतञ्जलि-महर्षेरपि अनुग्रहं दापयेदिति।

किञ्चास्मिन् श्लोके सम्प्रदायसिद्धः भगवद्भक्तयोर्मध्ये स्थितः शेषशेषिभाव-सम्बन्धोऽपि सूचितो भवति। अयं च शेषशेषिभावः अद्वैतदर्शनेऽप्यङ्गीकृत एव। श्रीशङ्काराचार्या एव स्वविरचिते विष्णुषट्पदीस्तोत्रे इत्थं वदन्ति -

"सत्यपि भेदापगमे नाथ तवाहं न मामकीनस्त्वम्।
सामुद्रो हि तरङ्गः कथमपि समुद्रो न तारङ्गः॥"

(विष्णुषट्पदीस्तोत्रम् -3)

अत्र "तवाहं"इत्यनेन भगवच्छेषत्वमात्मनः प्रथयन्ति आचार्याः। शेषभूषण-शब्दोऽपि अमुमेवार्थं द्योतयति। किञ्चानेन भूषणसारप्रतिपाद्यस्यापि सूचनं भवति। तथा हि - भूषणसारस्तु आर्थिकः ग्रन्थः। अत्र च प्रथमं पदार्थनिश्चयः अनन्तरं पुनः पदार्थानां परस्परं विशेषणविशेष्यभावेन अन्वयश्च विषयौ। अत्र प्रथमश्लोकेन स्फोटरूपस्य जगतः ब्रह्मविवर्तरूपेण कथनद्वारा वर्णादिस्फोटानां तद्बोध्यार्थानां च निरूपणमत्रविषय इति सूचितम्। द्वितीयेन चानेन तेषां निश्चितानां पदार्थानां मध्ये किं विशेष्यम् किं विशेषणम् इत्यादिनिरूपणमपि विषय इति सूचितम्।

वाग्देवी यस्य जिह्वाग्रे नरीनर्ति सदा मुदा।
भट्टोजिदीक्षितमहं पितृव्यं नौमि सिद्धये ॥ 3 ॥
पाणिन्यादिमुनीन् प्रणम्य पितरं रङ्गोजिभट्टाभिधं
द्वैतध्वान्तनिवारणैकफलिकां पुंभाववाग्देवताम्।
ढुण्ढिं गौतमजैमिनीयवचनव्याख्यातृभिर्दूषितान्
सिद्धान्तानुपपत्तिभिः प्रकटये तेषां वचो दूषये ॥ 4 ॥

अतश्च प्रथमश्लोके "स्फोटरूपम्" इति साभिप्रायं, तथा द्वितीये च श्लोके "शेषाशेषार्थलाभ" इति साभिप्रायम्। शेषः विशेषणम्,अशेषः विशेष्यमिति तयोः अर्थयोः विशेषणत्वविशेष्यत्वयोः लाभःप्राप्तिः अर्थात्ज्ञानमित्यर्थः। अतश्च श्लोकद्वयेन ग्रन्थप्रतिपाद्यमपि सूचयन् अनुबन्धचतुष्टयमत्र सूचयतीति ज्ञेयम्॥2 ॥

पाणिनीये सम्प्रदाये प्रसिद्धेषु अङ्गुलिगण्येषु वैयाकरणेषु अन्यतमः भट्टोजीदीक्षितः। अयं भट्टोजीदीक्षितः कौण्डभट्टस्य साक्षात् पितृव्यः। तस्यैव भट्टोजीदीक्षितस्य कारिकाः व्याचिख्यासिता इति पितृव्यं भट्टोजीदीक्षितमपि नौति **वाग्देवी** त्यादिना।

यस्य मुखं सर्वदा सरस्वत्याः नृत्यरङ्गः नित्यनिवासः तादृशः भट्टोजीदीक्षितः। अनेन सर्वशास्त्रविषयाः भट्टोजीदीक्षितस्य जिह्वाग्रे विलसन्तीति सर्वशास्त्रार्थतत्त्वज्ञता तस्य भट्टोजीदीक्षितस्य प्रस्तूयते॥ 3 ॥

एवं नमस्क्रियाप्रार्थनादिरूपं मङ्गलं कृत्वाऽपि एतदपर्याप्तमिति मन्वानः मुनित्रयं स्वजनकं रङ्गोजिभट्टं गणपतिं च प्रणमति प्रतिपाद्यविषयमपि सूचयति -- **पाणिन्यादी**त्यादिना। **पाणिन्यादिमुनीन्** पाणिनिकात्यायनपतञ्जलीन् **प्रणम्य** नमस्कृत्य **रङ्गोजिभट्टाभिधं पितरं** रङ्गोजिभट्टनामानं जनकं च (प्रणम्येति शेषः), कथंभूतम् **पुंभाववाग्देवताम्** पुरुषरूपं प्राप्तां सरस्वतीं सरस्वत्याः अवताररूपमित्यर्थः। किमर्थमयमवतारः द्वैतध्वान्तनिवारणाय। द्वैतम्जीवब्रह्मणोः भेदः तदेव ध्वान्तं तमः तस्य निवारणाय । तन्निवारणादिकमेव फलमस्यावतारस्येत्यर्थः। अनेन च किञ्चित्प्रसिद्धमैतिह्यं स्वपितृविषयकं सूचयति कौण्डभट्टः।

तथा हि – केलदिवेङ्कटभूपः इति कश्चित् राजा दक्षिणभारते प्रसिद्धः आसीत्यस्य सभायां रङ्गोजीभट्टः आस्थानपण्डितः आसीत्। स च राजा शुद्धाद्वैतवेदान्तस्य प्रचारकः समर्थकश्चासीत्। अस्यैव सभायां भट्टोजीदीक्षितः अपि आसीत्।

1.0 ग्रन्थारम्भः

प्रारिप्सितप्रतिबन्धकव्यूहोपशमनाय कृतं श्रीपतञ्जलिस्मरणरूपं मङ्गलं शिष्यशिक्षार्थं निबध्नन्चिकीर्षितं प्रतिजानीते -

फणिभाषितभाष्याब्धेः शब्दकौस्तुभ उद्धृतः।
तत्र निर्णीत एवार्थः संक्षेपेणेह कथ्यते ॥ 1 ॥

अयं च भट्टोजीदीक्षितः अस्यैव राज्ञः प्रेरणया "तत्त्वकौस्तुभ"ग्रन्थमरचयत्। एकदा "विद्याधीश वडेरु"इति मध्वयतिना सह रङ्गोजिभट्टस्य वेदान्ते वादः आसीत्। मध्वयतिः द्वैतसिद्धान्तानुयायी। अयं च अद्वैतसिद्धान्तानुयायी। अयं च वादः केलदि वेङ्कटभूपस्य सभायामेव प्राचलत्। तस्मिन् वादे माध्वभट्टारकं जित्वा आन्दोलिकां पुरस्काररूपेण प्राप्तवान् रङ्गोजिभट्टः। रङ्गोजिभट्ट एव कौण्डभट्टस्य गुरुरपि। एतत्सर्वं स्वयमेव कथयति कौण्डभट्टः--

"विद्याधीशवडेरुनामकयतिश्रीमाध्वभट्टारकं
जित्वा केलदि वेङ्कटय्य सविधेऽप्यान्दोलिकां लब्धवान् ।
यश्चक्रे मुनिवर्यसूत्रविवृतिं सिद्धान्तभङ्गं तथा
माध्वानां तमहं गुरूपमगुरुं रङ्गोजिभट्टं भजे ॥" इति ।

एवं गुरुं पितरं ढुण्ढिं -गणपतिं च नत्वा ततः अत्र प्रतिपाद्यं पुनः सूचयति। अत्र प्रधानं लक्ष्यं वैयाकरणसिद्धान्तानां मीमांसकनैयायिकदूषितानां तन्मतखण्डन-पुरस्सरं पुनः प्रतिष्ठापनम्। तदेव कथयति - **गौतमजैमिनीयवचनव्याख्यातृभिः दूषितानित्यादिना** - अत्र विशेषान्तरमपि सूचयति। न्यायशास्त्रप्रवर्तकाचार्यः गौतमः। मीमांसाशास्त्रप्रवर्तकाचार्यः जैमिनिः। आभ्यां शास्त्रद्वयप्रवर्तकाभ्यां ऋषिभ्यां सह वैयाकरणानां नास्ति विरोधः। परन्तु तत्सूत्रव्याख्यातारः तदनु-यायिन एव तन्मतमन्यथा व्याख्यातवन्तः। अतोऽस्माकं तद्व्याख्यातृभिरेव विरोधः न तु मूलभूतशास्त्रकृद्भिः।इति। अनेन चास्मिन् ग्रन्थे प्राधान्येन विचार्यमाणः वैयाकरणसिद्धान्तो विषयः तज्जिज्ञासुरधिकारी तज्ज्ञानं प्रयोजनं प्रतिपाद्यप्रतिपादकभावः सम्बन्धश्चेति अनुबन्धचतुष्टयं सूचितम्॥ 4 ॥

एतावता स्वेष्टदेवता-मुनित्रय-गणपति-जनक-पितृव्यादिनमस्कारात्मकं मङ्गलं कृत्वा इदानीं स्वपितृव्येण भट्टोजिदीक्षितेन विरचिताः वैयाकरणसिद्धान्तकारिका-नाम्ना प्रसिद्धाः कारिकाः व्याख्यातुमारभते कौण्डभट्टः।

उद्धृत इति। अत्र अस्माभिरिति शेषः। भाष्याब्धेः शब्दकौस्तुभ उद्धृत इत्युक्तिस्तु शब्दकौस्तुभोक्तानाम् अर्थानाम् आधुनिकोत्प्रेक्षिततत्वनिरासाय। अन्यथा तन्मूलकस्यास्य ग्रन्थस्याप्याधुनिकोत्प्रेक्षितसारत्वापत्तौ पाणिनीयाना-मनुपादेयतापत्तेः। तत्र निर्णीत इत्युक्तिरितोऽप्यधिकं जिज्ञासुभिः शब्दकौस्तुभे द्रष्टव्यमिति ध्वनयितुम्॥ 1 ॥

ग्रन्थादौ सर्वैरपि मङ्गलमाचरणीयमिति सम्प्रदायमनुसृत्य भट्टोजिदीक्षितोऽपि स्वीयकारिकामयग्रन्थस्यादौ पतञ्जलिस्मरणपूर्वकं मङ्गलमाचरन् शिष्यशिक्षार्थं ग्रन्थादौ निरबध्नात्। तदेव सूचयति कौण्डभट्टः **प्रारिप्सितेत्यादिना। प्रारिप्सितस्य** प्रारब्धुमिष्टस्य अस्य ग्रन्थस्य ये **प्रतिबन्धकाः** -विघ्नाः तेषां **व्यूहस्य** -समूहस्य **उपशमनाय** - प्रशमाय। भट्टोजिदीक्षितः अनेन श्लोकेन न केवलं मङ्गलमात्र-माचरति किन्तु चिकीर्षितस्य ग्रन्थस्य विषयं प्रतिपाद्यस्य प्रामाण्यं च सूचयति।

1.1 भाष्याब्धेः शब्दकौस्तुभ इत्यनयोः समासविचारः

फणिः -शेषावतारः पतञ्जलिः। तेन भाषितं भाष्यं महाभाष्यमिति प्रथितम्। एतच्च समुद्रतुल्यम्। समुद्रः यथा अधृष्यः अभिगम्यश्च यादोरत्नैः तथैव विषयगाम्भीर्येण अधृष्यः सरसया विशिष्टया च शैल्या अभिगम्यश्चेति समुद्र सादृश्यम्। भाष्यमेव अब्धिरिति रूपकसमासः। यथा चाब्धेः मन्थनेन तत्सारभूताः पदार्थाः चन्द्रलक्ष्मी-कौस्तुभादयः उद्धृताः तथैव अस्य भाष्यस्य सम्यगध्ययनेन सारभूताः वैयाकरणसिद्धान्ताः उद्धृताः ये च कौस्तुभतुल्याः। अत एव हि तत्संग्रहस्य "शब्दकौस्तुभ"इति अन्वर्थं नाम । अनेन महाभाष्यस्य सारभूतः पदार्थः सर्वोऽपि शब्दकौस्तुभग्रन्थरूपेण प्राकाश्यं नीतः इति सूचयति। यथा च समुद्रस्य मन्थनमतीव दुष्करं तथैव महाभाष्यसमालोचनमपीति महाभाष्यस्य गाम्भीर्यमपि अनेन प्रकाश्यते । तथा च महता प्रयत्नेन महता प्रणिधानेन च शब्दकौस्तुभग्रन्थः रचित इति तत्र सर्वोऽपि विषयः प्रामाणिकः वैयाकरणैः उपादेयश्चेति सूचितम्। सोऽपि ग्रन्थः अत्यन्तं विपुल इति अध्येतृणां सौकर्यार्थं तत्रत्याः विषया एव कारिकारूपेण संक्षिप्यन्ते इत्यर्थः। अनेन अस्य कारिकाग्रन्थस्य तन्मूलभूत-शब्दकौस्तुभग्रन्थस्य च प्रामाण्यं सिद्धमिति अस्य उपादेयतायां सन्देहलेशोऽपि नावश्यक इति सूचयति - **आधुनिकोत्प्रेक्षिततत्वनिरासायेति । अन्यथेति।** शब्दकौस्तुभोक्तविषयाणाम् आधुनिकोत्प्रेक्षिततत्वानिरासे । **अस्यापि** शब्दकौस्तुभ-

2. अथ धात्वाख्यातार्थनिर्णयः

2.1 धात्वाख्यातार्थविषये वैयाकरणमतम्

प्रतिज्ञातमाह -

फलव्यापारयोः धातुः आश्रये तु तिङः स्मृताः।
फले प्रधानं व्यापारः तिङर्थस्तु विशेषणम्॥ 2 ॥

धातुरिति। अत्र स्मृत इति वचनविपरिणामेनान्वयः।

2.2 धात्वर्थः

फलं विक्लित्त्यादि।

मूलस्य अस्य अपि आधुनिकोत्प्रेक्षिततत्वापत्त्या कारिकाग्रन्थस्य अनुपादेयता आपद्येतेति भावः।

अथात्र शङ्का उदियात् यत् वैयाकरणसिद्धान्तज्ञानाय महाभाष्ये वर्तमाने महाभाष्यमूलस्यापि शब्दकौस्तुभस्य तन्मूलककारिकाग्रन्थस्य वा अध्यनस्य का आवश्यकता इति। तदेव समाधत्ते श्लोके भाष्याब्धिरिति पदेन। अत्र भाष्याब्धिरिति साभिप्रायमित्यर्थः। तथा हि – समुद्रे अन्तः विद्यमानाः अनर्घाः रत्नविशेषाः न सामान्यैः द्रष्टुमपि शक्याः, अपितु तदवगाहननिपुणैरेव। यदि च तान्येव रत्नानि बहिरानीय कुत्रचित् स्थापितानि तर्हि तानि न केवलं सर्वैः द्रष्टुमेव शक्यानि अपि तु स्वस्वरुच्यनुसारम् उपयोक्तुमपि शक्यानि। तथैव भाष्ये वैयाकरणसिद्धान्ताः अत्यन्तं निगूढाः सन्ति ये च सामान्यवैयाकरणैः अध्येतृभिः अन्यैश्च ज्ञातु-मशक्याः। अतस्ते एव ततः महता प्रयासेनोद्धृत्य शब्दकौस्तुभरूपेण संग्रथ्य भट्टोजिदीक्षितेन स्थापिताः वैयाकरणानामन्येषां चोपभोगाय। अतः भाष्याध्येतृभि-रपि वैयाकरणसिद्धान्तजिज्ञासुभिरन्यैश्च शब्दकौस्तुभः उपादेय एव, स च प्रमाणभूत एवेति ॥ 1 ॥

2.2.1 ग्रन्थे प्रथमं धात्वाख्यातार्थनिरूपणस्य सङ्गतिप्रदर्शनम्

ग्रन्थे धात्वर्थनिरूपणस्य प्रामुख्यं प्राथम्यं चेत्थम् -"चत्वारि पदजातानि नामाख्यातोपसर्गनिपाताश्चेति" निरुक्तमनुसृत्य पदानि चतुर्विधानि - नाम आख्यातम् उपसर्गः निपातः इति। तत्रोपसर्गनिपातयोः व्युत्पत्त्यभावेऽपि अन्ययोः द्वयोः नामाख्यातयोः धातुजत्वं प्रसिद्धम्। तदेव वदति भाष्यकारः "सर्वं

नाम धातुजमाह शकटस्य च तोकम्" इति। "नामान्याख्यातजानीति शाकटायनः नैरुक्तसमयश्चे"ति यास्कश्च। शाकटायनश्च पाणिनेः पूर्वतनेषु अङ्गुलिगण्येषु वैयाकरणमूर्धन्येष्वन्यतमः। आख्यातं च तिङन्तम्। तस्य च धातुजत्वं स्पष्टमेव। अतश्च सकलप्रयोगमूलभूतत्वेन शब्दानुशासने धातोः मुख्यत्वं स्पष्टम्। किञ्च वाक्यार्थेऽपि धात्वर्थस्यैव मुख्यविशेष्यत्वं वैयाकरणाभिमतमिति ततोऽपि धात्वर्थस्य प्राधान्यं प्राथम्यं च सिद्ध्यति। अतः प्रथमं धात्वर्थनिर्णयः तत्प्रकृतिकाख्यातप्रत्ययार्थनिर्णयश्च आरभ्यते। वाक्यस्फोटस्य मुख्यत्वात् स्वमते वाक्यार्थे क्रियायाः प्राधान्याच्च तद्वाचकधात्वर्थः प्रथमं निरूप्यत इति **कान्तिः**।

वैयाकरणसिद्धान्तभूषणेऽपि तदित्थं निरूपितम् - वाक्यस्य प्रायशो सुप्तिङन्त-समुदायत्वात् सुबन्तानां च प्रायः क्रियाविशेषणत्वात् धातोश्च क्रियावाचकत्वेन पुरःस्फूर्तिकत्वात् इच्छावशाद्वा प्रथमं धात्वर्थनिरूपणमिति बोध्यम्।

2.2.2.फलव्यापारयोः इति कारिकायाः वैयाकरणमतोपवर्णनपरकत्वसूचनम्

प्रतिज्ञातमाहेति। अस्य कारिकाग्रन्थस्य तद्व्याख्याभूतभूषणसारग्रन्थस्य मुख्यमुद्देश्यं शाब्दबोधविषये वैयाकरणमतस्य मतान्तरनिरसनपूर्वकं प्रतिष्ठापनमित्युक्तमेव। ततश्चादौ वैयाकरणमतं किमिति तत्स्वरूपं तत्र प्रमाणं तत्समर्थकयुक्तिविशेषाश्च ज्ञातव्यानि। यावत् वैयाकरणैः स्वमतं स्पष्टतया न ज्ञातं तावत् तैः कथं वा मतान्तरनिराकरणं कर्तुं शक्यम्? अतः "फलव्यापारयोः" इति अनया कारिकया प्रथमं धात्वाख्यातार्थविषये तयोः विशेषणविशेष्यभावविषये च वैयाकरणानां मतं स्पष्टतया प्रतिपादयति। अत्र सर्वत्र प्रथमं प्रतिज्ञा- "फलव्यापारयोः धातुः । कर्तृकर्मसंख्याकालेषु आख्यातप्रत्ययः" इति। अनन्तरं सूत्रभाष्यप्रामाण्यप्रदर्शनम्। ततश्च तत्र युक्तिप्रदर्शनम्, तथानङ्गीकारे दोषप्रदर्शनं चेति क्रमः। अस्याश्च कारिकायाः उद्देश्यं स्पष्टतया वैयाकरणमतप्रदर्शनमेव नत्वन्यमतनिराकरणम्। अन्यमतनिराकरणं तु "व्यापारो भावने"ति कारिकातः आरभ्यते। अतश्चास्यां कारिकायाम् तत्र तत्र तत्तद्ग्रन्थभागस्य अन्यमतनिराकरण-पराः व्याख्याः चिन्त्याः एव। वैयाकरणमतस्य युक्तिभिः समर्थनसन्दर्भे तथानङ्गीकारे दोषः मतान्तरेऽपि सम इति प्रसङ्गवशात् तन्मते दोषप्रदर्शनमपि स्यान्नाम। यथा आख्यातार्थस्य कर्तृकर्मणोः "प्रकृति प्रत्ययार्थयोः"रिति न्यायेन धात्वर्थं प्रति विशेष्यत्वस्वीकारे यः दोषः उक्तः "पश्यमृगो धावती"त्यादिषु

एकवाक्यतानापत्तिरूपः, स च प्रथमान्तार्थमुख्यविशेष्यकत्ववादिनां नैयायिकानां मतेऽपि तुल्यः।तावता अस्य ग्रन्थस्य नैयायिकमतखण्डनपरत्वापादनं तु न युक्तम्। एतदेव तत्र स्पष्टतया प्रतिपादितं कौण्डभट्टेन "एवञ्च भावनाप्रकारकबोधे प्रथमान्तपदजन्योपस्थितिः कारणमिति नैयायिकोक्तं नादरणीयम्" इति ग्रन्थेन । अस्य चेदमेव तात्पर्यं यत् आख्यातार्थकर्तृकर्मविशेष्यकबोधस्वीकारे ये ये दोषाः ते सर्वेऽपि दोषाः नैयायिकमतेऽपि तुल्याः इति। न केवलमेतत्। आख्यातार्थकर्तृ-कर्मविशेष्यकबोधाङ्गीकारे "भावनाप्रकारकबोधे विशेष्यतया तत्समभिव्याहृत-प्रत्ययजन्योपस्थितिः कारणमिति" कार्यकारणभावः प्रकृत्यर्थप्रत्ययार्थयोःपरस्पर-मन्वयव्युत्पत्तेः "प्रकृति प्रत्ययार्थयोः" इति न्यायाच्च क्लृप्तः। नैयायिकानां तु आख्यातार्थकृतिरूपभावनाप्रकारकबोधे इतराविशेषणीभूतप्रथमान्तपदजन्योप-स्थितिः कारणमिति कार्यकारणभावः गुरुभूतः कल्प्य इति नैयायिकमते दोषाधिक्यं सूच्यते।

फलव्यापारयोरिति। धातुः फलं व्यापारः इत्यर्थद्वये स्मृतः। फलव्यापारयोः वाचकः धातुः। अनेन धातुवाच्यत्वं फलव्यापारयोः प्रतिजानीते। तिङस्तु आश्रये स्मृताः। आश्रयस्य सम्बन्ध्याकाङ्क्षया पूर्वं धात्वर्थतयोपात्तौ फलव्यापारावेव सम्बध्येते इति फलाश्रये व्यापाराश्रये च तिङः स्मृताः इत्यर्थः। अनेन फलाश्रयव्यापाराश्रयवाचकत्वं तिङां सूचयति। फलाश्रयः कर्म, व्यापाराश्रयः कर्ता ।तथा च कर्तृकर्मणोः तिङ्वाच्यत्वं प्रतिजानीते।अनेन च "लः कर्मणी" (पा. 3-4-69)ति सूत्रं स्मर्यते इति भावार्थकत्वं भावतिङामपि सूचितप्रायम्। अथवा भावे विहितानां तिङाम् धात्वर्थानुवादकत्वात् अन्यतिङामेवात्र कारिकायां तिङ्पदेन स्वीकारः इति न कश्चिद्दोषः। यद्यपि संख्याकालावपि तिङर्थौ। अथापि तयोः तिङर्थत्वे न कस्यापि विप्रतिपत्तिः, किन्तु कर्तृकर्मणोः तिङर्थत्वे एवेति तत्सूचयितुं कर्तृकर्मणोः तिङर्थत्वप्रतिपादनम्। अतःन न्यूनता । अत एव भूषणसारे स्पष्टतयोक्तम् - तिङर्थः कर्तृकर्मसंख्याकालाः इति।

2.2.3. धातोः फलव्यापारयोः पृथक् शक्तिरिति निरूपणम्

अत्रायं विशेषः - फले व्यापारे च धातोः एकवृन्तगतफलद्वयन्यायेन पृथक्शक्तिः, अर्थात् एकैव शक्तिः द्वयोः पृथक् उपस्थितिप्रयोजिका। यथा च तिङि कर्तृ-काल-संख्यानाम्,नाम्नि जातिव्यक्त्योः, सुपि संख्याकारकयोश्च। अर्थात् सर्वदा तयोः

द्वयोः धातुतः बोधः। अनेकार्थप्रतिपादकत्वेऽपि अत्र नानार्थत्वव्यवहारस्तु न। सर्वेषामपि एकोपस्थितिविषयत्वात्। तिङि तु कालसंख्ययोः सर्वदा उपस्थिति-सद्भावेऽपि कर्तृकर्मणोस्तु न एकोपस्थितिविषयत्वम् अतश्च हरिपदादिष्विव नानार्थत्वम्। अतश्च तिङि कर्तृकालसंख्याबोधिका एका शक्तिः, कर्मकालसंख्या-बोधिका अपरा शक्तिः, भावकालसंख्याबोधिका चान्या शक्तिः इति शक्तित्रयम् । तत्र च शबादिसमभिव्याहारः कर्त्रादित्रिकशक्त्युद्बोधकः सकर्मकधातुसमभिव्याहृत-यगादिः कर्मादित्रिकशक्त्युद्बोधकः अकर्मकधातुसमभिव्याहृतयगादिः भावादित्रिक-शक्त्युद्बोधक इति विवेकः। अत्र च धात्वर्थभूतयोः फलव्यापारयोः मध्ये तिङ्-समभिव्याहारे सर्वदा व्यापारः विशेष्यरूपेण फलं विशेषणरूपेण च भासते। धात्वर्थफलस्य विशेषणत्वेन धात्वर्थव्यापारे अन्वयः इत्यर्थः तथा च धात्वर्थफल-प्रकारकबोधं प्रति विशेष्यतया तिङ्समभिव्याहृतधातूपस्थापितव्यापारोपस्थितिः कारणमिति कार्यकारणभावः फलितः। फलव्यापारयोश्च मध्ये जन्याजन्य-साधारणः "अनुकूलत्वं" संसर्गः। स च अपदार्थोऽपि संसर्गमर्यादया भासते। तथा च "फलानुकूलः व्यापारः" धात्वर्थः सिद्ध्यति। एवं पदार्थः प्रतिज्ञातः। अत्र पदशब्देन "शक्तं पदमिति" नैयायिकपारिभाषिकं पदमभिप्रेतम्। तथा च धातुपदं तिङ्पदमिति शास्त्रीयः व्यवहारः।

अनन्तरमिदानीम् वाक्यार्थं प्रतिजानीते।अत्र च वाक्यं नाम न सुप्तिङन्तचय-रूपम्। किन्तु शक्तपदसमूहरूपम्। अतश्च "धातुः तिङ्" अनयोः समूह इत्यर्थः। तत्र विशेषणविशेष्यभावं वैयाकरणाभिमतं प्रतिजानीते - धात्वर्थः प्रधानम् तिङर्थः विशेषणमिति।अनेन तिङन्ते धात्वर्थविशेष्यको बोधः इति प्रतिज्ञाविषयः इति सूच्यते।तत्रापि कर्तृकर्मणोः क्रमशः व्यापारे फले च विशेषणत्वेनान्वयः इति कारिकायाः तात्पर्यभूतोऽर्थः।

विशेषणविशेष्यवाचकपदयोः समानवचनकत्वनियमात् कथं स्मृता इति बहुवचना-न्तस्य धातोर्विशेषणत्वम् इत्याशङ्कायामाह-"स्मृत" **इति वचनविपरिणामेना-न्वयः** इति। अनन्वितार्थकविभक्त्यादित्यागेन अन्वितार्थकविभक्त्यादिकल्पनं विपरिणामः।अत्र चानन्वितार्थकबहुवचनत्यागेन अन्वितार्थकैकवचनकल्पन-मित्यर्थः।

2.2.4.पृथक्शक्तिस्वीकारे दोषाणाम् आपादितानां निराकरणम्

ननु फलव्यापारयोः पृथक्शक्तिस्वीकारे तयोः अनन्वितयोरेव बोधविषयता स्यात् पुष्पवन्तपदवत्। पुष्पवन्तपदं हि सूर्यचन्द्रयोः शक्तम् "एकयोक्त्या पुष्पवन्तौ दिवाकरनिशाकरौ" इति कोशात्। तत्र च तयोः परस्परमनन्वितयोरेव बोधः। अथ तिबाद्युपस्थापितयोः कर्तृैकत्वयोरिव परस्परमन्वयोपपत्तिरित्युच्येत तर्ह्यपि तयोरुद्देश्यविधेयभावेनान्वयः स्यात्। अतः पृथक् शक्तिर्नोचितेति चेन्न। एकपदोपस्थापितयोरुद्देश्यविधेयभावेनान्वयव्युत्पत्तेः सङ्कोचात्। अयं च सङ्कोचः नैयायिकैः मीमांसकैश्च क्वचिदभ्युगतः। तत्र नैयायिकैः आख्यातार्थकृतिवर्तमानत्वयोः मीमांसकैः कृतीष्टसाधनत्वयोश्च सम्बन्धान्तरेणैवान्वयोऽभ्युपगतः। नव्यैः नैयायिकैः मीमांसकैश्च धातोः फलव्यापारयोः पृथक् शक्तिमङ्गीकृत्य द्वयोः परस्परं जन्यत्वादिना अन्वयः स्वीकृतः। अतः संसर्गमर्यादया जन्यत्वादेः सम्बन्धस्य बोधविषयत्वं निराबाधम्।

गदाधरभट्टाचार्येण व्युत्पत्तिवादे पञ्चमीकारके फलव्यापारयोः खण्डशः शक्तिपक्षे काचन शङ्का उद्भाविता समाहिता चेत्थम् - यदि च फलव्यापारयोः शक्तिभेदे एकार्थपरित्यागेन अपरार्थबोधप्रसङ्गवत् "धातुः फलविषयकं व्यापारविषयकं च बोधं जनयतु" इति सङ्केताभ्युपगमेऽपि पुष्पवन्तपदशक्त्यविशेषेण तत इव सकर्मकधातुतोऽपि विशेषणविशेष्यभावानापन्नस्यैव बोधः स्यात् न तु तदापन्नार्थद्वयविषयक इत्युच्येत - तदा सङ्केतस्य अवच्छेद्यावच्छेदकभावावगाहित्वमपि स्वीकरणीयम्। विशेषणविशेष्यभावेन भासमानयोरेव फलव्यापारयोः विषयताद्वयमवच्छेद्यावच्छेदकभावापन्नमिति तथैव तयोः भानम्। पुष्पवन्तपदसङ्केते च चन्द्रसूर्यविषयतयोः अवच्छेद्यावच्छेदकभावो न भासते, अतस्तयोः विशृङ्खलमेव भानम् इति न काप्यनुपपत्ति"रिति।

अस्य ग्रन्थस्यायमाशयः - धातोः फलव्यापारयोः खण्डशः शक्तिरिति मते "धातुः फलविषयकं व्यापारविषयकं च बोधं जनयतु" इत्याकारा ईश्वरेच्छा शक्तिः। सैव सङ्केतः। एवञ्च "पुष्पवन्तपदं सूर्यविषयकं चन्द्रविषयकं च बोधं जनयतु" इत्याकारसङ्केतवता पुष्पवन्तपदेन यथा परस्परमनन्वितयोरेव सूर्यचन्द्रयोः भानं तथा फलव्यापारयोरपि परस्परमनन्वितयोरेव शाब्दबोधे भानं स्यात् न त्ववच्छेद्यावच्छेदकभावेनान्वितयोरिति शङ्कितुः आशयः। समाधानं चेत्थम् ।

फलव्यापारयोः खण्डशः शक्तिरिति पक्षेऽपि सङ्केतः "धातुः फलविषयकं व्यापारविषयकं च बोधं जनयतु" इत्याकारो न। किन्तु यगाद्यसमभिव्याहृततिङ्-समभिव्याहृतधातुपदं फलविषयकत्वावच्छिन्नव्यापारविषयकताशालिशाब्दबोधं जनयतु" इत्याकारः, यगादिसमभिव्याहृततिङ्समभिव्याहृतधातुपदं व्यापारविषयकत्वावच्छिन्नफलविषयकताशालिशाब्दबोधं जनयतु" इत्याकारश्च। तस्मात् द्वयोरपि विषयतयोः अवच्छेद्यावच्छेदकभावावगाहित्वेन तथा शाब्दबोधो भवति। पुष्पवन्तपदे तु सङ्केते द्वयोः सूर्यचन्द्रविषयतयोः अवच्छेद्यावच्छेदकभावो न भासते। तस्मात् तत्र न विशेषणविशेष्यभावावगाहिशाब्दबोधः।

नैयायिकैस्तावत् गदाधरादिभिः कर्तृप्रत्ययसमभिव्याहारे भावे च फलप्रकारक-व्यापारविशेष्यकः कर्मप्रत्ययसमभिव्याहारे व्यापारप्रकारकफलविशेष्यकश्च बोधः अङ्गीकृतः तिङन्ते कृदन्ते चोभयत्र । कौण्डभट्टेन तु सर्वत्र तिङन्ते फलप्रकारक-व्यापारविशेष्यकः बोधः अङ्गीक्रियत इति तदनुसारं सङ्केतः एवं वक्तव्यः - "तिङ्-समभिव्याहृतं धातुपदं फलविषयकत्वावच्छिन्न-व्यापारविषयकताशालिबोध जनकम्" इत्याकारकं "कर्मकृदितरप्रत्ययसमभिव्याहृतधातुपदं फलविषयकत्वा-वच्छिन्नव्यापारविषयकताशालिबोधजनकम्" इति वा। कर्मकृदन्तं परित्यज्यान्यत्र तिङन्ते कृदन्ते च धातोः फलविशेषणकव्यापारविशेष्यकबोधस्यैव तन्मते इष्टत्वात्। कर्मकृदन्ते तु फलविशेष्यक एव बोधः "रामेण बाणेन हतो वाली"इत्या-दिषु "रामकर्तृकबाणकरणकप्राणवियोगाश्रयः वाली"ति बोधस्य शब्दकौस्तुभे प्रौढमनोरमायां च भट्टोजीदीक्षितेन प्रतिपादितत्वात्। उक्तं च कर्मसंज्ञासूत्रे कौस्तुभे दीक्षितेन "फलभावनयोस्तु विशेषणविशेष्यभावो विपरीत" इति। कर्मकृदन्तस्थले इति शेषः।

अथैवं पृथक् शक्तिं स्वीकृत्य तत्रागतानां शङ्कानां परिहाराय विशिष्टसङ्केत-स्वीकारः उद्देश्यविधेयभावेनान्वयवारणार्थं तस्याः व्युत्पत्तेः सङ्कोचः इत्यादि-क्लेशाः किमर्थं वोढव्याः, धातोरेव फलविशिष्टे व्यापारे शक्तिः कल्प्यताम्, फलस्य विशेष्यत्वापेक्षायां व्यापारविशिष्टफले च। कर्मकृत्प्रत्ययः व्यापारावच्छिन्नफल-बोधने तात्पर्यग्राहकः तद्भिन्नप्रत्ययः फलावच्छिन्नव्यापारबोधने तात्पर्यग्राहकश्च भवतु, प्राचीनैः नैयायिकैः "फलावच्छिन्नव्यापारे" एव धातोः शक्तिरङ्गीकृता इति चेदुच्यते - अस्मिन् पक्षे धातोः शक्तिद्वयं कल्पनीयमिति नानार्थता भवति। तत्र

शक्तिः फलावच्छिन्नव्यापारे व्यापारावच्छिन्नफले च कल्प्यत इति शक्यतावच्छेदकं फलावच्छिन्नव्यापारत्वं व्यापारत्वावच्छिन्नफलत्वं च स्वीकर्तव्यमिति गुरुधर्मस्य शक्यतावच्छेदकत्वापत्तिः। किं च विशिष्टस्यैव शक्यत्वे "तण्डुलं पचती"त्यादौ तण्डुलादेः कर्मणः धात्वर्थफले अन्वयानुपपत्तिः, विशिष्टशक्तिस्वीकारे विशिष्टस्यैव पदार्थत्वेन तत्र फलस्य पदार्थैकदेशत्वात् "पदार्थः पदार्थेनैवान्वेति न पदार्थैकदेशेन" इति न्यायात्। अयं च न्यायः अवश्यमङ्गीकरणीयः। अन्यथा घटपदात् उपस्थापिते घटत्वविशिष्टरूपपदार्थैकदेशभूते घटत्वे नित्यत्वाभिप्रायेण "नित्यो घटः" इति प्रयोगः स्यात्। नन्वेवं "सुन्दरः घटः" इत्यपि प्रयोगः न स्यात्। पदार्थैकदेशे घटे सुन्दराद्यनन्वयादिति चेन्न। उक्तन्याये पदार्थैकदेशशब्देन इतरविशेषणत्वेन ज्ञायमानः पदार्थैकदेश एव स्वीक्रियते। "सुन्दरः घटः" इत्यादिषु घटशब्दादुपस्थितघटत्वविशिष्टघटपदार्थैकदेशस्य घटस्य इतराविशेषण-त्वेन तत्र सुन्दरादिपदार्थान्तरान्वये न काचिदनुपपत्तिः। वस्तुतस्तु सुन्दरादि-विशेषणयोगः विशिष्टस्यैव। तत्र विशिष्टे विशेष्यतया भासमान एव तस्यान्वयः फलति। अतः न कश्चिद्दोषः। अत्र कान्तिकारः मन्नुदेवस्तु नागेशानुयायी। स च विशिष्टशक्तिपक्षमेव समर्थयति। प्रामाणिकगौरवस्य अदोषत्वात् गुरुधर्मस्य शक्यतावच्छेदकत्वेऽपि न क्षतिः। "पदार्थः पदार्थेनैवान्वेती"ति न्यायस्य धात्वर्थ-विषये सङ्कोचः क्रियते। अर्थात् व्युत्पत्तिवैचित्र्यात्अत्र एकदेशान्वयोऽपि स्वीक्रियते। स्वीकृतश्च एकदेशान्वयः नैयायिकैः जगदीशादिभिः फलावच्छिन्नस्य व्यापारस्यैव सर्वत्र धातुवाच्यत्वमिति पक्षे। अतः फलावच्छिन्नव्यापारे व्यापारा-वच्छिन्नफले च पृथक् धातोः शक्तिद्वयमित्येव युक्तमिति तस्याशयः।

पृथक् पृथक् उपस्थितयोः धात्वर्थयोः फलव्यापारयोः प्रथममन्वयः अन्तरङ्गत्वात्। द्वयोरपि अर्थयोः समानपदेन समकालमुपस्थापनमेवान्तरङ्गत्व-प्रयोजकम्। एतदेव समानाभिधानश्रुतिरिति मीमांसकैरुच्यते। ततः परमेव पदार्थान्तरेण सम्बन्ध इति "गमनं न स्पन्दः" इत्यादिषु विशेष्यभूतव्यापारे एव स्पन्दभेदः प्रतीयते न तु फले। न चैवं "स्तोकं पचति" इत्यादिषु स्तोकादेः विशेषणीभूतफलेऽन्वयो न स्यादिति वाच्यम्। क्रियाविशेषणानां विशेषणीभूतेऽपि अन्वयस्य अभ्युपगमात्।

2.2.5. मञ्जूषाकारमतप्रतिपादनम्

मञ्जूषायां नागेशस्तु धातोः फलविशिष्टव्यापारे व्यापारविशिष्टफले च पृथक् पृथक् शक्तिद्वयमङ्गीकरोति। तस्यायमाशयः - फले व्यापारे च पृथक्शक्तिस्वीकारे व्यापारोद्देश्यकफलविधेयकबोधस्य फलोद्देश्यकव्यापारविधेयकबोधस्य चापत्तिः, तादृशबोधे हेतुभूतपृथगुपस्थितेः अत्र सत्त्वात्। न च धातुजन्यव्यापारोपस्थितेः तथाविधबोधप्रतिबन्धकत्वं कल्प्यते अतो न दोष इति वाच्यम्। तादृशप्रतिबन्धकत्वकल्पने गौरवात्। कर्तृभावप्रत्ययसमभिव्याहारः फलविशिष्टव्यापारबोधनियामकः कर्मप्रत्ययसमभिव्याहारः व्यापारविशिष्टफलबोधनियामकः। न च विशिष्टद्वये शक्तिज्ञानस्य धातुजन्यविशिष्टविषयोपस्थितिद्वयस्य च शाब्दबोधं प्रति हेतुत्वं कल्पनीयमिति गौरवमिति वाच्यम्। प्रामाणिकत्वेन तस्यादोषत्वात्। पृथक् शक्तिवादेऽपि भिन्नपदोपस्थितयोरेवान्वयबोध इति व्युत्पत्तेःत्यागस्य व्युत्पत्यन्तरस्य च कल्पनीयतया गौरवम्। अपि च कर्तृप्रत्ययसमभिव्याहृतधातुजोपस्थितेः फलप्रकारकव्यापारविशेष्यकबोधं प्रति, कर्मप्रत्ययसमभिव्याहृतधातुजोपस्थितेः व्यापारप्रकारकफलविशेष्यकबोधं प्रति हेतुतायाः कल्पनीयतया कार्यकारणभावद्वयकल्पनागौरवं धातोरर्थद्वये शक्तिद्वयस्य कल्पनीयतया चातिगौरवम्। न च भवन्मतेऽपि तादृशकारणताद्वयस्य विशिष्टविषयकार्थद्वये शक्तिद्वयस्य कल्पनीयतया साम्यमेवेति वाच्यम्। बोधजनकत्वस्य विषयासम्बद्धेऽनुपपत्त्या तत्तत्प्रत्ययसमभिव्याहृतधातौ विशिष्टद्वयनिरूपितसम्बन्धद्वयस्य कल्पनीयतया अधिकगौरवस्य जागरूकत्वात्।इति।विस्तरस्तु **काशिकायां** द्रष्टव्यः।

अत्र **प्रभाकारेण** "पृथक्शक्तिवादिनापि तत्तत्प्रत्ययसमभिव्याहारस्य कारणत्वमवश्यं वक्तव्यमिति" नागेशोक्तिरित्थं निराकृता। प्राचीनमते कर्मकर्तृप्रत्ययोभयसमभिव्याहारे व्यापारविशेष्यकबोधस्यैवाङ्गीकृतत्वेन तादृशसमभिव्याहारद्वयस्य कारणत्वकल्पनाया अनावश्यकत्वात् इति। परन्त्वेतन्न विचारसहम्। "रामेण बाणेन हतो वाली, पक्वस्तण्डुल" इत्यादिषु कर्मकृत्समभिव्याहारे फलविशेष्यकबोधस्यैव शब्दकौस्तुभे भट्टोजीदीक्षितेन प्रतिपादितत्वेन तेषामपि मते बोधद्वयस्य सिद्धत्वेन तदर्थं समभिहारद्वयकारणत्वस्य कल्पनीयत्वात्।

2.2.6. काशिकाकाराशयमुपवर्ण्य तस्य खण्डनम्

अथ **काशिकाकारेण** "फलव्यापारयोरिति"मूलमपि न पृथक्शक्तितात्पर्यकं, किन्तु तदुभयसमुदाये शक्तिबोधकम्। तथा च विशिष्टशक्तिरेव दीक्षितकौण्डभट्टयोरपि सम्मतेत्यभिप्रायः सूचितः सोऽपि न सम्यक्। भूषणे पृथगेव शक्तिरिति स्पष्टमभिहितत्वात्। तथा हि --"फलविशिष्टव्यापारे एकशक्तौ चैकदेशत्वात् फलस्य तत्र पदार्थान्तरान्वयो न स्यादित्यादि वक्ष्यते। फलव्यापारयोः साध्यसाधनभावस्तु संसर्गः। अतो जनकत्वांशे शक्तिं विनापि फलजनकत्वं व्यापारे सुलभम्। एकपदोपस्थाप्ययोरपि कृतीष्टसाधनतावादे कृतीष्टसाधनत्वयोः कृतिवर्तमानत्वयोर्वा यथा परेषामन्वयः तथा अस्माकमपीति न कश्चिद्दोषः"इति।

अत्रेदं विचारणीयम्। पृथक्शक्तिवादे फले व्यापारे च धातोः किमेकैव शक्तिरभिप्रेता। उत शक्तिद्वयमिति। शक्तिद्वयमित्याश्रित्यैव दोषा उक्ताः परिहाराश्च। परन्तु शक्तिद्वयस्वीकारे हर्यादिपदतुल्यत्वात् द्वयोरर्थयोः अन्यतरस्यैव बोधविषयत्वं स्यात्। हर्यादिपदेषु हरिसिंहरूपयोरर्थयोः प्रथमं स्मृतत्वेऽपि प्रकरणादिना एकस्यैव बोधविषयत्वमिति, द्वितीयस्य बोधविषयस्य अर्थस्यैवाभावात् आधाराधेयभावेनान्वयाद्यापत्तिरूपदोषोद्भावनमेवासङ्गतम्।

2.2.7. खण्डशक्तिपक्षस्वरूपप्रदर्शनपुरस्सरं विद्वन्मानसहंसेत्यादौ दोषनिवारणम्

नन्वेवं "विद्वन्मानसहंसे"त्यादौ मानस शब्देन मनसः मानससरोवरस्य च बोधो न स्यादिति चेन्न। तत्र व्यञ्जनया द्वितीयार्थबोधात्। अतः फलव्यापारोभयबोधिका एकैव शक्तिः। एकवृन्तगतफलद्वयन्यायोऽपि अमुमेवार्थं सूचयति। तया एकया शक्त्या अर्थयोः पृथक्पृथगुपस्थितिर्भवति। अयमेव खण्डशक्तिपक्ष इत्यप्युच्यते। एवं च फलव्यापारयोः भिन्नशक्त्युपस्थापितत्वाभावात् भिन्नशक्त्युपस्थापितयोरेव उद्देश्यविधेयभावेनान्वयनियम इति अत्र तादृशदोष प्रसङ्ग एव नास्ति। तिङादीनामपि कर्तृ-संख्या-कालरूपानेकार्थाभिधाने एका एव शक्तिः। एवञ्चात्र एकशक्त्या प्रतिपादितानाम् अनेकेषाम् आकाङ्क्षायोग्यतादिकमाश्रित्य परस्परमन्वय इति न कश्चिद्दोषः। अत एव व्युत्पत्तिवादेऽपि पुष्पवन्तपदसाम्यमाश्रित्य असम्बद्धयोरेव बोधस्स्यादिति दोषः आपादितः। अतश्च एकैव शक्तिः इत्यादि **सरलायां प्रभायां** च सम्यक्प्रतिपादितम्। युक्तं चैतत्।

फलं विक्लित्त्यादीति॥ "स्वरितञितःकर्त्रभिप्राये क्रियाफले"(पा. 1-3-72) इति सूत्रे फलशब्दः प्रवृत्त्युद्देश्यपरत्वेन भाष्यकारैः व्याख्यातः। उक्तं च "न चान्तरेण यजिं यजफलं वपिं वा वपिफलं लभन्ते। याजकाः पुनरन्तरेणापि यजिं गाः लभन्ते भृतकाश्च पादिकम्"इति। स्वर्गमुद्दिश्य यागो विधीयते। धान्यमुद्दिश्य वपिर्विधीयते। स्वर्गः धान्यं च यजिवप्योः फलभूते। एवं भोजनमुद्दिश्य पाकः विधीयते। उक्तं च हरिणापि –

यस्यार्थस्य प्रसिद्ध्यर्थम् आरभन्ते पचादयः।
तत्प्रधानं फलं तेषां न लाभादि प्रयोजनम्॥ इति। (वा.प.तृ.उप.18)

तथा च पचत्यादीनां भोजनादिफलवाचकत्वस्वीकारे फलव्यापारयोः द्वयोरपि कर्तृनिष्ठत्वात् सकर्मकत्वाकर्मकत्वव्यवस्थोच्छेदः। विक्लित्तेरनन्तरमपि भोजन-पर्यन्तं पचतीति प्रयोगापत्तिः अपाक्षीदित्यनापत्तिश्च। अतः फलपदस्य लोके रूढ्या तादृशार्थोपस्थापकत्वेन शास्त्रे "स्वरितञित"(पा. 1-3-72) इत्यादिषु फलत्वेन प्रवृत्त्युद्देश्यभूतस्वर्गादीनां स्वीकारेऽपि धात्वर्थत्वेन विवक्षितफलत्वेन न तेषां ग्रहणम्। किन्तु कर्ता स्वक्रियया यद्द्वारा कर्मसम्बन्धमिच्छति तदेवात्र फलशब्देनाभिप्रेतम् "कर्तुरीप्सिततमं कर्म"(पा. 1-4-49)इति सूत्रस्वरसात्। तदेव कथयति - **विक्लित्त्यादीति**। पचतीत्यादिषु पचधात्वर्थव्यापारः अधि-श्रयणादिः। तया क्रियया जायमानं फलं तण्डुलादिषु विक्लित्तिः। तस्य सम्बन्धः तण्डुलेषु। तथा च कर्ता स्वक्रियाजन्यफलद्वारा तण्डुलादिकर्मसम्बन्धमिच्छति इति तत्र द्वारभूतविक्लित्त्यादेः धात्वर्थफलत्वमित्यर्थः। ग्रामं गच्छतीत्यत्रापि कर्ता स्वक्रियाजन्यसंयोगद्वारा ग्रामसम्बन्धमिच्छतीति संयोगस्य फलत्वम्। धात्वर्थत्वेन विवक्षितफलस्य सकर्मकस्थले कर्मणा सह साक्षात्सम्बन्ध एव विवक्षितः। अतश्च गमनक्रियाजन्यविभागस्य परम्परासम्बन्धेन ग्रामसम्बन्धेऽपि न तस्य गमिधात्वर्थफलत्वम्। स्नाति शेते इत्याद्यकर्मकस्थले कर्तृक्रियाजन्यस्य देहशुद्धिसौख्यादिरूपस्य प्रवृत्त्युद्देश्यस्य अपि फलत्वमिष्टमेव। परन्तु तत्र कर्मणः अभावात् तस्य फलस्यापि कर्तृगामित्वमेव। ततश्च "फलव्यापारयोः एकनिष्ठताया -मकर्मकः धातुः" इति लक्षणमपि संगच्छते।

2.2.8. फलस्वरूपविचारः, व्याख्यातॄणां मतविमर्शः

अत्र **दर्पणकारः** – "पारिभाषिकफलत्वं च "तद्धात्वर्थजन्यत्वे सति तद्धातुजन्योपस्थितिविषयत्वं तद्धात्वर्थत्वं" वा। जन्यत्वं च जन्यत्वप्रकारकप्रतीतिविषयत्वम्। तेन सत्तादौ नातिप्रसङ्गः। गम्याद्यर्थव्यापारजन्यविभागादौ फलत्ववारणाय तद्धात्वर्थत्वमिति विशेष्यम्। तदर्थव्यापारेऽतिव्याप्तिवारणाय तद्धात्वर्थजन्यत्वे सतीति विशेषणम्। एतच्च विक्लित्त्यादिफलानामक्षतम्। धातुना च फलस्य तत्तद्रूपेण विक्लित्त्यादिरूपेणैव बोधः न तु सामान्यरूपेण। तथा बोधस्यानुभवसिद्धत्वात्। परे तु कर्तृप्रत्ययसमभिव्याहारे तद्धात्वर्थजन्यत्वे सति तद्धात्वर्थनिष्ठविशेष्यतानिरूपितप्रकारतावत्त्वम्। जन्यता चारोपितानारोपिता वेत्यन्यदेतत्। विभागजन्यसंयोगादिरूपे पतत्याद्यर्थे विभागसंयोगयोः फलत्ववारणायोभयम्। कर्माख्याते फलस्य विशेष्यतयैव भानात् तत्रातिप्रसङ्गवारणाय कर्तृप्रत्ययसमभिव्याहारे इत्याहुः। तच्चिन्त्यम्। अनुगतफलत्वानिरुक्तेः" इति तद्धात्वर्थजन्यत्वे सति तद्धात्वर्थत्वमेव फलत्वमनुगतमित्यभिप्रैति। अत्र परे तु इत्यादिना अनूदितं लघुमञ्जूषायां नागेशोक्तं लक्षणम्।

परीक्षायां सत्तादिष्वजन्येष्वपि फलत्वसिद्धये "तत्कर्तृप्रत्ययसमभिव्याहृततद्धातुजन्यशाब्दबोधीयतद्धात्वर्थनिष्ठविशेष्यतानिरूपितप्रकारताश्रयत्वम्" इति लक्षणमुक्तम्। एतादृशमपि लक्षणं नागेशेन सुबर्थवादे मञ्जूषायामुक्तम्। तत्र हि-"कर्तृप्रत्ययसमभिव्याहारे तद्धात्वर्थनिष्ठविशेष्यतानिरूपितप्रकारताश्रयतद्धात्वर्थत्वम्" इति लक्षणमुक्तम्। **कान्तिव्याख्यायां** तु "कर्तृप्रत्ययसमभिव्याहृतधात्वर्थनिष्ठविशेष्यतानिरूपितप्रकारतावत्त्वे सति तद्धात्वर्थजन्यत्वं बोध्यम्। जन्यता चारोपितानारोपिता च विषयत्वादिसाधारणा बोध्या। कर्मप्रत्ययसमभिव्याहारे तु फलस्य विशेष्यत्वमिति वक्ष्यते"इति जन्यत्वघटितं लक्षणमुक्तम्। **काशिकाकारेणापि** जन्यत्वघटितं पूर्वोक्तमेव लक्षणमनूदितम्। एते सर्वे च प्रायः धात्वर्थवादमञ्जूषोक्तलक्षणमेव उक्तवन्तः।

अत्र कर्तृप्रत्ययसमभिव्याहार इति उपलक्षणमात्रम् तादृशबोधप्रसिद्धस्थलप्रदर्शनमात्रपरमिति **काशिकाकारः**। **शाङ्कर्यां** लघुमञ्जूषोक्तलक्षणस्य दर्पणोक्तलक्षणस्य च समन्वयः दलसार्थक्यप्रदर्शनपुरस्सरं सम्यगेव प्रदर्शितः। परन्तु दर्पणलक्षणे एव स्वीया सम्मतिः प्रदर्शिता।

व्यापारस्तु भावनाभिधा साध्यत्वेनाभिधीयमाना क्रिया। उक्तं च वाक्यपदीये -

यावत्सिद्धमसिद्धं वा साध्यत्वेनाभिधीयते।

आश्रितक्रमरूपत्वात् सा क्रियेत्यभिधीयते॥ इति ॥(वा.प.तृ.क्रि.1)

प्रभाकारेण प्राचीनव्याख्यातॄणामभिप्रायाः सर्वेऽपि सङ्क्षेपेण प्रदर्शिताः। अन्ते च अनुगमविधया लक्षणमित्थं प्रदर्शितम् - "धातुनिष्ठवृत्तिविशिष्टत्वम् फलत्वम्। वैशिष्ट्यं च स्वज्ञानजन्योपस्थितिविषयत्वस्वज्ञानजन्योपस्थितिविषयव्यापार-विशिष्टत्वैतदुभयसम्बन्धेन। व्यापारवैशिष्ट्यं च स्वजन्यत्वप्रकारकप्रतीतिविषयत्व-स्वप्रयोज्यत्वप्रकारकप्रतीतिविषयत्वैतदन्यतरसम्बन्धेन"।

सुबोधिन्यामपि धातुविशिष्टत्वं फलत्वम्। वैशिष्ट्यं च स्वनिष्ठशक्तिप्रयोज्योपस्थिति-विषयत्वस्वनिष्ठशक्तिप्रयोज्योपस्थितिनिष्ठजनकतानिरूपितजन्यतानिष्ठप्रकारता-निरूपकप्रतीतिविशेष्यत्वोभयसम्बन्धेनेति लक्षणमुक्तम्।

तत्त्वदर्शिन्यां तु कर्मकृत्प्रत्ययासमभिव्याहारे तद्धात्वर्थविशेषणत्वे सति तद्धात्वर्थत्वमिति लक्षणमुक्तम्। पूर्वोक्तेषु लक्षणेषु दर्पणकारलक्षणं धात्वर्थव्यापारे अतिप्रसक्तम्। फलज्ञानपूर्वकं क्रियोत्पादात् फलस्य ज्ञानद्वारा पूर्वकालवृत्तितया तद्व्यापारे धात्वर्थजन्यत्वस्य सत्त्वात्। विषयतायाः अजन्यत्वमिति मते सर्वाणि जन्यत्वघटितानि लक्षणानि अव्याप्तिदोषग्रस्तान्येव भवेयुः।

सुबर्थवादमञ्जूषोक्तं जन्यत्वाघटितं लक्षणं युक्तमेव। वैयाकरणसिद्धान्तभूषणेऽपि "अस्त्यादावपि"(का-12) इति कारिकाव्याख्यायां "फलत्वमपि तद्धात्वर्थ-विशेषणत्वे सति तद्धात्वर्थत्वम्" इत्युक्तम्। अस्मिंश्च कर्मकृदसमभिव्याहारे इति विशेषणं देयम्।कर्मकृदन्ते फलविशेष्यकबोधस्यैव दीक्षितादीनामिष्टत्वात् । कर्तृप्रत्ययसमभिव्याहारमुपलक्षणीकृत्य तद्धात्वर्थविशेषणत्वे सति तद्धात्वर्थत्व-मिति लक्षणमेव युक्तम्। कर्तृप्रत्ययसमभिव्याहारे फलप्रकारकव्यापारविशेष्यक-बोधस्य सर्ववादिसम्मतत्वेन प्रसिद्धत्वात् तस्मिंश्च फलस्य प्रकारत्वात्। तद्धात्वर्थव्यापारप्रयोज्यत्वे सति तद्धात्वर्थत्वमित्यपि अनुगतं लक्षणं भवितुमर्हति विषयतादिषु जन्यत्वाभावेऽपि प्रयोज्यत्वस्योपपादयितुं शक्यत्वात्। दर्पणकारस्य अयमेवाशयः। दलसार्थक्यादिकं स्वयमूहितुं शक्यम्।

एवं फलं निरूप्य व्यापारं निरूपयति - **व्यापारस्तु** इति॥

2.2.9. व्यापारस्तु इत्यस्य वैयाकरणभूषणरीत्या अवतरणिकाप्रदर्शनम्

वैयाकरणसिद्धान्तभूषणे अस्य अवतरणिका इत्थं रचिता "अथ कोऽयं व्यापारः? न तावत् फलप्रयोजकक्रिया आत्माश्रयात्। क्रियात्वस्यैव हि तत्त्वात्। दण्डादिव्यापारस्यापि फलप्रयोजकत्वात् "दण्डेन घटं करोति" इत्यादौ दण्डादिव्यापारस्यापि धात्वर्थत्वापत्तेः। इष्टापत्तौ दण्डस्य कर्तृत्वापत्तेः तृतीया न स्यात्। आकडाराधिकारस्थत्वेन कर्तृसंज्ञया करणसंज्ञायाः बाधात्। न चात्मानमात्मना वेत्तीत्यादाविव दण्डस्य कर्तृत्वं करणत्वं च विवक्ष्यत इति वाच्यम्। तत्र आत्मनि औपाधिकभेदमादायैव कर्तृत्वाद्युपपत्तिरिति "कर्मवत्कर्मणे"(पा. 3-1-87)ति सूत्रे भाष्ये उक्तम्। तथा चैकदा एकमेव कारकत्वं विभक्त्यादिप्रयोजकमिति करणस्य बाध एव स्यात्। नापि यदनन्तरम् अव्यवधानेन फलोत्पादः सा क्रिया। अधिश्रयणादीनां क्रियात्वानुपपत्तेः। न च तत्र क्रियात्वमौपचारिकम्। उक्तं च –

"अनन्तरं फलं यस्याः कल्पते तां क्रियां विदुः।
प्रधानभूतां तादर्थ्यात् अन्यासां च तदाख्यया।"(वा.प.तृ.क्रि.15)

इति वाच्यम्, सम्भवति मुख्यत्वे गौणत्वकल्पनायाः अन्याय्यत्वात्। काष्ठादि-क्रियायाः अव्यवहितपूर्ववृत्तित्वेन तस्याः धात्वर्थत्वापत्तेश्च। आरब्धेऽपि पाके क्रियायाः भावित्वेन पचतीति प्रयोगानापत्तेः।

अथ पचतीत्यनुगतव्यवहारसिद्धा पचित्वजातिरेव क्रिया। तथा सति तस्याः साध्यत्वं न स्यात्, इष्टापत्तेः। क्रियायां साध्यत्वं नास्त्येव किन्तु तदाश्रयाणामेव साध्यत्वम्। उक्तं च वाक्यपदीये -

"जातिमन्ये क्रियामाहुरनेकव्यक्तिवर्तिनीम्।
असाध्या व्यक्तिरूपेण सा साध्येवोपलक्ष्यते॥"(वा.प.तृ.क्रि.20)

इति चेत् - दण्डादिव्यापारस्यापि फलानुकूलत्वेन तत्रापि क्रियात्वात् दोष-तादवस्थ्यम्। न च तत्र पचित्वजातिर्नास्तीति वाच्यम्। "दण्डः पचति" इत्यस्य अनापत्तेः। चरमव्यापारवर्तिनी जातिः क्रियेत्यपि न युक्तम्, अधिश्रयणादिषु पचित्वाभावे तदा पचतीति प्रयोगानापत्तेः। पूर्ववर्तिषु क्रियात्वजातेः आरोप इत्युच्येत तर्हि तत्पूर्ववर्तितण्डुलक्रयणक्रियाया अपि पचित्वे तत्समयेऽपि पचतीति प्रयोगापत्तिः। अतः धात्वर्थक्रिया दुर्निरूपा इति चेदुच्यते - **व्यापारो**

भावनेति॥ अयं च ग्रन्थः अत्यन्तं व्युत्पादक इति मत्वैव **दर्पण - प्रभा-तत्वदर्शनी**व्याख्यासु योजितः।

व्यापारो भावना सैवोत्पादना सैव च क्रिया - चस्त्वर्थे। स च व्यापारपदोत्तरं योजनीयः "व्यापारस्तु क्रिया" इति । "क्रिया व्यापार" इति लक्षणम्। एतावन्मात्रोक्तौ "क्रिया" इति कृदन्ताभिहितक्रियाया अपि धातुवाच्यव्यापार-रूपक्रियात्वापत्तिरतः उत्पादनेति विशेषणम्। सा क्रिया उत्पादनैव-उत्पाद्यत्वेनाभिधीयमाना एव - साध्यत्वेनाभिधीयमाना एवेति यावत्। क्रियादि-कृदन्ताभिहितक्रियायाः सिद्धत्वेनाभिधानात् न तत्रातिव्याप्तिः। अत एव च तिष्ठति भवति पुत्रीयतीत्यादौ नाव्याप्तिरपि। अन्यथा परिस्पन्दरूपक्रियात्वाभावात् तत्र लक्षणमव्याप्तं स्यात्। नन्वेवमपि धातुवाच्यफले विक्लित्त्यादावतिव्याप्तिः। तस्यापि साध्यत्वेन भानात्क्रियात्वाच्चेत्यत आह - **भावना सैवेति**। सा क्रिया भावनैव भावनापरनामिकैव। भावना च भवितुर्भवनानुकूलो भावुकव्यापारविशेषः फूत्कारादिः न तु विक्लित्त्यादिरिति न तत्रातिव्याप्तिः। एवञ्च भावनाकृतियत्नादि-पदैरभिधीयमानोऽपि व्यापार एव सोऽपि धात्वर्थ एवेति च लभ्यते। एव शब्दो भिन्नक्रमः। एवञ्च भावनापरनामिकैव उत्पाद्यत्वेन रूपेणाभिधीयमानैव च या क्रिया स व्यापार इति पर्यवसितोऽर्थः। तदेवोक्तं -- "व्यापारस्तु भावनाभिधा साध्यत्वेनाभिधीयमाना क्रिये"ति भूषणसारे। अथवा क्रियायाः लक्षणं "व्यापार-विशेषः क्रिये"ति। तत्र व्यापारविशेषस्य भावनादिकं विशेषणम्। एवञ्च भावना-भिधः साध्यत्वेनाभिधीयमानो व्यापारविशेषः क्रियेति लक्षणं सिद्ध्यति। एतदपि लक्षणं **भूषणे** प्रपञ्चितं कौण्डभट्टैः।

2.2.10. भावनापदार्थनिरूपणम्, अभिधा इत्यस्य अन्यकृतव्याख्यानिराकरण-पूर्वकमर्थवर्णनम्

भावनेति॥ उत्पत्त्यर्थकण्यन्तात् भूधातोः "ण्यासश्रन्थो युच्"(पा. 3-3-107) इति युच्। उत्पत्त्यनुकूलव्यापार इत्यर्थः। एष एव मीमांसकैः आर्थीभावनेति नाम्ना व्यपदिश्यते तिङर्थत्वेन गण्यते। व्यापारो भावनेति कथनेन मीमांसकैः तिङर्थत्वेन अभिप्रेता आर्थीभावना व्यापाराभिन्नेवैति तस्या अपि धातुवाच्यत्वमेव न तिङ्वाच्यत्वमिति सूचयति। एतदर्थमेव भावनाभिधेति क्रियायाः विशेषणम्। भावना अभिधा आख्या यस्याः इति व्युत्पत्या भावनापरनाम्नी क्रियेत्यर्थः

सिद्ध्यति। अनेन व्यापारस्य धात्वर्थत्वेऽपि भावनायाः तिङर्थत्वमिति भ्रमः निरस्यते। भावना क्रियेत्युक्तिस्तु ण्यन्तस्य भवतेः शुद्धेन करोतिना तुल्यार्थत्वमिति बोधनाय नैयायिकाभिमतकृतेरपि व्यापारे एवान्तर्भाव इति कृतेः पुनः तिङर्थत्वभ्रमनिरासाय। एवञ्च आत्मनिष्ठः व्यापारः प्रयत्नः शरीरनिष्ठः स्पन्दः फूत्कारादिः सर्वोऽपि व्यापार एवेति तस्य धात्वर्थत्वमेव न तु प्रत्ययार्थत्वम्। अनन्यलभ्यः शब्दार्थ इति न्यायात्। एवञ्च यजेतेत्यादिषु यज-धात्वर्थः यजनक्रिया, तिङर्थः भावना, तत्र तिङर्थभावनायां धात्वर्थयागादि-विशेषस्य यथायथं कर्मत्वेन करणत्वेन वा अन्वयः, तथा च यागेन भावयेत् यागं भावयेत् इति वा बोधः मीमांसकाभिमतः सिद्ध्यत्येव, परन्तु तैः या भावना तिङर्थत्वेनाभिप्रेता सा तु धात्वर्थ एवेति सूचयति व्यापारो भावनेति कारिकायां सैवोत्पादना इति शब्देन। "कारक"सूत्रे (पा. 1-4-23) "द्व्यर्थः पचिः, विक्लेदनं निर्वर्तनं च पचेरर्थः, तण्डुलान् विक्लेदयन् ओदनं निर्वर्तयतीति" भाष्यकारः भावनायाः उत्पादनारूपायाः धात्वर्थत्वमेव स्पष्टमुक्तवान्।

अत्र **काशिकाव्याख्यायाम्** अभिधा शब्दोऽपि व्यापारपरः तत्पर्यायरूपः इति व्याख्यातम्। अभिदधाति फलं जनयति अभिधीयते साध्यत्वेन धातुना इति वा अभिधेति व्युत्पत्तिद्वयं प्रदर्शितम्। तत्र प्रथमव्युत्पत्तौ "आतश्चोपसर्गे"(पा. 3-1-136) इति कर्तरि कः। द्वितीयव्युत्पत्तौ "आतश्चोपसर्गे"(पा. 3-3-106)इति कर्मणि अङ्। तथा च भावना अभिधा इत्यपरनामिका साध्यत्वेनाभिधीयमाना क्रिया व्यापार इति व्याख्यातम्। **प्रभाशाङ्करीसुबोधिनी**षु अपि एवं व्युत्पत्तिः प्रदर्शिता। अभिधा शब्दस्य प्रदर्शिता व्युत्पत्तिः न विरुद्धा वाक्यार्थरत्नादि-मीमांसकग्रन्थेषु अस्याः व्युत्पत्तेः प्रदर्शितत्वात्। परन्त्वत्र अभिधाशब्दः न व्यापारपर्यायत्वेन ग्रन्थकृदभिमतः। यतः **वैयाकरणसिद्धान्तभूषणे** धात्वर्थनिर्णये एव "भावनाभिधः साध्यत्वेनाभिधीयमानः व्यापार विशेषः क्रिया, वक्ष्यति च ग्रन्थकारः व्यापारो भावनेति" इत्यस्ति। अत्र भावनाभिध इत्यत्र अभिधाशब्दः आख्यापर एवेति तत्तुल्ये भावनाभिधा क्रियेति वाक्येऽपि अभिधाशब्दः आख्यापर एवेति युक्तम्।

॥**साध्यत्वेनेति**॥ साध्यत्वेनेति विशेषणे तृतीया प्रकृत्यादित्वात्। अभिधीयमानत्वं च प्रतीतिविषयत्वम्। तथा च साध्यत्वप्रकारकप्रतीतिविषयत्वमित्यर्थः। एतादृश-

प्रतीतिविषयत्वं यस्याः क्रियायाः स्वतस्सिद्धं सा क्रिया धात्वर्थः इत्यर्थः सिद्ध्यति। तथा च पदान्तरसमभिव्याहाराप्रयोज्यसाध्यत्वप्रकारकप्रतीतिविषयत्वं व्यापारत्वमिति लक्षणं पर्यवसन्नम्। घटं करोतीत्यादौ घटस्य साध्यत्वप्रतीतिः करोतीति पदान्तरसमभिव्याहारप्रयोज्येति तत्रातिव्याप्तिवारणाय पदान्तरसमभिव्याहाराप्रयोज्यत्वं प्रतीतेः विशेषणम्। अधिश्रयणाद्यधःश्रयणान्तव्यापारस्य पदान्तरसमभिव्याहारं विनापि साध्यत्वेन प्रतीयमानत्वात् उक्तव्यापारत्वं नानुपपन्नमिति तदवच्छिन्ने पचिवाच्यत्वं सिद्ध्यति। तथा च पदान्तरसमभिव्याहाराप्रयोज्यसाध्यत्वप्रकारकप्रतीतिविषयक्रियात्वं व्यापारत्वमिति लक्षणं पर्यवसितम्।

2.2.11. यावत्सिद्धम् इति कारिकाव्याख्या

धातुवाच्यक्रियायाः साध्यत्वेन प्रतीतौ वाक्यपदीयं प्रमाणतया निर्दिशति - **यावत् सिद्धमसिद्धं** वेति॥ यावत् - सर्वम्, तस्यैव विवरणं सिद्धम् असिद्धं वेति।

सिद्धं - निष्पन्नम् अपाक्षीदित्यादौ, असिद्धम्- अनिष्पन्नम् पचति पक्ष्यतीत्यादौ। उभयत्र साध्यत्वेन - साध्यत्वप्रकारकत्वेन, प्रतीयते - प्रतीतिविषयो भवति । साध्यत्वप्रकारकप्रतीतिविषयो भवति या सा क्रिया।अत्र पदान्तरसमभिव्याहारं विनेति योजनीयम्।तथा च पदान्तरसमभिव्याहारं विना साध्यत्वप्रकारकप्रतीतिविषयः क्रियेत्यर्थः। अत्र क्रियाशब्दो रूढ इत्यर्थः। तादृशप्रतीतिविषयत्वेन विवक्षितः सर्वोऽपि क्रियापदार्थः भवितुमर्हति।अत एव घटयति पुत्रीयति सूत्रयतीत्यादेः घटादेर्धातुत्वम्। पच्यते ओदनः स्वयमेवेत्यादौ केवलफलवाचकत्वेऽपि पचेर्धातुत्वम्।अत्र "कृञः श च"(पा. 3-3-100) इति भावे शः। अथ क्रिया शब्दस्य यौगिकत्वमपि दर्शयति - **आश्रित** इत्यादिना। क्रियते अवयवानां क्रमेणोत्पाद्यते या सा क्रियेति कृञ्धातोः "कृञः श च"(पा. 3-3-100)इति कर्मणि शप्रत्ययः। समुदायस्य साक्षात् क्रियाविषयत्वाभावेऽपि अवयवद्वारा तस्य क्रिया (उत्पत्ति) विषयत्वमित्यर्थः। तथा च अवयवक्रमिकोत्पत्तिद्वारा साध्यत्वेन विवक्षितत्वं क्रियात्वमिति पर्यवसितम्। आश्रितं क्रमरूपं यया असौ आश्रितक्रमरूपेति बहुव्रीहिः। ततः भावे त्वः। सामान्ये नपुंसकम्।अत्र क्रमशब्दः क्रमवदर्थकः, रूपशब्दः अधिश्रयणाद्यवयवबोधकः । क्रमं च तद्रूपं चेति कर्मधारये क्रमवद्रूपमित्यर्थः। क्रमवदधिश्रयणाद्यवयवाश्रिता

न च साध्यत्वेनाभिधाने मानाभावः। पचति पाकः करोति कृतिः इत्यादौ धात्वर्थावगमाविशेषेऽपि क्रियान्तराकाङ्क्षानाकाङ्क्षयोरेव मानत्वात्। तथा च क्रियान्तराकाङ्क्षानुत्थापकतावच्छेदकरूपं साध्यत्वम्। तद्रूपवत्त्वमसत्त्वभूतत्वम्। एतदेवादाय "असत्त्वभूतो भावश्च तिङ्पदैरभिधीयते" इति वाक्यपदीयमित्यादि द्रष्टव्यम्।

इत्यर्थः। गुरुप्रसादशास्त्रिभिः **स्वटिप्पण्यां** विग्रहोऽस्यान्यथैवेत्थं प्रदर्शितः- "आश्रितः क्रमः(पौर्वापर्यं) येन (रूपेण) तत् आश्रितक्रमं, तद्रूपं (क्रियावयवाः अधिश्रयणादयः)यस्याः सा आश्रितक्रमरूपा, तस्याः भावः तत्वात् आश्रितक्रमरूपत्वात्। क्रियारूपं हि तदवयवाः अधिश्रयणादयः, ते च क्रमश एवोत्पद्यन्ते"। यत्र च क्रियालक्षणं यौगिकं समन्वेति तत्र यौगिकत्वं यथा पचतीत्यादौ, अन्यत्र च सूत्रयति पच्यते तण्डुलःस्वयमेवेत्यादौ रूढिश्चाश्रयणीयेति भावः। **काशिकायां शाङ्कर्यां** च क्रियाशब्दस्य यौगिकत्वमेवोक्तम्। व्याख्यातं च – "पचति पक्ष्यतीत्यादावसिद्धम् अपाक्षीदित्यादौ सिद्धं वा साध्यत्वेनाभिधीयमानं वस्तु क्रियेत्यभिधीयते। कुत इत्याकाङ्क्षायां योगस्य हेतुत्वं प्रदर्शयति – आश्रितेत्यादिना।" इति। पक्षेऽस्मिन् यत्र क्रमरूपता निरूपयितुमशक्या तत्र तदारोपः कर्तव्यः।

वाक्यपदीयसंवादं प्रमाणतयोपन्यस्य साध्यत्वेन प्रतीतौ युक्तिमपि प्रदर्शयति - **न चेति**। साध्यत्वेनाभिधाने प्रमाणाभाव इति न। युक्त्यभाव इति न चिन्तनीयम्। तत्साधकयुक्तेः सत्त्वात्। सा च युक्तिः इत्थम् - पचति इति तिङन्तं पाक इति कृदन्तम्। उभयत्र पचधात्वर्थव्यापारः अधिश्रयणमारभ्य अधःश्रयणपर्यन्तः समानतयैव प्रतीयते। तथैव करोति कृतिः इत्यत्रापि। परन्तु पाकः कृतिः इत्यादि कृदन्ते "कृदभिहितो भावो द्रव्यवत्प्रकाशते" इति नियमात् घञ्-क्तिन्-प्रत्ययाभ्या - मभिहितो भावः द्रव्यवत् प्रकाशते अर्थात् तत्र कर्तृत्वादिकं भासते। तथा च कारकाणां क्रियान्वयनियमात् पाकः कृतिः इत्यादिषु क्रियान्तराकाङ्क्षा जायते। पचति करोतीत्यत्र तु न तथेति तिङन्तकृदन्तोपस्थाप्ययोः(व्यापारयोः) क्रिययोः वैलक्षण्यमित्यर्थः। तथा च क्रियान्तराकाङ्क्षोत्थापकत्वं यस्यां तस्याः सिद्धत्वम्, क्रियान्तराकाङ्क्षा यत्र नोत्तिष्ठति क्रियान्तराकाङ्क्षोत्थापकत्वं यस्यां न, तस्याः साध्यत्वमिति वैलक्ष्यण्यं सूपपादमित्यर्थः। उक्तं च "सार्वधातुके यक्"(पा. 3-1-67) इति सूत्रे भाष्ये - "अस्ति खल्वपि विशेषः तिङभिहितस्य भावस्य

कृदभिहितस्य च। कृदभिहितो भावो द्रव्यवत् भवति। द्रव्यं क्रियाभिनिर्वृत्तौ साधनत्वमुपैति। तद्वच्चास्य कृदभिहितस्य भवति पाको वर्तत इति । तिङि क्रिया क्रियया समवायं न गच्छति - पचति पठती"ति। तिङि क्रिया - तिङन्ताभिहिता क्रिया, क्रियया – क्रियान्तरेण, समवायम् – अन्वयं, न गच्छति - न प्राप्नोतीत्यर्थः। स चान्वयः आकाङ्क्षारूपः। तथा च तिङन्तोपस्थाप्या क्रिया क्रियान्तरं नाकाङ्क्षते कृदन्तोपस्थाप्या त्वाकाङ्क्षते इति तद्भाष्याशयः। अत्र च आकाङ्क्षापदेन उत्थिताकाङ्क्षैव ग्राह्या नोत्थाप्या। शब्दान्तरसमभिव्याहारेण यत्र शान्ताप्याकाङ्क्षा पुनरुत्थाप्यते सोत्थाप्याकाङ्क्षा - यथा "कृष्णं नमेच्चेत्सुखं यायात्" इत्यादौ। अत्र च चेच्छब्दसमभिव्याहारवशात् तिङन्तोपस्थाप्यक्रियायाः अपि क्रियान्तराकाङ्क्षा जायते। तथा चात्र साध्यत्वपरिचायकवाक्ये शब्दान्तरसमभि-व्याहाराभावे सतीति योजनीयम्। तथा च शब्दान्तरसमभिव्याहाराभावे सति क्रियान्तराकाङ्क्षानुत्थापकतावच्छेदकरूपवत्त्वं साध्यत्वमिति पर्यवसितम्।

2.2.12. साध्यत्वनिरुक्तिः, अन्यव्याख्यानानां विमर्शः

अत्रेदं तत्त्वम् - धातुतः क्रियान्तराकाङ्क्षानुत्थापकत्वेन क्रियायाः प्रतीतिः नानुभवसिद्धा। अतः धातूपस्थाप्यक्रियायाः क्रियान्तराकाङ्क्षानुत्थापकत्वे हेतुभूतं किञ्चित् धातूपस्थाप्यक्रियायां निरूपणीयम्। तच्च न धातूपस्थाप्यत्वनिबन्धनम्। तथा सति धातूपस्थाप्यत्वे सति क्रियान्तरानाकाङ्क्षित्वं क्रियान्तरानाकाङ्क्षित्वे सति धातूपस्थाप्यत्वमिति अन्योन्याश्रयदोषात्।अतश्च स्वतन्त्रमेव किञ्चित् क्रियान्तरा-न्वयविरोधि वक्तव्यम्। तच्च उत्पाद्यत्वरूपम्। पचति पाकमुत्पादयतीति विवरणमपि अत्र मानम्। स्वयमुत्पाद्यत्वेनावगतत्वेन असिद्धत्वात् उत्पाद्यान्तराकाङ्क्षायाः एवाभावात्। "क्रिया क्रियया समवायं न गच्छती"ति भाष्यस्यापि इदमेव तात्पर्यम्। न चैवं "पचति भवती"ति न स्यादिति वाच्यम्। उत्पाद्यमानस्य असिद्धस्यैव भवनकर्तृत्वेन अत्र तस्य अनुकूलत्वात्। अत एव पाको नश्यतीत्यर्थे पचति नश्यतीति न प्रयोगः। न चैवमपि असिद्धस्य दर्शनकर्मत्वासम्भवात् "पश्य मृगो धावती"त्यादौ धावनक्रियायाः दर्शनकर्मत्वासिद्धिरिति वाच्यम्। पिण्डीभूतायाः तस्याः दर्शनकर्मत्वासम्भवेऽपि अवयवक्रियाणां यथायथं सिद्धतया कर्मत्वसम्भवात्। तथा च तत्र धावने समुदाये कारकान्वयोपयोगि साध्यत्वं अवयवशः दर्शनोपयोगिसिद्धत्वं चास्तीति न दोषः।

तथा च क्रियान्तराकाङ्क्षानुत्थापकरूपम् उत्पाद्यत्वमिति सिद्धम्। उत्पाद्यक्रियायाः उत्पादककर्त्रादिकारकस्य च परस्पराकाङ्क्षायाः स्वाभाविकत्वात् कारकाणां साध्यक्रियायामेवान्वय इति कारकान्वयितावच्छेदकत्वमपि उत्पाद्यत्वमेव। उक्तं च कौण्डभट्टेन स्वयमेव "साध्यत्वेन क्रिया तत्र" इति कारिकाव्याख्याने **वैयाकरणसिद्धान्तभूषणे** "उत्पाद्यत्वमेव कारकान्वयितावच्छेदकं क्रियान्तराकाङ्क्षानुत्थापकं चे"ति। अतश्च प्रकृतेऽपि क्रियान्तराकाङ्क्षानुत्थापकतावच्छेदकरूपमपि उत्पाद्यत्वमेव तदेव असत्त्वभूतत्वम्इति प्रतिपादयन्ति **तत्त्वदर्शिन्यां** गुरुचरणाः सूर्यनारायणशास्त्रिणः। ॥**तद्रूपवत्त्वमिति**॥ तद्रूपमित्यर्थः। अत्र वाक्यपदीयसंवादं प्रदर्शयति - **असत्त्वभूत** इति। **तिङ्पदैरि**ति। पद्यते गम्यते बोध्यते वार्थः अनेनेति पदम्, अर्थबोधकः वर्णसमुदायः प्रकृतिप्रत्ययादिरूपः। "तिङः पदानि येभ्यः" इति बहुव्रीहिः। धातवः इत्यर्थः। तिङ्पदैः धातुभिः असत्त्वभूतस्य व्यापारस्य प्रतीतिः इति **प्रभातत्त्वदर्शिन्यौ**। तिङः पदानि येषामिति बहुव्रीहिमाश्रित्य तिङन्तबोधकं तिङ्पदम्। तथा च तिङन्तैः असत्त्वभूतः भावः अभिधीयते इत्यर्थः। बहुवचनस्वारस्यादपि तिङन्तमेव बोध्यत इति **अन्याः** व्याख्याः। अत्र कारिकायां च शब्दः एवार्थः। तथा च "असत्त्वभूत एव भावः" इत्यर्थः।

क्रियान्तराकाङ्क्षानुत्थापकतावच्छेदकरूपं साध्यत्वमिति॥ "साध्यत्वं क्रियान्तराकाङ्क्षानुत्थापकतावच्छेदकं यद्वैजात्यं तद्रूपम्। धात्वर्थक्रियायां तादृशं किञ्चिद्वैजात्यं भासते, तदेव हि कारकान्वयितावच्छेदकं, तच्च तिङन्तेष्वेव न कृदन्ते, तथा च एधितव्यमित्यादिषु अस्ति भवतीत्यादि क्रियान्तराकाङ्क्षादर्शनात् न साध्यत्वासत्त्वभूतत्वे" इति व्याख्याय "वस्तुतस्तु साध्यत्वं निष्पाद्यत्वमेव, गुरुभूतनिरुक्ताकाङ्क्षाघटितवैजात्यस्वीकारे मानाभावात्। अतः मूलोक्तं कारकान्वयप्रयोजकवैजात्यं न युक्तमि"ति स्वाभिप्रायं प्रकाशयति **कान्तिव्याख्याकारः**। अनेन निष्पाद्यत्वरूपं साध्यत्वं न कौण्डभट्टाभिमतं किन्तु गुरुभूतं कारकान्वयिप्रयोजकवैजात्यं तदभिमतमिति सूचितवान्। अन्ये च व्याख्यातारः प्रायः अमुमेव अनुसृतवन्तः। **तत्त्वदर्शिनीकाराः** गुरुचरणास्तु तेषां सर्वेषां भ्रान्तत्वमित्थं न्यरूपयन् - "साध्यत्वेन क्रिया तत्र" इति कारिकाव्याख्याने वैयाकरणसिद्धान्तभूषणे "उत्पाद्यत्वमेव कारकान्वयितावच्छेदकं क्रियान्तराकाङ्क्षानुत्थापकं च"

अयञ्च व्यापारः फूत्कारत्व – अधःसन्तापनत्व - यत्नत्वादि - तत्तद्रूपेण वाच्यः। पचतीत्यादौ तत्तत्प्रकारकबोधस्यानुभवसिद्धत्वात्। न च नानार्थतापत्तिः। तदादि - न्यायेन बुद्धिविशेषादेः अनुगमकस्य सत्त्वात्। आख्याते क्रियैकत्वव्यवस्थापि अवच्छेदकबुद्धिविशेषैक्यमादायैव। उक्तं च वाक्यपदीये -

गुणभूतैरवयवैः समूहः क्रमजन्मनाम्।
बुद्ध्या प्रकल्पिताभेदः क्रियेति व्यपदिश्यते॥ इति॥ (वा.प.तृ.क्रि.4)

इत्युक्तम्। अस्माद्भूषणग्रन्थात् उत्पाद्यत्वक्रियान्तराकाङ्क्षानुत्थापकतावच्छेदक-शब्दयोः एकार्थत्वं स्पष्टमेवावगम्यते। अतः प्रकृतग्रन्थेऽपि क्रियान्तराकाङ्क्षानुत्थापकतायाः अवच्छेदकम् उत्पाद्यत्वमेव भवितुमर्हति। दर्पणकारादयः सर्वेऽपि मार्गमेनं परित्यज्य ग्रन्थमन्यार्थपरतया संयोज्य "वस्तुतस्तु साध्यत्वं निष्पाद्यत्व-मेवे"त्यादिना प्रकृतग्रन्थकृदाशयभिन्नत्वस्फोरकं कल्पान्तरमन्वसरन्। तन्मुधैव। तादृशभ्रमे तेषां कौण्डभट्टनागेशयोः साध्यत्वस्वरूपनिर्णये आशयभेदधीरेव हेतुः स्यात्। धात्वर्थवादे मञ्जूषायाम् "अत्र केचित्" इत्यादिना साध्यत्वं क्रियान्तरा-काङ्क्षानुत्थापकतावच्छेदकं यद्वैजात्यं तद्रूपमित्युक्त्वा वस्तुतस्तु साध्यत्वं निष्पाद्यत्वमेव तद्रूपेणैव बोध इत्युक्तम्। अत्र केचित् इत्यादि कौण्डभट्टमत-प्रदर्शनपरः इति दर्पणकारादीनामाशयः स्यात्। स एव तेषामत्र भ्रमबीजम्। अस्मिंश्च भ्रमे "भूषणकारादिमतमाह – केचिदि"ति कलाव्याख्यापि कारणम् स्यात्। विचार्यमाणे नात्र भूषणकृन्नागेशयोः मतभेदोऽस्ति। अनेनैव भूषणकार-नागेशयोः मतभेदप्रदर्शनपरा कलाव्याख्यापि परास्ता। इति।

अत्रेदमप्यवधेयम्। क्रियान्तराकाङ्क्षानुत्थापकतावच्छेदकरूपवत्त्वं न साध्यत्व-लक्षणम्। किन्तु परिचायकम्। क्रियाघटितत्वेन अन्योन्याश्रयात्। तल्लक्षणं तु उत्पाद्यत्वमेव। स्पष्टीकृतश्चायमर्थो "भूवादयो धातव"(पा. 1-3-1)इति सूत्रे शब्देन्दुशेखरव्याख्यायां गुरुप्रसादे।

ननु "व्यापारस्तु भावनाभिधा साध्यत्वेनाभिधीयमाना क्रिया"इति निर्वचनेन आत्मनिष्ठकृतिभावनादिरूपयत्नस्य शरीरनिष्ठफूत्कारादेश्च व्यापारपदेन ग्रहणात् पचतीत्यादौ धात्वर्थे सर्वसाधारणधर्मस्याभावात् शक्यतावच्छेदकासम्भवेन व्यापारस्य धात्वर्थत्वानुपपत्तिः। न च व्यापारत्वमेव शक्यतावच्छेदकमिति नानुपपत्तिरिति वाच्यम्। तथा बोधाननुभवात्। फूत्कारत्वादिरूपेणैव बोधानु-

भवात्। येन रूपेण बोधानुभवः तस्यैव शक्यतावच्छेदकत्वमिति न्यायेन फूत्कारत्वादीनामेव शक्यतावच्छेदकत्वमिति तत्तदवच्छिन्नं फूत्कारादिरेव पचधात्वर्थः। तदेवाह - **अयं च व्यापार** इत्यादिना॥ भूषणे हि धात्वर्थव्यापारस्वरूपपरिचायकः विचारः मतान्तरनिराकरणपुरस्सरं धात्वर्थनिर्णये द्वित्रिस्थलेषु कृतः। स एव अत्र क्रोडीक्रियते - "व्यापाराश्च पुरुषः पचतीत्यत्र प्रयत्नत्वेन, वह्निः पचतीत्यत्र ऊर्ध्वज्वलनत्वेन, स्थाली पचतीत्यत्राधिश्रयणत्वेन, शरीरं पचतीत्यत्र अधिश्रयणावतारणफूत्कारत्वादिना, काष्ठानि पचन्तीत्यत्र अधःसन्तापनत्वेनावगम्यमानसकलव्यापारानुगतधर्मविरहात् अननुगतानां प्रवृत्तिनिमित्तानां स्वरूपसतामनुगमकेन बुद्धिविशेषविषयत्वेन तच्छब्दादिसर्वनाम्नामिव धातूनां शक्याः। अथवा फलजनकतावच्छेदकत्वमेव व्यापाराणां स्वरूपसदनुगमकम्।

2.2.13. शक्यतावच्छेदकत्वेन गुरुधर्मस्वीकारेऽपि क्षत्यभावसाधनम्

ननु फूत्कारादीनां तत्तद्रूपेण वाच्यत्वे गौरवात् कृतित्वमेव तदवच्छेदकम्, सम्भवति लघौ गुरुधर्मस्यान्याय्यत्वात्। रथो गच्छतीत्यादिषु व्यापारबोधस्तु लक्षणया सम्भवति। लक्ष्यतावच्छेदकत्वस्य गुरुधर्मेऽपि स्वीकारादिति चेन्न। लक्ष्यतावच्छेदकत्ववत् शक्यतावच्छेदकत्वस्यापि गुरुधर्मे स्वीकारे बाधकाभावात्। अतः फूत्कारत्वादिकमेव शक्यतावच्छेदकम्। लोके तथाबोधस्यानुभवसिद्धत्वात् गौरवमप्यकिञ्चित्करम्।

ननु कारणतावच्छेदकत्वप्रतियोगितावच्छेदकत्ववत् शक्यतावच्छेदकत्वं स्वरूपसम्बन्धविशेषः। स च सम्भवति लघौ गुरौ न कल्प्यते। अत एव लघुधर्म एव कारणतावच्छेदकः कल्प्यते। लक्ष्यतावच्छेदकत्वं तु न स्वरूपसम्बन्धविशेषः। इति चेत् - अत्रेदं प्रष्टव्यम्। कस्तावदयं स्वरूपसम्बन्धः? यदि चासौ तत्स्वरूपं तदा गुरुधर्मस्यापि तत्त्वमस्त्येव। अथातिरिक्तस्तर्हि लक्ष्यतावच्छेदकत्वमपि तद्वदेवेति कथं तस्मिन् लक्ष्यतावच्छेदकत्वस्वीकारः? वस्तुतस्तु तादृशस्वरूपसम्बन्धस्य अतिरिक्तस्य स्वीकारे प्रमाणमपि मृग्यम्। अवच्छेदकत्वं च अन्यूनानतिरिक्तविषयत्वमेव। तच्च गुरुधर्मे निर्बाधम्। अत एवोक्तमवच्छेदकत्वनिरुक्तौ दीधितिकृद्भिः - "गौरवप्रतिसन्धानदशायामपि कम्बुग्रीवादिमान्नास्तीति प्रतीतिबलात् गुरुधर्मोऽवच्छेदकः प्रतियोगितायाः" इति।

2.2.14 नानार्थत्वनिर्वचनम्

अत एव पचतीत्यत्र अधःसन्तापनत्व - फूत्कारत्व -चुल्ल्युपरिधारणत्व –यत्नत्वादिभिर्बोधः सर्वसिद्धः सङ्गच्छते। तदुक्तं "कारक"(पा. 1-4-23) सूत्रे भाष्ये "अधिश्रयणोदकासेचनतण्डुलावपन-एधोपकर्षणक्रियाः प्रधानस्य कर्तुः पाकः, द्रोणं पचति आढकं पचति इति सम्भवनक्रिया धारणक्रिया चाधिकरणस्य पाकः, एधाः पक्ष्यन्ति आविक्लित्तेर्ज्वलिष्यन्तीति ज्वलनक्रिया करणस्य पाकः" इत्यादिना। तत्र हि "तत्र तदा पचिर्वर्तते" इति वाक्येन तत्तदर्थस्य तदा तदा पचिशक्यता सूचिता। उक्तञ्च न्यायवार्तिकतात्पर्यटीकायां वाचस्पतिमिश्रैः- "यस्य हि व्यापारं प्राधान्येन धातुराख्यातप्रत्ययो वा अभिधत्ते स स्वतन्त्रः कर्ता। तथा हि - विक्लिद्यन्ति इत्यत्र तण्डुलादयः कर्तारः पचन्तीत्यत्र देवदत्तादयः। तत्कस्य हेतोः ? एकत्र तण्डुलादेः व्यापार उपात्तोऽन्यत्र देवदत्तादे"रिति। अत एव पचतीत्युक्ते फूत्कारमात्रवेति सन्देहो न भवति। व्यापारत्वेन व्यापारबोधे तु सन्देहः स्यात्।" इति।

नन्वेवम् अनेकशक्यतावच्छेदकत्वे हर्यादिपदवत् नानार्थत्वं स्यात्। न चेष्टापत्तिः। हर्यादिपदेष्विव प्रकरणादिभिः अर्थान्तरबोधस्य निरोधे समकालं फूत्कारादीनां बोधानापत्तिः। पचतीत्यत्र अधिश्रयणमारभ्य अधःश्रयणपर्यन्तानां यत्नसहितानां समूहस्य बोधस्य इष्टत्वेन तदनापत्तेः इत्यत्र आह - **न च नानार्थतापत्तिः** इत्यादि। नानाधर्मावच्छिन्नशक्तिनिरूपकतावच्छेदकैकधर्मवत्त्वं हि नानार्थत्वम्। यथा - हरिशब्दस्य विष्णौ इन्द्रे रवौ सर्पे सिंहे हये भेके च शक्तिः। सा च शक्तिः विष्णुत्वेन्द्रत्वसिंहत्वादिनानाधर्मावच्छिन्ना। तादृशशक्तेः निरूपकः हरिशब्दः। तन्निष्ठनिरूपकतावच्छेदकधर्मः हरीतिवर्णानुपूर्वी। सा च एकैवेति तादृशैकधर्मवत्त्वं हरिशब्दे अस्तीति हरिशब्दो नानार्थ इत्युच्यते। एतादृशं नानार्थत्वं पचादीनामप्यस्तीति शङ्का।

समाधानं तु तदादिन्यायेनेत्यादि। तद्-इदम्-एतदित्यादिसर्वनामशब्दैः घटत्वपटत्वादिविरुद्धधर्मविशिष्टानेकार्थप्रतिपादनेऽपि यथा न नानार्थत्वं तथाऽत्रापीत्यर्थः। तथा हि - तदिदमादिसर्वनामभ्यः घटपटादयोऽनेकेऽर्थाः घटत्वादितत्तद्विशेषधर्मपुरस्कारेण यद्यपि प्रतीयन्ते, तथापि न ते हर्यादिशब्दवदनेकार्था इत्युच्यन्ते। यतः तत्र घटत्वादिनानाधर्मावच्छिन्ना अपि अनुगतबुद्धिविषयत्वरूपैकधर्मपुरस्कारेण

प्रतीयन्ते। अनुगतैकधर्मपुरस्कारेण नानाधर्मावच्छिन्नप्रत्यायकस्य न नानार्थत्वम्। द्रव्यत्वेन घटपटाद्यर्थप्रतिपादकद्रव्यशब्दवत्। अननुगतनानाधर्मावच्छिन्नशक्तिनिरूपकतावच्छेदकैकधर्मवत्त्वमेव नानार्थत्वम्। शक्यतावच्छेदकानां नानात्वेऽपि शक्यतावच्छेदकतावच्छेदकस्यैकत्वे न नानार्थत्वमिति यावत्। अत्र च शक्यतावच्छेदकतावच्छेदकं च बुद्धिविषयत्वम्। तदेकधर्मपुरस्कारेण अनेकशक्यतावच्छेदकावच्छिन्नानां बोध इत्यर्थः। नन्वेवं पचतीत्यादितः यथा फूत्कारत्वादिनानाशक्यतावच्छेदकावच्छिन्नानां बोधः, तथा बुद्धिविषयतावच्छिन्नत्वेनापि बोधः स्यात्, यादृशः शक्तिग्रहः तादृश एव बोध इति नियमादिति चेन्न। बुद्धिविषयत्वस्योपलक्षणत्वेन उपलक्षणस्य तत्तत्पदशक्तिग्रहाविषयत्वेन शाब्दबोधेऽभानात्। उपलक्षणत्वं च तत्पदजन्यबोधविषयत्वेन तत्पदशक्तिग्रहाविषयत्वम्। उक्तं च **वैयाकरणसिद्धान्तभूषणे** – "बुद्धिविषयत्वरूपेणोपस्थितघटत्वादिशालिषु बुद्धिविषयतावच्छेदकवत्सु शक्तं तदादिपदमित्येव तदादेः शक्तिग्रहः। बुद्धिविषयत्वम् उपस्थितावनुगमकमात्रम् न तु तदंशे शक्तिः।" इति। तद्वत् प्रकृतेऽपि शक्यतावच्छेदकानां फूत्कारत्वादीनामनुगमकस्य शक्यतावच्छेदकावच्छेदकस्य बुद्धिविशेषादेः फूत्कारादिविषयकबुद्धेः सत्त्वेन बुद्धिविषयत्वरूपेणोपलक्षणीभूतेन बुद्धिविशेषेण फूत्कारादीन् अनुगमय्य तदवच्छिन्ने पचादीनां शक्तिकल्पनात् न नानार्थत्वम्। शक्यतावच्छेदकतावच्छेदकस्यैक्यादिति **शाङ्करी**।

2.2.15. तदादिन्यायस्यायुक्तत्वादिकान्तिकारमतम् , तदनुसारिमतान्तराणां विमर्शः, निर्णयश्च

कान्तिकारस्तु तदादिपदेषु बुद्धिविषयत्वोपलक्षितघटत्वाद्यवच्छिन्ने शक्तिं नाङ्गीकरोति। बुद्धिविषयत्वेन बुद्धिविषये तदादेः शक्तिः सर्वस्यापि बुद्धिविषयत्वेनैव सामान्यरूपेणैव बोधः न तु विशेषरूपेण इति तस्याशयः। अत्र "तस्यापत्यम्" (पा. 4-1-92) इति सूत्रभाष्यमपि प्रमाणतया निर्दिशति। तत्राहि - "सर्वनामनिर्देशे विशेषासंप्रत्ययः सामान्यनिर्देशात्, ततश्च तच्छब्दादेव प्रत्ययः स्यात्" इत्याशङ्क्य अपत्यशब्दस्य सम्बन्धिविशेषाकाङ्क्षतया "तस्यापत्यम्" (पा. 4-1-92) इत्युक्तावपि आकाङ्क्षायाः अनिवृत्तेः तेन तदादिना अपत्यस्य विशेषणायोगात् तत्र तद्विशेषवाचिन उत्पत्तिरिति सिद्धान्तितम्। एवं "तस्मिन्निति"(पा. 1-1-66) सूत्रेऽपि भाष्ये "सर्वनाम्ना अयं निर्देशः क्रियते सर्वनाम च सामान्यवाची"त्युक्तम्।

द्विविधादपि भाष्यात् सकलसाधारणबुद्धिविषयत्वरूपसामान्यमेव प्रवृत्तिनिमित्तमिति लभ्यते। तथा च तदादिषु घटपटादीनां घटत्वाद्यवच्छिन्नत्वेन बोधो न, किन्तु सामान्यरूपेणैव। अतः तदादिन्यायः अत्र नोपपादयितुं शक्यः। अतः पचादिषु हर्यादिष्विव नानार्थत्वमेवेष्टम् इति तस्य मतम्। **काशिकाकारो**ऽपि अमुमेवानुसरति। परन्तु तदादिन्यायः नैयायिकाभिमत एव कौण्डभट्टाभिमत इति भूषणसंवादेन निरूपयन्ति **शङ्करशास्त्रिण** इति स एव ग्रन्थकर्तुराशय इति ज्ञायते। किञ्च काष्ठं पचति स्थाली पचति इत्यादौ तत्तद्व्यापारविशेषमात्रबोधात् हर्यादिपदवन्नानार्थत्वमिष्टमेवेति अयं वृथा प्रयासः इति **कान्तिकारस्याशयः**। अत्रेदं विचारणीयम्। पचादिधातूनां नानार्थत्वं सर्वैः स्वीकरणीयमेव। एकदा सर्वकारकव्यापाराणां धात्वर्थत्वेनाविवक्षणात्। भिन्नभिन्नकारकाणां ये भिन्नभिन्नाः क्रियासमूहाः तत्तद्धातुवाच्याः, तेषु तदा तदा तस्य तस्य व्यापारविशेषस्य तत्समूहस्य वा बोधनाय नानार्थत्वमवश्यमङ्गीकरणीयम्। यथा - देवदत्तः पचतीति प्रयोगे अधिश्रयणादिरूपः यत्नसहितः क्रियासमूहः पचधात्वर्थः, काष्ठानि पचन्तीत्यत्र काष्ठगतज्वलनव्यापारः पचधात्वर्थः, स्थाली पचतीत्यत्र आविक्लित्तेः तण्डुलधारणरूपः व्यापारः पचधात्वर्थः, पच्यते तण्डुलः स्वयमेवेत्यत्र विक्लित्त्याश्रयत्वरूप एव व्यापारः पचधात्वर्थ इति विभिन्नेषु तेषु तेषु हर्यादिपदवदेव शक्तिः कल्प्येति नानार्थत्वं भवत्येव। परन्तु अत्रैव देवदत्तः पचतीत्यत्र पचधात्वर्थत्वेन कः व्यापारः बोध्यते? कथं वा बोध्यते? इति प्रमुखः प्रश्नः। विक्लित्त्यनुकूलः व्यापारः व्यापारत्वेन बोध्यते इति तु वैयाकरणैः नाङ्गीक्रियते। किन्तु तत्तद्विशेषरूपेणैव बोधः अङ्गीक्रियते। तथा चात्र अधिश्रयणाद्यधःश्रयणान्तेषु व्यापारेषु कश्चन एक एव पचधात्वर्थतया बोध्यते इति वक्तुं न शक्यम्। न हि देवदत्तः पचति इति वाक्यस्य देवदत्तः फूत्कारमात्रेण विक्लित्तिं निष्पादयतीत्यर्थः। किन्तु अधिश्रयणादिक्रमिकक्रियासमूहेन विक्लित्तिं साधयतीत्यर्थः। तथा चात्र क्रियासमूह एव पचधात्वर्थ इति वक्तव्यम्। ततश्च तस्य क्रियासमूहस्य कथं प्रतीतिः? शक्यार्थः कः? शक्यतावच्छेदकं किम्? तच्च एकं वा नाना वा? नाना चेत् नानार्थत्वं वा न वा? इत्यादि प्रश्नाः समाधेयाः। नानाशक्यतावच्छेदकेषु सत्स्वपि नानार्थत्वाभावः साधनीय इति तदर्थमयं सर्वोऽपि प्रयासः आरब्धः। ततश्च नानार्थत्वस्वीकारेणैव अस्य सर्वस्यापि समाधानं

भवतीति तु अविचारितरमणीयं वचः। अतः तदादिन्यायो वा तत्सदृशः अन्यः मार्गो वा अवश्यं स्वीकरणीय एव। तदादिसर्वनामसु यथा नैयायिकैः बुद्धिविशेष-विषयतोपलक्षितघटत्वपटत्वादिनानाशक्यतावच्छेदकावच्छिन्नानां बोधः अङ्गी-क्रियते तेन मार्गेण एकबुद्धिविषयत्वोपलक्षितफूत्कारत्वादिनानाशक्यतावच्छेदका-वच्छिन्नानां क्रियाणां समूहः तत्तद्धातुशक्यत्वेन स्वीकार्यः यदि च तत्तद्रूपेण बोधः इष्टः इति ह्यत्र कौण्डभट्टस्य हृदयम्।

2.2.16. जातिः पचाद्यर्थ इति पक्षान्तरम्

प्रभादर्पणौ तु पचित्वादिजातिरेव पचाद्यर्थः क्रियेति पक्षान्तरं प्रस्तुतः। तथा हि - फूत्काराद्यनेकव्यक्तिषु पचतीत्यनुगतव्यवहारात् फूत्काराद्यनेकव्यक्तिवृत्तिः पचित्वादिजातिरेव क्रिया। तथा च क्रमिकानेकव्यक्तिवृत्तिजातिरेव क्रिया। व्यक्तिद्वारकं च तस्याः साध्यत्वम्। स्फोटवदस्याः क्रमवद्भिः क्रियाक्षणैः अभिव्यक्तिः । उक्तं च वाक्यपदीये -

जातिमन्ये क्रियामाहुरनेकव्यक्तिवर्तिनीम्।
असाध्या व्यक्तिरूपेण सा साध्येवोपलभ्यते॥ इति। (वा.प.तृ.क्रि.20)

असाध्या - जातेः नित्यत्वात् उत्पाद्यत्वाभावात् असाध्यत्वम्। व्यक्तिद्वारा च साध्यत्वमित्यर्थः। व्यक्तिनिष्ठसाध्यत्वस्य जातौ आरोप इत्यर्थः।

अत्रेदं तत्त्वम्। पचादीनां फूत्कारत्वादिरूपेण फूत्कारादिक्रियाविशेष-वाचकत्वमेव। तथा सति नानार्थत्वं स्यादिति। नानार्थत्वेऽपि इष्टापत्तिरेव। यतः समेषां क्रियावयवानाम् एकदा अनुत्पत्तेः तत्तत्क्षणावच्छेदेन तस्य तस्य अवयवस्य तद्धात्वर्थत्वमिति कदाचित् अधिश्रयणस्य कदाचित् फूत्कारस्य कदाचित् अधःश्रयणस्य कदाचित् ज्वलनस्य च बोधः। समेषां तत्तत्क्रियासम्बद्धकारकाणां याः क्रियाः ताः सर्वा अपि तत्तद्धात्वर्थत्वेन विवक्षितुं शक्या एव। अत एव "यदा यदीयो व्यापारः धात्वर्थत्वेन विवक्षितः तदा सः कर्ते"ति सङ्गच्छते। अतएव कारकसूत्रे "एष स्थाल्याः पाकः, एष काष्ठानां पाकः, एष प्रधानकर्तुः पाक" इति भाष्यं सङ्गच्छते। यदि च तत्तत्क्षणवृत्तिक्रियायाः धातुवाच्यत्वं तर्हि तस्या एकत्वात् आश्रितक्रमरूपत्वं कथम्? कथञ्च पचतीत्युक्ते अधिश्रयणादि-अधःश्रयणपर्यन्तक्रियासमूहबोधः? तदर्थं च एकबुद्ध्युपारूढे आश्रितक्रमरूपे

क्रियासमुदाये तत्तद्धातुशक्यत्वं स्वीकरणीयम्। तथा च एकबुद्धिविषयत्वोपलक्षितः फूत्कारत्वाद्यवच्छिन्नः क्रियासमुदायः पचादिशक्यः इति वक्तव्यम्।

गुणभूतैरवयवैः समूहः क्रमजन्मनाम्।
बुद्ध्या प्रकल्पिताभेदः क्रियेति व्यपदिश्यते॥ इति(वा.प.तृ.क्रि.4)

वाक्यपदीयमपि अत्र प्रमाणम्। तथा चात्र द्वयी गतिः। फूत्कारत्वाद्यवच्छिन्ने क्रियासमूहे क्रमवति पचादीनां शक्तिः तादृशसमूहगतजातौ वा। एतदेव पक्षद्वयं व्याख्यासु दृश्यते। तत्र प्रथमपक्षे एकैकस्मिन्नपि तत्तत्क्षणवृत्तिव्यापारे समुदायत्वमारोप्यपचादिशक्यत्वं साधनीयम्। द्वितीये तु समुदायगता जातिः तत्तदवयवे आरोपणीया स्यात्। एवञ्च तत्तत्क्षणावच्छिन्नैकैकक्रियाव्यक्तौ सर्वदा आरोपेणैव पचादिशब्दप्रयोगः। नन्वेवं सर्वत्र पचादेः गौणः व्यवहार एव स्यात्इति धात्वर्थस्य गौणत्वापत्तिरिति चेन्न। तदतिरिक्तमुख्यार्थाप्रसिद्ध्या गौणत्वाभावात्। उक्तं च वाक्यपदीये-

व्यवहारस्य सिद्धत्वात् न चेयं गुणकल्पना।
उपचारो हि मुख्यस्य सम्भवादवतिष्ठते॥ इति (वा.प.तृ.क्रि.13)

गोशब्दस्य सास्नादिमति मुख्यत्वात्तत्समानगुणे वाहीकादौ उपचरितार्थवृत्तिरित्युच्यते। क्रियायास्तु समानकालाश्रिते पौर्वापर्यावयवायाः अभावात् न मुख्यता क्वचित्। सर्वत्र पूर्वोत्तरावयवानाम् प्रक्रमरूपाध्यारोपात् नोपचारार्थः कश्चित्। एवं विध एव क्रियाव्यवहारः प्रसिद्ध इति हेलाराजः। एवं च पचतीत्यस्य एकबुद्धिविषयाः अधिश्रयणत्वादिनानाशक्यतावच्छेदकावच्छिन्नाः नानाव्यापाराः वाच्याः इति सिद्धम्।

2.2.17 आख्यातपदार्थविचारः

तथा चेत् तिङन्तेन धातुना एका क्रिया बोध्यते इति व्यवहारः कथमिति चेत् तत्राह -- **आख्याते** इति॥ **आख्याते** - धातौ। **क्रियैकत्वव्यवस्था** - एका क्रिया बोध्यते इति व्यवस्था। शास्त्रग्रन्थेषु प्रयुक्तः आख्यातशब्दः बहुसम्मोहं जनयति। यतः कुत्रचित् सः तिङन्ते कुत्रचित् धातौ कुत्रचित् तिङ्प्रत्यये कुत्रचिच्च व्यापारमुख्यार्थकेषु तिङन्तेषु कृदन्तेषु च स्वीकृतः। तथा हि - "आख्यातमाख्यातेन क्रियासातत्ये"(पा.2-1-72) इति मयूरव्यंसकादिगणसूत्रे आख्यातशब्दः तिङन्तपरः "खादतमोदते"त्यादिप्रयोगसाधकत्वात्। "नामान्याख्यात-

जानीति शाकटायनः नैरुक्तसमयश्च" इति यास्कवचने आख्यातशब्दः धातुपरः। "सर्वं नाम धातुजमाह शकटस्य च तोकम्" इति यास्कवचनस्यैव भाष्यकारेण अनुवादात्। आख्यातार्थः भावना कृतिः कालः संख्या इत्यादिव्यवहारेषु आख्यात -शब्दः तिङ्प्रत्ययपरः। इदानीमार्थिकग्रन्थेषु सर्वत्र सर्वैः अयं केवलतिङ्प्रत्यय-परत्वेनैव प्रयुज्यते। "आख्यायते सर्वप्रधानीभूतो भावोऽनेन" इति व्युत्पत्त्या यः यः शब्दः भावं प्रधानतया बोधयति स सर्वोऽपि आख्यातपदवाच्य इति तिङन्तेन सह भावकृदन्तस्यापि आख्यातपदार्थत्वं कैश्चिदुच्यते। द्रष्टव्या "असत्त्वभूतो भावश्च तिङ्पदै"रित्यस्य भूषणसारे धात्वर्थनिर्णये उल्लिखितस्य **कान्तिव्याख्या**। भावप्रधानमाख्यातमिति निरुक्तवचनान्तर्गताख्यातशब्दस्य तिङन्तभावकृदन्त-परत्वमिति तस्याशयः। कौण्डभट्टस्तु आख्यातपदं निरुक्तादिषु प्रयुक्तं धातुपरत्वेन इदानीन्तनव्यवहारेषु तिङ्परत्वेन च स्वीकरोति।

अवच्छेदकबुद्धिविशेषैक्यमादायैव इति॥ अवच्छेदिका बुद्धिः तस्याः एकत्वात् शक्यतावच्छेदकतावच्छेदकस्य बुद्धिविशेषस्य एकत्वात् एकोऽर्थः इति प्रतीतिरिति भावः। सा च बुद्धिः समूहालम्बनरूपा एकैव। तथा च तादृशबुद्धिगतैक्यारोप-निबन्धना सा व्यवस्थेत्यर्थः। अथवा तादृशबुद्धिस्थसमूहगतैकत्वमादायैवेत्यर्थः। बुद्धेः अवच्छेदकत्वं च विषयतासम्बन्धेन। विषयतायाः वृत्त्यनियामकत्वेन अवच्छेदकताघटकत्वानङ्गीकारे बुद्धिविशेषविषयतावच्छेदकत्वमेवानुगमकम्। एतदेवसूचयति **आदेरिति**। अत्र प्रमाणं प्रदर्शयति - **उक्तमित्यादिना**। क्रम-जन्मनाम् - क्रमेणोत्पन्नानां फूत्कारादिव्यापाराणां समूहः, गुणभूतैः अवयवैः-फूत्कारादिरूपेण भासमानैः अवयवैः युक्तः, बुद्ध्या - संकलनात्मिकया समूहालम्बनात्मिकया वा एकत्वबुद्ध्या अभिन्नत्वेन अध्यवसितः क्रिया इति व्यवह्रियते इति कारिकार्थः। रूपप्(पा. 5-3-66) सूत्रस्थं "एका क्रिये"ति भाष्यं चात्र मानम्। व्यापाराणां क्षणनश्वरत्वेन युगपदवस्थानासम्भवेऽपि बुद्ध्या प्रकल्पने बाधकाभावात्। किञ्च व्याकरणशास्त्रीयपरमसिद्धान्तानुसारं बौद्धस्यैवा-र्थस्य शक्यत्वेन तादृशबौद्धार्थे बाधकाभावात्। एकैकावयवेऽपि समूहत्वरूपारोपात् अधिश्रयणाद्येकावयवदशायामपि पचतीत्यादिव्यवहारोपपत्तिः। आरोपे च प्रतीतिरेव मानम्।

2.3 तिङर्थः

धात्वर्थं निरूप्य तिङर्थमाह – आश्रये त्विति। फलाश्रये व्यापाराश्रये चेत्यर्थः। फलाश्रयः कर्म। व्यापाराश्रयः कर्ता। तत्र फलव्यापारयोः धातुलभ्यत्वात् न तिङस्तदंशे शक्तिः अन्यलभ्यत्वात्। शक्यतावच्छेदकं चाश्रयत्वं तत्तच्छक्ति-विशेषरूपमिति सुबर्थनिर्णये वक्ष्यते।

एवं प्रधानीभूततिङ्प्रकृत्यर्थनिरूपणानन्तरं विशेषणभूततिङर्थनिरूपणस्य अवश्यकर्तव्यतया अवसरसङ्गत्या तन्निरूपणमित्याह - **धात्वर्थं निरूप्येत्यादिना।**

2.3.1. सङ्गतेः षाड्विध्यप्रतिपादनम् , समन्वयश्च

सप्रसङ्ग उपोद्घातो हेतुतावसरस्तथा।
निर्वाहकैक्यकार्यैक्ये षोढा सङ्गतिरिष्यते॥

इति अभियुक्तोक्त्या प्रसङ्गः उपोद्घातः हेतुता अवसरः निर्वाहकैक्यम्कार्यैक्यम् इति सङ्गतिः षोढा भवति। अनन्तराभिधानप्रयोजकजिज्ञासाजनकज्ञानविषयस्मरणा-नुकूलसम्बन्धः सङ्गतिः। धात्वर्थनिरूपणानन्तरं तिङर्थनिरूपणमेव किमर्थम् इति जिज्ञासायाम् उत्तरमेवं स्यात् यत् तस्य धातुसम्बद्धत्वेन धात्वर्थनिरूपणसन्दर्भे एव तस्य स्मृतत्वेन च अनन्तराभिधानप्रयोजकं जिज्ञासाजनकं च यत् ज्ञानं प्रकृति-प्रत्यययोः परस्परसम्बन्धज्ञानं तज्ज्ञानविषयप्रत्ययस्य स्मरणानुकूलः सम्बन्धः एव सङ्गतिः। स च षड्विध इत्यर्थः। स्मृतस्य उपेक्षानर्हत्वं प्रसङ्गः। प्रकृतार्थोप-पादकत्वमुपोद्घातः। कारणत्वमेव हेतुता, तच्च प्रयोजकत्वप्रयोज्यत्वरूपम् ।अर्थात् कार्ये ज्ञाते कारणजिज्ञासारूपा कारणे ज्ञाते च कार्यजिज्ञासारूपा। प्रतिबन्धकी-भूतजिज्ञासानिवृत्तिकालावच्छिन्नावश्यवक्तव्यत्वम् अवसरः। तिङर्थजिज्ञासायां प्रतिबन्धकीभूता जिज्ञासा धात्वर्थजिज्ञासा धात्वर्थनिरूपणेन तस्याः जिज्ञासायाः निवृत्तौ सत्यां तत्समकालमेव यस्यावश्यवक्तव्यत्वम् तयोः अवसरसङ्गतिः इति व्यवहारः। यथात्र धात्वर्थतिङर्थयोः। निर्वाहकैक्यम्एकप्रयोजकप्रयोज्यत्वम् समानकारणत्वमिति यावत्। कार्यैक्यम् एककार्यानुकूलत्वम् एकप्रयोजनवत्त्वमि-त्यर्थः।

॥**आश्रये तु तिङ इति**॥ आश्रयस्य आधेयसाकाङ्क्षत्वात् धात्वर्थत्वेन स्वीकृतावेवात्र सन्निहिताविति तयोरेवात्राधेयत्वेन स्वीकारः, प्रत्ययानां स्वप्रकृत्यर्थान्वितस्वार्थबोधकत्वनियमात्। तथा च फलाश्रये व्यापाराश्रये च तिङः

स्मृताः इत्यर्थः पर्यवस्यति। ननु आश्रयस्य आधेयाकाङ्क्षायाम् स्वप्रकृत्यर्थभूतयोः फलव्यापारयोः आधेयत्वेन स्वीकारेऽपि फलव्यापारयोरुभयोः आश्रयभूते एकस्मिन्नेव तिङां शक्तिरित्येवार्थः सिद्ध्यति न तु फलाश्रये व्यापाराश्रये चेति। तथा सति आश्रययोरिति द्विवचनं प्रयोक्तव्यम् "आश्रययोः तिङः स्मृताः" इति। तथा च फलव्यापारयोः द्वयोः यदा एकः आश्रयः अकर्मकधातुस्थले कर्ता स एव तिङ्वाच्य इत्यर्थः स्यात् न तु फलाश्रयरूपं कर्म व्यापाराश्रयरूपः कर्ता पृथक् पृथक् इति चेन्न। "लः कर्मणी"(पा. 3-4-69) त्यनुशासनबलात् अत्र आश्रये इति जात्येकवचनम्। तथा चात्र आश्रयशब्दः आश्रयद्वयबोधकः। अन्यथा अपाणिनीयार्थप्रतिपादकत्वेन अस्य प्रामाण्यमेव न स्यात्। किञ्चात्र फल-व्यापारयोः एकबोधविषयत्वेऽपि तिङर्थयोः आश्रययोः नैकबोधविषयत्वम्। धातावेव फलव्यापारोभयविषयिण्याः एकस्याः एव शक्तेः स्वीकारात्। तिङि तु आश्रययोः विषये भिन्ना एव शक्तिः हर्यादिपदवत्। विशिष्टशक्तिद्वयपक्षे तु नायं दोषः। फलावच्छिन्नव्यापाराश्रये व्यापारावच्छिन्नफलाश्रये च तिङां शक्तिरिति द्वयोः एकस्याश्रयस्याप्रसिद्ध्या आश्रयद्वये शक्तिसिद्धेः। सा च शक्तिरुभयत्र नानैवेति न धात्वाख्यातशक्त्योः स्वरूपभेदः।

नन्वेवमपि "लः कर्मणी"(पा.3-4-69) त्यनुशासनबलात् कर्तृकर्मणोरेवाख्याता-र्थत्वम्। कर्ता च व्यापाराश्रयः कर्म च फलाश्रयः। तथा च तिङां व्यापारश्रये फला - श्रये च शक्तिरिति वक्तव्यम्। कथमाश्रयमात्रे शक्तिरित्यत आह - **तत्र फल - व्यापारयोरि**ति॥ "अनन्यलभ्यः शब्दार्थ" इति न्यायात् फलव्यापारयोः धातुलभ्यत्वेन - धातुशक्त्यैव बोधितत्वेन पुनः तिङां न तदंशे शक्तिः किन्तु अवशिष्टे अनन्यलभ्ये आश्रयांशे एवेत्यर्थः। नन्वाश्रयस्य शक्यत्वे आश्रयत्वं शक्यतावच्छेदकं वाच्यम्। तस्य च निरूपकाश्रयभेदाभ्यां भिन्नत्वेन अनुगमाभावात् अवच्छेदकत्वासम्भव इत्यत आह - **तत्तच्छक्तिविशेषरूपमिति**॥ तत्तत्कर्तृत्वादिधर्मविशेषरूपमित्यर्थः। तच्चाखण्डोपाधिरूपं घटत्वादिवदवच्छेदक-मित्यर्थः। यदि तु "सप्तमीपञ्चम्यौ"(पा. 2-3-7)इति सूत्रभाष्यात् कर्तृत्वादिशक्तेरपि भेदः तर्हि आश्रयतात्वेन सर्वाः कर्तृत्वादिशक्तीरनुगतीकृत्य आश्रयत्वस्य शक्यता-वच्छेदकत्वं निर्वाह्यम् इति **सुबोधिनी**।

2.4 कर्तृकर्मणोः आख्यातार्थत्वे प्रमाणम्

नन्वनयोराख्यातार्थत्वे किं मानम् ? प्रतीतेः लक्षणया आक्षेपात् प्रथमान्तपदाद्वा सम्भवादिति चेत् –

अथ कर्तृकर्मणोराख्यातार्थत्वसमर्थनार्थमवतारयति - **नन्विति**। कर्तृकर्मणोराख्यातार्थत्वे किं प्रमाणम् ? न च पचतीत्यादिषु कर्तृसामान्यप्रतीतिरेव मानम्। अन्यथा "कः पचति" इति कर्तृविशेषजिज्ञासा एव नोदियात्। विशेषजिज्ञासायाः सामान्यज्ञानपूर्वकत्वात् इति वाच्यम्। तस्याः प्रतीतेः कर्तृशक्तिं विनापि प्रकारान्तरेण साधयितुं शक्यत्वात्। तथा च "अनन्यलभ्यः शब्दार्थ" इति न्यायेन तत्र प्रतीतोऽपि कर्ता न तद्वाच्यार्थः। अन्यथा "गङ्गायां घोष" इत्यादौ गङ्गाशब्दात् तीरबोधात् तीरेऽपि शक्तिकल्पनापत्तिः।

ननु कथं तस्य अन्यलभ्यत्वमिति चेदुच्यते - **प्रतीतेः** इति। फलाश्रयव्यापाराश्रयप्रतीतेरित्यर्थः। अस्य सम्भवादित्यनेन अन्वयः। कैरुपायैः लक्षणा – आक्षेपप्रथमान्तशब्दैः उपायैः। तिङन्ते हि भावनैव मुख्यतया प्रतीयते। "भावार्थाः कर्मशब्दाः"(मी 2-1-5-1)इति जैमिनिसूत्रं "भावप्रधानमाख्यातम्" इति निरुक्तं चात्र प्रमाणम्। भावो नाम भावना। तथा च प्रधानतया ज्ञायमानस्य प्रत्ययार्थत्वं युक्तमिति तिङन्तबोध्यार्थे मुख्यविशेष्यतया भासमानायाः भावनायाः तिङर्थत्वं कल्प्यते। तथा च तिङां भावनायां शक्तिः। तिङर्थसंख्यायाः भावनायामन्वयायोग्यत्वात् पचतीति पदश्रवणसमनन्तरं "कः पचति" इति कर्तृविशेषविषयकजिज्ञासोपस्थितेश्च कर्ता कर्त्राख्याते, कर्म कर्माख्याते च आख्यातेन बुध्येते इति स्वीकर्तव्यम्। स च बोधः न शक्त्या। अन्यायोऽनेकार्थत्वमिति न्यायात्, भावनायाः तिङर्थत्वेन व्यवस्थापनाच्च। तथा चाश्रयबोधः द्विधा उपपादयितुं शक्यः। तत्र एकः उपायः आक्षेपः।आक्षेपो नाम अर्थापत्तिः। अर्थापत्तिः प्रमाणान्तरत्वेन मीमांसकैरङ्गीक्रियते। "येन विना यदनुपपन्नं तत्तेन आक्षिप्यते" इति न्यायः। यथा - "पीनो देवदत्तः दिवा न भुङ्क्ते" इति वाक्ये अभुञ्जानस्य पीनत्वानुपपत्त्या पीनत्वं रात्रिभोजनमाक्षिपति । तथा च रात्रौ भुङ्क्ते इत्यर्थः सिद्ध्यति। तथा अत्रापि भावना नाम पुरुषप्रयत्नः। सा च कर्तारं विना अनुपपन्ना कर्तारमाक्षिपति। आक्षिप्तकर्तरि आख्यातार्थसंख्यायाः अन्वयः। आक्षेपप्रमाणलभ्यस्यापि अर्थस्य शाब्दबोधे भानमङ्गीक्रियते। अथ "शाब्दमशाब्देन नान्वेति"

अत्रोच्यते। "लः कर्मणि च भावे चाकर्मकेभ्यः" (पा. 3-4-69) इति सूत्रमेव मानम्। अत्र हि चकारात् "कर्तरि कृत्" (पा. 3-4-67) इति सूत्रोक्तं कर्तरीत्यनु-

---

इति न्यायात् अशाब्दे आक्षिप्तकर्तरि शाब्दस्य संख्याविशेषस्यान्वयो न स्यादित्युक्तौ तु कर्तृकर्मणोः आख्यातलक्ष्यत्वं स्वीक्रियते। लक्षणा च पदवृत्तिः। तथा च लक्षणयोपस्थितस्य अर्थस्य शाब्दत्वात् तत्र संख्यान्वयोऽपि भवति। इयं च लक्षणा निरूढलक्षणा। तथा च तिङ्प्रत्ययः शक्त्या भावनां लक्षणया कर्तृकर्मणी च बोधयति इत्यर्थः। वृत्तिद्वयलभ्योऽप्यर्थः युगपदेव शाब्दबोधे भासते इति तेषामाशयः। अयमेव लक्षणापक्षः। अत्र च युगपत् वृत्तिद्वयं स्वीकृत्य तद्बोध्ययोः परस्परमन्वयः वक्तव्यः स च अप्रसिद्धः। "गङ्गायां मीनघोषौ स्तः" इत्यत्र गङ्गापदे वृत्तिद्वयमाश्रित्य मीनघोषयोः पृथक् पृथक् अधिकरणस्य बोधोऽस्तीति चेदपि वृत्तिद्वयोपस्थापितयोः अर्थयोः परस्परमन्वयः न कुत्राप्यनुभवसिद्धः। किञ्च पदवृत्तिकल्पनागौरवमपि इति चेत् तर्हि आक्षेप एवास्तु। आक्षेपलभ्यस्यैव शाब्दबोधे भानं तत्र शाब्दान्वयश्च अङ्गीकरणीयः। अथवा आक्षेपशब्देन अनुमानं बोध्यते। "भावना क्वचिदाश्रिता गुणत्वात् सकर्तृका वा कार्यत्वात् घटवत्" इति अनुमित्या कर्ता विषयीक्रियते इत्यर्थः। नैयायिकैः अर्थापत्तेः पृथक् प्रमाणत्वेनानङ्गीकारात् तस्य च अनुमाने एव अन्तर्भावात् नैयायिकमते आक्षेपो नाम अनुमितिरेव। भाट्टेष्वेव प्राचीनाः कर्तृकर्मणोराक्षेपवादिनः। नव्यास्तु लक्षणावादिनः। अतिरिक्तवृत्तिकल्पनायां गौरवेऽपि तस्यार्थस्य शाब्दत्वसम्पादनार्थं वृत्तिः कल्पनीयैव, फलमुखगौरवस्य अदुष्टत्वात् इति तेषामाशयः।

अथ प्राभाकराः नैयायिकाश्च प्रथमान्तपदादेवाश्रयोपस्थितिं स्वीकुर्वन्ति। पक्षेऽस्मिन् आक्षेपपक्षे उक्तः कर्तृकर्मणोः अशाब्दत्वदोषोऽपि नास्ति, तथा युगपत् वृत्तिद्वयकल्पनादिरूपदोषोऽपि नास्ति। नैयायिकमते तिङर्थकृतेः प्रथमान्तार्थे आश्रयतासम्बन्धेनान्वयात् कृत्याश्रयस्य कर्तुः प्रतीतिः सिद्ध्यति। प्राभाकरमते धात्वर्थस्य पाकगत्यादेः कृतिमत्त्वाश्रयत्वादिसम्बन्धेन प्रथमान्तचैत्रादौ अन्वयात् कर्तुः प्रतीतिः। तथा च "शाब्दी ह्याकाङ्क्षा शब्देनैव पूर्यते" इति व्युत्पत्तिविरोधोऽपि नास्ति। शाब्दी - शाब्दबोधविषयिणी, आकाङ्क्षा - जिज्ञासा, शब्देनैव - वृत्त्या पदार्थोपस्थितिद्वारा विषयसिद्धिसंपादनेन, प्रपूर्यते - निवार्यते इति तदर्थः। तथा च

कृष्यते। बोधकतारूपां तिबादिशक्तिं तत्स्थानित्वेन कल्पिते लकारे प्रकल्प्य लकाराः कर्मणि कर्तरि चानेन विधीयन्ते। नकारविसर्गादिनिष्ठां कर्मकरणादिबोधकता - शक्तिमादाय शसादिविधानवत्।

त्रिभिरुपायैः आश्रयबोधसिद्धेः न तत्र शक्तिकल्पना युक्ता इति वदतां मीमांसक-नैयायिकादीनां मतं निराचिकीर्षुः तत्र प्रमाणादिकं प्रदर्शयति - **अत्रोच्यते "लः कर्मणी" ति सूत्रमेव मानमित्यादिना** । पूर्वोक्तेषु त्रिषु उपायेषु उपायद्वयं लक्षणाक्षेपरूपं भाट्टमीमांसकानाम्। प्रथमान्तपदरूपोपायः प्राभाकराणां नैयायिकानां चेति विवेकः। अत्र पूर्वपूर्वोपायेऽरुचिप्रदर्शनपुरस्सरमुत्तरोत्तरोपायः व्याख्यातः प्रायः सर्वासु व्याख्यासु। वस्तुतः अत्र तथा व्याख्यायाः आवश्यकता नास्त्येव।तैस्तैः शास्त्रज्ञैः तस्य तस्योपायस्य अङ्गीकारात् तत्र तेषाम् विप्रतिपत्त्य-भावात्।

2.4.1. लक्षणया आक्षेपात् इत्यादिग्रन्थस्य व्याख्या, तत्रत्यसरलायाः खण्डनम्

अथात्र **सरला** व्याख्या नातीवहृदयङ्गमा। तत्र हि – "ननु आख्यातस्य आश्रय-लक्षकत्वे भावनाप्रतीतिः न स्यात्। अतः तत्प्रतीतिः शक्त्या वाच्या। तस्यां चावस्थायां लक्षणाया असंभवो युगपद्वृत्तिद्वयविरोधात्। भावनाश्रयत्वेन भावना-श्रये लक्षणायां भावनाप्रतीतावपि भावनायाः प्राधान्यं न स्यात्। तस्या विशेषणतयोपस्थितेरित्यरुचेराह – आक्षेपादिति" इत्यस्ति।अत्र हि प्रथमं लक्षणा-पक्षे युगपद्वृत्तिद्वयविरोधः प्रदर्शितः। मीमांसकाः "गङ्गायां मीनघोषौ स्तः" इत्यादिप्रयोगनिर्वाहाय युगपद्वृत्तिद्वयमङ्गीकुर्वन्ति। अतः तेषां मते विरोधः नास्ति। तैः व्युत्पत्तिवैचित्र्याच्च शक्यनिरूढलक्ष्ययोः मध्ये शक्यार्थस्य मुख्यत्वं अन्यस्य तद्विशेषणत्वं चाङ्गीक्रियते। अतः मतेऽस्मिन् गौरवमेव प्रदर्शनीयम्। आक्षेप-पक्षोऽपि मीमांसकमतेऽर्थापत्तिः न्यायमतेऽनुमानमिति व्याख्यातः। तत्रारुचि-प्रदर्शनग्रन्थस्तु सर्वथा नोचित इव लक्ष्यते। तत्र हि "ननु मीमांसकमते आक्षिप्तस्य शाब्दबोधे भानेऽपि तस्य विशेषणत्वेनैवोपस्थितेः प्रकृते भावनायाः प्राधान्या-नुपपत्तिः, न्यायमते च व्याप्त्यादिप्रतिसन्धानं विनाप्याश्रयबोधस्यानुभवसिद्धत्वात् नाक्षेपादाश्रयभानमित्यरुचेराह-" इत्यस्ति। तत्र मीमांसकमते आक्षिप्तभावनायाः प्राधान्यानुपपत्तिरिति पङ्क्तिरत्यन्तमसङ्गता। आश्रयस्यैव आक्षेपलभ्यत्वस्य

मीमांसकसम्मतत्वात् तस्याप्राधान्यस्यैवेष्टत्वाच्च। आक्षेपपक्षे नैयायिकानां सम्बन्ध -प्रदर्शनमपि न समीचीनम्। यद्यपि नैयायिकाः अर्थापत्तिं पृथक् प्रमाणत्वेन अस्वीकुर्वन्तः तस्या अनुमानेऽन्तर्भावं स्वीकुर्वन्ति तावता आश्रयस्य अनुमान-गम्यत्वं नैयायिकाभिमतं कथं स्यात्। प्रथमान्तार्थमुख्यविशेष्यकबोधवादिभि-र्नैयायिकैः कृत्याश्रयबोधः प्रथमान्तपदादेव खलु स्वीक्रियते। पूर्वोदाहृत-सरलायाः मूलं दर्पणव्याख्या। तत्रापि सरलाकारोक्त एवाशयः प्रदर्शितः।

सूत्रमेव मानमिति। अत्र एवकारः प्रसिद्ध्यर्थकः। प्रसिद्धं सर्वैरपि शास्त्रज्ञैः प्रमाणत्वेन अङ्गीकृतं सूत्रमिदमेव प्रमाणम् इत्यर्थः। वैयाकरणैः पाणिनीयानु-सारिभिः स्वोक्तेरुपष्टम्भकतया युक्तिप्रदर्शनेन नालम्, किन्तु तत्र मुनित्रयसम्मति-रपि प्रदर्शनीया। शास्त्रान्तरेषु न तथा। तत्र तु युक्तेरेव प्राधान्यम् न तु मूलभूत-शास्त्रकृद्वचनस्य। अतस्तैः क्वचित् शास्त्रप्रवर्तकमुनिवचनमपि विरोधे सति त्यज्यते। वैयाकरणैस्तु न तथा कर्तुं शक्यते। अतः उक्तार्थे प्रथमं मुनिसम्मतिं प्रदर्शयति - **सूत्रमेव मानमिति**। अत्र मानमिति प्रतीकमुपादाय "मानमिति अनुमापकमित्यर्थः। अनुमितिप्रकारश्चेत्थम् - तिङ्प्रत्ययः आश्रयनिरूपित-शक्तिमान् "लः कर्मणी" (पा.3-4-69) ति गृहीतशक्तिकत्वात् अणादितद्धितवत्। अत्र साध्यतावच्छेदको हेतुतावच्छेदकश्च स्वरूपसम्बन्धः।यत्पदं यद्धर्मावच्छिन्न-निरूपितशक्तिग्राहकपाणिनिसूत्रकं तत्पदं तद्धर्मावच्छिन्ननिरूपितशक्तिमदिति सामान्यतो व्याप्तिग्रहः इति **प्रभायां सुबोधिन्यां** च अनुमानप्रकारः प्रदर्शितः। सूत्रमिदं लकाराणां कर्तरि शक्तावपि प्रमाणं, चकारात् "कर्तरि कृत्"(पा. 3-4-67) इति सूत्रात् कर्तरीत्यनुवृत्तेः। तथा च लकाराः अकर्मकेभ्यः भावे कर्तरि च, तदितरेभ्यः कर्मणि कर्तरि च भवन्ति इति सूत्रार्थः सिद्ध्यति। तदुक्तम् **अत्र हि चकारात्** इति॥ ननु सूत्रमिदं लकाराणां कर्तृकर्मादिबोधने शक्तिग्राहकं न तु तिङामिति चेत्तत्राह - **बोधकतारूपामित्यादि**। "उच्चारितस्यैव प्रत्यायकत्वं नानुच्चारितस्ये"ति न्यायात् लकाराणां कुत्रापि तत्त्वेनाप्रयोगात् तत्स्थानिक-तिङामेवासकृत् प्रयोगाच्च कर्तृकर्मादिबोधकताशक्तिः तिङामेव। अथापि लाघवेन शास्त्रप्रवृत्त्यर्थं तत्स्थानित्वेन कल्पिते लकारे आदेशतिङादिनिष्ठा शक्तिः आरोप्यते। एवञ्च वस्तुतः लकारोऽपि नास्ति तथा तस्य अर्थोऽपि नास्ति। परन्तु तत्कल्पनया तदादेशभूततिङां शक्तिरेव तत्सूत्रेण बोध्यते इत्यर्थः। स्थान्यर्था-

न च सूत्रे कर्तृकर्मपदे कर्तृत्वकर्मत्वपरे। तथा च कर्तृत्वं कृतिः कर्मत्वं फलमेवा - र्थोऽस्त्विति शङ्क्यम्। फलव्यापारयोः धातुलभ्यत्वेन लकारस्य पुनः तत्र शक्तिकल्पनाऽयोगात्।

भिधानसमर्थस्यैवादेशत्वमिति तिङां लकारार्थाभिधानसामर्थ्यं सिद्ध्यति। तदेव उदाहरणमुखेन दर्शयति - **नकारविसर्गादिनिष्ठाम्**' इत्यादिना। रामान् रामैः इत्यादौ नकारविसर्गादित एव कर्मकरणादिप्रतीतेः जायमानत्वात् स्थानिभूत-शस्भिसादिज्ञानरहितानामपि कर्मकरणादिबोधस्य अनुभवसिद्धत्वात् आदेशा एव वाचकाः न तु स्थानिन इत्यर्थः। तिङामेव वाचकत्वे तत्स्थानिनं लकारं प्रकल्प्य तिङामर्थं तत्रारोप्य विधानस्य किमौचित्यम् ? साक्षात् तिङामेव कर्तृकर्मादि-वाचित्वं सूत्र्यताम् इत्याशङ्का समाधानं च **काशिकायां** सम्यक्प्रतिपादिते। तस्य ग्रन्थस्य व्युत्पादकत्वात् स एव यथावत् अत्र समुल्लिख्यते – "ननु "लस्ये" (पा.3-4-77) त्युनुक्त्वा "तिप्तस्झी"(पा.3-4-78)त्यादिना स्वतन्त्राणां तिप्तसादीनामेव विधानमस्तु एवं "लः कर्मणी"(पा. 3-4-69)ति सूत्रे "तिङ् कर्मणी"त्यस्तु । "वर्तमाने तिङ्" "तिङः शतृशानचावप्रथमा समानाधिकरणे" इत्यादिन्यासैः तिबादीननूद्य तत्तत्कार्यविधिरस्त्विति चेन्न। "टित आत्मनेपदाना"(पा. 3-4-79)मित्यादेरसङ्गतत्वापत्तेः। न च "वर्तमाने तिङ्ट्" "अनद्यतने तिङ्ट्" इत्यादिन्यासैः तत्तत्कालार्थकतिबादेः तत्तदनुबन्धासङ्गः क्रियतां तथा च "टित आत्मनेपदानाम्"(पा. 3-4-79)इत्यादेः नासङ्गतिरिति वाच्यम्। "लिटस्तझयो-रेशिरेच्"(पा. 3-4-81) "लुटः प्रथमस्य डारौरसः"(पा. 2-4-85)इत्यादेरेवमपि असङ्गतत्वापत्तेः, तत्र तत्र न्यासान्तरकरणे गौरवापत्तेश्चेत्यास्तां विस्तरः। इति।

ननु वाजप्यायनादिवैयाकरणाः मीमांसकाश्च जातिशक्तिवादिनः। तेषां मते प्रवृत्तिनिमित्तरूपो धर्म एव प्रातिपदिकार्थः। तथा च लकारस्य कर्तरि कर्मणि च शक्तिः नानेन सूत्रेण बोध्यते घटादिपदेषु घटत्वादेरिव कर्तृत्वकर्मत्वे एव अत्र लकारार्थे भवतः। कर्तृत्वं च कृतिः कर्मत्वं च फलम्। तथा च कृतिफलयोरेव लकारार्थत्वं सिद्ध्यति। तथा च सूत्रेऽपि कर्तृकर्मशब्दयोः भावप्रधाननिर्देशत्व–माश्रीयते। कृतेः लकारार्थत्वे कृतित्वं शक्यतावच्छेदकमिति लाघवमपि भवति। कर्तुः लकारार्थत्वे तु कर्तृत्वं - कृतिः शक्यतावच्छेदकं स्यात्। तस्याः अनेकत्वात् पुनः कृतित्वेन शक्यतावच्छेदकतावच्छेदकेन अनुगतीकृत्य शक्तिः कल्पनीयेति

अथ दर्शनान्तरीयरीत्या व्यापारस्य धात्वर्थत्वाभावात् तत्र लकारविधिः स्यादिति चेत् , तर्हि कृतामपि कर्तृवाचित्वं न सिद्ध्येत्। "कर्तरि कृत्" (पा. 3-4-67)इति च "लः कर्मणी"(पा. 3-4-69)त्यनेन तुल्ययोगक्षेमम्।

गौरवमपि । इति चेदाह – **फलव्यापारयोरिति**॥ तयोः द्वयोरपि धातुलभ्यत्वेन अनन्यलभ्यः शब्दार्थ इति न्यायेन पुनः लकारस्य तत्र शक्तिकल्पनाऽयुक्ता। आश्रये शक्तिकल्पनायामपि आश्रयत्वस्य तत्तच्छक्तिविशेषरूपस्य शक्यतावच्छेदकत्वेन स्वीकारात् न शक्यतावच्छेदकतावच्छेदकपर्यन्तानुधावनमिति अस्मिन्नपि पक्षे गौरवं नास्ति। "न ह्याकृतिपदार्थकस्य द्रव्यं न पदार्थः, द्रव्यपदार्थकस्य वा आकृतिर्नपदार्थः, उभयोरुभयं पदार्थः" इति वदता भाष्यकारेण विशिष्टशक्तेरेव स्वीकारात् प्रवृत्तिनिमित्तं तदाश्रयश्चेत्युभयं प्रातिपदिकार्थौ भवति न प्रवृत्तिनिमित्तमात्रम्। किञ्चात्र कर्तृपदं "कर्तरि कृत्"(पा. 3-4-67) इति सूत्रादनुवर्तते। तत्र चास्य कर्तृपदस्य धर्मिपरत्वमेव न तु धर्मपरत्वम्। अर्थाधिकारानुरोधात् अत्रापि तस्य धर्मिपरत्वमेव। तत्सहचरितकर्मपदस्यापि सहचरितन्यायेन धर्मिपरत्वमेव। तथा च "लः कर्मणी"(पा. 3-4-69)ति सूत्रं लकारस्य व्यापाराश्रये फलाश्रये च शक्तिं ग्राहयति। तत्र फलव्यापारयोः अन्यलभ्यत्वात् तत्तच्छक्तिविशेषरूपाश्रयत्वविशिष्टः आश्रय एव लकारार्थतया पर्यवस्यति।

॥**दर्शनान्तरीयरीत्येति**॥ अन्यद्दर्शनं दर्शनान्तरमिति मयूरव्यंसकादित्वात् समासः। तत्र भवाः दर्शनान्तरीया इति गहादित्वाच्छः। दृश्यते ज्ञायते अनेन आत्मतत्त्वमिति दर्शनमिति "करणाधिकरणयोश्च"(पा. 3-3-117)इति करणे ल्युट्। अध्यात्मज्ञानोपायभूतं शास्त्रम्। तच्च न्यायादिषट्कम्। तेषु अन्यतरत् मीमांसाशास्त्रम्। तथा च मीमांसकरीत्येत्यर्थः। प्राचीनाः मीमांसकाः मण्डनमिश्रादयः पचति पाकं करोतीति विवरणमाश्रित्य धातुः फलं तिङ्प्रत्ययः करोत्यर्थभावनां च प्रतिपादयत इति स्वीकुर्वन्ति। तथा च तेषां मते व्यापाररूपभावनायाः धात्वर्थत्वाभावात् तत्र भावनायां कर्तृत्वरूपायां तिङां शक्तिरभ्युपेतुं शक्या। एतेषां मते कर्तृत्वं च भावनाश्रयत्वम् कर्मत्वं च भावनाजन्यफलाश्रयत्वम्। उभयत्र विशेषणीभूता भावना प्रत्ययार्थः सिद्ध्यति। सा च अनन्यलभ्या एवेति न दोषः। नन्वेवं फलमात्रस्य धात्वर्थत्वे तस्य क्रियात्वाभावात् तन्मात्रवाचिनो धातुसंज्ञा न स्यादिति चेन्न। फलस्यापि "कर्मवत्कर्मणा तुल्य-

क्रियः"(पा. 3-1-87) इत्यादौ क्रियाशब्दव्यवहर्तव्यत्वस्य दृष्टत्वेन तन्मात्रवाचिनोऽपि धातुसंज्ञासिद्धिः।"पच्यते ओदनः स्वयमेवे"त्यादिकर्मकर्तृस्थले पचधातोः विक्लित्तिमात्रार्थकत्वेन तत्र क्रियात्वमाश्रित्य धातुसंज्ञायाः वैयाकरणैरपि साधनीयत्वात्। **दर्पणकारस्तु** "यद्यप्युक्तरीत्या व्यापारे शक्तिसिद्धावपि फलशक्तिबोधकं कर्मणीत्यनुपपन्नमेव तथाप्यभिधानानभिधानव्यवस्थार्थं तदप्यावश्यकमेव, द्वेधाभानं तु कथंचित् परिहरणीयम्" इति वदति। **काशिकाकारस्तु** "फलस्य धातुलभ्यत्वात् आश्रयत्वं कर्मशब्देन बोध्यते अस्मिन्मते इति व्याख्येयम्" इति सूचयति। युक्तं चैतत्। फलस्य द्विधाभानापेक्षया अनन्यलभ्यस्य आश्रयत्वस्यैव कर्मशब्दार्थत्वस्य युक्तत्वात्। परन्तु सर्वत्र तिङि भावना बुध्यते इत्येव मण्डनमिश्रस्य मतम्। तेन वैयाकरणाभिमतव्यापार एवात्र भावनापदेन अभिप्रेतः न तु तद्भिन्नः। यद्यपि खण्डदेवादीनां मते नैयायिकानामिव व्यापारभावनयोः भेदः व्यापारस्य धात्वर्थत्वं भावनायाः प्रत्ययार्थत्वं च किन्तु तन्मतमत्र नाभिप्रेतम्। भावार्थाधिकरणे भट्टपादोक्तं मतमेवात्राभिप्रेतम् यच्च मण्डनमिश्रेण भावनाविवेकग्रन्थे प्रपञ्चितम्। **प्रभाकारेण** तु - "व्यापारस्य आख्यातवाच्यस्येत्यर्थः। एतेन कस्यचिन्मीमांसकस्य मते व्यापारस्य धात्वर्थत्वेऽपि धात्वर्थत्वाभावादित्युक्तिरसङ्गतेत्यपास्तम्। आख्यातार्थव्यापारस्य तन्मतेऽपि धात्वर्थभिन्नत्वादि"त्युक्तम्। अनेनास्य ग्रन्थस्य "फलव्यापारौ धात्वर्थः भावना आख्यातार्थ" इति मीमांसकमतपरता अभिप्रेता। एतच्च व्यापारस्य धात्वर्थत्वाभावादिति मूलाक्षराननुगुणमित्युपेक्ष्यम्। अनन्तरं पुनः तत्रैव "यद्वा फलमात्रं धात्वर्थः फूत्कारादिव्यापार एव प्रत्ययार्थ इति भाट्टरहस्यमताभिप्रायेण व्यापारस्य धात्वर्थत्वाभावादित्युक्तमि"ति व्याख्यातम्। अत्र भाट्टरहस्यमताभिप्रायेणेत्यस्य भाट्टरहस्योक्तमण्डनमिश्रमताभिप्रायेण इत्यर्थः। भाट्टरहस्यकारस्य खण्डदेवस्य मतं तु "फलव्यापारौ धात्वर्थः भावना आख्यातार्थः" इति। किं च खण्डदेवः कौण्डभट्टादर्वाचीन इति तन्मतखण्डनपरतया व्याख्याप्ययुक्तैव।

एवं च मीमांसकमण्डनमिश्ररीत्या "लः कर्मणी"(पा. 3-4-69)ति सूत्रेऽनुवृत्तकर्तृपदस्य सूत्रस्थकर्मपदस्य भावप्रधाननिर्देशत्वमभ्युपगम्य कर्तृत्वकर्मत्वपरतया व्याख्यानेन कर्तृत्वकर्मत्वयोः लकारार्थत्वमस्तु "लः कर्मणी"(पा. 3-4-69)ति

सूत्रमपि तदर्थकमेवेति **न सूत्रविरोध** इति अथेत्यारभ्य चेदन्तस्य वाक्यार्थस्य तात्पर्यम्। अत्रेयं समाहितिः - **तथा सति कृतामपि कर्तृवाचित्वं न स्यादिति॥** अस्यायमर्थः - तर्हि यस्मात्सूत्रात्तदनुवृत्तं तत्रापि तस्य स एवार्थः प्रतिपादनीयः इति तत्रापि कर्तृत्वं कृत्प्रत्ययार्थ इति वक्तव्यं स्यात्। तथा च "पाचक" इत्यादिषु ण्वुलादिप्रत्ययैः कर्तृत्वस्यैव बोधे पाककर्तृत्वमित्येवार्थः स्यात् न तु पाककर्तेति। तथा च "पाचको देवदत्त" इति सामानाधिकरण्येन निर्देशो न स्यात्। कृत्प्रत्ययेषु धर्मिबोध एव सर्वैरङ्गीक्रियते न तु धर्मबोधः। तथा च सर्वाभ्युपगतधर्मिबोधो न स्यात्। ननु कर्तृपदस्य "कर्तरि कृत्"(पा. 3-4-67)इति सूत्रे धर्मिपरत्वं भवतु "लःकर्मणी"(पा. 3-4-69)त्यत्र धर्मपरत्वं भवतु तथा चोभयं सिद्ध्यतीति चेन्न। द्वयोरपि सूत्रयोः तुल्ययोगक्षेमत्वेन कर्तृपदार्थे वैषम्यस्योपपादयितुमशक्यत्वात्। तदेव वदति - **"कर्तरि कृत्" (पा. 3-4-67) इति च "लः कर्मणी"(पा. 3-4-69)त्यनेन तुल्ययोगक्षेममिति॥** योगश्च क्षेमश्च योगक्षेमौ। तुल्यौ योगक्षेमौ यस्य येन तत् तुल्ययोगक्षेमम्। अलभ्यलाभो योगः। यथा प्रकृते "लः कर्मणी"(पा. 3-4-69)ति सूत्रे अनुवृत्तस्य कर्तृपदस्य स्वारसिकं धर्मिरूपमर्थं परित्यज्य धर्मरूपस्य कर्तृत्वरूपस्य लक्षणया प्रकारान्तरेण वा लाभरूपः योगः यः परैः प्रतिपाद्यते तादृशस्यैव योगस्य "कर्तरि कृत्"(पा. 3-4-67)इति सूत्रेऽपि अवश्यं स्वीकर्तव्यत्वं स्यात्। लब्धस्य परिरक्षणं क्षेमः। यथा "कर्तरि कृत्"(पा. 3-4-67)इति सूत्रे कर्तृपदस्य यः स्वारसिकोऽर्थः धर्मिरूपः सर्वाभ्युपगतश्च तस्यैव परिरक्षणं चेत् तादृशः क्षेमः "लः कर्मणी"(पा. 3-4-69)त्यत्रापि अनुसरणीयः। तथा च कर्तृपदस्य धर्मिपरत्वरूपः क्षेमः धर्मपरत्वरूपः लाभो वा सूत्रद्वयोऽपि समानः अर्थाधिकारानुरोधात्। तथा च एकत्र धर्मिपरत्वम् अन्यत्र धर्मपरत्वमिति अर्धजरतीयमनुचितम्। तुल्यः योगक्षेमः अर्थप्रतिपादकत्वं यस्येति तुल्ययोगक्षेम -शब्दः **काशिकाकारेण** व्याख्यातः। **शङ्करशास्त्रिभिरपि** तदेवानूदितम्।

2.4.2. अपि चेति मूलावतरणे व्याख्यान्तराणाम् अनौचित्यप्रदर्शनम् , काशिका भूषणग्रन्थानुकूलेति तद्ग्रन्थपङ्क्तिप्रदर्शनपूर्वकं निरूपणम्

ननु "कर्तरि कृत्"(पा. 3-4-67) इति सूत्रे कर्तृशब्दस्य धर्मपरत्वे "पाचको देवदत्तः" इत्यादौ सामानाधिकरण्यं न स्यात्। सामानाधिकरण्यं तु अनुभूयते।

अपि च मीमांसकानां कृतामिवाख्यातानामपि कर्तृवाचित्वमस्तु भावनाया एवाक्षेपेण कृदादिवत्प्रतीतिसम्भवे वाच्यत्वं मास्तु। तथा सति प्राधान्यं तस्याः न स्यादिति चेन्न। घटमानयेत्यादावाक्षिप्तव्यक्तेरपि प्राधान्यवदुपपत्तेः।

तच्च कृतां धर्मिवाचकत्वे एव सिद्ध्यति। अतः सामानाधिकरण्यानुभवबलात् कृतां कर्तृवाचित्वमङ्गीक्रियते। "लः कर्मणी"(पा. 3-4-69)ति सूत्रे तु कर्तृपदस्य धर्मपरत्वमेव। "भावार्थाः कर्मशब्दाः" (मी2-1-1-1)इति भावार्थाधिकरणानुरोधेन भावनाया एव प्राधान्यतया प्रतीतेः। तदनुभवबलाच्च तिङां भावनावाचित्वमभ्युपेयमिति चेदाह - **अपिचेति**॥ **कृष्णमित्रेण** इत्थमेवावतरणिकास्य रचिता। **कान्तिः काशिका शाङ्करी** च कृष्णमित्रमनुसरन्ति। **दर्पणे** तावत् इत्थमवतारितम्- "ननु पूर्वसूत्रस्थकर्तृपदस्य धर्मिपरत्वेऽपि अनुवृत्तस्य तस्य शब्दाधिकाराश्रयणेन धर्मपरत्वसम्भवान्न दोषः। यदि च शब्दाधिकाराश्रयणं सत्येव गमके, प्रकृते च तदभावे प्रमाणाभाव इति विभाव्यते तदापि शक्तिः कारकं शक्तिमत्कारकमिति पक्षद्वयस्याप्याकरसिद्धतया तद्विकल्पस्य तिङ्कृतोः व्यवस्थितत्वाश्रयणात् अर्थाधिकाराश्रयणेऽप्यभिमतार्थलाभोऽक्षत एवेत्याह - अपि चेति। तथा च विकल्पव्यवस्थाया एवाप्रामाणिकत्वेन एकार्थपरतैव न्याय्येति भावः" इति। **परीक्षायां** तु - "ननु पूर्वसूत्रस्थकर्तृपदं कर्तृपरमेवास्तु। इह तु शब्दाधिकाराश्रयणात् कर्तृत्वपरं भविष्यतीत्यत आह - अपिचेति" अवतारितम्। **प्रभायां** तु दर्पणस्य कृष्णमित्रस्य च अनुवाद एवास्ति। **तत्त्वदर्शिन्यां** तु - अत्र खण्डदेवादयो मीमांसका इत्यारभ्य अवतरणिका रचिता। तस्याः अयमाशयः - "भावप्रधानमाख्यातम्" इति निरुक्तप्रामाण्येन तिङां भावनावाचित्वम् "सत्त्वप्रधानानि नामानि" इति निरुक्तप्रामाण्येन कृतां धर्मिवाचकत्वं चावगतमिति पूर्वसूत्रे धर्मिपरस्यापि कर्तरीति शब्दस्य "लः कर्मणि चे"(पा. 3-4-69)ति सूत्रे धर्मपरत्वं शब्दाधिकारानुरोधात् कल्पनीयम्। यत्र चैकस्मादेवानेकार्थप्रतीतिस्तत्र सर्वेषु शक्तिकल्पने गौरवात् प्रधाने शक्तिः अप्रधाने लक्षणेति वक्तव्यम्। तादृशप्राधान्यनिर्णयश्च उक्तनिरुक्तवाक्येन क्रियत इति वदन्तं मीमांसकं प्रत्याह - अपिचेतीति। विचार्यमाणे दर्पणग्रन्थस्तु असमीचीन एव। शक्तिः कारकम् शक्तिमत्कारकमिति पक्षद्वयस्य सत्त्वेऽपि "कर्तरि कृत्"(पा. 3-4-67)इति सूत्रे शक्तिमत्कारकमिति

पक्षस्य "लः कर्मणी"(पा. 3-4-69)ति सूत्रे शक्तिः कारकमिति पक्षस्याश्रयणमित्यस्यां व्यवस्थायां प्रमाणस्य अनुपन्यासात्। किञ्चात्रार्थाधिकाराश्रयणेऽपि अभिमतार्थलाभो भवतीत्युक्तिस्तु न युक्ता। यतः शक्तिमत्कारकमिति पक्षाभिप्रायेण प्रयुक्तस्य कर्तृपदस्य "लः कर्मणी"(पा. 3-4-69)त्यत्रानुवृत्त्या अर्थाधिकाराश्रयणे तस्य "लः कर्मणी"(पा. 3-4-69)त्यत्रापि शक्तिमद्बोधकत्वमेव स्यात्। न शक्तिमात्रबोधकत्वम्। तदर्थं च शब्दाधिकार एवाश्रयणीयः। किञ्च शक्तिः कारकमिति पक्षेऽपि शक्तिशक्तिमतोरभेदेनैव भानमिति तिङां धर्मिवाचकत्वमेव स्यात् न धर्मवाचकत्वम्। तस्मादयं ग्रन्थः नोचितः।

परीक्षायाः अनुवादरूपः तत्त्वदर्शिनीग्रन्थोऽपि न तावद्युक्तः। यतस्तत्र तिङा भावनायाः बोधे "भावप्रधानमाख्यातम्" इति निरुक्तं प्रमाणतया निर्दिष्टम्। यद्यपि मीमांसकाः "भावप्रधानमाख्यातम्" इत्यस्य आख्यातार्थेषु (तिङर्थेषु) भावस्य - भावनायाः प्राधान्यमिति व्याख्यान्ति अथापि सोऽर्थः ग्रन्थकर्त्रा नाङ्गीक्रियते। ग्रन्थकर्तुः मते आख्यातपदस्य धातुपरत्वात् "धातुः भावप्रधानः" इत्येव तस्यार्थः। अतः "भावप्रधानमाख्यातम्" इति अत्र उभयवादिसम्मतं प्रमाणं न भवति। तस्मादत्र भावनायाः प्राधान्यादिकं साधनीयम्। यदि च तिङा भावना नाभिधीयेत तर्हि पाचकः पाठक इत्यादाविव तिरोहितरूपैव सा अनुभूयेतेति तस्याः प्राधान्यं न स्यादित्यादि वक्तव्यम्। कृतां धर्मिवाचकत्वे "सत्त्वप्रधानानि नामानि" इति निरुक्तवाक्यप्रमाणीकरणं युक्तमेव।

वस्तुतः एतादृशैरवतरणग्रन्थैः मूलप्रतिपाद्यांशस्य एकवाक्यतापि भग्ना भवति। यतः मूले पूर्ववाक्येन यदि तिङां धर्मवाचकत्वं स्यात् तर्हि तत्तुल्ययोगक्षेमकृतामपि तद्वाचकत्वमेव स्यादिति मीमांसकमते दोषः उक्तः। अतः मीमांसकेन कृत्सु धर्मिवाचकत्वसाधनाय प्रमाणयुक्त्याद्युपन्यासः करणीयः। तस्मात् कृष्णमित्रीय-काशिका-शाङ्करीग्रन्थाः मूलानुगुणाः एकवाक्यतासाधकाश्च। "लः कर्मणी"(पा. 3-4-69)ति सूत्रेऽनुवृत्तकर्तृपदस्य धर्मपरत्वप्रतिपादकप्रमाणोपन्यासोऽपि नात्रावश्यकः, यतः ते हि मीमांसकाः स्वसिद्धान्तविरुद्धं पाणिनीयं सूत्रमपि प्रमाणतया न स्वीकुर्वन्ति। तदुक्तं तन्त्रवार्तिके "ल कर्मणीति तु केवलव्याकरणशास्त्रप्रक्रियोपयोगि सूत्रम्" इति । अत एव काशिकायां "लः कर्मणी" (पा. 3-4-69)ति सूत्रप्रस्ताव एव न कृतः।

किञ्च भावनायाः तिङन्ते प्राधान्यबोधिकाः युक्तयः अपि नात्र प्रतिपाद्याः। किन्तु आख्यातानां कृतामिव धर्मिवाचकत्वे भावनायाः प्राधान्यं न स्यादिति सन्दर्भे ताः प्रदर्शनीयाः। तथैव तत्र **काशिकायाम्** इत्थं प्रदर्शितम् - "तथा सति – आक्षेप-लभ्यत्वे सति। न स्यादिति। आख्यातवाच्यत्वात् वाच्यस्यैव हि प्राधान्यमिति नियमात्। अन्यथा अग्निमानयेत्यादौ आक्षिप्तपात्रादेरपि प्राधान्यापत्तेः। किञ्च "मयूरः पर्वतेतरस्मिन् न नृत्यति नृत्यति चे"त्यत्र नृत्यस्य अधिकरणं विनानुपपत्त्या कल्प्यमानम् इतरबाधात् पर्वतरूपं सिद्ध्यतीति मीमांसक-सिद्धान्तः। तत्र तस्याधिकरणस्य प्राधान्यापत्तेः। अत एव विपरीतं न। तिङ्क्ष्विव कृत्स्वपि भावनायाः प्रत्ययवाच्यत्वात् आक्षिप्तकर्त्रपेक्षया प्राधान्यापत्तेः। तथाचानुभवविरोधः। तथा चोक्तं तन्त्रवार्तिके भावार्थाधिकरणे कुमारिलभट्टैः - "यदि कर्त्रा धात्वर्थेन वा भावनावगम्येत ततः पाचकपाठकादिपदे इव तिरोहित-स्वरूपा अवगम्येत। प्राधान्यात्तु शब्दार्थत्वाध्यवसानमिति भावः।" इति। व्याख्यायामस्याम् अनुभव एव तिङ्कृतोः वाच्यार्थवैलक्षण्ये हेतुतयोपन्यस्तः। व्याकरणसूत्रस्पर्श एव न कृतः। इदानीं यद्यपि "लः कर्मणी"(पा. 3-4-69)ति सूत्रोपन्यासः शब्दाधिकाराश्रयणमित्यादि प्रतिपादयितुं शक्यम् अथापि सोऽकिञ्चि-त्कर इति मत्या त्यक्तः। **भूषणे**ऽपि मीमांसकमतखण्डनावसरे काशिकाकारेण प्रदर्शिता युक्तय एव प्रदर्शिताः। तथा हि - मीमांसकास्तु "अनभिहिते" इत्यस्य अबोधिते इत्यर्थः। बोधश्च शक्त्या आक्षेपाद्वा। स चाख्याते आक्षेपात्। कृति तु शक्त्या। अत एव कर्त्रधिकरणे भट्टैरुक्तम् - "यादृशस्तु गुणभूतः कर्तात्रावगम्यते न तादृशेन विना भावनोपपद्यत इति अर्थापत्त्या अनुमानेन वा शक्तानुगमयितुम्" इति। ननु कृति आक्षेपात् आख्याते शक्त्येति वैपरीत्यं किं न स्यात् इति चेन्न। प्रधानीभूतया भावनया कर्तुराक्षेपस्य युक्तत्वात्। भावनायाः आक्षेपलभ्यत्वे च प्राधान्यानुपपत्तेः। एवं कृत्यपि प्राधान्यात् कर्तुवाच्यत्वमावश्यकमिति युक्तस्तेना-क्षेपः। उक्तं च "यदि कर्त्रा धात्वर्थेन वा भावनावगम्येत ततः पाचकपाठकादि - पदेष्विव तिरोहितस्वरूपा अवगम्येत। प्राधान्यात्तु शब्दार्थत्वाध्यवसानम्" इति। तस्मादाख्यातस्थले कर्तृकर्मणी न वाच्ये। अभिधानव्यवस्थायाः प्रकारान्तरेणो - पपत्तेरिति वदन्ति।" इति। अस्य ग्रन्थस्य तात्पर्यमेव काशिकाकारेण प्रतिपादितमिति अलम्। तत्त्वदर्शिन्यां खण्डदेवादयो मीमांसकाः इत्यवतरणेन

खण्डदेवः कौण्डभट्टात् पूर्वतन इति भ्रमः जायते। खण्डदेवस्तु कौण्डभट्टात् अनन्तर इत्येव वस्तुस्थितिः। अत एव खण्डदेवस्य प्रभावः कौण्डभट्टे नास्ति। नागेशे तु दृश्यते। नागेशस्य ततोऽर्वाचीनत्वात्। कौण्डभट्टस्यैव प्रभावः खण्डदेवेऽस्तीति निरूपितं मया मदीयायां भूषणसारतत्त्वप्रकाशिकायाम् प्रथमाध्याये ॥ **मीमांसकानां कृतामिति**॥ तिङि कृति च मीमांसकैः कर्तृभावनयोरुभयोरपि बोधः अङ्गीक्रियते। परन्तु तयोर्मध्ये बोधे प्राधान्येन प्रतीयमाने शक्तिः अन्यस्मिन् आक्षेपः लक्षणा वेति तेषां मतम्। ततश्च "कर्तरि कृत्"(पा. 3-4-67)"लः कर्मणी"(पा. 3-4-69)ति सूत्रद्वयसम्बद्धस्यैकस्यैव कर्तृशब्दस्य एकत्र धर्मिपरत्वम् अन्यत्र धर्मपरत्वं चाश्रीयते। तत्र "पाचको देवदत्त" इति सामानाधिकरण्यानुरोधात् कृतां धर्मिवाचकत्वस्य सर्वैर्निर्विवादमङ्गीकृतत्वाच्च कर्तृपदस्य "कर्तरि कृत्"(पा. 3-4-67) इति सूत्रस्थस्य कर्तृपरत्वं सिद्धम्। ततश्च तत्र भावनायाः आक्षेपः लक्षणा वा। तिङि तु धर्मवाचकत्वस्य विवादग्रस्तत्वात् "कर्तरि कृत्"(पा. 3-4-67) इति सूत्रे स्थितस्य कर्तृपदस्य धर्मिवाचकत्वनिर्णयेन तस्यैव "लः कर्मणी"(पा. 3-4-69)त्यत्रानुवृत्तेः लाघवेन अर्थाधिकारमाश्रित्य तिङामपि धर्मिवाचकत्वमेव युक्तम्। ततश्च कर्तृकर्मणी तिङर्थः। भावना तु आक्षिप्यते लक्ष्यते वेत्येव भवतु। किञ्च भावनया कर्तुः आक्षेपश्च कथम्? क्रियायाः कारकाकाङ्क्षायाः नियतत्वेनेति वक्तव्यम्। तथा चेत् यथा भावनया कर्तुराक्षेपः तथा करणादीनामपि आक्षेपापत्त्या करणादिविहिततृतीयादीनां विलयापत्तिः। न च सर्वत्र सर्वकारकाकाङ्क्षायाः अनियतत्वेन कर्त्राकाङ्क्षायाः नियतत्वेन च कर्तैव आक्षिप्यत इति वाच्यम्। तथापि तत्र तत्र कर्त्रा सह यस्य कारकान्तरस्य आकाङ्क्षा नियता तस्यापि आक्षेपापत्तिः। तथा च "तिष्ठती"त्यादौ कर्त्राकाङ्क्षया सह अधिकरणाकाङ्क्षायाः अपि नियतत्वात् सप्तम्याः विलयापत्तिः। सर्वत्रात्मनेत्याद्य - ध्याहारेण करणाकाङ्क्षायाः उपपादयितुं शक्यत्वात्। कर्तुः तिङर्थत्वे तु तेन कर्त्रा भावना केवलमाक्षिप्यते इति न दोषः। किञ्च कर्तुराक्षेपे आक्षिप्तस्य अशाब्दत्वात् तत्र शाब्दप्रत्ययार्थसंख्यान्वयो न स्यात्। तदर्थं निरूढलक्ष्यत्वं कर्तृकर्मणोः स्वीकरणीयम्। युगपद्वृत्तिद्वयं कल्पनीयम्। तदेतत्सकलमभिसन्धायाह- **कृदादिवत्** इति॥ कृदादौ इव इति "तत्र तस्येव"(पा. 5-1-116) इति सप्तम्यन्ताद्वतिः। ननु वैयाकरणैरपि "लः कर्मणी"(पा. 3-4-69)ति सूत्रेण तिङां धर्मे एव

शक्तिः स्वीकरणीया शक्तिः कारकमिति पक्षे, आकृत्यधिकरणन्यायाच्च। ततश्च कर्ता लक्ष्य एवेति लक्ष्ये एव तिङर्थसंख्यान्वयः वक्तव्य इति साम्यमेवेति चेन्न। शक्तिमात्राभिधानेऽपि शक्तिशक्तिमतोरभेदेन लक्षणां विनैव शक्तिमतः बोधः। किञ्च तिङ्भ्यां द्रव्यमभिधीयते इति "गत्यर्थ लोटा" (पा. 8-1-51) इति सूत्रभाष्य -विरोधेन शक्तिः कारकमिति पक्षस्यासार्वत्रिकत्वम्। कर्त्रर्थे सूत्रभाष्यादिसिद्धशक्तिं विहाय लक्षणास्वीकारे मानाभावात् प्रयोजनाभावाच्च। अतश्च कर्त्रा भावनाक्षेप एव युक्तः तिङ्क्ष्वपि इति **कान्तिः॥ तथा सतीति॥** भावनायाः आक्षिप्तत्वे तस्याः प्रत्ययार्थत्वाभावादित्यर्थः। वाच्याक्षिप्तयोः मध्ये वाच्यस्यैव प्राधान्यादित्यर्थः। अन्यथा अग्निमानयेत्यादौ आक्षिप्तपात्रादेरपि प्राधान्यापत्तेः। किं च "मयूरः पर्वतेतरस्मिन् न नृत्यति नृत्यति चे"त्यत्र नृत्यस्य अधिकरणं विना अनुपपत्त्या कल्प्यमानमधिकरणम् इतरबाधात् पर्वतरूपं सिद्ध्यतीति मीमांसकराद्धान्तः। तत्र तस्याधिकरणस्य प्राधान्यापत्तेः। **॥घटमानयेत्यादाविवेति॥** मीमांसकाः आकृत्यधिकरणन्यायेन घटादिशब्दानां जातावेव शक्तिमङ्गीकुर्वन्ति। तस्याः जातेः आनयनादिकर्मत्वानुपपत्त्या तदन्वयोपपत्तये स्वाश्रयव्यक्तेराक्षेपेण तद् द्वारा अन्वयमभ्युपगच्छन्ति। कारकत्वं तु द्रव्यस्यैवेति तत्र घटादिपदार्थस्य घटत्वादिजातेः विशेषणत्वं आक्षिप्तव्यक्तेः विशेष्यत्वं च स्वीकुर्वन्ति तत्रैव सुबर्थ-संख्यान्वयं च स्वीकुर्वन्ति। यदि च आक्षिप्तस्य प्राधान्यमेव न स्यात् तर्हि घटमानयेत्यादिषु आक्षिप्तव्यक्तेः प्राधान्यानुपपत्तिः सुबर्थसंख्याद्यनन्वयापत्तिश्च। तथा च आक्षिप्तस्य प्राधान्यं नेति मीमांसकैः वक्तुं न शक्यम्। किन्तु विवक्षया अनुभवेन प्रमाणेन वा प्राधान्यमप्राधान्यं च। ततश्च यथा जात्याक्षिप्तव्यक्तेः प्राधान्यं तथा कर्त्राक्षिप्तभावनायाः अपि प्राधान्यं भवितुमर्हति "भावप्रधान-माख्यातम्", "भावार्थाः कर्मशब्दाः-" (मी.2-1-1) इत्यादि प्रमाणबलात्। न च घटादिषु प्रातिपदिकार्थेन घटत्वादिना व्यक्तिराक्षिप्यते अत्र तु प्रत्ययार्थकर्त्रा भावना आक्षिप्यते इति अस्ति कश्चन भेदः, प्रकृतिप्रत्ययार्थयोःप्रत्ययार्थस्य प्राधान्य-नियमात् प्रत्ययवाच्यार्थस्यैव प्राधान्यं वक्तव्यम्। ततश्च प्रत्ययार्थाक्षिप्तस्य न प्राधान्यमिति सार्वत्रिकः कश्चन नियमः सिद्ध्यति। अनेन आक्षिप्तमात्रस्याप्राधान्ये अरुणाधिकरणोच्छेद इति दूषणस्यापि न प्रसङ्गः इति वाच्यम्। तादृशनियमे मानाभावात्। "गोमन्तमानये"त्यादौ मतुपः षष्ठ्यर्थसम्बन्धे विधानात् तदाक्षिप्त-

पचतीत्यादौ पाकं करोतीति भावनायाः विवरणदर्शनात् वाच्यत्वमिति चेत् -न। पाकानुकूलव्यापारवतः कर्तुरपि विवरणविषयत्वाविशेषात्। न च कर्तुर्विवरणं तात्पर्यार्थविवरणं पाकं करोति इति अशब्दार्थकर्मत्वविवरणवत् इतरेतरयोगद्वन्द्वे समुच्चयांशविवरणवद्वा न तदर्थनिर्णायकमिति वाच्यम्। भावनायामपि तुल्यत्वात्।

व्यक्तेः प्राधान्यानुभवेन तस्य नियमस्य व्यभिचाराच्च इति **काशिका**। "न चाख्याते कर्त्रादिना भावनाक्षेपो न युक्तः, कर्तृस्वरूपनिरूपकत्वेन साऽऽक्षिप्यत इति तस्याः वाच्यसिद्ध्यङ्गत्वेन गुणत्वस्य दुर्वारत्वात्। जात्या तु व्यक्तेराक्षेपो युक्तः। लोके परिच्छेद्यतयाऽवगता व्यक्तिः तयैव जात्या आक्षिप्यत इति न व्यक्तेर्गौणत्वमिति वाच्यम्। एतादृशविशेषस्याप्रयोजकत्वेन गुणत्वादावनियामकत्वात्। चैत्रः पचतीत्यादौ कर्तुरपि परिच्छेद्यतयावगतत्वेन त्वद्रीत्या जात्याक्षिप्तव्यक्तेरिव तस्य विशेष्यत्वापत्तेश्च। एवं प्राधान्यस्य शक्तिनियामकत्वस्वीकारे आकृत्यधिकरणोच्छेदः, तस्य तदनियामकत्वे कृत्तिङोः वैषम्यासिद्धिरिति सेयम् उभयतस्पाशा रज्जुरित्याशयः। स्पष्टमिदं सर्वं भूषणे " इति **तत्त्वदर्शिनी**।

अथ मीमांसकः पुनरेवं प्रत्यवतिष्ठते। तिङां भावनार्थकत्वे अस्ति प्रमाणान्तरम् यच्च शक्तिग्राहकप्रमाणत्वेन सर्वैरभ्युपगतम्।

"**शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्याद्व्यवहारतश्च।**

वाक्यस्य शेषाद्विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः॥"(**कारिकावली.शब्द.**1)

इत्यभियुक्तोक्तेषु शक्तिग्राहकप्रमाणेषु विवृतिः - विवरणमित्यस्ति किञ्चित् प्रमाणम्। यथा पचति इत्यस्य पाकं करोति इति विवरणम्। पचति इत्यत्र पच्धातुः तिप्प्रत्ययः इति अंशद्वयमस्ति। तस्यांशद्वयस्यार्थः क्रमशः पदद्वयरूप -वाक्येन बोध्यते। तथा च पचधात्वर्थः पाकशब्देन तिप्प्रत्ययार्थश्च करोतिशब्देन विव्रियते। करोतिश्च भावनावाचीति तिङ्प्रत्ययार्थः भावनेति सिद्ध्यति। तथा मुख्यार्थत्वेन प्रत्ययस्य भावनायाः सिद्धौ कर्त्रादिः आक्षिप्तो वा निरूढलक्ष्यो वा भवति। तदाह **पचतीत्यादाविति**। तन्न युक्तम् इत्याह - **चेन्नेति**। करोतिशब्देन तिङर्थः बोध्यते इति तु सत्यम्। परन्तु करोतिशब्देन विक्रियमाणोऽर्थः भावनैवेति वक्तुं न शक्यम्। एककर्तृका पचिक्रियेति कर्तुरपि विवरणविषयत्वात्। तथा च द्वयोरपि विवरणविषयत्वे कस्य प्राधान्यम् कस्याप्राधान्यम् इत्यत्र विनिगमकाभावात् विवरणं नार्थसाधकमित्यर्थः।

किञ्च "पचति देवदत्त" इत्यत्राभेदान्वयदर्शनात् तदनुरोधेन कर्तुर्वाच्यत्वमावश्यकम् "पक्ता देवदत्त" इतिवत्। न चाभेदबोधे समानविभक्तिकत्वं नियामकं तच्च तत्र नास्तीति वाच्यम्। सोमेन यजेत स्तोकं पचति राजपुरुषः इत्यादावप्यभेदबोधानापत्तेः।

ननु अत्र कर्तुः विवरणं तात्पर्यार्थविवरणम्। नतु शब्दार्थविवरणम्। पचतीत्यतः तिङर्थभावनाक्षिप्तकर्तृबोधो जायतामितीच्छा एव तात्पर्यम्। तत्तात्पर्यविषयीभूतस्य विवरणमेव कर्तुः विवरणम्। अतः भावनाया एव पदार्थत्वमनेन सिद्ध्यति। तद्यथा अस्मिन्नेव विवरणवाक्ये द्वितीयाविभक्तिः श्रूयते "पाकम्" इति। द्वितीयार्थः कर्मत्वं तु न धात्वर्थः न वा प्रत्ययार्थः। तथात्र तिङ्प्रत्ययेन कर्तुर्विवरणमपि न पदार्थः। तदाह - **कर्तुर्विवरणं तात्पर्यार्थविवरणमिति**। ननु तत्र द्वितीयार्थकर्मत्वं शब्दार्थविवरणं न, विक्लित्तेः धात्वर्थस्य व्यापारे कर्मतानिरूपकत्व-सम्बन्धेनान्वयेन आकाङ्क्षाभास्यसंसर्गस्य विवरणरूपत्वात्। तथापि विशेषणतया भासमानस्य कर्तुः विवरणविषयत्वमेव स्यादिति न तत् तात्पर्यार्थविवरणं भवितुमर्हति इति चेदाह - **इतरेतरयोगद्वन्द्वे** इति ॥ धवखदिरौ इति इतरेतरयोगद्वन्द्वस्य धवश्च खदिरश्चेति विवरणं दृश्यते। तत्र धवपदेन खदिरपदेन च समासेऽन्वितयोः अर्थः विव्रियते। चशब्दद्वयेन तयोः साहित्यम्। तत्र साहित्यबोधकस्य पदस्य समासेऽभावात् तत् साहित्यम् अपदार्थत्वेन तात्पर्यार्थविवरणमित्यर्थः। अयं च व्यपेक्षावादे। मीमांसकैः समासे व्यपेक्षाया एव स्वीकारात्। अत्र समुच्चयांशशब्देन परस्परनिरपेक्षस्य एकत्रान्वयरूपसाहित्यांशः अभिप्रेतः। अन्यथा समुच्चये समासस्यैव अप्रसक्त्या मूलासङ्गतिः।(न)**वाच्यमिति**। अस्तु, अनेन विवरणवाक्ये कश्चिदंशः अशब्दार्थविवरणमपि भवति इति पाकं करोति विवरणवाक्येऽपि कश्चन अंशः अशब्दार्थः इत्यङ्गीकुर्मः। परन्तु सः कर्त्रंश एव न भावनांश इत्यत्र न प्रमाणम्। तदेवाह-**भावनायामपि तुल्यत्वादिति** । तिङर्थसंख्याद्यन्वयानुरोधेन कर्तुर्विवरणमेव शब्दार्थविवरणं भावनायाः विवरणमेव अशब्दार्थविवरणमित्यपि वक्तुं शक्यत्वादित्यर्थः। ततश्च भावनायाः तिङर्थत्वे विवरणमपि न साधकमिति सिद्धम्।

नन्वस्तु नाम विवरणं न प्रमाणम्।एवञ्च भावनायाः तिङर्थत्वे न किञ्चित्प्रमाणमित्यापतितम्।यत्र अन्यतरार्थशक्तिनियामकं किञ्चिन्नास्ति तत्राकृत्यधिकरण–व्युत्पादितं लाघवमेव शक्तिनियामकमिति स्वीकर्तव्यम् । तथा च "नागृहीत-विशेषणा विशिष्टबुद्धिरि"तिन्यायेन भावनाश्रये शक्तिकल्पनापेक्षया भावनायां शक्तिकल्पने एव लाघवमिति तिङां भावनायामेव शक्तिः।कृत्सु तु कर्तुरेव प्राधान्यम्। पक्ता देवदत्त इति सामानाधिकरण्यानुरोधेन "सत्त्वप्रधानानि नामानि" इति निरुक्तवचनेन च तत्र कर्तरिशक्तेः सर्ववादिसम्मतत्वात्। इतिचेदत्रोच्यते - **किञ्चेति**।

2.4.3. किञ्चेति मूलावतरणे भूषणग्रन्थानुगुणव्याख्यापरिशीलनम्

अथात्र व्याख्यातृणामवतरणग्रन्थान् परिशीलयामः। **कान्त्यां** तावत् "नन्वेवं विवरणस्य सर्वत्र शक्तिग्राहकत्वोच्छेदापत्तिरित्यत आह - किञ्चेति" इत्यस्ति। एतच्चासङ्गतमेव। "पचति - पाकं करोति" इति विवरणं नार्थसाधकमिति कथनेन सर्वस्यापि विवरणस्य कथं शक्तिग्राहकत्वाभावः आपादयितुं शक्यः। अत्र तु करोतिशब्देन कर्तृभावनयोः द्वयोर्बोधात् तत्र एकस्य शाब्दत्वमपरस्य अशाब्दत्वं च वक्तव्यम्। अत्र उभयोरपि शब्दार्थत्वे युक्तिसद्भावात् कः शब्दार्थ इति सन्देह इति अत्र विवरणस्य निश्चायकत्वं नास्ति। अतः युक्त्यन्तरमन्वेष्टव्यमेव। अतः इयं व्याख्या असङ्गता। **दर्पणे** "नन्वाख्यातस्य कर्तृवाचित्वे तदाक्षिप्तभावनायाः प्राधान्यानुपपत्तिः। न चाकृतिवादे जात्याक्षिप्तव्यक्तिवत् प्राधान्यमुपपादितमेवेति वाच्यम्। दृष्टान्तदार्ष्टान्तिकयोः वैषम्यात्। तथा हि - कर्त्रा स्वस्वरूपनिरूपकतया भावनाक्षेप्तव्या, भावनाविरहिणः कर्तृत्वासम्भवात्।ततश्च धर्मिग्राहकमानसिद्ध-गुणत्वेन प्राधान्यासम्भवः कृतीव। जात्या तु परिच्छेद्यतया अवगतस्य द्रव्यस्य तथैवाक्षेपात् भवति तस्य प्राधान्येन भानमिति प्राधान्यानुरोधात् भावनायाः वाच्यत्वमावश्यकमित्यतो दूषणान्तरमाह-किञ्चे" -त्यस्ति। **परीक्षायामपि** एतादृश एवावतरणग्रन्थोऽस्ति। **काशिकायान्तु** "ननु लाघवात् भावनैव प्रत्ययवाच्या न तु कर्ता गौरवात्। तथासति कृत्यपि तथात्वं स्यादिति न शङ्कनीयम्। देवदत्तः पक्तेत्यादौ देवदत्तादिना अभेदान्वयबोधस्य अनुभवसिद्धत्वादित्यत आह- किञ्चेति" इति वर्तते। **प्रभायां** तु दर्पणकाशिकयोः द्वयोरपि अनुवादः अस्ति। **शाङ्कर्यां** तु "कर्तुरेव आख्यातवाच्यत्वमावश्यकमित्याह - किञ्चेति" इत्यस्ति।**तत्त्वदर्शिन्यां** तु

"स्यादेतत्। पूर्वोक्तरीत्या प्राधान्यानुरोधेन आख्यातानां भावनावाचकत्वं कृतां च कर्त्रादिवाचकत्वमेव युक्तम्। यत्रान्यतरार्थप्राधान्यनियामकमस्ति तत्र तस्यैव शक्तिनियामकत्वम्। यत्रत्वन्यतरार्थप्राधान्यनियामकाभावः तत्राकृत्यधिकरणव्युत्पादितलाघवस्यैव शक्तिनियामकत्वम्। अतो न घटादिपदप्रतिबन्ध्यपि। तत्र हि जातिव्यक्त्योरन्यतरस्य प्राधान्यनियामकाभावेन लाघवात् जातौ शक्तिः व्यक्तौ लक्षणा च स्वीकार्या। किञ्च घटघटत्वयोरुभयोरप्यर्थयोः विभक्त्युपात्तसंख्यान्वययोगित्वरूपा सत्त्वता अस्तीति तत्रोभयोरपि शब्दतः प्राधान्यम्। न च घटत्वविशिष्टो घट इति वैशिष्ट्यावगाह्येकबोधोदयेन तस्य व्यक्तिरूपार्थस्य प्राधान्यनियामकमस्तीति वाच्यम्। जातिव्यक्त्योरुभयोरपि क्रमिकत्वेन शक्तिलक्षणाजन्यबोधद्वयाङ्गीकारेण वैशिष्ट्यानवगाहनात् तस्य तन्नियामकत्वाभावात्। उक्तञ्चारुणाधिकरणे वार्तिककारैः - "तृतीयादौ जातेरेव संख्याकारकान्वयः। अन्यत्र तु लक्षितव्यक्तेः। जातिव्यक्त्योश्च न वैशिष्ट्यावगाह्येको बोधः। किन्तु बोधद्वयं शक्तिलक्षणाजन्यम्" इति। एवञ्च घटादिपदे जातिव्यक्त्योरन्यतरस्य प्राधान्यनियामकाभावात् आकृत्यधिकरणव्युत्पादितलाघवानुरोधेन जातौ शक्तिः व्यक्तौ लक्षणेति समञ्जसमेव। पचति पाचक इत्यादौ तु अन्यतरार्थप्राधान्यनियामकयोः "भावप्रधानमाख्यातम् सत्त्वप्रधानानि नामानि" इत्यनयोः सत्त्वेन प्राधान्यस्यैव शक्तिनियामकत्वे न किञ्चिद्बाधकमत आह - किञ्चेति" इत्यस्ति। उपरि निर्दिष्टाः अवतरणग्रन्थाः त्रयोऽपि न दुष्टाः। अपि तु व्युत्पादकाश्च। परन्तु को वा ग्रन्थकृदभिमत इत्येवात्र समालोचनीयम्। "कर्त्राक्षिप्तभावनायाः जात्याक्षिप्तव्यक्तेश्च साम्यं नास्ति। तस्मात् जात्याक्षिप्तव्यक्तेः यथा प्राधान्यं न तथा कर्त्राक्षिप्तभावनायाः प्राधान्यं वक्तुं शक्यमिति चेत् युक्त्यन्तरमाहे"ति दर्पणग्रन्थाशयः।

अयं च कौण्डभट्टस्य असम्मत एव। **भूषणे** धात्वर्थनिर्णये -"ननु कर्त्रा स्वस्वरूपनिरूपकत्वेन भावनायाः आक्षेपात् गुणत्वम्। जात्या तु लोके परिच्छेद्यतयावगतं द्रव्यं तथैवाक्षिप्यत इति न गुणत्वमिति चेन्न। एतादृशविशेषस्याप्रयोजकत्वेन गुणत्वादावनियामकत्वात्। भवद्रीत्या व्यक्तेरिव कर्तुः परिच्छेद्यत्वात् आक्षिप्तस्यापि व्यक्तिवद्विशेष्यत्वापत्तेश्च" इति ग्रन्थेन तद्वैषम्यस्य तिरस्कारात्।

तत्त्वदर्शिन्याम् "आकृत्यधिकरणव्युत्पादितलाघवमेव शक्तिनियामकं यत्रान्यतर-प्राधान्यप्रतिपादकयुक्त्यन्तरं नास्ती"त्यारभ्य "भावप्रधानमाख्यातम्" इति निरुक्त-प्रामाण्यात् भावनायाः प्राधान्यं तिङन्तेऽध्यवसीयते इति अवतरणग्रन्थस्यो-पसंहारः कृतः ।अयमपि ग्रन्थकर्तुर्नाभिमतः ।"भावप्रधानमाख्यातम्" इति निरुक्तस्य कौण्डभट्टेन "धातुःव्यापारप्रधान" इत्यर्थस्यैव व्यवस्थापितत्वात्। यदि चायमभिप्रायः ग्रन्थकर्तुः स्यात् तर्हि तद्दूषणमेवमभविष्यत् - "भावप्रधान-माख्यातमि"त्यस्य तिङर्थेषु तिङन्तार्थे वा भावना प्रधानेत्यर्थो न। किन्तु तत्रा-ख्यातपदं धातुपरम्। तथा च धातुः भावप्रधानः इत्येवार्थः तस्य वक्तव्यः। ततश्च नेदं वाक्यं भावनायाः तिङर्थत्वे वा तिङर्थेषु भावनायाः प्राधान्यबोधने वा प्रमाणम्" इति।तस्मात्तत्त्वदर्शिन्यवतरणमपि न तथार्थसाधकम्।अतः काशिका- वतरणमेव युक्ततमम्। अत एव अनन्तरं खण्डनमपि सङ्गच्छते। कृतां कर्तृ-वाचकत्वे "पाचको देवदत्त" इति सामानाधिकरण्यं यथा प्रमाणम् तथा तिङां कर्त्रादिवाचकत्वेऽपि "पचति देवदत्त" इति सामानाधिकरण्यमेव प्रमाणमिति। तथा च प्रमाणस्य सद्भावात्नाकृत्यधिकरणेन व्युत्पादितस्य लाघवस्य अत्र निर्णायकत्वम् इति। **अभेदान्वयदर्शनादिति**॥ सामानाधिकरण्येन अन्वयस्य अनुभूयमानत्वादित्यर्थः । तथा च पक्ता देवदत्त इत्यादौ यत्सामानाधिकरण्यं प्रमाणतयोपदर्श्य कृताम् कर्त्रादिवाचित्वं साधितम् तेनैव प्रमाणेन "पचति देवदत्त" इत्यत्र अनुभूयमानेन सामानाधिकरण्येन तिङामपि धर्मिवाचकत्वं सिद्ध्यती-त्यर्थः। अत एव पचतीत्युक्ते कः कीदृशः इत्यादि जिज्ञासा भवति। इयं च जिज्ञासा कर्तृविशेषजिज्ञासा। विशेषजिज्ञासा च सामान्यज्ञानपूर्विकेति कर्तृ-सामान्यज्ञानं तिङा जायत इति अवश्यमभ्युपगन्तव्यम्। इदं च सामानाधिकरण्यं "युष्मद्युपपादे समानाधिकरणे स्थानिन्यपि मध्यमः"(पा. 1-4-105) "अस्मद्युत्तमः"(पा. 1-4-107) "शेषे प्रथमः" (पा. 1-4-108) इति सूत्रबोधितं ऋष्यनुभवसिद्धमेव।

2.4.4. अभेदबोधे विरुद्धविभक्तिराहित्यं तन्त्रमिति निरूपणम्

रामो दशरथिः, सुन्दरः पुरुषः इत्यादौ यत्राभेदबोधः तत्र विशेषणविशेष्ययोः समानविभक्तिकत्वमनुभूयत इति अभेदबोधे समानविभक्तिकत्वं नियामकं तच्चात्र नास्तीति शङ्कते - **न चेत्यादिना। समानविभक्तिकत्वमिति**॥ अभेदान्वय-

प्रतियोग्यनुयोगिविशेषणविशेष्यपदयोः समानविभक्तिकत्वं च विशेषणवाचकपदे विशेष्यवाचकपदोत्तरविभक्तिसजातीयविभक्तिकत्वं विशेष्यवाचकपदे विशेषण-वाचकपदोत्तरविभक्तिसजातीयविभक्तिकत्वं वा। साजात्यं च विभक्तिविभाजकता-वच्छेदकप्रथमात्वादिना न तु सुत्वादिना। ततश्च "वेदाः प्रमाणम्" इत्यादिषु अभेदबोधः सिद्ध्यति। साजात्यस्य विभक्तित्वादिना विवक्षणात् न "नीलो घटम्" इति वाक्यादभेदबोधापत्तिः। तथा च अभेदसम्बन्धावच्छिन्ननामार्थनिष्ठप्रकारता-निरूपितविशेष्यतासम्बन्धेन शाब्दबोधं प्रति विशेषणविशेष्ययोः समानविभक्तिक-त्वज्ञानं कारणमिति कार्यकारणभावः फलितः। तथा च देवदत्तः पचतीत्यत्र सुप्तिङ्विभक्त्योः साजात्याभावात् सामानाधिकरण्यं नास्तीति शङ्कितुराशयः। समाधत्ते - **न नियामकमिति**॥ यत्र यत्र अभेदबोधः तत्र तत्र समानविभक्तिकत्वं विशेषणविशेष्ययोः, यत्र यत्र विशेषणविशेष्ययोः समान -विभक्तिकत्वं तत्र तत्र अभेदबोधः इति वा व्याप्तिः स्वीकर्तुं न शक्या, अव्याप्त्यतिव्याप्तिदोषग्रस्तत्वात्। तथा हि - यत्र यत्र समानविभक्तिकत्वं तत्र तत्राभेदान्वय इति व्याप्तिस्वीकारे "राज्ञः सुतस्य धनम्" इत्यादौ समानविभक्तिकं षष्ठ्यन्तद्वयमस्तीति तत्रापि अभेदान्वयापत्तिः इति अतिव्याप्तिः। अथ यत्र यत्र अभेदबोधः तत्र तत्र समान-विभक्तिकत्वमित्युक्ते सोमेन यजेत स्तोकं पचति राजपुरुष इत्यादिषु अभेदबोधः दृश्यते समानविभक्तिकत्वं नास्तीति नियमस्य अव्याप्तिः। तथा हि - सोमेन यजेत इति विधिवाक्ये "सोमेन" इत्यस्य मत्वर्थलक्षणया "सोमवता" इत्यर्थः। इदं च यागे विशेषणम्। यागश्च यजेतेति लिङ्प्रकृतिभूतयजधात्वर्थः। तस्य धात्वर्थस्य यागस्य करणत्वेन लिङर्थभावनायामन्वयः। तथा च "यजेत" इत्यस्य "यागेन भावयेत्" इति "सोमेन यजेत" इत्यस्य "सोमवता यागेन भावयेत्" इत्यर्थः। भावनायां करणत्वेनान्वितयागस्य सोमवता इति विशेषणम्। तथा च "सोमवद् - भिन्नेन यागेन भावयेत्" इति बोधः। तथा चात्र सोमः (सोमवान्) विशेषणम्, यजधात्वर्थयागः विशेष्यम्। तद्वाचकयोः समानविभक्तिकत्वं नास्ति। अत्र विशेष्ये विशेषणसजातीयविभक्तिकत्वाभावः। अत्र **परीक्षायाम्** - "न च सोमस्य धात्वर्थ-फले अभेदेन अन्वयस्वीकारे सोमपदात्तृतीयानुपपत्तिः। क्रियाविशेषणानां कर्मत्वादिति वाच्यम्। भावनाभाव्यनिर्वर्तकत्वरूपकरणत्वस्य विवक्षितत्वात्। अत्र "करणे यज"(पा. 3-2-85) इति सूत्रमेव मानमि"ति व्याख्यातम्। वस्तुतः

धात्वर्थः फलं व्यापारश्चेत्येव नव्यमीमांसकसिद्धान्तः। स च व्यापारः भावनातिरिक्त इति तेषां मतम्। अतः सोमपदार्थस्य व्यापारविशेषणत्वेन व्यापारस्य च भावनायां करणत्वेन विवक्षितत्वाच्च तद्विशेषणे तृतीया। अत एव यागेन भावयेदिति विवरणं संगच्छते। क्रियाविशेषणानां कर्मत्वमिति न वाचनिकम्, किन्तु धात्वर्थफलान्वयेन सिद्धस्यैवार्थस्य अनुवादकम्। फलस्य व्यपदेशिवद्भावेन कर्मत्वेन तद्विशेषणस्यापि कर्मत्वात्। व्यापारविशेषणत्वे तृतीयैव। अत एव प्रकृत्यादिभ्य उपसंख्यानमिति वार्तिकप्रत्याख्यानपक्षे समेनैति विषमेणैतीत्यादौ क्रियाविशेषणे तृतीया। स्तोकं पचति इत्यत्रापि स्तोकमिति क्रियाविशेषणम्। तच्च पचधात्वर्थव्यापारजन्यविक्लित्तिफलस्य विशेषणम्। विक्लित्तिरूपं फलं पचधात्वर्थः। तस्मिन् धात्वर्थे फले "स्तोक"मिति विशेषणम्। फलस्यापि व्यपदेशिवद्भावेन फलाश्रयत्वात् कर्मत्वमिति तद्विशेषणीभूतस्तोकादेरपि कर्मत्वम्। अतश्च "स्तोकाभिन्ना या विक्लित्तिः तदनुकूलः अधिश्रयणादिव्यापार" इति बोधः। अत्रापि विशेष्ये विशेषणसजातीयविभक्तिकत्वं नास्ति।

नन्वभेदसम्बन्धावच्छिन्ननामार्थनिष्ठप्रकारतानिरूपितनामार्थनिष्ठविशेष्यताशाली यत्रान्वयबोधः तत्रैवोक्तसमानविभक्तिकत्वं नियामकमिति नोक्तस्थलद्वये व्यभिचार इति चेदाह - **राजपुरुष** इति। अत्र विशेषणविशेष्ययोरुभयोरपि नामत्वमेवेति अत्र समानविभक्तिकत्वस्य व्यभिचारः। "राजपुरुष" इति समासे राजपदं राज - सम्बन्धिनि लाक्षणिकम्। तस्याभेदेन पुरुषेऽन्वयः। तथाच "राजसम्बन्ध्यभिन्नः पुरुष" इति बोधः। अत्र विशेषणे राजपदे विशेष्यसजातीयविभक्तिकत्वाभावः। तथा च पूर्वोदाहृतस्थलेषु सर्वत्र समानविभक्तिकत्वाभावेऽपि अभेदबोधानुभवात् "राज्ञः सुतस्य धनमि"त्यादौ क्वचित् समानविभक्तिकत्वेऽपि अभेदबोधाननुभवाच्च सिद्धम् अभेदबोधे समानविभक्तिकत्वं न नियामकमिति। तर्हि किं नियामकमिति चेत् विरुद्धविभक्तिराहित्यमेव। तथा च विशेषणे विशेष्यवाचकपदोत्तरविभक्तिविरुद्धविभक्तिराहित्यं विशेष्ये विशेषणवाचकपदोत्तरविभक्तिविरुद्धविभक्तिराहित्यं वा नियामकमिति सिद्धम्। तच्चात्र सर्वत्रास्ति। यथा "राज्ञः सुतस्य धनमि" त्यत्र यद्यपि षष्ठी उभयत्रास्ति अथापि एकत्र जन्यजनकभावे षष्ठी अपरत्र स्वस्वामिभावसम्बन्धे। अतश्च द्वयोः परस्परं भिन्नार्थकत्वात् विरुद्धविभक्तिवैशिष्ट्यमेवेति न अभेदबोधः। सोमेन यजेत स्तोकं पचतीत्यत्र विशेषणविभक्तिविरुद्ध-

न च लक्षणया कर्तुरुक्तत्वात्सामानाधिकरण्यम् , पिङ्गाक्ष्यादियौगिकानामपि द्रव्यवाचित्वानापत्तेः। एवं वैश्वदेवीत्यादितद्धितानामपि , "अनेकमन्यपदार्थे" "साऽस्य देवता" इत्यनुशासनेन पिङ्गे अक्षिणी यस्याः विश्वेदेवा देवता अस्या इति विग्रहदर्शनात्प्रधानषष्ठ्यर्थे एव अनुशासनलाभात्।

विभक्त्यभावः यजधातौ पचधातौ चास्तीति अभेदान्वयः सिद्ध्यति, धातोः अप्रातिपदिकत्वेन विभक्तेरेवानुत्पत्तेः। तथा राजपुरुष इत्यत्रापि राजपदे विभक्तेः लुका लुप्तत्वात् क्वापि विभक्तिरेव नास्तीति विशेषणे विशेष्यवाचकपदोत्तरविभक्ति-विरुद्धविभक्तिराहित्यमस्त्येव। तथा च यथा सोमेन यजेतेत्यत्र नामार्थधात्वर्थयोः अभेदान्वयबोधः,तथा देवदत्तः पचतीत्यत्र नामार्थतिङर्थयोः देवदत्तकर्त्रोः अभेदा-न्वयः सिद्ध्यतीति देवदत्ताभिन्नः यः कर्ता तदाश्रयः विक्लित्त्यनुकूलः फूत्कारादि-व्यापारः इति बोधः सिद्ध्यति। अनेन कृतिराख्यातार्थ इति नैयायिकमतं परास्तम्। कृतेः तिङर्थत्वे तस्याः प्रथमान्तार्थेन देवदत्तादिना अभेदेन अन्वया-सम्भवात्।

अथ मीमांसकः पुनः प्रत्यवतिष्ठते - **न चेति**। विरुद्धविभक्तिराहित्यमेव सामानाधिकरण्यम्। देवदत्तादिप्रथमान्तस्य तिङर्थकर्त्रादिभिरेवाभेदेन अन्वयः। परन्तु तिङां भावनायामेव शक्तिः कर्तृकर्मणोस्तु लक्षणा। सा च निरूढा लक्षणा। तथा च निरूढलक्ष्यकर्त्रादिभिः सह प्रथमान्तार्थस्य देवदत्तादेः अभेदेन अन्वयः। तथा च सिद्धमभिमतं सामानाधिकरण्यं कर्त्रादेः तिङर्थत्वं च इति। तन्न। एवं सर्वत्र लक्षणयैव निर्वाहे यौगिकानां सर्वेषां द्रव्यवाचित्वमेव न स्यात्। तथा च "सर्वत्र यौगिकैः शब्दैः द्रव्यमेवाभिधीयते" इति सिद्धान्तभङ्गः। तथा हि -

अरुणाधिकरणे तन्त्रवार्तिके भट्टपादैः -

"बहुव्रीहिः समासोऽयं मतुबर्थे विधीयते।
अस्यात्रेति च सम्बन्धे मत्वर्थीयः प्रवर्तते॥"(मी.3-1-6-12)

इति मतुबादीनां बहुव्रीहेश्च समानार्थकत्वं प्रतिपादितम्। अस्य अत्रेति च सम्बन्धे मत्वर्थीयः प्रवर्तते इति उत्तरार्धेन मतुबादिमत्वर्थीयानां सम्बन्धवाचकत्वं च स्पष्टं प्रतिपादितम्। "तदस्यास्त्यस्मिन्निति मतुप्"(पा 5-2-94) इति सूत्रेण अस्येति षष्ठ्यर्थे मतुपो विधानेन षष्ठ्याः सम्बन्धबोधकत्वात् षष्ठ्यर्थे एव साधुत्वं मत्वर्थीयस्य लभ्यते। "अनेकमन्यपदार्थे" (पा. 2-2-24) इति सूत्रेण विहितबहुव्रीहेरपि मतुबर्थे

(अस्येति षष्ठ्यर्थे) विधानेन तस्यापि प्राधान्येन सम्बन्धवाचकत्वम् अनुशासनात् लभ्यते। अत एव चित्रगुरित्यादिबहुव्रीहेः चित्राः गावः अस्येति विग्रहः प्रदर्श्यते। तेन अन्यपदार्थः षष्ठ्यर्थ एवेति स्पष्टं भवति। प्रथमान्तानामप्रथमाविभक्त्यर्थे बहुव्रीहिरिति वदता भाष्यकारेणापि द्वितीयादिविभक्त्यर्थस्यैवान्यपदार्थतोक्तेति षष्ठ्यर्थबहुव्रीहेः प्राधान्येन सम्बन्धवाचकत्वमेव अनुशासनात् लभ्यते। एवमेव "सास्य देवता"(पा. 4-2-24) इत्यादिविहिततद्धितानामपि। सा देवता अस्येति प्रधानषष्ठ्यर्थे एव प्रत्ययविधानात्। तथा च चित्रगुः गोमान् वैश्वदेवीत्यादिषु सुबुपात्तलिङ्गसंख्याद्यन्वयो सम्बन्धे न स्यादिति तत्र सर्वत्र द्रव्ये शक्तिरङ्गीक्रियते। एतदेवोक्तं तन्त्रवार्तिके भट्टपादैः - "सर्वत्र यौगिकैः शब्दैः द्रव्यमेवाभिधीयते" इति। द्रव्यमेव अभिधीयते इत्यस्य शक्त्या इति शेषः। तथाच द्रव्यमेव वाच्यार्थः इत्यर्थः सिद्धः।

2.4.5. **यौगिकपदव्युत्पत्तिविमर्शः**

योगः अवयववृत्तिः तन्मात्रेण प्रवृत्ताः यौगिकाः। "योगेन निर्वृत्ता यौगिका इति योगशब्दात्"तेन निर्वृत्तम्"(पा. 4-2-68) इति चातुरर्थिकः ठक्" इति **प्रभा**। "तन्न युक्तम्। योगशब्दात् तेन निर्वृत्तमिति सूत्रेण ठकोऽलाभात्। "प्राग्वतेष्ठञ्"(पा.5-1-79)इत्यधिकारान्तर्गतेन "तेन निर्वृत्तम्" (पा 5-1-79) इति सूत्रेण ठञ् भवतु इति चेत् तथापि ठक् इति कथनमसङ्गतमेव। तथा च योगं लब्धुं योग्यः इत्यर्थे "तदर्हती"(पा. 5-1-63)ति आर्हीयष्ठक्। अथवा योगादागत इति विग्रहेण "तत आगत" (पा 4-3-74)इति शैषिकः ठक्। वस्तुतस्तु योगाय प्रभवति इति विग्रहे योगशब्दात् "योगाद्यच्च" (पा 5-1-102)इति सूत्रेण चकारेण विहितः ठञ् प्रत्ययः।" इति **तत्त्वदर्शिनी**।तथाच योगः अवयववृत्तिः। तद्योग्या यौगिकाः। तेषां सर्वेषां द्रव्यवाचकत्वमित्यर्थः। यदि च पचतीत्याख्यातस्थले मुख्यवृत्त्या भावनायाः बोधः लक्षणया कर्तृकर्मादिबोधः सामानाधिकरण्य-निर्वाहार्थं स्वीक्रियते तर्हि चित्रगुः पिङ्गाक्षी गोमानित्यादौ प्रधानषष्ठ्यर्थे एव अनुशासनेन षष्ठ्यर्थः तेषां वाच्योऽर्थः। अर्थात् सम्बन्धे एव शक्तिः, तत्र तदुत्तर-सुबाद्यर्थलिङ्गसंख्याद्यन्वयाभावात् तदर्थं लक्षणया द्रव्यवाचकत्वं चोपपद्यत इति द्रव्ये शक्तिबोधकमीमांसासिद्धान्तासङ्गतिः। तदेव उपपादयति – **पिङ्गाक्ष्यादि-यौगिकानामपि द्रव्यवाचित्वानापत्तेः** इति॥ **वैश्वदेवीति**॥ विश्वेदेवा देवता अस्येति

तथा च "अरुणया पिङ्गाक्ष्यैकहायन्या सोमं क्रीणाति" इति वाक्ये द्रव्यानुक्तेः आरुण्यस्य स्ववाक्योपात्तद्रव्ये एवान्वयप्रतिपादकारुणाधिकरणोच्छेदापत्तिः। द्रव्यवाचकत्वसाधकमूलयुक्तेः सामानाधिकरण्यस्योक्तरीत्योपपत्तेरिति प्रपञ्चितं विस्तरेण बृहद्वैयाकरणभूषणे।

विग्रहे विश्वेदेवशब्दात् अस्येति षष्ठ्यर्थे एव तद्धितानुशासनात्। कुत एतदित्यत आह - **अनेकमित्यादि**। ननु समस्यमानपदार्थसम्बन्धिन्येव बहुव्रीहेः "अनेकमन्यपदार्थे" (पा 2-2-24) इत्यनेनानुशासनात् विग्रहवाक्यात् यदुपसर्जनको वर्तिपदार्थः प्रतीयते स स्वाम्यादिरेवान्यपदार्थः। विग्रहवाक्य-वृत्तिवाक्ययोः विशेषणविशेष्यभाववैलक्षण्यमात्रकत्वात्। तथाच कुतो बहुव्रीहेः द्रव्यवाचित्वानापत्तिः इत्याशङ्कायाम् अनुपपत्तिमुपपादयति - **पिङ्गे अक्षिणी यस्याः विश्वेदेवा देवता अस्येति विग्रहदर्शनात्** इति॥ "अनेकमन्यपदार्थे"(पा. 2-2-24)"सास्य देवता" (पा. 4-2-24)इत्यनुशासनेन -शास्त्रेण - सूत्रेणेति यावत्। अनुशासनमिति करणे ल्युट्। पिङ्गे अक्षिणी यस्याः विश्वेदेवाः देवता अस्येति विग्रहप्रदर्शनपुरस्सरं प्रधानषष्ठ्यर्थे एव समासतद्धितविधानात् प्रधानषष्ठ्यर्थे एव साधुत्वलाभात्। अत्र द्वितीयः अनुशासनशब्दः भावल्युडन्तः। तस्य च विधानमिति वा साधुत्वमिति वा अर्थः। वाक्ये च षष्ठ्यन्तेन प्रकृत्यर्थोपसर्जनकः विभक्त्यर्थः सम्बन्ध एव प्रतीयते तत्रैव बहुव्रीहेः तद्धितान्तस्य च शक्तिबोधनादित्यर्थः। तथा च पिङ्गाक्ष्यादिपदानां द्रव्यवाचित्वानुपपत्या अरुणा-धिकरणसिद्धान्त एवासङ्गतः स्यात्।

2.4.6. अरुणाधिकरणविचारः

अरुणाधिकरणसिद्धान्तासङ्गतिमेव उपपादयति - **स्ववाक्योपात्तेत्यादिना**। तथा हि - "अरुणया पिङ्गाक्ष्यैकहायन्या सोमं क्रीणाति" इति श्रूयते। तत्र अरुणशब्दः गुणे शक्त इति अरुणं गुणं बोधयति। गुणवाचकानां गुणिवाचकत्वेऽपि "नागृहीत-विशेषणा विशिष्टबुद्धि"रिति न्यायेन आकृत्यधिकरणोक्तदिशा गुणे एव शक्तिः निश्चीयते। तदुत्तरतृतीयाविभक्तिः करणे विहिता इति तया आरुण्यरूपगुणस्य क्रयणसाधनत्वं प्रत्याय्यते। तच्चानुपपन्नम्। अमूर्ते गुणे क्रयणसाधनत्वासम्भवात् हिरण्यादिद्रव्ये एव तदुपपत्तेः। अतः क्रयणक्रियया अस्य अन्वयः उपपादयितुम् अशक्यः। उक्तं च –

"अमूर्तत्वात् गुणो नैव क्रियां साधयितुं क्षमः।

तस्मात् क्रीणातिना नास्य सम्भवत्येकवाक्यता॥" ।(शा.दी.3.1.6.12)

इति। ततश्च सोमक्रयणेन सह अस्य सम्बन्धः नास्ति। अत्र च "अरुणया" इति पृथक् वाक्यम्। पिङ्गाक्ष्यादि च वाक्यान्तरम्। अरुणशब्दोत्तरं श्रुतायाः तृतीयायाः वैयर्थ्यापत्त्या तया ज्योतिष्टोमप्रकरणगतगहचमसादीन् क्रियान्तरेषु करणत्वेनोपदिष्टान् अनूद्य आरुण्यरूपः गुणो विधेयः। तथा च "अरुणया" इति विभक्तस्य वाक्यस्य ज्योतिष्टोमप्रकरणे यद् येन द्रव्येण क्रियते तदरुणेन द्रव्येण इत्यर्थः। पिङ्गाक्ष्यादिवाक्यान्तरे तु पिङ्गाक्षी-एकहायनीशब्दयोः यौगिकत्वात् "सर्वत्र यौगिकैः शब्दैः द्रव्यमेवाभिधीयते" इति द्रव्यवाचकत्वाच्च क्रयणसाधनत्वमुपपन्नमिति तादृशगोव्यक्तेः क्रयणसाधनत्वमवगम्यते इति पूर्वपक्षः।

तत्रायं सिद्धान्तः - "अर्थैकत्वे द्रव्यगुणयोः एककर्म्यात् नियमः स्यात्" (मी 3-1-6-12) इति। द्रव्यगुणयोः अर्थस्य प्रयोजनस्य एकक्रियान्वयित्वरूपस्य एकत्वे-समानत्वे संभवति तयोः नियमः परिच्छेद्यपरिच्छेदकभावेनान्वयनियमः। तत्र हेतुमाह - ऐककर्म्यात् इति। एकार्थप्रतिपादकत्वरूपैकवाक्यत्वात्। अयं भावः-अरुणयेति वाक्येन भावार्थाधिकरणोक्तदिशा विधिवाक्येषु क्रियायाः एव प्राधान्येन क्रयः विधीयते। तस्मिंश्च क्रये तृतीयाश्रुत्या यथा पिङ्गक्ष्यादेः करणत्वं तथा आरुण्यस्याप्यवगतम्। करणं हि कारकम्। कारकाणां च साक्षात् क्रियान्वय-नियमेन आरुण्यं पिङ्गाक्ष्यादिद्रव्यमनपेक्ष्य साक्षात् क्रयणक्रियायां करणत्वेनान्वेति। तथैव पिङ्गाक्ष्यादयोऽपि। खलेकपोतन्यायेन सर्वेषां कारकाणां साक्षात्क्रिया-न्वयात्। उक्तं च तन्त्रवार्तिके भट्टपादैः -

"कारकं ह्युच्यते कुर्वन्नाक्रियां तत्करोति च।

तस्मान्न द्रव्यसम्बन्धः कारकस्यास्ति कस्यचित्॥"(मी.3-1-6-12)

इति। अस्य अयमर्थः - क्रियां कुर्वन्नेव कारकमित्युच्यते। तच्च कारकम् अक्रियाम् - क्रियाभिन्नद्रव्यादिकं न करोति - न जनयति। तस्मात् - तस्य कारकस्य द्रव्य-जनकत्वाभावात् कस्यापि कारकस्य द्रव्यसम्बन्धो नास्त्येव। यद् यज्जनकं तत्तेन सम्बध्यते इति न्यायात्। तथा च "अरुणये"ति वाक्येन क्रयणसाधनत्वेन बोधितानि त्रीणि - आरुण्यगुणः पिङ्गाक्षीद्रव्यं एकहायनीद्रव्यम् च खलेकपोत-न्यायेन (यथा सर्वे कपोताः युगपदेव खले पतन्ति उत्पतन्ति च तथा) युगपदेव

क्रियान्वयं प्राप्नुवन्ति। तत्र यदि कस्यचित् अमूर्तत्वादिना साक्षात्क्रयणसाधनत्वं न सम्भवतीति विभाव्यते तर्हि क्रयसाधनद्रव्यपरिच्छेदद्वारा तस्यान्वयो भवतु। तदुक्तं शास्त्रदीपिकायां -

"तृतीयया गुणस्यैव करणत्वं क्रयं प्रति।
विस्पष्टं गम्यते तत्र द्रव्यद्वारेण युज्यते॥ (शा.दी.3-1-6-12)

तन्त्रवार्तिके च –

द्रव्येण साधनीयेयमिति ज्ञाता यदा क्रिया।
कीदृशेनेत्यपेक्षास्य गुणेप्युत्पद्यते तदा ॥" इति। (मी.3-1-6-12)

यत्र गुणस्य क्रयं प्रति करणत्वं तृतीयाश्रुत्या विस्पष्टं प्रतिपाद्यते तत्र तस्य गुणस्य तस्यां क्रियायां साक्षात् करणत्वेनान्वयानुपपत्त्या तत्क्रयणक्रियासाधनत्वेनावगत-द्रव्यद्वारा अन्वयः भवति। कुतः? यदा कस्यचिद्द्रव्यस्य क्रियां प्रति साधनत्वमव-गतं तदा कीदृशेन द्रव्येणेति जिज्ञासायाः जायमानत्वात्। तस्याश्च गुण-विषयकत्वात्। एतदेवोपादितं तत्र -"द्रव्यमपि अपरिच्छिन्नं क्रियां साधयितुं नाल-मिति परिच्छेदकमपेक्षते। गुणश्च साधनत्वेनोच्यमानः तां च स्वतः साधयितु-मक्षमः तदर्थं परिच्छेद्यं द्रव्यमपेक्षते इति द्रव्यगुणयोः परस्परापेक्षित्वात् सुनिरूपितः पार्ष्णिकः परिच्छेद्यपरिच्छेदकभावेनान्वयः। युक्तं च गुणस्य तत्परिच्छेदकत्वात् क्रियासाधनत्वाभिधानम्। एवं च साधनत्वेन गुणं विदधती श्रुतिः यथैतेन शक्यते क्रियां साधयितुं तथा कुर्यात्इत्याह। स च द्रव्यपरिच्छेदेनैव शक्नोति साधयितुं नान्यथा। तथा अरुणपरिच्छिन्नेन पिङ्गाक्षीद्रव्येण क्रयं कुर्यादित्यर्थस्य पर्यवसानेन वाक्यभेदाभावेन न ज्योतिष्टोमप्रकरणगतचमसादिषु गुणो निविशते। किञ्च प्रकरणेन चमसादिषु गुणनिवेशं वदता वक्तव्यमिदं केन तत्र गुणो विधीयते इति। ततश्च आरुण्यगुणः स्ववाक्योपात्तपिङ्गाक्षीमेव क्रयहेतुं भजते। न तु वाक्यान्तरोपात्तहिरण्यादि। ततश्च पिङ्गाक्षीद्रव्यद्वारा आरुण्यस्य क्रयणसाधनत्वमिति सिद्धान्तः।

अथेदानीमत्र पूर्वपक्षस्य पिङ्गाक्षीद्रव्यद्वारा क्रयसाधनत्वमिति सिद्धान्तस्य च असङ्गतिः। तथा हि - प्रकृते पिङ्गाक्ष्यादिपदानां मतुबर्थे बहुव्रीहिसमासविधानात् मतुपश्च "तदस्यास्त्यस्मिन्निति मतुप्"(पा. 5-2-94) इति सूत्रेण षष्ठ्यर्थे विधानेन सम्बन्धस्य प्रत्ययार्थत्वात् बहुव्रीहावपि पिङ्गे अक्षिणी यस्याः इति विग्रहेण

प्रत्ययार्थसम्बन्धप्राधान्यबोधनात् पिङ्गाक्षिसम्बन्ध एव पिङ्गक्षीशब्दार्थो भवति। न तु तद्युक्तं द्रव्यम्। उक्तं चात्रैव तन्त्रवार्तिके -

"बहुव्रीहिः समासोऽयं मतुबर्थे विधीयते।
अस्यात्रेति च सम्बन्धे मत्वर्थीयः प्रवर्तते॥
यस्मिन्नन्यपदार्थे च बहुव्रीहिर्विधीयते।
तत्रापि प्रत्ययार्थत्वात् सम्बन्धस्य प्रधानता॥" इति। (मी.3-1-6-12)

तथा च पिङ्गाक्ष्यादिबहुव्रीहेः सम्बन्धे एव शक्तिः न तु सम्बन्धिनि। सम्बन्धिप्रतीतिस्तु लक्षणादिना। तथा च पिङ्गाक्ष्यादीनां द्रव्यवाचकत्वाभावात् स्ववाक्योपात्तपिङ्गाक्ष्यादिद्रव्यद्वारा क्रयान्वय इति सिद्धान्तस्य असङ्गतिः। किञ्चास्मिन् वाक्ये द्रव्यवाचकस्यैवाभावात् वाक्यान्तरोपात्तवासोहिरण्यादिष्वेव क्रयकरणेषु परिच्छेदकत्वेन आरुण्यगुणस्य अन्वयापत्तिश्च।

किञ्च पूर्वपक्षोऽपि न घटते। पिङ्गाक्ष्येकहायनीशब्दयोरपि सम्बन्धवाचकत्वेन सम्बन्धस्य च आरुण्यगुणवदमूर्तत्वात् क्रयकरणत्वासम्भवेन कस्यापि क्रयकरणत्वस्य एतद्वाक्यादेवालाभेन आरुण्यगुणमात्रे क्रयणाङ्गत्वानुपपत्त्युद्भावनस्य अनौचित्यात्। एवञ्चैतदधिकरणं सर्वथा अनुपपन्नं स्यात्। यदि च पिङ्गाक्ष्यादिषु लक्षणालब्धद्रव्यवाचित्वमाश्रित्य सिद्धान्तपूर्वपक्षयोः समन्वयः क्रियते तर्हि अरुण -शब्देऽपि लक्षणया तद्युक्तद्रव्यवाचित्वं वक्तुं शक्यमिति क्रये करणत्वेनान्वयानुपपत्तेरेवाभावेन तच्छङ्कासमाधानयोः निर्दलत्वापत्तिः। उक्तं च पार्थसारथिमिश्रैः "श्रौतस्यैव गुणस्यैकवाक्यत्वे सम्भवति लक्षणा वाक्यभेदश्च न युज्येते इति क्रियार्थत्वे च तदीयद्रव्ये एव निवेश" इति।

एवं "सास्य देवता" (पा. 4-2-24)इति सूत्रेण विश्वेदेवशब्दात् "विश्वेदेवा देवता अस्य" इति षष्ठ्यर्थे एव तद्धितप्रत्ययविधानात् "वैश्वदेवी"त्यादितद्धितान्तानामपि सम्बन्धवाचित्वापत्तौ

"आमिक्षां देवतायुक्तां वदत्येवैष तद्धितः।
आमिक्षापदसान्निध्यात् तस्यैव विषयार्पणम्॥"(मी.2-2-9-23)

इति भाट्टसिद्धान्तविरोधः। तन्मूलकगुणाधिकरणोच्छेदश्च स्यात्। तथा हि - "तप्ते पयसि दध्यानयति सा वैश्वदेव्यामिक्षा वाजिभ्यो वाजिनम्" इति वाक्येन प्रक्रान्ते वैश्वदेवयागे "वाजः आमिक्षारूपमन्नमस्ति येषामि"ति व्युत्पत्त्या "अत

इनिठनौ"(पा. 5-2-115) इति वाजशब्दात् मत्वर्थीयेन इनिप्रत्ययेन सिद्धः वाजिशब्दः विश्वेदेवान् बोधयतीति तान् उद्दिश्य वाजिनरूपः गुणः विधीयते "वैश्वदेव्यामिक्षा" इति वाक्येन च आमिक्षारूपः गुणः विधीयते इति प्रकान्ते वैश्वदेवे एव आमिक्षावाजिनरूपगुणद्वयविधानम् इति पूर्वपक्षः। सिद्धान्तस्तु "वैश्वदेव्यामिक्षा" इति वैश्वदेवीतितद्धितान्तेन आमिक्षायाः विश्वेदेवसम्बन्धः श्रौतः "वाजिभ्यो वाजिनम्" इति वाजिनसम्बन्धस्तु वाक्यीयः। ततश्च श्रौतेन आमिक्षारूपगुणविधानेन आकाङ्क्षायाः शान्त्या वाजिनरूपगुणविधानं न प्रक्रान्ते वैश्वदेवयागे किन्तु वाजिरूपापूर्वदेवतामुद्दिश्य वाजिनरूपकर्मान्तरविधानमिति । अत्र च "वैश्वदेवी"शब्दः विश्वेदेवदेवताकद्रव्यवाचकः। तद्द्रव्यं किमित्याकाङ्क्षा आमिक्षाशब्देन पूरितेति अत्र न गुणान्तरविधानम् इति सिद्धान्तः। अत्र तद्धितस्य प्रधानषष्ठ्यर्थे एव विधानात् तद्धितान्तस्य सम्बन्धबोधकत्वात् द्रव्यवाचकत्वा-भावात् सिद्धान्तासङ्गतिः स्यादित्यर्थः। तथा च चित्रगुः देवदत्तः पिङ्गाक्षी गौः वैश्वदेवी आमिक्षा इत्यादि सामानाधिकरण्यानुरोधात् बहुव्रीहौ तद्धितान्तेषु च द्रव्यवाचित्वं स्वीकरणीयम्। "सर्वत्र यौगिकैः शब्दैः द्रव्यमेवाभिधीयते" इत्यस्य च इदमेव तात्पर्यम्। तादृशं सामानाधिकरण्यं "देवदत्तः पचती"त्यत्रापि अस्तीति तदनुरोधात् आख्यातस्य कर्तृकर्मवाचित्वमवश्यमङ्गीकरणीयमिति भावः। ॥**बृहद्वैयाकरणभूषणे** इति॥ धात्वर्थनिरूपणे समासशक्तिनिरूपणे च। मीमांसा-वार्तिककारैः यौगिकेषु सम्बन्धवाचकत्वे अतिगौरवं स्यादिति लाघवात् द्रव्यवाचकत्वमुक्तम्। सम्बन्धस्य द्विनिष्ठत्वात् एकस्य आश्रयस्य प्रातिपदिका-र्थत्वेऽपि अन्यस्यापि अभिधानावश्यकत्वेन अतिगौरवम्। अतः द्रव्यमेव मतुबादि -वाच्यमिति तेषामाशयः । एतच्च न युक्तम् इति सयुक्ति निरूपितं बृहद्वैयाकरण-भूषणे इति तत्सर्वं जिज्ञासुभिः तत एवावगन्तव्यम्।

ननु "लः कर्मणि" (पा. 3-4-69) "तिप्तस्झि" (पा. 3-4-78) "द्व्येकयो-र्द्विवचनैकवचने" (पा. 1-4-22), "बहुषु बहुवचनम्" (पा. 1-4-21) इत्येतेषां सूत्राणाम् एकवाक्यतया कर्त्रादिगत-एकत्वादौ लकारस्य स्थाने एकवचनादिसंज्ञकास्तिबादयो भवन्तीति वाक्यार्थपर्यवसानात् एकत्वादिसंख्याया एव वाच्यत्वमनुशासनेनानुशिष्यते न तु कर्तृकर्मणोः। मीमांसाभाष्यकारैः शबर-

तिङ इति। बोधकतारूपा शक्तिस्तिङ्क्ष्वेवेत्यभिप्रेत्येदम्।

2.5 वाक्ये भावनायाः एव मुख्यविशेष्यत्वम्

पदार्थं निरूप्य वाक्यार्थं निरूपयति फलेत्यादि। विक्लित्त्यादिफलं प्रति।

स्वामिभिरपि अयं विषयः प्रतिपादित इति चेदुच्यते - एकवचनादिसंज्ञायाः आदेश -(तिङ्)निष्ठतया "तिप्तस्झि"(पा. 3-4-78) इति सूत्रेणैव "द्व्येकयोः"(पा. 1-4-22) "बहुषु बहुवचनम्"(पा. 1-4-21) इत्यनयोरेकवाक्यता न तु "लः कर्मणी" (पा. 3-4-69) त्यनेनापि। तत्र च सूत्रत्रये न कर्तरीत्यादिकमस्ति। अतःकर्त्रादिगत-एकत्वादौ इत्यादि-उक्तार्थत्वं न सम्भवति। लविधितिबादिविध्योस्तु न पदैकवाक्यता। किन्तु वाक्यैकवाक्यता। लविधिलभ्यलकारानुवादेन आदेशविधेः प्रवृत्तेः। स च एकवचनादिसंज्ञाविनिर्मुक्त एव। तस्मात् "लः कर्मणि" (पा. 3-4-69) इत्यनेनादौ वाक्यार्थबोधने कृते सत्येव अन्येन एकवाक्यता। तेन च कर्त्रादिकमर्थमुपादाय तत्र लकारस्य विधानात् कर्तृकर्मणोः वाच्यत्वं दुष्परिहरमेव। ननु "वर्तमाने लट्" (पा 3-2-123) इत्यादिना विहितलकार-मुद्दिश्य उक्तरीत्या पदैकवाक्यतासम्भव इति चेन्न। "लः कर्मणि"(पा. 3-4-69) "वर्तमाने लट्"(पा 3-2-123) इत्यनयोः पदैकवाक्यतायाः अभावात्। "सुपां कर्मादयोऽप्यर्था संख्या चैव तथा तिङाम्" इति वार्तिककारवचनमनुसृत्य पदैकवाक्यतायामपि कर्तृकर्माद्यर्थकत्वस्य अवश्य -मङ्गीकर्तव्यत्वात्। तदेतत् सर्वं मनसिकृत्याह - **आश्रयेत्विति। तिङः इति।** ननु "लः कर्मणी"(पा. 3-4-69)ति सूत्रेण कर्तृकर्मार्थकत्वं लकारस्य बोधितं न तिङः इति "आश्रये तिङः" इत्यादि असङ्गतमिति चेन्न। "उच्चारित एव प्रत्यायको नानुच्चारित" इति भाष्यात् तिङामेव उच्चारित्वेन तैरेव लोके कर्तृकर्माद्यर्थानुभवेन च वास्तविकं बोधकत्वं तिङामेव। तेषां च सा शक्तिः तत्स्थानित्वेन कल्पिते लकारे अध्यारोप्य लकाराः कर्तरि कर्मणि च विधीयन्ते। तथा च स्थान्यर्थाभिधान -समर्थस्यैवादेशत्वमिति न्यायेन आदेशभूततिङ्क्षु तद्बोधकत्वं पर्यवस्यति इति भावः।

2.5.1. पदार्थं निरूप्य इत्यादि मूले व्याख्यातॄणां चिन्तनस्य विमर्शः

वाक्यार्थज्ञाने पदज्ञानस्य पदार्थज्ञानस्य च कारणत्वात् वाक्यार्थज्ञानकारणीभूत-पदार्थज्ञानं निरूप्य तत्कार्यरूपवाक्यार्थं प्रसङ्गसङ्गत्या निरूपयति - **फले प्रधानमि-त्यादि।** अत्र च पदार्थज्ञानवाक्यार्थज्ञानयोः कार्यकारणभावेन कारणज्ञाने कार्यस्य

स्मृतिरूपा प्रसङ्गसङ्गतिः दर्शिता। सा च स्मृतत्वे सति उपेक्षानर्हत्वरूपा इति **सुबोधिनी** । पदार्थवाक्यार्थयोरुपजीव्योपजीवकभावसङ्गतिर्ध्वनिता । अथवा निरूपणयोरेवोपोद्घातसङ्गतिरनेनोच्यते इति **परीक्षा**। उपजीव्योपजीवकभावसङ्गति -रिति **प्रभा**। **दर्पणे** तु - पदार्थतत्संसर्गविशेषरूपवाक्यार्थयोः प्रसङ्गसङ्गतिः। तथा हि - निरूपितेषु पदार्थेषु प्रायशोऽसंसृष्टपदार्थाभावेन तत्संसर्गस्य सामान्यरूपेण स्मरणम्। ततः सामान्यधर्मप्रकारकज्ञानस्य विशेषधर्मप्रकारकजिज्ञासा-जनकत्वात् शिष्यस्य "क एषां संसर्गः" इत्याकारा विशेषजिज्ञासा। तज्जिज्ञासा-निवृत्तिफलकं विशेषसंसर्गरूपवाक्यार्थाभिधानमिति। एवं च संसर्गगत–सामान्यस्योपेक्षानर्हत्वात् प्रसङ्गसङ्गतिः इति सम्यक् निरूपितम्। प्रकृतसिद्ध्य-नुकूलचिन्ताकालावच्छिन्नप्रकृतानुकूलत्वम् उपोद्घातः। अत्र प्रकृतः वैयाकरण -सिद्धान्तः।तत्सिद्ध्यनुकूलचिन्ताकाले एव अनयोः द्वयोः निरूपणयोः अपेक्षितत्वेन तदनुकूलत्वमनयोरिति तत्र एकनिरूपणानन्तरमन्यनिरूपणमिति उपोद्घातसङ्गतिः इति परीक्षायाः आशयः। द्वयोः प्रथमं पदार्थज्ञानस्य निरूपणम् ततः वाक्यार्थ -निरूपणमिति क्रमे उपजीव्योपजीवकभावः हेतुरित्यर्थः।

फले इति सप्तम्याः निरूपित्वमर्थः। एवं च फलनिरूपितप्राधान्यवान् व्यापार इत्यर्थः। एतच्च कर्मकृद्भिन्नप्रत्ययसमभिव्याहारे । अथवा अत्र प्रकरणे धात्वाख्यातयो-रेव विषयभूतत्वात् आख्यात(तिङ्) समभिव्याहारे इति शेषः। तथा च तद्धात्वर्थफलप्रकारकशाब्दबोधं प्रति तिङ्समभिव्याहारे विशेष्यतया तद्धात्वर्थ-व्यापारोपस्थितिः कारणमिति कार्यकारणभावः फलितः। कृत्प्रत्ययस्थले तु "प्रकृतिप्रत्ययार्थयोः प्रत्ययार्थः प्रधानमि"ति न्यायेन विशेष्यभूततत्तत्कृत्प्रत्यया-र्थमाश्रित्य फलव्यापारयोः विशेष्यविशेषणभावनिर्णय इत्यर्थः। तथा च कर्मकृदन्ते पक्व इत्यादौ व्यापारविशेषणकफलविशेष्यको बोधः। एतदर्थमेव फलव्यापारयोः पृथक् शक्तिः उक्ता।

2.5.2. फले प्रधानं व्यापारः इत्यत्र तन्त्रनिर्देश इति व्याख्यायाः विमर्शः

"अत्र मूले फले प्रधानमिति तन्त्रेण निर्देशः। एकस्य फलनिरूपितप्राधान्यवान् व्यापार इत्यर्थः। अन्यस्य तु फलेऽप्रधानमिति योजनया फल निरूपिताऽप्राधान्य -वान् व्यापार इत्यर्थः। इदं च कर्मकृदन्तस्थले। अतः उभयमपि मूलाल्लभ्यत इति मञ्जूषाव्याख्यायां कलायामुक्तमि"ति **तत्त्वदर्शिनी**। नेदं हृदयङ्गमम्।

2.6 तिङर्थानाम् , तेषां विशेषणत्वेन अन्वयस्य च प्रतिपादनम्

तिङर्थः कर्तृ-कर्म-संख्या-कालाः। तत्र कर्तृकर्मणी फलव्यापारयोर्विशेषणे।

2.7 तिङर्थसंख्यायाः कुत्रान्वय इति निर्धारणम्

संख्या कर्तृप्रत्यये कर्तरि, कर्मप्रत्यये कर्मणि समानप्रत्ययोपात्तत्वात्। तथा च आख्यातार्थसंख्याप्रकारबोधं प्रति आख्यातजन्यकर्तृकर्मोपस्थितिर्हेतुरिति कार्यकारणभावः फलितः।

धात्वर्थं निरूप्य तिङर्थं निरूपयति - **तिङर्थ** इति। "आश्रये तु तिङः स्मृताः" इति मूलस्य व्याख्यां करोति - **तिङर्थ** इति। "लः कर्मणि च भावे चाकर्मकेभ्यः" (पा. 3-4-69) इति सूत्रेण कर्तृकर्मणोः "वर्तमाने लट्" (पा. 3-2-123)इत्यादिभिः कालस्य "द्व्येकयोः द्विवचनैकवचने" (पा. 1-4-22)"बहुषु बहुवचनम्"(पा. 1-4-21) इत्याभ्यां "तिप्तसझी"(पा. 3-4-78) त्यादिसूत्रैकवाक्यतापन्नाभ्यां संख्यायाश्च तिङर्थत्वं सिद्ध्यति। कालः संख्या कर्तृकर्मरूपं कारकं च तिङर्थ इति फलति। यद्यपि भावस्यापि तिङर्थत्वं "लः कर्मणी"(पा. 3-4-69)त्यनेन बोधितं तथापि स धात्वर्थ एवेति तत्र तिङः धात्वर्थऽनुवादकत्वात् स च अर्थः पृथक् नोक्तः। वैयाकरणमते सर्वस्यापि तिङर्थस्य विशेषणत्वमेव। तदुक्तं मूले - **"तिङर्थस्तु विशेषणम्"** इति। तथा च कः कस्य विशेषणमिति ज्ञातव्यमिति तदेव निरूपयति - **कर्तृकर्मणी फलव्यापारयोरित्यादिना**। व्यापाराश्रयः कर्ता। फलाश्रयः कर्म। तत्र फलव्यापारयोः धात्वर्थत्वात् तयोराश्रयभूतकर्तृकर्मणोः ताभ्यामेवान्वयः युक्त इति कर्ता धात्वर्थव्यापारे कर्म च धात्वर्थफले च विशेषणमित्यर्थः।

2.7.1. संख्याया अन्वये भूषणकृन्मतस्य नागेशमतस्य च प्रतिपादनम् , विमर्शश्च

तिङर्थसंख्यायाः कुत्रान्वय इति चेदाह - **संख्येति**॥ कर्तृवाचकतिङि कर्तरि विशेषणम् कर्मवाचकतिङि कर्मणि विशेषणम्। तत्र हेतुमाह – **समानप्रत्ययोपात्तत्वादिति**। समानाभिधानश्रुत्येत्यर्थः। तथा च यद्यपि प्रकृत्युपस्थापितत्वेन धात्वर्थः सन्निहितः, प्रत्ययानां स्वप्रकृत्यर्थान्वितस्वार्थबोधकत्वनियमोऽपि, तथापि समानप्रत्ययोपात्तं कारकं सन्निहिततरमिति तत्रैवान्वयः इति भावः। अत्र च शब्दान्तराननुसन्धानप्रयुक्तं लाघवमिति **कान्तिः**। किञ्च "तिप्तस्झि"(पा. 3-4-78)"द्वयेक्योः"(पा. 1-4-22) इत्यादेः पदैकवाक्यतयान्वयेन "लःकर्मणी"(पा. 3-4-69)ति सूत्रलब्धलकारार्थभूतकर्तृकर्मानुवादेन एकत्वादिविशिष्टकर्त्रादौ

तिबादिविधानमपि प्रमाणम्। "प्रतिपदिकार्थ"(पा. 2-3-46)सूत्रे अनभिहित-सूत्रानुवृत्तौ अनुवृत्तं तत् संख्याया एव विशेषणं स्यात् अन्यस्यासम्भवात्। अत्र च पचत्योदनं देवदत्त इत्यादौ प्रथमा न स्यात् तिङोक्तत्वादेकत्वादीनामिति "अनभिहिते"(पा. 2-3-1) इति सूत्रस्थं भाष्यमपि मानम्। संख्यायाः धात्वर्थेऽ-न्वये तु प्रथमायाः अभिहितकारकविभक्तौ विधानात् तद्गतसंख्यायाः अनभिधानाच्च प्रथमानापत्त्यापादनमसङ्गतं स्यात्। "कर्तुरेकत्वं तिङाभिहितमिति प्रथमा न स्यात्" तत्र कैयटः। "साधनापेक्षं पचत इत्यादौ द्विवचनम्" इति "स्वं रूपम्" (पा. 1-1-68) सूत्रस्थं भाष्यमपि प्रमाणम्। क्रियायामनारोपित-द्वित्वाद्यसंभवात्। अत एव "तिबन्तं चापि किञ्चित् विभक्त्यर्थप्रधानं किञ्चित् क्रियाप्रधानं "काण्डे कुड्ये इति विभक्त्यर्थप्रधानं, रमते ब्राह्मणकुलमि"ति क्रियाप्रधानम्। न चैतयोरर्थयोः लिङ्गसंख्याभ्यां योग" इति "ह्रस्वो नपुंसके प्रातिपदिकस्ये"(पा. 1-2-47)ति सूत्रस्थं भाष्यं सङ्गच्छते। तिङ्सुपोः प्रत्याहारः तिप्। तिबन्तमित्यस्य तिङन्तं सुबन्तं चेत्यर्थः। अत्र काण्डे कुड्ये इत्यत्र विभक्त्यर्थसंख्या प्रधानतया भासते इति तस्यां पुनः लिङ्गसंख्यान्वययोग्यता नास्ति। "रमते" इति तिङन्तेऽपि प्रधानभूतक्रियायाः असत्त्वभूतत्वात् तत्र लिङ्ग-संख्ययोः अनन्वय एव। अनेन च धात्वर्थभूतायाः असत्त्वभूतक्रियायाः लिङ्ग-संख्याभ्यामन्वयाभावः सुस्पष्ट इति तिङर्थसंख्यायाः तिङर्थकर्तृकर्मणोरेवान्वयः सिद्ध्यति। यद्यपीदं भाष्यं क्रियायाः संख्यान्वयायोगप्रतिपादकं न, किन्तु लिङ्गमात्रान्वयायोगप्रतिपादकं, काण्डे इति सुबन्ते तु उभयान्वयायोग-प्रतिपादकम्। तथा च धात्वर्थक्रियायाम् संख्यान्वयोऽस्त्येव। अत एव हत-शायिका शय्यन्ते इति भावे बहुवचनोपपत्तिरिति नागेशेन क्रियायामेव साधनगत -संख्यारोपेण संख्यान्वयोऽभ्युपगतः। तथापि कौण्डभट्टस्तु क्रियायां संख्यान्वयं नाभ्युपगच्छत्येव। भावे औत्सर्गिकमेकवचनमित्येव तस्याशयः। हतशायिकाः इत्यत्र भाष्यप्रयोगादेव बहुवचनमिति तस्याशयः। एतच्च वैयाकरणसिद्धान्तभूषणे स्पष्टम्। किञ्च मीमांसकैः नैयायिकैश्च तिङर्थसंख्यायाः साधने एवान्वयोऽ-भ्युपगतः न क्रियायाम्। मीमांसकैस्तु आख्यातनिरूढलक्ष्ये कारके संख्यान्वयोऽ -भ्युपगतः नैयायिकैस्तु पदान्तरोपस्थाप्ये। तथा च समानप्रत्ययोपात्तत्व-प्रत्यासत्त्या आख्यातार्थसंख्यायाः तदर्थान्तरे आश्रये एवान्वयः इति कौण्डभट्टस्य

2.8. तत्र नैयायिकमतनिरासः

नैयायिकादीनामाख्यातार्थसंख्यायाः प्रथमान्तार्थे एवान्वयादाख्यातार्थसंख्याप्रकारकबोधे प्रथमान्तपदजन्योपस्थितिर्हेतुरिति कार्यकारणभावो वाच्यः। सोऽपि "चन्द्र इव मुखं दृश्यते, देवदत्तो भुक्त्वा व्रजति" इत्यादौ चन्द्रक्त्वार्थयोः आख्यातार्थानन्वयात् इतरविशेषणत्वघटित इत्यतिगौरवम्। इदमपि कर्तृकर्मणोराख्यातार्थत्वे मानमिति स्पष्टं बृहद्भूषणे।

मतम्। यद्यपि अत्र नागेशस्य अभिप्रायभेदोऽस्ति अथापि स न ग्रन्थकृदभिमत इति नात्रोल्लिख्यते। तज्जिज्ञासुभिः लघुमञ्जूषायां धात्वख्यातार्थनिर्णयः द्रष्टव्यः। **काशिकायामपि** "परे तु" इत्यादिना नागेशाभिप्रायः सम्यक् विवृतः।

2.7.2. **संख्याया विशेषणतया अन्वयस्वीकारेण सिद्धस्य कार्यकारणभावस्य प्रदर्शनम्**

एवम् आख्यातार्थसंख्यायाः आख्यातार्थकर्तृकर्मणोः विशेषणतया अन्वयस्वीकारेण यः कार्यकारणभावः फलितः तं निरूपयति - **तथाचेति**। "आख्यातार्थसंख्याप्रकारकबोधं प्रति आख्यातप्रत्ययजन्यकर्तृकर्मोपस्थितिः हेतुः" इति । आख्यातार्थसंख्यानिष्ठप्रकारतानिरूपितविशेष्यतासम्बन्धेन शाब्दबोधं प्रति आख्यातजन्यकर्तृकर्मान्यतरविषयिणी उपस्थितिः हेतुः इति कार्यकारणभावः सिद्धः। प्राचीनमीमांसकनां मते भावनाक्षिप्तकर्तृकर्मणोः संख्यान्वयस्वीकारात् "आख्यातार्थसंख्याप्रकारकबोधं प्रति आख्यातार्थभावनाक्षिप्तकर्तृकर्मोपस्थितिः हेतुः" इति, नव्यमीमांसकानां मते "आख्यातार्थसंख्याप्रकारकबोधं प्रति आख्यातनिरूढलक्ष्यकर्तृकर्मोपस्थितिर्हेतु"रिति, नैयायिकानां मते कर्तृकर्मणो राख्यातार्थत्वाभावात् कृतेरेव तदर्थत्वाच्च कृत्याश्रये एव संख्यान्वयस्वीकारात् "आख्यातार्थसंख्याप्रकारकबोधं प्रति आख्यातार्थकृत्यन्वययोग्यप्रथमान्तपदजन्योपस्थितिः कारणम्" इति कार्यकारणभावाः ऊह्याः। सर्वेष्वपि प्रदर्शितेषु कार्यकारणभावेषु वैयाकरणानां मते एव लाघवं सुस्पष्टम्। मीमांसकानां तत्पदशक्त्योपस्थापितस्यार्थस्य तत्पदलक्ष्यार्थे अन्वयस्वीकाररूपं गौरवं वृत्तिद्वयाङ्गीकाररूपं गौरवं चास्ति। नैयायिकानां मते तु महद्गौरवम्। प्रत्ययार्थस्य स्वार्थं प्रकृत्यर्थं च परित्यज्य पदान्तरार्थेऽन्वयस्वीकारात्। तदेव निरूपयति– **नैयायिकादीनामित्यादिना**॥ अत्र आदिपदेन प्राभाकरसङ्ग्रहः। तैरपि देवदत्तः

पचतीत्यादौ आख्यातार्थसंख्यायाः प्रथमान्तार्थे एवान्वयस्वीकारात्। **अतिगौरवमिति** ॥ आख्यातार्थसंख्यायाः समानप्रत्ययार्थं प्रकृत्यर्थभूतधात्वर्थं च परित्यज्य पदान्तरार्थे विशेषणत्वेन अन्वयः इति गौरवम्। तत्रापि आख्यातार्थसंख्याप्रकारकबोधं प्रति प्रथमान्तपदजन्योपस्थितिः कारणमिति गुरुभूतकार्यकारणभावस्वीकारेऽपि "चन्द्र इव मुखं दृश्यते" "देवदत्तः भुक्त्वा व्रजती"त्यादौ इवार्थविशेषणीभूतप्रथमान्तोपस्थाप्यचन्द्रे भुक्त्वा इति क्त्वान्तोपस्थाप्यभुजिक्रियायां च (क्त्वान्तस्याव्ययत्वेऽपि कृदन्तत्वेन प्रातिपदिकसंज्ञायाम् औत्सर्गिकप्रथमैकवचनान्तत्वेन प्रथमान्तत्वमित्यर्थः) अन्वयापत्तिः चन्द्रक्त्वान्तयोरपि प्रथमान्तत्वात्। नचेष्टापत्तिः। "चन्द्र इव मुखे दृश्येते" इत्यत्र चन्द्रस्यैकत्वेन द्वित्वान्वयासम्भवात्। अतः "अन्यार्थनिष्ठविशेष्यतानिरूपितप्रकारतानाश्रयत्वेन प्रथमान्तपदजन्योपस्थितिः कारणम्" इति वक्तव्यम्। अत्र चन्द्रक्त्वार्थयोः इवार्थव्रजननिष्ठविशेष्यतानिरूपितप्रकारताश्रयत्वात् न दोषः।तथा च कार्यकारणभावशरीरान्तर्गतप्रथमान्तपदजन्योपस्थितौ अन्यार्थनिष्ठविशेष्यतानिरूपितप्रकारतानाश्रयत्वरूपं विशेषणं देयमिति कार्यकारणभाव एव अतिगुरुः सम्पन्न इत्यर्थः। इतराविशेषणत्वं – अन्यार्थनिष्ठविशेष्यतानिरूपितप्रकारतानाश्रयत्वम्, अन्यार्थनिष्ठविशेष्यतानिरूपितप्रकारताश्रयत्वेन तात्पर्याविषयार्थत्वमिति यावत्। तथा च "चैत्र इव पचती"त्यादौ खले कपोतन्यायेन बोधे चैत्रस्य इतरनिरूपितप्रकारताशून्यत्वरूपेतराविशेषणत्वसत्त्वेऽपि न क्षतिः, तस्मिन् तादृशतात्पर्याविषयत्वस्य सत्त्वात् इति **दर्पणः**।

किञ्चैवमितराविशेषणीभूतप्रथमान्तपदजन्योपस्थितेः कारणत्वस्वीकारेऽपि "चैत्र मैत्रो ग्रामं गच्छती"त्यत्र सम्बुद्ध्यन्तोपस्थाप्यचैत्रे संख्यान्वयापत्तिः। तदर्थं सम्बुद्ध्यन्तभिन्नत्वरूपं विशेषणं दीयते चेत् "चैत्र गामानय" इत्यादौ चैत्रे सम्बुद्ध्यन्ते संख्यान्वयानुपपत्तिः। तत्र त्वं पदमध्याहृत्य त्वं पदार्थे संख्यान्वये तु "भो ब्राह्मणाः। त्वं पचे"तिप्रयोगापत्तिः। आख्यातार्थस्य सम्बुद्ध्यन्तेन सह अन्वयाभावात्। अथ तादृशप्रयोगवारणाय युष्मदर्थककर्तृसम्बुद्ध्योःएकसंख्याकत्वनियमकल्पने गौरवम्। व्युत्पत्यन्तरकल्पनापत्तेः। किं च "चैत्र एव पचती"त्यादौ एवकारसमभिव्याहारे तदर्थान्ययोगव्यवच्छेदैकदेशभेदविशेषणीभूते चैत्रादौ संख्यान्वयानुपपत्तिः। तदर्थम् अन्यस्मिन् एवकारार्थभिन्नत्वरूपविशेषणे त्वति –

2.9 तिङर्थस्य कालस्य व्यापारविशेषणत्वम्

कालस्तु व्यापारे विशेषणम्। तथा हि - "वर्तमाने लट्" (पा. 3-2-123) इत्यत्राधिकारात् धातोरिति लब्धम्। तच्च धात्वर्थं वदत् प्राधान्यात् व्यापारमेव ग्राहयतीति तत्रैव तदन्वयः। न च संख्यावत्कर्तृकर्मणोरेवान्वयः शङ्क्यः। अतीतभावनाके कर्तरि "पचती"त्यापत्तेः "अपाक्षीदि"त्यनापत्तेश्च। पाकानारम्भदशायां कर्तृसत्त्वे "पक्ष्यति" इत्यनापत्तेश्च। नापि फले तदन्वयः। फलानुत्पत्तिदशायां व्यापारसत्त्वे "पचति" इत्यनापत्तेः पक्ष्यतीत्यापत्तेश्चेत्यवधेयम्।

गौरवम् इत्यादि विस्तरेण **भूषणे** प्रपञ्चितम्। एवं लाघवगौरवविचारस्य प्रयोजन-माह - **इदमपीति**। ततश्च कर्तृकर्मणोराख्यातार्थत्वमनिच्छताप्यभ्युपेयमित्यर्थः। वैयाकरणानां मते आख्यातार्थसंख्यायाः कर्तरि अन्वयः तत्रैव प्रथमान्तार्थ-देवदत्तादेः अभेदेन अन्वय इति न कार्यकारणाभावान्तरकल्पना न वा कार्यकारण-भावे गौरवम्। न च "चन्द्र इव मुखं दृश्यते" इत्यादौ आख्यातार्थकर्मणि चन्द्रस्या-भेदेनान्वयापत्तिः, इवार्थसादृश्ये विशेषणतया अन्वितस्य पुनरन्यत्र विशेषणतया अन्वयस्यैव अप्रसक्तेः। वस्तुतस्तु तत्र इव शब्दस्य द्योतकतया चन्द्रशब्दस्यैव चन्द्रसदृशपरत्वेन तस्य उपमेयविशेषणत्वेन च अरुणाधिकरणन्यायेन साक्षात्क्रियान्वयेन तस्य आख्यातार्थकर्मणि अभेदेन विशेषणत्वेऽपि न क्षतिः इत्याद्यूह्यम्।

॥**कालस्त्विति**॥ तथा च "आख्यतार्थकालप्रकारकबोधं प्रति तत्प्रकृतिधातुजन्य-व्यापारोपस्थितिः कारणम्" इति कार्यकारणाभावः फलितः। अयञ्च कार्य-कारणभावः तिङन्त इव कृदन्तेऽपि। ततश्च विशेष्यत्वेन वा विशेषणत्वेन वा उपस्थिते धात्वर्थव्यापारे कालः विशेषणतया अन्वेतीति फलितोऽर्थः। कालस्य धात्वर्थव्यापारविशेषणत्वे प्रमाणं युक्तिं च प्रदर्शयति - **वर्तमाने लडिति**॥

2.9.1. **कालस्वरूपविमर्शः**

अत्रेदानीं कालस्वरूपं किञ्चिद्विचार्यते। कालविषये सन्ति बहूनि मतानि। नित्यो विभुरखण्डश्च कालः द्रव्यभेद इति वैशेषिकाः। आकाशाद्युपाधिविशेषेणैव काल-कृतव्यवहारोपपत्तौ अन्यः कालः नास्तीति सांख्याः। अविद्यायाः शक्तिविशेष एव काल इति अद्वैतिनः। भूतादिव्यवहारासाधारणहेतुः काल इति नैयायिकाः। प्रकृतेः परिणामस्य अतिभङ्गुरस्य विभोः क्षणस्य धारा एव काल इति पातञ्जलाः। प्रसिद्ध-

परिमाणा सूर्यादिग्रहक्रियैव क्रियान्तरपरिच्छेदहेतुत्वात् काल इति ज्यौतिषिकाः। स्वयम्भूः अनादिमध्यनिधनः मनुष्याणां रसव्यापत्सम्पत्तिकारकः जीवनमरण-हेतुश्च कालः। तस्य संवत्सरात्मनो भगवान् आदित्यः गतिविशेषेण अक्षिनिमेष-काष्ठाकलामुहूर्ताहोरात्रपक्षमासर्त्वयनसंवत्सरप्रविभागं करोतीति सौश्रुताः।

एतेषु विभिन्नेषु मतेषु वैयाकरणाभिमतं कालस्वरूपं किमित्यपि चिन्तनीयम्। वैयाकरणेष्वपि नास्त्यैकमत्यं कालस्वरूपविषये। अत्र पक्षद्वयं "भूते"(पा 3-2-84) इति सूत्रे कैयटेन इत्थं प्रतिपादितम् - अत्र केचित् "नित्यं कालं पदार्थान्तरम् अनुज्ञाप्रतिबन्धाभ्यां स्थित्युत्पत्तिप्रलयहेतुमाचक्षते। तत्र संसर्गिसूर्यादिक्रिया-भेदाश्रयो मासादिभेदव्यवहारो भूतादिव्यपदेशश्च। अन्ये तु प्रसिद्धपरिमाणा क्रिया सूर्यादिकर्तृका अप्रसिद्धपरिमाणायाः क्रियायाः परिच्छेदायोपात्ताऽहरादि-व्यपदेश्या काल इत्याहुः" इति। एतत्पक्षद्वयमपि भाष्ये प्रतिपादितम्। अत्र प्रथमः पक्षः "कालाः परिमाणिना" (पा. 2-2-5) इति सूत्रे भाष्ये "येन मूर्तीनाम् उपचयाश्चापचयाश्च लक्ष्यन्ते तं कालमाहुः। तस्यैव कयाचित् क्रियया युक्तस्य अहरिति रात्रिरिति च" इति प्रतिपादितः। तत्र कैयटः - "तरुतृणालताप्रभृतीनां कदाचिदुपचयः अन्यदा त्वपचयः। सः प्रत्ययान्तराविशेषेऽपि यत्कृतः स काल इत्यर्थः। यद्येवं तस्यैकत्वात् कथम् अहरादिविभाग इत्यत आह - तस्यैवेति। परौपाधिक एव सर्वस्य भेदः" इति। अयञ्च पक्षः वाक्यपदीये कालसमुद्देशे -

"कलाभिः पृथगर्थाभिः प्रविभक्तं स्वभावतः।
केचिद्बुद्ध्यनुसंहारलक्षणं तं प्रचक्षते॥" (वा-प-तृ-काल-52)

इति श्लोकेन प्रतिपादितः। द्वितीयः पक्षः "वर्तमाने लट्" (पा. 3-2-123) इति सूत्रे भाष्ये प्रतिपादितः। तत्र हि आत्मास्ति पर्वताः तिष्ठन्ति इति प्रयोगसाधना-वसरे "इह हि भूतभविष्यद्वर्तमानानां राज्ञां या क्रियाः ताः तिष्ठतेरधिकरणमि"-त्युक्तम्। अनेन प्रसिद्धपरिमाणा सूर्यादिक्रियैव क्रियान्तरपरिच्छेदकत्वात् काल इति ज्ञायते। अयञ्च ज्यौतिषिकानां सिद्धान्तः। अयमपीत्थं प्रतिपादितः वाक्यपदीये कालसमुद्देशे

"आदित्यग्रहनक्षत्रपरिस्पन्दमथापरे।
भिन्नमावृत्तिभेदेन कालं कालविदो विदुः॥" (वा-प-तृ-काल-76)

इति। अत्र प्रथमपक्षः नागेशादीनाम् द्वितीयपक्षश्च दीक्षितादीनाम्। तत्र दीक्षित-कौण्डभट्टादयः इत्थं वदन्ति - शास्त्रे वर्तमानत्वादिसिद्ध्यर्थमेव कश्चन कालः अपेक्षितः। तस्य च क्रियारूपत्वेऽपि वर्तमानत्वादिव्यवहारः सिद्ध्यत्येव। उक्तं च भूषणे कौण्डभट्टेन "वस्तुतःकालो नातिरिक्तः किन्तु क्रियैव । क्रियातिरिक्तत्वे तस्य प्रमाणाभावात्। अतिरिक्तकल्पने तत्तच्छक्तत्वस्यापि कल्पने गौरवापत्तेः। किञ्च अतिरिक्तकालस्यैव वाच्यत्वे आत्मास्तीत्यादौ तत्तत्कालिकसूर्यादिक्रियाणां निराबाधात् ताः आदायैवोपपत्तौ तत्र कथं लड्प्रयोग इति शङ्का तत्समाधानं च असङ्गतं स्यात्। तत्र कैयटेनापि "इह भूतभविष्यद्वर्तमानानाम्" इत्यादिप्रतीक-मुपादाय "तत्र राज्ञां स्थितिः भूतादिभेदेन भिन्ना पर्वतादिस्थित्यादेः भेदिकेति क्रियारूपत्वं कालत्रययोगश्चोपपद्यते" इति स्पष्टमुक्तम्। तस्मात् विशिष्टभेद-मादायैव योजनीयम्। उक्तञ्च वाक्यपदीये -

"परतो भिद्यते सर्वमात्मा तु न विकम्पते।
पर्वतादिस्थितिस्तस्मात् पररूपेण भिद्यते॥" इति। (वा-प-काल-80)

विशिष्टभेदात् भेद इति हेलाराजीयेऽप्युक्तम्। अत एव "एको ह वै नारायण आसीत्" इत्यादौ विशिष्टभेदमादायैवोपपत्तिरिति शब्दकौस्तुभेऽप्युक्तम्। यद्यपि अतिरिक्तकालपक्षेऽपि भाष्यमिदं यथाकथंचित् समर्थयितुं शक्यम् अथापि लाघवात् अतिरिक्तकालाभ्युपगमे प्रमाणाभावाच्च क्रिया एव काल इति पक्ष एव युक्तः इति।

"भूते" (पा. 3-2-84) इति सूत्रे भाष्ये - "भूते इत्युच्यते। कस्य भूते? काले। न वै कालाधिकारोऽस्ति। एवं तर्हि धातोरिति वर्तते। धातौ भूते। धातुर्वै शब्दः। न च शब्दस्य भूतभविष्यद्वर्तमानतायाः सम्भवोऽस्ति। शब्देऽसम्भवात् अर्थे कार्यं विज्ञायते। कः पुनः धात्वर्थः? क्रिया। क्रियायाम् भूतायाम्" इत्युक्तम्। एवञ्च वर्तमानत्वादिकं क्रियानिष्ठमेवेति स्पष्टम्। अत एव तेषां द्योत्यतापि सङ्गच्छते। वर्तमानत्वादिकं लडादिवाच्यमिति पक्षेऽपि न दोषः। लडादिप्रयोगे सत्येव वर्तमानत्वादिप्रतीतेः अन्वयव्यतिरेकाभ्यां क्रियानिष्ठानां वाच्यत्वस्यापि सम्भवात्। "कालाः परिमाणिना"(पा. 2-2-5) इति सूत्रभाष्योक्तकाललक्षणस्यापि क्रियायाः कालत्वे न विरोधः। सूर्यादिक्रियाया एव मनुष्याणामुपचयादिहेतुत्वात्। तस्मान्ना-तिरिक्तः कालः। किन्तु क्रियैव। तदुक्तं व्युत्पत्तिवादे लकारार्थनिर्णये "अथवा

कालविशेषणतयैव अतीतत्वं लङर्थः आश्रयतासम्बन्धेन तस्य कृत्यादावन्वयः। कालान्तर्भावस्य व्यर्थत्वात्" इति।

एवञ्च पूर्वोक्त "भूते"(पा. 3-2-84) इति सूत्रभाष्यरीत्या "वर्तमाने लट्"(पा. 3-2-123)त्यादौ वर्तमानत्वादिकं धात्वर्थक्रियायां विशेषणम्। एतदेवाभिप्रेत्य भट्टोजीदीक्षितेन "वर्तमाने लट्" (पा. 3-2-123)इति सूत्रस्य "वर्तमानक्रिया-वृत्तेर्धातोः लट् इत्यर्थवर्णनं कृतम्। अतिरिक्तकालपक्षे वर्तमाने इति सप्तमी अधिकरणे । तथा च वर्तमानकालनिष्ठक्रियाबोधने इत्यर्थः वर्णनीयः । "भूते" (पा. 3-2-84) इति सूत्रभाष्ये प्रयुक्तः क्रियाशब्दः न फलव्यापारान्यतरार्थः किन्तु लोकप्रसिद्धपरिस्पन्दाद्यर्थक एव। अतश्चात्र व्यापारशब्देन स्पन्दादिरूपः व्यापारः लोकप्रसिद्धक्रियारूप एव विवक्षितः यश्च नैयायिकैः "कर्म"शब्देन पदार्थान्तरत्वेन अभिप्रेतः। तथा च बोधे धात्वर्थव्यापारस्य विशेष्यत्वे वा विशेषणत्वे वा वर्तमानत्वादीनां व्यापारे एवान्वयः न तु फले कदाचिदपि इति बोध्यम्। अत एव "ग्रामो गत" "पक्व ओदन" इत्यादौ फलस्य वर्तमानत्वेऽपि भूते प्रयोगः सङ्गच्छते। तदेतत्सर्वं मनसिकृत्याह - **कालस्तु व्यापारे विशेषणमिति। प्राधान्यादिति॥** वर्तमाने लडित्यादिषु अनुवृत्तं धातुपदं फलव्यापारोभयवाचकमपि फलव्यापारयोः मध्ये व्यापारस्यैव प्राधान्यात् व्यापारमेव ग्राहयतीति तत्रैव कालस्य अन्वय इत्यर्थः। तिङन्ते सर्वत्र कर्मकृद्भिन्नकृदन्ते च तस्यैव व्यापारस्य विशेष्यतया प्रतीतिरूपं प्राधान्यमित्यर्थः। वस्तुतस्तु क्रियाभिन्नस्य कालस्यैवा-भावात् तत्र च क्रियारूपेण व्यापारस्यैव प्रतीतेः "भूवादयो धातवः" (पा. 1-3-1) इति सूत्रेण क्रियावाचिन एव धातुसंज्ञाविधानेन च व्यापाररूपक्रिया एवात्र क्रियाशब्देन स्वीक्रियते इति सर्वत्र कालस्य व्यापाररूपक्रियायामेवान्वयः न फले कर्मकृदन्तेऽपि। कालस्य फलेऽन्वये जायमानानां दोषाणां कर्मकृदन्तेऽपि समत्वात्। वस्तुतस्तु लोकानुभवसिद्धप्राधान्यादित्यर्थः।

अनेन "यन्मते कर्मप्रत्ययस्थले फलस्य प्राधान्यं तन्मते फले एवान्वय इति ध्वनितम्। फलानुत्पत्तिदशायां भाविफले वर्तमानत्वमारोप्य "पच्यते" इत्यस्यो-पपत्तिः। व्यापारविगमे फलसत्त्वे "अपाचि" इति तु फलस्य सत्त्वेऽपि तदुत्पत्तेः नाशात् विद्यमानध्वंसप्रतियोग्युत्पत्तिकत्वरूपभूतत्वस्य फले सत्त्वात् इति नव्याः" इति **प्रभाव्याख्या एतदाशयक -काशिका - परीक्षा - दर्पणव्याख्याश्च परास्ताः।**

न चामवातजडीकृतकलेबरस्योत्थानानुकूलयत्नसत्त्वात् "उत्तिष्ठति" इति प्रयोगापत्तिः। परयत्नस्य अज्ञानादप्रयोगात्। किञ्चिच्चेष्टादिनावगतौ च "अयमुत्तिष्ठति शक्त्यभावात् फलं तु न जायते" इति लोकप्रतीतेरिष्टत्वात्।

"भूते" (पा. 3-2-84) इति सूत्रभाष्यपर्यालोचनया न्यायशास्त्रप्रसिद्ध-पदार्थान्यतमस्य कर्मशब्देन व्यवह्रियमाणस्य स्पन्दादिरूपस्यैव क्रियाशब्देन ग्रहणस्य, तत्र वर्तमानत्वादिविशेषणत्वस्य च लाभात्। फले अन्वयं स्वीकृत्य तत्र प्रसक्तानुपपत्तिपरिहाराय क्लिष्टकल्पनाद्यपेक्षया फलेऽनन्वयस्यैवोचितत्वात्। फलेऽन्वयं स्वीकृत्य साधनीयानाम् प्रयोगाणामभावाच्च। ननु संख्यावत् समान-प्रत्ययोपात्ते कर्तरि कर्मणि च अन्वयोऽस्त्विति चेदाह - **न चेत्यादि। अतीत-भावनाके कर्तरीत्यादि।** यत्कर्तृकपचनक्रिया अतीता कर्ता च वर्तमानः तत्र लोकसिद्धस्य अपाक्षीदिति प्रयोगस्य अनापत्तिः पचतीति प्रयोगस्य चापत्ति-रित्यर्थः। एवमन्यत्सर्वमूह्यमित्यर्थः। एवं कालस्य फलेऽन्वयेऽपि सम्भाविताः दोषाः उक्ताः-**नापि फले** इत्यादिना।

सिद्धान्तलेशसङ्ग्रहे अप्पय्यदीक्षितोक्तं व्यापारे भावनान्वये बाधकमुद्धरति - **न चेति।** तत्र हि "आख्यातार्थकालस्य धात्वर्थव्यापारान्वये आमवातजडीकृतकलेबरे उत्थानानुकूलव्यापारवति उत्तिष्ठतीति प्रयोगापत्तिः। उत्थानानुकूलव्यापारस्य वर्तमानत्वात्। अतः आख्यातार्थकालस्य फले एवान्वयःस्वीकार्यः। तथा चात्र व्यापारसत्त्वेऽपि फलानुत्पादात् न दोष" इति तैरुक्तम्। तत्र तैः यद्यपि फलेऽन्वय इति साक्षात् नोक्तम् परन्तु धात्वर्थेऽन्वय इत्युक्तम्। प्रायः वेदान्तिनां भाट्टानुयायित्वेन प्राचीनैः भाट्टैः फलस्यैव धात्वर्थतया स्वीकाराच्च फलेऽन्वय एव तैरभिप्रेत इति मत्या आशङ्क्य समाधीयते। आमः कश्चन रोगविशेषः यत्र वाताधिक्येन शरीरः स्पन्दशून्यो भवति। यद्यपि स रोगी आमवातजडीकृत-हस्तपादादि चालयितुं प्रयासं करोति तथापि न शक्नोति। अतः तस्मिन् सन्दर्भे तस्य रोगिणः इच्छायाः सर्वविदितत्वात् इच्छया व्यापारस्य अनुमानेन तादृश-प्रयोगापत्तिरित्याशयः। समाधत्ते - **परयत्नस्याज्ञानादिति॥** अस्य अयमर्थः । यावत् पर्यन्तं केनापि व्यक्तिविशेषेण क्रियमाणः प्रयत्नविशेषः अन्यज्ञानगोचरः न, तावत् पर्यन्तं तद्विषयवाक्यप्रयोग एव न भवति। तथा च रोगिणः मनसि इच्छायां सत्यामपि द्रष्टृभिः तदज्ञानात् न तादृशप्रयोगापत्तिः। यदि च मुखपरावर्तन–

एवञ्च तिङर्थो विशेषणमेव। भावनैव प्रधानम्। यद्यपि प्रकृतिप्रत्ययार्थयोः प्रत्ययार्थस्यैव प्राधान्यमन्यत्र दृष्टं तथापि "भावप्रधानमाख्यातं, सत्त्वप्रधानानि नामानि" इति निरुक्तात् भूवादिसूत्रस्थक्रियाप्राधान्यबोधकभाष्याच्च धात्वर्थभावनाप्राधान्यमध्यवसीयते।

भ्रूभङ्गादिना तस्य प्रयत्नविशेषः द्रष्ट्रा अवगतः तर्हि "अयमुत्तिष्ठति शक्त्यभावात् फलं न जायते" इति प्रयोगः इष्ट एव। वस्तुतस्तु आमवातजडीकृतकलेबरस्य प्रयत्नः नोत्थानानुकूलः किन्तु उत्थानोद्देश्यकः। अत एव तत्र उत्थातुं यतते इति प्रयोगः न तु उत्तिष्ठतीति। अनुकूलताविशेषस्यैव फलव्यापारयोः संसर्गत्वाभ्युपगमात्। अत एव तण्डुलक्रयणदशायां पचतीति न प्रयोगः। तत्र "पाकाय यतते" इत्येव प्रयोगः इति स्पष्टं **वैयाकरणसिद्धान्तभूषणे**। विस्तरस्तु तत एव अवसेयः। अत्र **प्रभादर्पणौ** एवं प्रत्यवतिष्ठेते - "फलव्यापारयोः साक्षात् जन्यजनकभाव एव सम्बन्धः। तण्डुलक्रयणादिषु साक्षात् विक्लित्तिरूपफलजनकत्वाभावात् न तदा पचतीति प्रयोगः। प्रकृते उत्थानानुकूलयत्नसत्त्वेऽपि कर्तरि शक्तिरूपसहकारिकारणाभावात् उत्थानानुत्पादेऽपि उत्थानजनकयत्नसत्त्वात् तथा प्रयोगः इष्ट एवे"ति। एतदपि न विचारसहम्। तादृशानुभवविरहात्। सर्वानुभवविरुद्धत्वाच्च। फलव्यापारयोः साक्षात् जन्यजनकभावसम्बन्धोऽपि न युक्तः। फूत्कारादेः व्यापारत्वानापत्तेः तद्दशायां पचतीति प्रयोगानुपपत्तिः। ततश्च वैयाकरणसिद्धान्तभूषणोक्तप्रकार एव युक्त इति **तत्त्वदर्शिनी**।

एवं कर्तृकर्मणोः धात्वर्थफलव्यापारयोः, संख्यायाः समानप्रत्ययोपात्तकर्तृकर्मणोः, कालस्य धात्वर्थफलस्य च व्यापारे विशेषणत्वेनैव अन्वय इति एतावता निरूपितत्वात् सर्वस्यापि तिङर्थस्य विशेषणत्वमेव। धात्वर्थभावनैव प्रधानम्। इत्युपसंहरति - **एवमिति। भावनेति च॥** ननु पाचक इत्यादि कृदन्ते औपगव इत्यादि तद्धितान्ते "पाचि" इत्यादिणिजाद्यन्तेषु सर्वत्र प्रत्ययार्थस्यैव प्राधान्यम् अनुभूयते। अस्ति च "प्रकृति प्रत्ययार्थयोः प्रत्ययार्थः प्रधानमि"ति न्यायः। तथाच तिङन्तेऽपि प्रत्ययार्थस्यैव प्राधान्यमभ्युपगन्तव्यम् अभ्युपगतं च कैश्चित्तथा इति चेदुच्यते - "प्रकृतिप्रत्ययार्थयोः प्रत्ययार्थः प्रधानमि"ति उत्सर्गः। उत्सर्गस्य "प्रकल्प्य चापवदिविषयमि"ति न्यायमनुसृत्य अपवादस्थलं परित्यज्य

अन्यत्र प्रवृत्तिर्भवति। तिङन्तं तु अपवादस्य लक्ष्यम्। अतोऽत्र स न्यायः प्रत्ययार्थप्राधान्यबोधको न प्रवर्तते।

2.9.2. भावप्रधानमाख्यातम् इति वचनव्याख्या

कोऽसावपवादः प्रत्ययार्थप्राधान्यन्यायस्येति चेदुच्यते - "**भावप्रधानमाख्यातम्**" इति। इदं निरुक्तवचनमेव प्रत्ययार्थप्राधान्यबोधकन्यायस्य अपवादः। आख्यातं भावप्रधानम् इत्यन्वयः। अत्र आख्यातशब्दः उद्देश्यपरः। भावप्रधानमिति विधेयपरम्। एवञ्च यत्र यत्र आख्याततत्वं तत्र तत्र भावप्रधानतेति व्याप्तिः सिद्ध्यति। भावप्रधानमिति लक्षणम्। आख्यातं लक्ष्यम्। भावः -भावना - व्यापारः, प्रधानः - मुख्यविशेष्यभूतः यस्य वाच्यत्वेन तत् भावप्रधानम्। तथा च मुख्य-विशेष्यभूतभावप्रतिपादकम् आख्यातमित्यर्थः पर्यवसितः। इदं च आख्यात-लक्षणम्। अन्यच्च नाम लक्षणं "सत्त्वप्रधानानि नामानी"ति। अत्रापि नामानि सत्त्वप्रधानानि इत्यन्वयः। नाम उद्दिश्य प्रधानीभूतसत्त्वप्रतिपादकत्वं विधीयते। "भावप्रधानमाख्यातम्" इति निरुक्ते आख्यातशब्दः धातुपरः। आख्यायते सर्वप्रधानीभूतो भाव अनेनेति व्युत्पत्त्या अन्वर्थः आख्यातशब्दः। तथा च धातुः सर्वप्रधानीभूतभावबोधक इत्यर्थः सिद्धः। "नामान्याख्यातजानीति शाकटायनो नैरुक्तसमयश्च" इति निरुक्तवाक्यं च आख्यातशब्दस्य धातुपरत्वे प्रमाणम्। न हि तिङन्तजं नाम भवति। अत एव एतत्समानार्थकं "उणादयो बहुलम्"(पा. 3-3-1) इति सूत्रस्थं "सर्वं नाम धातुजमाह निरुक्ते, व्याकरणे शकटस्य च तोकम्" इति भाष्यमपि सङ्गच्छते। "चत्वारि पदजातानी"ति निरुक्तस्यापि चत्वारि पदप्रकृतीनीत्यर्थः। तथा च धातोः सर्वप्रधानीभूतभावबोधकत्वकथनात् तिङन्ते तस्यैवार्थस्य प्राधान्यं बोधितमिति कृत्वा अस्य वचनस्य प्रत्ययार्थप्राधान्यबोधक-न्यायापवादत्वं सिद्ध्यति। ततश्च तिङन्ते प्रत्ययार्थः विशेषणम्, धात्वर्थः भावः भावना व्यापारः प्रधानम् भवति। नन्वेवं धातोः सर्वत्र मुख्यविशेष्यभूत-व्यापारवाचकत्वे पाचकादिकृदन्तेष्वपि तस्यार्थस्यैव प्राधान्यं स्यात् तथा च कर्त्रादिप्राधान्यं न स्यात् इति चेन्न। "सत्त्वप्रधानानि नामानि" इति वचनस्य "भावप्रधानमाख्यातम्" इति वचनापवादत्वात्। तथा च नामपदव्यवहार्येषु पुनः द्रव्यस्यैव प्राधान्यमिति तस्य च प्रत्ययार्थत्वात् तत्र प्रत्ययार्थप्राधान्यं सिद्ध्यति। अर्थात् धातुप्रकृतिककृदन्तेषु "भावप्रधानमाख्यातम्" इति वचनेन अवरुद्धं

प्रत्ययार्थप्राधान्यं सत्त्वप्रधानानीति वचनेन प्रतिप्रसूयते इत्यर्थः। तथा च यद्धातुप्रकृतिकपदजाते नामत्वं नास्ति तत्र धात्वर्थप्राधान्यं सिद्ध्यति। तच्च तिङन्तमेवेति अनेन वचनेन तिङन्तं धात्वर्थव्यापारप्रधानमित्यर्थः सिद्ध्यति। एतत्सूचनार्थमेव "सत्त्वप्रधानानि नामानी"ति। अन्यथा तिङन्तविषयकविचारे नामलक्षणादिविचारस्य अप्रस्तुतत्वात् तदुल्लेखः असम्बद्धप्रलापः स्यात्। अत्रेदमवधेयम्। आख्यातशब्दः धातौ, तिङन्ते, भावप्रधानार्थे तिङन्ते कृदन्ते, तिङ्प्रत्यये च तत्र तत्र प्रयुक्तो दृश्यते। ततश्च "भावप्रधानमाख्यातम्" इति निरुक्तस्यापि विविधेषु आख्यातार्थेषु स्वीकृतेषु "धातुः भावप्रधानः, तिङन्तं भावप्रधानम्, तिङ्प्रत्ययः भावप्रधानः इत्येवमर्थत्रयं सिद्धम्। अत्र निरुक्तकारस्य कस्मिन्नर्थे सम्मतिरिति परीक्षणीयम्। कौण्डभट्टस्तु तत्रत्याख्यातपदस्य धातुपरत्वमेवेत्थं निरूपयति **वैयाकरणसिद्धान्तभूषणे धात्वर्थनिर्णये** तस्मात्करोतिरितिकारिकाव्याख्यायाम् -"यदि नियामकापेक्षा गृह्यतां तर्हि "भावप्रधानमाख्यातं सत्त्वप्रधानानि नामानी"ति निरुक्तवचनम्। इदं हि नामाख्यातोपसर्गनिपातानां चतुर्णां मध्ये नामाख्यातयोः लक्षणत्वेन प्रवृत्तम्। अत्राख्यायते सर्वप्रधानभूतोऽर्थोऽनेनेति व्युत्पत्त्या धातुराख्यातपदेनोच्यते नामादिप्रकृतीनामेवोद्देशात्। अग्रेऽपि तत्र "नामान्याख्यातजानीति शाकटायनो नैरुक्तसमयश्च, न सर्वाणीति गार्ग्यः वैयाकरणानां चैके" इत्युक्तत्वाच्च। न ह्याख्यातप्रत्ययजं नाम संभाव्यते। किन्तु धातुजम्। अत एवैतत् समानार्थकं वाक्यं "सर्वं नाम धातुजमाह निरुक्ते, व्याकरणे शकटस्य च तोकम्" इति महाभाष्ये पठितम्। तथा च धातोः भावप्रधानबोधजनकत्वं लक्षणम्। "नमन्त्याख्यातशब्दे गुणभावेन, नमयन्ति वा स्वार्थं भावनां प्रति" इति नामानि। तल्लक्षणं "सत्त्वप्रधानानी"ति। एवं च "आख्यातस्य भावप्रधानत्वोक्तेर्धात्वर्थो भावनेति निरुक्तविरुद्धम्, अन्यथा भावप्रधानो धातुरित्येवावक्ष्यत्" इति निरस्तम्। तस्मान्न प्रत्ययार्थप्राधान्यनियमः इति ध्येयम्।" इति। प्राचीनमीमांसकाः नागेशादयश्च निरुक्तवाक्यीयाख्यातपदस्य तिङन्तपरत्वं स्वीकृत्य तिङन्तबोध्येषु फल-व्यापार-काल-संख्या-कारके (कर्तृ-कर्म)षु धात्वर्थस्य प्राधान्यमिति व्याख्यां कुर्वन्ति। नव्यमीमांसकाः नैयायिकाश्च तस्य तिङ्परत्वमाश्रित्य तिङर्थेषु भावस्य कृतेः प्राधान्यमनेन बोध्यत इति स्वस्वमतानुकूलां व्याख्यां कुर्वन्ति। इदानीमत्र कौण्डभट्टेनोद्धृतस्य अस्य

निरुक्तस्य कौण्डभट्टाभिमतया रीत्या एवार्थः प्रदर्शनीयः, ततः परं तस्य युक्तायुक्तादिविचारः कार्यः। अतश्चात्र **तत्त्वदर्शिनी** एव तथा कौण्डभट्टस्याशय-प्रकाशने समर्था। अन्याः सर्वा अपि तिङन्तपरतया आख्यातशब्दं स्वीकृत्य विषयं बहुव्याकुलीकृतवत्यः। अतः वस्तुतः आख्यातपदार्थः कः? तत्र अर्थविपरिणतिः आसीद्वा? आसीच्चेत् कदा कथमिति किञ्चित् पर्यालोचनीयमिति तदेव किञ्चिदत्र प्रस्तूयते।

अत्र निरुक्ते आख्यातपदं तिङन्तविषये प्रयुक्तम्। न तु प्रत्ययमात्रे। चत्वारि पदजातानि इति उपक्रमानुरोधात्। "पूर्वापरीभूतं भावमाख्यातमाचष्टे व्रजतिपचती -त्युपक्रमप्रभृत्यपवर्गपर्यन्तम्" इति वचनाच्च। किञ्च प्राचीनकाले आख्यातपदं तिङन्तविषये एव प्रयुक्तम्। न तु प्रत्ययमात्रे। तथा हि - अथर्ववेदप्रातिशाख्ये "चतुर्णां पदजातानां नामाख्यातोपसर्गनिपातानां सन्ध्यपद्यौ गुणप्रतिज्ञम्(1-1)" इति सूत्रे आख्यातपदं पदपरत्वेन प्रयुक्तम्। ऋग्वेदप्रातिशाख्येऽपि द्वादशपटले

नामाख्यातमुपसर्गो निपातश्चत्वार्याहुः पदजातानि शाब्दाः।
तन्नाम येनाभिदधाति सत्त्वं तदाख्यातं येन भावं सधातु॥ (12-5)

इति, क्रियावाचकमाख्यातम्" इति चोक्तम्। शौनकीयबृहद्देवतायामपि

"क्रियासु बह्वीष्वभिसंश्रितो यः पूर्वापरीभूत इवैक एव।
क्रियाभिनिर्वृत्तिवशेन सिद्धः आख्यातशब्देन तमर्थमाहुः॥ (1-44)"

इति, भरतनाट्यशास्त्रे "क्रियाकृतं प्रथितसाध्यम्। वचनं नामसमेतं पुरुषविभक्तं तदाख्यातम्"(द्वि-भा-पृ 231-बरोडाप्रकाशनम्) इति च आख्यातपदलक्षण-मुक्तम्। पाणिनिमहर्षिणापि "दूग्वजृद्ब्राह्मणर्क्प्रथमाध्वरपुरश्चरणनामाख्याताट्ठक्" (पा 4-3-72) इति सूत्रे आख्यातपदं तिङन्तपरतयैव प्रयुक्तम्। वार्तिककारेणापि "आकार आख्याते परादिश्च (म-भा-पा.1-2-37), आख्यातं साव्ययकारक-विशेषणं वाक्यम् (म-भा-वा 1199, पा. 2-1-1), लुप्ताख्यातेषु च (म-भा-वा 1213, पा. 2-1-1), आख्यातमाख्यातेन क्रियासातत्ये (ग-सू-द्र-पा 2-1-72, म-भा-पा. 1-2-45), नामाख्यातग्रहणं सङ्घातविगृहीतार्थम् (म-भा-वा 5494, पा 4-3-72) इत्यादिवार्तिकेषु आख्यातपदं तिङन्ते एव प्रयुक्तम्। न चात्र प्रत्यय-ग्रहणे तदन्तग्रहणमिति भ्रमितव्यम्। तथा आख्यातशब्दस्य शास्त्रे व्यवहारेऽपि लोके तादृशव्यवहाराभावात्। ठक्प्रत्ययविधानाच्च तस्य लौकिकत्वमभ्युपेयम्।

महाभाष्यकारेणापि क्रियाप्रधानमाख्यातमिति वदता आख्यातशब्दस्य तिङन्त-परता बहुत्र स्पष्टीकृता। काशकृत्स्नेनापि "धातोः साधने दिशि पुरुषे चिति तदाख्यातम्" इति तिङन्तस्य आख्यातसंज्ञा विहिता। श्रीमलयगिरिणापि स्वीये शब्दानुशासने (पृ 6-7-अहमदाबाद्प्रकाशने) -"सविशेषणमाख्यातं वाक्यम्" इति सूत्रे "तिबादिविभक्त्यन्तपदमाख्यातमिति रूढिः" इति स्पष्टतया आख्यातपदस्य तिङन्तपरत्वं प्रत्यपादि। कच्चायनव्याकरणेऽपि आख्यातकल्पे—

आख्यातसागरमथज्जतनीतरङ्गं धातुज्जलं विकरणागमकालमीनम्।
लोपानुबन्धरयमत्थविभागतीरं धीरा तरन्ति कविनो पृथुबुद्धिनावा ॥इति(पृ.236)

वर्णनमपि तिङन्तस्यैवाख्यातत्वं साधयति । नानार्थार्णवसङ्क्षेपे केशवस्वामिना च "आख्यातमित्यदः क्लीबं तिङन्ते त्रिस्तूक्ते" इत्युक्तम्। पुरुषोत्तमदेवेन च त्रिकाण्डशेषकोशे "आख्यातं तिङि भाषिते" इत्युक्तम्। तद्व्याख्यात्रा श्रीशील-स्कन्धमहानायकयतिवरेण "तिङि व्याकरणप्रसिद्धे तिङन्तपदे" इति व्याख्याय "आख्यातं भाषिते तिङि" इति मेदिनीकोशः संवादार्थमुदाहृतः। वाक्यपदीयेऽपि आख्यातपदं तिङन्तपरत्वेनैव प्रयुक्तम्। यथा -

आख्यातशब्दः सङ्घातो जातिः सङ्घातवर्तिनी (द्वि 1)
आख्यातं तद्धितकृतोर्यत्किंचिदुपदर्शकम्।
गुणप्रधानभावादौ तत्र दृष्टो विपर्ययः॥ (द्वि 318)
क्रियाप्रधानमाख्यातं नाम्नां सत्त्वप्रधानता।
चत्वारि पदजातानि सर्वमेतद्विरुध्यते॥ (द्वि 346)
अनेकाख्यातयोगेऽपि वाक्यं न्यायापवादयोः।
एकमेवेष्यते कैश्चि त् भिन्नरूपमवस्थितम्॥ (द्वि 353)
निवृत्तभेदा सर्वैव क्रियाख्यातेऽभिधीयते ॥ (द्वि 57) इत्यादि॥

प्राचीननैयायिकग्रन्थेष्वपि आख्यातपदं तिङन्ते एव प्रयुक्तम्। तथा हि - न्याय-भाष्ये "ते विभक्त्यन्ता पदम्" (न्या-सू 2-2-58) ति सूत्रव्याख्यायां "विभक्तिर्द्वयी नामिक्याख्यातिकी च" इति, "अर्थान्तर" (न्या-सू 5-2-7) सूत्रे च "क्रियाकाल-योगाभिधाय्याख्यातं धात्वर्थमात्रं च कालाभिधानविशिष्टम्" इत्युक्तम्। "ते विभक्त्यन्ताः पदम्" (न्या-सू 2-2-58) इति सूत्रे च न्यायवार्तिककारोऽपि

"विभक्तिर्द्वयी नामिक्याख्यातिकी च। नामिकी स्वादयः। आख्यातिकी तिबादयः। तया विशिष्यमाणं पदं द्वेधा भवति नाम च आख्यातं च। क्रियाकालयोगाभिधायि क्रियाप्रधानमाख्यातम् पचतीति यथा" इत्युक्तवान्। तत्रैव व्याख्यायां वाचस्पतिमिश्रैश्च "तदनेन पचति पच्यते पचेत स्थीयते इत्यादि सर्वमाख्यातं सङ्गृहीतं भवति" इत्युक्तम्। न्यायमञ्जर्यां प्रमाणप्रकरणे वाक्यार्थनिरूपणे जयन्तभट्टेनापि "न चाख्यातरहितं वाक्यं किञ्चित् प्रयोगयोग्यं" (मै.प्र.312) "आख्याताच्च पूर्वापरीभूतस्साध्यरूपोऽर्थोऽवगम्यते न सिद्धरूपः" (मै.प्र.312) "पचतीत्याख्यातपदस्य यदार्थो व्याचिख्यासितो भवति तदा पाकं करोतीति पाकशब्देन द्वितीयान्तेन साध्यं धात्वर्थं व्याचक्षते कर्तृव्यापारात्मकं प्रत्ययार्थं करोति पदेन" (मै.पु.306) "ननु यागेनेति न श्रूयते किन्तु यजेतेति तच्चाख्यातपदं प्रकृतिप्रत्ययात्मकसमुदायरूपम्"(मै.प्र.310) इत्यादिनाऽऽख्यातपदस्य तिङन्तार्थकता प्रतिपादिता।

मीमांसकग्रन्थेष्वपि प्राचीनेषु आख्यातपदं तिङन्तविषये एव प्रयुक्तम्। तथा हि - जैमिनिः "येषां तूत्पत्तावर्थे स्वे प्रयोगो न विद्यते तान्याख्यातानि तस्मात्तेभ्यः प्रतीयेत आश्रितत्वात् प्रयोगस्य"(मी-2-1-4) इति सूत्रेणाख्यातमलक्षयत्। "प्रयोगकाले येषामर्थो नोपलभ्यते तान्याख्यातानीति भावशब्दान् पर्यायत्वेनोपदिशति। कथं पर्यायता भावशब्दानाम्? यत एषां विभक्तय आख्यातिक्य इत्युच्यन्ते। कतमास्ताः - पचति पचतः पचन्तीत्येवमादयः" इति तद्भाष्यम् (शा-भा-(मी-2-1-1-4)। एवमन्यत्रापि भाष्ये "सर्वेषु आख्यातेषु क्रियानुष्ठानं श्रूयते न कारकं किञ्चित्"(शा-भा-(मी-3-4-4-13) इत्याद्युक्तम्। उक्तभाष्यप्रामाण्येन भगवता जैमिनिना प्रोक्तं लक्षणं तिङन्तविषयमेवेति निश्चप्रचम्। तन्त्रवार्तिके भावार्थाधिकरणे भट्टपादैरपि--

यागदानाद्यनुस्यूतो भावनात्मावगम्यते।
नित्यमाख्यातशब्देभ्यस्तस्माद्भावार्थतेष्यते॥ (मी.2.1.1.1)

सर्वत्र चाख्याते धात्वर्थश्च तदनुरक्ता च भावना विज्ञायते'

चतुर्विधे पदे चात्र द्विविधस्यार्थनिर्णयः।
क्रियते संशयोत्पत्तेः नोपसर्गनिपातयोः॥

नामाख्यातपदे तेन कस्यार्थस्याभिधायके।

किमाकृतेरुतव्यक्तेरिति चिन्ता प्रवर्तते॥ (मी.1.3.9.33)इत्युक्तम्।

प्रभाकरगुरुभिरपि बृहत्याम् (बृहती (सू-सं - 3), आख्यातपदं तिङन्तविषये एव प्रयुक्तम्। मण्डनमिश्रेणापि स्फोटसिद्ध्यादिषु तिङन्तपरतयैव आख्यातपद-मुपयुक्तम्। ऋषिपुत्रपरमेश्वरेण जैमनीयसूत्रार्थसङ्ग्रहे आख्यातलक्षणविवरणे तिङन्तस्यैवाख्यातत्वं सुस्पष्टं प्रतिपादितम्। रामेश्वरसूरिणापि जैमिनीयसूत्रविवृतौ "आख्यातान्तं लक्षयति" इत्यादिना सूत्रस्य तिङन्तलक्षणपरता उक्ता। तस्मात् "भावार्थाः कर्मशब्दाः" इति सूत्रस्य स्वोत्प्रेक्षितार्थकथनं खण्डदेवादीनां औद्धत्यमेव प्रकाशयति । एवम् आख्यातपदस्य तिङ्परत्वे प्राचीनं न किञ्चित् प्रमाणमुपलभामहे। तस्मात् क्री-श अष्टमनवमशतकपर्यन्तम् आख्यातपदं तिङन्तविषयकमेवेति निर्विवादम्।

ततः परं प्रकरणपञ्चिकायां शालिकानाथेन आख्यातपदं प्रत्ययविषये प्रयुक्तम्। तत्र हि वाक्यार्थमातृकायां "कर्त्रादिसंख्यामात्रवाचितया आख्यातप्रयोगोपपत्तौ नाधिकं वाच्यं शक्यं कल्पयितुमि"ति ग्रन्थे आख्यातपदं प्रत्ययविषये प्रयुक्तम्। एवं न्यायकुसुमाञ्जल्यां पञ्चमस्तबके "भावनैव हि यत्नात्मा सर्वत्राख्यातगोचरः" इति श्लोके तद्व्याख्यायां च तत् प्रत्ययविषये एव प्रयुक्तमाचार्यैः। ततः परं मणिकारादिभिस्सर्वैरपि आख्यातपदं तिङ्विषये एव प्रयुक्तम्। जगदीशोऽपि शब्दशक्तिप्रकाशिकायां तिङ्परमेवाख्यातलक्षणमित्थमवोचत् -

"धात्वर्थेन विशिष्टस्य विधेयत्वेन बोधने।

समर्थः स्वार्थयत्नस्य शब्दो ह्याख्यातमुच्यते॥ (श-श-प्र-आ 97)

क्री-श दशमशतकमारभ्य एतावत् पर्यन्तम् आख्यातशब्दस्य तिङ्विषये एव प्रचुरव्यवहारोऽस्ति। भवतु नाम। येषां पदानां कालक्रमेण अर्थो विपरिणतः तेषां तत्तत्समयानुगुणमर्थनिर्णयः कर्तव्यः । तस्मात् क्रीस्तोः पूर्वं जातस्य निरुक्तस्य यो ह्याख्यातपदव्यवहारः सः तिङन्तविषय एवेति व्याख्यातव्यम्। "भावप्रधान-माख्यातम्" इत्यस्य

भावप्रधानमाख्यातमिति निर्वचनस्मृतेः।

आख्यातार्थेषु भावस्य प्राधान्यमवसीयते॥ (प-र-का-द्वि 79)

इति पदवाक्यरत्नाकरोक्तं खण्डदेवोक्तं चासङ्गतमेव। तस्मात् "भावकालकारक-सङ्ख्याः चत्वारोऽर्थाः आख्यातस्य, तत्र भावः प्रधानम्" इति निरुक्तभाष्यमेवात्र युक्तम्।

2.9.2.1. आख्यातपदस्य तिङन्तपरत्वं वदतां मतानां प्रदर्शनम्

अथात्र आख्यातशब्दस्य तिङन्तपरतामाश्रित्य केचन विचाराः **दर्पण-कान्ति-काशिकासु** कृताः। ते च व्युत्पत्त्याधायका इति कृत्वा अत्र संगृह्यन्ते। यत्तु भावयतीति भाव इति व्युत्पत्या भावपदस्य कृतिरूपभावपरतया तिङूपाख्यातार्थेषु भावसङ्ख्यावर्तमानत्वादिषु मध्ये भावस्य प्राधान्यमित्यर्थसिद्ध्या भावप्रधानम् इति निरुक्तेन न विरोध इति तन्न। तेषु त्रिषु "क्रियाभेदाय कालस्तु संख्या सर्वस्य भेदिका"(वा-प-तृ-काल-2) इति वाक्यपदीयात् संख्याकालयोः परिच्छेदकत्वाच्च तयोः विशेषणत्वं वचनमन्तरेणैव सिद्ध्यति। अतः अवशिष्टायाः कृतेः प्राधान्यं स्वतः सिद्धमिति तदर्थं वचनस्यैव व्यर्थत्वात्। आख्यातपदस्य तिङन्तपरत्वेन तथा व्याख्यानायोगाच्च। नन्वेवमपि धात्वर्थापेक्षया भावः कृतिः प्रधानमिति निरुक्तार्थः। क्रियाप्रधानमिति भाष्यस्यापि धात्वर्थापेक्षया क्रिया कृतिः प्रधाना इत्यर्थः। तथा च न निरुक्तभाष्यविरोध इति चेन्न। तथा चेत् प्रत्ययार्थप्राधान्य-न्यायेनैव सिद्धे भावप्रधानमित्यस्य असाङ्गत्यापत्तेः। भावाख्याते कृतेरभावात् लक्षणस्याव्याप्तिश्च। अस्माकं मते तु वचनं सार्थकम्। प्रत्ययार्थप्राधान्यन्यायेन कर्त्रादीनां प्राधान्यापत्तौ तदपवादाय प्रकृत्यर्थभावप्राधान्यबोधकनिरुक्त-सार्थक्यम्। एवं सत्त्वप्रधानानि नामानीत्यनेन सुबन्ते प्रत्ययार्थप्राधान्यबोधनाय द्रव्यप्राधान्यबोधनम्इति **काशिका**। अथात्र निरुक्तमहाभाष्यवचनस्थितक्रिया-भावशब्दयोः कर्मव्युत्पत्त्या फलमप्यर्थः। तथा च कर्तृप्रत्ययसमभिव्याहारे व्यापारप्राधान्यम् कर्मप्रत्यये फलप्राधान्यं च सिद्ध्यति इति **कान्तिः**। प्राधान्यं चोपस्थितत्वात् स्ववाचकप्रकृतिप्रत्ययार्थनिरूपितमेव। नातः "काष्ठैः पाकः" इत्यादौ प्रत्ययार्थकरणनिष्ठप्रकारतानिरूपितविशेष्यताशालिबोधजनके पाकादि-नाम्नि अतिप्रसङ्गः। न वा औत्सर्गिकैकवचनान्तभावविहिततव्याद्यन्तनाम्नि सः। तथा च तिङ्बोध्यार्थनिष्ठप्रकारतानिरूपितविशेष्यतातात्पर्यप्रतिपादकत्वं पर्यवस्यति। न चैतत्प्राधान्यमितराविशेषणत्वरूपम्। "पचति भवति", "पश्य मृगो धावती"त्यादिवाक्यघटकपच्याद्यर्थक्रियायां तदसत्त्वेन पचतीत्याद्याख्याते

अव्याप्तेः। तथा च भावप्रधानकत्वं तिङर्थनिष्ठप्रकारतानिरूपितविशेष्यताशालिभावप्रतिपादकत्वं पर्यवस्यति। इति **दर्पणः**।

॥सत्त्वप्रधानानि नामानीति॥ सत्त्वं द्रव्यं लिङ्गाद्यन्वयि, तत्प्रधानबोधजनकम् तन्निष्ठमुख्यविशेष्यताकबोधजनकमित्यर्थः। मुख्यविशेष्यतानिवेशाच्च पचत्यादौ तिङन्ते आश्रयत्वनिष्ठा संख्यानिष्ठा च या प्रकारता तन्निरूपितकर्त्रादिसत्त्वनिष्ठविशेष्यताकबोधजनकत्वेऽपि नातिप्रसङ्गः। यद्यप्यत्र क्रियानिष्ठप्रकारतानिरूपितविशेष्यताशालिबोधजनकत्वमिति नामलक्षणपरिष्कारेऽपि पचतीत्यादौ न अतिप्रसङ्गः, अथापि "घट" इत्यादौ तादृशबोधजनकत्वाभावात् अव्याप्तिः स्यात्, अतः तन्निष्ठमुख्यविशेष्यताकबोधजनकमिति लक्षणमेव युक्तमिति **काशिका**।

ननु भावप्रधानमाख्यातमिति निरुक्तेन धात्वर्थेषु भावनायाः - व्यापारस्य प्राधान्यं बोध्यते। तथा च अनेन धात्वर्थयोः फलव्यापारयोः मध्ये व्यापारस्य प्राधान्यं बोध्यते। न तु व्यापारस्य वाक्यार्थमुख्यविशेष्यत्वम्। अथ कथञ्चित् अनेन व्यापारस्य वाक्यार्थमुख्यविशेष्यत्वबोधनेऽपि वैयाकरणानाम् निरुक्तमिदं न प्रमाणम् वैयाकरणैः मुनित्रयवचनातिरिक्तस्य कस्यापि वचनस्य प्रमाणतया अनभ्युपगमात् इति चेदाह - **भूवादिसूत्रस्थे**त्यादि। पूर्वोक्तस्य नैरुक्तसिद्धान्तस्य मुनित्रयसम्मतत्वेन तस्यापि प्रामाण्यं भवत्येवेति भावः।

2.9.3. भूवादिसूत्रस्थभाष्यप्रदर्शने मतभेदाः

अथात्र भूवादि(पा. 1-3-1) सूत्रस्थभाष्यस्वरूपवर्णनेऽपि अस्ति मतभेदः व्याख्यानानाम्। **दर्पणे** तावत् - इत्थं हि तत्र भाष्यम् - "का तर्हीयं वाचो युक्तिः पचति भवति, त्वं पचसि भवति, पक्ष्यति भवतीति। सैषा वाचो युक्तिः पच्यादिक्रियाः भवतिक्रियायाः कर्त्र्यो भवन्ति" इति। तेन चाहत्यैव पच्यादिक्रियाकर्तृकभवनक्रियायाः प्राधान्यं प्रतिपाद्यते। धात्वर्थक्रियायाः आख्यातार्थविशेषणत्वाभ्युपगमे तु स्वस्वार्थविरुद्धत्वेन पदार्थान्तरे विशेषणतयान्वये नैराकाङ्क्ष्येण भवत्यर्थक्रियायामाख्यातार्थविशेषणपचादिक्रियाणामन्वयासम्भवेन तद्विरोधोऽप्रतिरोध एव स्यादिति भावः। "पचति भवति" इत्यस्य किंचिदाश्रयनिष्ठवर्तमानकालिकपचनक्रियाकर्तृका वर्तमाना भवनक्रियेति, "त्वं पचसि भवति" इत्यस्य त्वदभिन्नाश्रयनिष्ठपचनक्रियाकर्तृका भवनक्रियेति रूपेण बोधः। "पक्ष्यति भवति" इत्यस्य किंचिदाश्रयनिष्ठभविष्यत्कालीनपचनक्रियाकर्तृका भवनक्रिया इति बोधः।

भविष्यत्कालिकपाकक्रियाया अपि वर्तमानभवनाश्रयत्वं सत्कार्यवादमाश्रित्य। यदि च तिङन्ते आख्यातार्थकर्तृकर्मविशेष्यकबोधः स्यात्तर्हि "पचति भवती"-त्यस्य "वर्तमानकालिकपचनक्रियाश्रयः भवनकर्ता" इत्येव बोधः स्यात्। तथा च द्वयोः तिङर्थकर्त्रोः अभेदेनान्वये पाककर्त्रभिन्नः भवनकर्तेत्येव बोधः स्यात् न तु पचनक्रियाकर्तृकं भवनमिति।

तिङन्तकर्तृकर्ममुख्यविशेष्यकत्वे प्रकृत्यर्थव्यापारस्य प्रत्ययार्थकर्तृकर्मणोः विशेषणत्वेनैव अन्वयस्य क्लृप्ततया तिङर्थान्वयेन नैराकाङ्क्ष्यात् भूधात्वर्थभवन-क्रियायां पचधात्वर्थव्यापारस्य अन्वयासम्भवः। द्वयोरपि व्यापारयोः तिङर्थ-विशेषणत्वेन परस्परं निराकाङ्क्षत्वात्। ततश्चैतद्भाष्यविरोधः दुष्परिहर एवेति तस्याशयः। किं च तिङर्थमुख्यविशेष्यत्वे "त्वं पचसि भवती"ति प्रथमपुरुषे प्रयोग एव न स्यात्। तिङर्थकर्त्रा सह युष्मदर्थसामानाधिकरण्यात् तस्यैव भवनकर्तृत्वेन प्रतीतेः मध्यमपुरुष एव स्यात्। यदा तिङर्थः विशेषणं धात्वर्थश्च प्रधानम् तदैव पचनक्रियायाः भवनकर्तृत्वमिति भवतीति तिङर्थस्य युष्मदर्थ-सामानाधिकरण्याभावात् न मध्यमपुरुष इति एतेन भाष्येण सुस्पष्टं धात्वर्थक्रिया-प्राधान्यं बोध्यते। युक्तं चैतत्। अतः इदं भाष्यं प्रमाणमेव। अत एव अन्ये व्याख्यातारः सर्वे दर्पणकारमेव अनुसस्रुः। **तत्त्वदर्शिनी**कारा एव दर्पणस्य चिन्त्यतां वदन्ति इत्थम् - "भवनस्य आश्रयत्वेन पाकक्रियायाम् तस्याश्च प्रत्ययार्थे अन्वयोपगमेन "भवनकर्तृभूता या पाकक्रिया तदाश्रय" इति प्रत्ययार्थविशेष्यकबोधोपगमेऽपि पचिक्रियायाः भवनकर्तृत्वस्य सूपपादतया तद्भाष्यविरोधो नास्ति। अतः तद्भाष्यं न प्रकृतार्थसाधकमिति। तेषामयमाशयः। यथा सुब्विभक्त्यर्थस्य प्रधानस्यापि कारकस्य धात्वर्थव्यापारे फले च इतरविशेषणभूतेऽपि अन्वयः स्वीक्रियते तथात्र "भवति" इत्यत्र तिङ्विभक्त्यर्थकर्तुः विशेष्यस्य पचधात्वर्थव्यापारेऽन्वये सति भवनक्रियाकर्तृत्वं पचनक्रियायाः सिद्ध्यतीति। परन्तु यत्र द्वयोः पदार्थयोः अर्थात् पदार्थविशेष्यभूतयोः साक्षादन्वयः सम्भवति तत्र साक्षादेवान्वयः न्याय्यः। अत्र भवतीति पदार्थ-मुख्यविशेष्यः भवनकर्ता पचतीतिपदार्थमुख्यविशेष्यः पाककर्ता। अनयोः पदार्थयोः साक्षादभेदेनान्वयोपपत्तेः पाककर्त्रभिन्नः भवनकर्तेत्येव बोधः युक्तः। एवं मुख्यविशेष्येण साक्षादन्वययोग्यतायां सत्यामपि विशेषणेनान्वये तु बहूपप्लवः

स्यात्। अतश्च आख्यातार्थकर्तृकर्ममुख्यविशेष्यकः बोधः यदि तिङन्तेऽभ्युपेयते तर्हि उक्तभाष्यविरोधः दुष्परिहर एव।" इति।

तत्त्वदर्शिन्यां भूवादि(पा. 1-3-1)सूत्रस्थमेव भाष्यान्तरं प्रमाणतया निर्दिष्टम्। तत्र हि भाष्ये "भाववचनो धातु"रिति न्यासे कथं ज्ञायते भाववचनाः पचादयः इति प्रश्ने यदेतेषां भवतिना सामानाधिकरण्यं पचति भवति पक्ष्यति भवति अपाक्षीद्भवतीत्युक्तम्। ततः पचादीनां धातुसंज्ञा न प्राप्नोति यथा हि भवता क्रियावचने धातौ करोतिना पचादीनां सामानाधिकरण्यं निदर्शितं न तथा भाववचने निदर्श्यते। करोतिः पचादीनां सर्वान् कालान् सर्वान् पुरुषान् सर्वाणि वचनानि च अनुवर्तते। भवतिः पुनः वर्तमानकालं चैकत्वं चेति तन्न्यासे दूषणमुक्तम्। पक्ष्यति भविष्यतीति न निर्दिश्यते इत्यपि तत्रोक्तम्। इदमेव भाष्यं धात्वर्थप्राधान्ये मानम् इति। अस्यायमाशयः। यथा क्रियावचनो धातुरिति न्यासे किं करोति पचति, किं करिष्यति पक्ष्यति, किमकरोत् अपचत्, किं कुर्वन्ति पचन्तीत्यादिना सर्वेषु वचनेषु सर्वेषु कालेषु सर्वेषु पुरुषेषु च करोति सामानाधिकरण्यं प्रतिपादितं तथा भाववचनो धातुरिति न्यासे किं भवति पचतीत्यादिरूपेण पचति भवति पचतः भवतः इत्यादिरूपेण सर्वत्र भवतिसामानाधिकरण्यं न निर्दिश्यते। किन्तु केवलवर्तमानत्वैकत्वबोधक-भवतिसामानाधिकरण्यमेव निर्दिश्यते। तस्मादिदं न युक्तमिति तद्भाष्याशयः। एतच्च भाष्यं तिङन्ते धात्वर्थप्राधान्ये एव सङ्गच्छते। न तु प्रत्ययार्थप्राधान्ये। तथा हि - यदि प्रत्ययार्थस्यैव प्राधान्यं स्वीक्रियते तर्हि "यो भाविपाकाश्रयः स भविष्यती"त्यर्थे पक्ष्यति भवतीति प्रयोगस्य न्याय्यतया पक्ष्यति भवतीति न निर्दिश्यते इति भाष्यमसङ्गतं स्यात्। यदि धात्वर्थप्राधान्यं स्वीक्रियते तर्हि भाविपाकानुकूलव्यापारकर्तृकः भाविभवनानुकूलव्यापार इत्यर्थविवक्षायामेव तद्वाक्यं प्रयोक्तव्यम्। तत्र पाकस्य भावित्वं पचधातूत्तरप्रत्ययेनैव अभिहितमिति पुनः तस्मिन् प्रत्ययो न भवति। तादृशार्थविवक्षापि नेति तादृशं वाक्यमेव न भवति। किञ्चात्र केवलवर्तमानत्वैकत्वबोधकभवतिसामानाधिकरण्यमिति कथन-मपि व्यापारस्य प्राधान्ये एव सङ्गच्छते। व्यापारे एकत्वसंख्यां विना अन्य-संख्यायाः असम्भवात्। यदि च तिङर्थस्य प्राधान्यं स्यात् तर्हि "देवदत्तौ भवतः"

2.10 आख्यातार्थकर्तृकर्मणोः प्राधान्ये दोषप्रदर्शनम् तत्प्राधान्यवादिमतखण्डनम्

अपि च आख्यातार्थप्राधान्ये तस्य देवदत्तादिभिः सममभेदान्वयात्प्रथमान्तस्य प्राधान्यापत्तिः। तथा च "पश्य मृगो धावति" इत्यत्र भाष्यसिद्धैकवाक्यता न स्यात्,

---

इति वत् "पचतः भवतः" इत्यपि स्यात्। अत एव भवतिकर्तृत्वं यस्याः क्रियायाः बोध्यते तद्वाचकतिङन्तमपि केवलं प्रथमपुरुषैकवचने एव निर्दिश्यते। इति। इदं भाष्यमुक्तार्थे प्रमाणमित्यत्र न काप्यनुपपत्तिः। परन्तु दर्पणेन प्रदर्शितमपि प्रमाणमेव। वस्तुतः द्वयोरपि भाष्ययोः भूवादि(पा. 1-3-1)सूत्रे एव वर्तमानत्वात् भूवादि(पा. 1-3-1)सूत्रस्थभाष्यपदेन उभयमपि गृह्यते। उभयमपि पचति भवतीत्यादि प्रयोगविषयकमेव। कृतेराख्यातार्थत्ववादिनां मते पाककृतिः भवनकर्त्रीति विशिष्टकृतौ भवनकर्तृत्वबोधनेन तद्विशेषणीभूतस्य तत्कर्तृत्वं सिद्ध्यतीति तन्मतं समर्थ्यते कैश्चित्। विशेष्यस्य कर्तृत्वेन विशेषणमपि तथेति तु न सम्यक्।"घटोऽनित्य" इति वाक्यात् घटविशेषणीभूतघटत्वस्याप्यनित्यत्वा-पत्तेः। अतः धात्वर्थविशेष्यकबोधे एव "पच्यादिक्रियाः भवतिक्रियायाः कर्त्र्यो भवन्ती"ति भाष्यं सङ्गच्छते। नान्यथा।

॥**भूवादीति**॥ अत्र आदिपदेन रूपप् (पा. 5-3-66) सूत्रस्थभाष्यसङ्ग्रहः। तत्र हि – प्रशंसायामिति प्रकृत्यर्थविशेषणं, प्रशंसायां यत्प्रातिपदिकं वर्तते तस्माद्रूपप् स्वार्थे भवति, स्वार्थिकाश्च प्रकृतितो लिङ्गवचनान्यनुवर्तन्ते इत्युक्तम्। ततः रूपपो तिङन्तादपि विधानात् तिङन्तप्रकृतौ लिङ्गवचनाभावात् अम्भावः न प्राप्नोतीत्याशङ्क्य "प्रकृतेर्लिङ्गवचनाभावात् तिङ्प्रकृतेरम्भाववचनम् " इति वार्तिक-मारब्धम्। तस्य च प्रत्याख्यानं "सिद्धं तु क्रियाप्रधानत्वात् " इति वार्तिकेन कृतम्। तत्र हीत्थं भाष्यं – "सिद्धमेतत्। कथम् ? क्रियाप्रधानत्वात्। क्रियाप्रधान-माख्यातं भवति। एका च क्रिया। द्रव्यप्रधानं नाम। कथं पुनर्ज्ञायते क्रियाप्रधान–माख्यातं द्रव्यप्रधानं नामेति? यत्क्रियां पृष्टः तिङाचष्टे – किं देवदत्तः करोति? पचतीति"। अनेन च स्पष्टं ज्ञायते यदाख्यातं क्रियाप्रधानमिति।

2.10.1 अपि चेत्यादिमूलावतरणे व्याख्यानां भ्रान्तिः, विशिष्टाद्वैतिनां जगन्नाथादीनां च शाब्दबोधप्रकारखण्डनम्

एवं तिङन्ते धात्वर्थव्यापारप्राधान्ये तिङर्थकर्तृकर्मणोश्च धात्वर्थविशेषणत्वे च प्रमाणं प्रदर्श्य तथानङ्गीकारे "प्रत्ययार्थः प्रधानम्" इति औत्सर्गिकनियममाश्रित्य

प्रत्ययार्थकर्तृकर्मणोः प्राधान्ये(विशेष्यत्वे)च दोषमुद्भावयति - **अपिच्चेति**। अत्रेदमवधेयम्। अस्याः कारिकायाः वैयाकरणसिद्धान्तनिरूपणमेवोद्देश्यम् नत्वन्यमतखण्डनम्। तथा चैकैकस्मिन्नपि विषये प्रथमं प्रमाणम् अनन्तरं तत्साधकयुक्तिप्रदर्शनं च क्रियते। अत्र धात्वर्थप्राधान्ये तिङर्थकर्तृकर्मणोः विशेषणत्वे च प्रमाणं निरुक्तभाष्यादि प्रदर्शितम्। इदानीं युक्त्यापि तस्य समर्थनं करोति - **अपिच्चेति**। **कान्तिव्याख्यायामपि** "वचनविरोधमुक्त्वा युक्तिविरोधमप्याह" इति अत्यन्तं सङ्गतः अवतरणग्रन्थः दृश्यते। **शङ्करशास्त्रिभिः** अत्यन्तलघुभूतः तथा प्रकृतसन्दर्भानुगुणश्च इत्थम् अवतरणग्रन्थः रचितः- "प्रकृतिप्रत्ययार्थयोः प्रत्ययार्थः प्रधानम्" इति नियमस्यासङ्कोचे दूषणान्तरमाह" इति।

अथात्र **दर्पणकारेण** नन्वित्यारभ्य अत्यन्तं सुदीर्घः अवतरणग्रन्थः रचितः। तस्य सारांशः अत्र प्रस्तूयते - "भावप्रधानमाख्यातम्" इत्यत्र आख्यातपदं तिङन्तपरम्। तथा च आख्यातार्थेषु भावस्य प्राधान्यमनेन बोध्यते। भावो नाम भावना नैयायिकमते कृतिः। सा च कर्त्राख्याते कृतिः कर्माख्याते कर्मत्वं - फलम् तन्निरूपिताश्रयत्वं वा। यतः नैयायिकैः संख्याकालातिरिक्तस्य सर्वस्यापि तिङर्थस्य भावनापदव्यपदेश्यत्वमभ्युपगतम्। कर्तृत्वं तिङर्थ इति तु भूवादि(पा. 1-3-1)सूत्रे अन्वयव्यतिरेकाभ्यां धात्वर्थतिङर्थनिर्णयसन्दर्भे भाष्यकारेणैवोक्तम्। तथा हि - तत्र पचतिशब्दमपहाय पठतीत्युक्ते "कश्चिच्छब्दो हीयते कश्चिदुपजायते कश्चिदन्वयी, पच्छब्दो हीयते पठ्शब्द उपजायते अतिशब्दश्चान्वयी, अर्थोऽपि कश्चिद्धीयते कश्चिदुपजायते कश्चिदन्वयी, विक्लित्तिर्हीयते पठिक्रियोपजायते कर्तृत्वमेकत्वं चान्वयि" इत्युक्तम्। अत्र "अति" इत्युक्ते तिङ्। तस्य कर्तृत्वमर्थ इति साक्षात् भाष्यकारेणोक्तम्। क्रियाप्रधानमाख्यातमिति भाष्ये क्रियापदमपि भावनापर्याय एव। अत एव "क्रियां पृष्टः तिङाचष्टे । किं करोति पचति पठतीति" तिङा एव क्रिया बुद्ध्यत इत्युक्तं न तिङन्तेनेति। "भावकालकारकसंख्याः आख्यातार्थः तत्र भावः प्रधानमि"ति निरुक्तभाष्यवचनेन सकलकारकसंख्याविशिष्टभावनायाः धात्वर्थत्वमाश्रित्य भावप्रधानमाख्यातमिति प्रवृत्तम्। तिङ्प्रत्ययस्य तु द्योतकत्वमेव। "पचति भवति" इत्यादौ तु पाकानुकूलाख्यातार्थकृतौ भवनाश्रयत्वरूपभवतीतितिङन्तार्थभावनान्वयो-

पगमेन पाकविशिष्टकृतौ भवनकर्तृत्वे अवगते तद्विशेषणपच्यर्थक्रियायामपि तल्लाभात् "पच्यादिक्रियाः भवतिक्रियायाः कर्त्र्यो भवन्ति" इति भाष्येणापि न विरोधः। अतश्च धात्वर्थभावनाप्राधान्ये नोभयं प्रमाणमित्यरुचेराह – **अपिचेति** इति। अस्य च दर्पणग्रन्थस्य "कर्तृकर्मणी न तिङर्थः, तिङर्थः कृतिरेव, प्रत्ययार्थ-प्राधान्येऽपि न क्षतिः इति वादिनं प्रति आह - अपिचेति" इति तात्पर्यमवगम्यते। तथा चेत् अपि चेति ग्रन्थः कर्तृकर्मणोः तिङर्थत्वसाधकः भवेत् कृतेः तिङर्थत्व-निरासकश्च भवेत्। ग्रन्थस्तु तथा न दृश्यते। अत्राख्यातार्थशब्देन यदि कृतिः विवक्षिता तर्हि कथं तस्याः देवदत्तादिभिः अभेदः, कथं वा प्रथमान्तस्य प्राधान्यम् इत्येवं वितर्क्य ग्रन्थं यथावत् व्याख्यातुम् असमर्थाः दर्पणकारः तदनुयायिनश्च "अभेदान्वयोक्तिः स्ववासनाभिप्रायेण। इदं कर्तुः वाच्यत्वपक्षे। कृतेस्तदर्थत्वपक्षे तु आश्रयत्वसम्बन्धेनैवान्वयादिति बोध्यम्" इति कौण्डभट्टस्यैव भ्रान्तत्वमसम्बद्ध-प्रलापित्वं च सूचयन्ति। वस्तुतः एते सर्वे स्वयं भ्रान्ताः अन्यान् भ्रामयन्ति। कर्तृकर्मणोः तिङ्वाच्यत्वमेव वैयाकरणसिद्धान्तः। यदपि "कर्तृत्वमर्थ" इति भाष्यं प्रमाणतया प्रदर्शितं तत्तु एकदेश्युक्तिरूपम्। बहुषु प्रदेशेषु भाष्ये कर्तृकर्मणोः तिङर्थत्वस्य प्रतिपादितत्वात्। तस्यैवात्र प्रतिज्ञातत्वाच्च। किञ्चेदानीं विचारः धात्वर्थः कः प्रत्ययार्थः कः इति विषये न। पूर्वमेव तस्य सर्वस्यापि निर्धारणात्। तत्र निगमनमपि एवं कृतं "एवं च तिङर्थः विशेषणमेव धात्वर्थभावनैव प्रधानम्" इति। अस्यैव निगमनस्य प्रमाणयुक्तिप्रदर्शनार्थमेवायं प्रयासः न तु तत्तदर्थ-निर्णयाय। अतश्चात्र दर्पणग्रन्थः अतीव भ्रामकः। अतश्च सः तदनुवादरूपाः **प्रभा-काशिका** -दिग्रन्थाश्च उपेक्ष्याः।

तत्त्वदर्शिन्यां तु "ननु भूवादि(पा. 1-3-1)सूत्रस्थभाष्यस्य अनेकाख्यात-घटितवाक्यविषयकतया चारितार्थ्यसम्भवात् एकाख्यातघटितवाक्यस्थले तिङर्थ-कर्तृकर्मणोः प्रकृत्यर्थापेक्षया विशेष्यत्वस्वीकारे न किं चिद्बाधकमित्यतः प्रत्ययार्थ-कर्तृमुख्यविशेष्यकबोधाभ्युपगमे दोषान्तरमाह - अपि चे"ति अवतरणिकास्ति। एषापि न हृदयङ्गमा। यतः अस्याः आख्यातद्वयघटिते व्यापारमुख्यविशेष्यकः बोधो भवतु एकाख्यातस्थले तु तिङर्थविशेष्यकः बोधो भवतु इति वादिनं प्रत्युच्यते इति तात्पर्यम्। यद्ययमेव कौण्डभट्टस्य आशयःस्याच्चेत् एकाख्यात-

स्थले एव दोषः प्रदर्शनीयः । न तु आख्यातद्वयघटितप्रयोगे पश्यमृगो धावतीत्यादौ। परन्तु दोषः प्रदर्शितः अनेकाख्यातघटितस्थले एवेति अयमप्युपेक्ष्य एव।

अथात्र दर्पणकारादीनां भ्रमे कारणं किमिति किञ्चित् विचारयामः। अपि चेत्यादिना तिङर्थकर्तृकर्मणोः विशेष्यत्वे अर्थात् तिङर्थकर्तृकर्मविशेष्यकबोधवादे दोषः प्रतिपाद्यते। शाब्दबोधप्रस्थानेषु एतादृशं प्रस्थानं तैः कुत्रापि न दृष्टम्। अतश्च एतादृशं मतमेव नास्ति चेत् दूषणं कथमिति। वस्तुतः विचार्यमाणे वैयाकरणमते एव यद्येवं स्यात् इति संभाव्य दोषप्रदर्शनेन तस्य संभावनस्य अयुक्तत्वप्रतिपादनमेव मुख्यमुद्देश्यमत्र। परिशील्यमाने वैयाकरणाभिमतमेव धात्वर्थं तिङर्थं चाङ्गीकृत्य तिङन्तेऽपि प्रत्ययार्थप्राधान्यमेवाङ्गीकृत्य बोधं वर्णयन्तः शास्त्रकाराः अपि उपलभ्यन्ते। श्रीमद्रामनुजसम्प्रदायानुयायिनः विशिष्टाद्वैतिनः वाक्यार्थे तिङर्थस्यैव मुख्यविशेष्यत्वमङ्गीकुर्वन्ति। तथा हि – न्यायपरिशुद्धि-सेश्वरमीमांसादिग्रन्थान् सम्यक्परिशील्य श्रीमद्भिः उत्तमूरु वीरराघवाचार्यैः "मीमांसामेयसङ्ग्रह" ग्रन्थः रचितः । तत्र ते विशिष्टाद्वैतिनां शाब्दबोधप्रकारमित्थमुपवर्णयन्ति-"समानाधिकरणपदानां सर्वविशेषणविशिष्टविशेष्यपरत्वम्। विशेष्याणां कारकद्वारा धात्वर्थे अन्वयः। धात्वर्थस्य आख्यातार्थे अन्वयः। भावना कृतिरेवाख्यातार्थ इति न युक्तम्। "लः कर्मणीति"(पा. 3-4-69) कर्तृकर्माद्यर्थे लकारानुशासनात्। अतः कर्तृकर्मणोरप्याख्यातार्थत्वमवश्यमभ्युपेयम्। अतश्च कर्तुः कर्मणो वा लकारार्थस्य विशेष्यत्वम्। तदुक्तं सेश्वरमीमांसायां वेदान्तदेशिकैः "विधिनात्वेकवाक्यत्वात् स्तुत्यर्थेन विधीनां स्युः" (मी-1-2-7) इति सूत्रव्याख्यायाम् - "स्वर्गकामः साध्ययागादिविशिष्टः इति विध्युद्देशार्थः" इति। तत्रैव तैः दीपग्रन्थस्य वाक्यमुद्धृतम् "यजेतोपासीतेति हि कर्तृलकारः। अतः कर्तारमेव बोधयति शास्त्रम्" इति । सर्वत्र लकारार्थ एव विशेष्यः। विध्यर्थस्यापि धात्वर्थेऽन्वयः इति।

रसगङ्गाधरे उत्प्रेक्षाप्रकरणे जगन्नाथेनापि तिङर्थकर्तृविशेष्यकः बोधः प्रदर्शितः। यद्यप्ययं पक्षः न तथा प्राचुर्यमाप अथापि शाब्दबोधप्रकारेष्वन्यतम अस्त्येव। कौण्डभट्टस्तु शाब्दबोधविषये स्थितानि सर्वाणि मतानि समालोचितवान्। तत्र एकदेशिमतमपि न त्यक्तवान्। अतः यद्यपि एतन्मतखण्डनमत्र नोद्देश्यमथापि प्रसङ्गवशात् तदपि "एका क्रिया द्व्यर्थकरी"ति न्यायेन सम्पन्नमिति ज्ञेयम्।

॥**आख्यातार्थप्राधान्ये** इति॥ आख्यातशब्दोऽत्र तिङ्परः। एवं च तिङर्थकर्तृ-कर्मरूपधर्मिप्राधान्ये इत्यर्थः। तिङ्प्रत्ययेन कर्तृकर्मणोः सामान्यतः उपस्थित्या सामान्यस्य च विशेषापेक्षत्वेन प्रथमान्तार्थेन सह अभेदेनान्वयः स्यात्। एवं च "देवदत्तः पचति" इत्यत्र विक्लित्त्यनुकूलव्यापाररूपप्रकृत्यर्थस्य आश्रयतासम्बन्धेन तिङर्थकर्तरि अन्वयः तिङर्थकर्तुः प्रथमान्तार्थदेवदत्तेन अभेदेनान्वयः इति "विक्लित्त्यनुकूलव्यापाराश्रयाभिन्नः देवदत्तः" इति बोधः स्यादिति देवदत्तस्य प्राधान्यं स्यात्। अथात्र कर्तृविशेष्यकबोधेऽपि "देवदत्तः विक्लित्त्यनुकूल-व्यापाराश्रयः" इति बोधः स्यादिति उभयथापि प्रथमान्तार्थस्य प्रकृत्यर्थनिरूपित-प्राधान्यं स्यात्। सिद्धान्तभूतधात्वर्थप्राधान्ये तु देवदत्तस्य तिङर्थकर्तरि अभेदेन अन्वयः, तिङर्थकर्तुः विक्लित्त्यनुकूलव्यापारे अन्वय इति "देवदत्ताभिन्नकर्तृनिष्ठः विक्लित्त्यनुकूलः व्यापारः" इति प्रथमान्तर्थस्य तिङर्थद्वारा धात्वर्थविशेषणत्वमेव स्यात् इति तस्य प्राधान्यं न भवति। तथा च कर्तुः तिङर्थत्वेऽपि तद्विशेष्यकः बोधः न स्वीकार्यः। तदेव सूचयति - **अभेदान्वयात् प्रथमान्तस्य प्राधान्यापत्तिः** इति॥इदमत्राकूतम्। पचतीत्यादितिङन्ते धात्वर्थभावनामुख्यविशेष्यत्वे भाव–प्रधानमाख्यातमित्यादिनिरुक्तादिबलात् भावनायाः वाक्यार्थमुख्यविशेष्यत्वं सिद्ध्यति। आख्यातार्थकर्तृकर्मविशेष्यकबोधाङ्गीकारे तु वाक्ये मुख्यविशेष्यत्वं कस्येत्यत्र प्रमाणाभावात् नैयायिकाः प्राभाकराश्च अनुसरणीयाः स्युरिति प्रथमा-न्तस्य मुख्यविशेष्यत्वापत्तिः।स्पष्टं चेदं विस्तरेण **भूषणे**। अत्र **दर्पणकाराः** तदनुयायिनः **प्रभापरीक्षाकाराश्च** - इदं च तन्मतेऽपि कर्ता आख्यातवाच्य इति स्वीयवासनानुसारेण । नैयायिकमते तु कृतेराख्यातार्थतया तस्या आश्रयत्वेनैव प्रथमान्तार्थेऽन्वयादिति व्याकुर्वन्ति। अयं सर्वोऽपि ग्रन्थः नैयायिकमतखण्डनपर एवेति तेषां भ्रान्तिः। एवं भ्रान्ताः ते कौण्डभट्टस्यैव भ्रान्तत्वं प्रतिपादयन्ति। अत्रै-वाग्रे स्थितं "एवं च भावनाप्रकारकबोधे प्रथमान्तपदजन्योपस्थितिः कारणमिति नैयायिकोक्तं नादरणीयम्" इति ग्रन्थ एव तेषां भ्रान्तत्वे कारणम्। अयं ग्रन्थः उपसंहाररूपः पूर्वं प्रकान्तस्य इति मन्वानास्ते नैयायिकमतखण्डनपरतैव सर्वस्येति भ्रान्ताः नैयायिकमते कथमपि ग्रन्थसमन्वयं कर्तुं प्रयतितवन्तः। परन्तु वस्तुस्थितिः न तथा।

प्रथमान्तमृगस्य धावनक्रियाविशेष्यस्य दृशिक्रियायां कर्मत्वापत्तौ द्वितीयापत्तेः। न चैवमप्रथमासामानाधिकरण्यात् शतृप्रसङ्गः। एवमपि द्वितीयाया दुर्वारत्वेन "पश्य मृग" इत्यादिवाक्यस्यैवासम्भवापत्तेः। न च "पश्य" इत्यत्र "तम्" इति कर्माध्याहार्य्यम्, वाक्यभेदप्रसङ्गात्। उत्कटधावनक्रियाविशेषस्यैव दर्शन - कर्म्मतयाऽन्वयस्य प्रतिपिपादयिषितत्वाद् अध्याहारे अनन्वयापत्तेश्च।

2.10.2 पश्य मृगो धावति, धावन्तं मृगं पश्य इत्यादिस्थले बोधविचारः

अस्तु नाम बोधे प्रथमान्तार्थस्य प्राधान्यमिति चेदाह – **तथा चेति**। तथा-चेदित्यर्थः। यदि च सर्वत्र तिङर्थविशेषणकप्रथमान्तविशेष्यकः बोधः स्वीक्रियते तर्हि "पश्य मृगो धावती"त्यस्य एकवाक्यत्वं न स्यात्। मास्तु एकवाक्यत्वमिति चेदाह - **भाष्यसिद्धेति**। एतादृशानां वाक्यानामेकवाक्यत्वेन व्यवहारः महाभाष्य-कारेणाङ्गीकृतः। अतश्च एतादृशानामेकवाक्यत्वं लोकसिद्धमित्यर्थः। वस्तुतः "पश्य मृगो धावती"ति वाक्यं महाभाष्ये न दृश्यते। किन्तु वाक्यपदीये दृश्यते- मृगो धावति पश्येति(वा.प.क्रि.51) इति कारिकायाम्। परन्तु तत्सदृशमेव वाक्यं भाष्ये दृश्यते - "अपाक्षीद्देवदत्तोऽवेहि" "पचति भवती"ति। अत्र हि प्रथमे वाक्ये देवदत्तकर्तृकभूतकालिकविक्लित्त्यनुकूलक्रियायाः ज्ञानविषयत्वं विधीयते इति पचनक्रियायाः ज्ञाने कर्मत्वेनान्वयः। द्वितीये तु पचनक्रियायाः भवनकर्तृत्वेन विवक्षेति पचनक्रियाकर्तृकं भवनमिति बोधः। यदि च प्रथमान्तार्थस्य तिङर्थ-विशेष्यत्वं स्यात् तर्हि "धावति मृगः" इत्यस्य "धावनानुकूलव्यापाराश्रयाभिन्नः मृगः" इति कर्तृकर्मणोः तिङर्थत्वमते, "धावनानुकूलकृतिमान् मृगः" इति कृतेः तिङर्थत्वपक्षे च बोधः स्यात्, तथा "पश्ये"त्यस्य युष्मदर्थाध्याहारे दर्शनकर्त्रभिन्नः त्वमिति दर्शनकृत्याश्रयस्त्वमिति वा बोधे एकविशेष्यकबोधजनकत्वरूपम् एक-वाक्यत्वं न स्यात्। तिङर्थस्य धात्वर्थविशेषणत्वं धात्वर्थस्यैव मुख्यविशेष्यत्वमिति पक्षे तु मृगो धावतीत्यस्य मृगकर्तृकं धावनमर्थः, पश्येत्यस्य त्वत्कर्तृकं प्रेरणा-विषयीभूतं दर्शनमर्थः, अतश्च वाक्यमुख्यविशेष्यभूते दर्शने "मृगो धावती"ति खण्डवाक्यमुख्यविशेष्यभूतधावनस्य कर्मतयान्वयात् "मृगकर्तृकधावनकर्मकं त्वत्कर्तृकं प्रेरणाविषयीभूतं दर्शनम्" इति एकमुख्यविशेष्यकः बोधः सिद्ध्यतीति एकवाक्यत्वं सिद्ध्यति। अत्र च एकवाक्यताशब्देन पदैकवाक्यता विवक्षिता।

पदशः पदान्तरेऽन्वयः यत्र सा पदैकवाक्यता। अत्र च मृगपदस्य धावति पदेन धावति पदस्य पश्येति पदेन च सम्बन्ध इति पदैकवाक्यता सिद्ध्यति।

"सुवृष्टिश्चेद्भवेत् सुभिक्षं भवेदि"त्यादौ वाक्यैकवाक्यता। अत्रैकवाक्यत्वसिद्ध्यर्थं धावनकर्तुः मृगस्य दर्शने कर्मतयान्वयस्वीकारे "मृग"शब्दात् द्वितीयापत्तिः, प्रधानदर्शनक्रियानुरोधिकर्मत्वस्य बलवत्त्वात्। तदेव कथयति - **प्रथमान्तमृगस्य धावनक्रियाविशेष्यस्येत्यादि**। **प्रथमान्तमृगस्य** - प्रथमान्तार्थमृगस्य, **धावन-क्रियाविशेष्यस्य** - तिङर्थकर्तुर्धावनक्रियायाः विशेष्यत्वेन तत्राभेदेन अन्वितस्यापि तत्क्रियाविशेष्यत्वं पर्यवस्यति इति तादृशस्येत्यर्थः। नैयायिकमते तु तिङर्थकृतेः प्रथमान्तार्थे विशेषणत्वेन प्रथमान्तार्थस्यैव मुख्यविशेष्यत्वमिति पक्षद्वयेऽपि मृगस्यैव विशेष्यत्वमागतम्। तथा च तस्यैव दृशिक्रियायां कर्मत्वेन अन्वयः वक्तव्यः। ततश्च मृगस्य कर्मत्वापत्तौ - कर्मत्वस्य प्राप्तौ सत्यां, द्वितीयापत्ति-रित्यर्थः। एवमन्वये सति धावतीति लडन्तं मृगस्य विशेषणम्। मृगश्च दर्शने विशेषणम्। ततश्च मृगशब्दात् द्वितीयायाः, धावति इति लडन्तस्य मृग-विशेषणत्वेन "लटः शतृशानचा"(पा. 3-2-124)विति सूत्रेण लटः स्थाने शतृ-प्रत्ययस्य च प्रसङ्गः। तथा च "धावन्तं मृगं पश्ये"त्येव प्रयोगः स्यात्, न तु "धावति मृगः पश्ये"ति। तदेवाह - **न चैवमिति**। **एवमपीति**॥ शतृप्रसङ्गे सत्यपि। मृगशब्दात् प्रधानानुरोधिद्वितीयायाः **दुर्वारत्वात्** - वारयितुमशक्यत्वात्। मृग-शब्दात् द्वितीयायां धावतीति लडन्तस्य अप्रथमाविशेषणत्वेन शतृप्रत्ययस्यैव प्राप्त्या "धावन्तं मृगं पश्ये"त्येव प्रयोगः स्यात्। ततश्च "पश्य मृगो धावती"ति प्रयोगस्यैव विलयः स्यात्। ननु "अर्थैकत्वादेकं वाक्यं साकाङ्क्षं चेद्विभागे स्यात्" (मी 2-1-14-46) इति सूत्रेण मीमांसकाः विभागे भेदे सति साकाङ्क्षं चेत् तर्हि एकार्थप्रतिपादकत्वादेकं वाक्यमिति स्वीकुर्वन्तीति प्रकृते तमित्यध्याहारे कृते कमिति आकाङ्क्षायाः उत्थानात् धावनविशिष्टस्य मृगस्यैव तच्छब्देन परामर्शात् मृगस्य दर्शनकर्मत्वं सिद्ध्यति। तच्छब्दप्रतिपाद्ये कर्मत्वविवक्षणात् तच्छब्दात् द्वितीया। मृगशब्दात् प्रथमा। ततश्च तद्विशेषणत्वेऽपि धावतीति लडन्तप्रयोगश्च प्रथमासामानाधिकरण्यात् साधयितुं शक्यः,एकवाक्यतापि सिध्यतीति इति न दोषः इति चेदाह - **उत्कटेति**। अयमत्राभिसन्धिः। "पश्य मृगो धावति" "धावन्तं मृगं पश्य" इति वाक्यद्वयमपि व्यवहारेऽस्ति। किमनयोः द्वयोरपि तात्पर्यमभिन्नं भिन्नं

वा ? यदि तात्पर्यमभिन्नम् उभयत्र मृगकर्मकं दर्शनमेवाभिप्रेतं तर्हि एकविधमेव वाक्यं स्यात्। दृश्यते तु भिन्नं वाक्यम्। ततश्च व्यवहारद्वयस्य विवक्षाभेदः कारणमिति अवश्यं वक्तव्यम्। कोऽसौ विवक्षाभेद इति चेत् - एकत्र मृगस्यैव साक्षात् दर्शनकर्मत्वेन विवक्षा। अत्र च तात्पर्यं मृगविशेषदर्शने एव, न तु तदीय-गतिविशेषदर्शने। अन्यत्र च धावनक्रियायाः एव साक्षात् दर्शनकर्मत्वेन विवक्षा- अत्र तात्पर्यम् विशिष्टस्य गतिविशेषस्य दर्शने न तु मृगस्य दर्शने। तथा च यत्र गतिविशेषस्य धावनस्य साक्षाद्दर्शनकर्मत्वं विवक्षितं तत्र "पश्य मृगो धावती"ति वाक्यम्, यत्र तु मृगस्यैव साक्षाद्दर्शनकर्मत्वेन विवक्षा तत्र "धावन्तं मृगं पश्ये"ति वाक्यमिति व्यवस्था। तथा च धावतिपदार्थधावनस्यैव दर्शनकर्मत्वं वक्तव्यम्। तच्च तदैव सम्भवति यदि तिङन्ते क्रियाप्रधानतया बोध्यते। यदि च तत्रापि कर्तैव तिङर्थः प्रधानः स्यात् तर्हि तद्विशेषणीभूतस्य धावनस्य दर्शने कर्मत्वेनान्वय एव न सिद्ध्येत् "पदार्थः पदार्थेनैवान्वेती"ति न्यायात्। तदेव उपपादयति – **उत्कटे-त्यादिना**। अत्र वक्त्रा उत्कटः मृगकर्तृकः धावनविशेष एव दर्शनकर्मत्वेन प्रतिपादयितुम् इष्टः इति तमित्याध्याहृत्य तच्छब्दपरामृष्टमृगस्य दर्शनकर्मत्वे साधितेऽपि विवक्षितार्थासिद्धिः। अध्याहारं विनैव पदैकवाक्यतायां सिद्धायां तमित्यध्याहृत्य वाक्यैकवाक्यतासम्पादनेऽतिगौरवम्। तदाह - **अध्याहारे अनन्वयापत्तेश्चे**ति ।अध्याहारः एव गौरवम्। तेन वाक्यैकवाक्यतास्वीकारः अति-गौरवमित्यर्थः। एवमतिगौरवाङ्गीकारेऽपि प्रतिपादयितुमिष्टस्य अर्थस्य सिद्धिर्न भवतीत्यपि बोध्यम्। तथा च निष्फलत्वात् गौरवं दोषायैव इति भावः। धावनस्य दर्शनक्रियायाम् इष्टस्य कर्मत्वेनान्वयस्य विवक्षितस्य अनापत्तिरिति भावः। किञ्च "शृणु मेघो गर्जती"त्यादिषु अध्याहारेणापि विवक्षितार्थः उपपादयितुं न शक्य एव। अत्र धात्वर्थविशेष्यकबोधं विना नान्या गतिरिति **कृष्णमित्रः**। "पश् मेघो गर्जती" त्यादिषु अध्याहारेणैव निर्वाहः वैयाकरणानां मतेऽपि। तथा च पश्य मृगो धावतीत्यादिषु एकवाक्यतासिद्ध्यर्थम् तादृशप्रयोगैः विवक्षितार्थलाभार्थं च धात्वर्थविशेष्यकतिङर्थकर्तृकर्मविशेषणकबोध एवाङ्गीकार्यः न तु तिङर्थकर्तृकर्म-विशेष्यक इति, अनया युक्त्यापि तिङन्ते प्रत्ययार्थप्राधान्यन्यायस्य (सङ्कोचः) अप्रवृत्तिः सिद्ध्यति। एवञ्च यथा तिङन्ते तिङर्थकर्तृकर्ममुख्यविशेष्यकबोधे "पश्य मृगो धावती"त्यादिवाक्यैः विवक्षितार्थासिद्धिः तथा तिङ्प्रत्ययस्य कृतौ

2.11 प्रथमान्तमुख्यविशेष्यत्ववादिनैयायिकमतखण्डनम्

एवञ्च भावनाप्रकारकबोधे प्रथमान्तपदजन्योपस्थितिः कारणमिति नैयायिकोक्तं नादरणीयम्। किन्तु आख्यातार्थकर्तृप्रकारकबोधे धातुजन्योपस्थितिर्भावनात्वावच्छिन्नविषयतया कारणमिति कार्यकारणभावो द्रष्टव्यः। भावनाप्रकारकबोधं प्रति तु कृज्जन्योपस्थितिवद् धात्वर्थभावनोपस्थितिरपि हेतुः "पश्य मृगो धावति" "पचति भवति" इत्याद्यनुरोधादिति दिक्।

शक्तिं स्वीकृत्य तस्याः प्रथमान्तार्थविशेषणत्वं स्वीकृत्य प्रथमान्तार्थमुख्यविशेष्यत्ववादिनैयायिकपक्षेऽपि पश्य मृगेत्यादिवाक्यैः विवक्षितार्थासिद्धिः समेति "सर्वत्र प्रथमान्तार्थविशेष्यक एव बोधः, आख्यातार्थकृतिप्रकारकबोधे प्रथमान्तपद -जन्योपस्थितिः कारणम्" इति नैयायिकपक्षोऽपि न युक्तः। तदेव वदति - **एवं चेति**। **भावनाप्रकारकेति**। अत्र भावनापदं कृतिपर्यायम्। नैयायिकैः भावनायाः कृतिशब्देन व्यवहारात् नव्यमीमांसकैः तस्याः एव कृतेः भावनाशब्देन व्यवहारात्। पूर्वोक्तकार्यकारणभावस्वीकारे यस्मिन् वाक्ये इतराविशेषणीभूतप्रथमान्तमस्ति तत्र तस्यैव प्रथमान्तस्य विशेष्यत्वं तदर्थमुख्यविशेष्यकश्च बोध एव वर्णनीय इति विवक्षितार्थालाभः। "पचति भवती"त्यादौ तु प्रथमान्ताभावे तिङर्थकृतेरेव भवने कर्तृत्वेन अन्वयः उपपादयितुं शक्यः "भवनाश्रया पाककृतिः" इति, परन्तु "त्वं पचसि भवती"त्यादौ प्रथमान्तस्य श्रूयमणत्वेन "पाककृत्याश्रयः त्वं भवनाश्रय" इति बोधे भवतेस्तिङः युष्मत्सामानाधिकरण्यात् मध्यमपुरुषे "त्वं पचसि भवसी"ति प्रयोगः स्यात्, "त्वं पचसि भवती"ति न स्यात्। तथा च त्वं पचसि भवसीति अनिष्टप्रयोगापत्तिः। तिङन्ते धात्वर्थविशेष्यत्वे तु धात्वर्थ - व्यापारस्यैव भवनकर्तृत्वमिति तद्विशेषणीभूतयुष्मदाद्यर्थस्य भवतीति तिङा सह सामानाधिकरण्याभावात् न मध्यमपुरुषापत्तिरूपः दोषः। तर्हि कार्यकारणभावः कथं ग्राह्य इति चेदाह - **किन्त्विति**। आख्यातार्थस्तिङर्थः। कर्ता कर्म च। तत्र कर्तृप्रकारकबोधे विशेष्यतया धातुजन्यायाः भावनोपस्थितेः कारणत्वं स्वीकर्तव्यमित्यर्थः। तत्रोपस्थितिविषयभूतायाः भावनायाः स्वरूपं किमित्युक्ते आह- **भावनात्वावच्छिन्नेति**। तथा च धातुतः धात्वर्थरूपेण भावनात्वावच्छिन्न– भावनाप्रतीतिः यत्र तत्र तिङर्थकर्तुः विशेषणत्वेनान्वय इत्यर्थः फलितः। नन्विदमनुपपन्नम्। पचादिभ्यःधातुभ्यः अधिश्रयणादितत्तद्विशेषरूपेणैव व्यापारस्य

2.12 बोधवर्णनम्

इत्थञ्च पचति इत्यत्र एकाश्रयिका पाकानुकूला भावना, पच्यते इत्यत्र एकाश्रयिका या विक्लित्तिस्तदनुकूला भावनेति बोधः। देवदत्तादिपदप्रयोगे त्वाख्यातार्थ-कर्त्रादिभिस्तदर्थस्याभेदान्वयः। घटो नश्यति इत्यत्रापि घटाभिन्नाश्रयको नाशानुकूलो व्यापार इति बोधः। स च व्यापारः प्रतियोगित्वविशिष्टनाशसामग्री -

बोधाभ्युपगमात्। तथा च धातुतः प्रतीयमानस्य व्यापारस्य तत्तद्रूपेणैव प्रतीतेः भावनात्वावच्छिन्नस्य तस्य प्रतीतिः कथमिति चेत्अत्रायमाशयः। धातुतः तत्तद्-व्यापारविशेषविवक्षायां अधिश्रयणत्वादिरूपेणैव व्यापारस्य उपस्थितिः। यदा तु सामान्यतः अनुकूलव्यापारत्वेन विवक्षा तदा व्यापारत्वेन व्यापारस्योपस्थितिरपि भवति। अत एव पचधातोः विक्लित्त्यनुकूलः व्यापार इत्यपि अर्थविवरणं दृश्यते। एवमाख्यातार्थकर्मप्रकारकबोधे विशेष्यतया धातुजन्यफलोपस्थितिः कारणमिति कार्यकारणभावः सिद्ध्यति। एवं तिङन्ते सर्वत्र धात्वर्थभावनायाः प्राधान्यम् । कृदन्ते तु "सत्त्वप्रधानानि नामानी"ति निरुक्तबलात् तस्या कृदर्थं प्रति विशेषणत्व-मेवेति प्रकारतया धात्वर्थभावनोपस्थितिं प्रति कृज्जन्योपस्थितिः कारणमिति कार्यकारणभावः सिद्ध्यति। तथैवानेकाख्यातघटितवाक्येष्वपि पश्य मृगो धावती-त्यादिषु धातूपस्थाप्यभावनायाः अन्यधातूपस्थाप्यभावनायां विशेषणत्वेनान्वय-दर्शनात् "धात्वर्थभावनाप्रकारकबोधे विशेष्यतया कृज्जन्योपस्थितिः धात्वन्तर-जन्या भावनोपस्थितिर्वा कारणमि"ति कार्यकारणभावः वक्तव्यः। तदेवोपपादयति - **कृज्जन्योपस्थितिवत्** इति। भावनाप्रकारकबोधे यथा कृज्जन्योपस्थितिः हेतुः तथा धात्वन्तरजन्या भावनोपस्थितिरपीति भावः।

एवं व्याकरणशास्त्रीयं तिङन्ते धात्वर्थव्यापारमुख्यविशेष्यकं बोधं सप्रमाणं सयुक्तिकं चोपपाद्य प्रसङ्गममुमुपसंहर्तुकामः शाब्दबोधं वर्णयति - **इत्थञ्चेति**। **पचतीति**॥ पचतीत्यत्र धात्वर्थः विक्लित्तिः तदनुकूला अधिश्रयणादिरूपा भावना च। तिङर्थः कर्ता वर्तमानत्वम् एकत्वं च। एकत्वस्य आश्रयरूपे कर्तरि अन्वयः। तस्य च आश्रयस्य कर्तुः भावनायामाश्रयत्वसम्बन्धेन अन्वयः। तथा च एकत्व-विशिष्टः यः आश्रयः तन्निष्ठा अधिश्रयणादिरूपा भावनेत्यर्थः। वर्तमानत्वस्यापि भावनायामेव विशेषणत्वेन अन्वयः। फलस्यापि जनकत्वसम्बन्धेन भावनाया-मन्वयः। तथाच एकाश्रयनिष्ठा विक्लित्तिजनिका अधिश्रयणादिरूपा वर्तमाना

समवधानम्। अत्र एव तस्यां सत्यां नश्यति, तदत्यये नष्टः, तद्भावित्वे नङ्क्ष्यति इति प्रयोगः। देवदत्तो जानाति इच्छति इत्यादौ च देवदत्ताभिन्नाश्रयो ज्ञानेच्छाद्यनुकूलो वर्तमानो व्यापार इति बोधः। स चान्ततः आश्रयतैवेति रीत्योह्यम्॥ 2 ॥

भावनेति बोधः। "देवदत्तः पचती"ति प्रथमान्तसमभिव्याहारे च प्रथमान्तार्थस्य देवदत्तस्य तिङर्थाश्रये अभेदेनान्वयः। एवञ्च देवदत्ताभिन्नएकाश्रयनिष्ठेत्यर्थः सिद्ध्यति। तथा पच्यते इति कर्मतिङन्तेऽपि तिङर्थकर्मणि एकत्वान्वयः। तिङर्थकर्मणः - आश्रयस्य आधेयतासम्बन्धेन विक्लित्तरूपफलेऽन्वयः। विक्लित्तेः वर्तमानत्वस्य च भावनायामन्वयः। तथा च एकाश्रयनिष्ठा या विक्लित्तिः तज्जनिका अधिश्रयणादिरूपा वर्तमाना भावनेति बोधः। "ओदनः पच्यते" इति प्रथमान्त-समभिव्याहारे प्रथमान्तार्थस्य ओदनादेः तिङर्थकर्मणि अभेदेनान्वयः। तथा च ओदनाभिन्न - एकाश्रयनिष्ठा या विक्लित्तिः तज्जनिका वर्तमाना भावनेति बोधः।

2.12.1 प्रयोगभेदेन धात्वर्थवैलक्षण्यम्

अत्रायं विशेषः – नव्यनैयायिकमीमांसकाद्यभिमतकृतिभावनादिपदवाच्यप्रयत्न-विशेषोऽपि धात्वर्थ एव। स च चेतनेषु देवदत्तादिषु कर्तृभूतेषु बुद्ध्यते। अचेतनेषु कर्तृषु तत्तद्योग्यतासामार्थ्यादिकमाश्रित्य तत्तद्व्यापारविशेषस्य धात्वर्थतया भानम् । यथा "स्थाली पचती"त्यत्र स्थालीगतः धारणरूपः व्यापार एव धात्वर्थो भवति। तत्र कृतियत्नादीनां बाधात् तद्बोधो न। सविषयकधातून् परित्यज्य अन्येषु सर्वेषु सकर्मकेषु फलजनकत्वं व्यापारस्य साक्षात् परम्परया वा अस्त्येव। अत एव तत्र सर्वत्र विवरणं करोतिना सम्पाद्यते "पचति - पाकं करोति", "गच्छति, संयोगं करोति" "खादति - खादनं (गलबिलाधः संयोगम्) करोति" इत्यादि। अत्र करोति इत्यस्य निष्पादयतीत्यर्थः।विवरणवाक्ये घञन्तेन ल्युडन्तेन वा फल-मात्रमेव विवक्षितं न व्यापारः, तस्य करोतिना अभिधीयमानत्वात्। "घटं जानाती"त्यादौ ज्ञाधात्वर्थः यदि आवरणभङ्गः तर्हि तदनुकूलः इन्द्रियसंयोगा-दिरूपः व्यापारः भवितुमर्हतीति आवरणभङ्गरूपफलोत्पादकत्वं व्यापारस्येति सकर्मत्वम्। वस्तुतः तत्र ज्ञानमेव फलम्। तदनुकूलः चेतनव्यापारश्च जायमानस्य ज्ञानस्य आश्रयत्वमेव। "घटं जानाती"त्यस्य घटविषयकज्ञानाश्रयो भवतीत्येवा-नुभवात्। तथा चात्र आश्रयत्वमेव व्यापारः। अथवा विषयत्वमेव फलम्। ज्ञानं च

व्यापारः। स च आत्ममनःसंयोगमारभ्य विषयेन्द्रियसंयोगपर्यन्तः व्यापारः तज्जन्यज्ञानाश्रयत्वम् च। "पचती"त्यादिवत् जानातीत्यादेः सप्रयत्नकत्वेऽपि पाकं करोतीतिवत्ज्ञानं करोतीत्यादिरूपेण विवरणाभावादेव सविषयार्थकधातूनां फल-व्यापारयोः स्वरूपप्रतिपादने सकर्मकत्वोपपादने च क्लेशः। अत एव नैयायिकैः अत्र धात्वर्थः ज्ञानमेव तदेव फलं स एव व्यापारः इति स्वीकृत्य फलव्यधिकरण-व्यापारवाचित्वरूपसकर्मकत्वं जानात्यादौ उपपादयितुमशक्यमिति कृत्वा तस्य सकर्मकत्वस्य भाक्तत्वम् उच्यते।

एतदर्थमेव नागेशोऽपि "कर्मसंज्ञकार्थान्वय्यर्थकत्वम् सकर्मकत्वमि"ति सकर्मकत्वं परिष्करोति। अकर्मकधातुस्थले स्नातीत्यादौ "स्नानं करोति" इति विवरणं दृश्यते। ततश्च जलावगाहनादिरूपः सप्रयत्नः व्यापारः धात्वर्थस्सिद्ध्यति। फलं च जल-संयोगादिः विवक्षितुं न शक्यते, तथा सति सकर्मकत्वापत्तेः। अतश्च कर्तृनिष्ठमेव स्वच्छतादिरूपं फलं धात्वर्थतया विवक्षणीयम्। एवं च स्नानेन स्वच्छतां सम्पादयतीत्यर्थः।अत्र फलव्यापारयोः सामानाधिकरण्येन अकर्मकत्वम्। अथवा जलावगाहनरूपो व्यापारः स्नाधात्वर्थः। कर्मणः अपि धात्वर्थेनोपसङ्ग्रहात् अकर्मकत्वम्। निरूपितं चैवमेवाकर्मकत्वं वाक्यपदीये अस्त्यादौ –

आत्मानमात्मना बिभ्रदस्तीति व्यपदिश्यते।
अन्तर्भावाच्च तेनासौ कर्मणा न सकर्मकः॥ इति। (वा.प.तृ.सं.47)

बृहद्भूषणेपीदं स्पष्टं अस्त्यादावपि धर्म्यंशे इति कारिकाव्याख्यायाम्। एवञ्चात्र सर्वत्र चेतनस्य कर्तृत्वे तत्तत्फलसम्पादनेच्छया प्रवृत्तिः, तद्गतचेष्टादिना तत्तत्फल-सिद्धिश्च अनुभूयते। ततश्चात्र सर्वत्र कर्ता स्वव्यापारेण किमपि सम्पादयति इति तस्य स्वातन्त्र्यादिकमपि सिद्ध्यति। अतएवात्र सर्वत्र प्रायशः करोतिना विवरण-मपि युज्यते।

अथाकर्मकेष्वेव केषुचित् करोतिना विवरणमेव अशक्यम्। यथा - वर्धते, जायते। अत्र वृद्धिं करोति जनिं करोति इति विवरणमेवासाधु। तथा च अत्र किं फलं? कः व्यापारः? यत्र वृद्ध्युत्पत्त्यादिषु कर्तृत्वेन विवक्षितस्य चेतनस्य वा अचेतनस्य वा संकल्पपूर्वकः तत्साधकः कोऽपि प्रयत्नविशेषो वा व्यापारविशेषो वा नानुभूयते। तथा च कः तत्र कर्तृनिष्ठः व्यापारः?किं फलम् ? इति शङ्कां मनसि कृत्याह - **घटो नश्यतीति**। "नश्यती"त्यत्रापि "नाशं करोती"ति विवरणं न दृश्यते, न वा

आत्मनः विनाशस्य स्वव्यापारसाध्यत्वमपि अनुभूयते, प्रत्युत "नश्यती"त्यादिषु कर्तृत्वेन विवक्षितस्य नाशाश्रयत्वमनुभूयते। "नश्यती"त्यस्य च "नाशमनुभवति नाशाश्रयो भवती"ति वा अर्थः। तथा च नाशः फलम्, तदाश्रयत्वम् तदेवानुभवः व्यापारः इति तादृशानुभवः यन्निष्ठः स कर्तृत्वेन विवक्ष्यते।

2.12.2 नश्यतीत्यादौ बोधवर्णनम्

नन्वेवं "नश्यती"ति वर्तमाने कथं प्रयोगः इति चेदुच्यते। यदा नाशः नारब्धः किन्तु नाशानुकूला सामग्री कर्तरि अनुभूयते तदा वर्तमाने "नश्यती"ति प्रयोगः। तदेव विवृणोति - **घटो नश्यती**त्यादिना। अत्र यद्यपि "नाशं करोती"ति विवरणम-नुपपन्नम् अथापि नाशानुकूलो व्यापार इति विवरणं तूपपन्नमेव। तथा च सर्वत्र एकरूपतया पचतीत्यादिष्वपि "पाकानुकूलः व्यापारः" इत्येव विवरणं युक्तम्। "नाशानुकूलः व्यापार" इति विवरणेन नाशः फलं तदनुकूलः कश्चन व्यापारः इति उभावपि धात्वर्थ इति सूचयति। अथ कोऽयं व्यापार इति चेदाह – **प्रतियोगित्व-विशिष्टनाशसामग्रीसमवधानम्** इति। प्रतियोगित्वविशिष्टा या नाशसामग्री तस्याः समवधानं - वर्तमानत्वमित्यर्थः। प्रतियोगित्वस्य नाशसामग्र्याश्च सामानाधि-करण्यं सम्बन्धः। तथा च एकत्र प्रतियोगित्वस्य नाशसामग्र्याश्च वर्तमानत्वमित्यर्थः। यथा "घटो नश्यति" इत्यत्र घटे प्रतियोगित्वमस्ति, नाशस्य अभावरूपत्वेन "यस्याभावः स प्रतियोगी"ति न्यायात्। तत्रैव घटे दण्डाद्यभिघाता -दिरूपा नाशसामग्री अपि। नाशात्मकफलस्यापि प्रतियोगित्वसम्बन्धेन घट-निष्ठत्वम् तद्व्यापाररूपसामग्र्याश्च घटनिष्ठत्वमिति फलव्यापाररूपेण विवक्षित-द्वयोरपि एकनिष्ठत्वेन अकर्मकत्वम्। ॥ **अत एव**॥ नाशसामग्र्याश्रयत्वमेव व्यापार इति स्वीकारादेव। **तस्यां** - नाशसामग्र्यां सत्यां "नश्यती"ति वर्तमाने, नाश-सामग्र्याः नाशे "नष्ट" इति भूते, तद्भावित्वे तन्नाशसामग्रीप्रागभावे सति "नङ्क्ष्यति" इति प्रयोगाः उपपद्यन्ते। इयमेव गतिः "वृद्धिः - क्षयः - भयम्-जीवनं - मरणम् - जनिः - सत्ता - निद्रा - स्थितिः – लज्जा - दीप्तिः - तन्द्रा" इत्याद्यर्थेषु धातुषु। एवं जानाति इच्छति यतते इत्यादिष्वपि ज्ञानानुकूलः व्यापारः इच्छानुकूलः व्यापारः यत्नानुकूलः व्यापारः धात्वर्थः। अत्र सर्वत्र फलतावच्छेदकसम्बन्धः विषयता। तेन सम्बन्धेन ज्ञानादिसम्बद्धानां घटादीनां कर्मत्वं सिद्ध्यति।

3.0 आख्यातार्थकर्तृकर्मणोः तात्पर्यग्राहकाः

नन्वाख्यातस्य कर्तृकर्मशक्तत्वे "पचति" इत्यत्रोभयबोधापत्तिः, कर्तृमात्रबोधवत् कर्ममात्रस्याऽपि बोधापत्तिरित्यतस्तात्पर्यग्राहकमाह-

फलव्यापारयोस्तत्र फले तङ्यक्चिणादयः।

व्यापारे शप्श्नमाद्यास्तु द्योतयन्त्याश्रयान्वयम्॥ 3 ॥

आत्मनिष्ठज्ञानादीनां समवायेन स्थितिजनकः आत्ममनस्संयोगादिरूपः व्यापारः इत्यर्थः। स च व्यापारः विचार्यमाणे आश्रयत्वमेव । ईश्वरीयज्ञानादीनां नित्यत्वेन तेषु व्यापारजन्यत्वस्य निरूपयितुम् अशक्यत्वात्। एवञ्च यथा नैयायिकैः तिङर्थः संख्याकालातिरिक्तः सर्वोऽपि भावनापदेन स्वीक्रियते, कर्तृतिङि कृतिः कर्मतिङि आश्रयत्वम् , अचेतने कर्तरि आश्रयत्वं, नश्यतीत्यादिषु प्रतियोगित्वमित्यादि तत्सर्वमस्माभिः वैयाकरणैः धात्वर्थव्यापारत्वेन स्वीक्रियते इत्यर्थः॥ 2 ॥

एवं तिङर्थस्य सर्वस्यापि विशेषणत्वं धात्वर्थव्यापारस्यैव प्राधान्यं चोपपाद्य तिङर्थसंख्यायाः तिङ्प्रत्ययोपात्तकारके, कालस्य च धात्वर्थव्यापारे, कर्तृ-कर्मणोश्च यथायथं धात्वर्थव्यापारे फले च विशेषणत्वं प्रतिपादितम्। यत्र च प्रकृतेः प्रत्ययस्य वा अनेकेऽर्थाः तथा तेषां समेषामपि योग्यतामनुभवं चालक्ष्य समान-पदोपात्तार्थे वा स्वप्रकृतिप्रत्ययान्यतरार्थे वा अन्वयः स्वीक्रियते। तथा च तत्तद्वाच्यानां समेषामपि सर्वदा बोधविषयत्वं च स्वीक्रियते। तथा चात्र तिङ्-प्रत्ययार्थयोः धात्वर्थफलव्यापाराश्रयरूपकर्तृकर्मणोः अपि सर्वदा बोधः स्यात्, सर्वदा धातोः प्रतीयमानयोः धात्वर्थफलव्यापारयोः विशेषणत्वेनान्वययोग्यत्वात् इति शङ्कामेवोत्थापयति - **नन्विति**। अत्र च प्रकृतसिद्ध्यनुकूलचिन्ताकाला-वच्छिन्नप्रकृतानुकूलत्वरूपोपोद्घातसङ्गतिः। तथा च "पचति पच्यते" इत्यादिषु सर्वदा कर्तृकर्मबोधापत्तिः। तथा सति अभिधानानभिधानव्यवस्थायाः उच्छेदः, सर्वेषु सकर्मकेषु कर्तृकर्मणोरभिधानात् प्रथमापत्तेः अनिष्टप्रयोगप्रसङ्गः।

ननु कर्तृकर्मणोरुभयोरेकदा बोधप्रसङ्गस्तु नास्त्येव, "सार्वधातुके यक्" (पा 3-1-67) इति सूत्रे भाष्ये तिङां हर्यादिपदवत् नानार्थत्वाभ्युपगमात्। तथा हि - तत्र विकरणानां लकाराणां च कर्तृकर्मबोधकत्वे "यदा भावकर्मणोर्लः तदा कर्तरि विकरणाः, यदा कर्तरि लः तदा भावकर्मणोर्विकरणाः" इत्याक्षिप्य "इदमस्य

तङादयः फले आश्रयाऽन्वयं द्योतयन्ति। फलान्वय्याश्रयस्य कर्मत्वात् तद्द्योतकाः-कर्मद्योतकाः । व्यापारान्वय्याश्रयस्य कर्तृत्वात् तद्योतकाः कर्तृद्योतका इति समुदायार्थः। द्योतयन्ति - तात्पर्यं ग्राहयन्ति॥ 3॥

यद्येव स्वाभाविकम् अथापि वाचनिकं "प्रकृतिप्रत्ययौ प्रत्ययार्थं सह ब्रूतः" इति। न ह्यस्ति सम्भवो यदेकस्याः प्रकृतेः द्वयोः नानार्थयोः युगपत्सहायीभावः स्यात्" इति समाहितम्। "विकरणलकारयोः द्वयोरपि कर्तृकर्मादिवाचकत्वं स्वीकर्तुं न शक्यते। तच्च तदैवापेक्षितं स्यात् यदा द्वाभ्यां परस्परविरुद्धकर्तृकर्मणोः एकस्मिन्नभिधानं स्यात्। परन्तु नास्ति तादृशः बोधः। यतः अस्ति अयं न्यायः "प्रकृतिप्रत्ययौ प्रत्ययार्थं सह ब्रूतः" इति। अयं च स्वाभाविकः - लोकसिद्धः वाचनिको वा भवतु। प्रकृतिप्रत्ययौ प्रत्ययार्थं - प्रतीयमानमर्थं सह ब्रूतः– एकोपस्थितिविषयीकुरुतः इति तस्यार्थः। प्रकृते द्वयोः अर्थयोः युगपत् प्रकृत्यर्थ-विशेष्यत्वानुपपत्तिरिति एकस्यैव विशेष्यत्वं प्रकरणादिना निश्चेतव्यं हर्यादिपदेष्विव इति तद्भाष्यार्थः। पचन् पच्यमान इति कृदन्ते लकारेण तत्स्थानिकशतृशानज्भ्यां शब्यग्भ्यां च कर्तृकर्मणोरुभयोरपि यदि बोधः स्यात्, यथा पचन् इत्यत्र विकरणेन कर्तुः, लकारेण शतृप्रत्ययेन कर्मणः, पच्यमान इत्यत्र यका कर्मणः, लकारेण कर्तुश्च बोधः स्यात्, तर्हि प्रकृत्यर्थस्य एकदा एकेनैवान्वयोपपत्तेः प्रत्ययार्थत्वेन द्वयोः प्राधान्याच्च युगपत् उभयविशेष्यकबोधः नोपपद्यत इति विकरणेन वा लकारेण वा कर्तृकर्मणोः बोधः अन्यस्य तात्पर्यग्राहकत्वं च वक्तव्यम्। लिडादिषु विकरणाभावेऽपि कर्तृकर्मबोधदर्शनात् ततः कर्मणीत्यनुशासनाच्च लकारस्यैव तदर्थकत्वं सिद्ध्यति। "सार्वधातुके"(पा 3-1-67) इत्यस्य "कर्तरि शप्" (पा 3-1-68) इत्यादिषु अनुवृत्त्या "कर्तरि सार्वधातुके शप्" इति व्याख्यानेन विकरणानाम् अर्थविशेषाभिधायकत्वं नास्तीत्यर्थः। निरूपितश्चैतत् **वैयाकरण-सिद्धान्तभूषणे** - "यद्वा "कर्तरि शप्" (पा 3-1-68) इत्यत्र सार्वधातुके इत्यनुवर्त्य कर्त्रर्थे सार्वधातुके परे धातोः शप् स्यादित्यर्थः। तथा च सार्वधातुकस्य कर्त्रर्थत्वा-वश्यकत्वे शबादीनां द्योतकत्वमात्रं कल्प्यते लाघवात्। एवं यगादावप्यूह्यम्" इति। एवञ्च विरुद्धार्थकप्रत्ययद्वयात्प्रकृतेः साहाय्यासम्भवे कर्तृकर्मरूपविरुद्धार्थ-कैकप्रत्ययात् प्रकृतेः विशिष्टार्थप्रतिपादने साहाय्यासम्भवात् सुतरां तादृश-प्रयोगस्यासम्भव एव। न चात्र धातुना द्विःफलव्यापारयोः बोधः येन कर्तृ-

विशेष्यकः कर्मविशेष्यकश्च बोधः स्यादिति वाच्यम्। "सकृदुच्चरितः शब्दः सकृदेवार्थं गमयती"ति न्यायात् एकदोच्चरिताद्धातोः द्विः फलव्यापारोभयबोधासम्भवात्। तथा च लकारेण एकदोभयबोधासम्भवात् पारिशेष्याद् अन्यतरार्थविषयक एव बोधो जायते। स च प्रकरणादिना निर्णीयत इति चेत्तथापि दोष इत्याह - **कर्तृमात्रबोधवत्** इति। अत्र **दर्पणे** "ननु सकृदुच्चरितः शब्दः सकृदर्थं गमयति इति व्युत्पत्तेः नैकदार्थद्वयबोध अत आह – कर्तृमात्रेति" इति अवतरणिका अयुक्तैव। संख्याकालादिवत् सकृदेव कर्तृकर्मणोः बोधे बाधकाभावात्। तथा च यावत् तिङः कर्तृकर्मणोर्विषये हर्यादिपदवत् नानार्थत्वं न व्यवस्थाप्यते तावत् अस्य न्यायस्य सञ्चार एव न शक्यः। अत एव तट्टिप्पण्यां **गुरुप्रसादशास्त्रिभिः** नानार्थत्वपुरस्कारेण दर्पणग्रन्थ इत्थं समर्थितः - "एकशक्तिनिरूपकार्थविषयकशाब्दबोधं प्रति अपरशक्तिनिरूपकार्थविषयकतात्पर्यज्ञानस्य हर्यादिनानार्थस्थले इव अत्रैकदोभयबोधवारकत्वेत्वाहे"ति। **काशिकायामपि** एतदाशयिका एव अवतरणिकास्ति। "अत्र हरिरस्ति" इति वाक्यात् यदा सिंहाश्वकपीनां त्रयाणामपि बोधः प्राप्तः प्रकरणं चात्रार्थनिर्णयेऽसमर्थम् एकमेव वाक्यं तन्त्रादिना अर्थत्रयबोधकमिति स्वीक्रियते तथा केवलस्य पचति पच्यते इत्यादितिङन्तस्य प्रयोगे कर्तृकर्मणोरुभयोरप्युपस्थितौ अन्यतरार्थनिर्णायकप्रकरणाभावात्युगपद्वयोर्बोधासम्भवाच्च तन्त्रन्यायेन उभयार्थबोधकं स्यात् इति सर्वमपि तिङन्तं सर्वदा अर्थद्वयं पर्यायेण बोधयेदिति भावः।तदर्थं पचतीत्यत्र कर्तुरेव बोधः, पच्यते इत्यत्र कर्मण एवेत्यत्र तात्पर्यग्राहकमाह- **फलव्यापारयोरि**रिति। तात्पर्यग्राहकत्वं च तत्तदर्थप्रतीतीच्छयोच्चरितत्वरूपतात्पर्यविषयकग्रहजनकत्वम्। शास्त्रप्रवर्तकाचार्यानुभवसिद्धतात्पर्यग्राहकत्वमित्यर्थः। उपसर्गादिवत् समभिव्याहृतपदनिष्ठशक्त्युद्बोधकत्वमिति यावत्। एतदेव हि द्योतकत्वम्। तथा च विकरणप्रत्ययाः स्वसमभिव्याहृततिङ्निष्ठकर्तृकर्मादिशक्तिविशेषमुद्बोधयन्तीति नैकदोभयबोध इत्यर्थः। अमुमेव द्योत्यार्थमादायैव कर्तृकर्मणोः तत्र तत्र विकरणार्थत्वव्यवहारः। वस्तुतः विकरणप्रत्ययाः साधुत्वमात्रार्था एव॥ **फलव्यापारयो स्तत्रेति**॥ तत्र - तयोः फलव्यापारयोः धातुवाच्ययोः मध्ये इत्यर्थः। अत्र सप्तमी निर्धारणे। तयोर्मध्ये तिङर्थस्य आश्रयस्य

4.तात्पर्यग्राहकत्वनिष्कर्षः

नन्वेवं "क्रमादमुं नारद इत्यबोधि सः" इत्यादौ "पच्यते ओदनः स्वयमेव" इत्यादौ च व्यभिचारः। कर्मणः कर्तृत्वविवक्षायां कर्त्तरि लकारे सति "कर्मवत् कर्मणा तुल्यक्रियः"(पा 3-1-87) इत्यतिदेशेन यगात्मनेपदचिण्चिण्वदिटा - मतिदेशाद्यगादिसत्त्वेऽपि कर्तुरेव बोधाद् व्यापार एवाऽऽश्रयान्वयाच्च। "अबोधि" इत्यत्रापि बुध्यतेः कर्तरि लुङ्, तस्य "दीपजन"(पा 3-1-61) इति चिण् ,"चिणो लुक्"(पा 6-4-104) इति तस्य लुक् इति साधनात् इत्याशङ्कायामाह --

---

कर्मणः फले अन्वयं तङ्यकचिणादयः द्योतयन्ति। फलान्वयिनः आश्रयस्य कर्मत्वात् कर्मरूपस्य तिङर्थस्य द्योतकाः अर्थात् स्वसमभिव्याहृततिङ्निष्ठ-कर्मबोधकत्वशक्तेः उद्बोधकाः इत्यर्थः। अनेन चात्र कर्तृत्वबोधिका शक्तिः प्रतिबध्यते इति न कर्तृबोध इति तात्पर्यम्। तथा शप्श्नमादिविकरणाः स्वसमभिव्याहृततिङ्निष्ठकर्तृबोधकत्वशक्तेरुद्बोधकाः सन्तः व्यापारे आश्रयस्य तिङर्थस्य कर्तुः अन्वयं द्योतयन्ति इत्यर्थः। अत्र अन्वयशब्दः सम्बन्धपरः। तथा च तिङर्थाश्रयस्य तङादयः फलेऽन्वयं - फलसम्बन्धं द्योतयन्तीत्यर्थः। फलसम्बन्धिनः आश्रयस्य कर्मत्वात् कर्मद्योतका इति फलति। तथैव शबादयः तिङर्थाश्रयस्य व्यापारेऽन्वयं - व्यापारसम्बन्धं द्योतयन्तीत्यर्थः।

॥**तङ्यक्किणादयः** इति॥ अत्रादिपदेन चिण्वदिटो ग्रहणम्।

ननु तङः सर्वत्र कर्मद्योतकत्वे "एध्यते" इत्यादिष्वपि कर्मबोधः स्यात्। एवं यक्शब्देन यक्सामान्यं गृह्येत तर्हि "सुख्यती"त्यादिकण्ड्वादियगन्तेऽपि कर्म-बोधापत्तिः। एवमेव चिणोऽपि सर्वस्य कर्मद्योतकत्वे "दीपजने"(पा. 3-1-61) त्यादिविहितस्य चिणोऽपि कर्मद्योतकत्वापत्तिः इति चेन्न। "सहचरितासह-चरितयोः सहचरितस्यैव ग्रहणम्" इति न्यायेन परस्परसहचरितयोः तङ्यकोः ग्रहणात् यगादिसमभिव्याहृतः तङ्, तङ्समभिव्याहृतश्च यगत्र गृह्यत इति न एधते सुख्यतीत्यादौ दोषः। एवं यक्साहचर्यात् चिणपि भावकर्मणोर्विहित एव ग्राह्य इति न अबोधीत्यादिष्वतिप्रसङ्गः। एतदेव प्रतिपादयति - **नन्वेवमित्यादिना** आक्षिप्य **उत्सर्गोऽयमित्यादिना** । अयम्भावः - यत्र यत्र यगादिसमभिव्याहारः तत्र तत्र आख्यातस्य कर्मबोधकत्वमिति, यत्र यत्र शबादिसमभिव्याहारः तत्र तत्र आख्यातस्य कर्तृबोधकत्वमिति च अन्वयव्याप्तिः, यत्र यत्र आख्यातस्य कर्म-

बोधकत्वाभावः तत्र तत्र यगादिसमभिव्याहाराभावः, यत्र यत्र आख्यातस्य कर्तृ-बोधकत्वाभावः तत्र तत्र शबादिसमभिव्यहाराभाव इति च व्यतिरेकव्याप्तिः सिद्ध्यति। "क्रमादमुं नारद इत्यबोधि सः" इत्यत्र चिण्समभिव्याहारसत्वेऽपि आख्यातस्य कर्मबोधकत्वाभावात् अन्वयव्याप्तेः व्यभिचारः। तथा "पच्यते ओदनः स्वयमेवे"ति कर्मकर्तरि यगात्मनेपदयोः सत्त्वेऽपि कर्मबोधाभाव इति अन्वयव्याप्तेः तत्रापि व्यभिचारः। तदेव उपपादयति - **नन्वेवमिति**॥

"चयस्त्विषामित्यवधारितं पुरा ततश्शरीरीति विभाविताकृतिम्।

विभुर्विभक्तावयवं पुमानिति क्रमादमुं नारद इत्यबोधि सः॥"(शिशु.प्र.स.3)

शिशुपालवधे प्रथमसर्गे तृतीयोऽयं श्लोकः। इन्द्रसन्देशं श्रावयितुं स्वर्गात् द्वारकापुरीमवतरन्तं नारदं क्रमेण श्रीहरिः नारद इति बुद्धवान्। तत्रादौ सुदूरे वर्तमानं तं कान्तिपुञ्ज इति ततः किञ्चित्समीपमागतं शरीरीति ततोऽपि समीपे आगतं पुमानिति अन्ते च "नारद" इति हरिः ज्ञातवानित्यन्वयः। अत्र "विभुः सः क्रमादमुं नारद इति अबोधि" इत्ययं कर्तरिप्रयोगः। अबोधि इति "बुध अवगमने" इति धातोः कर्तरि लुङ्। "दीपजनबुधपूरितायिप्यायिभ्योऽन्यतरस्याम्" (पा. 3-1-61) इति च्लेः चिण्। "चिणो लुक्"(पा. 6-4-104) इति चिणः परस्य "त"प्रत्ययस्य लुक्। अत्र चिणः सत्त्वेऽपि आख्यातस्य कर्मबोधकत्वाभावात् अन्वयव्यभिचारः। ननु पूर्वस्मिन्श्लोके "तङ्यक्चिणादय" इत्यत्र चिण्पदेन तङ्-यक्साहचर्यात् भावकर्मणोः विहितचिण एव ग्रहणमिति अत्र चिणः तत्त्वाभावात् न दोषः इति चेद्दोषान्तरमाह - **पच्यते ओदनः स्वयमेवेति**॥ अयञ्च कर्मकर्तृ-प्रयोगः। यत्र वास्तविके कर्मणि कर्मत्वमपह्नुय तस्य कर्मणः कर्तृत्वेन विवक्षा तत्र कर्मकर्तृप्रयोग इति व्यवहारः। अस्याश्च फलं तत्रत्यवैशिष्ट्यस्य प्रतिपादनम्। यथा "गङ्गायां घोषः" "सिंहो माणवक" इत्यादौ गङ्गाभिन्ने तीरे गङ्गात्वारोपेण गङ्गागतशैत्यपावनत्वादिमत्वं माणवके सिंहत्वारोपेण च सिंहगतगुणसदृशगुण-वत्त्वं प्रतिपाद्यते तथा तण्डुलेषु अनायासेन विक्लित्तिसम्पादनरूपः सौकर्यातिशयः प्रतिपाद्यते अनेन। अत्र दृष्टान्तदार्ष्टान्तिकयोः आरोपः समानः परन्तु दृष्टान्तयोः लाक्षणिकत्वेन व्यवहारः दार्ष्टान्तिके तु शक्तत्वेनैव व्यवहार इति भेदः। तथा हि - "गङ्गायां घोषः" "सिंहो माणवक" इत्यादौ गङ्गातीरे माणवके च गङ्गात्वं न सहजं किन्त्वारोपितम्, कर्मणि कर्तृत्वं तु नारोपितं किन्तु स्वतस्सिद्धमित्यर्थः।

तत्कथमितिचेदुच्यते। कर्तृकर्मकरणादीनां षण्णां कारकत्वेन व्यवहारः। यच्च क्रियां निर्वर्तयति जनयति तत्कारकम्। तत्र क्रियाजनकत्वं नाम स्वस्वव्यापारद्वारा फलसम्पादकत्वमेव। तथा हि - पचनक्रियासम्बद्धाः देवदत्त - तण्डुल - काष्ठ–स्थाल्यादयः पदार्थाः स्वस्वव्यापारद्वारा विक्लित्तिरूपं फलं जनयन्ति। एते पदार्थाः स्वस्वव्यापारे स्वतन्त्रा इति कृत्वा फलजनकत्वरूपं कर्तृत्वं तदेव हि कारकत्वं सर्वेषु सहजमेव नत्वारोपितम्। परन्तु एतेषां सर्वेषामेकक्रियासम्बद्धानां कारकाणां स्वस्व -व्यापाराः सर्वे युगपत् न धातुवाच्याः किन्तु एकदा कस्यचिदेकस्यैव व्यापारः तत्तद्धातुवाच्यो भवति। यदा यस्य व्यापारः धात्वर्थत्वेन विवक्षितः तदा तत्कारकं कर्ता भवति। तदुक्तं वाक्यपदीये - "धातुनोक्तक्रियेनित्यं कारके कर्तृतेष्यते" इति। तथा च पचिक्रियाकारकेषु देवदत्तादिषु यदा यदीयो व्यापारः धात्वर्थत्वेन विवक्षितः तदा तस्मिन् कर्तृत्वव्यवहार इत्यर्थः। एतदेवोपपादितं कारक(पा 1-4-23)सूत्रे भाष्ये - अधिश्रयणोदकासेचनतण्डुलावपनैधोपकर्षणादिक्रियाः कुर्वन्नेव देवदत्तः पचतीत्युच्यते। तत्र तदा पचिर्वर्तते एष प्रधानस्य कर्तुः पाकः। एतत्प्रधानकर्तुः कर्तृत्वम्। द्रोणं पचत्याढकं पचतीति सम्भवनक्रियां धारणक्रियां च कुर्वती स्थाली पचतीत्युच्यते। तत्र तदा पचिर्वर्तते एषोऽधिकरणस्य पाकः। एतदधिकरणस्य कर्तृत्वम्। एधाः पक्ष्यन्त्याविक्लित्तेः ज्वलिष्यन्तीति ज्वलनक्रियां कुर्वन्ति काष्ठानि पचन्तीत्युच्यन्ते। तत्र तदा पचिर्वर्तते। एष करणस्य पाकः। एतत्करणस्य कर्तृत्वम्। उद्यमननिपातनानि कुर्वन्नेव देवदत्तः छिनत्तीत्युच्यते। तत्र तदा छिदिर्वर्तते। एष प्रधानकर्तुः च्छेदः। एतत्प्रधानकर्तुः कर्तृत्वम्। यत्तत्समाने उद्यमने निपातने च सत्यपि परशुनैव छिद्यते न तृणेन तत्परशोः छेदनम्। अवश्यं चैतदेवं विज्ञेयम्। यो हि मन्यते उद्यमननिपातनादेवैतद्भवति छिनत्तीति असितृणयोः छेदने च न तस्य विशेषः स्यात्, यदसिना छिद्यते तृणेनापि तच्छिद्येत - इति।

4.1 कर्मवत्कर्मणा तुल्यक्रिय इति सूत्रविचारः

एवं "कर्मवत्कर्मणा तुल्यक्रियः" (पा. 3-1-87) इति सूत्रे भाष्ये "कर्मकर्तरि कर्तृत्वमस्ति। कुतः? स्वातन्त्र्येणैवात्र कर्ता विवक्षितः। किं पुनः सतः स्वातन्त्र्यस्य विवक्षा आहोस्विद्विवक्षा मात्रम्? स्वत इत्याह । कथं ज्ञायते? इह भिद्यते कुसूलेनेति। न चान्यः कर्ता दृश्यते। क्रिया चोपलभ्यते। किं च भोः विग्रह

-वतैव क्रियायाः कर्त्रा भवितव्यम् न पुनः वातातपकालाः अपि कर्तारः स्युः। भवेत्सिद्धं यदि वातातपकालानामन्यतमः कर्ता स्यात्। यस्तु खलु निवाते निरभिवर्षे अचिरकालकृतः कुसूलः स्वयमेव भिद्यते तत्र नान्यः कर्ता भवति अन्यदतः कुसूलात्। यद्यपि तावदत्रैतच्छक्यते वक्तुं यत्रान्यः कर्ता नास्ति। इह तु कथं स्यात् "लूयते केदारः स्वयमेवे"ति। यत्रासौ देवदत्तो दात्रहस्तः समन्ततो विपरिपतन् दृश्यते। अत्रापि सुकरता नाम तस्याः नान्यः कर्ता भवति अन्यदतः केदारात्।" इति। आभ्यां भाष्याभ्यां स्पष्टमेव यत् सहजमेव तत्तद्गतं कर्तृत्वमिति। विशिष्य सौकर्यातिशयविवक्षायां "पच्यते तण्डुलः स्वयमेव" "लूयते केदारः स्वयमेवे"त्यादि वास्तविककर्तृषु देवदत्तादिषु सन्निहितेष्वपि भवति इति च। एतदेव वदति भर्तृहरिः साधनसमुद्देशे -

"शक्तिमात्रासमूहस्य विश्वस्यानेककर्मणः।
सर्वदा सर्वथा भावात् क्वचित्किंचित् विवक्ष्यते॥" इति। (वा-तृ-साधन-1)

तथा च "पच्यते ओदनः स्वयमेव" इति नायं कर्मणि प्रयोगः। किन्तु कर्तरि प्रयोग एव। एतत्सूचनार्थमेव "स्वयमेवे"ति पदस्य वाक्ये योजनम्। तथा च कर्मणः कर्तृत्वविवक्षायां पचधातुरिदानीमकर्मकः संवृत्त इति अत्र कर्तरि एव लकारः विवक्षितः। तथा चात्र "पच्यते" इत्यत्र तङ्यकोः सत्त्वात् अन्वयव्याप्त्या तत्समभिव्याहृततिङा कर्मणि बोधनीये तदबोधनात् व्यभिचार इत्यर्थः। ननु यद्ययं कर्तरि प्रयोगः तर्हि "कर्तरि शप्" (पा 3-1-68) इत्यादिना शबादिभिः विकरणैरेव भाव्यं यथा - स्थाली पचति, काष्ठानि पचन्तीति। कथं यगात्मनेपदे इति चेत् आह - "**कर्मवत्कर्मणे**" ति। कर्मणा तुल्यक्रियः कर्ता कर्मवत् स्यादिति एतत्सूत्रार्थः। कर्मणा तुल्यक्रियत्वं नाम यदा देवदत्तादिषु कर्तृत्वेन विवक्षितेषु कर्मत्वेन विवक्षितस्य कारकस्य यः कारकत्वप्रयोजकः स्वीयः व्यापारः स एव इदानीं कर्तृत्वेन विवक्षितस्यापि स्याच्चेदित्यर्थः। अत्र शक्तिभेदेन भेदमाश्रित्य उपमानोपमेयभावः। तथा च कर्मीभूतोदननिष्ठव्यापारसदृशः व्यापारः कर्तृभूतस्य ओदनस्य यदा विवक्षितः तदा अयं कर्ता कर्मणा तुल्यक्रियः भवतीति तादृशकर्तरि कर्मवत्त्वमतिदिश्यते अनेन सूत्रेण। कर्मवत्वातिदेशात् कर्मणीव यगात्मनेपदादि भवति। तथा च "पच्यते"इत्यादिरूपसिद्धावपि नात्र यगात्मनेपदादि कर्मद्योतकम्, अपि तु कर्तृद्योतकमेवेति भावः। कर्मकर्तरि प्रयोगे च कर्मण एव कर्तृत्वेन भानात्

उत्सर्गोऽयं कर्मकर्तृविषयादौ विपर्ययात्।

तस्माद्यथोचितं ज्ञेयं द्योतकत्वं यथागमम्॥ 4 ॥

कर्मकर्तृविषयादौ-"पच्यते ओदनः स्वयमेव" इत्यादौ। अत्र ह्येकौदनाभिन्नाश्रयकः पाकानुकूलो व्यापार इति बोधः। "क्रमात्" इति आदिपदग्राह्यम्। अत्र सामान्यविशेषज्ञानपूर्वक-एकनारदविषयकज्ञानानुकूलः कृष्णाभिन्नाश्रयकोऽतीतो व्यापार इति बोधः। यथोचितमिति। सकर्मकधातुसमभिव्याहृतभाव-साधारणविधिविधेयचिण्यगादि कर्मद्योतकमिति भावः ॥ 4 ॥

कर्मान्तराभावाच्च सर्वदा अकर्मकत्वमेव धातोः। तथा च फलसमानाधिकरण-व्यापारवाचित्वमेव अत्र पचेः। विक्लित्तिसमानाधिकरणव्यापारःअत्र पच्यर्थः। तादृशव्यापारश्च फलाश्रयत्वमेव। तथा च "पच्यते" इत्यस्य विक्लिद्यते इत्यर्थः। तथा च पचधातुरनेकार्थः। न चानेकार्थत्वे सर्वत्र सर्वबोधापत्तिः। तिङ्-समानाधिकरणप्रथमान्तस्य कर्तृतृतीयान्तस्य वा तात्पर्यग्राहकस्य सत्त्वात्। तथा च कर्तरि प्रयोगे प्रथमान्तार्थनिष्ठः तत्तत्फलजनकः व्यापार एव तत्तद्धातुवाच्य इति नैकदा सर्वव्यापारबोधप्रसङ्गः। कर्मणि प्रयोगे भावे प्रयोगे च कर्तृतृतीयान्तार्थनिष्ठः सः धातुवाच्यः।

"कर्मवत्कर्मणा तुल्यक्रियः"(पा 3-1-87) इति सूत्रमतिदेशसूत्रम्। अत्रातिदेशश्च द्विविधः - शास्त्रातिदेशः कार्यातिदेशश्चेति। शास्त्रातिदेशपक्षे कर्तरि कर्मणीव शास्त्राणि प्रवर्तन्ते इत्यर्थः। तथा चात्र आत्मनेपदयगादि "भावकर्मणोः" (पा. 1-3-13) "सार्वधातुके यक्" (पा. 3-1-67) इत्यादिभिरेव साध्यं भवति। तथा चास्मिन्पक्षे अतिदेशानुसन्धानात्परं तत्तत्कार्यसिद्ध्यर्थं तत्तच्छास्त्रानुसन्धान-प्रयुक्तं गौरवं भवति। कार्यातिदेशो नाम कर्मणि विहितकार्याणां सर्वेषामनेनैव विधानमिति फलति। तथा च कर्मणि विहितानि सर्वाणि कार्याणि यगात्मनेपद-चिण्चिण्वदिड्रूपाणि अनेनैव सूत्रेण साक्षाद्विधीयन्ते इति न तत्तत्सूत्रानुसन्धान-प्रवर्तनरूपं गौरवमिति लाघवात् कार्यातिदेशपक्ष एव स्वीक्रियते। एवं च यत्र यत्र तङ्यक्चिणादिसमभिव्याहारः तत्र तत्र तिङः कर्मबोधकत्वमिति अन्वयव्याप्तेः व्यभिचार इति आक्षेपः।

तत्राह - **उत्सर्गोऽयमिति**॥ पूर्वमुदाहृतेषु कर्मकर्तृप्रयोगे क्रमादमुं नारद इत्यबोधीत्यादौ च यक्चिणादिसत्त्वेऽपि कर्मबोधाननुभवः कर्तृबोधानुभवः इति

विपर्ययस्य अनुभवात् अयं पूर्वोक्तः तङ्यगादिसमभिव्याहृततिङः कर्मबोधकत्व-नियमः उत्सर्गः प्रायिकः असार्वत्रिक इत्यर्थः। तस्मात् **यथागमं** - यथाशास्त्रं **यथोचितम्** - अननुगतमपि व्युत्पत्त्यनुसारित्वात् अनुभवबलाच्च उचितम् द्योतकत्वं कर्तृकर्मद्योतकत्वं, **ज्ञेयं** - ज्ञातव्यमित्यर्थः। पूर्वोदाहृतयोः वाक्ययोः बोधं वर्णयति। तत्र प्रथमं "पच्यते ओदन" इत्यस्य - **एकौदने**त्यादिना। क्रमादमुमित्यस्य बोधं प्रदर्शयति - ॥**अत्रेति**॥ **सामान्येति** ॥ पूर्वं त्विषां चय इति ततः शरीरीति ततः पुमान् इति ततः नारद इति क्रमिकज्ञानमध्ये पूर्वं पूर्वं सामान्यज्ञानमुत्तरोत्तरं च विशेषज्ञानमिति सामान्यविशेषज्ञानपूर्वकः नारदाभिन्नत्वेन विप्रकृष्टव्यक्तिविषयकज्ञानानुकूलः कृष्णाभिन्नाश्रयनिष्ठः अतीतः व्यापार इति बोधः। "नारद इति" इत्यत्र दीक्षितादीनां मते इति शब्द एव कर्मत्वद्योतक इति नारदशब्दात् प्रथमा। नागेशमते तु नारद इत्याकारकं यज्ज्ञानं तदनुकूलः व्यापार इत्यर्थोऽवगन्तव्यः। तेन क्वचिन्निपातेनाभिधानमिति नानुमन्यते तिङादि-परिगणनस्यैव भाष्ये उक्तत्वात् इति **काशिका** । विभुः सः पुरा त्विषां चय इति अवधारितम्, ततः विभाविताकृतिं शरीरीति अवधारितं, ततः विभक्तावयवं पुमान् इति अवधारितम्, अन्ते नारद इति अमुम् अबोधि इति अन्वयः। अत्र इतिशब्दचतुष्टयं तद्घटितानां श्रीकृष्णीयज्ञानचतुष्टयानुकरणरूपताम् सूचयतीति भावः।

एवं पूर्वोक्तस्य यगादिसमभिव्याहृततिङः कर्मबोधकत्वरूपनियमस्य असार्वत्रिकत्वं कारिकोक्तमुक्त्वा वस्तुतः सार्वत्रिकः नियमोऽपि शक्य इति सूचयति – **सकर्मके**त्यादिना। "देवदत्तेन स्नायते" इत्यादौ यगात्मनेपदयोः सत्त्वेऽपि कर्मबोधाननुभवात् उक्तस्य नियमस्य सकर्मकधातुविषयकत्वमेव वक्तव्यम्। तथा च सकर्मकधातुसमभिव्याहृतयगात्मनेपदादिसमभिव्याहृततिङः कर्मबोधकत्वमिति नियमः फलितः। तत्रापि "तङ्यक्चिणादयः" इत्यत्र परस्परसाहचर्यमाश्रित्य भावकर्मोभयार्थकप्रत्ययनिमित्तका ये विधयः "सार्वधातुके यक्" (पा. 3-1-67) "चिण्भाव -कर्मणोः" (पा. 3-1-63) इत्यादयः तैः विधेयं यक्चिणादिरेवात्र गृह्यते इति "पच्यते ओदनः स्वयमेव" इत्यत्र धातोः अकर्मकत्वात् अबोधीत्यत्र चिणः भावसाधारणविधिविधेयत्वाभावाच्च न दोषः। तथाच "यत्र यत्र सकर्मकधातु-

5.0 लिङतिरिक्तलडाद्यन्ते भावनायाः अवाच्यत्ववादिप्राभाकरमतखण्डनम्

एवं सूचीकटाहन्यायेन सोपपत्तिकं वाक्यार्थमुपवर्ण्य,"फलव्यापारयोः इति प्रतिज्ञातं धातोर्व्यापारवाचित्वं लडाद्यन्ते भावनाया अवाच्यत्वं वदतः प्राभाकरादीन् प्रति व्यवस्थापयति -

---

समभिव्याहृतभावसाधारणविधिविधेयतङ्यगादिसमभिव्याहारः तत्र तत्र तिङः कर्मबोधकत्वम्" इति अन्वयव्याप्तिः सिद्ध्यति। यत्र यत्र कर्मकर्तृनिष्ठव्यापारार्थ-कातिरिक्त-अकर्मकधातुसमभिव्याहृतभावसाधारणविधिविधेयतङ्यगादिसमभि-व्याहारः तत्र तत्र तिङः भावार्थकत्वम् इति व्याप्तिद्वये सिद्धे तदतिरिक्ततिङः कर्तृबोधकत्वमर्थात् सिद्ध्यतीति तात्पर्यम्। एतच्च विकरणादिसमभिव्याहृत-तिङ्स्थलविषयकम्। "पेचे" इत्यादि लिडाद्यन्ते यत्र कर्तरि कर्मणि च समानं रूपं तत्र तु प्रकरणादिकमेवाश्रित्य तिङर्थः निर्णेतव्यः। तिङ्समानाधिकरण-प्रथमान्तार्थस्य तत्तत्क्रियायां कर्तृत्वेनान्वयोपपत्तौ कर्तरि लकारः, अन्यथा कर्मणि। वाक्ये प्रथमान्तपदस्यैवाभावे तत्क्रियाकर्तुः तृतीयान्तेनोपस्थापने च भावे लकार इत्यादि ऊह्यम्। एतत्सर्वमभिप्रेत्याह - **उत्सर्गोऽयमिति** ॥ 4 ॥

नन्वेतावता प्रबन्धेन पदार्थोऽपि निरूपितः वाक्यार्थोऽपि निरूपितः तत्किमव-शिष्यते निरूपणार्थमिति शङ्कायामाह - **एवमिति**।

5.1 **सूचीकटाहन्यायस्वरूपम्**

॥**सूचीकटाहन्यायेनेति**॥ सूचीकटाहोभयापेक्षावतोः द्वयोः लोहकारसमीप-मुपस्थितयोः सत्योः सूच्यपेक्षावतः सूचीनिर्माणात्मकमेव कार्यं प्रथमं सम्पादयति लोहकारः तस्याल्पकालसाध्यत्वात् बहुकालायाससाध्यं तु पश्चादिति लघुगुरु-कार्ययोः सहोपस्थितयोः लघुकार्यं पूर्वं सम्पाद्यमिति न्यायार्थः। प्रकृते फल-व्यापारयोः धात्वर्थत्वे आश्रयस्य तिङर्थत्वे च ज्ञाते भावनामुख्यविशेष्यके वाक्यार्थे प्रधानशास्त्रत्रये द्वयोरैकमत्येन निरसनीयवादिविप्रतिपत्तीनामल्पत्वेन वाक्यार्थ-मुख्यविशेष्यत्वनिरूपणस्य अल्पायाससाध्यत्वेन लघुत्वम्। धात्वर्थविषये तु सर्वेषां शास्त्रकारणां वैमत्येन निरसनीयवादिविप्रतिपत्तीनां बहुत्वेन च बह्वायाससाध्यत्व-मिति गुरुत्वम्। तथा च धात्वर्थनिरूपणापेक्षया वाक्यार्थनिरूपणस्य सौलभ्येना-वगतिविषयत्वमिति स एवादौ वर्णितः। किं च वाक्यवाक्यार्थयोः लोकव्यवहार-

सिद्धत्वेन पदार्थानां चापोद्धाररूपत्वेन तेषामन्वयव्यतिरेकसाध्यत्वेन च लोकसिद्धस्य प्रथममभिधानं युक्तमिति स एव हि प्रथमं वर्णितः। अत्र च वाक्यार्थनिरूपणं नाम वैयाकरणानां मते सुप्तिङन्तचय रूपस्य वाक्यस्य अर्थविवरणम्। नैयायिकमते तु सुबन्तस्य तिङन्तस्य च वाक्यत्वमेवेति तेषां मते सुबन्तार्थनिरूपणं तिङन्तार्थनिरूपणं च वाक्यार्थनिरूपणं भवितुमर्हति। परन्त्वत्र द्वितीयकारिकायाः उपसंहारे "देवदत्तादिपदयोगे आख्यातार्थकर्त्रादिभिस्सहाभेदान्वयः, घटो नश्यति इत्यत्रापि घटाभिन्नाश्रयको नाशानुकूलो व्यापारः, देवदत्तो जानातीच्छतीत्यादौ च देवदत्ताभिन्नाश्रयको ज्ञानेच्छाद्यनुकूलो व्यापारः" इति तिङ्सुबन्तचयस्यैव बोधविवरणात् वाक्यशब्देन तिङ्सुबन्तचय एव अभिप्रेतः। अतश्चात्र पदार्थनिरूपणं नाम तिङन्तप्रतिपाद्यार्थनिरूपणमित्यपि व्याख्यातुं शक्यते। तथा च यत्पूर्वं व्यापारस्य धात्वर्थत्वं प्रतिज्ञातं तच्च प्रथमं तिङन्तपदप्रतिपाद्यत्वेनापि साधनीयमिति सर्वत्र तिङन्ते व्यापारस्य बोधं नाभ्युपगच्छतां मतं खण्डनीयमिति तदर्थमेव उपक्रमते - **लडाद्यन्त** इत्यादिना।

5.2 प्राभाकरादीन् प्रति इत्यादिमूलग्रन्थावतरणे व्याख्यातॄणां रीतयः, विमर्शश्च

लडादिः अन्ते यस्य इति बहुव्रीहिः। बहुव्रीहिः द्विविधः तद्गुणसंविज्ञानः अतद्गुणसंविज्ञानश्चेति। उपसर्जनपदार्थविशिष्टः अन्यपदार्थः यदि समासार्थः तर्हि तत्र तद्गुणसंविज्ञानः। तस्य गुणस्य संविज्ञानं यस्मिन् स इति विग्रहः। तस्य गुणस्य उपसर्जनपदार्थस्य अन्यपदार्थाङ्गतया संविज्ञानमिति तस्यार्थः। यथा त्रिनेत्रः चतुर्बाहुरित्यादि। अत्र नेत्रत्रयविशिष्टः बाहुचतुष्टयविशिष्ट एवान्यपदार्थः। तथा च अत्र उपसर्जनपदार्थः नेत्रत्रयं बाहुचतुष्टयं च अन्यपदार्थाङ्गतया स्वीकृते। यत्र च उपसर्जनपदार्थः अन्यपदार्थाङ्गं न भवति अर्थात् उपसर्जनपदार्थानन्वित एवान्यपदार्थः समासार्थः तत्र अतद्गुणसंविज्ञानः। न तद्गुणसंविज्ञानः अतद्गुणसंविज्ञानः। यथा - चित्रगुः। अत्र गोस्वामी एव व्यक्तिविशेषः समासार्थः। न गावः। कथमयमतद्गुणसंविज्ञान इति चेदुच्यते। "चित्रगुं पश्य चित्रगुमानये"त्यादिषु दर्शनानयनादिक्रियान्वयः व्यक्तिविशेषस्यैव भवति यः तत्स्वामी न तु उपसर्जनपदार्थगवामिति उपसर्जनपदार्थस्य यत्र विशेष्यभूतेनान्यपदार्थेन सह क्रियान्वयाऽयोग्यता तत्र तस्य परित्याग इति अतद्गुणसंविज्ञानो भवति। त्रिनेत्रं पश्येत्यादौ नेत्रत्रयविशिष्ट एव दर्शनक्रियायां कर्मत्वेनान्वेतीति उपसर्जनपदार्थस्यापि अन्य-

पदार्थाङ्गतया क्रियान्वय इति तद्गुणसंविज्ञानः इति व्यवस्था। एवं स्थिते "लडाद्यन्त"शब्दः कीदृशो बहुव्रीहिरिति विचारणीयम्। अत्र लडादिः अन्तावयव यस्येत्यर्थे लडादिविशिष्टं शब्दस्वरूपम्अन्यपदार्थश्चेत् तद्गुणसंविज्ञानः भवति। अन्तशब्दस्य परसमीपबोधकत्वमाश्रित्य लडादिः परसमीपवर्ती यस्येत्यर्थे लडादि -प्रकृतिः धातुरेवान्यपदार्थ इति भवति अतद्गुणसंविज्ञानः। अत्र **कान्ति - काशिका - परीक्षा - तत्त्वबोधिन्यः** तद्गुणसंविज्ञानपक्षमाश्रयन्ति, अन्ये च पक्षान्तरम्। तद्गुणसंविज्ञानाश्रयणे तिङन्ते भावनायाः अवाच्यत्वं वदतां मतखण्डनपरत्वम्, अतद्गुणसंविज्ञानाश्रयणे धातौ भावनायाः अवाच्यत्वमिति मतखण्डनपरत्वं च अस्य ग्रन्थस्य वक्तव्यम्। अत्र व्याख्यातृणामभिप्रायभेदाः प्रदर्श्यन्ते ततः परं कस्य पक्षस्य ग्रन्थकर्त्रभिप्रेतत्वमिति विचार्यते।

धातुरेव लडाद्यन्तपदार्थ इति ये वदन्ति तेषां मतस्योपष्टम्भकं प्रमाणं किमिति प्रथमं चिन्तनीयम्। तत्र दृश्यते कारणद्वयम्। एकं भूषणसारे अस्याः कारिकायाः अवतरणग्रन्थे वर्तमानः फलव्यापारयोरिति प्रतिज्ञातं धातोः व्यापारवाचित्वमि-त्यंशः। अन्यच्चास्याः कारिकायाः बृहद्भूषणे वर्तमानः "अथ सूचीकटाहन्यायेन सोपपत्तिकं वाक्यार्थमुपवर्ण्य फलव्यापारयोरिति प्रतिज्ञातं धातोः व्यापारवाचकत्वं व्यवस्थापयति"- इति अवतरणग्रन्थः।

तिङन्तमेव लडाद्यन्तपदार्थ इति पक्षस्य उपष्टम्भकतया **कान्ति - काशिका - परीक्षा - तत्त्वदर्शनीषु** प्रदर्शितं प्राभाकरमतं **वैयाकरणसिद्धान्तभूषणे** "निर्वर्त्ये च विकार्ये च" इति कारिकायाः व्याख्याने स्थितः "अथवा व्यापारो भावना सैवेत्यादिना साधितमपि विवरणानुरोधेन व्यापारवाचकत्वं केवलफलवाचकता-वादिनिरासेन समर्थयितुं तन्मतनिरासाय अयं ग्रन्थः। तथा हि - लडादौ भावना वाच्यैव न। तत्प्रकारकशाब्दबोधस्य विवादग्रस्तत्वात्।" इत्यारभ्य "एवञ्च भावनायाः वाच्यत्वस्यैवाभावात् क्व कृतित्वेन व्यापारत्वेन वा वाच्यत्वेन विवादः, कथं वा धात्वाख्यातार्थविवाद इति केचिन्मन्वते तान्निराचष्टे" इत्यन्तः सुदीर्घः ग्रन्थश्च यत्र पार्थसारथिमिश्रैः मतेऽस्मिन् उत्थापितवाजपेयाधिकरणविरोधः तत्परिहारादिकं चान्तर्भूतम्।

विचार्यमाणे लडाद्यन्तशब्दस्य तद्गुणसंविज्ञानबहुव्रीहिपरत्वमेवात्र युज्यते। यतः प्रथमं "देवदत्तः पचती"त्यादिवाक्यार्थः वर्णितः। तथा च "पचती"ति तिङन्तार्थः

साधनीयः। तस्मिन् तिङन्ते भावनायाः वाच्यत्वेन प्रतीतिः साधनीया। अतः तिङन्ते व्यापाररूपभावनायाः वाच्यत्वमेव ये नाङ्गीकुर्वन्ति ते प्रथमं निरसनीयाः। व्यापारस्य धात्वर्थत्वसाधने चायं क्रमः - प्रथमं वाक्यार्थमुख्यविशेष्यत्वेन भावनायाः साधनम्, ततः धात्वर्थत्वेन भावनायाः साधनमिति। अत्र वाक्यार्थ-मुख्यविशेष्यत्वेन भावना साधनीया चेत् प्रथमं तिङन्तार्थमुख्यविशेष्यत्वेन तस्याः साधनं करणीयम्। ये केचन तिङन्ते धात्वर्थत्वेन वा तिङर्थत्वेन वा भावनां नाभ्युपगच्छन्ति तन्मतं निरस्य तिङन्ते भावनाबोधः साधनीयः। अतस्तदर्थमेवायं प्रयासः। किञ्च यत्र बहुव्रीहौ तद्गुणसंविज्ञानं सम्भवति तत्र अतद्गुणसंविज्ञानस्य स्वीकारोऽपि न युक्तः। उपस्थितस्य उपसर्जनपदार्थस्य अन्यपदार्थविशेषणतया अन्वयसम्भवे तत्त्यागे प्रमाणाभावात्। अन्यथा "पीताम्बरा"दिशब्दैः नीलाम्बरादिविशिष्टस्यापि बोधापत्तिः। अतोऽप्यत्र तद्गुण-संविज्ञानबहुव्रीहिरेवाश्रयणीयः। किञ्च यद्यत्र धातोः व्यापारावाचित्वमेव निरसनीयं तर्हि "धातौ भावनायाः अवाच्यत्वं वदतः प्राभाकरादीन् प्रति व्यवस्थापयति" इत्येव अवतरणग्रन्थः सुस्पष्टः रचयितुं शक्यः येन तद्गुणसंविज्ञानं वा अतद्गुण-संविज्ञानं वेति शङ्कायाः अवकाश एव न भवति। ततश्च "लडाद्यन्त" शब्दस्य प्रयोगोऽपि व्यर्थः स्यात्। अत एव पचति - पाकमुत्पादयति, पाकानुकूलाभावना, तादृश्युत्पादनेति विवरणमपि सङ्गच्छते। तच्च विवरणं पचतीति तिङन्तस्यैव। अत एव तत्र "विक्रियमाणस्यापि तद्वाचकतेति भावः" इति सङ्गच्छते। किञ्चात्र "तिङन्ते" इत्यनुक्त्वा "लडाद्यन्ते" इति कथनस्यापि किञ्चिदौचित्यमस्ति। प्राचीनाः प्राभाकराः सर्वत्र तिङन्ते भावनायाः अवाच्यत्वं नाङ्गीकुर्वन्ति किन्तु लिङतिरिक्तलकारान्ते एव। लिङः कार्याभिधायकत्वेन तत्र भावनायाः आवश्यकत्वेन कार्यविशेषणीभूता भावनापि लिङर्थतया तैः स्वीक्रियते। एवञ्चात्र आदिपदेन विध्यर्थकलकारातिरिक्तः लकारः स्वीक्रियते। एवं च विध्यर्थकाति-रिक्तलडाद्यन्ते तादृशतिङन्ते इत्यर्थः अत्र विवक्षितः। अग्रे प्राभाकरमत-स्वरूपवर्णनसन्दर्भे एतत्स्फुटीभविष्यति। एवञ्च प्राचीनाः प्राभाकराः शालिका-नाथादयः अत्राभिप्रेताः।

नन्वस्तु नाम तादृशप्राभाकरमतखण्डनपरत्वमस्य। तथा चेत् प्राभाकरान् प्रति व्यवस्थापयतीत्येव वक्तव्यमिति आदिपदवैयर्थ्यमिति चेन्न। एवं वादिनां केषाञ्चित्

नैयायिकानामपि सत्त्वात्। यद्यपीदं मतं नेदानीं नैयायिकैरादृतं तथापि **न्याय-कुसुमाञ्जलिव्याख्यासु** दृश्यते। अस्य बृहद्भूषणेऽपि अस्याः कारिकायाः व्याख्यायामेवोल्लेखः कृतः।"फलं धात्वर्थः यत्न आख्यातार्थः। व्यापारस्तु न वाच्यः। व्यापारत्वस्योपाधित्वेन तस्य शक्यतावच्छेदकत्वे गौरवात्।" इति तन्मतम्। अस्यापि मतस्य स्वरूपमग्रे सुस्पष्टं भविष्यति। किञ्च यदि लडाद्यन्त-पदस्य धातुपरत्वं, तर्हि "फलं धात्वर्थः भावना आख्यातार्थः" इति मण्डनमिश्रमत -खण्डनपरता अस्य वक्तव्या। तथा चानेन साधितमेव पुनः "तस्मात्करोतिर्धातोः स्यादि"ति कारिकया साध्यते इति वक्तव्यमिति सिद्धसाधनदोषोऽपि। "एवं सिद्ध्यतु फलव्यापारयोर्वाच्यत्वं किन्त्वाख्यातवाच्यैव भावने"ति अवतरणग्रन्था-सङ्गतिश्च। किञ्च व्यापारो भावनेति कारिकाव्याख्यायां "किं कार्यं पचनीयं चे"त्यादिकारिकायां च एकविधं वाक्यद्वयमित्थमस्ति। तत्र व्यापारो भावनेति कारिकाव्याख्यायां - "किञ्च भावनायाः अवाच्यत्वे घटं भावयतीत्यत्रेव घटो भवतीत्यत्रापि द्वितीया स्यात्" इति, किं कार्यं पचनीयमिति व्याख्यायाम्-"भावनायाः तिङर्थत्वे घटं भावयतीत्यत्रेव घटो भवतीत्यत्र द्वितीया स्यात्" इति च। अनेन वाक्यद्वयेन एक एव दोषः उच्यते। तत्र यदि प्रथमवाक्येऽपि भावनायाः अवाच्यत्वे - भावनायाः धात्ववाच्यत्वे इति मण्डनमिश्रमतानुसारेण व्याख्यां कृत्वा दोषः प्रदर्श्यते इति चिन्तयामः तर्हि द्वितीयवाक्यस्यापि स एवार्थ इति पूर्वमेव प्रदर्शितस्य दोषस्य पुनरुक्तिः स्यात्। किञ्चात्र वाक्यद्वये भावनायाः अवाच्यत्वे भावनायाः तिङर्थत्वे इति वाक्यरचना वैविध्यमस्ति। अतश्च तिङन्ते भावनायाः अवाच्यत्वे यो दोषः स एव भावनायाः तिङर्थत्वेऽपि दोषः इत्येव व्याख्यातव्यम्। ततश्च पौनरुक्त्यदोषोऽपि न भवति। किञ्च तस्मात्करोतिरिति कारिकायाः मण्डनमिश्रमतखण्डनपरतैव बृहद्भूषणे प्रतिपादिता, सर्वैः व्याख्यातृभिरपि तथैव व्याख्यातम्। ततश्च "व्यापारो भावने"ति कारिका तिङन्ते व्यापारस्य वाच्यत्वं साधयितुं प्रवृत्तेति व्याख्यैव युक्तेति अवतरणिकायां स्थितं लडाद्यन्तपदं प्राभाकरमते लिङतिरिक्तलडाद्यन्तपरं नैयायिकैकदेशिमते तिङन्तपरमित्येव युक्तम्। एतदेवाभिप्रेत्य **काशिकायां** "व्यापाररूपभावनायाः अवाच्यत्वमेव वा" इत्युक्तम्।

अथ लडाद्यन्तपदस्य धातुपरत्वे यत्प्रमाणद्वयमुपन्यस्तं तच्च प्रमाणाभासरूपम्। तिङन्ते व्यापारवाच्यत्वसाधनमपि धातौ व्यापारवाच्यत्वसाधकमेव। किञ्चायं "फलव्यापारयोः इति प्रतिज्ञातं धातोर्व्यापारवाचित्वमि"ति प्रतिज्ञायाः पूर्वं कृतायाः अनुवाद एव। अथवात्र "साधयितुम्" इत्यध्याहारः। बृहद्भूषणस्थस्य "व्यापारो भावने"ति कारिकावतरणग्रन्थस्य भूषणसारग्रन्थस्थतत्कारिकावतरण-ग्रन्थस्य च साम्यमेव नास्ति। बृहद्भूषणे तावत् "व्यापारो भावने"ति कारिका प्रथमं नैयायिकमतखण्डनपरतयैव व्याख्याता। अतस्तत्र अवतरणिकापि "फल-व्यापारयोरिति प्रतिज्ञातं धातोः व्यापारवाचित्वं व्यवस्थापयती"त्येव। कान् प्रतीति नास्ति। "व्यापारो भावना, किन्तूत्पादनं, निर्वर्त्यं च" इति कारिकात्रयं नैयायिक-मतखण्डनपरतयैव प्रथमं व्याख्याय अथवेत्यादिना "निर्वर्त्ये च" इति कारिका-व्याख्याने प्राभाकरमतखण्डनपरता कारिकात्रयस्य व्याख्याता। अत एव तत्र "व्यापारो भावने" त्यवतरणिकायां "लडाद्यन्ते भावनायाः अवाच्यत्वं वदतः प्राभाकरादीन् प्रति" इति नास्ति। वस्तुतः "व्यापारो भावने"ति कारिकायाः प्राधान्येन प्राभाकरमतखण्डनपरतैव युक्तेति विचिन्त्य कौण्डभट्टः भूषणसारे तदनुरूपतया अवतरणिकां रचितवानिति न विरोधः। उभयत्र अनुसृतः मार्गः भिन्न इति न सोऽत्र प्रमाणम्। किञ्च ये लडाद्यन्तपदं धातुपरत्वमाश्रित्य व्याख्यातवन्तः तेषां पूर्वापरस्वग्रन्थविरोधोऽपि। यथा **शाङ्कर्यां** लडाद्यन्तपदस्य धातुपरतैव स्वीकृता। तथैव तत्रोपपादनं कृतम्। परन्त्वग्रे "किञ्च भावनायाः अवाच्यत्वे घटं भावयतीत्यत्रेव घटो भवतीत्यत्रापि द्वितीया स्यात्" इति व्याख्यावसरे भावनायाः अवाच्यत्वे इति प्रतीकमुपादाय "भावनायाः – व्यापार-रूपभावनायाः, अवाच्यत्वे - धातुनिरूपितवाच्यत्वाभावे तिङ्निरूपितवाच्यत्वाभावे च सती"ति भावनायाः धात्वाख्यातावाच्यत्वं प्रतिपादितम्। ततश्च पूर्वापरग्रन्थ-विरोधः स्पष्टः।

एवं च "लडाद्यन्त इत्यस्य धाताविति"त्यर्थः। धातौ भावनायाः अवाच्यत्वमि-त्यन्वयेन धातुनिष्ठवाचकतानिरूपितवाच्यत्वाभावो भावनासम्बन्धीति वदतः प्राभाकरान् प्रतीत्यर्थः। यद्वा भावनानिष्ठवाच्यतानिरूपितवाचकत्वाभावो धातौ इति वदत इत्यादिरर्थः। भावनायाः धातुवाच्यत्वे तयोः प्रत्ययार्थः प्रधानमिति न्यायेन तस्याः प्राधान्यानुपपत्त्या धात्ववाच्यत्वमिति तेषामाशयः।प्राभाकरा-

दीनित्यादिपदेन नैयायिकसङ्ग्रहः। यद्यपि फलानुकूलो व्यापारो धात्वर्थ इति नैयायिका मन्यन्ते तथापि नासौ तन्मते भावनाशब्दव्यवहार्यः।एवं च मीमांसकानुद्दिश्य साधकबाधकयुक्तिभिः भावनायाः धातुवाच्यत्वं, नैयायिकान् प्रति धात्वर्थ-व्यापारस्य भावनापदवाच्यत्वं च द्रढयितुमाह – "व्यापारो भावने"ति इति **शाङ्करी**, तन्मूलभूतदर्पणादिव्याख्याश्च चिन्त्या एव। एतद्व्याख्यातॄणाम् एतादृशसम्मोहे अत्र खण्ड्यमानयोः प्राभाकरनैयायिकमतयोः स्वरूपाज्ञानमेव कारणम्।

अथेदानीमत्र क्रमशः प्राभाकरादीनिति पदेन उद्दिष्टस्य प्राभाकरमतस्य आदिपदेनो -द्दिष्टनैयायिकैकदेशिमतस्य स्वरूपं निरूप्यते। **प्रकरणपञ्चिका-वाक्यार्थरत्न-शब्दशक्तिप्रकाशिकादिषु बृहद्भूषणे** च प्रदर्शितं प्राभाकरमतमत्र संक्षिप्यते।

"कार्याभिधायिलिङादीनामेव कार्यविशेषणीभूतकृतिरूपभावनावाचकत्वम्। तदतिरिक्ताख्यातस्य न भावनावाचकत्वम्। फलमात्रं धात्वर्थः। प्रकृत्यर्थफलेन आक्षेपात् संसर्गमर्यादया वा व्यापाररूपभावनायाः भानम्। आख्यातार्थस्तु कालः संख्या च। यच्च प्रतिपाद्यते पचति - पाकं करोति इति विवरणेन करोति-सामानाधिकरण्यात् सर्वाख्यातानां भावनावचनता सिद्ध्यतीति तन्न युक्तम्। यद्यपि करोतिः प्रयत्नपरः तथाप्यत्र किं करोति इति प्रश्नस्य यत्करोति तत्किमिति करोत्यर्थविषयता यदि स्यात् तर्हि पचतीत्युत्तरस्य पाकं करोतीत्यर्थता। नचैवं लोकविवक्षा। किन्तु अनवगते व्यापारविशेषे तद्विशेषावगमाय प्रश्नः क्रियते। तत्र चोत्तरभूतेन पचतीत्यनेन व्यापारविशेष एवाभिधीयत इति युक्तम्। सर्वोऽपि प्रश्नः प्रतिवचनं च सामान्यतो ज्ञाते विशेषतोऽज्ञाते। अत्र च धात्वर्थगोचरे एव ज्ञाना - ज्ञाने। अतश्चात्र करोतेः कस्यचिद्भूतस्य भवनेऽनुकूलस्वभावोऽर्थः। सर्वेऽपि धात्वर्थाः तादृशा इति करोतिना प्रष्टुं निर्देष्टुं च शक्यन्ते। किं च किंकरोति पचतीति प्रश्नोत्तरे सप्रयत्नक्रियेषु घटेताम्। अप्रयत्नक्रियेषु "किं करोति? रथो गच्छती" त्यादिषु कथम्? सप्रयत्नेष्वपि "आस्ते, शेते" इत्यादिषु कथन्तराम्? करोतेर्व्यापार - मात्रविषयत्वेऽभ्युपगते तु सर्वत्रोपपत्तिर्भवति। अतश्च नाख्यातानां करोत्यर्थता। "क्रियाप्रधानमाख्यातम्" इति लिङ्विषये एव। तत्रैव क्रियायाः विशेष्यतया बोधात्। न च पचतीत्यस्य पाकं करोतीति विवरणं दृश्यते, तत्र प्रकृत्यर्थादपि स्फुटत्वात् प्रधानत्वाच्च प्रत्ययार्थस्यैव विवरणं करोतिना क्रियत इति आख्यातार्थस्य करोत्यर्थतेति वाच्यम्। तच्च अशब्दार्थकर्मत्वविवरणवत्

अशब्दार्थसम्बन्धघटककृति विवरणमेव, "पचति चैत्र" इत्येतत्पदजन्यबोधे धात्वर्थपाकस्य स्वानुकूलकृतिसम्बन्धेन चैत्रेविशेषणत्वात्। अतः नैतद्विवरणमपि तद्वाच्यत्वसाधकम्। धात्वर्थप्रकारकबोधे प्रथमान्तपदजन्योपस्थितिर्हेतुरिति कार्य-कारणभावः। कारकाणामपि धात्वर्थे फले एव अन्वयः। उक्तञ्च **प्रकरणपञ्चिकायां** वाक्यार्थमातृकायाः द्वितीयपरिच्छेदे शालिकानाथेन - "वृद्धव्यवहाराच्छब्दार्थ-निर्णयः। न चाख्यातानां भावनावचनत्वमन्तरेण कस्यचित् वृद्धव्यवहारस्या-नुपपत्तिः। प्रश्नोत्तरे तु सम्बन्धज्ञानोत्तरकालभाविनी। अतो न तद्वशेन सम्बन्ध-निरूपणा। कर्त्रादिसंख्यामात्रवाचितया आख्यातप्रयोगोपपत्तौ नाधिकं शक्यं कल्पयितुम्। "पाकं करोति देवदत्त" इत्यत्र पच्यर्थं पाकशब्दो ब्रवीति, तदनुगुणं प्रयत्नं करोतिराचष्टे, आख्यातं तु केवलकर्तृसंख्यां वक्तीति सिद्धं तावत्तन्मात्र-वाचित्वम्। अतोऽन्यत्रापि तत्रैव वर्तत इति युक्तम्। एवं "पचति देवदत्त" इत्यस्य यद्विवरणं "पाकं करोती"ति न तदप्यनुपपन्नम्। पचतीत्यत्र यः पुरुषप्रयत्नः यत्सम्बन्धेन पच्यर्थसाध्यभूतः तं करोतिना प्रकृतिभूतेनोपादाय विवरणोपपत्तेः। यत्रापि प्रयोगो "रथो गमनं करोति" इति तत्रापि प्रयत्नस्यापरस्याभावात् गमनस्य साध्यतां दर्शयितुं गौणः करोति प्रयोगो द्रष्टव्यः। यस्तु "ओदनं पचती"त्यादौ वृद्धव्यवहारे एव प्रकृत्यर्थातिरिक्ते प्रयत्ने प्रयोगात् आख्यातानां तदर्थमाह स इत्थं शिक्षयितव्यः - वत्स ! किं न वेत्सि अनन्यलभ्यः शब्दार्थ इति। इह च प्रकृत्यर्थाक्षेपेणापि तत्सम्भवात् न शक्यते तद्वाचकता आख्यातानाम् आश्रयितुम्" इति। जगदीशोऽपि **शब्दशक्तिप्रकाशिकायाम्** आख्यातवादे –"प्राभाकरास्तु कृत्यादिकं नाख्यातार्थः। किन्तु कालः संख्या च । तयोः प्रकारान्तरालभ्यत्वात्। "चैत्रः पचति, रथो गच्छति" इत्यादौ धात्वर्थस्यैव पाकगत्यादेः कृतिमत्त्वाश्रयत्व-सम्बन्धेन चैत्रादौ प्रकारत्वात्" इत्यादिना मतमिदमुल्लिलेख।

नन्वेवं फलमात्रस्य धात्वर्थत्वे तस्यैव नामार्थे भेदेनान्वयः स्वीकर्तव्यः। न चेष्टापत्तिः। धात्वर्थप्रातिपदिकार्थयोः साक्षात् भेदेनान्वयस्य अव्युत्पन्नत्वात्। अन्यथा "तण्डुलः पचति चैत्र" इत्यादावपि अन्वयो भवेदिति चेन्न। विशेष्यता-सम्बन्धेनाभेदातिरिक्तसंसर्गकप्रातिपदिकार्थप्रकारकबोधे निपातसुबादिजोपस्थिते-रेव हेतुत्वमिति धात्वर्थे प्रातिपदिकार्थस्य भेदेन प्रकारतया अन्वयानभ्युपगमात्। अतश्च धात्वर्थस्य कृतिमत्त्वादिसम्बन्धेन प्रथमान्तान्वये न किंचिद्बाधकम्। इदं च

कान्ति – परीक्षा - तत्त्वदर्शिनीषु भूषणसारव्याख्यासु स्पष्टतया प्रदर्शितम्। शब्दशक्तिप्रकाशिकायां बृहद्भूषणे विस्तरेण प्रपञ्चितमिति तु उक्तमेव। तत्र शब्दशक्तिप्रकाशिकायां –

"धात्वर्थेन विशिष्टस्य विधेयत्वबोधने।
समर्थः स्वार्थयत्नस्य शब्दो वाख्यातमुच्यते॥"(श-श-प्र-आख्या 97)

इति आख्यातलक्षणव्याख्यायां - "ननु कृत्यादिकं नाख्यातार्थः, किन्तु कालः संख्या च, तयोः प्रकारान्तरालभ्यत्वात्। "चैत्रः पचति, रथो गच्छति" इत्यादौ धात्वर्थस्यैव पाकगत्यादेः कृतिमत्त्वाश्रयत्वादिसम्बन्धेन चैत्रादौ प्रकारत्वात्। "मैत्रः पच्यत" इत्यादितो मैत्रादेः कर्तृत्वादिना "तण्डुलः पचती"त्यादौ तण्डुलादेः कर्मत्वादिना संसर्गेण पाकादावनन्वयेन धात्वर्थे एव धर्मिणि नामार्थस्य भेदेनान्वयोऽव्युत्पन्नो न तु नामार्थेऽपि धात्वर्थस्य। न चैवं "ज्ञानं चैत्र" इत्यादितोऽपि बोधरूपस्य धात्वर्थस्याश्रयत्वसम्बन्धेन चैत्रे धर्मिणि अन्वयप्रसङ्गः। तत्र ज्ञानादिपदस्य बुद्ध्यर्थकनामतया तदर्थस्य नामान्तरार्थे भेदेनान्वयस्याव्युत्पन्नत्वादेव तदसम्भवात् इति प्राभाकराः" इति तन्मतं प्रपञ्चितम्। इदमेव **परीक्षायां** भैरवमिश्रैः अनूदितम्।

बृहद्भूषणेऽपि - "लडादौ भावना वाच्यैव न। तत्प्रकारकशाब्दबोधस्य विवाद - ग्रस्तत्वात्। यत्त्वाख्यातस्य यत्नो वाच्यः यत्नार्थककरोतिना विवरणात्। व्यवहारवत् बाधकं विना विवरणादपि व्युत्पत्तेः। किं करोतीति यत्नप्रश्ने पचतीत्युत्तरस्य यत्नार्थकत्वं विनानुपपत्तेश्च। किं च फलमात्रस्य धात्वर्थत्वे तस्यैव नामार्थे अन्वयः स्यात्। न चेष्टापत्तिः। धात्वर्थप्रातिपदिकार्थयो र्भेदेन साक्षादन्वयस्य अव्युत्पन्नत्वात्। अथवा "तण्डुलः पचति चैत्र" इत्यादावप्यन्वयो भवेदिति तन्न। विवरणस्य पाकमित्यशब्दार्थकर्मत्वविवरणवदुपपत्तेः। तथा हि - चैत्रः पचतीत्यत्र स्वजनककृतिसम्बन्धेन पाकश्चैत्रे विशेषणम्। तथा च चैत्रः पाकं करोतीत्यत्र द्वितीयाख्यातयोरिव कृञोऽपि संसर्ग एवार्थः। अन्यथा द्वितीयया आख्यातेन कर्मत्वाश्रयत्वयोरपि विवरणात् तयोरपि वाच्यत्वापत्तेः। कृतित्वादिप्रकारकबोधस्तु मानस एवोत्तरकालिकः। प्रश्नोऽपि किं करोतीत्यत्र यदि किं शब्दस्य क्रियाविशेषणत्वमादाय कीदृशी क्रिया इत्येवं रूपः कीदृशो यत्न इत्येवं रूपो वा कर्ममात्रविषयः, उभयथापि न तदुत्तरम् यत्नस्याख्यातार्थत्वसाधकम्।

पाकवाचकस्यैव धातोः तद्विषयकयत्ने लक्षणया पाकविषयकबोधोपपत्तेः स्वातन्त्र्येण शक्तिसिद्ध्यसम्भवात्। एवंविधप्रश्नस्यासार्वत्रिकत्वात्। कर्मप्रश्नश्च पाकमात्रबोधनेनोपपन्नः। अत एव पाकमित्यपि कादाचित्कमुत्तरं सङ्गच्छते। "तण्डुलः पचती"त्यादौ तण्डुलप्रकारकपाकविशेष्यकबोधापत्तिरूपं बाधकं विशेष्यतासम्बन्धेन अभेदातिरिक्तसंसर्गकप्रातिपदिकार्थप्रकारकबोधे निपातसुबादि-जन्योपस्थितेः विषयतया हेतुत्वकल्पनेनैव नास्तीति कृतिसंसर्गकचैत्रादि-विशेष्यकबोधे न दोषः। न च धात्वर्थप्रकारकबोधस्य कर्मादिरूपनामार्थे अभावात् धात्वर्थप्रकारकबोधे तिङादिजन्योपस्थितेः हेतुत्वं कल्पनीयम्। तथा च न चैत्रे तदन्वय इति वाच्यम्। धात्वर्थप्रकारकबोधे प्रथमान्तपदजन्योपस्थितेरेव लाघवेन हेतुत्वात्। अन्यथा धात्वर्थप्रकारकबोधे तिबादिजन्योपस्थितिः विषयतया हेतुः। आख्यातार्थभावनाप्रकारकबोधे प्रथमान्तपदजन्योपस्थितिर्हेतुरिति कार्यकारणभाव - द्वयम् आख्यातस्य शक्तिश्च कल्प्येत्यतिगौरवं स्यात्। तस्मान्न कर्त्राख्यातस्य कृतिः कर्माख्यातस्य फलं वाच्यम्। जानातीत्यादौ आश्रयत्वं लक्ष्यमिति युक्तम्। न च पचतीत्यादावाख्यातस्य भावनावाचकत्वग्रहवतः पाकानुकूलकृतिमानिति बोधात् धात्वर्थप्रकारकबोधे तिङापि कृतेः उपस्थितिर्हेतुः कल्प्येत्याख्यातार्थः कृतिरिति वाच्यम्। एवं आख्यातार्थः कर्तेति ग्रहवतः आख्यातार्थसंख्याप्रकारक-बोधं प्रति आख्यातजन्यकर्त्रुपस्थितेः हेतुत्वस्य क्लृप्तत्वेन कर्तृकर्मणोरपि आख्यात-वाच्यताङ्गीकारापत्तेः। कर्तृकर्मणोः शक्तिकल्पनागौरवमधिकमिति चेत् कृतिफलयोः शक्तिकल्पनागौरवं तवाप्यधिकमिति तुल्यमिति दिक्।

भावनायाः अवाच्यत्वमते फलमात्रम् अर्थ इति फलितम्। तत्रैव करणादीना-मन्वयः। तथा च "काष्ठैः पचति" इत्यादौ काष्ठजन्यः पाक इति बोधः। इदमेव च धात्वर्थस्य क्रियात्वम् यत् कारकान्वयित्वम्। एवं च धात्वर्थनिरूपितं साध्यत्वं क्वापि विध्यतिरिक्तवाक्ये न बोध्यते। "तण्डुलं पचति" इत्यत्रापि कर्मशक्तिः द्वितीयार्थः न तु साध्यत्वमिति न धात्वर्थसाध्यत्वं प्रतीयते। एवं च विधिवाक्यार्थ-कार्यविशेषणीभूतकृतौ यागस्य विषयतयान्वयात् तत्रान्वयितावच्छेदकतया करणत्वमौपादानिकप्रमाणादुपस्थितं शाब्दबोधे भासते। यच्च "काष्ठैः पाक" इति स्यादिति। तत्र इष्टापत्तिरेवेति वक्ष्यामः। तवापि "काष्ठैर्भावने"त्यापत्तिश्च। यदि चाख्यातोपात्तभावनायामेव तदन्वयः तदा लडाद्यन्तोपात्तधात्वर्थे एव तदन्वय

इति मयापि सुवचमेव। तस्मात् भावनाया अवाच्यत्वे न कारकान्वयानुपपत्तिः। फले एवैषामन्वयात्। नापि पचतीत्याख्यातार्थकालान्वयानुपपत्तिः। जानातीत्यादौ धात्वर्थे एवान्वयात्। क्वचित् आक्षिप्तभावनायामन्वयः। पक्ववानित्यादौ भावनावाच्यत्वविरहवादिभिः भट्टपादैरपि तथाभ्युपगमात्।

एवं च भावनायाः वाच्यत्वस्यैवाभावात् क्व कृतित्वेन व्यापारत्वेन वा वाच्यत्वे विवादः। कथं वा धात्वाख्यातार्थत्वविवादः इति केचिन्मन्वते।" इति मतखण्डन-परता उक्ता। यद्यप्यत्र प्राभाकरनामग्रहणपुरस्सरं प्रतिपादनं नास्ति अथापि अस्यैव भूषणसारे प्राभाकरीयत्वेन उल्लेख इति अपरोक्षमेव समीक्षकाणाम्। इदं च प्राचीनं प्राभाकरमतम्। अन्यदपि प्राभाकरं मतमस्तीति "अथ व्यापारोऽपि धात्वर्थ इत्यभ्युपेयते तर्हि सिद्धमस्मन्मतम् " इति **भूषणग्रन्थात्** तिङर्थनिर्णयस्थ-**लघुमञ्जूषाग्रन्थाच्च** अवगम्यते। तत्र तिङर्थनिर्णये हि नव्यनैयायिकमतखण्डनान्ते "एतेन यत्नातिरिक्तः फलानुकूलो व्यापारो धात्वर्थः। यत्न आख्यातार्थः। स च लिङ्येव नान्यत्र। धात्वर्थे कारकान्वयः। काष्ठैः पाकः इति तु इष्टमेव इति समन्वयसूत्रे वाचस्पत्युक्तं परास्तम्" इति वर्तते। "तत्तु समन्वयात्"(1-1-4) इति व्याससूत्रे **भामत्यामिदं** मतं निरूपितम्। जयन्तभट्टेन **न्यायमञ्जर्यामपि** मतमिदं निरूपितम्। परन्तु नेदं मतमत्राभिप्रेतमिति तु भूषणग्रन्थावलोकनेन सुस्पष्टं भवति।

अथादिपदार्थरूपं नैयायिकमतस्वरूपमत्र किंचिद्विविच्यते। **बृहद्भूषणे** तावत्"अत्र नैयायिकाः। व्यापारो वाच्य इत्ययुक्तम्। व्यापारत्वस्योपाधित्वेन शक्यता-वच्छेदकत्वे गौरवात्। फूत्कारत्वादेरपि गुरुत्वादननुगतत्वाच्च नावच्छेदकत्वम्। किन्तु कृतित्वस्यैव जातिरूपतया लाघवेन शक्यतावच्छेदकत्वौचित्यात् कृतिरेव वाच्या। किञ्च करोतेर्यत्नार्थकत्वं तावदावश्यकम् यत्नजन्यत्वाजन्यत्व-प्रतिसन्धानात्पटाङ्कुरयोः कृताकृतव्यवहारात्। तदुक्तम् आचार्यैः –

"कृताकृतविभागेन कर्तृरूपव्यवस्थया ।
यत्न एव कृतिः पूर्वा परस्मिन्सैव भावना॥ इति।(न्या.कु.पञ्चम.9)

कृतित्वस्यैव लाघवेन शक्यतावच्छेदकत्वौचित्याच्च। व्यापारस्य कृत्यर्थत्वे च कारकमात्रं कर्तृपदार्थः स्यात्। करोत्यर्थभूताश्रयस्यैव कर्तृपदार्थत्वात्। इत्थं च यत्नार्थककरोतिना विवरणात् किं करोतीति यत्नप्रश्ने पचतीत्युत्तरस्य यत्नार्थकत्वं

विनानुपपत्तेश्च यत्न एवार्थः। अत एव पचतीत्यत्र यत्नानुभवः सर्वसिद्धः सङ्गच्छते। नन्वेवं कथं "रथो गच्छती" त्यादि प्रयोगः। तत्र यत्नस्य बाधादिति चेन्न। अनुकूलव्यापारे लक्षणया प्रयोगात्। विद्यते इत्याद्यनुरोधात्आश्रयत्वे वा लक्षणा। तथा च गमनाश्रयबोध एव तत्र। अत एव अन्यदीयगमनानुकूल -नोदनादिमति न गच्छतीति प्रयोग इति। तस्मात्व्यापारो वाच्य इति मतं न सम्यगित्याहुः।" इति।

बृहद्भूषणोक्तमिदं पर्यालोच्य **काशिकाव्याख्यायाम्** - "फलं धात्वर्थः यत्नः कृतिः आख्यातार्थ इति प्राचीननैयायिकमतं पर्यवसन्नम्। यत्नत्वं धातुशक्यतावच्छेदकमिति नार्थः। तथा सति प्रत्ययस्याश्रयार्थकत्वापत्तेः। तच्च न नैयायिकाभिमतमिति धातोः आख्यातस्य वा व्यापारावाचकत्ववादिप्राचीननैयायिकमतमेवात्राभिप्रेतमि"ति सुष्ठूक्तम्। **प्रभा**त्र काशिकानुसारिणी।

परन्त्वेतादृशस्य नैयायिकमतस्य प्रचारे अभावात्एतादृशं नैयायिकमतमेव नास्तीति मन्वानः **दर्पण**कारः - "यद्यपि व्यापारो धात्वर्थत्वेन नैयायिकसम्मतः तथापि नासौ तन्मते भावनापदव्यपदेश्य" इति भावः इति प्राचीननवीननैयायिकमतसामञ्जस्येन सर्वमपि नैयायिकमतमत्र खण्ड्यते" इति सूचितवान्। **परीक्षायां शाङ्कर्यां**च दर्पणकाराशय एव अनूदितः।

तत्त्वदर्शिन्यामपि "तिङन्ते कृतिरेव वाच्या लाघवात्न व्यापारो गौरवात्इति नैयायिकाशयस्यैव प्रकृतसन्दर्भे निराक्रियमाणत्वात्" इत्यादिना काशिकोक्तं नैयायिकमतं प्रदर्शितमथापि फलं धात्वर्थः यत्न आख्यातार्थ इति नैयायिकमतं कुत्रापि नास्तीति काशिकाकारादीनां वचनं तिरस्कृतम्।

कृष्णमित्रस्तु अत्रत्यादिपदं न नैयायिकमतपरं किन्तु मीमांसकमतपरमिति स्वीकृत्य "सिद्धभावो धात्वर्थः, तद्गतसाध्यत्वम्आख्यातेनोच्यत इति भावना आख्यातार्थ" इति मतखण्डनपरतया व्याचख्यौ। तदीयग्रन्थश्चेत्यम् - "अत्र मीमांसकाः - धातुना सिद्धो भावो दानयागादिरुच्यते। तद्गतं साध्यत्वं तु आख्यातेनोच्यत इति आख्यातार्थो भावना। तदाहुः –

> धात्वर्थव्यतिरेकेण यद्यप्येषा न लक्ष्यते।
> तथापि सर्वसाधारणरूपेणैवाभिधीयते॥ इति ।(मी.2.1.1.1)

यत्न एव भावना। पचतीत्यस्य पाके यतते इति प्रतीत्या यत्नस्य धात्वर्थत्वाभावात्। रथो गच्छतीत्यादौ आश्रयत्वरूपैव भावना, तस्याश्च साध्यरूपत्वेन भानस्य पर्वताः सन्तीत्यादौ शाब्दिकैरङ्गीकारात्। सा चेयं सर्वाख्यातवाच्या अर्थभावनेत्युच्यते इति वदन्ति"। इदमपि मतं खण्डनीयमेव। धातुना सर्वत्र साध्यस्वरूपव्यापाराभिधानस्यैव व्यवस्थापनीयत्वात्। तच्च विवरणेनैव पक्ववान्पाकं कृतवानित्यादिनैव साधनीयमिति "तस्मात्करोति"रिति कारिकयैव इदमपि मतं निरस्यत इत्येव युक्तम्। अतोऽत्रादिपदेनास्य ग्रहणं नोचितम्। **कान्तिकारेण** तु आदिपदेन मण्डनमिश्रमतमेव स्वीकृतम्। "तस्मात्करोति"रिति कारिकया मण्डनमिश्रमतस्य अग्रे पृथक्निराक्रियमाणत्वात्अत्रादिपदस्य मण्डनमिश्र -परतया व्याख्या अयुक्तैव। अतः कृष्णमित्रकान्तिकारावत्रोपेक्ष्यौ।

"तिङन्ते कृतिरेव वाच्या न व्यापारः" इति मतमेवात्रादिपदेन विवक्षितमिति तु सत्यम्। अतः **तत्त्वदर्शिनी** तस्मिन्नंशेऽन्वर्थैव। परन्तु "फलं धात्वर्थः कृतिराख्यातार्थः" इति नैयायिकमतमेव नास्तीति काशिकाखण्डनमेव तत्र नोचितम्।

प्राचीननवीननैयायिकमतसामञ्जस्येन सर्वं नैयायिकमतमत्र खण्ड्यते इति दर्पणकारादीनां वचनमपि न युक्तम्। तिङन्ते व्यापारप्रतीतेः नव्यनैयायिकैरङ्गीकारात्। भावनापदेन प्रतीतिः मीमांसकाभ्युपगता न नैयायिकाभ्युपगता। तैः कृतेरेवाख्यातार्थत्वाङ्गीकारात्। धात्वर्थव्यापारस्यापि भावनापदव्यवहार्यत्वं न नैयायिकाभिमतम्, यतः "भावप्रधानमाख्यातमि"त्यत्रत्यभावशब्दस्य कृतिपर्यायतया तैः स्वीकारात्।

अथावशिष्टं **काशिकायां** प्रदर्शितं मतम्। यद्यप्येतादृशमतमस्तीति प्रायः नैयायिका अपि न जानन्ति परन्त्वस्त्येव। तथा हि -**आख्यातवाददीधितौ**-"आख्यातस्य यत्नो वाच्यः।पचति पाकं करोतीति यत्नार्थककरोतिना सर्वाख्यातविवरणात्। व्यवहारादिवद्बाधकं विना विवरणादपि व्युत्पत्तेः, किं करोतीति यत्नप्रश्ने पचतीत्युत्तरस्य यत्नार्थकत्वं विना अनुपपत्तेश्च। अचेतने "रथो गच्छती"त्यादौ अनुकूलव्यापारे लक्षणेति प्राञ्चः। अन्यदीयगमनानुकूलनोदनादिमति गच्छतीत्यप्रयोगात्। रथो गच्छति जानाति इच्छति यतते द्वेष्टि विद्यते निद्रातीत्यादौ क्रियानुकूलकृतिव्यापारयोः अप्रतीतेः गत्यादिमात्रप्रतीतेश्च आश्रयत्वे, नश्यतीत्यादौ च प्रतियोगित्वे निरूढलक्षणा। कृञश्च यत्नार्थकत्वं

क्रियाजन्यत्वेऽपि यत्नजन्यत्वाजन्यत्वप्रतिसन्धानात् पटाङ्कुरयोः कृताकृत-व्यवहारात् ज्ञात्रादिवदाश्रयपरतृजन्तकर्तृपदस्य यत्नाश्रयबोधकत्वाच्च। क्रियायाः तदनुकूलव्यापारस्य वा कृञर्थत्वे तदाश्रयः कारकमात्रं वा कर्तृपदार्थः स्यात्।" इति प्राचीननैयायिकमतमुपन्यस्तम्। **बृहद्भूषणे**ऽपीदमेवानूदितमिति द्वयोः तोलनेन ज्ञायते।

इदमेव हि कुसुमाञ्जलिकारस्य उदयनाचार्यस्यापि सम्मतम्। तथा हि - **न्यायकुसुमाञ्जल्यां** पञ्चमस्तबके - "भावनैव हि यत्नात्मा सर्वत्राख्यातगोचरः" (न्या-कु-5-10) इति कारिकाव्याख्यायाम् - "न खलु सा भावना धातुना अभिधीयते। धातूनां क्रियाफलमात्राभिधायित्वात्। अन्यथा पाक इत्यादावपि भावनानुभवप्रसङ्गात्। आख्यातयोगेनैव हि पूर्वापरीभूतभावनानुभवो जायते। तस्मादाख्यातार्थः कृतिः। सा च यत्नरूपा। अतश्च कृतित्वमेव शक्यता-वच्छेदकम्। न तु व्यापारत्वम्। तस्योपाधित्वेन शक्यतावच्छेदकत्वे गौरवात्। फूत्कारत्वादेरपि गुरुत्वादननुगतत्वाच्च नावच्छेदकत्वम्। किन्तु कृतित्वस्यैव जातिरूपतया लाघवेन शक्यतावच्छेदकत्वौचित्यात्कृतिरेव वाच्या।" इत्युक्त-माचार्यैः। अत्र "धातूनां क्रियाफलमात्राभिधायित्वादि"ति प्रतीकमुपादाय तद्व्याख्यायां **प्रकाशाख्यायां** वर्धमानः - "फलस्य धात्वर्थतया पच्यर्थो विक्लित्ति-र्लाघवात्, न तु तत्फलको व्यापारोऽधःसन्तापनादिः। न चैवं व्यापारविगमे फलसत्त्वकाले पचतीति प्रयोगापत्तिः। धात्वर्थानुकूलव्यापारवत्त्वस्याख्यातार्थ-तया व्यापारकाल एव पचतीति प्रयोगात्। अथैवं धात्वर्थतया फलं क्रियेति तण्डुलादेः कर्मता न स्यात् विक्लित्तिजनकफलभागित्वाभावात् इति चेन्न। परसमवेतव्यापारफलशालिनस्तण्डुलादेः कर्मत्वात्। विक्लित्त्यनुत्पादे व्यापार - विगमदशायां "पाको वर्तत" इत्यत्र पाकपदे व्यापारलक्षणा। चैत्रः पचतीत्यत्र पाकानुकूलयत्नानुभवात् स एवाख्यातवाच्यः लाघवात्। न त्वनुकूलव्यापारः। यत्नत्वजात्यपेक्षया व्यापारत्वस्योपाधित्वेन गुरुत्वात्। न चाचेतनेऽपि आख्यातस्य मुख्यत्वार्थम्अनुगतो व्यापार एव शक्य इति वाच्यम्। शक्तिग्राहकेण लघुनि शक्तिग्रहात्। मुख्यत्वार्थं शक्तिकल्पने वृत्त्यन्तरोच्छेदापत्तेः।" इत्यादिना फलं धात्वर्थः कृतिरेव शक्यार्थः आख्यातस्य, तस्याश्च प्रथमान्तार्थेऽन्वयः ततश्च धातोर्वा आख्यातस्य वा व्यापारो न शक्यार्थ इति स्पष्टं तन्मतं प्रत्यपीपदत्।

अन्यास्वपि कुसुमाञ्जलिव्याख्यासु **आमोद-बोधिनी -विवेकादिषु** इदं स्पष्टम्। अतश्च एतादृशं मतमेव नास्तीति वचनं परास्तम्। **दीधितिकारेण** रघुनाथ - शिरोमणिनैव प्राचीनमतत्वेनास्य प्रतिपादनात्। अतश्च सिद्धं लडाद्यन्ते लिङतिरिक्ततिङन्ते व्यापारस्य अवाच्यत्वमिति वदतां प्राभाकराणां मतं तिङन्ते व्यापारस्य अवाच्यत्वं (अशक्यत्वं) वदतां प्राचीननैयायिकानां च मतमत्र खण्ड्यमानत्वेनोद्दिष्टमिति। किञ्च अन्यदपि नैयायिकमतमत्र खण्डन-विषयत्वेनाभिमतम्। तच्च "व्यापारमात्रं धात्वर्थः। फलं द्वितीयार्थः" इति प्राचीन-नैयायिकमतत्वेन **व्युत्पत्तिवादादौ** प्रदर्शितम्। अस्मिन् मते तिङन्ते फलस्य बोध एव नास्ति। अस्माभिः यथा व्यापारस्य बोधः तिङन्ते साधनीयः तथा फलस्यापि बोधः तिङन्ते साधनीयः इति तदसाधने ग्रन्थस्य न्यूनता स्यात्। यद्यप्यत्र अवतरणिकायां भावनायाः अवाच्यत्वमिति वदतां मतस्यैवात्र खण्डनविषयत्व-मित्युक्तम्। ततश्च प्रधानमुद्देश्यं तद्भवेन्नाम। अथापि यथा तिङन्ते भावनाऽ-वाच्यत्ववादिनो निरसनीयाः तथा फलाऽवाच्यत्ववादिनः अपि निरसनीया एवेति तदपि अत्र लक्ष्यमेव। एतदेव कारिकायाः उत्तरार्थव्याख्यायाम्**भूषणे** "तस्मात् फलव्यापारयोरिति प्रतिज्ञातफलवाचकत्वसाधनायैव कृञोऽकर्मकतापत्तेरिति ग्रन्थ इति विभावयामः" इति सूचितं कौण्डभट्टेन। व्यापारमात्रं धात्वर्थ इति मतमपि इत्थं प्रदर्शितं **भूषणे** - "नन्वस्तु तर्हि धातोः केवलव्यापारवाचकता, फलं कर्म प्रत्ययार्थः। संयोगरूपफलभाने गम्धातोः विभागभाने त्यजधातोः समभिव्याहारस्य नियामकत्वाच्च न ग्रामं गच्छति त्यजतीत्यनयोः विभागसंयोग-बोधनदोषप्रसङ्ग इति नैयायिकप्राचां मतमपि" इति।

अन्यच्च सर्वनैयायिकाभ्युपगतं जानातिकरोत्यादीनां केवलज्ञानयत्नादिमात्र-वाचित्वम्। "पचिगमिप्रभृतिषु फलव्यापारोभयबोधेऽपि जानातिकरोत्यादिषु केवल -व्यापारबोध एव। यद्यप्येतेषां धातूनां सकर्मकत्वव्यवहारोऽस्ति तथापि सः गौण एव" इति तेषां मतम्। अत्र प्रतिज्ञातं तु सर्वेषामपि धातूनां फलव्यापारोभय-वाचकत्वम्। अतश्च तत्साधयितुं तदपि निरस्यते अनयैव कारिकया उत्तरार्धेन। तदुक्तं भूषणसारे अथवा "व्यापारो भावना इत्यर्धेन व्यापारस्य वाच्यत्वं प्रसाध्य फलांशस्यापि तत् साधयन् नैयायिकाभ्युपगतं जानातिकरोत्यादीनां केवलज्ञान-

5.3 भावना-क्रिया-व्यापारः – उत्पादना इत्येतेषाम् पर्यायता

व्यापारो भावना सैवोत्पादना सैव च क्रिया ।
कृञोऽकर्म्मकतापत्तेर्न हि यत्नोऽर्थ इष्यते ॥ 5 ॥

यत्नादिक्रियामात्रवाचित्वं दूषयति" - इति।

अथास्याः कारिकायाः मुख्यमुद्देश्यं तु फलव्यापारयोरुभयोरपि तिङन्तबोध्यत्व-साधनम्। तत्र पूर्वार्धस्य व्यापारबोधसाधकत्वात् तदनङ्गीकर्तृमतखण्डनपरत्वम् अवतरणिकया सूचितम्। उत्तरार्धं तु फलस्यापि तिङन्तबोध्यत्वसाधकम्। तदुक्तं **काशिकायाम्** - "एतेन व्यापारो भावनेति कारिकया व्यापारस्य धातुवाच्यत्व-साधनेऽपि फलांशस्य तदसाधनेन न्यूनतेति दूषणं प्रत्युक्तम्" इति ।

सुबोधिन्यां तत्त्वदर्शिन्यां च अयमेवाशयः प्रदर्शितः।

दर्पणे तु "व्यापारो भावने"ति पूर्वार्धमेवोभयसाधकमित्युक्तम्। तत्र हि - "वस्तुतस्तु व्यापारो भावना सैवे"ति पूर्वार्धमेव विवरणप्रदर्शनेन धातोः फल-व्यापारोभयार्थत्वसाधकम्। तथा हि - धातोर्व्यापारार्थकत्वेऽसिद्धे भावनादिपदैः व्यापारपदविवरणमात्रात् न तस्य तावत्सिद्धिरिति स्फुटमेव। अतः पचति - पाकं करोति - पाकभावना - तादृश्युत्पादना इत्यादि विवरणपरतैव तस्य वाच्या। व्याख्यातं च तथैव सारकृता । तथा च व्यापारार्थककृञेव विक्लित्त्याद्यर्थक-पाकादिपदेनापि विवरणादुभयोरपि धात्वर्थत्वसिद्धिः। तत्र जानात्यादौ फलांशे विप्रतिपन्नं नैयायिकं प्रत्युक्तार्थोपष्टम्भकतया कृञोऽकर्मकतेत्याद्युक्तम्। धातुमात्रे व्यापारावाचकत्वं वदन्तं मीमांसकं प्रति तु तदुपपादकतयैव तस्मात् करोति-रित्यादि। यद्यपि व्यापारांशे विप्रतिपन्नं प्रत्यपि कृञ इत्याद्युपष्टम्भकं तथापि विवरणस्यैवाख्यातपरतया सकर्मकत्वस्य (धातोः)व्यापारार्थकत्वं विनाप्यन्यथा-सिद्धावुद्भावितायां तद्ग्रन्थस्यावश्यकत्वात्" इति विद्यते। वस्तुतस्तु विवरणस्य फलव्यापारोभयार्थसाधकत्वेऽपि निरस्यमानमतविशेषमनुसृत्यैव तदुल्लेख-तात्पर्यस्य निर्णेयत्वात्पूर्वार्धस्य व्यापारसाधकत्वमेव युक्तम्। उत्तरार्थमारभ्यैव फलांशसाधनमित्येव युक्तमित्याभाति।

॥**व्यापारो भावनेति**॥ पचति - पाकं करोतीति विवरणेन वृद्धव्यवहारेण च यः प्रकृत्यर्थातिरिक्तःप्रयत्नः बुध्यते सोऽपि तिङन्तबोध्य इति अवश्यमङ्गी करणीयम्।

"पचति - पाकमुत्पादयति" "पाकानुकूला भावना "तादृश्युत्पादना" इत्यादिविवरणाद्विव्रियमाणस्यापि तद्वाचकतेति भावः।

व्यापारपदं फूत्कारादीनामयत्नानामपि फूत्कारत्वादिरूपेण वाच्यतां ध्वनयितुमुक्तम्। अत एव पचति इत्यत्राधःसन्तापनत्व-फूत्कारत्व-चुल्ल्युपरिधारणत्व-यत्नत्वादिभिर्बोधः सर्वसिद्धः।

व्यवहारवत् बाधकं विना विवरणस्यापि शक्तिग्राहकत्वेन तद्बोध्यस्य सर्वस्यापि तद्वाच्यत्वस्य अवश्यमभ्युपगन्तव्यत्वात्। तथा च विवरणेन पाकमात्रस्यैव वाच्यत्वं बोध्यते तदनुकूलप्रयत्नस्य व्यापारस्य वा विवरणवाक्यार्थ-मुख्यविशेष्यभूतस्य सम्बन्धविधया आक्षेपेण वा भानमिति प्राभाकरमतं न युक्तमिति वक्तुमुपक्रमते - **पचति-पाकमुत्पादयति** इति॥ **विव्रियमाणस्यापि तद्वाचकतेति** च ॥ यथा - विव्रियमाणस्य पाकस्य पचतिशब्दाभिधेयत्वं तथा करोत्यर्थस्य प्रयत्नस्यापीति भावः। तत्रैकस्य शब्दाभिधेयत्वम्अन्यस्य च आक्षेपेण संसर्गमर्यादया वा लाभ इत्यत्र विनिगमकाभावात्। पचति इत्यस्य यथा पाकं करोतीति विवरणं प्रसिद्धं तथैव पाकानुकूला भावना, पाकानुकूला उत्पादना, पाकानुकूलः व्यापारः, पाकानुकूला क्रिया इति विवरणान्यपि प्रसिद्धान्येवेति समेषामेतेषां विवरणवाक्यानां समानार्थतैव वक्तव्या। ततश्च व्यापारः भावना उत्पादना क्रिया इत्येतेषां पर्यायत्वं सिद्ध्यति। अथवा करोत्यर्थस्यैव विवरणम्व्यापारः भावना उत्पादना क्रियेति शब्दैः क्रियते। तथा च भावनाशब्देन मीमांसकैरभिधीयमाना आर्थीभावना, सैव कृतिशब्देन नैयायिकैरभिधीयमाना उत्पाद्यत्वेन साध्यत्वेन च भासमाना

"गुणभूतैरवयवैः समूहः क्रमजन्मनाम्।
बुद्ध्याप्रकल्पिताभेदः क्रियेति व्यपदिश्यते॥"(वा.प.क्रि.4)

इति वाक्यपदीयोक्तबुद्धिविशेषविषयतावच्छेदकत्वोपलक्षितफूत्कारत्वाधःसन्ताप-नत्वयत्नत्वादिधर्मावच्छिन्नक्रियासमूहरूपा, "प्रशंसायाम्" (पा 5-3-66) इतिसूत्र -स्थेन "एका क्रिये"ति भाष्येण अभिप्रेता क्रियाशब्दाभिधेया व्यापाररूपा च करोत्यर्थः। तथा च मीमांसकाभिप्रेता आर्थीभावना नैयायिकाभिप्रेता व्यापारा-तिरिक्ता कृतिः अधिश्रयणादिरूपक्रियासमूहः व्यापारः सर्वोऽपि करोत्यर्थः।

5.4 कृतित्वस्य शक्यतावच्छेदकत्वनिरासः

न चैवमेषां शक्यतावच्छेदकत्वे गौरवापत्त्या कृतित्वमेव तदवच्छेदकं वाच्यम्, रथो गच्छति, जानाति इत्यादौ च व्यापारत्वादिप्रकारकबोधो लक्षणयेति नैयायिकरीतिः साध्वी। शक्यतावच्छेदकत्वस्यापि लक्ष्यतावच्छेदकत्ववद् गुरुणि संभवात्। तयोर्वैषम्ये बीजाभावात्। न च पचति पाकं करोतीति यत्नार्थककरोतिना विवरणाद्यत्न एवाख्यातार्थ इति वाच्यम्। रथो गमनं करोति बीजादिनाऽङ्कुरः कृतः इति दर्शनात् कृञो यत्नार्थकताया असिद्धेः।

एतत्सूचनार्थमेवात्र व्यापारपदम्। परैः स्वीकृतः यत्नातिरिक्तव्यापारोऽपि विवरण-वाक्यीयकरोत्यर्थ इति बोधनायेत्यर्थः। तदेव स्पष्टं वक्ति - **व्यापारपदमित्यादिना। अयत्नानामपीति** । अपिना यत्नस्यापि संग्रहः। ततश्च कृतिभावनादिशब्दैरभिप्रेतः यत्नः व्यापारशब्देन परैरभ्युपगतः तदतिरिक्तः व्यापारः सर्वोऽप्यत्र व्यापारशब्देन विवक्षित इत्यर्थः। एतदर्थमेव कारिकायां सैव सैवेत्यभिधानम्। तथा च अस्य पूर्वार्थस्य एवमपि व्याख्या सिद्धा - यः व्यापारः स एव भावना। स एव उत्पादना। स एव क्रिया । इति। "सोऽचिलोपे चेत्पादपूरणम्"(पा. 6-1-134) इति सूत्रेण पादपूरणार्थं सुलोपे वृद्धौ च सैवेति सिद्ध्यति "सैष दाशरथी राम" इतिवत्। अथवा सा भावना व्यापार एव। सा उत्पादना व्यापार एव। सा क्रिया व्यापार एवेति अन्यत्र कृतिभावनादिशब्दैः यः प्रसिद्धः स सर्वोऽप्यर्थः व्यापार एवेति भावः। अत्र तच्छब्दः विविधविवरणवाक्यीयभावनादीनां परामर्शकः। तथा च पूर्वोक्तं "व्यापारस्तु भावनाभिधा साध्यत्वेनाभिधीयमाना क्रिया" इति यद्व्यापारलक्षणं तस्य भट्टोजीदीक्षितसम्मतत्वं सूचितं भवति। तथाच व्यापारत्वं व्यापकं यत्र भावनात्व-यत्नत्व-कृतित्वादिरूपम्आश्रयत्वप्रतियोगित्वादिकं च सर्वमन्तर्भवति। ततश्च फलातिरिक्ततया तदनुकूलतया भासमानस्य सर्वस्यापि व्यापारत्वं सिद्ध्यति। व्याप्रियते अनेनेति करणव्युत्पत्त्या भावव्युत्पत्त्या वा व्यापारपदेन सर्वसंग्रह इति भावः। ततश्च तेषां सर्वेषां तिङन्तबोध्यत्वं सिद्ध्यति। ततश्च "फलं धात्वर्थः, कृतिः आख्यातार्थः, व्यापारे लक्षणे"ति मतमपि न समीचीनमिति नैयायिकैकदेशमतखण्डनमपि अस्योद्देश्यम्। तदेव स्पष्टं कथयति - **फूत्कारत्वादिरूपेण वाच्यतां ध्वनयितुमिति।**

5.4.1. गुरुधर्मस्याप्यवच्छेदकत्वे नैयायिकसम्मतिप्रदर्शनम्

ननु लाघवानुरोधेन हि कृतौ शक्तिः कल्प्यते। कृतित्वजात्यपेक्षया व्यापारत्वस्योपाधित्वेन गुरुत्वात्। न चाचेतनेऽपि मुख्यत्वार्थं व्यापारे शक्तिः कल्पनीयेति वाच्यम्। शक्तिग्राहकेण लघुनि एव शक्तिग्रहात्। लघुधर्मस्यैव शक्यतावच्छेदकत्वौचित्यात्। ततश्च लघुधर्मस्य कृतित्वस्यैव शक्यतावच्छेदकत्वौचित्यात्रथो गच्छति जानातीत्यादौ च कृतित्वप्रकारकबोधासम्भवेन लक्षणया व्यापारत्वादिप्रकारकबोधः, लक्ष्यतावच्छेदकत्वस्य गुरुधर्मेऽपि स्वीकारात्इति नैयायिकमतं युक्तमेवेति आक्षिपति - **नचैवमिति** - **साध्वीत्यन्तेन**। समाधत्ते - **शक्यतावच्छेदकत्वेति**। लक्ष्यतावच्छेदकत्ववत्शक्यतावच्छेदकत्वस्यापि गुरुधर्मे स्वीकारे बाधकाभावात्फूत्कारत्वादिकमेव शक्यतावच्छेदकम्। लोके तथा बोधस्यानुभवसिद्धत्वात्गौरवमकिञ्चित्करम्।

ननु कारणतावच्छेदकत्वप्रतियोगितावच्छेदकत्ववत् शक्यतावच्छेदकत्वं स्वरूपसम्बन्धविशेषः। स च सम्भवति लघौ गुरौ न कल्प्यते। अत एव लघुधर्म एव कारणतावच्छेदकः कल्प्यते। शक्यतावच्छेदकत्वं च स्वरूपसम्बन्धविशेषः न लक्ष्यतावच्छेदकमिति लक्ष्यतावच्छेदकं गुरुरपि भवितुमर्हति इति चेत् - अत्र प्रष्टव्यम्। कस्तावदयं स्वरूपसम्बन्धः? यदि चासौ तत्स्वरूपं तदा गुरुधर्मस्यापि तत्त्वमस्त्येव। अथातिरिक्तः तर्हि लक्ष्यतावच्छेदकत्वमपि तद्वदेवेति कथं तस्मिन् लक्ष्यतावच्छेदकत्वस्वीकारः। वस्तुतस्तु तादृशस्वरूपसम्बन्धस्यातिरिक्तस्य स्वीकारे प्रमाणमपि चिन्त्यम्। अवच्छेदकत्वं चान्यूनानतिरिक्तवृत्तित्वमेव। तच्च गुरुधर्मेऽपि निर्बाधम्। अत एवोक्तम् **अवच्छेदकत्वनिरुक्तौ** दीधितिकृद्भिः - "गौरवप्रतिसन्धानदशायामपि कम्बुग्रीवादिमान्नास्तीति प्रतीतिबलात् गुरुधर्मोऽवच्छेदकः प्रतियोगितायाः" इति। अत एव पचतीत्यत्र अधःसन्तापनत्व-फूत्कारत्व-चुल्ल्युपरिधारणत्व-यत्नत्वादिभिर्बोधः सर्वसिद्धः सङ्गच्छते। अत एव "देवदत्तः पचती"त्युक्ते देवदत्तः फूत्कारादिमान्न वेति संशयोऽपि न। तदुक्तं "कारक"(पा 1-4-23) सूत्रे भाष्ये "अधिश्रयणोदकासेचनतण्डुलावपनैधोपकर्षणक्रियाः प्रधानस्य कर्तुः पाकः, द्रोणं पचत्याढकं पचतीति सम्भवनक्रिया धारणक्रिया चाधिकरणस्य पाकः, एधाः पक्ष्यन्त्याविक्लित्तेः ज्वलिष्यन्तीति ज्वलन -क्रिया करणस्य पाकः इत्यादिना। तत्र हि "तत्र तदा पचिर्वर्तते" इति वाक्यैः

तत्तदर्थस्य पचि शक्यता सूचिता। उक्तं च "प्रमाणतोऽर्थप्रतिपत्तौ"(1-1-1) इति न्यायसूत्रवार्तिकतात्पर्यटीकायां वाचस्पतिमिश्रैः - "यस्य हि व्यापारं प्राधान्येन धातुराख्यातप्रत्ययो वाभिधत्ते स स्वतन्त्रः कर्ता। तथा हि - विक्लिद्यन्तीत्यत्र तण्डुलादयः कर्तारः, पचन्तीत्यत्र देवदत्तादयः। तत्कस्य हेतोः? एकत्र तण्डुलादेः व्यापार उपात्तोऽन्यत्र देवदत्तादेः" इति। विस्तरस्तु **बृहद्भूषणतो**ऽव - सेयः। तदेतत्सर्वं मनसिकृत्याह - **लक्ष्यतावच्छेदकत्ववदिति**। **तयोर्वैषम्ये बीजाभावादिति** च॥ **ननु**

"कृताकृतविभागेन कर्तृरूपव्यवस्थया।
यत्न एव कृतिः पूर्वा परस्मिन्सैव भावना॥" (न्या.कु. 5-9)

घटवदङ्कुरे तद्धेतुस्वकीयकृष्यादिव्यापारसत्वेऽपि बीजावापमात्रे नः प्रवृत्तिः बीजा -ङ्कुरोत्पत्तौ तु नास्मत्प्रयत्नः इति परिशीलयन्तः जनाः घटो मया कृतः नाङ्कुरः इति व्यवहरन्ति। ततो ज्ञायते कृञ्धातुः यत्नवाची"ति **न्यायकुसुमाञ्जलौ** पञ्चम-स्तबके उदयनाचार्यैः उक्तम्। चेतनाचेतनकारकसमुदायेन कार्ये निष्पाद्यमाने चेतने एव कर्तृव्यवस्था आनुभविकी। तस्मादपि मुख्यभूता कृतिः यत्न एव। अतः करोतिना विव्रियमाणत्वादाख्यातमपि यत्नार्थकम्। परस्मिन्अन्यत्र गौणे, या कृतिः व्यवह्रियमाणा "तन्तवः कुर्वन्ती"त्यादौ सा केवलमनुकूलव्यापारात्मक-भावनामात्रम्। तदुक्तमाचार्येण -" अत एवानुभवोऽपि । यावदुक्तं भवति पाका-नुकूलवर्तमानप्रयत्नवानिति तावदुक्तं भवति पचतीति"। ततश्च "पचति - पाकं करोती"ति यत्नार्थककरोतिना विवरणदर्शनात् यत्न एव आख्यातार्थः, व्यापारबोध-स्तु लक्षणयेति पुनः नैयायिकः शङ्कते - **न चेति**। समाधत्ते – **बीजादिनेति**॥ "तन्तवः कुर्वन्ती"त्यत्र कृञः मुख्यार्थत्वाभावेऽपि "बीजादिना अङ्कुरः कृतः" इत्यत्र तु करोतेः मुख्यार्थत्वमेवाश्रयणीयम्। ततश्च अचेतनकर्तृकव्यापारेऽपि कृञः प्रयोगात् न केवलचेतनव्यापारार्थकत्वं कृञः सिद्ध्यतीति भावः। अत एव "रथो गच्छति" इत्यस्य "रथो गमनं करोति" इति विवरणं दृश्यते। विवरणवाक्ये प्रयुक्तानां शब्दानां मुख्यार्थत्वस्यैव युक्तत्वात्। ततश्च उत्पत्तिरूपफलसहितः व्यापार एव कृञर्थ इति सिद्ध्यति। अत्र **कान्तिः** - "यदपि "रथो गच्छती"त्यादौ आश्रयत्वे लक्षणेति तदपि न। गमननिरूपिताश्रयत्वेन रथनिष्ठेन कृतेः सम्बन्धा-भावात्। परम्परासम्बन्धस्य लक्षणानियामकत्वाभावात्। तत्सम्बन्धज्ञानपूर्वक-

बोधस्याननुभवाच्च। अर्थनिर्देशवैयर्थ्यापत्त्या व्यत्ययानुशासनवैयर्थ्यापत्त्या च विभक्तौ लक्षणानौचित्याच्च। तदुच्यते "विभक्तौ न लक्षणे"ति। यत्तु "सुब्विभक्तौ न लक्षणे"ति - तन्न। सङ्कोचे मानाभावात्। उक्तनियामकस्य सुप्तिङ्विभक्ति-साधारण्यादिति दिक्" इति ग्रन्थेन व्यापारे लक्षणायाः असंभवं सूचयति। उक्तं चेदं **भूषणे**ऽपि व्यापारस्यैवाधिकसंग्राहकत्वेन व्यापारत्वस्यैव शक्यतावच्छेदकत्व-मुचितमिति "निर्वर्त्ये च विकार्ये चे"ति कारिकाव्याख्यायां- "तस्मात् कृञो यत्नत्वमेव वाच्यतावच्छेदकमित्यत्र मानाभावः, लाघवस्य पूर्वमेव निरस्तत्वात्। व्यापारत्वं वाच्यतावच्छेदकम्। क्वचित् यत्नप्रकारकबोधस्तु शक्तिभ्रमात्, लक्षणया वा। ननु तवाप्येतादृशस्थले लक्षणावश्यकत्वे किं विनिगमकं व्यापारत्वं वाच्यतावच्छेदकमित्यत्रेति चेत् सत्यम्। व्यापारत्वस्याधिकसङ्ग्राहकत्वेन तस्यैवा - वच्छेदकतायाः न्याय्यत्वात्। किं चास्माकं यत्नस्यापि व्यापारविशेषत्वेन तल्लक्षणा सर्वथा श्रुतार्थात्यागात् वरम्। भवतां रथादिव्यापारे लक्षणा सर्वथा श्रुतार्थत्यागात् जघन्या। अपि च "दावाग्निः वनं दहति" इत्यादौ यत्नसंबन्धग्रहं विनापि व्यापारबोधात् न भवद्रीत्या लक्षणा युज्यते, अगृहीतायाः वृत्तेरनुपयोगात्। अन्यथा अगृहीतशक्त्यादिभ्योऽपि बोधप्रसङ्गात्।" इति। अथ सा निरूढलक्षणा चेदिदं प्रष्टव्यम्। तत्र निरूढलक्ष्यस्य शक्यसम्बन्धः आवश्यको वा न वा । यथा च नव्यमीमांसकैः आख्यातस्य भावनायां शक्तिः कर्तृकर्मणोः निरूढलक्षणेति स्वीक्रियते तत्र शक्यार्थनिरूढलक्ष्यार्थयोः कश्चन सम्बन्धोऽपि साक्षादस्त्येव। तथा आवश्यकश्चेत् तादृशस्य साक्षात्सम्बन्धस्य कृतिव्यापारयोः अभावात् निरूढलक्ष्यत्वं व्यापारस्य वक्तुमशक्यम्। सम्बन्धः नावश्यक इति चेत्तस्य लक्ष्यत्वमेव न सिद्ध्यति। शक्यसम्बन्धस्यैव लक्षणात्वात्। अतः उभयथापि लक्षणा न सिद्ध्यतीति **कान्तेः** तात्पर्यम्। किञ्च व्यापारस्य सर्वत्र प्रतीतावेव निरूढलक्ष्यत्वं नान्यथा। तथा च सर्वत्र तस्य प्रतीत्यङ्गीकारे शक्तिरेवोपपादनीयेति भावः। एतत्सर्वं विचिन्त्यैव अनन्तरं नैयायिकैः व्यापारस्यापि तिङन्तबोध्यत्वं धात्वर्थत्वं च अङ्गीकृतमिति ज्ञातव्यम्।

5.4.2 कृतित्वस्यापि शक्यतावच्छेदकत्वमिति कौण्डभट्टस्य मतम्

तथा च व्यापारत्वमपि वाच्यतावच्छेदकं यत्नत्वमपि। परन्त्वियान् विशेषः– नैयायिकमते व्यापारत्वं धातुशक्यतावच्छेदकं, यत्नत्वम् तु आख्यातशक्यता-

5.5 भावनाया अवाच्यत्वे दोषप्रदर्शनम्

किञ्च भावनाया अवाच्यत्वे "घटं भावयति" इत्यत्रेव "घटो भवति" इत्यत्रापि द्वितीया स्यात्। न चात्र घटस्य कर्तृत्वेन तत्संज्ञया कर्म्मसंज्ञाया बाधान्न द्वितीयेति वाच्यम्। अनुगतकर्तृत्वस्य त्वन्मते दुर्वचत्वेन घटस्याकर्तृत्वात्। कृत्याश्रयत्वस्य कारकचक्रप्रयोक्तृत्वस्य वा घटादावभावात्। धात्वर्थानुकूलव्यापाराश्रयत्वस्य च कारकमात्रातिव्यापकत्वात्।

वच्छेदकं, वैयाकरणमते व्यापारत्वं धातुशक्यतावच्छेदकं, यत्नत्वम् धातुलक्ष्यतावच्छेदकम्। इदं प्राचीनवैयाकरणमतम्। वस्तुतस्तु कृतित्वमपि शक्यतावच्छेदकं तेन रूपेणापि बोधात् , व्यापारत्वमपि, तथा फूत्कारत्वादिकमपि इति **कौण्डभट्टः**। एवं विवरणादिप्रामाण्येन तिङन्ते भावनायाः प्रतीतिमुपपाद्य प्राभाकरैः नैयायिकैश्च तस्या अवश्याभ्युपगन्तव्यत्वमुक्त्वा तथा नाङ्गीकारे दोषोऽपीति मतद्वयेऽपि समानं दोषं प्रदर्शयति - **किञ्चेति**। **भावनायाः अवाच्यत्वे** - व्यापारस्य अवाच्यत्वे, धातुना वा तिङा वा तस्याः अनभिधाने इत्यर्थः। नैयायिकानां मते भावनाशब्दः व्यापारपरः "परस्मिन् सैव भावना" इति उदयनाचार्येणोक्तत्वात्। परस्मिन् - अन्यत्र अचेतनकर्तृकस्थले। गौणे या कृतिः व्यवह्रियमाणा "तन्तवः कुर्वन्ती"त्यादौ सा केवलमनुकूलव्यापारात्मकभावनामात्रमित्युक्तत्वात्। प्राभाकराणां मते आर्थीभावनार्थकत्वेऽपि न क्षतिः। तैः कस्या अपि भावनायाः लडाद्यन्तेऽनङ्गीकारात्। तथा च नैयायिकानां मते आख्यातार्थकृत्याश्रयत्वं कर्तृत्वमिति कर्तृलक्षणं वक्तव्यम्। प्राभाकराणां मते तु धात्वर्थफलानुकूलव्यापाराश्रयत्वं कारकचक्रप्रयोक्तृत्वं वा कर्तृत्वं वक्तव्यम्। तथा च "घटो भवती"त्यत्र भवनाश्रये घटे कृत्याश्रयत्वस्य कारकचक्रप्रयोक्तृत्वस्य वा चेतननिष्ठधर्मरूपकर्तृत्वस्याभावात् कर्तृसंज्ञायाः अप्राप्त्या फलाश्रयत्वरूपकर्मत्वस्याबाधितत्वात् द्वितीयाऽऽपत्तिः। यद्यपि धात्वर्थफलाऽनुकूलव्यापाराश्रयत्वं कर्तृत्वमिति स्वीक्रियते तर्हि तदत्र घटेऽबाधितमपि सर्वेषु कारकेषु तादृशकर्तृत्वस्य सत्त्वात् कर्तृसंज्ञैवोत्सर्गः स्यात्, अन्याः संज्ञाः तदपवादाः भवेयुरिति अत्र कर्मसंज्ञया कर्तृसंज्ञायाः बाधोऽपि स्यात्। तदेवोपपादयति - **घटं भावयतीति**॥ भावयतीति णिजन्तम्। भूधातोः भवनम् - उत्पत्तिः अर्थः। तदनुकूलव्यापारो णिजर्थः। तादृशणिजर्थव्यापारस्य फलं भवनं - उत्पत्तिरिति णिजर्थव्यापारफलभूतधात्वर्थभवनाश्रयत्वेन घटस्य कर्मत्वात् द्वितीयायां "घटं भावयती"ति प्रयोगः

सिद्ध्यति। एवं "घटो भवति" इत्यत्रापि धात्वर्थः फलं भवनम्। उभयोर्मते केवलफलस्यैव धात्वर्थत्वात्। तस्यैव फलस्य स्वजनकव्यापाराश्रयत्वसम्बन्धेन प्रथमान्तार्थेऽन्वयः प्राभाकरै रङ्गीक्रियते। ततश्च व्यापारादेः सम्बन्धघटकत्वेन व्यापारस्य धात्वाख्यातार्थत्वाभावेन तादृशव्यापाराश्रयत्वरूपं कर्तृत्वं निर्वक्तुं न शक्यमिति, अन्यच्च कृत्याश्रयत्वकारकचक्रप्रयोक्तृत्वादिरूपम् अचेतनेऽसंभवि इति च घटस्य कर्तृत्वाभावे कर्तृसंज्ञाप्राप्तौ फलाश्रयत्वेन कर्मत्वात् द्वितीया एव स्यात्। अथ धात्वर्थफलानुकूलव्यापाराश्रयत्वं कर्तृत्वमिति स्वीकृतं चेत्तस्य सर्वेषु कारकेषु अतिप्रसक्तत्वात् कर्तृसंज्ञा कारकसंज्ञावत् सामान्यसंज्ञैव स्यादिति अन्यकारकसंज्ञाभिः कर्तृसंज्ञायाः बाधापत्त्या महान् प्रयोगविलयः स्यात्। नैयायिकानां मतेऽपि आख्यातार्थकृत्याश्रयत्वं कारकचक्रप्रयोक्तृत्वं वा कर्तृत्वं घटेऽसंभवीति सम एव दोषः॥

अनुगतकर्तृत्वमिति॥ चेतनाचेतनानुगतकर्तृत्वमित्यर्थः। तच्च तिङन्तबोध्यतया व्यापारस्याभ्युपगमेनैव सिद्ध्यति। व्यापारशब्देन कृतिभावनास्पन्दादीनां सर्वेषां सङ्ग्रहात् चेतनेषु कृत्याश्रयत्वम् अचेतनेषु स्पन्दादिरूपव्यापारश्रयत्वं च सिद्ध्यतीति सर्वत्र कर्तृत्वं निराबाधमित्यर्थः। ततश्च "घटो भवती"त्यत्र घटे व्यापाराश्रयत्वेन कर्तृत्वं फलाश्रयत्वेन कर्मत्वमिति संज्ञाद्वयप्राप्तौ आकडाराधिकारबलात् परया कर्तृसंज्ञया कर्मसंज्ञायाः बाधात् न द्वितीयापत्तिरिति भावः। अत्र भूषणसारे भावनायाः अवाच्यत्वे इत्यनन्तरं घटं भावयतीत्यस्मात् पूर्वं कश्चित् ग्रन्थपातमभ्यूहयन्ति **तत्त्वदर्शिनी**काराः। तेषां मते - "किञ्च भावनायाः अवाच्यत्वे कर्मत्वं दुर्वचम्। धात्वर्थफलाश्रयस्य तत्त्वे घटं भावयतीत्यत्रेव "घटो भवती"त्यत्रापि द्वितीया स्यात्" इति ग्रन्थः मूलकारस्य अभिप्रेतः। अत्र "कर्मत्वं दुर्वचम्। धात्वर्थफलाश्रयस्य तत्त्वे" इति वाक्यभागः लुप्त इति तेषामाशयः। तदुक्तं - "कर्तृत्वस्य दुर्वचत्वप्रतिपादनेन "अवाच्यत्वे" इति ग्रन्थानन्तरं "कर्मत्वं दुर्वचम्। धात्वर्थाश्रयस्य तत्वे" इति पाठो ग्रन्थकृत्सम्मतः। स च पाठः कालवशाद्भ्रष्ट इति अनुमीयते। अत्र च द्वितीयापादनमेवानुकूलतर्कः। अन्यथा भावनायाः अवाच्यत्वेन हेतुना कर्तृत्वस्य दुर्वचत्वे कर्तुरीप्सिततमस्यैव कर्मतया तदप्रसिद्ध्या तत्र द्वितीयायाः आपादनासम्भवः स्पष्ट एव । एवं च प्राभाकरमते पचादीनां कर्मणासहितत्वं सकर्मकत्वमितिरीत्या सकर्मकत्वानापत्तिर्दोषः। इति।"

किञ्च नागेशस्य साक्षाच्छिष्यस्य "वैद्यनाथपायगुण्डे" इत्याख्यस्य साक्षाच्छिष्यः गोपालदेवः अस्य भूषणसारस्य कान्तिव्याख्यां कृतवान्। तत्रापि एतादृशोऽभिप्रायो वा एतदाशयस्फोरकव्याख्या वा न दृश्यते। परन्तु तत्त्वदर्शिनीकाराणां पक्षस्य अनुकूलतया **भूषणे** तद्दोषापादकः ग्रन्थः इत्थमस्ति - " अथवा कर्मणा सहितत्वं सकर्मकत्वं तदभावापत्तेरित्यर्थः। अस्मिन्मते कर्मत्वस्य दुर्वचत्वात्। न च धात्वर्थाश्रयत्वं कर्मत्वम्। तथासति तण्डुलं पचति घटं भावयति इत्यत्रेव घटो भवतीत्यत्रापि घटस्य कर्मत्वं दुर्वारमिति द्वितीया स्यात् ।" इति। अतः अत्र ग्रन्थ -पातः तत्त्वदर्शिन्यभ्यूहितः युक्त एवेत्यूह्यते। "किञ्च भावनाया अवाच्यत्वे "घटं भावयति" इत्यत्रेव "घटो भवति" इत्यत्रापि घटस्य कर्मत्वं दुर्वारमिति द्वितीया स्यात्।" इति वा पाठः स्वीकर्तव्यः।येन स्पष्टता स्यात्। विचारणीयोऽयमंशः सुधीभिः।

अथ प्राभाकरनैयायिकौ पुनरेवं प्रत्यवतिष्ठेते - ननु फलानुकूलव्यापाराश्रयत्वमेव कर्तृत्वम्। न चैवं सर्वेषु कारकेषु कर्तृत्वापत्तिः। "स्वतन्त्रः कर्ता"(पा. 1-4-54) त्यनुशासनेन यस्मिन् कारके स्वातन्त्र्यविवक्षा तस्यैव कर्तृसंज्ञाप्राप्तेः। अन्यथा कर्मादिसंज्ञाविधानवैयर्थ्यापत्तेः।ततश्च यस्य कारकस्य व्यापारः आख्यातार्थत्वेन विवक्षितः सः कर्ता। चेतनेषु सः यत्नः। अचेतनेषु तत्तद्योग्यतामाश्रित्य संयोगाश्रयत्वादिरूपः। तदाश्रयश्च कर्ता। तथा च घटो भवतीत्यत्र घटनिष्ठस्यैव भवनाश्रयत्वरूपस्य आख्यातार्थत्वेन विवक्षणात्तदाश्रयत्वेन कर्तृसंज्ञा फलाश्रयत्वेन च कर्मसंज्ञेति संज्ञाद्वयप्राप्तौ परया कर्तृसंज्ञया कर्मसंज्ञायाः बाधात् न द्वितीयापत्तिः। तदुक्तं "कारके" (पा 1-4-23) इति सूत्रे महाभाष्ये - "स्थालीस्थे यत्ने कथ्यमाने स्थाली स्वतन्त्रा" इति । स्थालीस्थः यत्नः यदा आख्यातेन कथ्यते अर्थात् स्थालीस्थः यत्नः यदा आख्यातार्थत्वेन विवक्षितः तदा स्थाली स्वतन्त्रा विवक्षितस्वातन्त्र्यवतीत्यर्थः। अत्र यत्नशब्दश्चेतने मुख्यार्थः। अन्यत्र लक्ष्यार्थः। तथा च स्वातन्त्र्यस्य विवक्षाधीनत्वात् घटो भवतीत्यत्र नातिप्रसङ्गः द्वितीयायाःपूर्वोक्तनैयायिकमते। प्राभाकरमतेऽपि धात्वर्थफलस्य स्वानुकूल-व्यापाराश्रयत्वसम्बन्धेन प्रकारतया यस्मिन् प्रथमान्तेऽन्वयः सः कर्तेति धात्वर्थ-फलस्य चाश्रयत्वसम्बन्धेन प्रकारतया यस्मिन् प्रथमान्तेऽन्वयः तत्कर्मेति च स्वीकारेण घटो भवतीत्यत्र संज्ञाद्वयस्य प्राप्तौ परया कर्तृसंज्ञया कर्मसंज्ञायाः

5.6 भावनाया अवाच्यत्वे सकर्मकत्वाकर्मकत्वव्यवस्थानापत्तिः

अपि च भावनाया अवाच्यत्वे धातूनां सकर्मकत्वाकर्म्मकत्वविभाग उच्छिन्नः स्यात्। स्वार्थफलव्यधिकरणव्यापारवाचित्वं स्वार्थव्यापारव्यधिकरणफलवाचकत्वं वा सकर्मकत्वं भावनाया वाच्यत्वमन्तरेणासंभवि। अन्यतमत्वं तत्त्वमिति चेत् न। एकस्यैवार्थभेदेनाकर्म्मकत्वसकर्मकत्वदर्शनात्। तदेतदभिसन्धायाह - कृञ इति।

5.7 व्यापारस्य अवाच्यत्वे फलमात्रस्य धात्वर्थत्वे दोषप्रदर्शनम्

अयं भावः। व्यापारावाच्यत्वपक्षे फलमात्रमर्थ इति फलितम्। तथा च "करोति" इत्यादौ यत्नप्रतीतेस्तन्मात्रं वाच्यमभ्युपेयम्। तथा च "यती प्रयत्ने" इतिवत् फलस्थानीययत्नवाचकत्वाविशेषा दकर्मकतापत्तिरुक्तरीत्या दुर्वारेति। तथा च "न हि यत्नः" इत्यत्र फलस्थानीयत्वेनेति शेषः। "कृञ" इति धातुमात्रोपलक्षणम्। सर्वेषामप्यकर्मकता सकर्मकता वा स्यादिति भावः।

बाधात् न द्वितीयापत्तिः। तथा च धात्वर्थफलस्य स्वानुकूलव्यापाराश्रयत्वसम्बन्ध एव कर्तृत्वम्। तथा च न भवदुक्तो दोषोऽस्मन्मतेऽपि। इति चेद्दोषान्तरमाह – अपि चेति। यदि च तिङन्ते फलव्यापारोभयबोधो न स्यात् तर्हि स्वार्थफल-व्यधिकरणव्यापारबोधकत्वरूपं स्वार्थव्यापारव्यधिकरणफलबोधकत्वरूपं वा सकर्मकत्वं पचादीनां न स्यादिति सकर्मकत्वासिद्धौ धातुषु सकर्मकत्वाकर्मकत्व-व्यवस्थैव न स्यात्। प्राभाकरैस्तावत् तिङन्ते लिङतिरिक्तलडाद्यन्ते व्यापार-बोधस्यैवानङ्गीकारात् सर्वस्यापि धातोः केवलफलवाचकत्वाच्च स्वार्थफल-व्यधिकरणव्यापारवाचित्वासिद्ध्या सर्वे धातवः सकर्मका वा अकर्मका वा भवेयुः। नैयायिकमते "चैत्रः पचती"त्यादिषु धातोः स्वार्थफलव्यधिकरणस्वप्रकृतिक-प्रत्ययार्थकृतिमत्त्वात्पचेः सकर्मकत्वसिद्धावपि "स्थाली पचती"त्यत्र स्थाल्यां तादृशकृतेरभावात् कृतेः तिङर्थत्वासम्भवेन तादृशकृतिमत्त्वस्य पचेः वक्तुम-शक्यत्वेन सकर्मकत्वं न स्यात्इति भावः। एवं रथो गच्छतीत्यत्रापि। वस्तुतः नैयायिकमते स्वयुक्ताख्यातार्थकृत्यनधिकरणफलबोधकत्वं धातोः सकर्मकत्वं परिष्करणीयमिति अचेतने कर्तरि रथो गच्छतीत्यादौ गमधातुप्रकृतिकतिङा कृतेरनुक्तेः तद्व्यधिकरणफलबोधकत्वस्य अप्रसिद्ध्या गमेः रथो गच्छतीत्यादौ सकर्मकत्वं न स्यात्। ॥**स्वार्थफलव्यधिकरणेति**॥ यत्किञ्चिद्धात्वर्थफलव्यधिकरण-व्यापारवाचकत्वस्य भूप्रभृतिष्वपि सत्त्वात् अकर्मकेष्वपि अस्य लक्षणस्याति-

व्याप्तिः स्यादिति स्वार्थेति फले विशेषणम्। तथा च यस्य सकर्मकत्वमिष्टं स धातुः स्वशब्देन ग्राह्यः। तत्र स्वशब्देन भूधातोः ग्रहणे स्वार्थफलं भवनं, तद्व्यधिकरणव्यापारवाचकत्वस्य भूधातावभावात् न दोषः। केवलफलव्यधिकरणत्वोक्तौ तु पचाद्यर्थफलमादाय तद्व्यधिकरणव्यापारवाचित्वस्य भूधातौ सत्त्वात् भवतेरपि सकर्मकत्वापत्तिरिति भावः। फलव्यधिकरणत्वस्यापि फलतावच्छेदकसम्बन्धेन विवक्षणात् कालिकसम्बन्धेन भवनाधिकरणकालभिन्नघटादिवृत्तिव्यापारवाचकत्वेऽपि भवतेः न सकर्मकत्वम्। फलतावच्छेदकसम्बन्धस्य समवायस्यैवात्र विवक्षणात् समवायसम्बन्धेन चैतेषां कालवृत्तित्वासम्भवात्। फलानधिकरणे यत्किंचित्त्वनिवेशात् गम्यादौ संयोगस्य चैत्रग्रामोभयनिष्ठत्वेऽपि संयोगस्य यत्किंचिदधिकरणं – ग्रामः, तद्भिन्नाधिकरणवृत्तिः व्यापारः संयोगजनकः चैत्रनिष्ठो व्यापारः इति गमेः सकर्मकत्वं सिद्ध्यति। अथवा स्वार्थफलाधिकरणयत्किंचिदवृत्तित्वं स्वार्थफलव्यधिकरणत्वमित्यर्थः। एवमेव सकर्मकत्वं निर्वक्तव्यमित्यत्र विनिगमनाविरहादाह - **स्वार्थव्यापारे**ति। फलव्यापारयोरुभयोरपि धात्वर्थत्वेन विनिगमकाभावात् स्वार्थव्यापारव्यधिकरणफलवाचकत्वमपि लक्षणं भवितुमर्हतीत्यर्थः। अत्रापि व्यापारे स्वार्थविशेषणत्वाभावे यत्किंचिद्व्यापारव्यधिकरणफलाश्रयत्वं भूप्रभृतावप्यस्तीति तेषां सकर्मकत्वं स्यात्। एवं कालिकसम्बन्धेन काले यत्किंचिद्व्यापाराश्रयत्वमाश्रित्य तद्भिन्नाधिकरणवृत्तिफलवाचकत्वं पुनः भूप्रभृतावेवागतमिति तद्वारणाय व्यापारतावच्छेदकसम्बन्धेन व्यापाराधिकरणत्वं विवक्षणीयम्। स्वार्थव्यापारव्यधिकरणफलवाचकत्वपक्षे लाघवमप्यस्ति। तदित्थम्। पूर्वस्मिन् लक्षणे चैत्रग्रामोभयनिष्ठसंयोगरूपफलस्य व्यापारव्यधिकरणत्वसम्पादनाय फलाधिकरणयत्किंचिदवृत्तिव्यापारबोधकत्वमिति रीत्या "यत्किंचि"दिति विशेषणमावश्यकम्। ततश्च "चैत्रः ग्रामं गच्छती"त्यत्र फलाधिकरणं यत्किंचित्ग्रामः, तदवृत्तिः तद्भिन्नवृत्तिर्वा व्यापारः स्पन्दप्रयत्नादिरूपः तद्वाचकत्वं गमेरिति गमेः सकर्मकत्वं सिद्ध्यति। अस्मिन्लक्षणे तु स्वार्थव्यापाराधिकरणं चैत्रः तद्भिन्नः ग्रामः तद्वृत्तिफलवाचकत्वं गमेरक्षतमिति यत्किंचित्त्वानिवेशात् लाघवमित्यर्थः। फलस्य कर्तृकर्मोभयनिष्ठत्वेऽपि व्यापारस्य तु तत्त्वासम्भवात्, तत्त्वे वा तस्य धातोः सकर्मकत्वासंभवाच्च "स्वार्थव्यापारे"ति लक्षणे लाघवमित्यर्थः। "वा" शब्देन

प्रथमेऽरुचिः सूचिता । तथा च गम्यादेः न सकर्मकत्वानापत्तिरित्याद्यूह्यम्। एवञ्चैतादृशं सकर्मकत्वं धातौ भावनायाः व्यापारस्य प्रतीतिं विना न संभवतीत्यर्थः। ननु एतादृशं धात्वर्थाश्रितं सकर्मकत्वं मास्तु। किन्तु भू एधेति रूपेण अकर्मकान्धातून्गम-पच्-आदिरूपेण सकर्मकान्धातून्वा गणीकृत्य भ्वाद्यन्यतमत्वम् अकर्मकत्वं भ्वाद्यन्यत्वं सकर्मकत्वम् इति पचाद्यन्यतमत्वम् सकर्मकत्वं तद्भिन्नत्वमकर्मकत्वमिति वा अकर्मकाणां सकर्मकाणाम् वा परिगणनेन सकर्मकत्वाकर्मकत्वव्यवस्था भवतु इति चेत्तत्राह – **अन्यतमत्वमि-त्यादि**। **तत्वं** - सकर्मकत्वम् अकर्मकत्वं वा ॥ **नेति** ॥ एवं वक्तुं न शक्यते। कुतः सकर्मकत्वस्य अकर्मकत्वस्य वा धात्वानुपूर्वीनिष्ठत्वाभावात्। अपि तु तद्बोध्यार्था - श्रितत्वात्। तदेव कथयति - **एकस्यैवेति**॥ एकानुपूर्वीकस्येत्यर्थः। यथा वहधातुः। "भारं वहति देवदत्तः" इत्ययं वहनार्थे सकर्मकः। "नदी वहति" इति प्रवाहार्थेऽकर्मकः। एवं "रुच दीप्तावभिप्रीतौ च" इति रुचधातोः दीप्ता-वकर्मकत्वम्, अभिप्रीतौ सकर्मकत्वम्। धातुः एकानुपूर्वीक एव। परन्तु अर्थभेदात् सकर्मकत्वाकर्मकत्वभेदः इत्यर्थः। इयं च व्याख्या अर्थभेदात् शब्दभेद इति वहधातौ अर्थभेदेन अनेकत्वमाश्रित्य कृता। अथवा एक एव शब्दः वहधातुः। स हर्यादिवन्नानार्थ इत्यर्थः। तथा च तस्यैव एकदा सकर्मकत्वम् अन्यदा अकर्मकत्वमित्यर्थः। तथाच फलव्यापारयोरुभयोरपि धातुवाच्यत्वे एव सकर्मकत्वाकर्मकत्वव्यवस्था न त्वन्यथेति भावः। तदेव कारिकायाः द्वितीयार्धेन कथयति - **कृञ** इति।**अयं भाव** इति। पूर्वोक्तप्राभाकरनैयायिकमतरीत्या केवलफलस्यैव धातुवाच्यत्वे धातुपाठे फलानामेव धात्वर्थतया निर्देश इति स्वीकर्तव्यम्। तथा च "यती प्रयत्ने" इति धातुपाठात् प्रयत्नरूपफलवाचकत्वं यतेः वक्तव्यम्। तस्य च यतेः अकर्मकत्वं प्रसिद्धमिति कृञः अपि तदर्थकत्वाभ्युपगमे अकर्मकत्वं स्यात्। अथवा यथा यतेः केवलफलवाचकत्वेनाकर्मकत्वं तथा सर्वेषामपि धातूनां केवलफलवाचकत्वेन अकर्मकत्वमेव स्यादित्यर्थः। अस्मिंश्च पक्षे कृञ्धातुः सर्वेषामपि धातूनाम् उपलक्षणमिति भावः। अर्थात् लक्षणया धातुत्वावच्छिन्नबोधकमित्यर्थः। यथा च "काकेभ्यो दधि रक्ष्यतामि"त्यत्रत्यकाक-पदं दध्युपघातकत्वावच्छिन्नतादृशसकलप्राणिबोधकं तथेति भावः।

5.8 धातोः केवलव्यापारवाचित्वनिरासः

अथ वा "व्यापारो भावना" इत्यर्धेन व्यापारस्य वाच्यत्वं प्रसाध्य फलांशस्यापि तत् साधयन् नैयायिकाभ्युपगतं जानातिकरोत्यादेः केवलज्ञानयत्नादि - क्रियामात्रवाचित्वं दूषयति - कृञ इति । अयं भावः। फलांशस्यावाच्यत्वे व्यापार एव धात्वर्थः स्यात्। तथा च स्वार्थफलव्यधिकरणव्यापारवाचित्वादि - रूपसकर्मकत्वोच्छेदापत्तिः। न च कृञादौ सकर्मकत्वव्यवहारो भाक्त इति नैयायिकोक्तं युक्तम्। व्यवहारस्य भाक्तत्वेऽपि कर्मणि लकारासम्भवात्। न हि तीरे गङ्गापदस्य भाक्तत्वेऽपि तेन स्नानादिकार्यं कर्तुं शक्यम्। एवञ्च "न हि यत्न" इत्यत्र यत्नमात्रमित्यर्थः ॥

तदेव कथयति – **कृञ इति धातुमात्रोपलक्षणमिति।सर्वेषामपि सकर्मकता अकर्मकता वा स्यात् इति।** ततश्च केषञ्चित्सकर्मकत्वं केषाञ्चिदकर्मकत्वमिति व्यवस्था न सिद्ध्येत्इति भावः।

एवं सर्वत्र तिङन्ते व्यापारबोधस्यावश्याभ्युपगन्तव्यत्वमुक्त्वा यथा सर्वत्र व्यापार - बोधः आवश्यकः, तथा फल बोधोऽपीति निरूपयन्धातोः केवलव्यापारवाचित्वं फलं द्वितीयार्थ इति प्राचीननैयायिकमतं "जानाति इच्छति यतते करोती"- त्यादिसविषयकधातुषु केवलव्यापारवाचित्वमभ्युपगच्छतां समेषां नैयायिकानां च मतं निराचिकीर्षुः मूलमवतारयति - **अथवेति**॥

5.8.1 **प्राचीननैयायिकमतप्रदर्शनम् , विमर्शश्च**

प्राचीननैयायिकमतमित्थं निरूपितमस्ति शब्दशक्तिप्रकाशिकायाम् कर्मकारक- निरूपणकारिकाव्याख्यायां -"प्राञ्चस्तु ग्रामं गच्छति त्यजतीत्यादौ सर्वत्र क्रिया - मात्रं धात्वर्थः, त्यजिगम्योस्तु पर्यायत्वेऽपि न क्षतिः। गत्यर्थक्रियायां संयोगस्यैव त्यज्यर्थक्रियायां च विभागस्यैव बोधकतायाः कर्मप्रत्ययेषु व्युत्पन्नत्वात्, "तरुं त्यजती"त्यादौ संयोगस्य "तरुं गच्छती"त्यादौ च विभागस्य द्वितीयादितो नावगमः । परैरपि समभिव्याहृतधात्वर्थतावच्छेदकफलस्यैव द्वितीयादिबोध्यता- व्युत्पत्तेः अभ्युपेतव्यत्वात्अन्यथातिप्रसङ्गात्। नन्वैवं "स्पन्दो न स्पन्द" इत्यादे- रिव "त्यागो न गति"रित्यादेरपि वाक्यस्य निराकाङ्क्षतापत्तिः। तत्र त्यजिगम्यो- र्विभागाद्यवच्छिन्नक्रियालक्षणकत्वेनैवान्वययोग्यतासम्भवात्। द्वितीयासाकाङ्क्ष-

तुमन्तधातुत्वप्रयुक्त एव च धातूनां सकर्मकत्वव्यपदेशो न तु फलावच्छिन्न-क्रियावाचित्वप्रयुक्तः ज्ञाप्रभृतावव्याप्तत्वात्। स्मृत्यर्थकधातूनां कर्मणि षष्ठ्या इव द्वितीयाया अपि साधुत्वात्। एवञ्च "ग्रामं गच्छति, तरुं त्यजती"त्यादौ ग्रामसंयोगजनकक्रियावान् तरुविभागजनकक्रियावान् इत्याकारक एव बोधः न तु ग्रामसंयोगजनकसंयोगावच्छिन्नक्रियावान्, तरुविभागजनकविभागावच्छिन्न-क्रियावानित्याकारकः संयोगविभागयोरुभयथा भानस्य नीलघटजनकघटजनक-दण्डवानित्यदौ घटादेरिव निराकाङ्क्षत्वेनासंभवादनुभवबाधितत्वाच्चेत्याहुः"इति। तत्रैव च "परे तु" इत्यादिना फलं व्यापारः उभयं प्रत्येकं धात्वर्थ इति वैयाकरणाभिमत एव धात्वर्थः निरूपितः। अस्मिंश्च मते आधेयत्वादिकं द्वितीयार्थः इति निरूप्य अन्ते सकर्मकत्वमपि धातोः स्वार्थफलावच्छिन्न-स्वार्थक्रियाबोधकत्वम्। जानातीत्यादौ सकर्मकत्वव्यवहारो भाक्त इत्याहुः इति तन्मतमुपसंहृतम्। "परे तु" इति अस्य प्रदर्शनेन जगदीशसम्मत अयमेव पक्ष इत्यनुमीयते। अत्र च धात्वर्थविषये वैयाकरणैः सह भेद एव नास्ति फलव्यापारयोरुभयोरपि धात्वर्थतया अङ्गीकारात्। परन्तु जानात्यादिष्वेव। ज्ञानातिरिक्तस्य अन्यस्यार्थस्य फलस्थानीयस्य तैरनभ्युपगमात्। तदुक्तम् **आख्यातवाददीधित्यां** - "घटं जानाति, इच्छति, कुरुते, चैत्रो मैत्रेण ज्ञायते, इष्यते, क्रियते पटः" इत्यादौ सविषयपदार्थाभिधायिधातुप्रयोगे कर्मप्रत्ययेन यथायथं विषयित्वं विषयत्वं, कर्तृतिङा आश्रयत्वं विषयत्वं, तृतीयया आधेयत्वं बोध्यते। अन्वयबोधे तु अयं विशेषः यत् यत्र कर्तरि आश्रयत्वं तत्र क्रियाविषयिता कर्मत्वं, तत्र कर्म विशेषणम्। अन्यत्र कर्मणि विषयता, तत्र क्रिया, तत्राधेयत्वं, तत्र च कर्तेति। ज्ञातो ज्ञाता नष्ट इत्यादौ च कर्मकर्तृकृतां विषय-आश्रय–प्रतियोगिबोधकत्वं, यतते इत्यादौ यत्नत्वादिनोपस्थिते यत्नविषयत्वेन नान्वयः। किन्तूद्देश्यत्वेन। पदस्वाभाव्यात्। अत एव अभुञ्जानेऽपि "भोजनाय यतते" इति प्रयोगः " इति ।

अयं भावः - घटं जानाति, इच्छति, कुरुते इति कर्तरि प्रयोगे द्वितीयार्थः विषयित्वं, ज्ञाधात्वर्थः ज्ञानं, तिङर्थः आश्रयत्वम्। तथा च "घटनिष्ठविषयतानिरूपित–विषयितावज्ज्ञानाश्रयः इत्यादि रीत्या बोधः।चैत्रेण ज्ञायते घट इत्यत्र कर्मा-ख्यातस्य विषयत्वमर्थः। ज्ञाधात्वर्थः ज्ञानम्। तृतीयायाः आधेयत्वमर्थः। तथा च

"चैत्रनिष्ठज्ञानविषयो घटः" इति बोधः। कृत्प्रत्ययस्थले तु प्रथमान्तेन सामानाधिकरण्यानुरोधात् "ज्ञाता" इत्यत्र कर्तृकृत्प्रत्ययस्य आश्रयः, "ज्ञातः" इति कर्मकृत्प्रत्ययस्य विषयः "नष्ट" इति कर्तृकृत्प्रत्ययस्य प्रतियोगीत्यर्थः। तथाच कृदन्तस्थले धर्मी तिङन्तस्थले च प्रत्ययेन धर्मश्च बोध्यते। ततश्च विषय-विषयित्वादेः कर्मप्रत्ययार्थत्वेन धात्वर्थोऽत्र केवलज्ञानेच्छादिरूपम्। ततश्च सविषयकार्थबोधकधातुभिन्नधातुस्थले एव धातुतः फलव्यापारोभयबोधः। सविषयकधातुस्थले फलप्रतीत्यभावेऽपि विषयविषयिभावेन द्वितीयान्तार्थस्य कर्मणः आकाङ्क्षायाः सत्त्वेन कर्माकाङ्क्षां पुरस्कृत्य सकर्मकत्वमङ्गीक्रियते। ततश्चात्र स्वार्थफलव्यधिकरणस्वार्थव्यापारवाचित्वरूपस्य मुख्यस्य सकर्मकत्वस्याभावात् गौणसकर्मकत्वमिति। अयञ्च दोषः परे तु कल्पे। केवलव्यापारवाचकत्वमेव धातोः, फलस्य द्वितीयार्थत्वमिति प्राचीनमते "द्वितीयासाकाङ्क्षधातुत्वमेव सकर्मकत्वमि"ति तत्त्वस्य जानात्यादावपि सत्त्वात् मुख्यसकर्मकत्वमेव। परन्तु तस्मिन् पक्षे कर्मप्रत्ययानां अनेकफलेषु शक्तिकल्पनम् तत्तद्धातुसमभिव्याहारस्य तत्तत्फलबोधे कारणत्वमित्यादि कल्पनीयमिति गौरवम्। एवं "त्यजति ग्रामं" "गच्छति ग्रामम्" इत्यनयोः पर्यायत्ववारणाय त्यजेः विभागावच्छिन्नव्यापारे गमेः संयोगावच्छिन्नव्यापारे च लक्षणा स्वीकार्या इत्यतिगौरवम्। ॥**भाक्त** इति॥ भज्यते सेव्यतेऽन्वयानुपपत्तौ या सा भक्तिः लक्षणा। तत आगतो भाक्तः लाक्षणिक इत्यर्थः। एतच्च न युक्तमित्याह - ॥ **न चेति** ॥ लाक्षणिको व्यवहारस्तु अभिप्रायान्तरसूचनार्थो भवति न तु मुख्ये इव प्रवृत्तिनिवृत्तिबोधनाय। अत एव "गङ्गायां घोष" इत्यादि व्यवहारे गङ्गापदस्य तीरे गङ्गात्वारोपेण प्रवृत्तावपि मुख्यगङ्गायामिव स्नानादिकार्ये प्रवृत्तिः न दृश्यते। अतश्च जानात्यादिषु केवलव्यापारवाचित्वं, भाक्तं च सकर्मकत्वमिति न युक्तम्।भाक्तं सकर्मकत्व-माश्रित्य कर्मप्रत्ययोत्पत्तेः उपपादयितुमशक्यत्वात्। अतः तत्रापि फलव्यापारो-भयवाचकत्वं अवश्यं वक्तव्यमेव। तथा च कृञ्धातोः केवलयत्नमात्रार्थकत्वं न, किन्तूत्पत्तिरूपफलसहितयत्नवाचित्वमेव वक्तव्यं मुख्यसकर्मकत्वसिद्ध्यर्थम्। तदेव निरूपयति अनन्तरं किन्तूत्पादनमेवेत्यादि कारिकया। अत्र मूले "न हि तीरे गङ्गापदस्य भाक्तत्वेऽपि तेन स्नानादिकार्यं कर्तुं शक्यमि"ति सर्वव्याख्यासम्मतः पाठः । तत्त्वदर्शिन्यां तु "न हि तीरपदस्य गङ्गायां भाक्तत्वेऽपि तेन स्नानादिकार्यं

6.0 फलस्यावाच्यत्वे कृञः कर्मकर्तरि कर्मवद्भावानापत्तिः

अत एवाह-

किन्तूत्पादनमेवातः कर्मवत् स्याद्यगाद्यपि।
कर्मकर्तर्यन्यथा तु न भवेत् तद् दृशेरिव॥ 6 ॥

कर्तुं शक्यमि"ति पाठः स्वीकृतः। व्याख्यातं च - "तीरपदस्य गङ्गायां भाक्तत्वेऽपि इति पाठः। तीरपदस्य प्रवाहरूपार्थे लाक्षणिकत्वेऽपीति तदर्थः। तेन तीरपदलक्ष्य-प्रवाहरूपार्थेन। ।शक्यमिति॥ इतीति शेषः। इति शब्दो द्वितीयव्याख्या-समाप्त्यर्थकः। यथा सदुदककरणकं स्नानपानादिकार्यं तीरपदलक्षितप्रवाहरूपार्थेन कर्तुं न शक्यम् , तद्वदत्रापि कर्मणि लकारादिप्रवृत्तिरूपं कार्यं न शक्यमिति तात्पर्यम्" इति। सर्वव्याख्यासम्मतं पाठमनादृत्य एतादृशपाठकल्पने तात्पर्यं किमिति न ज्ञायते। किं च तीरपदस्य गङ्गालक्षकत्वसन्दर्भोऽभिप्रेतश्चेत् "तीरे स्नाहि" इत्यादि वाक्यं स्वीकरणीयम्। अत्र लक्ष्यार्थगङ्गायां स्नानादिकार्ये बाधकमेव नास्ति। व्याख्यातं चात्र "सदुदककरणकं स्नानपानादिकार्यमि"ति। तच्चात्र लक्ष्यार्थे प्रवाहे निर्बाधम्। ततश्च लक्ष्यार्थे प्रवृत्तिनिवृत्तिसङ्गत्या असङ्गतत्वोप-पादनमेवासङ्गतं स्यात्। ततश्च गङ्गात्वावच्छिन्नत्वेन स्वीकृते लक्ष्यार्थे तीरे मुख्यार्थप्रवाहे इव स्नानादिकार्यानुपपत्तिरेव वक्तव्येति तत्त्वदर्शिनी ग्रन्थस्यौचित्यं सुधीभिरेव विचारणीयम्। **कर्मणि लकारासम्भवात्** इति॥ सकर्मकत्व-लक्षणाव्याप्त्या सकर्मकत्वाभावेन सकर्मकेभ्यो विहितः "लः कर्मणी"(पा. 3-4-69)ति कर्मणि लकारो न स्यादित्यर्थः। अत्र "गौणमुख्यन्यायादि"ति काशिका-शाङ्कर्यौ, मुख्यसकर्मकत्वमादाय शास्त्रस्य चारितार्थ्ये गौणे तद्व्यापारे मानाभाव इति दर्पणः, मुख्यकर्मत्वाभावात् गौणमुख्यन्यायेन प्रधानाप्रधानयोरिति न्यायेन च तादृशकर्मणः "लः कर्मणी" (पा. 3-4-69)ति सूत्रेऽग्रहणात् इति प्रभा, मुख्ये कर्मणि "पच्यते तण्डुलः" इत्यादौ "लः कर्मणी"(पा 3-4-69)ति चरितार्थत्वात् इति परीक्षा चात्र न युक्ताः। गौणे कर्मण्यपि लकारस्य प्रवृत्तेः "गौणे कर्मणि दुह्यादेः" इत्यादिना अङ्गीकृतत्वात्। अत्र च धातोःकेवलव्यापारवाचकत्वेन सकर्मकत्वाभावप्रयुक्ता "लः कर्मणी"(पा 3-4-69)ति सूत्राप्रवृत्तिः आपाद्यते इति तत्त्वम्।

उत्पादनम् - उत्पत्तिरूपफलसहितं यत्नादि इत्यर्थः। फलस्य वाच्यत्वे युक्त्यन्तरमाह - अत इत्यादि। यतः कृञो यत्नमात्रमर्थो नेष्यते अतः। कर्मवत्स्यादिति पदेन "कर्मवत्कर्मणा तुल्यक्रियः" इति सूत्रं लक्ष्यते।

यत्नमात्रमित्यर्थ इति॥ धातोः कृञः केवलयत्नार्थकत्वं न युज्यत इत्यर्थः। किन्तूत्पत्त्यादिरूपफलसहितयत्नार्थकत्वमेवेष्यते इत्यर्थः॥ 5 ॥

सविषयकधातुस्थलेऽपि मुख्यसकर्मकत्वसिद्ध्यर्थं धातोः फलव्यापारोभयवाचकत्वमावश्यकमित्युक्त्वा जानात्यादिभ्यः करोतेः वैलक्षण्यमप्यस्तीति प्रतिपादयति - **किन्तूत्पादनमिति॥** उत्पादनशब्दो नात्र केवलफलपरो न वा केवलव्यापारपरः। किन्तूभयपर इत्याह - **उत्पादनम् - उत्पत्तिरूपफलसहितं यत्नादि कृञर्थः** इति। किञ्च परसमवेतक्रियाजन्यफलाश्रयत्वादिरूपं मुख्यकर्मत्वं जानात्यादिसविषयकधात्वतिरिक्तधातुस्थले एवेति कृञ्धातोः कर्मण्यपि मुख्यकर्मत्वं नास्तीति नैयायिकाः मन्यन्ते। तदपि न युक्तमिति सूचयति। कृञः स्थले तत्कर्मणि घटादौ परसमवेतक्रियाजन्यफलाश्रयत्वरूपमुख्यकर्मत्वस्यैव भानात्। ततश्च "कृञोऽकर्मकतापत्तेः न हि यत्नोऽर्थ इष्यते किन्तूत्पादनमेव" इति पूर्वकारिकोत्तरार्धस्य किन्तूत्पादनमिति कारिकाप्रथमपादस्य च योजनेन अन्वयः वक्तव्यः। अनेन जानात्यादेः कृञः वैलक्षण्यं सिद्ध्यतीति हृदयम्। उत्पत्तिरूपफलव्यधिकरणयत्नस्य कृञर्थत्वाभ्युपगमेन उत्पत्तिरूपफलाश्रयत्वेन घटादीनां कर्मत्वेन सार्थफलव्यधिकरणव्यापारवाचित्वरूपमुख्यसकर्मकत्वस्यैव कृञः सिद्धेः "क्रियते घटः" इत्यादिषु कर्मणि लकारः निर्बाधः।

नन्वत्र मुख्यसकर्मकत्वसिद्ध्यर्थमुत्पत्तिरूपफलवाचकत्वस्वीकारः मास्तु। यथा च जानातीत्यादिषु विषयत्वं फलं ज्ञानं व्यापार इत्यभ्युपगमेन मुख्यसकर्मकत्वं सिद्ध्यति तथैव कृञ्विषयेऽपि भवतु विषयत्वं फलं यत्नः व्यापारः। ततश्च सकर्मकत्वं निर्बाधम्। किञ्च उत्पत्तेः फलत्वमपि उपपादयितुं न शक्यम्। उत्पादयतीत्यादौ "उत्पत्तिं करोती"ति विवरणस्यासङ्गततापत्तेः उत्पत्तेरुत्पत्त्यभावात् इति चेत् न। जानात्यादिष्विव करोतेः विषयत्वरूपफलवाचकत्वे "क्रियते घटः स्वयमेव "इत्यादौ कर्मकर्तुः कर्मवद्भावानापत्तिः, उत्पत्त्यनुकूलयत्नार्थकत्वे एव च तत्सिद्धिरिति युक्त्यन्तरमाह - अत इति॥ जानातीत्यादिषु विषयताया आवरणभङ्गादेर्वा फलत्वस्वीकारेऽपि करोतीत्यत्र विषयत्वस्य फलत्वेन स्वीकारः न

युक्तः। तथा सति करोतेः कर्मस्थक्रियकत्वाभावेन कर्मकर्तरि प्रयोगे "क्रियते घटः स्वयमेव" इत्यादौ कर्मकर्तुः कर्मवद्भावानापत्तेः। यच्चोक्तं उत्पत्तेः फलत्वे "उत्पादयती"त्यस्य उत्पत्तिं करोतीति विवरणमसङ्गतं स्यादिति, तदपि न । तत्र उत्पत्तिः आद्यक्षणसम्बन्धः । स च क्षणरूप इति तस्योत्पत्तेः सुलभत्वात्उत्पत्तिं करोतीति विवरणमपि सङ्गच्छते । नैयायिकानामपि यतते - यत्नं करोतीत्यादौ यत्नानुकूलयत्नाप्रसिद्धेः अनुपपत्तितादवस्थ्यम्। तद्वारणार्थं द्वयोरपि फलव्यापार-रूपयत्नयोः भेदः कल्पनीय इति स एव मार्गः "उत्पत्तिं करोती"त्यत्राप्यनुसरणीय इति तात्पर्यम्। ततश्च यतोऽस्य कृञ्धातोः उत्पत्तिरूपफलवाचकत्वम् अत एव कर्मस्थक्रियकत्वेन कर्मकर्तरि कर्मवद्भावः। **अन्यथा** - अस्य उत्पत्त्यर्थकत्वाभावे । जानाति पश्यतीत्यादिष्विव विषयतारूपफलवाचकत्वे कर्मस्थक्रियकत्वाभावेन कर्मकर्तरि कर्मवद्भावो न स्यात्। दृश्यते च कर्मवद्भावः - "क्रियते घटः स्वयमेव" इति। न तथा जानात्यादीनां "ज्ञायते घटः स्वयमेवेत्यादि। इयमेव युक्तिः कृञः उत्पत्तिरूपफलव्यधिकरणव्यापारवाचित्वसाधिकेत्यर्थः। तदेव उपपादयति - ॥**कर्मवत्स्यादितिपदेनेति**॥ अत्र "कर्मवत्स्यादिति" इति इतिशब्दपर्यन्तं कारिकास्थकर्मवत्स्यादित्यस्य प्रतीक इति, पदेन इत्यारभ्य कौण्डभट्टस्य तद्व्याख्येति च **तत्त्वदर्शिनी**। ततश्चात्र "पदेन" इत्युक्ते केन पदेनेत्याकाङ्क्षायां प्रतीकस्थं कर्मवत्पदं बोध्यत इति तदाशयः। अन्ये तु कर्मवत्स्यादित्यारभ्यैव व्याख्या। अत्र प्रतीकग्रहणं नास्तीति चिन्तयन्ति । एतदेव युक्तमिवाभाति। कर्मवत् स्यादिति कारिकाभागमनूद्य तत्रत्यकर्मवत्पदेन सूत्रं लक्ष्यते इति व्याख्या सरला। तथा च "कर्मवत्स्यादिति" इत्यत्रेतीत्यस्य इत्यत्रत्येर्थः। ततश्च श्लोके कर्मवत्स्यादिति -पदगतेन कर्मवत्पदेन इत्यर्थः।यथाश्रुते अन्वयक्लेश एव व्याख्यातृमतभेदे कारणम्। अत्र **दर्पणे** "ननु कर्मवत्स्याद्यगाद्यपी"ति मूलस्य कर्मवत् यगाद्यपि स्यादित्यर्थो लभ्यते । स च बाधितोऽविवक्षितश्चेत्यत आह - कर्मवत्स्यादिति पदेन" इति अवतरणिका रचिता । इयञ्च कर्मकर्तरीति पदं विहाय कृता दशरा मशरा (दश रामशरा) इतिवत् असम्बद्धा । तत्र कर्मकर्तरीति-पदयोजनेन कर्मवत् कर्मकर्तरि यगाद्यपि स्यात् इति, कर्मवत् कर्मकर्तर्यपि यगादि स्यात् इति वा अन्वये विषयस्याबाधितत्वात्। **काशिकायां** तु "ननु वचनाभावात् कर्मकर्तरि कर्मवत्स्याद्यगाद्यपीति मूलमनुपपन्नमत आह - कर्मत्वत्स्यादिति

पदेने''त्यवतारितम्। अवतरणमिदमपि न तथा युक्तम्। युक्त्यन्तरप्रदर्शनपरस्यास्य ग्रन्थस्य "कृञः उत्पत्तिरूपफलव्यधिकरणव्यापारवाचकत्वाङ्गीकारेण कर्मकर्तरि कर्मवत्(कर्मणि इव) यगाद्यपि स्यादित्यर्थकत्वमिति अत्र प्रमाणविषयकचिन्ताया एवाभावात्। कर्मकर्तरि कर्मणि इव यगादिकार्यसिद्धिः फलमिति अस्य वाक्यस्यार्थः।

6.1. सूत्रं लक्ष्यते इति प्रतीकव्याख्याने व्याख्यातॄणां मतभेदविमर्शः

कर्मकर्तरि कथं कर्मणीव यगादिकार्याणीति प्रश्नमपि मनसि निधाय कर्मकर्तरि कर्मवद्भावविधायकं सूत्रमत्रोल्लिखति - **कर्मवत्इति पदेन** इति। "कर्मवत्कर्मणा तुल्यक्रियः" (पा. 3-1-87) इति सूत्रेण कर्मकर्तरि कर्मवद्भावः विहितः। अत्र कर्मवद्भावशब्देन कर्मकर्तरि कर्मतुल्यता अतिदिश्यते वा, कर्मकर्तरि कर्मणि इव कार्याणि अतिदिश्यन्ते वा इति विचारः। तत्र प्रथमः पक्षः शास्त्रातिदेशपक्ष इति, द्वितीयः कार्यातिदेशपक्ष इति च उच्यते। तत्र प्रथमपक्षे कर्मकर्ता कर्मवद्भवतीति कर्मवद्भावे सति "भावकर्मणोः"(पा.1-3-13) "सार्वधातुके यक्"(पा.3-1-67) इत्यादिसूत्रैरेव तत्र यगात्मनेपदादिकं साधनीयमिति तत्तच्छास्त्राणामतिदेशः भवति। द्वितीयपक्षे कर्मकर्तरि कर्मणि इव कार्याणि भवन्तीति सर्वाणि यगादि-कार्याणि एव साक्षात् अनेन अतिदेशेन साध्यन्ते। अतश्चास्मिन् पक्षे तत्तत्कार्य-विधायकशास्त्रानुसन्धानस्यापेक्षा नास्तीति लाघवम्। अथात्रापि "सूत्रं लक्ष्यते" इति प्रतीकमुपादाय "सूत्रविहितं लक्ष्यते।(अन्यथा) यगादीत्यनेनानन्वयापत्तेः" इति **दर्पण -काशिका - परीक्षा - प्रभा - शाङ्करीषु** व्याख्यातम्। **कृष्णमित्रेण** तु "सूत्रप्रवृत्ति र्लक्ष्यते" इति व्याख्यातम्। अत्रेदं विचारणीयम्। "कर्मवत्कर्मणा तुल्यक्रियः"(पा. 3-1-87) इति सूत्रं शास्त्रातिदेशपरमित्येकः पक्षः कार्यातिदेश-परमिति च अन्यः पक्षः । यदि च शास्त्रातिदेशपक्षः स्वीक्रियते तर्हि कर्मवत्पद-लक्षितस्य "कर्मवत्कर्मणा तुल्यक्रियः" (पा. 3-1-87) इति सूत्रस्य स्यादित्यनेना - न्वयः स्वीकार्यः। तथा च कृष्णमित्रमनुसृत्य सूत्रं लक्ष्यते इत्यस्य सूत्रप्रवृत्ति-र्लक्ष्यते इति अर्थः वर्णनीयः। तथा च तत्सूत्रप्रवृत्तिः स्यादित्यर्थः। ततश्च कर्मकर्तरि यगादिस्यादित्यन्वयः।कार्यातिदेशपक्षे तु कर्मवदित्यस्य यगादी-त्यनेनान्वयः। ततश्च "कर्मवत्कर्मणे"(पा. 3-1-87)ति सूत्रविहितं कार्यं लक्ष्यते इत्यर्थः दर्पणादिदिशा वक्तव्यः। एवञ्च कर्मवत्सूत्रविहितयगादि स्यादित्यर्थः

अयं भावः - यत एवास्योत्पादनार्थकता अतः "पच्यते ओदनः स्वयमेव" इतिवत् "क्रियते घटः स्वयमेव" इति यगादयोऽप्युपपद्यन्ते। अन्यथा यत्नस्य कर्मनिष्ठत्वाभावात्तन्न स्यात् दृशिवत्। यथा "दृश्यते घटः स्वयमेव" इति न, दर्शनस्य घटावृत्तित्वात् तथा यत्नस्यापि इति तथा प्रयोगानापत्तेरिति ॥6॥

सिद्ध्यति। कार्यातिदेशपक्षे लाघवात् तदभिप्रायेण दर्पणादिषु व्याख्यातम्। **कृष्णमित्र**स्तु शास्त्रातिदेशपक्षमेवाभिप्रैति। द्वयोः शास्त्रातिदेश एव भाष्यसम्मत इति **तत्त्वदर्शिनी**। अत्र कर्मवदित्यस्य अन्यापि व्याख्या **भूषणे** प्रदर्शिता। कर्मवत् - कर्मणीव कर्मकर्तरि अपि यगादि स्यादिति। **प्रभाया**मपीयं दर्शिता। तथा च अस्य श्लोकस्य एवं व्याख्या सिद्ध्यति - कृञः **उत्पादनमेव** - उत्पत्तिरूपफलसहित - यत्नवाचित्वमेव। कुतः। **अतोऽपि**। वक्ष्यमाणहेतुतोऽपीत्यर्थः। पूर्वं सकर्मकत्वा-कर्मकत्वोच्छेदरूपः हेतुः उक्तः। इदानीं हेत्वन्तरं कर्मकर्तरि कर्मवद्भावेन कृञः प्रयोगाभावप्रसङ्गः उच्यते। कोऽसौ हेतुः? कर्मवत् स्याद्यगादि कर्मकर्तरि। तथा च कृञः कर्मकर्तरि प्रयोगे कर्मवद्भावेन यगादिसिद्धिरूपफलमेव हेतुः इति तात्पर्यम्।

तथा चात्र कारिकायां कर्मवत् पदं तन्त्रेणोभयार्थबोधकम्। एकस्य कर्मणीव इत्यर्थः। अपरस्य सूत्र प्रवृत्तौ सूत्रविहिते वा लक्षणा। एवं च कर्मणि इव कर्मकर्तरि "कर्मवत्कर्मणे"(पा. 3-1-87)तिसूत्रविहितयगादि स्यादित्यर्थः। युक्त्यन्तरमाह - अत इति भूषणसारवाक्येनापि अपिः युक्त्यन्तरबोधकः इति ज्ञायते। तथा च कारिकायाम् अतः अपि उत्पादनमेवेत्यर्थ इति अन्वयः वक्तव्यः।

॥**अयं भाव** इति॥ **पच्यते** इति॥ "देवदत्तः ओदनं पचति" इत्यत्र पचतेः विक्लित्तिरूपं फलं तदनुकूलः अधिश्रयणादिव्यापारश्च अर्थः। तत्र विक्लित्ति-रूपफलाश्रयत्वेन ओदनस्य कर्मत्वम्। अधिश्रयणादिव्यापारश्रयत्वेन चैत्रस्य कर्तृत्वम्। अथ सौकर्यातिशयद्योतनार्थं वस्तुतः कर्तृभूतं चैत्रम् उपेक्ष्य ओदनस्यैव कर्मणः कर्तृत्वेन विवक्षायां पचधात्वर्थः ओदननिष्ठः विक्लित्त्याश्रयत्वरूपो भवति। "देवदत्त ओदनं पचती "त्यत्रापि कर्मभूते ओदने विक्लित्त्या -श्रयत्वमस्त्येव। अथापि "देवदत्त ओदनं पचती"त्यत्र देवदत्तस्य कर्तृत्वेन विवक्षणात् देवदत्तगतः अधिश्रयणादिव्यापार एव भासते। यदा तु वास्तविकं कर्तारं परित्यज्य कर्मणि एव कर्तृत्वं विवक्षितं तदा ओदनव्यापारः विक्लित्त्याश्रयत्वमेव पच्यर्थो भवति। इदानीं

तस्य ओदनस्थव्यापारस्य धातुना अभिधानात् ओदनस्य कर्तृत्वमित्यर्थः। अस्मिन् सन्दर्भे ओदनः कर्ता। "देवदत्त ओदनं पचती"त्यत्र ओदनः कर्म । एवं च यदा ओदनः कर्म तदा यः तस्य व्यापारः स एव कर्तृत्वेन विवक्षितस्यापि स्यात् चेत् तर्हि स प्रयोग एव कर्मकर्तरि प्रयोगः। स च कर्ता कर्मणा - कर्मस्थक्रियया तुल्यक्रियः - समानक्रियावान् भवतीति तत्र कर्मणि इव कार्याणि भवन्ति। तथा च कर्मणि प्रयोगे इव धातोः लस्य आत्मनेपदं विकरणः यक् इत्यादयः भवन्ति इति "पच्यते ओदनः" इति प्रयोगः। एतावन्मात्रोक्तौ अयं कर्मणि प्रयोग इत्येव भ्रान्तिः स्यादिति तन्निवारणार्थं "स्वयमेव" इति तत्र वाक्ये योज्यते। कर्मकर्तरि प्रयोगे कर्मणि एव कर्तृत्वविवक्षणात् कर्मान्तराभावाच्च धातुः सर्वदा अकर्मक एव भवति। ततश्च "पच्यते ओदनः स्वयमेवे"ति प्रयोगः सिद्ध्यति। एवं कृञ् धातोरपि उत्पत्तिरूप -व्यापारव्यधिकरणफलवाचकत्वेन सकर्मकत्वात् "देवदत्तः घटं करोति" इत्यत्र कर्मणः घटस्य कर्तृत्वेन विवक्षायां देवदत्तस्य परित्यागात् "क्रियते घटः स्वयमेवे"ति सिद्ध्यति। अयञ्च कर्मकर्तरि कर्मवद्भावः कर्मस्थक्रियकधातुविषये एव। ॥**अन्यथात्विति**॥ कृञः उत्पत्तिरूपफलार्थकत्वा-नङ्गीकारे। विषयताख्यफलार्थकत्वाङ्गीकारे केवलव्यापारमात्रार्थकत्वाङ्गीकारे वा। ॥**कर्मकर्तरि तत् न भवेत्**॥ कर्मकर्तरि कर्मवद्भावः न भवेत्। कुतः? कर्मस्थ-क्रियकत्वाभावात्। यद्धात्वर्थक्रियाकृतो विशेषः कर्मणि उपलभ्यते स धातुः कर्मस्थ क्रियः। अन्यः कर्तृस्थक्रियः। "घटं करोति" इति निर्वर्त्ये "तण्डुलं पचति" इति विकार्ये च कर्मणि क्रियाकृतः मृत्पिण्डे घटाद्याकृतिः तण्डुलेषु मार्दवादि लक्ष्यते इति तत्र धातुः कर्मस्थक्रिय इत्युच्यते। "ग्रामं गच्छति, घटं पश्यती"त्यादौ तादृशक्रियाकृतविशेषस्य कर्मणि अभावात् स धातुः कर्तृस्थक्रिय इत्युच्यते। दृशिः कर्तृस्थक्रियः। तत्र च कर्मकर्तरि कर्मवद्भावो नास्ति। अतः तत्र यगादि न । एवं च कृञः ज्ञानार्थकदृशिवत् विषयतारूपफलवाचकत्वाङ्गीकारे तु "क्रियते घटः स्वयमेव" इति प्रयोगः न स्यात् कर्तृस्थक्रियकत्वादिति भावः।

ननु कृञः केवलयत्नवाचित्वेन अकर्मकत्वात् कर्मणि लकारोऽपि न, कर्मण एवाभावात् कर्मकर्तृप्रयोगोऽपि न, यथा भवतेः इति वक्तव्ये दृशेः दृष्टान्तत्वेन

7.0 जानातीत्यादावपि कर्मकर्तरि कर्मवद्भावापत्तिशङ्का

नन्वेवं कृञादेरिव "जानाति " इत्यादेरपि विषयावच्छिन्नावरणभङ्गादि - फलवाचित्वमावश्यकम्। अन्यथा सकर्म्मकतानापत्तेः। तथा च "ज्ञायते घटः स्वयमेव" इति किं न स्यात्। एवं "ग्रामो गम्यते स्वयमेव" इत्याद्यपि इत्याशङ्कां मनसिकृत्याह -

निर्वर्त्त्ये च विकार्ये च कर्मवद्भाव इष्यते।

न तु प्राप्ये कर्मणीति सिद्धान्तो हि व्यवस्थितः॥ 7 ॥

ईप्सितं कर्म्म त्रिविधम्निर्वर्त्यं विकार्यं प्राप्यञ्च । तत्राद्ययोः कर्म्मवद्भावो नान्त्ये । प्राप्यत्वञ्च क्रियाकृतविशेषानुपलभ्यमानत्वमिति सुबर्थनिर्णये वक्ष्यते। न हि अयं घटः केन चिद्दृष्टो ग्रामोऽयं केनचिद्गत इति शक्यं कर्म्मदर्शनेनावगन्तुम्। "घटं करोति" इति निर्वर्त्ये "सोमं सुनोति" इति विकार्ये च तज्ज्ञातुं शक्यमिति न तत्प्राप्यम्। तथा च घटादेर्दृश्यादौ प्राप्यकर्म्मत्वान्नोक्तातिप्रसङ्ग इति भावः।

प्रदर्शनं न युक्तमिति चेदुच्यते। जानातिकरोत्यादीनां स्वार्थफलव्यधिकरण-व्यापारवाचकत्वरूपमुख्यसकर्मकत्वमेव वक्तव्यमिति पूर्वं प्रमाणैः युक्तिभिश्च साधितम्। ततश्च केवलयत्नवाचित्वं नास्ति। किन्तु फलविशिष्टयत्नवाचित्वमेव। तच्च फलं च व्यापारव्यधिकरणं भवेत् इति तादृशफलमत्र किं बुध्यते इति विचारणीयम्। जानातिकरोत्यादेः सविषयकत्वेन व्यवहारात् यत्नरूपव्यापार-व्यधिकरणविषयतारूपफलवाचकत्वेन सकर्मकत्वं सिद्ध्यति। तथा सति अन्यसविषयकधातुवैलक्षण्येन कृञः उत्पादनार्थकत्वाभ्युपगमो वृथेति वादिनं प्रति सयुक्तिकं कृञः जानात्यादिभ्यः वैलक्षण्यं प्रतिपादयितुं दृशिः दृष्टान्तत्वेन स्वीकृतः। तथा च विषयतारूपफलवाचकत्वस्यैवाङ्गीकारे तदर्थकानां समेषां कर्तृस्थभावकत्वेन कर्मकर्तरि कर्मवद्भावो यथा न भवति तथा कृञः अपि कर्म-कर्तरि कर्मवद्भावो न स्यात्। इष्यते च कर्मकर्तरि कर्मवद्भावः कृञः, दृशादेस्तु नेष्यते इति कृञः सविषयकत्वेऽपि जानात्यादेः वैलक्षण्यमवश्यमभ्युपगन्तव्यमि-त्यर्थः। एतदेव पुनराशङ्क्य निर्वर्त्ये चेति कारिकया स्पष्टयतीति ध्येयम्॥ 6 ॥

॥ **नन्वेवं कृञादेरिवेति**॥ कृञः यथा मुख्यसकर्मकत्वसिद्ध्यर्थम् उत्पत्तिरूपफल-तद्व्यधिकरणव्यापारोभयवाचकत्वं स्वीक्रियते तथा जानात्यादेरपि ज्ञानं फलं तदनुकूलः इन्द्रियसंयोगादिः व्यापार इति, घटादिनिष्ठावरणभङ्गः फलं तदनुकूल-

ज्ञानं व्यापार इति वा, विषयता फलं तदनुकूलज्ञानं व्यापार इति वा अर्थं स्वीकृत्य मुख्यसकर्मकत्वं साध्यते। ततश्च "घटः ज्ञायते देवदत्तेन" इति कर्मणि प्रत्ययः सिद्ध्यति "क्रियते घटः देवदत्तेने"ति वत्। ततश्च यथा "क्रियते घटः स्वयमेवे"ति कर्मकर्तरि प्रयोगः, तथा "ज्ञायते घटः स्वयमेवे" त्यपि स्यात्। तथा संयोगानुकूलव्यापारार्थकगमेरपि कर्मकर्तरि कर्मवद्भावः स्यात्। तथा च "गम्यते ग्रामः स्वयमेवे"त्यपि स्यादिति ॥ **विषयावच्छिन्नावरणे**ति॥ जानात्यादेः सकर्मकत्वनिर्वाहाय फलव्यापारोभयार्थकत्वं स्वीकार्यम्। तत्र फलम् आवरण-भङ्गः। घटादिप्रत्यक्षस्थलेऽन्तःकरणं चक्षुरादिद्वारा घटादिविषयदेशं गत्वा विषया-कारेण परिणमति। अयं परिणामः एव वृत्तिशब्देन अभिधीयते। तया च वृत्त्या विषयघटाद्यवच्छिन्नचैतन्यस्य आवरकस्याज्ञानस्य आवरणशक्तिः नश्यति इति अद्वैतनयः। अत्रादिपदेन विषयत्वादेर्ग्रहणम्। सर्वाभ्युपगतं फलं तु विषयत्वम्। तदनुकूलव्यापारः ज्ञानम्। विषयत्वं निष्ठत्वसम्बन्धेन विषयघटादौ सम्बध्यते। तद्व्यधिकरणं ज्ञानमात्मनिष्ठं समवायेनेति भावः। ततश्च "ज्ञायते, ज्ञातः घट" इत्यादिप्रयोगसिद्धिः। ततश्च जानातेरपि फलव्यधिकरणव्यापारवाचित्वात् कर्म-कर्तरि "ज्ञायते घटः स्वयमेवे"ति प्रयोगः स्यादित्याशङ्का। एवमेव गमेर्विषयेऽपि। कर्मकर्तरि कर्मवद्भावस्य न सार्वत्रिकत्वमिति बोधयितुमयं प्रयासः॥ **मनसि कृत्वे**ति॥ मनसि निधायेत्यर्थः। अत्र अभ्युगमरूपस्य निश्चयरूपस्य वा अर्थस्य स्वीकर्तुमशक्यत्वात्।

निर्वर्त्येति ॥ **ईप्सितमि**ति॥ ईप्सिततममित्यर्थः। निर्वर्त्य - विकार्य - प्राप्यकर्मसु प्रकृतसन्दर्भसम्बद्धं प्राप्यकर्म लक्षयति - क्रियाकृतेति॥ यस्य कर्मणः क्रिया-समाप्त्यनन्तरं दर्शनेन किञ्चिद्वैशिष्ट्यं कर्तृभिन्नेन द्रष्ट्राप्यनुभूयते तत् निर्वर्त्यं वा विकार्यं वा भवति। प्राप्यकर्मणि तु कर्तुः कदाचित्तादृशविशेषानुसन्धानेऽपि अन्यैः तद्विशेषाज्ञानात् क्रियाकृतविशेषानुपलभ्यमानत्वमक्षतमिति भावः। जानात्यादेः कर्मणि घटादौ गच्छत्यादेः कर्मणि ग्रामादौ च तादृशविशेषानुपलम्भ इति तत्प्राप्यकर्मेत्यर्थः। निर्वर्त्यविकार्ययोरेव कर्मकर्तरि कर्मवद्भावः न प्राप्य-कर्मणि इति वैयाकरणसिद्धान्त इति जानात्यादेः फलव्यधिकरणव्यापार वाचित्वेऽ-पि गच्छत्यादिवत् न कर्मकर्तरि कर्मवद्भावप्रसङ्ग इति तात्पर्यम्। निर्वर्त्य -

7.1 धातूनाम् फलावाचकत्वे त्यजिगम्योः पर्यायतापत्तिः

धातूनां फलावाचकत्वे त्यजिगम्योः पर्य्यायतापत्तिः, क्रियावाचकत्वाविशेषात्। फलस्योपलक्षणत्वेऽप्येकक्रियाया एव पूर्वदेशविभागोत्तरदेशसंयोगजनकत्वादु - क्तदोषतादवस्थ्यमित्यपि वदन्ति। तस्मादावश्यकं सकर्मकाणां फलवाचकत्वम्। अकर्मकाणां तु तन्निर्विवादमेव, भू सत्तायाम् इत्याद्यनुशासनाच्च। अत एव द्व्यर्थः पचिः इति भाष्यं सङ्गच्छते इति दिक्॥ 7॥

विकार्ययोरेव कर्मकर्तरि कर्मवद्भाव इत्यत्र "कर्मवत्कर्मणा तुल्यक्रियः" (पा. 3-1-87) इति सूत्रस्थं कर्मणेति पदमेव प्रमाणमिति सम्यक् निरूपितं **तत्त्वदर्शिन्याम्**। तथा हि - "कर्मवत्कर्मणे"(पा. 3-1-87)ति सूत्रे कर्मणीति पदमेव प्रमाणम्। तद्धि "साध्वसिश्छिनत्ति, स्थाली पचति" इत्यादौ करणाधिकरणयोः कर्मवद्भाववारणाय कृतम्। "धातोरेकाचो हलादेः" (पा. 3-1-22) इति सूत्रात् धातोः इत्यनुवर्तते। ततश्च धातुवाच्यक्रियया तुल्यक्रियः कर्ता कर्मवदित्यर्थो लभ्यते। तेन करणत्वाद्यवस्थायां वस्तुतः सन्नपि असिस्थाल्योः व्यापारः न धातूपात्त इति करणाधिकरणयोः कर्तुः कर्मवद्भावाप्रसक्त्या कर्मणेति व्यर्थं सत् दृश्यमानकर्मनिष्ठविशेषप्रयोजककर्मस्थक्रियाकर्मणेत्यर्थं ज्ञापयति। तादृशकर्मस्थक्रियाकर्मत्वं निर्वर्त्यविकार्ययोरेव। तेन प्राप्ये कर्मणि कर्मकर्तुः न कर्मवद्भाव इति बोध्यमि"ति॥

दोषान्तरमाह - **फलावाचकत्वे** इति। प्राचीननैयायिकमते सर्वेषां धातूनां व्यापार-मात्रवाचकत्वात्त्यजति गच्छति इत्यनयोःव्यापारस्यैकरूपत्वात् पर्यायता स्यात्। उभयोर्भेदकयोः फलविशेषयोः संयोगविभागयोः अवाच्यत्वात्। न च फलस्य धात्ववाच्यत्वेऽपि तदुपलक्षणतया स्वीकृत्य तत्तत्फलजनकव्यापारार्थकत्व-विवक्षया न दोष इति वाच्यम्। तथापि उभयत्रोभयोः संयोगविभागयोः सत्त्वेन कुत्र कस्योपलक्षणत्वमित्यत्र विनिगमनाविरहः। उभयत्र द्वयोरुपलक्षणत्वे पुनः दोषतादवस्थ्यम्। संयोगविभागयोरपि क्रमशः गमित्यजिवाच्यत्वे तु न दोषः, विशेषणीभूतफलभेदेन तज्जनकव्यापारेऽपि भेदसिद्धेः। न च "ग्रामं गच्छती"त्यत्र द्वितीयार्थसंयोगादिरूपफलान्वयित्वस्यैव विनिगमकत्वात् गमनक्रियायां संयोगस्यैव उपलक्षणत्वमिति न दोष इति वाच्यम्। अनेकप्रत्ययानां फलार्थकत्व-कल्पनायां तत्तत्समभिव्याहारस्य कारणत्वकल्पनायां द्वितीयार्थफलान्वयित्वस्य

विनिगमकत्वे च अतिगौरवात्। "ग्रामं गच्छती"त्यत्र द्वितीयायाः संयोगरूप-फलवाचकत्वमेव, न विभागरूपफलवाचकत्वमित्यत्र विनिगमकाभावाच्च। कर्मकर्तृप्रयोगसिद्ध्यर्थं फलस्य धातुवाच्यत्वस्यैव युक्तत्वाच्च। अतः सर्वत्र फल-व्यापारोभयवाचकत्वमवश्यमभ्युपेयमित्यर्थः। तथैव उपसंहरति - **तस्मादिति**। सकर्मकत्वव्यवहार सिद्ध्यर्थमपि धातोः उभयवाचित्वमवश्यमभ्युपेयमित्यर्थः। ॥**अकर्मकेष्विति**॥ अकर्मकेषु तत्फलवाचकत्वं स्वयं सिद्ध्यतीति सूचयति– **भूसत्तायामित्याद्यर्थनिर्देशात्** इत्यादिना।

7.1.1. द्व्यर्थः पचिः इति भाष्यतत्त्वविमर्शः

एवं धातोः फलवाचकत्वे युक्तिं प्रदर्श्य महाभाष्यप्रामाण्यमपि प्रदर्शयति - **अत एवेति** ॥**द्व्यर्थः पचिरिति**॥ पचिः - पचधातुः, द्व्यर्थः - फलव्यापारोभयार्थ इति तदर्थः। अत्र पचिः धातुसामान्यस्योपलक्षणमिति सर्वेषां धातूनां फलव्यापारोभय वाचित्वं सिद्ध्यतीत्यर्थः। तथा हि - "कर्तुरीप्सिततमं कर्म"(पा.1-4-49) इति सूत्रे भाष्ये "अथेह कथं भवितव्यं तण्डुलानोदनं पचति तण्डुलानामोदनं पचतीति? उभयथापि भवितव्यम्। कथम्? इह हि तण्डुलानोदनं पचतीति, द्व्यर्थः पचिः। तण्डुलान् पचन् ओदनं निर्वर्तयति इति। इहेदानीं तण्डुलानामोदनं पचतीति द्व्यर्थश्चैव पचिः, विकारयोगे षष्ठी, तण्डुलविकारमोदनं निर्वर्तयति" इति उक्तम्। अत्र **प्रदीपे** "विक्लेदनोपसर्जने निर्वर्तने पचिर्वर्तते। तण्डुलान् विक्लेदयन्नोदनं निर्वर्तयतीत्यर्थः। तत्रोपसर्जनविक्लेदनक्रियापेक्षं तण्डुलानां कर्मत्वम्, प्रधानभूत-क्रियापेक्षं त्वोदनस्य" इति तण्डुलानामित्यस्य "तण्डुलानां सम्बन्धिनं विकारविशेष मोदनं विक्लित्त्या निर्वर्तयति" इति च व्याख्यातम्। अत्र द्वितीये विक्लित्तिपदं च विक्लेदनार्थकमिति **उद्योते** व्याख्यातम्। अनया व्याख्याया व्यापार-द्वयार्थकत्वमस्येति सिद्धम्। कौण्डभट्टस्तु **भूषणे** इत्थं निरूपयति -"तण्डुलानोदनं पचति" इत्यत्र तण्डुलानां विकार्यकर्मत्वम् ओदनस्य निर्वर्त्यकर्मत्वं च प्रति-पादितम्। पचेः विक्लित्त्युत्पत्तिद्व्यर्थकत्वस्य भाष्यकारैरुक्तस्य धातोः फला-वाचकत्वेऽसम्भवात्। एकस्यैव व्यापारस्योभयफलत्वे हेतुत्वसम्भवे तद्व्यापार-द्वयार्थत्ववर्णनस्याप्यसम्भवात्" इति। अस्य भाष्यस्य पच्यर्थतया विक्लित्त्युत्पत्ति-रूपफलद्वयबोधने तदनुकूलव्यापारबोधने च मुख्यं तात्पर्यम्। ततश्च फलस्यापि व्यापारेण सह धात्वर्थत्वमनेन भाष्येण स्पष्टम् इति तस्याशयः। कैयट-व्याख्यायामपि विक्लित्तेः तदनुकूलव्यापारस्य च पचधात्वर्थत्वमभिप्रेतमिति

फलव्यापारयोः उभयोरपि धात्वर्थत्वं स्पष्टम्। भाष्ये "पचन्" इति शत्रन्तपचतेः प्रयोगात् निर्वर्तयतीति तिङन्तप्रयोगाच्च व्यापारद्वयार्थकत्वं सुस्पष्टम्। तत्तद्व्यापारनिर्वर्तनीयफलस्य भिन्नत्वात्। विक्लित्तिः "पचन्" इत्यनेन, उत्पत्तिः "निर्वर्तयती"ति तिङन्तेन च बोध्यते इत्यर्थः। **कान्त्याम**पि व्यापारद्वयार्थकत्वमेव सूचितम्। **काशिकायां** - "तण्डुलानोदनं पचती"त्यत्र तण्डुलानां विकार्यकर्मत्वम् ओदनस्य निर्वर्त्यकर्मत्वं चाभिमतं, तन्निर्वाहार्थमुत्पत्तिविक्लित्तिरूपफलद्वयार्थकत्व-पर एव स भाष्यग्रन्थः। एकस्यैव व्यापारस्य उक्तफलद्वयजनकतया व्यापारद्वय-परत्वेऽसङ्गतिः स्पष्टैवेति भावः इति **भूषणो**क्तमेवोल्लिखितम्। **शाङ्कर्य**पि काशिकानुसारिणी। **तत्त्वदर्शिन्याम**पि भूषणोक्त एव कौण्डभट्टाभिप्रायः प्रकाशितः। ॥**दिगिति**॥ ननु "द्व्यर्थः पचिः" इति भाष्येण सकर्मकेषु फल-व्यापारोभयार्थकत्वसिद्धावपि अकर्मकेषु फलप्रतीतौ प्रमाणाभाव इति चेन्न। "भू सत्तायाम्, एध वृद्धौ" इति धातुपाठवशात् सत्तादिरूपफलवाचकत्वस्य सिद्धत्वात्। सकर्मकस्थले एव कर्मणि प्रत्ययस्य वर्तमानत्वात् प्रतीयमानस्य फलस्य कर्म-प्रत्ययार्थत्वम् उत धात्वर्थत्वमिति विकल्पस्य अवसरः, अकर्मकस्थले तादृश-शङ्कायाः एव अनुत्पादात्। "प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते" इति न्यायेन स्नानादिक्रियायाश्च कस्यचित्फलस्यावश्यस्वीकार्यतया तत्फलवाचकस्य अन्यस्य वाक्येऽभावाच्च वाक्यार्थाङ्गतया बुध्यमानस्य तस्य धात्वर्थत्वमेव सिद्ध्यति। अतः अकर्मकेषु फलार्थकत्वसाधने न क्लेशः इति भावः। ननु सत्ताद्यर्थनिर्देशात्फल-वाचकत्वं चेत् व्यापारवाचित्वं न सिद्ध्येदिति चेन्न। धातुसामान्यशक्त्या पच्यादे-रिव भवत्यादेरपि व्यापार बोधसम्भवात्। किञ्च पचति - पाकं करोति, पाकानुकूलो व्यापारः पाकानुकूला भावनेत्यादि यथा विवरणं दृश्यते तथा स्नातीत्यादीनां "स्नानं करोती"त्यादिविवरणस्य वर्तमानत्वात् विवरणवाक्यीयकरोतिव्यापारादिशब्देन धात्वर्थव्यापारविवरणस्य व्यवस्थापितत्वाच्च व्यापारबोधे न किंचिद्बाधकमिति भावः। अन्यच्च जानात्यादेःज्ञानं फलं तजनकेन्द्रियसन्निकर्षादिः व्यापार इति पक्षे "काष्ठानि पचन्ती" तिवत् "चक्षुर्जानाती"ति प्रयोगः स्यादिति दोषः कश्चित् आशङ्कितः। स च वस्तुतः दोष एव न । इष्टापत्तिरेव तादृशप्रयोगे इत्येतत्सर्वं सूचयति - **दिगिति** ॥ सर्वा व्याख्याः अत्र एकरूपा एव॥ 7 ॥

व्यापारो भावनेत्यादि कारिकात्रयेण लडाद्यन्ते तिङन्ते भावनायाः वाच्यत्वमेव नेति प्राचीनप्राभाकरमतं प्राचीननैयायिकैकदेशिमतं तथा फलस्य अवाच्यत्वं

8. भाट्टमतम् - तन्निरासश्च

एवं सिद्धयतु फलव्यापारयोर्वाच्यत्वम्। किन्तु आख्यातवाच्यैव सा भावना न धातोः, प्राधान्येन प्रतीयमानव्यापारस्य धात्वर्थतायाः "प्रकृतिप्रत्ययार्थयोः प्रत्ययार्थस्य प्राधान्यम्" इति न्यायविरुद्धत्वात्। "तदागमे हि दृश्यते" इति न्यायविरुद्धत्वाच्च। एवञ्च "स्वयुक्ताख्यातार्थव्यापारव्यधिकरणफलवाचकत्वं सकर्मकत्वम् , आख्यातार्थव्यापाराश्रयत्वञ्च कर्तृत्वं वाच्यम्" इत्यादि वदन्तं मीमांसकम्मन्यं प्रत्याह -

---

वदतां प्राचीननैयायिकानां च मतं निराकृत्य, तिङन्ते फलव्यापारोभयबोधेऽपि व्यापारो न धात्वर्थः अपि तु तिङर्थ एवेति भाट्टमीमांसकमतं निराकर्तुमुपक्रमते **एवंसिद्ध्यत्वित्यादिना।** ॥ **एवमिति** ॥ "पाकं करोति, पाकानुकूलो व्यापारः, पाकानुकूला भावना, तादृश्युत्पादने"त्यादिरूपेण पचतीत्यादीनां विवरणदर्शनात् भावनायाः अपि वाच्यत्वं सिद्धयतु। ॥ **वाच्यत्वमिति** ॥ लडाद्यन्ते - तिङन्ते इति शेषः । तस्यैव पूर्वं प्रक्रान्तत्वात्। पूर्वोक्तविवरणं तिङन्तस्य विवरणमिति तिङन्ते भावनायाः वाच्यत्वमेव तेन सिद्ध्यति न तु तस्याः धात्वर्थत्वमिति शङ्कितुराशयः । अत्र **दर्पणकारः** - "ननु व्यापारो भावनेति विवरणेन न व्यापारस्य धात्वर्थत्व-निर्णयः "पचति पाकं करोति" इति विवरणेन आख्यातार्थताया अपि वक्तुं शक्यत्वादिति मीमांसकाशङ्कासमाधानपरतया मूलमवतारयति - **एवमित्यादिना। वाच्यत्वमिति।** तिङन्तजन्यबोधविषयत्वमित्यर्थः। तथा च पाकानुकूला भावना इति विवरणेनापि पचतीत्यस्य पाकानुकूलभावनाबोधकत्वमस्त्वित्यर्थः। यथाश्रुते विवरणेन धातोः भावनावाचकत्वनिर्णये "किं त्वाख्यातवाच्यैव सा इत्युत्तरग्रन्था-सङ्गतेः" इति व्याचख्यौ। "व्यापारो भावने"त्यादि धातोः व्यापारवाचकत्व-साधनायेति पूर्वं तेन व्याख्यातम्। अतः इदानीं "एवं सिद्धयतु" इत्यस्य धातौ भावनायाः वाच्यत्वं सिद्धयतु इत्यर्थकत्वं वक्तव्यम्। तच्चेदानीमत्र न घटते उत्तर-ग्रन्थविरोधात्। अतः कथमपि स्वपूर्वव्याख्यां समर्थयितुं "यथाश्रुते" इत्यादिना प्रयतितवान्। वस्तुतस्तु व्यापारो भावनेति न धातोः व्यापारवाचकत्वं साधयितु-मुपक्रान्तं किन्तु तिङन्ते भावनायाः वाच्यत्वसाधनायैव। तत्रावतरणिकायां लडाद्यन्तपदं तद्गुणसंविज्ञानबहुव्रीहिपरमिति तिङन्तबोधकमेवेति सप्रमाण-मस्मद्गुरुचरणैः **तत्त्वदर्शिन्याम्** अस्माभिश्चात्र प्रतिपादितम्। अतोऽपि दर्पण-

कारस्य तदनुयायिनां च तत्र लडाद्यन्तशब्दस्यातद्गुणसंविज्ञानबहुव्रीह्याश्रयणं तस्य धातुपरत्वेन व्याख्यानं च अयुक्तमिति ज्ञायते। "पूर्वोक्तयुक्तिभिः फलव्यापारयोः वाच्यत्वे साधिते तिङ्प्रत्ययवाच्यैव सा भावना इति मण्डनानुयायिमतमाशङ्क्य निराकुरुते"इति **काशिकावतरणग्रन्थः** युक्ततमः। वैयाकरणसिद्धान्तभूषणे "तस्मात् करोति"रिति कारिकावतरणे "मण्डनमिश्रमतानुयायिनस्तु" इत्यारभ्य भूषणसारो -ल्लिखित एव ग्रन्थः अक्षरशः उपलभ्यते। अत्र च निराकर्तुमुद्दिष्टं प्राचीनं भाट्टमतं यच्च मण्डनमिश्रेण **भावनाविवेकग्रन्थे** प्रतिपादितम्। तस्य च मतस्य संक्षिप्तं स्वरूपमत्र प्रस्तूयते।

8.1. भाट्टेषु मण्डनानुयायिनां मतम्

फलमेव धात्वर्थः। भावना तिङ् प्रत्ययार्थः। तथा हि - "पूर्वापरीभूतं भावमाख्यात माचष्टे व्रजतिपचतीत्युपक्रमप्रभृत्यपवर्गपर्यन्तमि"(नि-अ-1-पा.1) ति निरुक्तात् आख्यातस्य फलोत्पादिका क्रियार्थ इत्यवगम्यते। भावपदस्य भूधातोः णिजन्ता-द्भावे घञि निष्पन्नत्वेन भवनानुकूलव्यापारपरत्वात्। सैव भावनेति क्रियेति च व्यवह्रियते। पचतीत्याद्याख्यातस्य (तिङन्तस्य) पाकं करोतीति विवरणात् भावना भिन्नफलस्यापि तिङन्तवाच्यता निश्चीयते। तच्च फलं धात्वर्थः। नाप्युभयं धात्वर्थः। अन्यायोऽनेकार्थत्वमिति न्यायात्। किञ्च यथा घटं करोतीत्यत्र जननो-त्पादश्रुतिविषयां भावनां करोति बोधयति तथैव पाकं करोतीत्यत्रापि। अन्यथा अनेकार्थत्वात् अभिधेयनिश्चयायोगात् व्यवहाराङ्गतैव न स्यात्। क्लृप्तसामर्थ्यानु-सारेण प्रयोगोपपत्तेः क्लृप्तार्थत्यागे अन्यार्थकल्पने च प्रमाणाभावात्, किं करोतीति प्रश्ने करोतेरुत्पादनार्थकत्वस्यैव सर्वसम्मतत्वाच्च। एवञ्च पचतीत्यस्य पाकं करोतीति विवरणात् तिङः करोत्यर्थता सिद्धा ।

उदासीनत्वविच्छेदलक्ष्यं धात्वर्थकारणम्।
स्पन्दव्यापारपर्यायं करोत्यर्थं प्रचक्षते॥ (भावनाविवेकः)

इति अधिश्रयणादिसंयोगभेदेभ्योऽव्यापारात्मकेभ्यो भेदेन करोति स्पन्दते चेष्टते व्याप्रियते इति पदबोध्यः व्यापारः करोत्यर्थः। नहि चलित्वा स्थितस्य क्रियाप्रभव-पूर्वोत्तरदेशसंयोगविभागाः भावः। अतस्तदालम्बनो व्यापारप्रत्ययो न जातु विरमेत् । अतः व्यापार एव भावनापदार्थः।

यद्यपि "न केवला प्रकृतिः प्रयोक्तव्या नापि केवलः प्रत्यय" इति नियमेन पार्थक्येन प्रकृतिनैरपेक्ष्येण प्रत्ययस्य नार्थबोधकत्वम्, अथापि "प्रकृतिप्रत्ययार्थयोः प्रत्ययार्थः प्रधानम् " इति न्यायेन पदार्थे यः प्रधानभूतः प्रकृत्यर्थभिन्नतया च भासमानः स एव प्रत्ययार्थ इत्यनुमातुं शक्यम्। "तदागमे हि दृश्यते" इति न्यायाच्च। एतच्च आख्यातार्थाधिकरणे(मी.2-1-1) तन्त्रवार्तिके भट्टपादैः स्पष्टीकृतम्। यदि च भावना धात्वर्थोऽभविष्यत् तर्हि भावकृदन्तानां तिङन्तानां च बोधे वैलक्षण्यमेव नाभविष्यत्। पचतीत्यस्य यथा पाकं करोतीति विवरणं दृश्यते न तथा पाक इत्यस्य। "धात्वर्थः केवलः शुद्धो भाव इत्यभिधीयते" इति भावनासंस्पर्शरहितस्य धात्वर्थफलस्यैव भावघञन्ते भानम् ।

न हि "का क्रिया? पाकः" इति प्रश्नोत्तराभ्यां करोतेर्धात्वर्थसामानाधिकरण्यमिति भ्रमितव्यम्। अत्र पाकशब्दस्य लक्षणया भावनाप्रतिपादकत्वात्। न ह्यभिधेय एव शब्दार्थ इति व्यवस्था। "यत्परः स शब्दार्थ" इति पचिना लक्षितभावविशेषनिबन्धनमपि ऐकाधिकरण्यं भवति। तिङन्ते तु भावना न लक्ष्या। पाकः पचतीत्यनयोः पर्यायतापत्तेः। तथा हि - पाक इत्यनेन सिद्धावस्थापन्नस्य पचतीत्यनेन साध्यावस्थापन्नस्य च भावस्य बोध इति सर्वानुभवसिद्धम्। साध्यत्वं च भावनासंस्पर्शकृतम्। यदि च सा प्रत्ययेनाभिधीयेत तर्ह्येव तत्संस्पर्शो भवति। न च प्रत्ययेन भावनायाः अनभिधानेऽपि पचतीत्यत्र प्रत्ययप्रतिपादितकर्तृकारकसम्बन्धाद्धात्वर्थस्य साध्यत्वावगमो भवतीति वाच्यम्। भावोत्पन्नलकारे स्थीयते इत्यादिषु प्रत्ययेन कर्तृकारकप्रतिपादनासम्भवात् तत्सम्बन्धस्य वक्तुमशक्यतया साध्यत्वानवगमप्रसङ्गात्। अस्ति च तादृशावगतिर्भावतिङन्ते। "देवदत्तेन स्थीयते" इत्यस्य "देवदत्तेन स्थितिः क्रियते" इति विवरणात्। ननु भावनासंस्पर्श -निरपेक्षं साध्यत्वं धातुनैवोच्यते। अन्यथा भावनाया अपि साध्यत्वात् पुनः भावना संस्पर्शव्यपेक्षा इत्यनवस्था स्यात्। न च पाक इत्यत्रापि साध्यत्वप्रतीतिः स्यादिति वाच्यम्। प्रत्ययार्थेन सिद्धत्वेनाभिभूतत्वादिति चेन्न। धात्वर्थस्य स्वाभाविकसाध्यत्वे मानाभावात्। पचत्यादौ भावनासंस्पर्शकृतसाध्यत्वोपपत्तेः। देवदत्तेन पाक इत्यादौ च लक्ष्यमाणभावनाविषयकः कारकसम्बन्धः। अत एव देवदत्तेन पाक इत्यस्य "देवदत्तेन पाकः क्रियते" इत्यर्थो वर्ण्यते। प्रसिद्धश्च गम्यमानभावना विषयकः कारकसम्बन्धः शङ्कुल्या खण्ड इत्यादौ ।

न च धात्वर्थभावनयोर्न तात्त्विको भेदः किन्तु शब्दोपकल्पित एव। धात्वर्थ एव व्यापारात्मना धातुनोपादीयमानः प्रत्ययाच्च फलभावनासमर्थतया गम्यमानः फलभवनसमर्थव्यापारवचनभावनाक्रियादिशब्दार्थ इति वाच्यम्। प्रयत्न-परिस्पन्दयोः धातुवाच्यसंयोगविभागाद्यतिरिक्तयोः प्रत्यक्षसिद्धत्वात्। तथा हि - चलतीत्यक्षिजातः प्रत्ययः संयोगविभागातिरिक्तं परिस्पन्दमालम्बते। प्रयत्नोऽपि मानसप्रत्यक्षग्राह्यो यस्मिन् सति भूतानि प्रवर्तन्ते। स च आत्मकर्तृको व्यापारः। यदि च धात्वर्थव्यापारयोरभेदस्तर्हि विक्लिद्यति पचतीत्यनयोः पर्यायतापत्तिः। विक्लित्तिरूपधात्वर्थातिरिक्तव्यापारानभ्युपगमात्। उभयत्र तण्डुलानामेव कर्तृत्वात्। यदि च धात्वर्थातिरिक्तो व्यापारोऽङ्गीक्रियते तर्ह्येव कर्तृभेदात् भेदप्रतीति-र्भवति।

8.1.1. भावनायाः धात्वर्थत्वनिरासः

अस्तु तर्हि धात्वर्थफलातिरिक्तो व्यापारः। सोऽपि धातुवाच्य एवास्तु। पाकमभि-सन्धाय प्रेषणमध्येषणं वा करोति सर्वं तत्पचिनाभिधीयते। तदुक्तं "तदभिसन्धि-पूर्वकं प्रेषणमध्येषणं वा तत्सर्वं पच्यर्थ" इति तन्न। भावे घञादयो विधीयन्ते। धात्वर्थश्च केवलो भाव इयभिधीयत इति पाकशब्दाद्विक्लेदनं प्रतीयते न कर्तृ-व्यापारः। तस्माद्विक्लेदनमेव पच्यर्थः। घञन्तेन च सिद्धावस्थापन्नो धात्वर्थ उच्यते। तद्यदि विक्लेदनार्थककर्तृव्यापारः पचेरर्थः स्यात् तर्हि पाक इत्यस्यार्थः सिद्धा पाकक्रियेति कथयेयुः। न त्वेतदस्ति। पाकः सिद्ध इत्येव व्यवहारः। एवं तिङन्तेऽपि "पच्यन्ते तण्डुलाः स्वयमेव, यजते यजमानः" इत्यादिषु विक्लेदनं सङ्कल्पविशेष इत्यादय एवार्थाः प्रतीयन्ते इति पचतियजतीत्यादिषु धातुभागस्य अपि तदर्थकत्वमेवोचितम्। नत्वन्यार्थे शक्तिकल्पनम्। कर्तृकर्मभावार्थकप्रत्यया-न्तेषु सर्वेषु नियततया फलांशस्यैवोपस्थितेरव्यभिचारात् फलमेव धात्वर्थः। प्रत्ययागमे एव कर्तृव्यापारबोधात् तत्प्रत्ययाभावे तद्बोधाभावाच्च "तदागमे हि दृश्यते" इति न्यायेनान्वयव्यतिरेकाभ्यां कर्तृव्यापारः प्रत्ययार्थः इत्येव युक्तम् । तदुक्तम् -

"तथा क्रमवतोर्नित्यं प्रकृतिप्रत्ययांशयोः ।
प्रत्ययश्रुतिवेलायां भावनात्मावगम्यते ॥" (मी. 2.1.1.1)

इति। अस्ति सत्ता भाव इत्येतेषां भिन्नोपस्थितिजनकत्वात् तिङन्तवाच्यसत्तायाः भावप्रत्ययान्तवाच्यसत्तायाश्च भेदोऽस्त्येवेति अस्त्यादावपि तिङा भावनाभिधीयत एव। तदुक्तम् -

"अस्त्यादावपि धर्म्यंशे भाव्येऽस्त्येव हि भावना" इति। (मी. 2.1.1.1)

न च केवलफलस्यैव भावप्रत्ययान्तार्थत्वे गमनमिति ल्युडन्तेन संयोगस्यैवा-भिधानात् तस्य ग्रामनिष्ठतया च "ग्रामो गमनवानि"ति प्रयोगापत्तिरिति वाच्यम्। निरूपकत्वादिसम्बन्धविशेषेण वर्तमानस्यैव फलस्य धातुवाच्यत्वमिति ग्रामानु-योगिकसंयोगस्य धातुवाच्यत्वं नास्तीत्यतस्तदापत्तिर्नास्तीति गागाभट्टाः। वृत्त्यनियामकसम्बन्धेन वर्तमानस्य फलस्य न धातुवाच्यत्वमिति तदर्थः। व्यापारस्य धातुवाच्यत्ववादिनापीदमवश्यमभ्युपेयम्। अन्यथा आभिमुख्यादि-सम्बन्धेन संयोगानुकूलक्रियायाः ग्रामेऽपि सत्त्वात्तादृशप्रयोगापत्तेः।

8.1.2. कृतामपि भावनावाचित्वम्

वस्तुतस्तु कृत्प्रत्ययानां द्रव्यप्रधानव्यापारवाचित्वमेव। किं कृतवान्? इष्टवान्, किं क्रियः? पाचकः, इत्यादिना करोतिना विवरणदर्शनात्। यथा भावार्थकतिङन्ते स्थीयते सुप्यत इत्यादिषु भावना प्रत्ययवाच्या तथा भावार्थककृदन्तेऽपि। इयांस्तु विशेषः। तिङन्ते साध्यत्वेनाभिधीयमानायाः कृदन्ते सिद्धत्वेन भानमिति। अतश्च ग्रामो गमनवानिति प्रयोगापत्तिर्नास्ति, "गमनजन्यसंयोगाश्रयो ग्राम" इति प्रयोगोऽप्युपपद्यते। अत एव "ओदनस्य पाक" इत्यादिषु "कर्तृकर्मणोः कृति" (पा. सू-2-3-65) इति कर्मणि षष्ठी। एवं कर्मकृतामपि कारकभावनोभय-वाचकत्वात् "ओदनस्य पक्ते"त्याद्यपि नानुपपन्नम्। न च कृतां नानार्थकतापत्ति-रिति वाच्यम्। धातुभ्यः कृतामल्पसंख्याकतया बहुसंख्याकधातूनां नानार्थकत्व-स्वीकारापेक्षया कृतां नानार्थकत्वे लाघवात्। "चैत्रो देवदत्तेन पाचयती"त्यादावपि कर्तृव्यापारविषयः प्रेरणादिप्रयोजककर्तृव्यापारः णिजर्थः, धात्वर्थविषयः कर्तृ-व्यापारस्तिङर्थ इति न भवति भावयोस्तुल्यार्थता। स्वयुक्ताख्यातार्थव्यापार-व्यधिकरणफलवाचकत्वं सकर्मकत्वम्, स्वयुक्ताख्यातार्थव्यापारसमानाधिकरण-फलवाचकत्वमकर्मकत्वमिति सकर्मकत्वाकर्मकत्वव्यवस्थापि सिद्ध्यति प्रत्ययार्थ-व्यापाराश्रयत्वं कर्तृत्वम्। प्रत्ययार्थव्यापारव्यधिकरणफलाश्रयत्वमेव कर्मत्वम्।

भावनामुख्यविशेष्यकः शाब्दबोधः। यतस्तण्डुलमित्यादिद्वितीयाद्यन्तपदानां क्रिया पदं विना निराकाङ्क्षबोधजनकत्वं नास्ति, अतो ज्ञायते क्रियापदं द्वितीयान्तादि-पदार्थस्य विशेष्यसमर्पकमिति। द्वितीयाद्यर्थश्च प्रातिपदिकार्थस्य विशेष्यः"प्रकृति-प्रत्ययौ सहार्थं ब्रूतस्तयोः प्रत्ययार्थः प्रधानमि"ति व्युत्पत्तेः। तिङन्तघटक-धात्वर्थस्य आख्यातार्थ एव विशेष्यः "प्रकृतिप्रत्ययार्थयो"रिति न्यायादेव । आख्यातस्य कालः संख्या व्यापारः भावना च अर्थाः। तेष्वपि भावनैव विशेष्य-भूता। "भावप्रधानमाख्यातमि" (नि-आ-1-पा)ति निरुक्तस्मृतेः। अतश्च वाक्य-जन्यबोधे भावनैव मुख्यविशेष्यतया भासते। "तद्भूतानां क्रियार्थेन समाम्नायः"(मी-1-1-24) इति सूत्रयन् जैमिनिरपि क्रियापदबोध्यभावनामुख्य-विशेष्यकं बोधं प्रमाणयति। धात्वर्थस्य कारकत्वादपि भावनायामन्वयो युक्तः। द्वितीयाद्यर्थकारकाणामपि न धात्वर्थेऽन्वयः। कारकस्य कारकेण निराकाङ्क्षत्वात्। किन्तु आख्यातार्थभावनायामेव।

पचतीत्यत्र "पाकं करोत्युत्पादयति साधयति भावयति जनयती"त्यादि-विव्रियमाणाख्यातार्थोत्पादनायाम् एकदेशभूतायामुत्पत्तौ वा आधाराधेयभावेन धात्वर्थः पाकः कर्मतयान्वेति। अत एव विवरणवाक्ये पाकपदात् कर्मानुवादिका द्वितीया। यत्र चौदनं पचतीत्यादौ आख्यातार्थभावनायामन्वययोग्यमोदनादि-वृत्तित्वं द्वितीययोपस्थापितं तत्र धात्वर्थस्य करणत्वेनैवान्वयः। अत एव "पाकेनोदनं करोति" इति विवरणं सङ्गच्छते। "अग्निहोत्रं जुहोती"त्यादौ जुहोति-धात्वर्थस्यैव भाव्यतया कर्मत्वमिति तद्विशेषणीभूताग्निहोत्रपदे द्वितीया। "नीलं घटमानय" इत्यादौ नीलादेरिव तस्य कर्मविशेषणपदत्वात्। यस्यां भावनायां स्वर्गादिभाव्यं विना निष्फलत्वेन लिङुपात्तभावनायाः अन्वयासम्भवस्तत्र धात्वर्थस्य न कर्मत्वेनान्वयः। एककर्मावरुद्धे कर्मान्तरस्यानाकाङ्क्षितत्वात्। किन्तु करणत्वेन। अत एव "सोमेन यजेते"त्यादौ स्वर्गस्वरूपेण स्वर्गकामपदोपात्तेन आक्षिप्तेन वा भाव्येन सकर्मिकायां भावनायां करणतया यागादेरन्वयः। तथा च स्वर्गवृत्तेर्यागकरणिकाया उत्पत्तेरनुकूलो व्यापारः प्रवर्तनागोचर इति यजेतेत्यत्र वाक्यार्थः। अत एव यजेतेत्यस्य यागेन स्वर्गं भावयेदिति विवरणम्। अत एव ज्योतिष्टोमेन स्वर्गकामो यजेतेत्यत्र ज्योतिष्टोमपदोत्तरं तृतीयया यागकरण-त्वस्यानुवादः। यत्र तु वाक्ये करणकर्मणी शब्दान्तरोपात्ते तत्र प्रकरणवशादुप-

स्थितार्थानुवादको धात्वर्थो न भावनायामन्वेति। तत्र च धातुराख्यातप्रयोगमात्र-प्रयोजको निरर्थकप्रायः। अतश्च तस्य वाक्यार्थे निवेशो न भवति। यथा "दध्नेन्द्रिय-कामस्य जुहुयादि"त्यादौ । आख्यातार्थः कालः समानप्रत्ययोपात्तभावनाया-मन्वेति। संख्या तु भावनाक्षिप्तकर्तरि।

8.1.3. कर्तृकर्मणोराख्यातार्थत्वनिरासः

कर्तृकर्मणी नाख्यातार्थः। भावनया आक्षेपात् लक्षणया वा तद्बोधोपपत्तेः। न चाभिधानानभिधानव्यवस्थोच्छेदः। अनभिहिते इत्यस्याबोधिते इत्यर्थात्। बोधश्च श्रुत्या आक्षेपाद्वा। स चाख्याते आक्षेपात्। कृत्प्रत्यये तु श्रुत्या। अत एवोक्तं कर्त्रधिकरणे(मी.3-4-4) भट्टैः "यादृशस्तु गुणभूतः कर्तात्रावगम्यते न तादृशेन विना भावनोपपद्यत इति अर्थापत्याऽनुमानेन वा शक्ता अनुगमयितु"मिति । नापि कृत्प्रत्यये आक्षेपात् आख्याते च श्रुत्येति वैपरीत्यापत्तिः। आख्याते प्रधानीभूत-भावनया कर्तुराक्षेपस्य युक्तत्वात्। भावनायाः आक्षेपलभ्यत्वे तु प्राधान्यं तस्या न स्यात्। एवं कृत्स्वपि प्राधान्यात् कर्तृकर्मवाचित्वमावश्यकम्। अतो युक्तस्तेन भावनाक्षेपः। उक्तञ्च "यदि कर्त्रा धात्वर्थेन वा भावनावगम्येत ततः पाचक-पाठकादिपदेष्विव तिरोहितस्वरूपावगम्येत। प्राधान्यात्तु शब्दार्थत्वाध्यवसानम्" इति। न च पुरुषव्यवस्थोच्छेदः। भावनाक्षिप्तकर्त्रा सह युष्मदर्थस्य सामानाधि-करण्यात्। कर्तृविशिष्टसंख्याभिधानाद्वा अभिधानव्यवस्थोपपत्तिः। किञ्च "लः कर्मणी"(पा. सू-3-4-69)ति सूत्रात् आख्यातस्य कालसंख्याबोधकत्वमेव सिध्यति। तथा हि - "लः कर्मणि" (पा. सू 3-4-69) "तिप्तस्झि"(पा. सू 3-4-78) "द्व्येकयोः"(पा. सू-1-4-22) इत्येतेषामेकवाक्यतया विधानेन कर्तुरेकत्वेऽभिधेये लकारैकवचनं तिबादि प्रयोक्तव्यमित्यर्थः सिध्यति। एवञ्च कर्तृकर्मणोर्भावनयै-वाक्षेपात् न ते वाच्ये, अनन्यलभ्यः शब्दार्थ इति न्यायात्। कर्तृकर्मणो-र्विवरणमपि तात्पर्यार्थविवरणमेव। तस्मात् पाकं करोतीत्यशब्दार्थकर्मत्व-विवरणवत् इतरेतरयोगद्वन्द्वे समुच्चयांशविवरणवद्वा न तदर्थनिर्णायकम्। एवञ्च फलमेव धात्वर्थः। नन्वेवं "भूवादयो धातवः" (पा. सू-1-3-1) इति सूत्रभाष्य-विरोधः। क्रियावाचकत्वे सति गणपठितत्वं धातुत्वमिति तत्रोक्तत्वादिति चेन्न। तत्र क्रियापदेन धात्वर्थमात्रस्य फलस्यैवाभिप्रेतत्वात्। तस्मात् फलं धात्वर्थः स्पन्द-प्रयत्नरूपा भावना आख्यातार्थ इति सिद्धम्। इति॥

अत्र च पूर्वापरीभूतं भावमिति कथनेन, करोति स्पन्दते चेष्टते व्याप्रियते इति पदबोध्यत्वप्रदर्शनेन, वस्तूनामुदासीनत्वविच्छेदसाधनत्वेन, अर्थात् तेषां कारकत्वसम्पादकत्वेन च तस्याः निरूपणेन, संयोगविभागादिधात्वर्थफलात् अतिरिक्तत्वेन भासमानायाः एव तत्पदवाच्यत्वनिरूपणेन च सर्वोऽपि फलातिरिक्तः स्पन्दरूपो वा प्रयत्नरूपो वा भावभावनापदाभ्यामभिप्रेत इति स्पष्टतया अवगम्यते। "पाकं करोति" इति विवरणवाक्यगतकरोत्यर्थः "स्पन्दव्यापारपर्यायं करोत्यर्थं प्रचक्षते" इति श्लोकार्थेन विव्रियते इति अतोऽपि स्पष्टं यत् करोत्यर्थः न केवलप्रयत्नरूपः अपितु स्पन्द-व्यापार-प्रयत्नादिसमुदायरूप इति। इदमेव भाट्टमीमांसकानां प्राचीनं मतं कुमारिलभट्टाभिमतं च।

आधुनिकमीमांसकास्तु "पुरुषप्रयत्नरूपोऽर्थः भावना तिङर्थः, अन्यस्तदतिरिक्तः स्पन्दव्यापारादिपदवाच्यः धात्वर्थः" इति वदन्ति। तथा च नव्यमीमांसकानां मते फलं व्यापारः(प्रयत्नातिरिक्तः) धात्वर्थौ, भावना प्रत्ययार्थः। अयं च धात्वर्थव्यापारः न साध्यत्वेनावगम्यते किन्तु यदा भावना संस्पर्शः अर्थात् भावनाबोधकप्रत्यययोगः धातोः, तदैव स व्यापारः साध्यत्वेन प्रतीयते इत्यपि एतेषां मतम् । "तस्मात्करोति"रिति कारिकया तु मण्डनमिश्रानुयायिनां मतखण्डनमेवोद्दिष्टम्, न तु आधुनिकमीमांसकमतम् इति तु स्पष्टं ज्ञायते **भूषणग्रन्थावलोकनेन काशिकादि**व्याख्याभिश्च।

॥**सा भावने**ति ॥ विवरणादिपूर्वोक्तयुक्तिभिः वाच्यताकोटिमानीता भावनेत्यर्थः तच्छब्दबलात् प्रतीयते । अत्राख्यातवाच्यैवेत्यस्य तिङ्प्रत्ययवाच्यैवेत्यर्थः न तु धातुवाच्येति। तथा सति भाट्टमतविरोधात्। एवशब्देन च तस्याः धातुवाच्यत्वं निरस्यति - **न धातो**रिति। अत्र भावनापदेन मण्डनानुयायिभिः फलातिरिक्तः स्पन्दादिरूपः प्रयत्नपर्यन्तः सर्वोऽपि भावनापदबोध्यः इति पूर्वमेव तन्मतस्वरूपवर्णनेऽस्माभिः स्पष्टीकृतम्।

प्राधान्येनेति॥ "प्रधानोपसर्जने प्रत्ययार्थप्रकृत्यर्थौ" इति प्राचीनपरम्परासिद्धन्यायस्य अनुवादरूपेण "प्रकृतिप्रत्ययार्थयोः प्रत्ययार्थः प्रधानमि"त्यनेन प्रत्ययार्थत्वेनावगतस्य प्रकृत्यर्थापेक्षया प्राधान्यं, प्राधान्येनावगतस्य च प्रत्ययार्थत्वं बोध्यत इति तिङन्ते "भावप्रधानमाख्यातम्" इत्यादिवचनप्रामाण्यात् भावनायाः प्राधान्यमवगतमिति तस्या एव प्रत्ययार्थत्वं युक्तमिति भावः। किंच धातुप्रकृतिकेषु

कृदादिप्रत्ययेषु प्रत्ययार्थप्राधान्यमेव अनुभूयत इति तिङन्तेष्वपि तदर्थप्राधान्यमेव युक्तमिति इतोऽपि तिङर्थः भावना सिद्ध्यति। न च "लः कर्मणी"(पा.3-4-69) त्यनुशासनात् कर्तृकर्मणोरेव प्रत्ययार्थत्वात् प्रत्ययार्थप्राधान्ये तयोरेव प्राधान्यं स्यादिति वाच्यम्। "लः कर्मणी"(पा. 3-4-69) सूत्रे कर्तृकर्मपदयोः भावप्रधान-निर्देशेन कर्तृत्वरूपभावनायाः एव तेन सूत्रेण तिङर्थत्वबोधनात्। किं च भूवादि(पा. 1-3-1) सूत्रे महाभाष्ये अन्वयव्यतिरेकाभ्यां प्रकृति प्रत्यययोरर्थ-निर्णयः प्रतिपादितः ।

8.1.4. अन्वयव्यतिरेकाभ्यामर्थनिर्णय इत्यत्र वृद्धमीमांसकसम्मतिप्रदर्शनम्

तिङ्प्रत्ययसत्त्वे भावनारूपोऽर्थोऽवगम्यते तदभावे कृदादिषु प्रत्ययेषु स भावना - रूपोऽर्थो नावगम्यत इति अन्वयव्यतिरेकाभ्यां भावनारूपोऽर्थः तिङर्थत्वेनैव प्रसिद्ध्यति न धात्वर्थत्वेन। जैमिनिमहर्षिणापि अन्वयव्यतिरेकाभ्यामर्थनिर्णयः पश्वेकत्वाधिकरणे अङ्गीकृतः । तथा हि - मीमांसाशास्त्रे चतुर्थाध्याये द्वितीयपाद-स्थितमिदमधिकरणम्। अनेन च प्रत्ययार्थसंख्यायाः समानप्रत्ययोपात्तत्व-प्रत्यासत्त्या प्रत्ययार्थकरणत्वादिना क्रियायामन्वयः बोध्यते। तत्र हि इत्थं पूर्वपक्षः - "पशुना यजेत" इति श्रूयते। तत्र "पशुना" इति करणे तृतीया । प्रत्ययानां स्वप्रकृत्यर्थान्वितस्वार्थबोधकत्वव्युत्पत्त्या पशुप्रातिपदिकार्थपशुत्वादीनां यज-धात्वर्थक्रियायां करणत्वेन अन्वयं बोधयति इयं तृतीया। तथा च "पशुत्वकरणकः यागः" इत्यर्थः सिद्धः । पशुगतैकत्वादिकं तु न प्रातिपदिकार्थ इति तृतीयया अभिहितत्वेऽपि संख्याया यागे करणत्वेनान्वयः न संभवति तृतीयार्थकरणत्वस्य स्वप्रकृत्यर्थेनैवान्वयनियमात्। अतः सा संख्या अविवक्षितैवेति अनेकपशुकरण-कोऽपि यागः अनेन वाक्येन बोध्येत। तदित्थं पूर्वपक्षसूत्रम् - "तत्रैकत्वमयागाङ्गम् अर्थस्य गुणभूतत्वात्" (मी 4-1-5-11) । प्रत्ययार्थसंख्यायाः प्रकृत्यर्थ-विशेषणत्वात् अप्राधान्येन तस्या प्रत्ययार्थकरणत्वेन अन्वयो न भवति इति संख्यायाः यागकरणत्वं न सिद्ध्यति । अतः सा अविवक्षितैव स्यादिति ।

अत्रेदं सिद्धान्तसूत्रम् - "शब्दवत्तूपलभ्यते तदागमे हि दृश्यते तस्य ज्ञानं यथाऽन्येषाम्" (मी-4-1-5-15) इति।"पशुना यजेत" इति वाक्ये एकत्वं शब्दवत् तु - शब्दवाच्यं यथा तथा उपलभ्यते - ज्ञायते । पशुत्वादीनामर्थानां वाक्येऽस्मिन् यथा शब्दवाच्यत्वेन उपलब्धिः तथैवास्य एकत्वस्यापि । कुतः? एकवचनमिति

अन्वर्थसंज्ञावता प्रत्ययेन बोधनात्। कथं ज्ञायते प्रत्ययेनैकत्वं बोध्यत इति चेदुच्यते - "तदागमे हि तद् दृश्यते" । वाक्ये एकवचनसमवधाने हि एकत्वस्य प्रतीतिः। तदभावे एकत्वप्रतीत्यभावः इति अन्वयव्यतिरेकाभ्यां प्रतीयमानस्य तत्तदर्थत्वं निर्णीयते शास्त्रकारैः ।

8.1.5. तदागमे हि दृश्यते इत्यादिमूलव्याख्यासु भेदः, विमर्शश्च

"तदागमे हि" इत्यस्य तत्समवधानेनैव इत्यर्थः । यथा च पश्वादिशब्दसमवधाने पशुत्वाद्यर्थप्रतीतिः तथैकत्वस्यापीति यथा पशुत्वादीनां करणत्वेन क्रियान्वयः तथा एकत्वस्यापीत्यर्थः। तथा च तस्य एकत्वस्य ज्ञानं तद्वाचकवाच्यकरणत्वादि-तुल्यमेव, अर्थात् यादृशं प्राधान्यं प्रत्ययार्थत्वेन करणत्वस्य तादृशमेव प्राधान्यं समानप्रत्ययोपात्तैकत्वस्यापीत्यर्थः। तथा च तस्यैकत्वस्य समानप्रत्ययोपात्त-करणत्वद्वारा साक्षात् क्रियान्वयः। तथा च "पशुत्व-एकत्व-करणकः यागः" इति अरुणाधिकरणन्यायेन प्रकृत्यर्थानन्वितसंख्यायाः एव क्रियायां साक्षात् करणत्वेनै-वान्वयः। पश्चादेव पश्वादिभिः सम्बन्धः इति सिद्धान्तः । ततश्च एकत्वस्यापि साक्षाद्यागाङ्गत्वसिद्ध्या नानेकपशुकरणकः यागः इति तत्र सिद्धान्तितम्। सन्दर्भेऽस्मिन् एकत्वसंख्यायाः एकवचनप्रत्ययेन अभिधाने "तदागमे हि दृश्यते" इति अन्वयव्याप्तिः प्रमाणतया उपन्यस्ता। एवं च एकवचनस्य आगमे एकत्व-प्रतीतिं दृष्ट्वा यथा एकवचनस्य एकत्वबोधकत्वं निश्चीयते तथा "पचती"त्यादि-तिङन्तेष्वपि तिङ्प्रत्ययस्य आगमे हि भावनायाः प्रतीतिः इति प्रतीयमान-भावनायाः अन्वयव्यतिरेकाभ्यां तिङर्थत्वम् (आख्यातार्थत्वं) सिद्ध्यति । यदि च भावना प्रकृत्यर्थः स्यात् तर्हि पाचकादिकृदन्तेष्वपि सा प्रतीयेत परन्तु न तथा । सा केवलं तिङन्तेष्वेव प्रतीयते इति तस्याः आख्यातार्थत्वमेव सिद्ध्यति। वैयाकरणा अपि अन्वयव्यतिरेकाभ्यामेव शब्दार्थनिर्णयं कुर्वन्ति इति तैरपि आख्यातार्थत्वेन भावना स्वीकार्यैव । तदनुसारमेव "लः कर्मणी" (पा. 3-4-69) सूत्रार्थोऽपि वर्णनीयः इति आकूतम्। तदेतत्सर्वं मनसिकृत्य आह – **तदागमे हि दृश्यत इति न्यायविरुद्धत्वाच्चेति** । धातोः व्यापारार्थकत्वम् एतन्न्यायविरुद्धमिति अस्य तात्पर्यम्। प्रत्युत तस्य प्रत्ययार्थत्वमेव न्यायेनानेन सिद्ध्यति । एवं भावनायाः प्रत्ययार्थत्वे सिद्धे प्रत्ययार्थप्राधान्यनियमेन तस्याः प्राधान्यमपि सिद्ध्यति। भावनायाः प्रत्ययार्थत्वस्वीकारेण "प्रकृतिप्रत्ययार्थयोः प्रत्ययार्थस्य

प्राधान्यम्" इति न्यायस्य तिङन्तविषये सङ्कोचाकरणरूपं लाघवमपि इति तेषामभिसन्धिः। उक्तं च कुमारिलभट्टैः भावार्थाधिकरणे-

प्रत्ययार्थं सहब्रूतः प्रकृतिप्रत्ययौ सदा।
प्राधान्यात् भावना तत्र प्रत्ययार्थोऽवधार्यते॥
तथा क्रमवतोर्नित्यं प्रकृतिप्रत्ययार्थयोः।
प्रत्ययश्रुतिवेलायां भावनात्मावगम्यते ॥ इति ॥ (मी.2-1-1-1)

अत्र भावनायाः प्रत्ययार्थत्वसाधनाय प्रथमं प्रत्ययार्थप्राधान्यन्यायः प्रतिपादितः। अनन्तरं तदागमन्यायश्च। अत्रेयं जिज्ञासा। किम् प्रथमयुक्त्यामरुच्या द्वितीया युक्तिः प्रतिपादिता उत प्रथमयुक्त्या साधितस्यैवार्थस्य समर्थनायेति।

"प्रकृतिप्रत्ययौ इति न्यायस्य संख्यादौ व्यभिचारमाशङ्क्याह" इति **दर्पणस्य**, "प्रत्ययार्थसंख्यायाः स्त्रीत्वस्य च विशेषणतयैव भानदर्शनेन तन्नियमस्य प्रायिकत्व - दर्शनादाह" इति दर्पणानुसारि**प्रभायाः** "प्रत्ययार्थस्य प्राधान्यमिति नियमस्य तिङुपात्तसंख्यायाः तदुपात्तकर्तरि विशेषणतयान्वयात् संख्यादौ व्यभिचरितत्वादाह"इति **शाङ्कर्याश्च** पर्यालोचनेन प्रत्ययार्थप्राधान्यन्यायस्य कुत्रचिद् व्यभिचरितत्वात् न स न्यायोऽत्र साधक इति अस्यां युक्त्यामरुचेः द्वितीया युक्तिः तदागमे हि इत्यादिना प्रदर्श्यते इति एताः तिस्रः व्याख्याः विचिकित्सित-पक्षद्वये प्रथमं पक्षं समर्थयन्ति। अन्यास्तु अत्र अरुचिप्रदर्शनं न कृतवत्यः, न वा द्वयोः युक्त्योः सम्बन्धमपि स्पष्टं प्रतिपादितवत्यः।

तत्त्वदर्शिन्यां तु "एकत्वादीनां प्रत्ययार्थानां कुत्रचिद्विशेषणत्वेऽपि न प्रत्ययार्थप्राधान्यन्यायस्य व्यभिचारः।न्याये "प्रत्ययार्थस्य प्राधान्यम्" इत्यत्रैक-वचनेन प्रकृत्यर्थापेक्षया प्रत्ययार्थस्य तदर्थत्वसामानाधिकरण्येन प्राधान्यं बोध्यते न तदवच्छेदेन। तेन सुबर्थलिङ्गसंख्यादेः प्रकृत्यर्थविशेषणत्वेऽपि न क्षतिः।" इति लिङ्गसंख्यादीनां विशेषणत्वेऽपि न्यायस्य न व्यभिचार इति निरूपितम्। यदा प्रत्ययोऽनेकार्थः तदा कश्चन प्रत्ययार्थः प्रकृत्यर्थविशेष्योऽवश्यं भवेत्, अन्येषामर्थानां प्रकृत्यर्थविशेषणत्वेऽपि न क्षतिः। यतः सर्वेषां प्रत्ययार्थानां प्रकृत्यर्थनिरूपितविशेष्यत्वस्योपपादयितुमशक्यत्वात् इति तेषामभिप्रायः।अतश्च सुप्सु कारकरूपप्रत्ययार्थस्य प्राधान्यात् अन्ययोः लिङ्गसंख्ययोः प्रकृत्यर्थ-विशेषणत्वेऽपि न क्षतिः यतः सर्वेषां प्रत्ययार्थनां प्रकृत्यर्थनिरूपित-

विशेष्यत्वस्योपपादयितुमशक्यत्वात् इति तेषामभिप्रायः। अतश्च पूर्वोक्ता-रुचिप्रदर्शनं न युक्तम्" इत्युक्त्वा तैरेव "वस्तुतः मीमांसकानां मते न कुत्रापि प्रत्ययार्थलिङ्गसंख्यादेः प्रकृत्यर्थे अन्वयः, किन्तु समानाभिधानश्रुत्या लिङ्ग-संख्यादेः प्रत्ययार्थे एवान्वयः इति साक्षात् प्रत्ययार्थद्वारा भावनायामेवान्वयः प्रकृत्यर्थसम्बन्धस्तु पार्ष्ठिकः" इत्यप्युपपादितम्। **दर्पणकारेणापि** –"शब्दवत्तूप-लभ्यते तदागमे हि दृश्यते तस्य ज्ञानं यथाऽन्येषाम्" (मी-4-2-25) इति सूत्रविवरणसन्दर्भे "तदागमे हि तद् दृश्यते" इति पाठान्तरस्य व्याख्यायां "यद्वा तद् - एकत्वम्, आगमे – एकवचनविधायकागमे - "द्व्येकयोः द्विवचनैकवचने" (पा.1-4-22) इत्यत्र, दृश्यते - एकवचनरूपप्रत्ययार्थत्वेन प्रतीयते, यथा अन्येषाम् - करणत्वादीनामिव। एवञ्च समानप्रत्ययोपात्तत्वप्रत्यासत्त्या विभक्त्यर्थ-करणत्वान्वितस्य एकत्वस्य अरुणाधिकरणन्यायेन प्रथमं क्रियायामन्वयः पश्चात् प्रकृत्यर्थे। तथा च "पश्वेकत्वोभयकरणको याग" इति बोधेन एकत्वस्य यागाङ्गत्वा-वगमात् नानेकपशुभिर्याग इति भावः। प्राधान्यं च प्रत्ययार्थस्य प्रकृत्यर्था-विशेषणत्वमेव" इति व्याख्यां कुर्वता संख्यारूपप्रत्ययार्थस्य प्राधान्यं प्रकृत्यर्था-विशेषणत्वं च प्रतिपादितम्। अतः पूर्वोक्ते न्यायस्य व्यभिचारप्रदर्शनपरे स्वग्रन्थे तस्य नैर्भर्यं नास्तीति ज्ञायते। ततश्च युक्तिद्वयं भावनायाः प्रत्ययार्थत्वसाधकमेव, तत्र कस्यामप्यरुचिर्नास्तीत्येव दर्पणकारस्य हृदयम्। **तत्त्वदर्शिन्यां** तु पूर्वं प्रदर्शितया रीत्या दर्पणादिस्थस्य अरुचिप्रदर्शनग्रन्थस्य खण्डनं विधाय अन्येन प्रकारेण इत्थमरुचिः प्रदर्शिता - ननु "भावप्रधानमाख्यातम्" इति विशेषस्मृत्य-नुरोधेन "प्रत्ययार्थः प्रधानम्" इति सामान्यश्रुतेः सुबर्थविषयकत्वमेवोचितम्। न चाख्यातपदेन तिङ्प्रत्ययस्यैव अभिधानात् विशेषस्मृतिरपि अस्मत्(मीमांसक)-पक्षमेवोपोद्बलयतीति वाच्यम्। आख्यातपदेन धातुरेवाभिधीयत इति प्राक् प्रति-पादनात्। भवदुक्तरीत्या प्रत्ययार्थः प्रधानमित्यनेनैव तिङर्थप्राधान्यावगमसम्भवेन भावप्रधानमित्यस्य वैयर्थ्यापत्तेश्चेत्यतो भावनायाः धातुवाच्यत्वे दोषान्तरमाह - इति। अयमपि ग्रन्थः न हृदयङ्गमः। मीमांसकैः अन्यशास्त्रीयसिद्धान्ताः स्वशास्त्र-विरुद्धाः निश्शङ्कं तिरस्क्रियन्त इति , निरुक्तवचनेन सह यदि स्वमतविरोधः तर्हि सोऽपि त्यक्तव्य एवेति तद्विरोधस्तेषामकिञ्चित्करः। किञ्चात्राख्यातपदस्य तिङ्परत्वे इदं वचनमेव व्यर्थमित्यपि न युक्तम्। आख्यातार्थेषु कालसंख्या-

भावनासु भावनाप्राधान्यबोधस्यावश्यकत्वात्। प्रत्ययार्थप्राधान्यन्यायस्तु कस्यचित्प्रत्ययार्थस्य प्राधान्यं बोधयति। अत्र तु अनेके प्रत्ययार्थाः। अतः कस्य प्राधान्यमिति सन्देहे तन्निवर्तकत्वेन वचनस्य चारितार्थ्यमेव, न वैयर्थ्यम्। वस्तुतः सिद्धान्ते तत्रत्याख्यातपदस्य तिङन्तार्थकत्वेन तत्र भावनामुख्यत्वबोधनं न मीमांसकमतविरुद्धम्। अतः एवमरुचिप्रदर्शनमपि न युक्तम्।

अत्रेयं वस्तुस्थितिः। यद्यपि तिङन्ते भावना प्राधान्येन बुद्ध्यते तथापि तावन्मात्रेण तस्य प्रत्ययार्थत्वं न सिद्ध्यति, आक्षिप्तव्यक्त्यादीनामपि प्राधान्यस्य बुध्यमानत्वात्। अतश्च यावत् भावना प्रत्ययार्थत्वेन न साध्यते तावदनेन न्यायेन तस्याः प्राधान्यं निरूपयितुमशक्यम्। अतश्च एवं मीमांसकः पर्यनुयुङ्क्ते - "तिङन्ते भावनायाः प्राधान्यमनुभूयते। तच्च प्राधान्यं तस्याः प्रत्ययार्थत्वेन "प्रत्ययार्थः प्रधानमि" ति न्यायात्। भावनायाः प्रत्ययार्थत्वं कथमिति चेत् "तदागमे हि दृश्यत" इति न्यायेन। तथा च अन्वयव्यतिरेकाभ्यां भावनायाः प्रत्ययार्थत्वे सिद्धे तस्याः प्राधान्यं प्रत्ययार्थत्वेन स्वतः सिद्धम्। ततश्च प्रत्ययार्थप्राधान्यन्यायस्य तिङन्तविषये सङ्कोचोऽपि नापेक्षितः। यदि च भावना प्रत्ययार्थत्वेन नाङ्गीक्रियेत तर्हि न्यायद्वयविरोधः आपद्येत" इति। एवञ्च न्यायद्वयविरोधरूपदोषद्वयं भावनायाः प्रत्ययार्थत्वानङ्गीकर्तृमते। भावनायाः प्रत्ययार्थत्वप्राधान्ययोस्साधनाय तु न्यायद्वयमपि मिलित्वैव युक्तिभूतम्। एतच्चानेन "तस्मात्करोति"(वै.सि.का.8) इति कारिकाव्याख्यान्तर्गतमीमांसकमतप्रदर्शनपरभूषणग्रन्थेन स्पष्टं भवति - "अत्र मीमांसकाः। आख्यातवाच्यैव भावना। भावनार्थककरोतिना विवरणात्। यत्तूक्तं धातोरेवैतद्विवरणमिति तन्न। विनिगमकाभावात्। अस्मन्मते व्यापारविशेष्यकबोधानुपपत्तिरेव मानम्। "प्रकृतिप्रत्ययौ सहार्थं ब्रूतः तयोः प्रत्ययार्थः प्रधानम्" इति प्रत्ययार्थप्राधान्यस्य अन्यत्र क्लृप्तत्वात्। "तदागमे हि दृश्यत" इति न्यायेनाख्यातावाच्यत्वपरिच्छेदाच्च। तदुक्तं भावार्थाधिकरणे (मी.2-1-1)भट्टपादैः-

प्रत्ययार्थं सहब्रूतः प्रकृतिप्रत्ययौ सदा ।
प्राधान्यात् भावना तेन प्रत्ययार्थोऽवधार्यते ॥
तथा क्रमवतोर्नित्यं प्रकृतिप्रत्ययांशयोः ।
प्रत्ययश्रुतिवेलायां भावनात्मागम्यते ॥ इति ।(मी. 2.1.1.1)

न चायमुत्सर्गः प्रकृते नादरणीयः बाधकाभावेन त्यागायोगात्। तदुक्तं-

धात्वर्थस्य प्रधानत्वं न तावदिहजन्मनि ।
औत्सर्गिको न च न्यायो मत्पक्षे हि निवर्त्स्यति ॥ (मी.3-4-4-12)

इत्यादि॥ एवं भावनायाः प्रत्ययार्थत्वं, प्रत्ययार्थत्वेन च तस्याः प्राधान्यं च प्रतिपाद्य मते चास्मिन् सकर्मकत्वाकर्मकत्वव्यवस्थापि सूपपादेति निरूपयति एवञ्चेत्यादिना। ये च प्राभाकरनैयायिकादयः तिङन्ते धातुना वा प्रत्ययेन वा भावनायाः प्रतीतिं नाभ्युपगच्छन्ति तेषां मते "फलव्यधिकरणव्यापारवाचित्वरूपस्य, व्यापारव्यधिकरणफलवाचकत्वरूपस्य वा" सकर्मकत्वस्योपपादयितुमशक्यत्वेऽपि भावनां प्रत्ययार्थत्वेनाङ्गीकुर्वाणानाम् अस्माकं मते तच्छक्यमेव। तच्चेत्थम्- स्वयुक्ताख्यातार्थव्यापारव्यधिकरणफलवाचकत्वं सकर्मकत्वम्, आख्यातार्थव्यापाराश्रयत्वं च कर्तृत्वम्। स्वं - प्रकृतधातुः, स्वयुक्ताख्यातं - तिङ्प्रत्ययः, तदर्थो यो व्यापारः तद्व्यधिकरणफलवाचकत्वं धातोरिति धातोः सकर्मकत्वं सिद्ध्यति। यथा स्वशब्देन पचधातुः स्वीकृतश्चेत् स्वं - पचधातुः, स्वयुक्ताख्यातं- पचतीत्यत्र तिङ्प्रत्ययः, तदर्थो यो व्यापारः अधिश्रयणादिरूपः देवदत्तादिकर्तृनिष्ठः, तद्व्यधिकरणफलम् - ओदननिष्ठा विक्लित्तिः, तद्वाचकत्वात् पचिः सकर्मकः। एवं सकर्मकलक्षणे सिद्धे स्वयुक्ताख्यातार्थव्यापारसमानाधिकरणफलवाचकत्वरूपमकर्मकत्वमपि सिद्ध्यति। अत्र योगश्च स्वाव्यवहितोत्तरत्वसम्बन्धेन। लक्षणे स्वयुक्तेतिविशेषणाभावे यत्किंचिदाख्यातार्थव्यापारवैयधिकरण्यमाश्रित्य अकर्मकाणां भ्वादीनामपि सकर्मकत्वापत्तिः। पचतीति पचधातुसमभिव्याहृताख्यातार्थव्यापारः अधिश्रयणादिः, तद्व्यधिकरणसत्तादिरूपफलवाचकत्वं भ्वादीनामिति अकर्मकेष्वतिव्याप्तिः। अतः स्वयुक्तेति। स्वयोगश्चाख्यातस्य यथाकथंचित् स्वीकृतश्चेत् पुनः "पचति भवती" त्यादिवाक्यान्तर्गतपचधातूत्तराख्यातयोगः भूधातोरप्यागत इति पुनः भूधातोः सकर्मकत्वापत्तिः। अतः स्वोत्तरत्वं विवक्षणीयम्। पचतीत्यस्य तिङः भूधातूत्तरत्वाभावात् न दोषः। एवमपि "स्नात्वा पचती" त्यादिवाक्यान्तर्गतस्नाधातोः सकर्मकत्वापत्तिः। पचधातूत्तराख्यातस्यापि स्नाधातूत्तरत्वेन स्वीकर्तुं शक्यत्वात्। अतः अव्यवहितोत्तरत्वं विवक्षणीयम्। तथा च स्वाव्यवहितोत्तरत्वसम्बन्धेन स्वयुक्तं यदाख्यातम् इत्युक्ते "पचति भवती"त्यत्र भूधातूत्तरः तिङेव भवति न पचधातूत्तरस्तिङिति तदर्थ-

8.1. भाट्टमतखण्डनम्

तस्मात्करोतिर्धातोः स्याद् व्याख्यानं न त्वसौ तिङाम्।

पक्ववान् कृतवान् पाकं किं कृतं पक्वमित्यपि ॥ 8 ॥

तस्मात् - अभिप्रायस्थहेतोः। स चेत्थम्। फलमात्रस्य धात्वर्थत्वे "ग्रामो गमनवान्" इति प्रतीत्यापत्तिः संयोगाऽश्रयत्वात्। फलानुत्पाददशायां व्यापारसत्त्वे "पाको भवति" इत्यनापत्तिः, व्यापारविगमे फलसत्त्वे "पाको विद्यते" इत्यापत्तिश्च।

व्यापारव्यधिकरणफलवाचकत्वमाश्रित्य न भवतेः सकर्मकत्वम्। "स्नात्वा पचती"त्यत्र पचधातूत्तरतिङः स्नाधातूत्तरत्वेऽपि अव्यवहितोत्तरत्वाभावात् न तं तिङमाश्रित्य सकर्मकत्वं वक्तुं शक्यमिति न तत्रापि दोषः इत्यादि विस्तरेण **काशिकायां** प्रपञ्चितं तत्रैव द्रष्टव्यम्। **कर्तृत्वमिति**। यथा " देवदत्तः पचती" त्यादौ आख्यातार्थाधिश्रयणादिव्यापाराश्रयत्वात् देवदत्तादेः कर्तृत्वं, तथा "चैत्रो मैत्रेण पाचयती"ति णिजन्तस्थले प्रयोज्यप्रयोजकयोः णिजर्थाख्यातार्थव्यापाराश्रयत्वात् कर्तृत्वं, "देवदत्तेन पच्यते, देवदत्तेन स्थीयते" इत्यत्रापि आख्यातार्थव्यापारा-श्रयत्वात् कर्तृत्वमिति॥।**इत्यादीति**॥ एवं स्वयुक्ताख्यातार्थव्यापारजन्यस्वार्थ-फलाश्रयत्वं कर्मत्वं स्वयुक्ताख्यातार्थव्यापारसमानाधिकरणफलवाचकत्वम् अकर्मकत्वमित्यादि आदिपदात् ऊह्यम्।

मीमांसकम्मन्यमिति। मीमांसकमात्मानं मन्यत इति "आत्ममाने खश्च"(पा. 3-2-83) इति खश्। अनेनास्य मण्डनानुयायिनः प्रस्तोतुः भावनामुख्यविशेष्यको बोध अभिप्रेत इति सूच्यत इति **काशिका**। "अत्र प्रयुक्तः मीमांसकम्मन्यशब्दः निन्दापरः।मीमांसकमतं सम्यगज्ञात्वैव अयं प्रवृत्त इति स्फोरणाय। मीमांसकास्तु धातोः फलव्यापारोभयार्थकत्वमेव स्वीकुर्वन्ति। एतदज्ञात्वा धातोः केवलफल-वाचकत्वमयं प्रस्तौतीति अयं "मीमांसकम्मन्य" इति" **कान्त्यां**, "धातुप्रकृतिका-ख्यातसमागमे उक्तयुक्त्या यथाकथञ्चित् तथोक्तावपि (सकर्मकत्वप्रतिपादनेऽपि) तत्प्रकृतिककृत्प्रत्ययसमभिव्याहारेऽपि सकर्मकत्वादिव्यवहारो दृश्यते। तस्य तेनानुपपादनात् मन्यतेः प्रयोगः (अधिक्षेपार्थः) " इति **परीक्षायां** च व्याख्यातम्। अनयोः द्वयोर्मध्ये **परीक्षा**व्याख्यैव समुचिता। प्राचीनाः मण्डनमिश्रादयः धातोः फलव्यापारोभयार्थकत्वं नाङ्गीकुर्वन्त्येव।ते तु मीमांसकेषु सम्मान्या एवेति अधिक्षेपानर्हा एव।अतः पक्षे न्यूनताप्रदर्शनमेव सम्यक्।

8.1.1. अभिप्रायस्थहेतुप्रदर्शनम् , विमर्शश्च

एवं निरसनीयं मण्डनमिश्रानुयायिनां मतमुपक्षिप्य तत्खण्डनमारभते –**तस्मादि**-त्यादिना। ननु तस्मात् इत्यस्य उक्तयुक्तेरित्यर्थविवरणं कर्तव्यम्। पूर्वं युक्तेरेवा-प्रदर्शनात्"तस्मात्" इति पदेन निगमनमसङ्गतम्, पूर्वप्रकान्तस्यैव निगमन-सम्भवात् इति चेत् आह - **अभिप्रायस्थहेतोः** इति। अत्रत्यतस्मादित्यस्य उक्त-युक्तेरिति नार्थः। किन्तु तच्छब्दस्य बुद्धिस्थपरामर्शकत्वात् बुद्धिस्थात् प्रकाश्यमानाच्च हेतोरित्यर्थः। अयं च **भूषणे** मण्डनमिश्रानुयायिनस्तु इत्यारभ्य एतत्कारिकावतरणग्रन्थरूपेण स्पष्टमभिहितम्। तत्रैव खण्डनयुक्तय अपि प्रदर्शिताः।

निरसनीयं हीदं मण्डनमिश्रानुयायिमतं युक्तित्रयमाधारीकृत्य प्रस्तुतम्। तच्च -

1) पचति - पाकं करोतीति विवरणम्। तत्र पचतीत्यत्रास्त्यंशद्वयम् धातुः आख्यातं च। पाकं करोतीति विवरणवाक्येऽस्ति पदद्वयम्। तथा च इदं पदद्वयं यथाक्रमं धात्वाख्यातार्थबोधकमिति।

2) "प्रकृतिप्रत्ययार्थयोः प्रत्ययार्थः प्रधानमि"ति न्यायः। तेन न्यायेन अवगते प्रत्ययार्थे तस्य विशेष्यत्वम् , अनवगते च प्रत्ययार्थे पदार्थमुख्यविशेष्यस्य प्रत्ययार्थत्वेन निर्धारणमिति।

3) " तदागमे हि दृश्यते" इति न्यायेन अन्वयव्यतिरेकाभ्यामर्थनिर्णये भावनायाः आख्यातार्थत्वं सिद्धमिति।

एवमाभिस्त्रिभिर्युक्तिभिः फलमात्रं धात्वर्थः व्यापारः (भावना) तिङ्प्रत्ययार्थ इति मीमांसकानां मण्डनमिश्रानुयायिनामभिसन्धिः। तत्रादौ धातोः केवलफल-वाचकत्वे दोषः प्रदर्श्यते - **तस्मादित्यनेन**। अभिप्रायस्थो हेतुश्चायम्। यदि च धातुः केवलफलवाची तर्हि धातोः भावे कृति निष्पन्नानां भावकृदन्तानां फलमात्र-वाचित्वं वक्तव्यम्। तथा च "पाक" इति भावघञन्तस्य विक्लित्तिरूपं फलं "गमनमि"ति भावल्युडन्तस्य संयोगरूपं फलं च अर्थः इति स्वीकरणीयम्। तथा सति गमनसंयोगयोः पर्यायता सिद्धेति यथा "ग्रामः संयोगवान्" इति प्रयोगः तथा तस्मिन्नेवार्थे "ग्रामः गमनवान्" इति प्रयोगापत्तिः। न चैवं लोकव्यवहारो दृश्यते। प्रत्युत "देवदत्तो गमनवान्" इति प्रयोगः दृश्यते। देवदत्तस्तु संयोगानुकूल-व्यापाराश्रय इति सर्वानुभवसिद्धम्। अतश्च गमनादिभावकृदन्तानां व्यापारार्थ-

कत्वमेवावश्यं स्वीकार्यम्। अत्र भावनां बोधयितुं तिङ्नास्तीति उक्तमीमांसकमते अत्र व्यापारबोध एव अशक्यः। एवं "संयोगो न स्पन्द" इति वत् "गमनं न स्पन्द" इत्यपि प्रयोगापत्तिः। "ननु फलव्यापारयोः पृथक्धातुशक्यत्ववादिनामपि स्यादेवायं दोषः, धात्वर्थफलवत्त्वेन ग्रामस्य विवक्षासम्भवात् इति चेन्न। फलव्यापारयोः धात्वर्थत्वमते साक्षात् मत्वर्थस्य आश्रयस्य फलेन सह अन्वयो न भवति किन्तु धात्वर्थव्यापारेणैव। यदि च फलस्यैव तथान्वयविवक्षा स्यात् तर्हि व्यापाररूपोऽर्थः अनन्वितः स्यात्। व्यापारस्य फले विशेषणतया अन्वयस्त्वत्र न शङ्क्यः। तादृशान्वये कर्मप्रत्ययसमभिव्याहारस्य तन्त्रत्वात्। ततश्च कर्मप्रत्ययातिरिक्तप्रत्ययसमभिव्याहारे फलविशेषणकव्यापारबोधस्यैव क्लृप्तत्वेन फलान्वितव्यापाररूपधात्वर्थस्यैव आश्रयेण मत्वर्थेन सह अन्वयात् व्यापाराश्रयो देवदत्तादिरेव "गमनवान्" इत्यादिपदबोध्यो भवति न तु ग्रामादिः। ननु फलव्यापारयोः धात्वर्थत्ववादिनां वैयाकरणानां मतेऽप्ययं दोषोऽस्त्येव। कर्मणः कर्तृत्वविवक्षायां (कर्मकर्तरि प्रयोगे) कर्मगतव्यापारस्य अर्थात् फलस्यैव धात्वर्थतया "ग्रामो गमनवानि"ति प्रयोगः स्यादेव इति चेन्न। देवदत्तादीनां कर्तृत्वेऽपि सामान्यकर्तरिप्रयोगेऽपि तथा प्रयोगापत्तिरित्याशयात्। अथवा फलमात्रार्थकात् तत्समानव्यापारार्थकाच्च धातोः भावप्रत्यय एव न, अनभिधानात्" इति **काशिका**। एवं "गमनजन्यसंयोगाश्रयो ग्राम" इति प्रयोगानुपपत्तिः। गमनपदस्य संयोगार्थकत्वेन संयोगस्य संयोगजन्यत्वाभावात् इति **तत्त्वदर्शिनी**। एतत्सर्वं मनसिकृत्याह - **ग्रामो गमनवानिति**। एवं गमनशब्दस्य केवलफलवाचकत्वे दोषमुक्त्वा "पाक" शब्दस्यापि केवलफलवाचकत्वे दोषमुद्भावयति - **फलानुत्पादेति**। धातोः व्यापारावाचकत्वपक्षे पाकादिपदार्थः विक्लित्त्यादिफलमेवेति तस्य अनुत्पत्तिदशायां अर्थात् अधिश्रयणादिदशायां "पाको भवती"ति प्रयोगानुपपत्तिः, तथा व्यापारविगमे - व्यापारस्य नाशे, अर्थात् फलोत्पादात् परमतीते व्यापारे फलस्य सत्त्वात् "पाको विद्यते" इति प्रयोगश्च स्यात्। व्यापारस्याभावेऽपि फलकर्तृकसत्तायाः वर्तमानत्वात्। तथा फलानुत्पाददशायां व्यापारे सति "पाको भविष्यती"त्याद्यापत्तयः स्वयमूह्याः। ननु पूर्वोक्तसन्दर्भे फलानुत्पाददशायां "पचती"त्यपि प्रयोगो न स्यादिति चेन्न। तत्र तिङा

व्यापारस्याभिधानात् लडर्थवर्तमानत्वस्य प्रधानीभूतव्यापारे एवान्वयात्। अतः तिङन्तेषु न दोषः। अपि तु कृदन्तेष्वेवेति कृदन्तेषु दोषप्रदर्शनं कृतम्।

"अत्रेदमवधेयम्। व्यापारस्यावश्यं धातुवाच्यत्वमङ्गीकरणीयमिति प्रतिपादने हेतुवचनं तस्मादिति। तस्य पूर्वं प्रक्रान्तत्वाभावात् "अभिप्रायस्थहेतोः" इति व्याख्या कृता सारकृता। अनेन पूर्वमुक्तः कोऽपि अत्र हेतुत्वेन विनियोक्तुं न शक्य इति मन्येरन्। वस्तुतः न तथा। पूर्वोक्तहेत्वपेक्षया नूतनां प्रधानां च युक्तिं प्रतिपादयितुमेव सारकृता तथा व्याख्यातम्। विचार्यमाणे यः दोषः प्राभाकराणां मते उपक्षिप्तः सः मण्डनमिश्रानुयायिनां मतेऽपि स्यादेव। तथा हि - "कर्मवत्स्याद्यगाद्यपि। कर्मकर्तर्यन्यथा तु न भवेत्तद्दृशेरिव " इति पूर्वकारिकया कर्मकर्तरि यगाद्यनापत्तिरूपः दोषः यः उक्तः सोऽत्र तस्मादित्यनेन स्वीकर्तुं शक्य एव। प्राभारकरमते इव मण्डनमिश्रमतेऽपि कृञः कर्मस्थक्रियकत्वाभावेन "क्रियते घटः स्वयमेवे"त्यादौ यगाद्यनापत्तेः "ज्ञायते घटः स्वयमेवे"त्यापत्तेश्च। अत एव भूषणे मण्डनमिश्रमतखण्डनावसरे एवायं दोष उक्त" इति **तत्त्वदर्शिनी**। युक्तमप्येतत्। **भूषणे** अस्याः कारिकायाः अवतरणे "मण्डनमिश्रानुयायिनस्तु" इत्यारभ्य "इत्याहु"रिति पर्यन्तं मण्डनमतं प्रदर्श्य, "तन्ने"ति तस्य खण्डने प्रथमा युक्तिरियमेव इत्थं प्रदर्शिता – "क्रियते घटः स्वयमेवानापत्तेः, ज्ञायते घटः स्वयमेवेत्यापत्तेर्वा" इति।

एवं स्वमते प्रसक्तदोषवारणार्थं मीमांसकाः भावप्रत्ययान्तेषु व्यापारस्यापि बोधमङ्गीकुर्वन्ति। तत्र "भावे" (पा. 3-3-18) इति पाणिनीयं सूत्रं प्रमाणयन्ति। अत्रत्यः भावशब्दः न धात्वर्थपरः, किन्तु भावं - भावनां - व्यापारं बोधयतीति तेषामभिसन्धिः। ततश्च भावप्रत्ययान्तेषु प्रत्ययार्थत्वेन भावनायाः प्रतीतेः तस्या एव विशेष्यत्वं प्रत्ययार्थ -प्रधानन्यायेन सिद्ध्यति। तथा च "पाकः, गमनम्" इत्यादिभावप्रत्ययान्तेषु व्यापारस्यैव मुख्यत्वात् फलस्य तस्मिन्विशेषणत्वाच्च न तेषां विक्लित्तिसंयोगादि -केवलफलवाचकत्वमपि तु तदनुकूलव्यापारवाचित्वमेव। पक्षेऽस्मिन्धातुः फलबोधक एव। भावप्रत्ययस्तु तदनुकूलव्यापारबोधकः। प्रत्ययार्थस्य प्राधान्यात् व्यापारस्यैव प्राधान्यम्। तथा च भावविहितल्युडर्थव्यापारस्य गमनानुकूलस्य ग्रामादावभावात् न ग्रामो गमनवानित्यापत्तिः, पाक इति घञन्ते विक्लित्त्यनुकूलव्यापारस्य घञ्प्रत्ययार्थतया प्रधानस्य तस्यैव

8.2. घञादेः अनुकूलव्यापारवाचित्वखण्डनम्

यत्तु भावप्रत्ययस्य घञादेरनुकूलव्यापारवाचकत्वान्नानुपपत्तिरिति, तन्न। कर्त्राख्यातवत् "कर्तरि कृत्"(पा.3-4-67) इत्यत एव तद्विधानलाभे भावे विधायकानुशासनवैयर्थ्यापत्तेः, तद्विरोधापत्ते[1]श्च।

भवनकर्तृत्वेनान्वयात् न फलानुत्पाददशायां व्यापारसत्त्वे "पाको विद्यते" इत्यनापत्तिः। न वा व्यापारविगमे "पाको विद्यते" इत्यापत्तिः। एवं "गमनं न स्पन्द" इति प्रयोगोऽपि न। तथा "गमनजन्यसंयोगाश्रयो ग्राम" इत्यस्योपपत्तिश्चेति "फलं धात्वर्थः भावना भावप्रत्ययार्थ" इति स्वीकारेण सर्वमुपपद्यत इत्याह - **यत्त्विति। नानुपपत्तिरिति।** उक्तदोषाणां निरसनेन तन्मतानुपपत्तिर्नेति भावः। तदेतत् खण्डयति - **तन्नेति। कर्त्राख्यातेति॥** अत्र **दर्पणः** - अयं भावः - "लः कर्मणि च भावे चाकर्मकेभ्यः" (पा. 3-4-69) इति सूत्रेण लकाराः कर्तरि कर्मणि भावे च विधीयन्ते। अत्र "कर्तरि कृत्" (पा. 3-4-67) इति सूत्रात् कर्तरि इति पदमनुवर्तते। मीमांसकाः नैयायिकाश्च अत्रत्यकर्तृकर्मपदयोः आकृत्यधिकरणन्यायेन धर्मपरत्वमाश्रित्य कर्तृत्वं कर्मत्वं च लकारार्थ इति सूत्रार्थं वर्णयन्ति। कर्तृत्वं च क्रिया(व्यापारः), मीमांसकमते भावना, नैयायिकमते च कृतिः, यतः व्यापाराश्रयत्वस्य कृत्याश्रयत्वस्य च कर्तृत्वात्। ततश्च आख्यातार्थतया भावनायाः कृतेश्च लाभ इति तेषामाशयः। एतत्सूत्रस्थं कर्तृपदं तु "कर्तरि कृत्" (पा. 3-4-67) इति सूत्रात् अनुवृत्त्या लब्धम्। तस्यैव धर्मपरत्वं व्यापारपरत्वं तैः स्वीकृतम्। तथा चेत् अर्थाधिकारानुरोधात् "कर्तरि कृत्"(पा. 3-4-67) इति सूत्रेऽपि तस्य कर्तृपदस्य धर्मपरतैवोचितेति तेन सूत्रेण सर्वेषां कृतां भावनावाचित्वं सिद्धम्। तस्य सूत्रस्य सर्वेषु कृत्सु सम्बन्धात्। ततश्च भावविहितघञादीनामपि अनेनैव सूत्रेण व्यापारार्थकत्वं सिद्ध्यति इति "भावे"(पा 3-3-18) इति पुनः व्यापारार्थकत्वकथनं व्यर्थं स्यात्। अतश्च तैः "भावे"(पा. 3-3-18) इत्यस्य तथा व्याख्या कर्तुं न शक्या। ननु "कर्तरि कृत्" (पा 3-4-67) इत्यत्र कर्तृपदस्य धर्मपरत्वे पाचकादिषु भावनाविशेष्यक एव बोधः स्यात्, इष्यते च

---

[1]"वैयर्थ्यापत्त्या तद्विरोधापत्तेश्च" इति कृष्णमित्रसम्मतः पाठः।"तद्भाष्यविरोधापत्तेश्च" इति कान्तिकाशिकासम्मतः पाठः। काशिकापाठ एव युक्त इतिशाङ्करी।

कर्तृविशेष्यकबोधः "पाचको देवदत्त" इति सामानाधिकरण्यानुरोधात् इति चेत्- तर्हि तत्र कर्तरीत्यस्य आवृत्तिर्भवतु। एकं कर्तृपदं धर्मबोधकमन्यच्च धर्मि- बोधकमिति उभयं तेनैव सिद्ध्यति। अथवास्तु भावनया कर्तुराक्षेपः तिङ्क्षिव, निरूढलक्ष्यत्वं वा कर्तुः। ततश्चैवं सति "भावे"(पा. 3-3-18) इति सूत्रस्य वैयर्थ्यमेव स्यात्।"इति। ॥**तद्विरोधापत्तेश्चेति**॥ भावे विधायकानुशासन- वैयर्थ्यापत्तेः हेतोः "भावे" (पा. 3-3-18) इत्यनुशासनविरोधापत्तिरित्यर्थः। अथवा तद्विरोधापत्तेश्चेत्यस्य तदीय(मीमांसक)सिद्धान्तविरोधापत्तिरित्यर्थः।भाव- विहितप्रत्ययानां धात्वर्थानुवादकत्वात् प्रयोगसाधुतामात्रार्थकत्वमिति तदीय- सिद्धान्तः।तस्य विरोधापत्तिः इत्यर्थः। "चो हेतौ।यतो वैयर्थ्यमतस्तद्विरोधापत्ति- रित्यर्थः। उक्तिवैचित्र्यमेतत्। यद्वा भावविहितप्रत्ययानां धात्वर्थानुवादकत्वात् प्रयोगसाधुतामात्रार्थकत्वमिति त्वदीयसिद्धान्तविरोधापत्तेरित्यर्थः" इति **दर्पणः**। **परीक्षा**चात्र दर्पणमनुसरति। **कृष्णमित्रो**ऽपि अस्य ग्रन्थस्य अमुमेवाशयं प्रकाशयति। परन्तु अत्र "वैयर्थ्यापत्त्या तद्विरोधापत्तेश्च" इति पाठभेदमङ्गीकरोति। तेन हि वैयर्थ्यापत्त्या इति प्रतीकमुपादाय "अत एव तद्विरोध" इति व्याख्यातम्। **कान्तिकाशिके** अत्र "तद्भाष्यविरोधापत्तेश्च" इति पाठान्तरं स्वीकृत्य "भावे" (पा. 3-3-18) इति सूत्रभाष्यविरोधं प्रदर्शयतः। तत्र **कान्त्यां** - "तद्भाष्य- विरोधापत्तेश्चेति। धातोः फलवाचकत्वमिति वदतस्तव मते तिङामिव घञादीना- मपि साध्यावस्थापन्नभावनाबोधकत्वेन साध्यावस्थापन्नधात्वर्थभावापेक्षया घञादे- रतिरिक्तसिद्धावस्थापन्नभावार्थबोधकेन "सिद्धावस्थापन्ने धात्वर्थे घञि"ति भाष्येण विरोधश्चेत्यर्थः। अत एव "अकर्तरि च कारके"(पा. 3-3-19) इति सूत्रे भाष्ये "कारकग्रहणं किमर्थमि"ति प्रश्ने "अनिर्दिष्टार्थत्वात् स्वार्थे मा भूत्,स्वार्थश्च धात्वर्थः" इत्यभिधाय "भावे" (पा. 3-3-18) इत्यत्र तु सिद्धावस्थापन्नो धात्वर्थो निर्दिष्ट इति न तेन सिद्धि"रिति कारकग्रहणं कर्तव्यमित्युक्त्वा, अकर्तरीति पर्युदासेन तल्लाभेन तत्प्रत्याख्यातम्।" इति सरलः स्पष्टश्चायं ग्रन्थः विवरणं नापेक्षते इति यथावदत्र योजितः। **काशिकायामपि** पूर्वोक्तकान्तिग्रन्थस्येव आशयः प्रथममित्थं निरूपितः- घञादेरप्यसत्त्वभूतकारकान्वययोग्यव्यापारार्थकत्वे "भावे" (पा. 3-3-18) इति सूत्रभाष्यविरोधापत्तेरित्यर्थः। तत्र हि सत्त्वभूतभावो घञादेरर्थ इति प्रतिपादितमित्यग्रे वक्ष्यते" इति। अनन्तरं पुनः इत्थमाशङ्क्य समाहितं यच्च

अथ व्यापारोऽपि धात्वर्थ इत्यभ्युपेयमिति चेत् तर्हि धातुत एव सकलव्यापारलाभसम्भवेनाऽऽख्यातस्य पृथक्शक्तिकल्पने गौरवमिति।

8.3. विवरणात्मा करोतिः धातोरेव व्याख्यानम् , न तिङां व्याख्यानम्

"पचति" इत्यस्य "पाकं करोति" इति विवरणात्मा करोतिः धातोरेव व्याख्यानं - विवरणम्। अतस्तदपि नाख्यातार्थत्वसाधकमिति भावः।

व्युत्पत्त्याधायकम् अवश्यज्ञातव्यं चेति तदेवाक्षरशः प्रस्तूयते - "ननु द्विविध-भावोऽपि घञाद्यर्थोऽस्त्वतो न तद्विरोध इत्यतः तद्भाष्यविरोधापत्तेश्चेति। चेन (चकारेण) अन्येषां दूषणानां सङ्ग्रहः सूचितः। तथा हि - आख्यातप्रत्ययेन कर्तुरवाच्यत्वेऽभिधानानभिधानव्यवस्थोच्छेदः। कर्तृकर्मकृतां व्यापारावाचकत्वे "तण्डुलानां पाचकः, देवदत्तेन पक्व" इत्यादौ षष्ठ्याद्यनुपपत्तिः, कर्मत्वाद्य-संभवात्। तेषामपि भावार्थकत्वे गौरवम्। अनुशासनेन तदर्थकत्वाऽलाभश्च। न च "कर्तरि कृत्" (पा. 3-4-67) इति सूत्रस्थकर्तृपदस्य आवृत्त्या धर्मधर्म्युभय-बोधकतया भावनायां तद्विधिलाभ इति वाच्यम्। आवृत्तौ प्रमाणाभावात्। एवमपि कर्मकृतां तदर्थकत्वानुपपत्तिः स्थिरैव। न च "तयोरेव कृत्य" (पा. 3-4-70) इत्यादावपि कर्तृग्रहणमनुवर्त्य भावनायामपि तेषां विधानमिति वाच्यम्, गौरवापत्तेः। एवं "गुरुः शिष्याभ्यां पाचयति" इत्यत्र "हेतुमति च"(पा. 3-1-26) इति सूत्रबलात् प्रयोजकव्यापारस्य णिजर्थत्वे स्थिते प्रयोज्यव्यापार एव आख्यातार्थो वाच्यः। एवं च णिजर्थव्यापारस्य प्रकृत्यर्थतया आख्यातार्थ-व्यापारान्वयिन्येव तदर्थ(आख्यातार्थ)संख्यान्वयाद् गुरुगतसंख्यानभिधाने गुरु-पदात् प्रथमानापत्तिः, शिष्यपदात् तदापत्तिश्चेत्याद्यन्यत्र विस्तरः" इति।

किञ्च घञ्ल्युडादीनां तादृशव्यापारार्थकत्वमाश्रित्य "ग्रामो गमनवान्" इति प्रयोग -वारणेऽपि तदसमभिव्याहारेण (ल्युडाद्यसमभिव्याहारेण) "गम्यर्थवान्ग्राम" इति प्रयोगापत्तिः दुर्वारा, "गम्यर्थजन्यसंयोगाश्रयो ग्राम" इति प्रयोगोऽपि दुरुपपादः स्यादिति बोध्यम् इति **तत्त्वदर्शिनी** दोषान्तरं योजयति। **प्रभायां** सर्वस्या-नुवादोऽस्ति। **शाङ्कर्या**मपि दर्पणस्य काशिकायाश्चानुवादः विद्यते। काशिकापाठ एव युक्त इति तन्मतम्।

नव्यमीमांसकमतमुपक्षिपति - **अथ व्यापारोऽपीत्यादिना।** "मण्डनमिश्राद-र्वाचीनाः मीमांसकास्तु फलव्यापारयोरुभयोरपि धात्वर्थत्वमङ्गीकुर्वन्ति। परन्तु

तत्र व्यापारे पुरुषप्रयत्नरूपाम् उत्पादनेत्यादिपदैरभिधीयमानां भावनां नान्तर्भावयन्ति। एतन्मतस्वरूपं पूर्वं प्रदर्शितमस्ति। तथा च तेषां मते फलव्यापारौ धात्वर्थौ। भावना तु अख्यातार्थः। धातुनाभिधीयमानो व्यापारः न साध्यस्वरूपः। भावनैव साध्यत्वेन प्रतीयते। तस्यामेव सकलकारकान्वयः। एवं फलव्यापारयोरुभयोः धात्वर्थत्वे पूर्वोक्तदोषाणां समेषां निवारणं भवत्येव। भावे घञादयश्च धात्वर्थानुवादका एव। व्यापारोऽपीत्यत्र अपि शब्देन फलस्य सङ्ग्रहः।" इति **तत्त्वदर्शिनी** । तथा च फलव्यापारौ धात्वर्थः इति स्वीकरणीयमिति। अत्रेयं विचिकित्सा स्यात्। फलव्यापारयोः एव धात्वर्थत्वं वैयाकरणैरपि अङ्गीकृतम्। नव्यमीमांसका अपि तदेव वदन्ति। तर्हि द्वयोरपि ऐकमत्यमेव। ततश्च पुनः मीमांसकमते दोषोद्भावनं कथमिति। एतां शङ्कामेव मनसिकृत्य **काशिकाकारः** इत्यभ्युपेयमिति प्रतीकमुपादाय "पूर्वोक्तदूषणगणनिरासाय यत्नातिरिक्तो व्यापारो धात्वर्थः यत्न आख्यातार्थ इत्यभ्युपेयत इति भावः" इति व्याख्यातवान्। वैयाकरणानां मते यत्नोऽपि धात्वर्थ एव, नव्यमीमांसकमते तु सः आख्यातार्थ इति भेदः।अतः "व्यापारोऽपि धात्वर्थ" इति मूलस्य "व्यापारः धात्वर्थोऽपि" इति योजनायां कस्यचिद् व्यापारांशस्य यत्नातिरिक्तस्य धात्वर्थत्वं, तस्यैव यत्नरूपांशस्य आख्यातार्थत्वमिति लभ्यते। अयमाशयः एव "व्यापारोऽपि धात्वर्थ" इत्यस्य ग्रन्थस्येति "धातुत एव सकलव्यापारसम्भवेन" इत्यादिखण्डनेन अवगम्यते। **सकलव्यापारसम्भवेनेति** । यत्नस्य केवलस्य व्यापारान्तरेभ्यः पृथक् आख्यातार्थत्वे प्रमाणाभावात् अधिश्रयणादिरिव यत्नोऽपि धातुवाच्य एव इत्यर्थः। **गौरवमिति**॥ "अनन्यलभ्यः शब्दार्थ" इति न्यायेन अनन्यलभ्यसंख्याकालादिबोधकत्वमेवाख्यातस्य सिद्ध्यति। यत्नस्य धातुलभ्यत्वेन अन्यलभ्यत्वात् तत्र शक्तिकल्पनैव नोचिता। अत्र **काशिकायां** "संख्यायां कालादौ शक्तिरस्तु। न तु यत्नेऽपि। अन्यलभ्यतया तत्र शक्तिकल्पनानौचित्यादित्यर्थः। न पुनः व्यापारत्वेन धातुत एव लाभे प्रत्ययस्य यत्नत्वावच्छिन्ने शक्तिकल्पनायां गौरवादित्यर्थः। तथा सति अनुभवसिद्धफूत्कारादिना बोधस्य अनिर्वाहात्। तत्तत्फलानुकूलयत्नलाभेऽपि तदनुकूलव्यापारानुकूलयत्नालाभात् तल्लाभार्थमाख्यातस्य यत्ने शक्तिरिति नव्यमीमांसकोक्तमपि न युक्तम्। तथाननुभवात्। अन्यथा व्यापारानुकूलव्यापारा-

लाभात् तत्रापि शक्तिकल्पनापत्तेः। पाकं करोतीति धात्वर्थात् पृथक् करोतिना विव्रियमाणतया विक्लित्त्यादिफलानुकूलव्यापारानुकूलयत्नादिरूपा भावना आख्यातार्थः, व्यापारविगमे फलसत्त्वदशायां "पाको विद्यते" इत्यप्रयोगात् घञन्तपाकादिपदस्य फलावच्छिन्नव्यापारार्थताया आवश्यकत्वात्। ततश्च फलानुकूलव्यापारानुकूलयत्नप्रतीतौ विनिगमकं पाकं करोतीति विवरणमेवेति चेन्न। पाकं करोतीति विवरणवाक्यीयपाकपदस्य फलमात्रार्थकत्वमेव, न तु फलावच्छिन्न व्यापारवाचित्वम्। ततश्च नेदं फलानुकूलव्यापारानुकूलयत्नप्रतीतौ प्रमाणम्। "पाक" पदस्य केवलविक्लित्तिरूपफलपरतया प्रयोगोऽपि दृश्यते। यथा फलानुत्पादसमये फूत्कारादिव्यापारसत्त्वेऽपि "पाको भविष्यती"त्यपि व्यवहारो दृश्यते। अतः विवरणवाक्ये पाकशब्दस्य केवलफलपरत्वमेव। अन्यत्र तस्य फलावच्छिन्नव्यापारार्थकत्वम्। "कथं पुनर्ज्ञायते क्रियावचनाः पचादयः इति, यदेषां करोतिना सामानाधिकरण्यं, किं करोति? पचतीति धातुरेव क्रियामाह" इति भूवादि (पा. 1-3-1) सूत्रे भाष्यकारेण धातोरेव क्रियावाचित्वमिति कण्ठोक्त्या करोतिना सामानाधिकरण्यप्रदर्शनेन च "पाकं करोति " इति विवरणं धात्वर्थस्यैव विवरणं न प्रत्ययार्थस्य। अतश्च यत्नस्याख्यातार्थत्वे प्रमाणाभाव एव" इत्येवं सम्यक् मीमांसकमतं निरस्तम्।

8.3.1. विवरणवाक्यस्य प्रामाण्यप्रदर्शने व्याख्यातॄणां मतविमर्शः

एवं "ग्रामः संयोगवान्" इत्यर्थे "ग्रामो गमनवान्" इति प्रयोगापत्तिरित्यारभ्य भावनायाः धात्वर्थत्वसाधकयुक्तीनां प्रदर्शनेन पाकं करोतीति विवरणवाक्यगत-करोतिः धात्वर्थस्यैव व्याख्यानं - विवरणमित्याह - **पचतीत्यस्येत्यादि**। अतः इदं विवरणं न भावनायाः आख्यार्थत्वसाधकं, प्रत्युत धात्वर्थसाधकमेवेति भावः।

अत्र सर्वैरपि व्याख्यातृभिः विवरणवाक्यगतकरोतिः धात्वर्थस्यैव विवरणमिति साधयितुं भूवादिसूत्रस्थं भाष्यमेव प्रमाणतया उपन्यस्तम्। अतस्तदेव किञ्चिदत्र विव्रियते। "भूवादयो धातवः" (पा. 1-3-1) इति सूत्रे भाष्ये "क्रियावचनो धातुः" इति न्यासे "कथं पुनर्ज्ञायते क्रियावचनाः पचादयः" इति प्रश्ने "यदेतेषां करोतिना सामानाधिकरण्यं - किं करोति? पचति, किं करिष्यति? पक्ष्यति, किमकार्षीत्? अपाक्षीत्" इत्युक्तम्। अत्र पचादीनां क्रियावाचकत्वं साध्यम्। तत्र करोति सामानाधिकरण्यं हेतुरिति अस्माद्भाष्याल्लभ्यते। "किं करोति? " इत्यस्य

यत्करोति तत्किमिति व्यापारविशेषविषयिणी जिज्ञासा। सा च "पचती"त्यनेन निवार्यते। तथा च यन्निष्ठतया प्रश्नविषयक्रियायाः प्रतीतिः तन्निष्ठतयैव उत्तरभूत-पचतिशब्दवाच्यक्रियायाः प्रतीतिरिति पचतिकरोत्योः सामान्यविशेषभावेन सामानाधिकरण्यं "विन्ध्यपर्वत"वत्। न चैवं "विन्ध्यः पर्वत" इतिवत् "पचति करोती"ति सामान्यविशेषभावेन प्रयोगापत्तिरिति वाच्यम्। केवलधातोः प्रयोगा-भावेन तथा न प्रयोगः। तिङन्तयोरपि न प्रयोगः, पचतीति एकेनैव तिङा विवक्षितार्थप्रतीत्या द्वितीयस्य तिङः प्रयोगे पुनरुक्तिदोषापातात् "उक्तार्थानाम-प्रयोग" इति न्यायात्, स्वेनैव स्वस्य सामान्यविशेषभावासम्भवात्। यत्र च विशेषक्रियावचने तिङः अप्रयोगः तत्र तु करोति प्रयोगः इष्ट एव, यथा "एधां चक्रे" इत्यादौ। तथा यत्र विशेषक्रियावाचकोत्तरतिङः अन्यार्थकता, तत्रापि सामान्यस्य करोतेः प्रयोगः इष्ट एव। यथा –

"पुरीमवस्कन्द लुनीहि नन्दनं मुषाण रत्नानि हरामराङ्गनाः।
विगृह्य चक्रे नमुचिद्विषा बली य इत्थमस्वास्थ्यमहर्दिवं दिवः॥" (माघ 1-51)

इत्यत्र अवस्कन्दनादेः अस्वास्थ्यक्रियया सह सामान्यविशेषभावेन अन्वयः, "समुच्चये सामान्यवचनस्य" (पा.3-4-5) इत्यनुशासनात्। न च "किं करोति? पचती"ति भाष्येण तिङर्थ एव करोतिना परामृश्यत इति वाच्यम्। "क्रियावचनो धातु"रिति उपक्रम्य "कथं पुनर्ज्ञायते क्रियावचना पचादय" इति प्रश्नस्य समाधानरूपेण उपस्थापितस्य "किं करोति? पचती"ति वाक्यस्य तिङर्थ-प्रतिपादकत्वे असङ्गततापत्तेः। अतश्चैतद्भाष्यबलेन करोतिः धातोरेव विवरणमिति सुस्पष्टमवगम्यते। एवं च "पचति - पाकं करोति" इति विवरणवाक्येऽपि पाक-शब्दः क्रियाविशेषवचनः, करोतिः सामान्यवचनः इति सामान्यविशेषभावेन धात्वर्थ एव शब्दद्वयेन विव्रियत इति भावः। न च "पचति - पाकं करोति" इति विवरणात् कृतेः पाकात् पृथक्करणेन तस्याः कृतेः धात्वर्थत्वानुपपत्त्या तिङर्थत्व -मेव युक्तमिति वाच्यम्।एकपदोपात्तानामर्थानां विवरणमेकेनैवकार्यमिति नियमा-भावात् ,अत्र पदद्वयेन पचधात्वर्थ एव विव्रियत इत्युक्तौ बाधकाभावात्। भवन्मतेऽपि आख्यातार्थकालसंख्याकृतीनां मध्ये कृतेः धातुना कालसंख्ययोः तदुत्तरतिङ्प्रत्ययेन च विवरणात्। भावार्थाधिकरणे कुमारिलभट्टपादैरपि "द्व्यर्थस्य धातोः भेदेनार्थे कथ्यमाने यागेनेति विशेषरूपं करणात्मना निष्कृष्टम्।

मीमांसकोक्तं बाधकमुद्धरन् तन्मतं दूषयति - न त्वित्यादिना। नासौ तिङां व्याख्यानम् , पक्कवान् इत्यादावनन्वयापत्तेः। अयं भावः - "प्रकृतिप्रत्ययौ सहार्थं ब्रूतस्तयोः प्रत्ययार्थस्य प्राधान्यम्" इत्यत्र हि "विशेष्यतया प्रकृत्यर्थप्रकारकबोधं प्रति तदुत्तरप्रत्ययजन्योपस्थितिर्हेतुः" इति कार्यकारणभावः फलितः। तथा च "पक्कवान्"इत्यत्र पाकः कर्म्मकारकं क्तवतुप्रत्ययार्थः कर्तृकारकम्। तयोश्चारुणाधिकरणरीत्या वक्ष्यमाणास्मद्रीत्या चान्वयासम्भव इति प्रकृति - प्रत्ययार्थयोरन्वयनियमस्यैवाभावे क्व प्राधान्यबोधक उक्तकार्यकारणभावः।

इतरत्तु भावनात्मकं सामान्यरूपेण शब्दान्तरेण भावयेदिति कथ्यते। अथवा केचित् करणांशकर्तृसंख्यादयः प्रकृतिप्रत्यययोः भेदेन वाच्याः। भावना तु समुदायाव्यभिचारात् समुदितयोरेवार्थ इत्यपि वक्तुं शक्यम्। तथाच सूत्रकार-भाष्यकाराभ्यां "भावार्थाः कर्मशब्दाः" इति सामानाधिकरण्यमेवाश्रितं न भावार्थत्वेन प्रत्ययाः विहिताः। शास्त्रे तु सर्वत्र प्रत्ययार्थो भावनेति व्यवहारः" इत्युक्तम्। अनेन च स्पष्टं यदनेकार्थस्य विवरणं नैकपदसाध्यमिति। किञ्चानेनैव ग्रन्थेन स्पष्टमिदमप्यवगम्यते यत् भावनायाः प्रत्ययार्थत्वे प्रमाणं मृग्यमिति।

एवं व्यापारस्य यत्नसहितस्य धात्वर्थत्वमेवेति युक्तिभिः संसाध्य भावनायाः तिङर्थत्वसाधनार्थं प्रदर्शितानां तिसृणां युक्तीनां युक्त्याभासत्त्वमेवेति निरूपयितु-मुपक्रमते - **मीमांसकोक्तं बाधकमुद्धरन्निति** । बाधकं - युक्तिरूपेण उपस्थापितं प्रत्ययार्थप्राधान्यन्यायरूपं बाधकमित्यर्थः॥ **उद्धरन्** - उदाहरन् । **तन्मतमिति** ।

"प्रत्ययार्थं सह ब्रूतः प्रकृति प्रत्ययौ सदा।
प्राधान्यात् भावना तेन प्रत्ययार्थोऽवधार्यते"॥ (मी. 2.1.1.1)

इति मतम्। तत्रादौ "पचति - पाकं करोति" इति विवरणम् न यत्नस्य आख्यातार्थत्वसाधकमिति युक्तिभिः निरूपयितुमुपक्रमते - **नासौ तिङां व्याख्यानम्** इति। असौ - विवरणवाक्यगतः करोतिः, तिङाम् व्याख्यानम् - विवरणं नेत्यर्थः। यतः तदुपष्टम्भकयुक्तीनां युक्त्याभासत्वात्। तत्र प्रधाना युक्तिः प्रत्ययार्थप्राधान्यन्यायः।धातोः व्यापारार्थकत्वानङ्गीकारे सः न्याय न्यायाभास एव स्यादिति भावः। तदेव सूचयति - **पक्कवानित्यादावनन्वयापत्तेरि**ति।

ननु "तस्मादि"(वै.सि.का.8)ति कारिकायां "न त्वसौ तिङाम्" इति पुनरुक्तम्, "धातोस्स्याद् व्याख्यानम्" इत्यनेनैव तिङां व्याख्यानं नेत्यर्थस्य सिद्धत्वादिति

चेदुच्यते। अभिप्रायस्थहेतुभिः भावनायाः धातुवाच्यत्वं साधितम्। ततश्च करोतिः धातोः व्याख्यानमित्यंशः सिद्धः। परन्तु "करोतिः तिङां व्याख्यानमि"त्यंशे प्रमाणतया निर्दिष्टः प्रत्ययार्थप्राधान्यन्यायः। तेन न्यायेन तिङामपि भावनावाचित्वं स्यात्। तथा चेत् धातुना कश्चन भावनांशः तिङा कश्चन भावनांशो बोध्यते इत्यपि कदाचित् स्यात्। अतः "तिङा भावना न बोध्यत एव" इति साधनीयमिति तदर्थं पुनः स्पष्टं कथयति - **नासौ तिङामिति**। तथा च कथमपि तिङां व्याख्यानं भवितुं नार्हतीत्यर्थः। तथा च अत्र निरूपणे अंशद्वयम्। प्रथमः अंशः धातोः व्यापारार्थत्वसाधकः। द्वितीयश्च भावनायाः तिङर्थत्वनिरासकश्चेति सूचनार्थमेव एवमुक्तमिति ऊह्यम्।

व्यापारस्य प्राधान्यं तस्य प्रत्ययवाच्यत्वे, प्रत्ययवाच्यस्य प्राधान्यं च प्रत्ययार्थ-प्राधान्यन्यायमूलकमिति, व्यापारस्य धात्वर्थत्वाभावे प्रत्ययार्थप्राधान्यन्याय एव असङ्गतः स्यादिति उपपादयति - **पक्वानित्यादावनन्वयापत्तेरिति**। पक्वानित्यत्र पच्धातुः क्तवतुप्रत्ययः इति भागद्वयम्। मीमांसकमतरीत्या पच्धात्वर्थः फलं विक्लित्तिः। क्तवतुप्रत्ययार्थः "कर्तरि कृत्" (पा. 3-4-67) इत्यनुशासनात् कर्ता। फलस्यापि व्यपदेशिवद्भावेन फलाश्रयत्वेन कर्मत्वमिति धातुः कर्मकारकं बोधयति, प्रत्ययः कर्तृकारकं बोधयतीति सिद्धम्। तथा च द्वयोः कारकयोः क्रियायामन्वयः वक्तव्यः। सा च क्रियात्र न कस्याप्यर्थ इति कारकाणां परस्पर-मन्वयस्य अव्युत्पन्नत्वात् प्रकृतिप्रत्ययार्थयोः अन्वय एव न स्यात्।न च पदार्थो-पस्थित्यादिसामग्रीसत्त्वमात्रेण अन्वयः। तथा चेत् "दशदाडिमानी"त्याद्यनर्थक-पदसमुदायादपि पदार्थोपस्थित्या कथञ्चिदन्वये अनर्थकत्वमेव न भवेत्। "अनेन कारकद्वयस्य सम्बन्धसामान्येनान्वय" इति मीमांसकोक्तिरपि परास्ता तदेतत्सर्व-माविष्कर्तुमाह - **अयं भाव** इत्यादिना। "प्रकृतिप्रत्ययौ सहार्थं ब्रूतः तयोः प्रत्ययार्थस्य प्राधान्यम्" इति न्यायस्वरूपम्। सहार्थं - एकान्वितस्वार्थं , ब्रूतः - बोधयतः, इति **काशिका** । सहार्थं - सम्बद्धार्थं बोधयत इति **दर्पणः**। **प्रभा शाङ्करी** च दर्पणानुयायिन्यौ।तथा च प्रकृतिः प्रत्ययार्थान्वितस्वार्थं प्रत्ययश्च प्रकृत्यन्वित-स्वार्थं बोधयत इति "सहार्थं ब्रूत" इत्यस्य तात्पर्यम्। अत्र **प्रभायां** "सहार्थ"मित्यत्र "सहयुक्तेऽप्रधाने" (पा.2-3-19) इति तृतीया उपपदविभक्तिराशङ्किता "उपपद-विभक्तेः कारकविभक्तिर्बलीयसी"ति न्यायमाश्रित्य अर्थस्य ब्रूञर्थकर्मत्वेन कारक-

द्वितीयया तस्याः बाध इत्युपपादितम्। वस्तुतः अप्राधान्यविवक्षायामेव तस्य सूत्रस्य प्रवृत्तिः अन्यथा "अप्रधाने" इति व्यर्थमेव स्यात्। अत्र तु अर्थस्य कर्मत्वेन प्राधान्यविवक्षैवेति न तत्सूत्रप्रवृत्तिरित्यवगन्तव्यम्। **तत्त्वदर्शिन्यां** तु प्रकृति प्रत्ययौ अर्थं सह ब्रूतः - एकोपस्थितिविषयीकुरुतः इति व्याख्यातम्। अत्र काशिकादर्पणावेव युक्ताविति विभाव्यते तयोः इति द्विवचनेन परस्परान्वित-स्वार्थयोरित्यर्थस्यैव युक्तत्वात्। अन्वयश्च विशेषणविशेष्यभावरूप इति तत्र जिज्ञासा जायते कः विशेष्यम् कः विशेषणमिति। तदेवोपपादयति न्यायस्यो-त्तरार्धः - "तयोः प्रत्ययार्थस्य प्राधान्यम्" इति। प्रकृत्यर्थः प्रत्ययार्थान्वययोग्यः प्रत्ययार्थे विशेषणम्। प्रत्ययार्थश्च प्रकृत्यर्थान्वययोग्यः प्रकृत्यर्थस्य विशेष्यमि-त्यर्थः। तथा च प्रकृत्यर्थनिष्ठप्रकारतानिरूपितविशेष्यतावान् प्रत्ययार्थ इत्यर्थः। प्रत्ययार्थः प्रत्ययवृत्तिग्रहविशेष्यः प्रधानमिति प्रकृत्यर्थ प्रकारतानिरूपित-विशेष्यताशालीत्यर्थः।

॥ **विशेष्यतयेति** ॥ प्रत्ययस्य प्रकृत्यर्थप्रकारतानिरूपितविशेष्यतासम्बन्धेन शाब्द-बोधं प्रति इत्यर्थः । हेतुरित्यस्य विशेष्यतासम्बन्धेनेति शेषः इति **दर्पणः**। प्रकृत्यर्थनिष्ठप्रकारताकबोधे जननीये विशेष्यतासम्बन्धेन तादृशप्रकृत्युत्तरप्रत्यय-जन्यार्थोपस्थितिः कारणमित्यर्थः इति **शाङ्करी**। अनेन न्यायेन सिद्धं कार्य-कारणभावमेव अभिनयेन शब्दतः प्रदर्शयति - **विशेष्यतयेत्यादिना फलित** इत्यन्तेन। धात्वर्थप्रत्ययार्थयोः अन्वयानुपपत्तिमेवोपपादयति - **पक्वानिति** ॥ **पाकः कर्मकारकमिति**॥ पच्धात्वर्थः पाकः मीमांसकमते फलम्। फलांशस्य क्रियानिर्वर्त्यतया व्यपदेशिवद्भावेन स्वाश्रयतया च कर्मत्वमित्यर्थः इति **काशिका - शाङ्कर्यौ** । धात्वर्थस्य फलस्य व्यपदेशिवद्भावेन फलाश्रयत्वात् फलबुद्धिपूर्वकमेव क्रियोत्पादनात् तस्य कर्तृबुद्धौ पूर्वमुपस्थित्या क्रियाजनकत्वरूपकारकत्वाच्च कर्मकारकत्वमित्यर्थः इति **तत्त्वदर्शिनी** ।अत्र तत्त्वदर्शिनी युक्ततमा। क्रियते असौ इतिव्युत्पत्या फलस्यापि क्रियात्वेऽपि तस्य साध्यरूपत्वाभावात् न तत्र कारकान्वय इति भावः। साध्यरूपक्रियायामेव कारकान्वयस्य मीमांसकैरपि स्वीकारात्। ॥**क्तवतुप्रत्ययार्थ** इति ॥ "कर्तरि कृत्" (पा. 3-4-67) इति सूत्रेण पच्धातोः क्तवतुप्रत्ययस्य कर्तरिविधानात् क्तवतुप्रत्ययस्य कर्त्रर्थकत्वमिति भावः। ॥**कर्तृकारकमिति** ॥ प्रकृत्यर्थप्रत्ययार्थयोः उभयोरपि कारकत्वं परस्परान्वये

प्रतिबन्धकमिति भावः। कारकस्य क्रियाकाङ्क्षया क्रियायाश्च कारकाकाङ्क्षया क्रिया - कारकयोरेव परस्परान्वयः न तु कारकयोः द्वयोः परस्परमित्यर्थः। प्रकृति-प्रत्ययार्थयोः परस्परानन्वयप्रयोजकमुभयोः कारकत्वमिति **काशिका**। ॥**अरुणाधिकरणेति**॥ "अरुणया पिङ्गाक्ष्या एकहायन्या सोमं क्रीणाति" इति वाक्ये वाक्यप्रमाणात् श्रुतेः बलवत्त्वेन तृतीयाश्रुत्या तृतीयान्तोपस्थापितानां समेषामर्थानां करणत्वेन "खलेकपोत"न्यायेन युगपदेव साक्षात् क्रियान्वय इति अरुणया क्रीणाति पिङ्गाक्ष्या क्रीणाति एकहायन्या क्रीणातीति प्राथमिको बोधः। तत्र आरुण्यरूपगुणस्यापि साक्षात् प्रथमं क्रयणक्रियायां करणत्वेन सम्बन्धः ततः परं पिङ्गाक्ष्यदिद्रव्येण सह परिच्छेद्यपरिच्छेदकभावेनान्वयः पार्ष्टिक इति मीमांसकानां सिद्धान्तः। अनेन कारकाणां साक्षात्क्रियान्वय एवेति नियमः फलति। भाष्यकारेणापि "अनभिहित"(पा. 2-3-1) सूत्रे "कटोऽपि कर्म भीष्मादयोऽपी"ति विशेषणानामपि साक्षात्क्रियान्वय एव सूचितः।व्याख्यातं च **कैयटेन** -तत्र करोतिक्रियायां पृथक् सर्वेषां कर्मत्वे प्रत्येकं द्वितीयोत्पत्तिः पश्चात्त्वेकवाक्यतया विशेषण - विशेष्यभाव इति। परन्त्वयं भेदः मीमांसकानां वैयाकरणानां च। मीमांसकास्तावत् "अरुणये"त्यादौ अरुणादिशब्दैः गुणस्यैवाभिधानमिति तस्यैव गुणस्य क्रियान्वयमभ्युगच्छन्ति। वैयाकरणास्तु भीष्ममित्यादि गुणवाचकानामपि तद्विशेष्यपरत्वमाश्रित्य क्रियान्वयं स्वीकुर्वन्ति। अत एव "नीलोत्पलम्" इत्यादिषु सामानाधिकरण्यं सामर्थ्यं च सिद्ध्यति। तथाचात्र द्वयोःकारकयोः क्रियायामेवान्वयस्योपपादनीयतया परस्परमन्वययोग्यताया एवाभावात् परस्परान्वयासम्भव इति भावः।

8.3.2. वक्ष्यमाणास्मद्रीत्या... इत्यादिमूलव्याख्याने व्याख्यातॄणां मतभेदविमर्शः

॥**वक्ष्यमाणास्मद्रीत्येति**॥ कारकत्वस्य क्रियाजनकत्वरूपत्वेन क्रियाजनकमिति ज्ञाते का सा क्रियेत्याकाङ्क्षोदयेन क्रियाया अपि साध्यस्वरूपायाः साधकाकाङ्क्षया च परस्परान्वयस्यौचित्यमित्यर्थकेन "क्रियात्वमेव हि कारकान्वयितावच्छेदकमि"ति सुबर्थनिर्णये वक्ष्यमाणरीत्या इति **दर्पणः**। **काशिकापि** दर्पणमनुसरति। **परीक्षायां** "कारकत्वस्य क्रियाजनकत्वरूपत्वेन तज्ज्ञानोत्तरं का सा क्रियेत्याकाङ्क्षया क्रियायाः साध्यत्वेन बोधोत्तरं जनकाकाङ्क्षया च कारकक्रिययोरेव परस्परमन्वय इति रीत्येत्यर्थः" इति "क्रियान्वयिनामेव कारकत्वमित्यादि-

वक्ष्यमाणास्मद्रीत्ये''त्यर्थ इति **कान्त्यां** च व्याख्यातम्। **सरला तत्त्वदर्शिनी** च दर्पणमनुसरतः। सुबर्थनिर्णये वक्ष्यमाणरीत्येति कथनेन सुबर्थनिर्णयेऽयं विचारः कृत इति चिन्तनीयम्। परन्तु भूषणसारे भूषणे वा सुबर्थनिर्णयेऽयं विचार एव न दृश्यते। "क्रियात्वमेव हि कारकान्वयितावच्छेदकमि''ति वाक्यं तु अस्याः कारिकायाः एव व्याख्यायाम् अग्रे वर्तते। तत्रापि "वक्ष्यते" इति पदं प्रयुक्तम्। अतः अत्र कान्तिव्याख्या युक्ततमा। तथा हि - अत्रैव धात्वर्थनिर्णये सम्बोधनाद्यष्टकस्य क्रिययैव साधुत्वमिति निरूपणे कारकस्य क्रियान्वयनियमप्रतिपादनसन्दर्भे - "कारके" (पा.1-4-23) इत्यधिकृत्य तेषां व्युत्पादनात्। कारकशब्दो हि क्रियापरः, करोति कर्तृकर्मादिव्यपदेशानिति व्युत्पत्तेः। तथा चाग्रिमेषु अपादानादि -संज्ञाविधिषु क्रियार्थककारकशब्दानुवृत्त्या क्रियान्वयिनामेव संज्ञेति भाष्ये स्पष्टम्" इति ग्रन्थेन क्रियान्वयिनामेव कारकत्वप्रतिपादनेन "क्रियात्वमेव कारकान्वयितावच्छेदकमि''ति उक्तप्रायम्। अतः "क्रियायोग एव कारकसंज्ञाविधानात्" इति **कृष्णमित्रीया,** "क्रियात्वस्यैव हि कारकान्वयितावच्छेदकतया क्रियायामेव कारकान्वय इति वक्ष्यमाणरीत्ये"ति **प्रभा** च युक्ते। अन्याः व्याख्याः अपि सन्दर्भानुगुणा एव। परन्तु वक्ष्यमाणप्रमाणभूतग्रन्थस्वरूपप्रदर्शने तत्प्रकरणज्ञापने च भ्रान्ताः। तथाचेत्थं व्याख्येयम् - संबोधनाद्यष्टकान्यतमस्य कारकस्य क्रियायामेवान्वय इति वक्ष्यमाणास्मद्रीत्या क्रियात्वस्यैव कारकान्वयितावच्छेदकत्वेन पक्कवानित्यत्र तादृशक्रियात्वस्य मीमांसकमते धात्वर्थे प्रत्ययार्थे वा अभावात् प्रकृतिप्रत्ययार्थयोः अन्वयस्यैव अनुपपत्त्या तयोर्विषये विशेषणविशेष्यभावविचारो वा उक्तकार्यकारणभावो वा असम्बद्धप्रलाप एव स्यात् इति। ॥**अन्वयासम्भव** इति॥ कारकयोः परस्परमन्वयासम्भव इत्यर्थः। ॥**नियमस्यैवाभावे** इति॥ भवन्मते (मीमांसकमते) एतादृशस्थले व्यभिचारात् पूर्वोक्तप्रत्ययार्थप्राधान्यस्य अन्वितार्थबोधनरूपस्य च नियमस्यैवासम्भवे। ॥**प्राधान्येति**॥ प्रत्ययार्थस्य प्रकृत्यर्थनिरूपितप्राधान्यबोधकः कार्यकारणभाव एव न सिद्ध्यति। अतः अवश्यं धातौ कारकान्वययोग्यस्वरूपस्य व्यापारस्य बोधः स्वीकरणीयः। स्वीकृते तु व्यापारबोधे धात्वर्थव्यापारे कारकान्वयितावच्छेदकस्य क्रियात्वस्य सत्त्वात् धात्वर्थफलप्रत्ययार्थकर्तृरूपयोरुभयोरपिकारकयोः तस्मिन् अन्वयेन प्रकृत्यर्थप्रत्ययार्थयोः विशेषणविशेष्यभावस्य उपपत्त्या प्रकृतिप्रत्यययोः अन्वितार्थ-

8.4 सम्बन्धसामान्येन कारकाणामन्वय इत्यस्य खण्डनम्

न च-

संबन्धमात्रमुक्तञ्च श्रुत्या धात्वर्थभावयोः।
तदेकांशनिवेशे तु व्यापारोऽस्या न विद्यते॥

इति भट्टपादोक्तरीत्या संबन्धसामान्येन कारकाणामन्वयः शङ्क्यः योग्यताविरहात्। अन्वयप्रयोजकरूपवत्त्वस्य तत्त्वात्। क्रियात्वमेव हि कारकान्वयितावच्छेदकमिति वक्ष्यते। तदेतदाविष्कर्तुं विवरणेन धात्वर्थक्तवत्त्वर्थयोः कर्मत्वकर्तृत्वे दर्शयति - कृतवान् पाकमिति ।

बोधकत्वं सिद्ध्यति। पक्वानित्यत्र च पच्धात्वर्थफलस्य भूतकालस्य च व्यापारे विशेषणत्वं, व्यापारस्य च क्तवतुप्रत्ययार्थकर्तरि विशेषणत्वं स्वीकृत्य "भूतकालिक विक्लित्तिजनकव्यापाराश्रय" इति इष्टः बोधः सिद्ध्यति।

8.4.1. धात्वर्थभावयोः सम्बन्धसामान्येनान्वय इति भावार्थाधिकरणमतप्रदर्शनम्

अथ भावार्थाधिकरणे (मी-2अ-1पा 1अधि) यजेतेत्यादिषु सिद्धसाध्यस्वरूपयोः धात्वर्थभावयोः सम्बन्धसामान्येन अन्वयः भट्टपादैः उक्तः। तेनैव प्रकारेण कर्म-कर्तृकारकयोः धात्वर्थक्तवत्त्वर्थयोः साक्षादन्वयाभावेऽपि सम्बन्धसामान्यरूपेण पाकसम्बन्धिकर्तेत्येवं रूपेण प्राथमिकबोधो भवतु, अनन्तरं भावनाक्षेपेण भावना-द्वारकः पार्ष्ठिकः बोधो भवतु इत्याशङ्कते -**नचेति**॥ अत्र **कान्तिः** - "ज्योतिष्टोमेन यजेत स्वर्गकाम" इति श्रूयते। तत्र "यजेत" इति तिङर्थभावनायां साध्यत्वेन कस्य सम्बन्धः इति विचारे स्वर्गकाम इति भिन्नपदोपात्तः अपि स्वर्ग एव भाव्यत्वेन सम्बद्ध्यते तस्यैव पुरुषार्थत्वात्। न तु समानपदोपात्तः यागः तस्य असत्त्व -रूपत्वेन अपुरुषार्थत्वात्। इति सिद्धान्तितम्। तत्रेयं शङ्का कृता - ननु भिन्नपदोपात्तत्वरूपवाक्यापेक्षया आख्यातपदरूपसमानपदश्रुतेः बलवत्त्वात् "यागानुकूला भावने"ति बोधात् यागस्यैव भाव्यत्वमुचितमिति। तस्याः शङ्कायाः समाधानरूपेण इयं कारिका भट्टपादैः उक्ता - सम्बन्धमात्रमित्यादि। श्रुत्या-यजेतेति समानपदश्रुत्या, धात्वर्थभावयोः यागभावनयोः सिद्धसाध्यस्वरूपयोः सम्बन्धमात्रम् - सम्बन्धसामान्यमेव, उक्तं - प्रतिपादितम्। तथा च "याग-सम्बन्धिनी भावने"त्येव यजेतेति आख्यातेन समानपदश्रुत्या बोध्यते। न तु याग-कर्मिकेति वा यागकरणिकेति वा। तदेकांशनिवेशे तु - तस्य सम्बन्धसामान्यस्य

यः एकांशः विशेषः कर्मकरणादिरूपः तस्य, निवेशे तु - प्रतिपादने तु, अस्याः श्रुत्याः व्यापारो न विद्यते अस्याः श्रुत्याः सामर्थ्यं नास्ति। कुतः? तत्काले आकाङ्क्षाविरहात्। प्राथमिकपदार्थबोधे भावनायाः कर्तृकर्माद्याकाङ्क्षा नास्तीत्यर्थः। कुतः आकाङ्क्षाविरह इति चेत्भावनायाः अप्रवृत्तप्रवर्तकत्वानुरोधेन फलान्वितायाः एव करणाकाङ्क्षितत्वात्। फलसम्बन्धश्च भावनायाः वाक्याद्भवतीति वाक्यात् श्रुतेः बलवत्वात् श्रुत्या पदार्थबोधकाले वाक्यात् स्वर्गरूपफलसम्बन्धाप्रतीतेः पदार्थ-बोधकाले भावनायाः प्रवर्तकत्वासिद्ध्या आकाङ्क्षाविरह इत्यर्थः। वाक्यात् स्वर्गस्य भाव्यत्वे ज्ञाते करणाकाङ्क्षायां सत्यां यागस्य भावनायां करणत्वेनान्वय इति "ज्योतिष्टोमाभिन्नेन यागेन स्वर्गं भावयेदि"ति वाक्यार्थः सम्पत्स्यते। एवं च "पचती"त्यस्य "पाकसम्बन्धिनी भावने"ति श्रौतार्थः। पाकानुकूला भावनेति मानसः पश्चात् बोधः। अत एव "दध्ना जुहोती "त्यादौ होमसम्बन्धिभावनया दधि संस्कुर्यादित्यर्थः। एवं च "ज्योतिष्टोमेन यजेते"त्यादावपि ज्योतिष्टोमाभिन्नयाग-सम्बन्धिभावनेत्येव श्रौतार्थः। पार्ष्ठिकस्तु होमयागादेः करणत्वबोधः। "नासाधितं करणं भवती " ति न्यायेन अर्थाक्षिप्तहोमयागसाध्यकभावनामादाय होमयागादेः सिद्धत्वात् इति ।

"सम्बन्धमात्रं सम्बन्धसामान्यमुक्तम्। तत्र तृतीयादिविभक्त्यभावेन करणत्वादि-विशेषरूपेणान्वयासम्भवात् सम्बन्धसामान्येनान्वयः प्रतिपाद्यते" इति **काशिका**। अन्यानि सर्वाणि व्याख्यानानि भावार्थाधिकरणसन्दर्भमेव प्रस्तुवन्ति। **परीक्षायां** तु वाजपेयाधिकरणसन्दर्भः इत्थं प्रतिपादितः- "वाजपेयाधिकरणोक्तरीत्यान्वय-माशङ्क्य निराचष्टे - न चेत्यादिना। तत्र हि "वाजपेयेन यजेत " इति विषयवाक्ये यद्वाजपेयपदं तद्यागसाधनद्रव्यपरम् उत कर्मनामधेयमिति संशये द्रव्यपरमिति पूर्वपक्षे वाक्यभेदरूपो दोषः कथितः। "वाजपेयेन यागं भावयेत्, यागेन च स्वर्गं भावयेत्" इति बोधात्, यागभाव्यकभावनायां वाजपेयस्य करणत्वात् स्वर्गभाव्यक-भावनायां च यागस्य करणत्वात्। नामधेयपरत्वे तु "वाजपेयाभिन्नयागकरणिका स्वर्गभाव्यिका प्रयाजादीतिकर्तव्यताका भावने " ति बोधात् न स दोषः। यागे करणत्वं तु भावनाभाव्यनिर्वर्तकत्वरूपं पारिभाषिकम्। एवं पूर्वपक्षे वाक्यभेदापत्ति-परिहारायेयमुक्तिः। श्रुत्या "वाजपेयेन यजेत"इति श्रुत्या शब्देन सम्बन्धमात्रमुक्तं, तस्य सम्बन्धस्य एकांशनिवेशे सम्बन्धविशेषनिवेशेऽस्याः श्रुतेः व्यापारोऽ-

भिधारूपो व्यापारो नास्तीत्यर्थः। एवंच वाजपेयकरणिका यागसम्बन्धिनी भावना इति बोधान्न वाक्यभेद इति तात्पर्यम्। उत्तरपक्षे तु यागभाव्यकत्वस्वर्गभाव्यकत्वादिना भावनायाः भेदात्, यस्यां यागकरणकत्वं तस्यां न वाजपेयसम्बन्ध इति नेत्थं सम्बन्धसम्भव इति दूषणमुक्तम्। तथा प्रकृतेऽपि पाकसम्बन्धिकर्तेति बोधस्य सम्भवाभिप्रायेण शङ्केयम्" - इति।

निराकरोति - **योग्यताविरहादिति**। यजेतेत्यादिषु सिद्धसाध्यस्वभावयोः यागभावनयोः अन्वययोग्यता वर्तते, एकस्य कारकत्वेन अन्यस्य च भावनात्वेन परस्पराकाङ्क्षायाः सहजायाः सत्त्वात्। अस्त्येव कारकस्य क्रियाकाङ्क्षा, क्रियायाः कारकाकाङ्क्षा च सहजा। अतः "मातुः स्मरति, मातरं स्मरती"त्यादिष्विव सम्बन्धसामान्यरूपेण वा विशेषरूपेण वा अन्वयः भवति। अत्र तु धात्वर्थप्रत्ययार्थयोः द्वयोः कारकयोः परस्परम् आकाङ्क्षाया एवाभावात् सम्बन्धसामान्यरूपेणाप्यन्वयः वक्तुमशक्यः। ननु अर्थाबाधो योग्यता। अस्ति च सा प्रकृते। इति चेदुच्यते – **अन्वयप्रयोजकेति** । एकपदार्थे अपरपदार्थसम्बन्धमात्रं न योग्यता। यदि च सैव योग्यता तर्हि तत्पदार्थे तत्पदार्थतावच्छेदकधर्मावच्छिन्नसंसर्गवत्त्वमात्रं योग्यता स्यात्। तथा च "घटेन जलमाहर " इति वाक्यात् जलाहरणे घटत्वावच्छिन्नसंसर्गः प्रतिपादनीयः। स च यस्य कस्यापि घटस्य करणतारूपः सम्भवतीति छिद्र घटस्यापि जलाहरणे करणत्वं स्यात्। अतः "अन्वयप्रयोजकरूपवत्त्वं योग्यता " इति स्वीकरणीयम्। अत्र च घटत्वावच्छिन्नस्यापि जलाहरणे करणत्वेनान्वयप्रयोजकरूपं सच्छिद्रेतरत्वं, तादृशरूपवान् घट एव जलाहरणे करणत्वेनान्वेतुं योग्यो भवति। मीमांसकैरपि अन्वयप्रयोजकरूपवत्त्वरूपा योग्यतैव स्वीक्रियते। **काशिकायामपि** - "तन्मतेऽपि तस्यैव योग्यतात्वात्। अत एव स्थूलजलाभिप्रायकं "पयसा सिञ्चती"ति वाक्यं न योग्यं, द्रवद्रव्यस्यैवान्वयितावच्छेदकत्वात् अन्वयप्रयोजकपदेन अन्वयितावच्छेदकस्यैवाभिधानात्। यदवच्छिन्नेऽन्वयः तस्यैव ह्यन्वयितावच्छेदकत्वम्। तथा च स्थूलजले द्रवद्रव्यत्वरूपान्वयितावच्छेदकस्य अभावात् स्थूलजलस्य न सेचने करणत्वेनान्वययोग्यतेति तद्वाक्यमयोग्यमित्यर्थः"इत्यादिना उदाहरणान्तरेण पूर्वोक्त एव भावः स्पष्टीकृतः। एवं च "पक्ववान्" इत्यत्र द्वयोः कारकयोः कर्तृकर्मणोः अन्यतरस्मिन् तादृशान्वयप्रयोजकरूपवत्त्वरूपयोग्यतायाः अभावात् सम्बन्धसामान्यरूपेणापि अन्वया-

सम्भव इति भावः। किं तद्रूपमिति चेदाह - **क्रियात्वमेव हीत्यादिना**। पक्वानित्यत्र द्वयोरपि कारकत्वेन कारकान्वयितावच्छेदकं यत् क्रियात्वं तदवच्छिन्नस्य पदार्थस्यात्राभावात् पचधात्वर्थफले क्तवतुप्रत्ययार्थकर्तरि तादृशक्रियात्वस्याभावात् अन्वय एव न भवति इत्यर्थः। ततश्च प्रकृतिप्रत्ययार्थयोरन्वयनियमस्यैव व्यभिचारात् तयोर्मध्ये किं प्रधानं किमप्रधानमिति जिज्ञासाया एवानुदयात् तेन न्यायेन प्रत्ययार्थप्राधान्यमपि न सिद्ध्यति। एतदेव "पक्वान्" इति शब्दस्य "कृतवान् पाकम् " इति विवरणेन प्रदर्शयति। पाकमिति द्वितीयया धात्वर्थफलस्य कर्मत्वं, कृतवान् इति क्तवतुप्रत्ययेन कर्तृत्वं च प्रदर्शयतीत्यर्थः। **वक्ष्यत** इति। अत्रैव धात्वाख्यातार्थनिर्णये सम्बोधनाद्यष्टकस्य क्रियायामेवान्वय इति निरूपणसन्दर्भे कारकाणामपि क्रियायामेवान्वय इति कर्तृकर्मादिकारकसंज्ञाविधायकेषु क्रियार्थककारकशब्दानुवृत्त्या (क्रियायामित्यर्थकस्य कारके इत्यस्य अनुवृत्त्या) लभ्यत इत्येवंविधनिरूपणपूर्वकं क्रियात्वस्यैव कारकान्वयितावच्छेदकत्वं सूचयिष्यत इत्यर्थः। **दर्पणे परीक्षायां** च "क्रियान्वयित्वमेव " इति प्रतीकः स्वीकृतः । तेन क्रियान्वयित्वमेव हि कारकान्वयितावच्छेदकमिति पाठः ताभ्यां स्वीकृतः। अन्यैश्च क्रियात्वमेवेति पाठः स्वीकृतः। भूषणे क्रियात्वमेवेति पाठः दृश्यते। स एव युक्तः। अन्वयितावच्छेदकरूपेण पदार्थनिष्ठधर्मस्यैव स्वीकर्तुमुचितत्वात्।

अत्रेदं तत्त्वम्। व्याकरणशास्त्रेण अनुशास्यमानाः प्रत्ययाः स्वार्थान्वययोग्यार्थप्रतिपादकप्रकृतिभ्य एव भवन्ति। अत एव अव्ययेभ्यः सुबनुत्पत्तिः आशङ्किता शास्त्रे, अव्ययानां सुबर्थसंख्याकारकाद्यन्वययोग्यार्थप्रतिपादकत्वाभावात्। तेषां पदत्वाय "अव्ययादाप्सुपः" (पा.2-4-82) इति लुग्वचनसामर्थ्यात् ज्ञापनेन तत्र सुबुत्पत्तिश्च साधिता। "करोतीति कृत्" इति अन्वर्थसंज्ञावन्तः कृत्प्रत्ययाः कारकार्थकाः स्वार्थान्वययोग्यार्थबोधकप्रकृतेरेव भवन्तीति, तादृशप्रकृतिः कारकाणां क्रियाकाङ्क्षया क्रियार्थिका एव भवितुमर्हति नाक्रियार्था। यद्यपि एते "धातोः" (पा. 3-1-91) इत्यधिकारे विहिताः अथापि तस्य धातोः क्रियावाचित्वे एव तस्मात् तेषामुत्पत्तिः भवति। अत एव धातुसंज्ञाप्यन्वर्था क्रियावाचित्वद्योतिका। एवं च यावत्प्रकृतेः क्रियावाचित्वमूलकधातुत्वं नास्ति तावत् ततः कृत्प्रत्ययस्योत्पत्तिर्न भवति। उदाहरणार्थं "चन्द्र" इति शब्दं स्वीकुर्मः। अस्य

8.5. प्रत्ययार्थप्राधान्यनियमस्य औत्सर्गिकत्वम्

वस्तुतः "प्रत्ययार्थः प्रधानम्" इत्यस्य यः प्रधानं स प्रत्ययार्थ एवेति वा यः प्रत्ययार्थः स प्रधानमेवेति वा नार्थः । "अजा, अश्वा, छागी" इत्यत्र स्त्रीप्रत्ययार्थे स्त्रीत्वस्यैव प्राधान्यापत्तेः छाग्यादेरनापत्तेश्च। किन्तूत्सर्गोऽयम्। विशेष्यत्वादिना बोधस्तु तथा व्युत्पत्त्यनुरोधात्।

"चन्द्रमाः" इत्येकोऽर्थः, "चन्द्रमा इव आचरणम्" इत्यन्योऽर्थः। तत्र प्रथमार्थे चन्द्र इति नाम, द्वितीयार्थे धातुर्भवति ।"चन्द्रित" इति शब्दः अस्माच्चन्द्रशब्दात् निष्पाद्यते। तर्हि अस्य व्युत्पत्तिः वक्तव्या चेत् अत्र "चन्द्र" इति प्रकृतिः नाम वा धातुर्वा इति निर्धार्य ततः तद्योग्यप्रत्ययनिर्धारणं करणीयम्। तत्र "चन्द्र" इति नाम चेत् प्रकृतिः, ततः कृत्प्रत्यययोग्यता नास्तीति तारकादित्वात् तद्धिते इतचि "चन्द्रित" इति तारकित इतिवत् आकाशादिबोधको भवति। यदि च स एव "चन्द्र" इति धातुः तर्हि आचारार्थे क्विपि, ततः क्तप्रत्यये भूतकालिकचन्द्र-सदृशाचरणकर्तेत्येवमर्थः निर्वक्तव्यः। तथा च "इतच्" "क्त" इति प्रत्यययोग्य-प्रकृतित्वस्य "चन्द्र" इति शब्दे वर्तमानत्वेऽपि धातोरेव क्तः, प्रातिपदिकादेव इतच् इति व्यवस्था तद्बोध्यार्थनिष्ठान्वययोग्यतामाश्रित्यैव। अनुशासनमपि एतत्सिद्धार्था-नुवादकम्। तथा च क्तप्रत्ययः तदैव विवक्षितुं शक्यः यदि "चन्द्र" इति क्रिया - वाचको भवति। एवं योग्यतायाः अस्वीकारे "चन्द्र" इति नाम्नोऽपि क्तप्रत्ययं कश्चित् समूहेत्, येन अनयोः सम्बन्धसामान्येनान्वयेन चन्द्राभिन्नः कर्तेत्यपि बोधं वदेत् यश्च नेष्टः। अतः अन्वयप्रयोजकरूपवत्त्वमवश्यमपेक्ष्यते अन्विते पदार्थे। ततश्च कृत्प्रत्ययार्थान्वययोग्यप्रकृत्यर्थे तदन्वयप्रयोजकं रूपं क्रियात्वमवश्य-मपेक्षितमिति भावः।

ननु पक्वानित्यादिषु धातोः फलमात्रार्थकत्ववादिमीमांसकमते अन्वयोपपत्त्य-भावेऽपि भवन्मते धात्वर्थे कारकान्वयितावच्छेदकस्य क्रियात्वस्य सत्त्वात् प्रकृतिप्रत्यययोः अन्वितार्थबोधकत्वं तत्र प्रत्ययार्थस्य प्राधान्यं च वक्तुं शक्यमेव। अङ्गीकृतश्चायं न्यायः सर्वैरपि शास्त्रकारैः। कृद्वृत्तौ भवतापि प्रत्ययार्थप्राधान्यमेव स्वीक्रियते। तथा च तिङन्ते प्राधान्येन अभिधीयमानायाः भावनायाः प्रत्ययार्थत्वं तस्याः प्रकृत्यर्थापेक्षया प्राधान्यं च युक्तमिति वदन्तं प्रत्याह - **वस्तुतस्त्विति**। अयं न्यायः वैयाकरणैः उत्सर्गरूपेण स्वीक्रियते। सति चापवादेऽयं न्यायः

परित्यज्यते। तदेतत्सर्वमुपपादयितुमुपक्रमते - **वस्तुतस्त्विति**। अत्र "कृदर्थ-कर्त्राक्षिप्तभावनायां पाकादीनामन्वयसम्भवात् नोक्तदूषणमत आह - वस्तुतस्त्विति" **दर्पण-परीक्षा-प्रभाकाराः**। एतन्न युक्तम्। अग्रे "नन्वस्तु तिङ इव कृतामपि भावना वाच्येत्यत आह - अपीति" इति मूले एव एतादृशावतरणिकायाः अन्यार्थत्व-प्रतिपादनात्।

8.5.1. प्रत्ययार्थः प्रधानमिति न्यायविचारः

॥**प्रत्ययार्थः प्रधानमिति** ॥ "प्रकृतिप्रत्ययार्थयोः प्रत्ययार्थः प्रधानम्" इति न्यायो यदि नियामकः तर्हि तत्र उभयथा नियमः सिद्ध्यति। तत्र एकः नियमप्रकारः- "योऽर्थःप्रत्ययान्तार्थे प्रधानतया बुध्यते सः प्रत्ययार्थ एव" इति। अन्यश्च "प्रत्ययार्थरूपेण अवगतोऽर्थः प्रकृत्यर्थनिष्ठप्रकारतानिरूपितविशेष्यतावानेव" इति। एवमुभयविधस्यापि नियमस्य "अजा छागी" इत्यादिस्त्रीप्रत्ययान्तेषु व्यभिचारः।अजेत्यादिस्त्रीप्रत्ययान्तार्थे विशेष्यतया भासमाना अजारूपा व्यक्तिः, तस्या एव प्रत्ययार्थत्वं नाम स्त्रीप्रत्ययार्थत्वं वक्तव्यं प्रथमप्रकारनियमाश्रयणे। तच्च न कस्यापि सम्मतम्। अथ व्याकरणशास्त्रेण स्त्रीप्रत्ययस्य स्त्रीत्वरूपोऽर्थः बोधित इति प्रत्ययार्थरूपेणावगतोऽर्थ एव प्रकृत्यर्थं प्रति विशेष्य इति द्वितीयप्रकार-नियमाश्रयणेऽपि अजागतस्त्रीत्वस्य प्राधान्यं स्यात्। स्त्रीत्वादीनां प्रकृत्यर्थ-विशेषणत्वस्यैव सर्वसम्मतत्वात्। अतश्च उभयथापि नियमः स्त्रीप्रत्ययेषु व्यभिचरित इति अस्य न्यायस्य औत्सर्गिकत्वमेव लभ्यते। तथा च कृत्तद्धित-प्रत्ययविषये अस्य न्यायस्य प्रवृत्तौ बाधकाभावात् तत्रास्य औत्सर्गिकस्य न्यायस्य प्रवृत्तिः। यत्र बाधः तत्र अप्रवृत्तिः अपवादस्य सत्त्वात् इत्यर्थः। अत्र इदं बोध्यम्। अयं प्रत्ययः, इयं प्रकृतिः, अयं प्रत्ययार्थः, अयं प्रकृत्यर्थः इत्यादिनिर्णयः व्याकरणशास्त्राधीनः। व्याकरणेन च तिङर्थतया कालसंख्याकर्तृकर्मभावा एवानुशिष्टाः। तत्प्रकृतिश्च धातुः क्रियावाचकत्वेनानुशिष्टः। ततश्च तिङन्ते प्रकृत्यर्थप्रत्ययार्थयोः निर्णये जाते "भावप्रधानमाख्यातम्" इति निरुक्तं "भावार्थाः कर्मशब्दाः" (मी 2-1-1-1) इति जैमिनीयं सूत्रं "रमते ब्राह्मणकुलम् इति क्रियाप्रधानमि"ति महाभाष्यवचनं "पचति भवती"त्यादि प्रयोगांश्च प्रमाणीकृत्य भावस्य क्रियायाः भावनापर्यायाः एव प्राधान्यं प्रत्ययार्थापेक्षया सिद्ध्यतीति प्रधानप्रत्ययार्थवचनस्य तिङन्तविषये सङ्कोचः क्रियते। तथैव स्त्रीप्रत्यय -

विषयेऽपि। स्त्रीप्रत्ययार्थत्वेन स्त्रीत्वस्यैव शास्त्रेण बोधितत्वात् तस्य प्राधान्ये तस्य क्रियान्वयाद्यनुपपत्तिरिति तत्र क्रियान्वययोग्या प्रकृत्यर्थभूता व्यक्तिरेव प्रधानं भवति, प्रत्ययार्थस्त्रीत्वं च तद्विशेषणं भवति इति स्त्रीप्रत्ययविषयेऽपि तस्य न्यायस्य सङ्कोच इत्यर्थः। पूर्वोक्तनियमद्वयस्यापि स्त्रीप्रत्ययविषये व्यभिचारमेव प्रदर्शयति - **अजा अश्वेत्यादिना** ॥ यः प्रधानं स प्रत्ययार्थ एव इति नियमे अजादेः प्रत्ययार्थत्वविरहेण प्राधान्यानापत्तिः अजादिरूपव्यक्तेः प्रकृत्यर्थत्वात्। द्वितीय - नियमे तु प्रत्ययार्थत्वेन निर्णीतस्य स्त्रीत्वस्य प्राधान्यापत्तिः। "स्त्रियाम्" (पा.4-1-3) इति सूत्रे भाष्ये टाबादिप्रत्ययैः स्त्रीत्वस्याभिधाने तस्यैव प्राधान्यात् स्त्रीत्वस्य एकत्वाच्च कुमार्यौ कुमार्यः इत्यादिषु द्विवचनबहुवचनयोरनुपपत्तिरिति आशङ्क्य यथा शुक्लं वस्त्रं शुक्ला शाटी शुक्लः कम्बलः शुक्लौ कम्बलौ इत्यादि गुणवचनानां शब्दानां शुक्लत्वरूपगुणस्यैकत्वेऽपि आश्रयतः गुणवद्द्रव्यमाश्रित्य लिङ्गवचनानि भवन्ति तथा स्त्रीत्वाश्रयद्रव्यमाश्रित्य द्विवचनबहुवचनयोरुपपत्तिः साधिता। तथा चानेन भाष्येण स्त्रीप्रत्ययार्थस्त्रीत्वस्य प्रकृत्यर्थविशेषणत्वमेव ज्ञायते। उक्तञ्च "स्त्रियामि" (पा.4-1-3)ति सूत्रे कैयटेन "कुमारीशब्देन द्रव्यस्यैवाभिधाना-त्तद्गतसंख्यानिमित्ता वचनोत्पत्ति"रिति। भर्तृहरिणापि -

सोऽयमित्यभिसम्बन्धात् आश्रयं प्रतिपद्यते ।
स्त्रीत्वं स्वभावसिद्धो वा गुणभावविपर्ययः ॥ (कारिकेयं कैयटेनोद्धृता)

इत्युक्तम्। स्त्रीत्वस्य प्रत्ययार्थत्वेऽपि द्रव्येणोपचरिताभेदम् आश्रयेण द्रव्येण अभिन्नत्वेन लक्षितं सत् द्रव्यमिव संख्याद्यन्वयं प्राप्नोति । अथवात्र प्रत्ययार्थ-प्राधान्यस्य प्रकृत्यर्थाप्राधान्यस्य च विपर्ययः, स्वाभाविकत्वात् - धर्मरूपे विशेषणतायाः धर्मिरूपे विशेष्यतायाश्च स्वाभाविकत्वादिति। नागेशेनापि उद्योते स्वाभाविकत्वाद्वेति प्रतीकमुपादाय "प्रत्ययार्थप्राधान्यं तूत्सर्गः इति भावः" इत्युक्तम्। यद्यपि स्त्रीप्रत्ययविषये "स्त्रियाः प्रातिपदिकविशेषणत्वात् स्वार्थे टाबा-दयः इति, प्रातिपदिकार्थगतस्त्रीत्वे द्योत्ये टाबादयः इति" वा कथनेन स्त्रीप्रत्ययानां प्रातिपदिकार्थद्रव्यविशेषणीभूतस्त्रीत्वद्योतकत्वमेव, द्योतकविषये प्रत्ययार्थप्राधान्य-न्यायोऽपि न प्रवर्तते स्वप्रकृत्यर्थगतस्य कस्यचिद्विशेषस्य तेन द्योतकेन बोधनात् तादृशविशेषस्य च सर्वदा विशेषणत्वात्, तथापि सर्वमेतत् वैयाकरणनये घटते। न तु मीमांसकनये। मीमांसकाश्च जातिशक्तिवादिनः। ततश्च जातेराकृतेर्वा

प्रकृत्यर्थत्वात् कथं स्त्रीत्वस्य तद्विशेषणत्वेन प्रकृत्यर्थत्वमुपपादयितुं शक्यम्। अत एव हि जातिव्यक्त्योरभेदमाश्रित्य स्त्रीत्वविशेष्यकबोधोऽपि उपपादयितुमशक्यः, आकृत्यधिकरणोच्छेदापत्तेः। तदुक्तं भूषणे कौण्डभट्टेन - "ननु जातिव्यक्त्योरभेद-स्वीकारात् स्त्रीत्वविशेष्यकबोधे इष्टापत्तिरिति चेन्न। एवं ह्याकृत्यधिकरणोच्छेदापत्ति -रित्येकं द्विकमित्यादौ वक्ष्यामः"। इति ।

अत्र हि **कान्तिव्याख्यायां** प्रत्ययार्थप्राधान्यन्यायस्य द्योतकविषयेऽप्रवृत्तेः सिद्धान्तितत्वेन स्त्रीप्रत्ययानामिव पञ्चकं प्रातिपदिकार्थः पञ्चकं धात्वर्थ इति पक्षाश्रयणेन सुपां तिङां च द्योतकत्वेन तिङन्तेऽपि प्रत्ययार्थप्राधान्यन्यायस्या-प्रवृत्तेः तस्य न्यायस्यौत्सर्गिकत्वकल्पनापि नापेक्ष्यत इति महता प्रबन्धेन निरूपितम्। एतच्च तिङां द्योतकत्वपक्षे सम्यगेव। ये च वाचकत्वमेवेच्छन्ति तत्र तु सङ्कोचस्तु अपेक्षित एव। किञ्चैतत्सर्वं वैयाकरणमते घटते न तु मीमांसकमते। तैः सर्वेषां प्रत्ययानां वाचकत्वस्यैव स्वीकारात्। अत एव न कस्मिंश्चिदपि व्याख्याने द्योतकत्वादिकमाश्रित्य विचारः न कृतः।

ननु "प्रकृतिप्रत्ययार्थयोः प्रत्ययार्थस्य प्राधान्यम्" इति न्यायस्य प्रकृत्यर्थ-प्रत्ययार्थयोः विशेषणविशेष्यभावे नियामकत्वस्य अनङ्गीकारे अत्रेदं विशेष्यं विशेषणमिदमिति निर्धारणाय नियामकाभावात् बोधः अनियतः स्यादत आह - **विशेष्यत्वादिनेति** ॥ **व्युत्पत्त्यनुरोधादिति** ॥ "व्युत्पत्तिः शास्त्रप्रयोज्यसंस्कार विशेषः" इति **सुबोधिनी**। तत्तच्छास्त्रमूलभूतसूत्रवार्तिक भाष्यकारोपदिष्टपदार्थ-संसर्गविषयकनियमप्रयोज्यः संस्कारविशेष इत्यर्थः। सा च प्रतिशास्त्रं भिन्नाऽपि भवितुमर्हति। "शब्दानामर्थावबोधकशक्तिग्रहः व्युत्पत्ति"रिति **शाङ्करी**। "व्युत्पत्तिः कार्यकारणभावः। बोधो व्युत्पत्त्यनुसारी, न तु बोधानुसारिणी व्युत्पत्तिः। स्पष्टं चेदं "कस्माद्वाक्यात्कीदृशो बोधो जायत इति प्रश्ने यो यथा व्युत्पन्नस्तस्य तादृगेवेति स्थिति"रित्यादिना शब्दकौस्तुभेऽपादान(पा.1-4-24)संज्ञासूत्रे इति **तत्त्वदर्शिनी**। "यथा औपगव इत्यादौ "विशेष्यतासम्बन्धेन प्रकृत्यर्थप्रकारकबोधं प्रति विषयतया तदुत्तरप्रत्ययजन्योपस्थितिर्हेतु"रिति कार्यकारणभावानुरोधात् इत्यर्थः इति **कान्तिः**। भाष्याद्यनुसारिणी पदार्थसंसर्गस्य विशेषणविशेष्यभावस्य नियामिका तत्तद्बोधकार्यकारणभावमूला व्युत्पत्तिरिति **परीक्षा**। "व्युत्पत्तिः शास्त्रप्रयोज्यप्रकृति - प्रत्ययस्वरूपतदर्थतदन्वयादिविषयकयथार्थज्ञानजन्यसंस्कारविशेषः, सा च

अत एव नैयायिकानां प्रथमान्तविशेष्यक एव बोधः। लक्षणायामालङ्कारिकाणां शक्यतावच्छेदकप्रकारक एव बोधो न नैयायिकादीनाम्। घटः कर्मत्वमानयनं कृतिरित्यादौ विपर्ययेणाऽपि व्युत्पन्नानां नैयायिकनव्यादीनां बोधो न तद्व्युत्पत्तिरहितानाम्। अन्येषां तन्निराकाङ्क्षमेवेत्यादिकं संगच्छते।

तत्तच्छास्त्रप्रयोज्यसंस्कारानुरोधात्। तथा च तत्तच्छास्त्रप्रयोज्यव्युत्पत्त्यनुसारी बोधः न तु बोधानुसारिणी व्युत्पत्तिः इति **प्रभा**। एवं च तत्तद्व्युत्पत्तिभेदात् तत्तद्बोधवैलक्षण्यमित्यर्थः।॥ **अत एवेति** ॥ तत्तच्छास्त्रीयानां बोधस्य तत्तच्छास्त्र - व्युत्पत्त्यनुसारित्वादेव। **प्रथमान्तेति** ॥ कालातिरिक्ताख्यातार्थप्रकारकबोधं प्रति अन्याविशेषणीभूतप्रथमान्तपदजन्योपस्थितिः हेतुरिति व्युत्पत्तिः नैयायिकैरङ्गीकृता। अत्रेदमाकूतम्। भावनामुख्यविशेष्यकशाब्दबोधे निरुक्तमहाभाष्यवार्तिककारजैमिन्यादिमुनिवचनानि प्रमाणानि सन्ति। तथा प्रथमान्तार्थमुख्यविशेष्यकबोधे मुनिवचनप्रमाणमपि मृग्यमेव। "ते विभक्त्यन्ताः पदम्"(न्या-2-2-58) इति सूत्रे न्यायवार्तिककारेण "विभक्तिर्द्वयी नामिक्याख्यातिकी च। नामिकी स्वादयः। आख्यातिकी तिबादयः। तया विशिष्यमाणं पदं द्वेधा भवति नाम च आख्यातं च। क्रियाकालयोगाभिधायि क्रियाप्रधानमाख्यातम् पचतीति यथे"-त्युक्तम्। तत्रैव व्याख्यायां वाचस्पतिमिश्रैः "तदनेन पचति पच्यते पचेत स्थीयते इति सर्वमाख्यातं सङ्गृहीतं भवती"त्युक्तम्। "क्रियाप्रधानमाख्यातम्" इत्यत्रत्यक्रियापदेन कृतिरभिधीयत इति न चिन्तनीयम्। कर्त्रर्थकप्रत्ययान्तेषु तस्याः वाच्यत्वस्वीकारेऽपि कर्मभावप्रत्ययान्तेषु तस्या वाच्यत्वस्यैव अस्वीकारात्। "तदनेन सर्वमाख्यातं सङ्गृहीतं भवति" इति वाचस्पतिवचनेन उक्तमाख्यातलक्षणं सर्वतिङन्तविषयमिति स्पष्टमवगतेः क्रियाशब्देन व्यापार एव स्वीकरणीयः। तस्य च धात्वर्थत्वमेव प्राचीननैयायिकाभिमतमिति प्राचीननैयायिकानां भावना(व्यापार)-मुख्यविशेष्यकबोधे एव तात्पर्यमवगम्यते। एवं मुनिवचनरूपप्रमाणाभावेऽपि युक्तिमवलम्ब्य ते प्रथमान्तार्थमुख्यविशेष्यकं बोधमङ्गीकुर्वन्ति तथैव व्युत्पादयन्ति च। ततश्चेदानीं नैयायिकानां सर्वेषां प्रथमान्तमुख्यविशेष्यकबोधे एव नैर्भर्यं दृश्यते।

8.5.2. लक्षणाविचारः

॥**लक्षणायामिति** ॥ "गङ्गायां घोष" इत्यादौ। लक्षणायाः उपचारवृत्तिरिति व्यवहारः। उपचारो नाम आरोपः। तथा च कस्य कुत्र आरोप इति प्रश्नः। तत्र आलङ्कारिकाः लक्ष्यार्थे शक्यतावच्छेदकस्य आरोपं स्वीकुर्वन्ति। तथा हि - "गङ्गायां घोष" इत्यत्र गङ्गाप्रवाहस्य घोषाधिकरणत्वं बाधितमिति तेन गङ्गापदेन तीरं लक्ष्यते। ततश्च "तीरे घोषः" इत्येवार्थः । परन्तु "गङ्गातीरे घोषः" इत्येव वक्तव्ये "गङ्गायां घोषः" इति कथनेन द्वयोरपि वाक्ययोः तात्पर्यभेदः कश्चन वर्तते। तन्निर्वाहार्थं बोधेऽपि कश्चन भेदः अङ्गीकरणीयः। तथा च "गङ्गातीरे घोष " इति वाक्यजन्यबोधे गङ्गातीरं गङ्गातीरत्वेनैव बुध्यते। "गङ्गायां घोष" इति वाक्य-जन्यबोधे तु गङ्गातीरं गङ्गात्वेन बुध्यते। तथा च शक्यतावच्छेदकस्य गङ्गात्वस्य तीरे आरोपात् "गङ्गात्वावच्छिन्ने(तीरे) घोष" इति बोधः । तीरस्य गङ्गात्वा-वच्छिन्नत्वेन बोधात् गङ्गायामिव तीरेऽपि शैत्यपावनत्वादिकं प्रतीयते। एतादृश-शैत्यपावनत्वादिप्रतीतिः "गङ्गातीरे घोष" इति वाक्यान्न भवति इति वाक्यद्वये तात्पर्यभेदः सिद्ध्यति। तथा च लक्ष्ये शक्यतावच्छेदकस्य आरोपः लक्षणा। शक्यतावच्छेदकावच्छिन्नत्वेन यत्र शक्यार्थसम्बद्धस्य अन्यस्य बोधो भवति तत्र लक्षणेति आलङ्कारिकाः कथयन्ति। तदाह - **शक्यतावच्छेदके**ति ॥ अत एव तत्र व्यञ्जनया चमत्कारावहः बोधः। शक्यतावच्छेदकारोपरूपलक्षणायाः विषये **भूषणे** उदाहरणद्वयं दत्तम्। तत्र एकं प्रसिद्धं "गङ्गायां घोष" इति । द्वितीयं च -

जाता लता हि शैले जातु लतायां न जायते शैलः।
सम्प्रति तद्विपरीतं कनकलतायां गिरिद्वयं जातम्॥ [2]इति।

उभयत्र शक्यतावच्छेदकावच्छिन्नत्वेन लक्ष्यार्थबोधे एव चमत्कारः गङ्गात्वा-वच्छिन्नत्वेन तीरे शैत्यपानवत्वादिप्रतीतिः कनकलतात्वावच्छिन्नत्वेन स्त्रियः गिरित्वावच्छिन्नत्वेन कुचयुग्मस्य च बोधे एव चमत्कार इत्या**लङ्कारिकाणां** पन्थाः। **नैयायिकास्तु** "यद्धर्मावच्छिन्नस्य शक्यार्थसम्बन्धः तस्य तद्धर्मावच्छिन्नत्वेनैव बोधः अर्थात् लक्ष्यतावच्छेदकावच्छिन्नत्वेनैव लक्ष्यार्थबोधः। शैत्यपावनत्वादि-प्रतीतिः

---

[2] कुवलयानन्दे विभावनालङ्कारस्य उदाहरणम् इदं पद्यम्।

चमत्कारो वा गङ्गादिशब्दैः स्ववृत्त्या अप्रतिपादनादेव। शक्यतावच्छेदका - वच्छिन्नत्वेन लक्ष्यार्थबोधस्वीकारे

"कचतस्त्रस्यति वदनं वदनात् कुचमण्डलं त्रसति ।
मध्याद्बिभेति नयनं नयनादधरः समुद्विजति ॥

इत्यत्र कचत्वेन राहोः, वदनत्वेन चन्द्रस्य, कुचमण्डलत्वेन चक्रवाकयुगलस्य, मध्यत्वेन सिंहस्य, नयनत्वेन मृग्याः, अधरत्वेन बिम्बफलस्य बोधेऽपि कचत्वादि-विशिष्टानां त्रासहेतुत्वाभावात् अन्वयासम्भवः। राहुत्वेन राहुबोधे एव त्रासहेतु-त्वस्योपपत्तेः। अत एव "शक्यादन्येन रूपेण ज्ञाते भवति लक्षणा" इति सङ्गच्छते। अन्येन रूपेण ज्ञानं च लक्ष्यतावच्छेदकावच्छिन्नत्वेनैव" इति वदन्ति।

आलङ्कारिकाः पुनरत्रैवं कथयन्ति - शक्यतावच्छेदकावच्छिन्नत्वेन लक्ष्यार्थबोधो नाम न शक्यतावच्छेदकावच्छिन्नत्वेन पदार्थबोधः किन्तु शक्यतावच्छेदका-वच्छिन्नत्वेन लक्ष्यतावच्छेदकावच्छिन्नस्य बोधः। तथा च कचादिशब्दैः कचत्वादिना राहुत्वाद्यवच्छिन्नस्यैव बोधात् तदवच्छिन्नस्य त्रासहेतुत्वेन न काचिदनुपपत्तिरिति। स्पष्टमेतत् सर्वं **कान्ति - काशिका - प्रभा - शाङ्करीषु** ।

॥ **नैयायिकनव्यानामिति** ॥ वाक्यार्थाङ्गभूतकृतिकर्मत्वादिपदार्थानां बोधे तत्तद्विभक्तिज्ञानं कारणमिति सर्वैरङ्गीक्रियते। ततश्च घटकर्मकमानयनमिति तदनुकूला कृतिरिति वा बोधे घटशब्दोत्तरम् अम्प्रत्ययस्य आङ्पूर्वकनीञ्धातूत्तरं तिङ्प्रत्ययस्य च ज्ञानं (श्रावणं प्रत्यक्षं) कारणमिति "घटमानये"ति वाक्यादेव तादृशः बोधः न त्वन्यादृशात्। उक्तं च वाक्यपदीये -

"स्वशब्दैरभिधाने तु सम्बन्धोऽसौ न गम्यते।
विभक्त्यादिभिरेवासौ उपकारः प्रतीयते॥ इति ।(वा.प.साधन.13)

ततश्च अम् पदस्य स्थाने तदर्थवाचकं पदान्तरं स्वीकृत्य "घटमानये"त्यर्थे "घटः कर्मत्वम् आनयनं कृतिः" इति कश्चित् प्रयुङ्क्ते तर्हि ततो बोध एव न भवतीति सर्वे शास्त्रकाराः अङ्गीकुर्वन्ति। अनुभवसिद्धश्चायं विषयः। तत्र बोधाभावे आकाङ्क्षा -विरहः एव कारणम्। तथा हि – कर्मत्वादिविशेष्यकघटादिप्रकारकान्वयबोधे अव्यवहितोत्तरवृत्तित्वसम्बन्धेन घटादिपदे अम्पदवत्त्वरूपा आकाङ्क्षाऽपेक्ष्यते। एतदेव "तत्पदे तत्पदवत्त्वमाकाङ्क्षे"ति लक्षणेन बोध्यते । उक्तं च चिन्तामणिग्रन्थे आकाङ्क्षावादे गङ्गेशोपाध्यायेन "नामविभक्तिधात्वाख्यातक्रियाकारकपदाना-

मन्वयबोधे तान्येव पदानि समर्थानि न तु तदर्थकानि पदान्तराणि, "अग्निः करणत्वम् ओदनः कर्मता पाकः कृतिरिष्टसाधनम्" इत्यादिपदेभ्यः "अग्निना ओदनं पचे"त्यत्रेव अन्वयाबोधात्" इति । क्रियान्वययोग्यः द्वितीयादिविभक्ति-प्रतिपाद्यः कर्मत्वादिरेव न तु तदर्थकपदान्तरकर्मत्वादिप्रतिपाद्यः, एवं क्रिया-विषयेऽपि इति तस्याशयः। एवं स्थिते अस्मादपि वाक्यात् कस्यचित् नैयायिकनव्यस्य बोधो भवति चेत् तत्र कारणं तेषां तद्विषयकव्युत्पत्ति-वैलक्षण्यमेवेति वक्तव्यम्। "व्याकरणेन यया आनुपूर्व्या प्रकृतिप्रत्यया अनुशिष्टाः तदानुपूर्वीकपदजन्यपदार्थोपस्थितेरेव शाब्दबोधकारणत्वमि"ति प्रामाणिकानां सिद्धान्तः। न तद्विपर्ययेणेत्यर्थः। तथा च "अम् + घटः ति + आनी" इत्येतादृशा-दपि बोधः येषां ते विपरीतव्युत्पन्ना इति **तत्त्वदर्शिनी। कान्त्यां** विपर्ययेण व्युत्पन्नानामिति प्रतीकमुपादाय उपयुक्तः विचारः कृतः। सचात्र संक्षिप्यते - "विपर्ययेणापि व्युत्पन्नानामिति। असद्व्युत्पन्नानामित्यर्थः। सद्व्युत्पन्नत्वं च व्याकरणशास्त्रोक्तप्रकृतिप्रत्ययविभागतत्तदर्थविभागतत्तदन्वयबोधविषयकज्ञा न- वत्त्वम्। तद्भिन्नानामित्यर्थः। अथवा विपरीतप्रयोज्यप्रयोजकवृद्धव्यवहारतो व्युत्पन्नानामित्यर्थः। तथा हि - द्वितीयाद्यभिधेयकर्मत्वादीन् कर्मत्वादिशब्दैरेव बोधयितुं वाञ्छता केनचित् व्याकरणाभिज्ञेन प्रयोजकवृद्धेन प्रयुक्तं "घटः कर्मत्वम् आनयनं कृतिः" इति वाक्यं श्रुत्वा येन प्रयोज्यवृद्धेन व्याकरणलक्षणेन अर्थानुसन्धानपूर्वकं घटीया कर्मतेत्यर्थमवगम्य घट आनीतः तदीयघटानयनं पश्यतो बालस्य नूनमस्मिन्नर्थे इदं वाक्यं शक्तमिति शक्तिग्रहः साकाङ्क्षाग्रहश्च भवतीति भावः। एवं दिशा व्युत्पत्तिरपि व्याकरणव्युत्पत्तिमतामेव भवतीत्यपि शब्दः उपात्तः।" इति।

॥**तन्निराकाङ्क्षमिति**॥ घटीया कर्मतेति बोधे तन्निराकाङ्क्षमित्यर्थः। यस्य पदस्य यत्पदव्यतिरेकप्रयुक्तान्वयाननुभावकत्वं तत्पदे तत्पदवत्त्वमाकाङ्क्षा। अभेदबोधे समानविभक्तिकत्वम् , विरुद्धविभक्तिराहित्यमेव वा आकाङ्क्षा। "नीलं घटमानये"-त्यादौ नीलपदं विनापि "घटमानये"त्यत्र अन्वयदर्शनात् घटः कर्मत्वमित्यादौ त्वभेदबोधीयसामग्रीसत्त्वेऽपि बोधो न, योग्यतायाः अभावात्। वस्तुतस्तु योग्यता ज्ञानं न शाब्दबोधे कारणं न वा अयोग्यतानिश्चयः बोधप्रतिबन्धकः "वन्ध्यासुतो याति, वह्निना सिञ्चती"त्यादावपि बोधदर्शनात्। कथमन्यथा एतद्वाक्यप्रयोक्तु-

अत एव "प्रधानप्रत्ययार्थवचनमर्थस्यान्यप्रमाणत्वात्"(पा.1-2-56) इत्याह भगवान् पाणिनिः। प्रधानं प्रत्ययार्थ इति वचनं "न" इत्यनुवर्त्य[3] न कार्य्यम्। अर्थस्य अर्थावबोधस्य अन्यप्रमाणत्वाद्व्युत्पत्त्यनुसारित्वादिति हि तदर्थः। एवं सत्यपि नियामकापेक्षणे च "भावप्रधानमाख्यातम्" इति वचनमेव ग्राह्यमिति सुधीभिरूह्यम्।

रद्रवेण वह्निना कथं सेक इत्यपहासः सङ्गच्छेत्। न च अयोग्यतावद्वाक्य-श्रवणानन्तरं श्रोतुः पदार्थोपस्थितिमात्रमेव न तु शाब्दबोध इति वाच्यम्। सर्वत्रैवमेवापत्तेः। "वह्निना सिञ्चेदि"त्यादिवाक्यानां बोधजनकत्वेऽपि प्रवर्तकत्वं न स्यादेव। बाधज्ञानेन जातबोधे अप्रामाण्यशङ्काजननात्। तदनास्कन्दितज्ञानस्यैव प्रवृत्तिजनकत्वात्। यदि च "वह्निना सिञ्चती"ति वाक्यप्रयोक्तरि आप्तत्वबुद्धिः तर्हि वह्निपदेलक्षणया असूयाद्वेषादिप्ररोचकवाक्यादिरूपमर्थं स्वीकृत्य विपरीतलक्षणया कस्यचित् क्रोधशान्त्यै प्रवृत्तः कश्चित् तस्य क्रोधमेव वर्धयतीति सन्दर्भे प्रामाण्यं तस्य वाक्यस्य निर्बाधम्। वस्तुतस्तु समभिव्याहृतकार्यजननसामर्थ्यवत्त्वं योग्यता। सा च शाब्दबोधे भासते। अत एव "घटेन जलमाहरे"त्यादौ सच्छिद्रेतरस्यैव जलाहरणसामर्थ्यवत्त्वेन सच्छिद्रेतरत्वप्रकारको बोधः इत्यादि विस्तरेण लघु-मञ्जूषाग्रन्थात् ज्ञेयम् । ॥**इत्यादिकमिति**॥ आदिपदेन भावाख्यातस्थले नैयायिक-मीमांसकयोः बोधे वैलक्षण्यस्य संग्रहः। नैयायिकास्तत्र तिङः साधुत्वार्थकत्व-माश्रित्य च "चैत्रेण स्थीयत" इत्यादौ "चैत्रकर्तृकास्थिति"रिति धात्वर्थ-विशेष्यकमेव बोधं स्वीकुर्वन्ति। मीमांसकास्तु तिङर्थतया भावं स्वीकृत्य तिङर्थभावमुख्यविशेष्यकबोधं स्वीकुर्वन्ति इत्यादि बोध्यम्।

8.5.3. प्रधानप्रत्ययार्थवचनमितिसूत्रव्याख्या

॥**अत एवेति**॥ बोधस्य तत्तच्छास्त्रव्युत्पत्त्यनुसारित्वादेव। यतः साकल्येन तद्बोधकवचनानि कस्मिन्नपि शास्त्रे न सन्ति अतः व्युत्पत्तिरेव शरणीकरणीया। विशेष्यत्वादिना बोधस्य व्युत्पत्त्यनुसारित्वे पाणिनेः सम्मतिं प्रदर्शयति - **प्रधानप्रत्ययार्थवचनमिति**॥ अष्टाध्याय्यां प्रथमाध्यायस्य द्वितीयपादे लुपि युक्तवद्भावमुक्त्वा "पञ्चाला" इति शब्दाः संज्ञावाचका इति संज्ञावाचकेषु अवयव-

---

[3] अशिष्यमित्यनुवर्त्यैति पाठान्तरम्। अयमेव भूषणसम्मतः पाठः।

शक्तेरभावात् प्रकृत्यर्थप्रत्ययार्थविवक्षायाः अपेक्षैव नेति युक्तवद्भावस्य अशिष्यता उक्ता "तदशिष्यं संज्ञाप्रमाणत्वात्" (पा. 1-2-53) इति सूत्रेण। ततः परं तस्यैव उपष्टम्भकतया लुबपि न वक्तव्यः, योगस्य अवयवार्थस्य च नेदं बोधकं, तथा चेत् प्रत्ययाभावे तदर्थप्रतीतिरेव न स्यादिति "लुब्योगाप्रख्यानात्"(पा. 1-2-54) "योगप्रमाणे चे"(पा. 1-2-55)ति सूत्रद्वयमुपदिष्टम्। यदि च प्रत्यय एव जनपदार्थे नोत्पद्यते तर्हि जनपदस्य "पञ्चाला" इत्यादिशब्दैः प्राधान्येन अभिधानं न स्यात् प्रत्ययार्थप्राधान्यनियमात्, ततश्च प्रत्ययः विधेयः तस्यादर्शनं युक्तवद्भावश्च विधेये इति शङ्कायां प्रत्ययार्थस्य प्राधान्यमपि अशिष्यं लोकत एव लोकानुभवत एव यौगिकेषु कुत्रचित् प्रत्ययार्थस्य कुत्रचित् प्रकृत्यर्थस्य च प्राधान्यं सिद्ध्यतीति बोधनार्थं "प्रधानप्रत्ययार्थवचनम् अर्थस्यान्यप्रमाणत्वात्" (पा. 1-2-56) इति असूत्रयत्पाणिनिः। सूत्रेऽस्मिन् "तदशिष्यम्" (पा. 1-2-53) इति सूत्रात् तदशिष्यमिति अनुवर्तते। तथा च तत् प्रधानप्रत्ययार्थवचनं पूर्वाचार्यसम्मतं "प्रत्ययार्थः प्रधानं प्रकृत्यर्थः प्रत्ययार्थे विशेषणमिति वचनम्" अशिष्यम् - न कार्यम्। अर्थस्य विशेषणविशेष्यभावस्य प्रमाणान्तरसिद्धत्वात् इति अस्यार्थः। अनेन "प्रत्ययार्थः प्रधानम्" इति न्यायस्यौत्सर्गिकत्वं सिद्ध्यति । अत्र मूले बहुषु पुस्तकेषु "नेत्यनुवृत्य" इति पाठः वर्तते। अनेन पूर्वसूत्रात् "न" इत्यस्य अनुवृत्ति-रिति वक्तव्यम्। पूर्वसूत्रेषु "न" इति नास्ति। अतः यथावत् पाठं स्वीकृत्य तस्य समन्वयार्थं (नेत्यर्थकस्य अशिष्यमिति पदस्यानुवृत्तिरिति रूपेण व्याख्यान्तः) व्याख्यातारः क्लेशमनुभवन्ति। **भूषणे** तु "तदशिष्यमि"त्यनुवर्त्य इत्येव वर्तते। अतोऽत्रापि स एव पाठः साधुः। अयमपि पाठः केषु चिदुपलभ्यत एव। अन्य-प्रमाणत्वात् इत्यस्यैव विवरणं तत्तद्व्युत्पत्त्यनुसारित्वादिति। अतश्च विशेषण-विशेष्यभावे व्युत्पत्तिरेव प्रमाणमिति सिद्धम्। **एवं सत्यपीति** ॥ "ननु प्रत्ययार्थस्य क्वचित्प्राधान्यं क्वचिद्विशेषणत्वमित्यत्र यदि न किंचिन्नियामकं तदा भवन्मते आख्यातसमभिव्याहारेऽपि धात्वर्थस्य प्रकारतया भानं कुतो नेत्यत आह - एवं सत्यपीति" इति **परीक्षायां**, "मीमांसकसम्मतप्रत्ययार्थप्राधान्यस्मृतेरव्याप्त्यादिदोष-दुष्टत्वेऽपि इत्यर्थः" इति **तत्त्वदर्शिन्यां**, "व्युत्पत्त्यनुसारेण व्यापारस्य धात्वर्थस्य विशेष्यत्वेन बोधसिद्धौ सत्यामपि" इति **शाङ्कर्यां** च व्याख्यातम्। अत्र तत्त्वदर्शिनी शाङ्करी च समानाभिप्राये। तदेव **तत्त्वदर्शिन्यां** पुनर्विशदीकृतं "मीमांसकमतं

निष्प्रमाणं निर्युक्तिकं भवतु, भवन्मतोपपादकं किमित्यर्थ" इति। वस्तुतः पूर्वोक्तं पाणिनीयं प्रमाणमनुसृत्य न केनापि शास्त्रकारेण स्वस्वव्युत्पत्त्यां पृथक्प्रमाणं न प्रदर्शनीयमेव। किन्तु सम्प्रदायः एव प्रदर्शनीयः। अतः आख्यातार्थमुख्य-विशेष्यकत्ववादिभिः मीमांसकैर्वा धात्वर्थमुख्यविशेष्यतावादिभिः वैयाकरणैर्वा पृथक् प्रमाणं न प्रदर्शनीयमेव। किन्तु भट्टपादप्रदर्शितरीत्या "आख्यातार्थौ भावने" -ति सम्प्रदायः इति सम्प्रदायः प्रदर्शनीयः। एवं च "एवं सत्यपि" इति ग्रन्थः अनपेक्षित इव आपाततः प्रतीयते। परन्तु मीमांसकाः अपि अत्र भावनामुख्य-विशेष्यकव्युत्पत्तौ "भावप्रधानमाख्यातम्" इति निरुक्तवचनमेव प्रमाणयन्ति, वैयाकरणा अपि तदेव वचनमुद्धरन्ति। अतश्चेदं प्रमाणमुभयवादिसम्मतम्। तर्हि एकमेव वचनं कथं वा परस्परविरुद्धविशेषणविशेष्यभावबोधकं भवेत्। अतः अस्य वचनस्य अर्थः क इति निर्धारणीयम्। अर्थे निर्धारिते एव तद्वचनं कस्मिन् पक्षे प्रमाणं कस्मिंश्च नेति अवगम्यत इति तदर्थनिर्णयार्थं भूमिकां रचयति - **एवं सत्यपि नियामकापेक्षायामित्यादिना** ।

8.5.4. भावप्रधानमाख्यातम् इति वचनविचारः

भावप्रधानमाख्यातमिति ॥ भावः - भावना प्रधानं यस्य तत्, भावः - धात्वर्थः व्यापारः प्रधानं यस्य तत् इति वा भावप्रधानमित्यस्यार्थः।आख्यातम् – आख्यात पदव्यवहार्यं भावप्रधानमिति अस्यार्थः। इदानीं आख्यातपदव्यवहार्यं किमित्यत्रैव विप्रतिपत्तिः।प्राचीनाः मीमांसकाः आख्यातपदव्यवहार्यतया तिङन्तमेव स्वी-कुर्वन्ति।एवं च तिङन्तं भावप्रधानमित्यर्थः सिद्धः। मीमांसकानां व्युत्पत्त्यनुसारं भावनायाः प्रत्ययार्थत्वेन प्रत्ययार्थभूतभावनाया एव प्राधान्यं वचनेनानेन बोध्यत इति मीमांसकाः स्वमतोपष्टम्भकतया वचनमिदमुदाहरन्ति। आख्यातपदार्थतया तिङन्तमेवाभिप्रेतं चेत् इदं मीमांसकपक्षोपष्टम्भकमेव भवेत्।अतः अत्रत्याख्यात-पदं न तिङन्तपरं किन्तु धातुपरम्। धातुः भावप्रधान इति अस्यार्थः।तथा च धात्वर्थभावनाप्राधान्यं अनेन सिद्ध्यति इति कौण्डभट्टस्य हृदयम्। अयमत्रा-स्याभिसन्धिः - अत्राख्यातपदेन धातुरुच्यते, आख्यायते सर्वप्रधानीभूतोऽर्थोऽ-नेनेति व्युत्पत्तेः।"चत्वारि पदजातानि – नामाख्यातोपसर्गनिपाताश्च" इत्युपक्रम्य "भावप्रधानमाख्यातं, सत्त्वप्रधानानि नामानि" इति निरुक्ते उक्तम्। तथाचात्र "चत्वारि पदजातानी"त्यस्य चतस्रः पदप्रकृतय इत्यर्थः। तथा च आख्यातशब्दः

8.6. तदागमे हीति न्यायो विवरणं चातिव्याप्तम्

"तदागमे हि"इति न्यायो विवरणञ्चातिव्याप्तमित्याह-किं कृतं पक्वमिति। कृञा विवरणं प्रतीतिश्च पक्वमित्यत्रापि इति तत्रापि भावना वाच्या स्यादिति भावः। नन्वस्तु तिङ इव कृतामपि भावना वाच्येत्यत आह - अपीति। तथा चोभयसाधारण्येन तत्प्रतीतेरुभयसाधारणो धातुरेव वाचक इति भावः। भवद्रीत्या प्रत्ययार्थत्वात् प्राधान्यापत्तिश्चेति द्रष्टव्यम्॥8॥

पदप्रकृतिविशेषबोधको भवतीति तस्य धातुबोधकत्वं सिद्धम्। अत्राख्यातशब्दस्य धातुपरत्वे अग्रे वर्तमानं निरुक्तवचनमेव प्रमाणम् - तत्र नामान्याख्यातजानीति। न च तिङन्तजन्यं नाम भवति किन्तु धातुजन्यमेव। अत एव एतत्समानार्थकं वचनं भाष्ये दृश्यते "सर्वं नाम धातुजमाह शकटस्य च तोकम्" इति । इदं च "तत्र नामान्याख्यातजानीति शाकटायनः" इति निरुक्तवचनस्य अनुवादः। अतश्च स्पष्टमत्र आख्यातशब्दो धातुपरः" इति।

अनेन च वचनेनात्र द्वयं सिद्ध्यति - तत्रैकं धातोः भावार्थकत्वम्। द्वितीयं च आख्यातमित्यन्वर्थाश्रयणात् तस्य मुख्यविशेष्यत्वं च। तथा च वाक्ये सर्वापेक्षया प्रधानीभूतभावार्थकत्वं धातुलक्षणं पर्यवसन्नम्। नन्वेवं कृत्प्रकृतौ धातुत्वं न स्यात् तत्र प्रधानीभूतभावार्थकत्वाभावादिति चेन्न। प्राधान्यस्य धातुलक्षणेऽनिवेशात् क्रियार्थकत्वस्यैव धातुलक्षणत्वात्। अत एव "क्रियावचनो धातु"रिति वचनं सङ्गच्छते । प्राधान्योक्तिस्तु तन्मुख्यविशेष्यक एव बोध इति स्फोरणाय इति **काशिका**। एवं च यन्निरुक्तवचनं भावप्राधान्ये प्रमाणतयोपन्यस्यते मीमासकैः तद्वस्तुतः न तन्मतसाधकम्अपि तु अस्मन्मतसाधकमेवेति भावः। **नागेशस्तु** आख्यातपदस्यात्रत्यस्य तिङन्तपरत्वमेवाभ्युपगम्यापि धात्वर्थभावप्राधान्यं तिङन्ते व्यवस्थापितवान् मञ्जूषायाम्। तच्च तत एवावगन्तव्यम्। एवं चोभयथापि नैतन्निरुक्तवचनं प्रत्ययार्थप्राधान्यसाधकमित्यर्थः। अतश्चात्र वचनमेव प्रमाणं नान्यदिति स्फोरणाय वचनमेव इत्यत्र एवकारः प्रयुक्तः। तथा च यद्वचनं मीमांसकेन भवता अनन्यप्रमाणत्वेनोपन्यस्तं तद्वस्तुतः न भवन्मतोपष्टम्भकम् अपि तु अस्मन्मतोपष्टम्भकमेवेति भावः।

किञ्च मीमांसकाभिप्रेतं भावनायाः तिङर्थत्वं सर्वथा अनुपपन्नम्। यतः तत्र प्रमाणतया प्रदर्शितः "तदागमे हि तद्दृश्यत" इति न्यायः। स च अतिव्याप्तः।

तथैव कृञा (करोतिना) विवरणमपि अतिव्याप्तमित्याह - **तदागमेही ति न्यायो विवरणं चेति**॥

अत्र **दर्पणे** अस्य अवतरणिका इत्थं रचिता - "प्रधानं प्रत्ययार्थ" इति नियमस्य पाणिनिना अनादृतत्वेऽपि "यो यः प्रत्ययार्थः स प्रधानम्" इत्यर्थस्य "तदागमे हि" इति सूत्रयता जैमिनिना आदृतस्य अदुष्टत्वात् आख्यातार्थतयैव व्यापारस्य प्राधान्यम्। टाबादिस्त्रीप्रत्ययानां द्योतकत्वेन न तत्र प्रत्ययार्थप्राधान्यन्यायस्य सम्बन्धः। एकवचनादीनां संख्यावाचकत्वेऽपि "प्रकृत्यर्थप्रकारकबोधं प्रति विशेष्यतया प्रत्ययजन्योपस्थितिः कारणम्" इति कार्यकारणभावे संख्याद्यवृत्तीति प्रत्ययजन्योपस्थितौ विशेषणीक्रियते । तथा च "संख्याद्यवृत्तिः प्रत्ययजन्या उपस्थितिः कारणमि"ति न दोषः। प्रतीयमानार्थस्य प्राधान्यमिति न्यायाकार इत्याशयेनाह - **तदागमे ही**ति इति। । प्रतीयमानस्यार्थस्य प्राधान्यमिति "तदागमे ही"ति न्यायेन बोध्यत इति पूर्वोक्तदर्पणग्रन्थाक्षरार्थः। अयं च अयुक्तः। "तदागमे ही"ति न्यायः प्रतीयमानस्य तत्तत्पदबोध्यत्वनियामकः, न तु प्राधान्यबोधकः। भावनायाः प्रत्ययार्थत्वं यदि तदागमन्यायेन साध्यते तर्हि तस्याः प्राधान्यं प्रत्ययार्थप्राधान्यन्यायेन स्वयं सिद्ध्यतीति मीमांसकमतम्। पश्वेकत्वाधिकरणेऽपि प्रतीयमानस्यार्थस्य अन्वयव्यतिरेकाभ्यां तत्तदर्थत्वं प्रतीयमानार्थस्य प्रधानेन सह अन्वयसम्भवे उपेक्षानर्हत्वं च प्रतिपादितम् न तु प्रत्ययार्थप्राधान्यम्। अतश्च दर्पणस्थः पूर्वोल्लिखितः अवतरणग्रन्थः अयुक्त एव । **विवरणमिति** ॥ पक्वमित्यादौ विवरणं च प्रश्नोत्तररूपमेव। तद्बोधनार्थमेव किमा उल्लेखः। अन्यथा केवलकृतशब्दस्य पक्वपदविवरणतया लोकेऽप्रसिद्धेः दोषोद्भावनमसङ्गतं स्यात्।

अतिव्याप्तमिति ॥ अतिव्याप्तश्च अतिव्याप्तं चेत्यनयोरेकशेषः। "नपुंसकमनपुंसकेने"(पा. 1-2-69)ति एकशेषः एकवद्भावश्च। तथा च उभयमपि व्यभिचरितमित्यर्थः। व्यभिचारमेवप्रदर्शयति - **किं कृतं पक्वमिति** मूले। "पशुना यजेते"त्यादिषु एकवचनागमे एव एकत्वार्थकत्वं तस्य च पशुत्वादीनामिव करणत्वेन भावनान्वय इति दृष्टान्तेन "पचति" इत्याख्याते तिङ्श्रवणे भावनायाः बोधः, तदभावे भावनाबोधाभाव इति अन्वयव्यतिरेकयोः प्रदर्शनेन भावनायाः तिङर्थत्वं साध्यते मीमांसकैः। एतच्च न युक्तम्। अत्र व्यतिरेकस्य व्यभिचारात्। तथा हि - नह्यन्वयमात्रेण तत्तत्पदस्य तत्तदर्थनिश्चयः किन्तु द्वाभ्यामन्वयव्यतिरेकाभ्यां

सहैव। तथा च "पचती"त्यादौ भावनायाः प्रतीत्या "तिङ्सत्त्वे भावनाप्रतीति"-रिति अन्वयः सिद्ध्यति। परन्तु "पक्वान्,पक्वम्" इत्यादिकृदन्तेषु तिङभावेऽपि भावनायाः बोधः दृश्यत इति "तिङभावे भावनाप्रत्ययाभाव" इति व्यतिरेकस्य अभावात् व्यभिचार इत्यर्थः। कथं वा पक्वान् इत्यादिषु भावनाप्रतीतिरिति चेदित्थम् - "भूवादयो धातवः" (पा. 1-3-1) इति सूत्रे भाष्ये धातूनां क्रियावाचित्वं "किं करोति? पचति" इति प्रश्नोत्तरसिद्धकरोतिसामानाधिकरण्येन साधितम्। एवं च यत्र यत्र पूर्वोक्तप्रकारेण करोतिसामानाधिकरण्यं तत्र तत्र भावना - प्रतीतिरित्यर्थः फलति। इदं च करोतिसामानाधिकरण्यं कृदन्तेऽपि दृश्यते - "किं कृतवान्? पक्वान्, किं कृतं? पक्वम्" इति। तथा च तिङि सत्येव (तिङन्ते एव) भावनाप्रतीतिः, तिङभावे भावना प्रतीत्यभाव इति न सिद्ध्यति। किञ्चात्र तेनैव न्यायेन ताभ्यामेवान्वयव्यतिरेकाभ्यां तिङन्ते कृदन्ते च तस्यैव धातोः सत्त्वात् भावनाप्रतीतेश्च धातोः सत्त्वे भावनाप्रत्ययः धातोरभावे तत्प्रतीत्यभाव इति अन्वयव्यतिरेकाभ्यां भावनायाः धात्वर्थत्वमेव सिद्ध्यति। न तु तिङर्थत्वम्। भावनायाः धात्वर्थत्वे एवान्वयव्यतिरेकौ उपपादयितुं शक्यौ न तु तस्याः तिङर्थत्वे इत्यर्थः।

अत्र **शाङ्करी** - " किं कृतम्?" इति प्रश्नः, "पक्वमि"त्युत्तरम्। इदं च प्रश्नोत्तररूपं विवरणम्। तत्र किं कृतमिति प्रश्ने "किं विषयको व्यापारः कृतः" इत्यर्थप्रतीत्या व्यापारस्य जिज्ञास्यत्वमवगम्यते। मीमांसकमतरीत्या पक्वमित्यत्र आख्यात-प्रत्ययाभावेन कर्मणि क्तप्रत्ययान्तेन पक्वमित्यनेन जिज्ञास्यविषयानवगमेन "किं कृतम्?" इति प्रश्नस्य "पक्वम्" इति उत्तरं न भवेत्। तथाचात्र धातोरेव (व्यापार) भावनाबोधकत्वं स्वीकृतं चेत् "पचती"त्यादितिङन्तेऽपि तथैव स्वीकरणीयमिति भावनायाः धात्वर्थत्वात् प्रत्ययार्थत्वाभावाच्च अत्र प्रत्ययार्थप्राधान्यन्यायस्य व्यभिचार इत्यर्थः। पक्वमित्यपि इत्यपिना पक्वान् इत्यस्य समुच्चयः। पक्वमित्यादिकृदन्ते भावनायाः प्रतीतिराक्षेपादिनेति चेत् तिङन्तेऽपि सममिति भावनायाः कुत्रापि पदार्थत्वं न स्यात्, अन्वयव्यतिरेकाभ्यां पदार्थनिश्चयबोधक-न्यायस्य "तदागमे हि तद् दृश्यत" इत्यस्य अत्र अप्रवृत्तिरेव स्यात्" इति ।

एवं "तदागमे ही"तिन्यायस्य व्यभिचारमुक्त्वा विवरणस्यापि व्यभिचारं प्रदर्शयति - **पक्वान् कृतवान् पाकमिति** । यथा - "पचति" इत्यस्य "पाकं करोति" इति कृञा

विवरणं दृश्यते तथा पक्वानित्यस्य पाकं कृतवानिति विवरणं दृश्यते।। अत्र यदि कृञा विवरणं प्रत्ययार्थस्य तर्हि यथा "पचति" इत्यस्य "पाकं करोति" विवरणेन भावनायाः प्रत्ययार्थत्वं तथा पक्वान् इत्यत्रापि "पाकं कृतवान्" इति कृञा विवरणेन भावनायाः प्रत्ययार्थत्वं स्यात्। यच्च मीमांसकैः नेष्यते। प्रत्युत उभयत्र तिङन्ते कृदन्ते च कृञा विवरणदर्शनात् तस्याः प्रत्ययार्थत्वे अन्वयव्यतिरेकयोः असंभवात् प्रकृत्यर्थत्वे च अन्वयव्यतिरेकयोः उपपत्तेश्च विवरणमपि भावनायाः धात्वर्थत्वसाधकमेव स्यात् नाख्यातार्थत्वसाधकम्।

ननु "पचति - पाकं करोती" ति विवरणेन यथा करोत्यर्थस्य प्रत्ययार्थत्वं स्वीक्रियते तथा "पाकं कृतवान्" इति विवरणेन करोत्यर्थस्य क्तवतुप्रत्ययार्थताऽपि स्वीक्रियते, तथा च कृत्तिङ्वाच्या भावनेति सिद्ध्यति, प्रत्ययार्थत्वेन तस्याः प्राधान्यमपि। इति तदेवाशङ्कते - **नन्वस्त्विति**। तत्समाधानम् - **अपीति** ॥ पचतीत्यत्र पक्वानित्यत्र च उभयत्र भावनायाः प्रतीतेः "तदागमे ही"ति न्यायेन उभयत्रान्वयिनः प्रकृतिभागस्यैव तदर्थकत्वकल्पनमुचितं तथा स्वीकारे लाघवमपि अन्यथा अनन्तप्रत्ययानां अनन्तव्यापारेषु शक्तिः कल्पनीयेति गौरवम्। तदाह **तथा चेति** । "तथा च - तिङामिव कृतामपि भावनावाचित्वे, उभयसाधारण्येन - तिङन्तकृदन्तोभयसाधारण्येन, तत्प्रतीतेः - भावनाप्रतीतेः। "साधारण्यं – समभि - व्याहारः। उभयः - तिङ्कृतौ। तदुभयसमभिव्याहारेण तस्यैव धातोः प्रयोगात् उभयसाधारणः - घटकतया प्रयोगद्वयानुस्यूतः। तथा च प्रयोगद्वयेऽपि नियतवृत्तितया धातोरेव भावनावाचकत्वसिद्धिः, धातुत्वस्य शक्ततावच्छेदकत्वेन लाघवमपि" इति **दर्पणः** ।किञ्च यदि भावनायाः प्रत्ययार्थत्वमुच्येत तर्हि तिङन्तस्थले प्रत्ययार्थप्राधान्यनियममाश्रित्य यथा भावनायाः प्राधान्यं स्वीक्रियते तथा कृदन्तस्थलेऽपि भावनाया एव प्राधान्यं स्यात् कर्त्रादीनां न स्यात्। न च पक्वानित्यादौ धात्वर्थकारकैरेव भावनाक्षेप इति वाच्यम्। आख्यातस्थलेऽप्याक्षेपापत्त्या तत्रापि भावनायाः वाच्यत्वं न स्यात्।आक्षेपलभ्यस्य प्राधान्याभावनियमस्य पूर्वमेव निरस्तत्वात्। वैपरीत्यापत्तेः। कृत्यपि भावनाया एव वाच्यत्वापत्तेः। अथ कृत्प्रत्ययोपस्थाप्येऽर्थे लिङ्गसंख्याद्यन्वयित्वदर्शनात् कर्त्रादिकारकस्य वाच्यत्वमावश्यकमिति चेत् तर्हि कालान्वयार्थं भावनाया अपि वाच्यत्वमावश्यकमिति तुल्यम्। किञ्चैवं संख्यान्वयोपपत्तये आख्यातेऽपि कर्ता वाच्यः

स्यात्। आक्षेपलभ्ये कर्तरि संख्यान्वयो न विरुद्ध इति चेत् कृदन्तस्थलेऽपि भावनाक्षिप्तकर्त्रादिषु लिङ्गसंख्याद्यन्वयोऽपि न विरुद्ध इति तुल्यम् इत्यादि **भूषण**तोऽवसेयम्।

अत्रेयं **तत्त्वदर्शिनी** अवश्यम् अवधेया -"प्राधान्यापत्तिरिति॥ कृत्प्रत्यये भावनायाः प्राधान्यापत्तिरिति भावः। न चेष्टापत्तिः। "सत्त्वप्रधानानि नामानी"ति स्मृति-विरोधात्। ननु कृतां कर्तृभावनोभयवाचित्वेऽपि कस्यार्थस्य प्राधान्यमित्यत्र नियामकापेक्षायां "सत्त्वप्रधानानि नामानि" इति स्मृतिप्रमाणेन कर्त्रादिकारकस्यैव प्राधान्यं सेत्स्यतीत्यत आह - चेति। पक्तः पक्तवान् पचति पक्ष्यतीत्यादौ फूत्कारा-दिव्यापारे अनेकप्रत्ययानां शक्तिकल्पना, तादृशानुपूर्व्याः शक्ततावच्छेदकनानात्व-कल्पनेत्यपेक्षया एकस्य धातोरेव तत्र शक्तिकल्पनायां पचित्वस्यैकस्य शक्तता-वच्छेदकत्वकल्पनायां च लाघवं स्पष्टमेवेति भावः। न च समेषां प्रत्ययानामनुकूल-व्यापारमात्रार्थकत्वमेवेति क्व गौरवमिति वाच्यम्। अनुभवानुरोधेनैव शक्तिः कल्पनीयेति अधिश्रयणादिक्रियासमूहे एव शक्यत्वं कल्पनीयमिति पूर्वमेवोप-पादितत्वात्। तथा च मीमांसकैः भावनायाः आख्यातार्थत्वसाधनार्थं प्रतिपादितं युक्तित्रयं युक्त्याभासरूपमेवेति भावः" इति ॥

8.6.1.तस्मात्करोतीत्यादिकारिकायाः तात्पर्यम्

अथात्र "तस्मात् करोति"रिति कारिकया किं विवक्षितमिति किं चिदत्र पुनरव-लोकयामः। "ग्रामः संयोगवान्" इतिवत् "ग्रामो गमनवानि"ति "गमनं न स्पन्द" इत्यादि प्रयोगवारणाय अवश्यमेव व्यापारस्य धात्वर्थत्वमभ्युपेयमिति प्रथमायुक्तिः प्रतिपादिता। तत्र भावविहितप्रत्ययानां भावार्थकत्वात् प्रत्ययेन व्यापारस्य प्रतीत्या तस्यैव प्राधान्येन न तादृशप्रयोगापत्तिरिति मीमांसकेन तत् प्रत्युक्तम्। तदुपरि कर्त्राद्यर्थककृदन्तेषु प्रकृत्या फलस्य प्रत्ययेन कारकस्य च अभिधानात् उभयोः परस्परमन्वयव्युत्पत्तेरेवाभावेन आकाङ्क्षायाः योग्यतायाश्च अभावात् कृतवान् इत्यत्र प्रकृत्यर्थप्रत्ययार्थयोः परस्परमन्वयस्यैवाभावे प्रकृत्यर्थप्रत्ययार्थयोः प्राधान्यविवेचनं दूरतोऽपास्तमिति वैयाकरणैः स्वपक्षः समर्थितः। अत्र पुनः भावार्थाधिकरणे भट्टपादोक्तदिशा द्वयोरपि कारकयोः सम्बन्धसामान्येनान्वयः भवितुमर्हतीति मीमांसकः पुनः स्वपक्षं समर्थितवान्। अत्रायं मीमांसकस्याशयः। यथा च प्राभाकरैः धात्वर्थफलस्य प्रथमान्तार्थे स्वजनकभावनाश्रयत्वेनान्वयः

स्वीक्रियते तथा पक्ववानित्यादिकृदन्तेष्वपि सम्बन्धविधया भावनायाः प्रवेशात् नान्वयानुपपत्तिरिति। अत्र च पुनः वैयाकरणेन एवमुपक्षिप्तम् अभ्युपेत्यवादेन - यदि केवलं कारकमात्रं प्रत्ययार्थः स्यात् तर्हि भवदुक्तरीत्या कथंचित् सम्बन्ध - सामान्येन प्रथममन्वयः, पश्चाच्च भावनां सम्बन्धे निवेश्य स्वजनकभावनाश्रयत्व - सम्बन्धेन धात्वर्थफलस्य कर्तरि अन्वयः, प्रत्ययार्थकर्तुः प्राधान्यमित्यादि सुवचम् पाचकादिषु, परन्तु पक्ववान् इत्यत्र क्तवतुप्रत्ययेन कर्त्रा सह कालोऽपि बोध्यते, तस्य च प्रकृत्यर्थफले प्रत्ययार्थे कर्तरि वा अन्वयः स्वीकृतश्चेत् अतीतभावनाके कर्तरि वर्तमाने तथा व्यापारसमाप्तेः परं फलस्य विद्यमानतादशायां च "पक्ववान्" इति प्रयोगो न स्यात्। इष्यते च सन्दर्भद्वयेऽपि पक्ववानिति प्रयोगः। अतः तस्य कालस्य भावनायामेवान्वयः वक्तव्यः।इदानीं भावनायाः पार्थक्येन पदार्थत्वस्यैवा-भावात् कालस्य अन्वयानुपपत्तिः। स्वप्रकृत्यर्थफले स्वप्रत्ययार्थकर्तरि वा अन्वये दोषस्य प्रदर्शितत्वाच्च न तयोरन्वयः। अतः भावनाया अपि कृदन्ते पदार्थत्वेन भानमवश्यं स्वीकरणीयम्। तच्च धात्वर्थत्वेन स्वीकृतं चेदेव अनेकप्रत्ययेषु तदर्थत्वकल्पनापेक्षया लाघवम्। एतदेव "पक्ववान् कृतवान् पाकमि"ति विवरणेन प्रदर्शितं कारिकायाम्। अत्र "कृतवान्" इति भावनायाः अतीतत्वस्य विवरणम्। अथेदानीं पुनः मीमांसकोऽत्र स्वपक्षं साधयितुमेवं प्रयतेत – क्तवत्वादिप्रत्ययान्तेषु "कर्तरि कृत्" (पा. 3-4-67) इत्यनुशासनात् कृत्प्रत्ययस्य कर्त्रर्थकत्वं, कृतवानिति कृञाविवरणात् भावनार्थकत्वं च स्वीक्रियते। तथा च क्तवतुप्रत्ययस्य भावना कर्ता च अर्थः। तत्र "सत्त्वप्रधानानि नामानि" इति वचनबलात् कर्तुः मुख्यविशेष्यत्वे सिद्धे भावना कर्तरि विशेषणम्, क्तवतुप्रत्ययार्थकालः धात्वर्थ फलं च भावनायां विशेषणम् इति न काप्यनुपपत्तिः। प्रकृत्यर्थफलस्य अनुकूलत्वसम्बन्धेन भावनायामन्वय इति पक्ववानित्यादौ "विक्लित्त्यनुकूल-भूतकालिकभावनाकर्ता" इतीष्टः बोधः सम्पद्यते एवेति। अत्र पुनः वैयाकरणः दोषान्तरं प्रदर्शयति - पक्वमिति कर्मकृदन्तस्थले।अत्रापि कृञा विवरणं प्रत्ययस्य भूतार्थकत्वं चास्तीति अत्रापि प्रत्ययार्थतया भावनाङ्गीकरणीया। तथा च पच्धात्वर्थः फलं विक्लित्तिः। तस्य फलस्य अनुकूलत्वसम्बन्धेन भावनायामन्वयः। तस्यामेव भूतकालस्यान्वयः। भावनायाश्च जनकत्वसम्बन्धेन कर्मपदार्थैकदेशफलेऽन्वयः इति पक्वमित्यस्य "विक्लित्त्यनुकूलभूतकालिकभावना-

जन्यविक्लित्त्याश्रय" इति बोधो वर्णनीय इति फलस्य द्विःभानं स्यात्। तद्वारणाय प्रत्ययार्थभावनायाः धात्वर्थविशेषणत्वे क्लृप्तव्युत्पत्तिविरोधः व्युत्पत्त्यन्तरकल्पना चेति गौरवम्। अत्रापि पुनर्मीमांसकः इत्थं वदेत् - फलव्यापारयोः धात्वर्थत्ववादिना भवतापि कर्मकृदन्तस्थले भावनायाः विशेषणत्वमेवाङ्गीक्रियते, तथैव कर्मप्रत्ययस्थले अस्माभिरपि प्रत्ययवाच्यभावनायाः प्रकृत्यर्थविशेषणत्वमङ्गीक्रियत इति समम्। भवतापि फलं प्रति व्यापारस्य प्राधान्यं कर्मप्रत्ययस्थले परित्यज्यते भावनाप्रकारकफलविशेष्यकबोधं प्रति कर्मकृत्समभिव्याहारस्य कारणत्वं कल्प्यते किल, तथैव भवत्वस्माकमपि का हानिः इति। एवं वादिनं मीमांसकं प्रति दोषान्तरं प्रदर्शयति - "किं कार्यं पचनीयं चेत्यादि दृष्टं हि कृत्स्वपि" इति। अत्र "पचनीयमि"त्यत्र पच् -धातोः अनीयर् प्रत्ययः "प्रैषातिसर्गप्राप्तकालेषु कृत्याश्च"(पा. 3-3-163) इति विध्यर्थकः।तथा च प्रकृत्यर्थविषयिणी प्रवर्तना अनीयर्प्रत्ययार्थः।यदि च प्रकृत्यर्थः केवलफलं स्यात् प्रवर्तनायाश्च तत्रान्वययोग्यतायाः अभावात् प्रकृत्यर्थप्रत्ययार्थयोरन्वयानुपपत्तिः। लोके प्रवर्तनायाः क्रियाविषयत्वेनैवानुभूयमानत्वात्। यजेतेत्यादिषु तिङ्त्वेनार्थी-भावना लिङ्त्वेन प्रेरणा च बोध्यत इति मीमांसकसरणिः। अत्र तु प्रेरणामात्रं प्रत्ययार्थ इति भावनायाः प्रतीत्यभावात् विध्यर्थककृत्प्रत्ययस्थले प्रकृतिप्रत्ययार्थयोः अन्वय एव नोपपद्यते। सम्बन्धसामान्येनाप्यन्वयो न शक्यः। तथान्वयस्य न कैश्चिदप्यभ्युपगतत्वात्। एतदर्थमेव विधिप्रत्ययस्थले प्राभाकरैरपि भावनार्थकत्वमङ्गीकृतम्। अतः विध्यर्थककृत्यप्रत्ययान्तेषु प्रत्ययार्थप्रेरणायाः अन्वयसिद्ध्यर्थं प्रकृत्यर्थतया भावनावश्यं स्वीकरणीया।

तथा च –

> तस्मात् करोतिः धातोः स्याद्व्याख्यानं न त्वसौ तिङाम्।
> पक्ववान् कृतवान् पाकं किं कृतं पक्वमित्यपि ।
> किं कार्यं पचनीयं चेत्यादि दृष्टं हि कृत्स्वपि ॥ (वै.सि.का.8,9)

इति कृद्विषयं स्थलत्रयं प्रदर्श्य कृञा विवरणं धातोरेव न प्रत्ययस्येति साध्यते । अतश्च "किं कार्यं पचनीयमि"त्यादिकारिकापूर्वार्धः "तस्मात्करोतिरि"ति कारिका-शेषभूत इत्यपि व्याख्यातुं शक्यम्।

9.0 धातोः व्यापारावाचकत्वे कर्मणि कर्तरि च विहितानां कृताम् अन्वयासम्भवः

व्यापारस्य धात्वर्थत्वे साधकान्तरमाह-

किं कार्यं पचनीयं चेत्यादि दृष्टं हि कृत्स्वपि ।

किञ्च क्रियावाचकतां विना धातुत्वमेव न ॥ 9 ॥

"कार्यम्" इत्यत्र "ऋहलोर्ण्यत्" (पा. 3-1-124) इति कर्मणि ण्यत्। "पचनीयम्"इत्यादौ चानीयर्। आदिना "ज्योतिष्टोमयाजी" इत्यादौ करणे उपपदे कर्तरि णिनिः। एते च क्रियायोगमन्तरेणासन्तः तद्वाच्यतां बोधयन्ति। विना क्रियां कारकत्वासम्भवेन तद्वाचकप्रत्ययस्याप्यसंभवात्।

तर्हि इदानीं प्रश्नः उदेति एवं व्याख्यामकृत्वा कौण्डभट्टः साधकान्तरत्वेन अन्यथैव कुतः व्याख्यामकरोत् इति चेत् - उच्यते । पूर्वं पक्वान् पक्वमित्यादौ यथा कृञा विवरणेन भावनायाः प्रत्ययार्थत्वं स्वीक्रियते तथा विधिबोधककृत्यप्रत्ययेऽपि कृञा विवरणेन भावनाबोधकत्वं स्वीकुर्मः, एवं च न काप्यनुपपत्तिः, गौरवं च फल-मुखमिति न दोषः "प्रकृतिप्रत्ययार्थयोः प्रत्ययार्थः प्रधानम्" इति न्यायस्य सार्वत्रिकत्वसम्पादनमेव फलमत्र इति वदन्तं प्रति "किं कार्यमि"ति तमेव कारिकार्धम् व्याख्यान्तरेण समाधातुम् साधकान्तरमाहेति तत्त्वम् ॥ 8 ॥

साधकान्तरमाहेति। तस्मात् करोतिरिति कारिकाशेषरूपेण किं कार्यमित्याद्यपि भावनायाः कृदन्तस्थले दृष्टान्तान्तरत्वेन व्याख्यातुं शक्यम्। तथा च न केवलं भावकृदन्तस्थले किन्तु कर्मकृदन्ते विध्यादिबोधककृदन्ते च भावनावगतिरिति सर्वत्र तदवगतेः तस्याः धातुवाच्यत्वमेव सिद्ध्यति। एवं व्याख्यामकृत्वा युक्त्यन्तरप्रतिपादकत्वेन "किं कार्य'मि"त्यस्य व्याख्या क्रियते। अस्योद्देश्यं तु पूर्वमेव प्रतिपादितम्। अस्यां च व्याख्यायां "किं कार्यं पचनीयमि"ति नेदं विवरण-प्रदर्शनम्। तर्हि कथं "किम्"शब्देन आरम्भः। **सुबोधिनी**काराः श्रीमन्तः रामप्रसाद-त्रिपाठिनः इत्थमिमां शङ्कामपनुदन्ति - "ननु किं कार्यं पचनीयं चेत्यनयोः प्रश्नोत्तररूपविवरणेनैव व्यापारस्य धातुवाच्यत्वसाधने पूर्वकारिकातो वैलक्षण्यं न स्यात्तत्रापि किं कृतं पक्वमित्यनेन तेनैव रूपेण तत्साधनादतो मूलकर्तुर्भावं प्रकारान्तरेण दर्शयति - **कार्यमित्यत्रे**ति। एवं च किं शब्दोल्लेखः पूर्वं प्रश्नोत्तररूप-विवरणस्य प्रक्रान्तत्वात् बोध्यः।" इति । अनेन च अस्य पूर्वकारिकाशेषत्वमपि सिद्ध्यति। अग्रे सुबोधिनीकारा एव अत्र अन्वयान्तरमित्थं प्रादर्शयन् - "यद्वा

किमित्यस्य अग्रे पचनीयं चेत्यत्रत्यं चकारं पठित्वा किञ्चहि (यस्मात्)कार्यं पचनीयमित्यादि कृत्स्वपि दृष्टम् इति योजना। व्यापारस्य धातुवाच्यत्वे साधकान्तरसमुच्चयार्थकत्वेन तत्सार्थक्यात्। अग्रिमकिञ्चेतिवत्।" इति। अत्यन्तं समीचीनोऽयं समन्वयः व्याख्यान्तरेष्वदृष्टः। तथाचात्र किमः प्रश्नार्थकत्वं नास्ति। किन्तु अग्रे वर्तमानचशब्दसंयोजनेन अस्य युक्त्यन्तरप्रदर्शनार्थकत्वं सिद्ध्यति। "साधकान्तरमाहे"ति मूलमपि अस्यां व्याख्यायामेव सङ्गच्छते। तथा च अयं श्लोकार्धः तन्त्रेण निर्दिष्ट इत्यपि स्वीकर्तुं शक्यते। "किं कार्यमित्यत्र प्रश्नोत्तरभावरूपविवरणेनैव व्यापारस्य धात्वर्थत्वसिद्धिरित्यत्र न तात्पर्यम्। किन्तु प्रश्नोत्तरभावरूपविवरणस्य प्रक्रान्तत्वात् किम उल्लेख इति सूचयन्नाह - कार्यमिति" इति **दर्पणस्याप्ययमेवाभिप्रायः**। यत्तु "अत्र किं शब्दो न प्रश्नार्थकः, किन्तु पूर्वोपक्रान्तत्वात् अनुसन्धानरूपेण छन्दोगताक्षरसंख्यापूरणार्थं प्रयुक्तः। अत एव तं परित्यज्य व्याख्याति - कार्यमिति" **शाङ्कर्यां**, "पूर्वकारिकायां किं कृतं पक्वमित्यपी"ति प्रश्नोत्तररूपविवरणेन व्यापारस्य धातुवाच्यत्वं साधितं तत्प्रसङ्गेनात्रापि किं कार्यमिति किं शब्द उपक्रान्तः, नत्वस्य प्रकृतार्थसाधने उपयोग इति बोध्यम्" इति **तत्त्व - दर्शिन्यां** चोक्तं तदुपेक्ष्यम्। किं शब्दप्रयोजनस्य पूर्वं व्याख्यातत्वात्।

इदमप्यत्रावधेयम्। विवरणवाक्येषु "पाकं करोति, पाकं कृतवान्, पाकः करणीय" इत्यादिषु प्रयुक्तः कृञ्धातुः व्यापारार्थकः (भावनार्थकः/कृत्यर्थकः) इत्यत्र सर्वेषा - मैकमत्यम्। विचार्यमाणमीमांसकमते विवरणवाक्यगतकृञः व्यापारार्थकत्वं (भावनार्थकत्वं) कथम्? यतस्तैः धातोः केवलफलवाचित्वमेव स्वीक्रियते न तु फलव्यापारोभयवाचित्वं, न वा यत्नार्थकत्वम्। तथा च तेषां मते प्रयुक्तः करोतिः व्यापारार्थकत्वेनैव नासिद्ध इति, कथं वा स करोतिः प्रत्ययार्थत्वेन व्यापारं वा भावनां वा प्रतिपादयेत्? न च "पाकं करोती"ति विवरणवाक्ये पाकशब्दवत् करोतिः लक्षणया भावनाबोधक इति वाच्यम्। विवरणवाक्ये पाकशब्दः फलमात्रं बोधयतीति सत्यम्। तत्र पाकशब्दार्थभूतफलव्यापारयोः मध्ये फलांशमात्रस्यैवात्र बोधात् शक्यार्थार्धांशबोधकत्वेन जहदजहल्लक्षणारूपलक्षणाव्यवहारः तत्र घटेत। एवं करोतिविषयेऽपि यदि फलव्यापारोभयार्थकत्वमङ्गीक्रियेत तर्हि पाकशब्दे व्यापारांशत्यागवत् करोतिशब्दे फलांशत्यागेन केवलव्यापारबोधाङ्गीकारेण लक्षणा स्यात्। तेन व्यापारबोधश्च सिद्ध्येत्। व्यापारस्य धात्वर्थत्वमेव ये न

स्वीकुर्वन्ति तेषां मते व्यापारस्य कथमपि धात्वर्थत्वाभावात् लक्षणापि तत्र दुर्वचा। तथा च पाकशब्दोऽपि फलमेव बोधयति। कृञ्धातुरपि उत्पत्तिरूपं फलमेव बोधयतीति वक्तव्यम्। तथा च विवरणवाक्यमेव असम्बद्धार्थबोधकं स्यात्। अथ कथञ्चित् लक्षणया व्यापारार्थकत्वेऽपि उत्पत्तिरूपफलमात्रार्थकात् कृञ्धातोः "ऋहलोर्ण्यत्" (पा. 3-1-124) इति सूत्रेण विहितः कर्मणि ण्यत् अपि न स्यात्। पूर्वोक्तरीत्या कारकाणां भावनान्वयनियमेन भावनायाः अत्र अप्रतीतेः धात्वर्थ-प्रत्ययार्थयोः कारकत्वेन परस्पराकाङ्क्षायाः अन्वययोग्यतायाश्च अभावात्। तथाच धातोः ण्यदादिप्रत्यया एव नोत्पद्येरन्। विवरणवाक्यगतकरोतेः भावनार्थकत्वं अन्यत्र करोतेः तन्नेति तु वक्तुं न शक्यम्। यावत्तस्य भावनार्थकत्वं न प्रसिद्धं तावत् तत्कथमन्यस्य विवरणरूपं भवितुमर्हति। प्रसिद्धार्थ एव शब्दः अन्यस्य विवरणं भवितुमर्हति न सन्दिग्धार्थकः। अतः विवरणवाक्यगतपदेषु लक्षणापि न युक्ता। पाकादिशब्दानां फलवाचकत्वमपि शक्त्यैव ग्रामादिशब्दैः तदेकदेशबोधवत्। अतश्च अवश्यमेव कृञ्धातोः व्यापारवाचित्वमनिच्छताप्यङ्गीकरणीयं कृतवान् कृतं कार्यमित्यादि प्रयोगदर्शनात्। एवं कृञः व्यापारवाचित्वे सिद्धे पचादीनामपि व्यापारवाचित्वं सिद्धमेव। किं करोति? पचति, किं कृतवान्? पक्वान्,किं कृतं ? पक्वं, किं कार्यं ? (करणीयं?) पचनीयम् इत्यादिना कृञा सामानाधिकरण्यस्य पचादेः सिद्धत्वात् "कथं ज्ञायते क्रियावचनो धातुरिति, यदेतेषां करोतिना सामानाधिकरण्यं किं करोति पचति" इत्यादि भाष्यस्यैवात्र मानत्वात्। तथा च कृत्स्वपि "किं कार्यं ? पचनीयम्" इत्यादिप्रश्नोत्तरैः क्रियावाचित्वमनुभूयते। अत्र "कृत्स्वपि" इत्यस्य कृदन्तेष्वपीत्यर्थः। यथा तिङन्ते अनुभूयते तथा कृदन्तेऽपी-त्यर्थः। तदेव पूर्वमपि प्रतिपादितम् -"उभयसाधारण्येन तत्प्रतीतेः उभयसाधारणो धातुरेव वाचक इति भाव" इत्यादिना । एतदेव सूचयति - **कार्यमित्यत्रे**त्यादिना । "कार्यं, पचनीयम्" इत्यनयोः समकक्षतासूचनमेवात्रोद्देश्यम्। कार्यमित्यत्र धातोः व्यापारवाचित्वात् ण्यदुत्पत्तिः सहजा चेत् पचनीयमित्यत्रापि तथा। "कृञ्,पच्" इत्यनयोः समकक्षत्वात्। यदि च पचादिषु व्यापारवाचित्वं नाङ्गीक्रियते तर्हि कृञ्धातावपि तन्न स्यादिति तेन विवरणमेवासङ्गतं स्यात् इति अत्र तात्पर्यम्। **अनीयर्** इति ।"तव्यत्तव्यानीयरः" (पा. 3-1-96) इति कर्मणिविहितः अनीयर् इत्यर्थः। "तयोरेव कृत्य-क्त-खलर्थाः" (पा. 3-4-70) इति सूत्रेण कृत्यप्रत्ययानां

भावकर्मार्थकत्वप्रतिपादनात् सकर्मकेभ्यः कर्मणि अकर्मकेभ्यश्च भावे कृत्यप्रत्ययाः भवन्ति।

अथ इदानीं धातोः व्यापारार्थकत्वसाधिकामसाधारणां युक्तिमाह - **आदिनेत्यादिना** ॥ **ज्योतिष्टोमयाजीति** ॥ ज्योतिष्टोमेन इष्टवान् इति विग्रहे ज्योतिष्टोमशब्दे करणवाचके उपपदे यजधातोः भूते कर्तरि "करणे यजः" (पा. 3-2-85) इति सूत्रेण णिनिप्रत्यये "ज्योतिष्टोमयाजी"ति रूपम्।

ज्योतिष्टोमस्य करणत्वं चेत्थम् निरूपितं **कान्त्यां** -"वैयाकरणानां मते सर्वेषां धातूनां धातुत्वेन भावनापरपर्याये व्यापारे शक्तिः, पचित्वयजित्वादिना तु पाक-यज्ञादिक्रियाविशेषे शक्तिः इति भूवादि (पा. 1-3-1) सूत्रे शब्दकौस्तुभे भट्टोजीदीक्षितः।"द्व्यर्थः पचिः। विक्लेदनं निर्वर्तनं च पचेरर्थः" इति कर्मसंज्ञा (पा. 1-4-49) सूत्रस्थं भाष्यमेवात्रमानम्। भाष्ये पचिः धातुसामान्यस्योप-लक्षणम्। तथा च सर्वोऽपिधातुः द्व्यर्थ इति तत्र विक्लेदनं पचित्वेन धातुत्वेन च निर्वतनं (भावना/व्यापारः) बोध्यते इति उभयं धात्वर्थ एवेति भाष्याशयः। मीमांसकानामस्माकं च केवलमियान् भेदः। ते निर्वर्तनं (भावनां) प्रत्ययार्थत्वेन विक्लेदनं धात्वर्थत्वेन च स्वीकुर्वन्ति, वयं तु उभयमपि धात्वर्थत्वेनैव स्वीकुर्मः। तथा च बोधे भेदो नास्त्येव। एवं चात्र यज्यर्थयागस्य समानप्रकृत्युपात्तभावनायां करणत्वेनान्वयः "यागकरणिका भावने"ति। ज्योतिष्टोमस्य च यागनामधेयत्वेन यज्यर्थयागविशेषणत्वात् ज्योतिष्टोमेनेति करणे तृतीया। अरुणाधिकरणन्यायेन "कटोऽपि कर्म, भीष्मादयोऽपि कर्म" इत्यनभिहित(पा. 2-3-1) सूत्रभाष्यरीत्या च साक्षात् विशेषणानामपि भावनायामेवान्वय इति ज्योतिष्टोमस्य करणत्वेन भावनायामन्वयात् तदुपपदे यजधातोः णिनिः सिद्ध्यति। तथा च "करणे यजः" (पा. 3-2-85) इति सूत्रयतः पाणिनेरपि पूर्वोक्तः बोधः अभिप्रेत इति स्पष्टम्। अत एव हि पाणिनीयस्य व्याकरणस्य वेदाङ्गत्वमपि सङ्गतं भवति। अयं पदविधिः। इयं कृद्वृत्तिः। अतोऽत्र णिनिप्रत्ययविधायकसूत्रे "समर्थः पदविधिः" (पा. 2-1-1) इति परिभाषोपतिष्ठते। तथाचेदं प्रत्ययविधानं समर्थपदाश्रितमिति ज्ञायते। तथा चोपपदविशिष्टात् समर्थाद्धातोः अर्थात् उपपदरूपज्योतिष्टोमपदार्थस्य करणत्वेना-न्वययोग्यार्थप्रतिपादकात् यजधातोः तदर्थकर्तरि णिनिप्रत्यय इति "करणे यजः" (पा. 3-2-85) इति सूत्रस्यार्थः। करणस्य च कारकत्वात् कारकस्य च -

न च गम्यमानक्रियामादाय कारकयोग इति भाट्टरीतिर्युक्ता, आख्यातेऽपि तथात्वापत्तौ तत्रापि भावनाया वाच्यत्वासिद्ध्यापत्तेः।

क्रियाजनकत्वेन क्रियान्वयित्वनियमाच्च उपपदार्थस्य करणत्वेनान्वयः क्रियाया-मेवेति यजतेः क्रियावाचकत्वाभावे तत्र उपपदार्थानन्वयात् उपपदार्थकरणकार्थ-प्रतिपादकत्वाभावाच्च सामर्थ्याभावेन धातोः णिनिः न स्यात्। न च कृत्प्रत्ययस्य णिनेः भावनाकर्त्रुभयार्थकत्वेन तत्रोपपदार्थान्वयान्नदोष इति वाच्यम्। णिनि–प्रत्ययस्योत्पत्तावेव एतादृशधातोः हेतुत्वेन तत्पूर्वमेव तादृशार्थप्रतिपादकत्वस्या-वश्यकत्वात्। निरुपपदकृत्सु पाचकादिषु कृत्प्रत्ययस्य कारकभावनोभयार्थकत्व-माश्रित्य कथञ्चित् प्रकृत्यर्थप्रत्ययार्थयोः अन्वयोपपत्तावपि सोपपदकृद्वृत्तौ तथा उपपादनमशक्यमित्यर्थः।"इति। अन्यासु व्याख्यासु अलभ्योऽयम् अत्यन्त-मुपयुक्तः अवश्यज्ञातव्यश्चेति यथा वन्निर्दिष्टः।

॥**इत्यादाविति**॥ अत्रत्यादिपदेन "कुम्भकारः, पूर्वसरः, गोघ्नः, गोदोहनी, गिरिशः, मूलकोपदंशं भुङ्क्ते, शय्योत्थायं धावती"त्यादिकर्माद्युपपदक-कृत्प्रत्ययाः अभिप्रेताः। अत्र सर्वत्र तत्तद्धातोः तत्तदुपपदेन सह कारकसम्बन्धे सत्येव तत्तत्प्रत्ययोत्पत्तेः। तदेवोपपादयति - **एते च क्रियेति**॥ एते च - णिन्यादयः कृत्प्रत्ययाः, क्रियायोगमन्तरेण - क्रियासम्बन्धं विना क्रियाकारक - सम्बन्धं विना, असन्तः - असंभवन्तः, तद्वाच्यतां - सामर्थ्यसंपादकक्रियावाच्यतां, बोधयन्ति – स्वस्य क्रियावाच्यतायामपि सामर्थ्याभावेन स्वानुत्पत्तेः प्रत्ययोत्पत्ति-योग्यधातोरेव क्रियावाच्यतां बोधयन्तीत्यर्थः। तदेवाह – **विना क्रियामित्यादिना** ।
"सर्वेषु कृत्प्रत्ययेषु भावनाप्रतीतिरेव तस्य धातुवाच्यत्वे मानम्। तथा सति हि कृत्सु भावनाप्रतीतिः कर्मण्यनीयप्रत्ययाद्युत्पत्तिश्चसिद्धा। तव तु भावनायाः आख्यातार्थत्वे कृत्सु वाचकाभावेन भावनाबोधो न स्यात् कर्मणि प्रत्ययाद्य - सिद्धिश्चे"ति अत्र **कान्तिः** ।

ननु भावनायाः धातुप्रत्ययवाच्यत्वाभावेऽपि आक्षेपादिना तस्याः गम्यमानत्वात् गम्यमानां तामादाय कारकत्वोपपादनं शक्यमेव। उक्तं च अभियुक्तैः - "गम्यमानापि क्रिया कारकविभक्तेः प्रयोजिका" इति । उदाहृतं च - "कस्मात् त्वं? ग्रामात्, द्वारं, पिण्डीम्" इत्यादि । अतः भावनाप्रतीतेः प्रकारान्तरेणापि सिद्धत्वात् नेदं तत्प्रतीतिसाधकमिति शङ्कते – **न चेति**। **भाट्टरीतिरिति**॥ "पाचको

9.1 भावनायाः आक्षेप इत्यस्य निरासः

अथ लिङ्गसंख्यान्वयानुरोधात् कर्तुर्वाच्यत्वमावश्यकमिति तेनाक्षेपाद्भावनान्वयः स्यादिति मतम्, तर्हि संख्यान्वयोपपत्तये आख्यातेऽपि कर्ता वाच्यः स्यात्। "पक्वान्"इत्यादौ कालकारकान्वयानुरोधाद्भावनाया अपि वाच्यत्वस्या - वश्यकत्वाच्चेति भावः।

देवदत्तः, पक्वः तण्डुलः" इत्यादौ सामानाधिकरण्यानुरोधात् "सत्त्वप्रधानानि नामानि" इति निरुक्ताच्च कृतां कर्तृकर्माद्यर्थकत्वे धातोः फलवाचकत्वे च सत्यपि कस्यापि क्रियावाचित्वाभावे क्रियां विना कारकत्वासम्भवात् कर्तृकर्मादिकारकैरेव स्वस्वरूपलाभाय स्वीयकारकत्वस्य सम्पादनाय पीनत्वानुपपत्त्या रात्रिभोजनवत् क्रियाऽऽक्षिप्यते। आक्षिप्तां तामादाय तत्सम्बन्धादेव कारकत्वं, कारकार्थकः प्रत्ययश्चेत्येवं रूपया भाट्टरीत्येत्यर्थः" इति **शाङ्करी** । अत्र गम्यमानेति प्रतीक-मुपादाय **तत्त्वदर्शिन्यां** " "कार्यं, कुम्भकारः, सोमयाजी"तिपदानां क्रियासम्बन्धं विना सम्पूर्णार्थप्रतिपादकत्वादर्शनेन अन्ततोऽस्तिक्रियायाः सत्त्वात् तत्क्रियायोग-मादाय कृत्प्रत्ययोत्पत्तिरिति भावः" इति, "अस्तिर्भवन्तीपरोऽ प्रयुज्यमानोऽ-प्यस्ती"ति नियममाश्रित्य गम्यमानास्तिक्रियासम्बन्धात् सामर्थ्ये सति कृत्प्रत्ययो-त्पत्ति"रिति च व्याख्यातम्। वस्तुतः तत्र तत्र तत्तद्धात्वर्थतत्तत्फलानुकूलभावना-न्वये एव तेषां सामर्थ्यं न तु अध्याहृतास्तिक्रियायामन्वयेन, तत्तत्कारकैः तत्तत्कारकान्वययोग्यक्रियाविशेषस्यैवाक्षेपात्। अतश्चात्र नेयं व्याख्या युक्ता। अत एव तत्रैव अस्यां व्याख्यायामरुच्या "यद्वा गम्यमानक्रियामित्यस्य कृदन्ते कर्त्रादिना भावनायाः आक्षेपात् तादृगाक्षिप्तक्रियायाम्" इति कल्पान्तरम् उक्तम्। तत्तुसमीचीनमेव। समाधत्ते - **आख्यातेऽपीति**॥ पचतीत्यादितिङन्तेष्वपि तिबादि प्रत्ययानां "लः कर्मणी" (पा. 3-4-69) त्यनुशासनात् कर्तृकर्मादिबोधकत्व-मेवास्तु। भावना तु पूर्वोक्तरीत्या आक्षेपलभ्या भवतु। तथा च भावनायाः तिङर्थत्वा-भावेऽपि भावनाप्रतीतिसिद्ध्या तिङः भावनावाचकत्वं भवदुक्तं नोपपद्येत।

अथ मीमांसकः पुनरत्रैवं प्रत्यवतिष्ठते - भावनायाः कर्तृकर्मणोर्वा एकस्य वाच्यत्वे सति अन्यस्याक्षेपलभ्यत्वं सिद्ध्यत्येवेति कुत्रापि उभयत्र शक्तिः न कल्प्या, गौरवात्। परन्तु कुत्र किं वाच्यमित्येतत् प्रमाणपरिशीलनपुरस्सरं निर्णेयम्।

9.2 नखभिन्न इत्यादौ समासो न स्यात्

अपिना हेत्वन्तरसमुच्चयः । तथा हि -"नखैर्भिन्नो नखभिन्नः, हरिणा त्रातो हरित्रातः" इत्यादौ "कर्तृकरणे कृता बहुलम्"(पा.2-1-32)इति समासो न स्यात् "पुरुषो राज्ञो, भार्य्या देवदत्तस्य" इतिवदसामर्थ्यात्।

9.3 नखभिन्न इत्यादौ अध्याहृतक्रियामादाय न सामर्थ्यम्

न चाध्याहृतक्रियाद्वारा सामर्थ्यं वाच्यम् , "दध्योदनः, गुडधाना" इत्यादिवत् । अन्यथाऽत्रापि "अन्नेन व्यञ्जनम्"(पा.2-1-34) **"भक्ष्येण मिश्रीकरणम्"**(पा.2-1-35) **इति समासो न स्यादिति वाच्यम्। तत्र विध्यानर्थक्यादगत्या तथा स्वीकारेऽपि "हरिकृतम् " इत्यादौ साक्षाद्धात्वर्थान्वयेनोपपद्यमानस्य "कर्तृकरणे"** (पा.2-1-32) **इत्यस्य आक्षेपेण परम्परासंबन्धे प्रवृत्त्ययोगात्।**

कृदन्तस्थले कृदन्तबोध्यप्रातिपदिकार्थस्य लिङ्गसंख्याद्यन्वययोग्यता अपेक्ष्यते तदुत्तरं जायमानेन सुपा तद्बोधनात्। लिङ्गसंख्याद्यन्वययोग्यता च सत्त्वभूतस्यैवेति भावनायाः असत्त्वरूपत्वात् कृदादिभिः भावनाबोधे तदुत्तरप्रत्ययार्थान्वयः न स्यात्। अतः कृदन्तस्थले कर्तृकर्मादिरेव प्रत्ययेन बोध्यते भावना तु आक्षेपेन लभ्यत इति युक्तम्। तदेवाह – **अथ लिङ्गसंख्यान्वयानुरोधादिति**। **कर्तुः** इति। कर्तुरित्युपलक्षणं कारकान्तराणामपि। समाधत्ते - **तर्हि संख्येत्यादिना**। प्रत्ययेन तत्तदर्थबोधे अन्यप्रत्ययार्थान्वयोपपत्तिरेव कारणं चेत् तिङन्तेऽपि तिङ्प्रत्ययेन संख्यायाः बोधात् तदन्वययोग्यपुरुषस्यापि कर्तृकर्मरूपस्य तेन बोधः अङ्गीकरणीय इति भावनाया इव कर्तृकर्मणोरपि तिङ्वाच्यत्वमेव स्यात्। एवं "पक्ववान्" इत्यादौ क्तवतुप्रत्ययार्थकालकारकान्वयोपपत्तये तत्रापि भावनायाः वाच्यत्वमवश्यमङ्गीकरणीयम्। तदेवाह – **वाच्यत्वावश्यकत्वाच्चेति**॥ ततश्च उभयसाधारण्येन धातोरेव तद्वाचकत्वकल्पनायां लाघवमिति भावनायाः धात्वर्थत्वमेवोचितमिति भावः।

एवं कृद्वृत्तौ दोषं प्रदश्र्य वृत्त्यन्तरे समासवृत्तावपि दोषं प्रदर्शयति – **अपि चेत्यादिना**। कृत्स्वपीत्यत्रत्यः अपिशब्दः हेत्वन्तरसमुच्चयार्थं प्रयुक्त इत्यर्थः।

तथा च "अग्निष्टोमयाजी"त्यत्र यथा कृत्प्रत्ययस्यानुपपत्तिः, तथा "नखभिन्नः, हरित्रात" इत्यादौ समासस्याप्यनुपपत्तिरिति भावः। तदेव उपपादयति – **तथा हीति**॥ "कर्तृकरणे कृता बहुलम्" (पा. 2-1-32) इति सूत्रेण तृतीयातत्पुरुषः

समासो विधीयते। अत्र तृतीयेत्यनुवर्तते। "समर्थः पदविधिः"(पा. 2-1-1) इति परिभाषोपतिष्ठते। कर्तृवाचकं करणवाचकं च तृतीयान्तं समर्थेन कृदन्तेन बहुलं समस्यते, स च तत्पुरुषः इति सूत्रार्थः। एवं च यद्धातुप्रकृतिककृदन्तेन यस्य तृतीयान्तस्य समासो चिकीर्षितः, स च तस्य तदैव सिद्ध्यति यदि तदर्थः तत्कृदन्तार्थनिरूपितकर्तृत्वकरणत्वान्यतरयुक्तो भवति। उदाहरणं च "नखभिन्नः, हरित्रात" इति ।"नखैः भिन्नः नखभिन्न" इति करणतृतीयान्तेन समासस्योदाहरणम्। "हरिणा त्रातो हरित्रात" इति कर्तृतृतीयान्तस्य उदाहरणम्। वैयाकरणानां मते "भिन्न" इति क्तान्तप्रकृतिभूतभिद्धातोः द्वैधीभवनतदनुकूलव्यापाररूपफलव्यापारोभयार्थकत्वात् धात्वर्थव्यापारे नखानां करणत्वेनान्वयाच्च "भिन्न"इति क्तान्तावयवधात्वर्थव्यापारनिरूपितकरणत्वस्य नखेषु सत्त्वात् सामर्थ्य -मस्तीति समासः सिद्ध्यति। एवमेव "हरित्रात" इत्यत्र त्राधात्वर्थव्यापारनिरूपितकर्तृत्वस्य हरौ वर्तमानत्वात् कर्तृतृतीयान्तस्य "हरिणे"त्यस्य "त्रात" इत्यनेन कृदन्तेन समासः सिद्ध्यति । मीमांसकानां मते तु व्यापाररूपभावनायाः केवलं तिङ्वाच्यत्वेन "भिन्नः, त्रातः" इत्यादि कृदन्ते धातोः केवलफलवाचकत्वात् कृतः क्तप्रत्ययस्य च केवलं कर्मार्थकत्वाच्च उभयत्रापि व्यापारार्थकत्वाभावात् तत्तत्करणत्वकर्तृत्वान्वययोग्यव्यापाराभावेन कारकाणां केवलक्रियाकाङ्क्षया क्रियामात्रेणैव अन्वयाच्च अत्र तृतीयान्तकृदन्तयोः परस्परमनन्वयाच्चासामर्थ्यात् समासो न स्यादिति भावः। तत्र दृष्टान्तमाह - **पुरुषो राज्ञः भार्येत्यादि** ॥ यदा च राजसम्बन्धः पुरुषस्य, देवदत्तस्य भार्यासम्बन्धश्च विवक्षितः तदा राजपुरुषयोः भार्यादेवदत्तयोरेव परस्परमन्वयेन राजभार्ययोः परस्परान्वयाभावेन वाक्येऽस्मिन् सन्निहितयोरपि "राज्ञः, भार्या" इत्यनयोः षष्ठी समासो न भवति, असामर्थ्यात्। वाक्ये व्यपेक्षारूपसामर्थ्यवति एव अलौकिकविग्रहवाक्ये एकार्थीभावसामर्थ्यस्यारोपेण समासविधानात्।तथा "नखभिन्नः, हरित्रातः" इत्यत्रापि करणकर्मणोः कर्तृकर्मणोश्च परस्परमाकाङ्क्षाभावेन अन्वययोग्यतायाश्चाभावेनासामर्थ्यात् समासो न स्यादिति भावः ।

नन्विदमयुक्तम्। यत्र साक्षाद्वाक्ये क्रिया श्रूयते तत्र कारकाणां साक्षादेव तत्क्रियान्वयः स्वीक्रियते। यत्र च कारकं श्रूयते वाक्ये क्रिया च न श्रूयते तत्र श्रूयमाणस्य कारकत्वनिर्वाहाय तत्तदन्वययोग्या क्रिया अध्याह्रियते। यथा -

"यश्च निम्बं परशुना यश्चैनं मधुसर्पिषा ।
यश्चैनं गन्धमाल्याद्यैः सर्वस्य कटुरेव सः ॥" (कुवलयानन्दे तुल्ययोगितोदाहरणम्)

इत्यत्र निम्बपरशुरूपकर्मकरणयोः श्रवणात् तयोः तत्तत्कारकत्वनिरूपक-क्रियायाः अश्रवणाच्च तयोरनन्वयापत्तौ तद्योग्यच्छेदनक्रियामध्याहृत्य तस्यां कर्मकरणयोरन्वयेन साधुत्वं विवक्षितोऽर्थश्च वर्ण्यते, एवं मधुसर्पिषः निम्बस्य च कारकद्वयस्य अन्वययोग्यायाः सेचनक्रियायाः, गन्धमाल्यादिकरणकारकान्वयाय तत्करणकपूजनक्रियायाश्चाध्याहारः क्रियते, तथा नखभिन्न इत्यत्र करणकर्मणोः परस्परान्वयोग्यतायाः अभावात् तदन्वययोग्यां द्वैधीभवनानुकूलां क्रियामध्याहृत्य अध्याहृतायां तस्यामन्वयेन सामर्थ्यमुपपादयामः।तथा "हरित्रात" इत्यत्रापि भयापनोदनरूपक्रियामध्याहृत्य तत्र कर्तृकर्मणोरन्वयात् समासः सिद्ध्यति। पाणिनिनापि "दध्योदनः,गुडधाना" इत्यादौ अध्याहृतक्रियामादाय सामर्थ्यमुपपादितम्। तथा हि - तृतीयातत्पुरुषसमासप्रकरणे एव "अन्नेन व्यञ्जनम्" (पा. 2-1-34) "भक्ष्येण मिश्रीकरणम्" (पा. 2-1-35) इति सूत्रद्वयमस्ति, ययोः क्रमशः "दध्योदनः, गुडधानाः" इत्युदाहरणे। प्रथमे दध्ना इति व्यञ्जनवाचकं तृतीयान्तम् अन्नवाचकेन सह समस्यते, द्वितीये च तृतीयान्तं गुडेन इति मिश्रीकरणसाधन-वाचकं भक्ष्येण समस्यते। विग्रहश्च "दध्ना ओदनः" "गुडेन धानाः" इति वक्तव्यम्। अत्र हि दध्ना गुडेनेति करणे तृतीया। ततश्च तयोः कारकत्वात् क्रियायामेव तयोरन्वय इति ओदनधानानामक्रियात्वात् आकाङ्क्षायाः अभावेन परस्परमनन्वयात् असामर्थ्यात् समासो न प्राप्नोतीति आशङ्क्य अध्याहृतोप-सेचनमिश्रणक्रियाद्वारा "दध्ना उपसिक्तः ओदनः, गुडमिश्राः धानाः" इत्येवम् अन्वयमङ्गीकृत्य सामर्थ्यमुपपाद्य समासः साधितः। तथैवात्रापि "नखभिन्न" इत्यादौ अध्याहृतक्रियामादाय सामर्थ्यमस्त्विति शङ्कते - **नन्वेत्यादि** ॥ अथात्र "नखभिन्न" इत्यादौ अध्याहृतक्रियामादाय सामर्थ्योपपादनसन्दर्भे "हरिणा कृत्वा त्रातः" "नखैः कृत्वा भिन्नः" इति **तत्त्वदर्शिन्यां**, "येन विना यदनुपपन्नं तत्तेना-क्षिप्यत" इति न्यायेन नखैरित्यस्य करणकारकत्वेन कारकत्वस्य च क्रियाजनकत्व-रूपत्वेन जनकत्वस्य च जन्यत्वमन्तरानुपपन्नत्वात् तेन करणकारकेण स्वस्वरूपनिरूपकतयाक्षिप्यमाणां करोतिं गृहीत्वेत्यर्थः। तथा च नखकरणक-व्यापारजन्यभेदाश्रयः(नखैः कृत्वा भिन्न) इति शाब्दबोधजननादध्याहृतक्रिया-

मादाय सामर्थ्यमुपपादनीयमित्यर्थः" इति **शाङ्कर्याम्**, "अध्याहृतक्रियामादायेति-करोत्यर्थव्यापारमादायेत्यर्थः ।सामर्थ्यमिति। तथा च "नखैः कृत्वा भिन्न" इति बोधाभ्युपगमेनाध्याहृतार्थमादाय सामर्थ्योपपत्तिरित्यर्थ" इति **दर्पणे**, "अध्याहृतेति – भिन्नादिपदघटककृदर्थकर्मादिना हरिणा इत्यत्र तृतीयार्थकर्त्रादिना वा स्वान्वय-योग्यत्वेन "नखैः कृत्वा भिन्न" इत्येवं क्रियाध्याहारेण तस्यां हर्यादीनामन्वये स्वान्वय्यन्वयित्वरूपपरम्परासम्बन्धेन भिन्नादिपदार्थेऽप्यन्वयसंभवादिति भावः" इति **प्रभायां** च प्रायः एकाभिप्रायक एव ग्रन्थः उपलभ्यते। एतेषां सर्वेषां मूल-भूतस्तु **दर्पणग्रन्थः**। यस्य व्यापारस्य अप्रतीतेः अन्वयासम्भवः तस्य अध्याहारः इति स च भिन्न इत्यत्र द्वैधीभवनानुकूलव्यापारः, त्रात इत्यत्र भीत्यादिदुःखा-पनोदनानुकूलः व्यापार इति तादृशफलानुकूलव्यापारस्य सामान्यस्य अध्याहारोऽ -भिप्रेत इति करोत्यर्थव्यापारमादायेत्यस्यार्थ इति दर्पणग्रन्थस्य तात्पर्यम्। स च भावना उत्पादना व्यापारः निर्वर्तनमित्यादिपदव्यपदेश्य इत्यर्थः।अत्रेयं शङ्का स्यात् "हरिणा कृत्वा त्रात" इति वाक्ये "नखैः कृत्वा भिन्न" इति वाक्ये च क्त्वान्तप्रयोगः कथमिति। यतः यत्र समानकर्तृकं व्यापारद्वयं तत्र पूर्वकालिकक्रिया-बोधनाय हि क्त्वाप्रत्ययः प्रयुज्यते। अत्र तु एक एव व्यापारः सोऽपि धातु-प्रत्ययाभ्यामनुक्त इति कृत्वा अध्याह्रियते। अतः कथं क्त्वाप्रयोगः इति। शब्दा-ध्याहारपक्षे अयं क्लेशोऽस्त्येव।परन्त्वत्रार्थाध्याहार एवाभिप्रेतः।अतस्तस्य अभि-लापार्थं "कृत्वा" इति क्त्वान्तः शब्दः स्वीकृतः। क्त्वार्थस्तु अविवक्षित इत्येवात्र स्वीकरणीयम्।अत एव **परीक्षायामि**त्थं व्याख्यातम् -"त्रातभिन्नपदान्तर्गतो यः कर्तृकर्मवाचकः कृत्प्रत्ययः तस्य तादृशसमुदायघटकधातुप्रतिपाद्यफलेन आक्षिप्ता या भावना तस्यामन्वयी योऽर्थः तद्वाचकतया तस्यामेव हरिणेत्यादिपदोपस्थित-कारकस्याप्यन्वयेन परस्परसाकाङ्क्षत्वरूपसामर्थ्यस्य सत्त्वात् तत्र समासो भविष्यतीति शङ्कां निरस्यति - न चेत्यादिना" इति। वस्तुतः मीमांसकाना-माक्षेपवादे आक्षिप्तोऽर्थः अपदार्थ एवेति तस्य पदेन अभिलापोऽपि अयुक्त एव भवति। अतश्च "नखभिन्नः" इत्यस्य "नखकरणकभावनाजन्यद्वैधीभवनाश्रयः हिरण्यकशिपुः" इति "हरित्रात" इत्यस्य "हरिकर्तृकभावनाजन्यदुःखादि-निवृत्तिमान् प्रह्लादः" इति च बोधः। अत्रोभयत्र भावनायाः फलविशेषणत्वमेव। तदेव सूचयितुं प्रायः क्त्वान्तप्रयोगः स्यात्। अत्र परीक्षाव्याख्यैवोपादेया। यदि

शब्देन आक्षिप्तार्थस्याभिलापोऽपेक्षितश्चेत् भावनाव्यापारादिशब्दैरेव तस्याभिलापो युक्तः। यद्यपि **परीक्षायामग्रे** परम्परासम्बन्धे "नखभिन्न" इत्यादौ "नखैः कृत्वा भिन्न" इति बोधस्याङ्गीकारेण स्वान्वय्यन्वयित्वरूपपरम्परासम्बन्धेनान्वय इति दर्पणानुवादो वर्तते। तत्र "बोध" शब्दप्रयोगेण बोधाकाराभिलापे एव तस्य तात्पर्यमिति क्त्वार्थस्तत्राविवक्षित इत्येव तात्पर्यम्। "कृञ् हिंसायाम्" इति धातोः क्त्वान्तं समाश्रित्य "नखैः हिंसित्वा द्विधा कृत" इति कथंचित् व्याख्येयम्। परन्त्वयमर्थोऽत्र अप्रस्तुतः। समाधत्ते - **तत्र विध्यानर्थक्येति**॥"अन्नेन व्यञ्जनम्" (पा. 2-1-34) "भक्ष्येण मिश्रीकरणम्" (पा. 2-1-35) इति सूत्रद्वयमपि पदविधिरिति अनयोः सूत्रयोः "समर्थः पदविधिः" (पा. 2-1-1) इति परिभाषोपतिष्ठते। वाक्ये च सामर्थ्यं व्यपेक्षारूपं भवति इति तच्च केवलं "दध्ना ओदनः" "गुडेन धानाः" इत्युक्ते परस्परानन्वयात् न भवति। अतश्च तयोर्युग्मयोः समासोऽपि दुर्लभः।"दध्ना उपसिक्तः ओदनः, गुडेन मिश्राः धानाः" इत्युक्ते तु उभयत्र दध्नः उपसेचनक्रियायां गुडस्य मिश्रणक्रियायां च करणत्वेनान्वयात् ओदनधानानां तत्तत्क्रियायां कर्मत्वेनान्वयाच्च व्यपेक्षारूपं सामर्थ्यं भवति। समासे तु वाक्यद्वये प्रयुक्तयोः क्रियावाचकयोः उपसिक्तमिश्रपदयोरभावात् परस्परमन्वयाभावेन "पुरुषो राज्ञः भार्या देवदत्तस्ये""त्यत्र यथा असामर्थ्यात् "राज्ञः पुरुष" इत्यनयोः समासो न, तथैव असामर्थ्यात् समासः न प्राप्तः। तथा च सूत्रद्वयमिदं व्यर्थमिव आपतितम्। सर्वेषामेतत्सूत्रद्वयोदाहरणानामेकरूपत्वात्। अतः विध्यानर्थक्यापत्त्या अत्र "दध्ना ओदन" इत्यत्र उपसेचनक्रियां "गुडेन धाना" इत्यत्र मिश्रणक्रियां चाध्याहृत्य स्वान्वय्यन्वयित्वरूपपरम्परासम्बन्धेन कथंचित् सामर्थ्यमुपपाद्यते।एतादृशसामर्थ्यस्वीकारश्च अगत्या सूत्रद्वयानर्थक्यभिया। अतः सर्वत्र तथा सामर्थ्योपपादनमशक्यम्। न च "कर्तृकरणे कृता बहुलम्" (पा. 2-1-32) इति सूत्रेऽपि तादृशसामर्थ्यमेव स्वीकरणीयमन्यथा अस्यापि विधेरानर्थक्यप्रसङ्गात् नखभिन्नहरित्रातााद्युदाहरणानां तथात्वात् इति वाच्यम् । साक्षादेव सामर्थ्यवतामुदाहरणानां सद्भावात्। तथा हि - मीमांसकैः धात्वन्तरे व्यापारप्रतीतिमनङ्गीकुर्वद्भिरपि करोतौ तत्प्रतीतिरङ्गीक्रियते। करोतेः व्यापारार्थकत्वमाश्रित्यैव भावनायाः आख्यातार्थत्वस्य तैः साधनात्।तथाच "हरिकृतम्, हिरण्यकृतम्" इत्यादिषु हरिहिरण्यरूपकर्तृकरणयोः तृतीयान्तयोः कृतमिति कृदन्तेन समासः

9.4. एकक्रियान्वयित्वम् न सामर्थ्यम्

न चैकस्यां क्रियायामन्वयित्वमेव सामर्थ्यमिति शङ्क्यम्''असूर्यम्पश्या'' इत्यादेरसमर्थसमासत्वानापत्तेः । इष्टापत्तौ ''कृतः सर्वो मृत्तिकया'' इत्यत्र ''कृतः सर्वमृत्तिकः'' इत्यापत्तेः । न चात्र समासविधायकाभावः ''सह सुपा'' इत्यस्य सत्त्वात्। अन्यथाऽसमर्थसमासोऽपि विधायकाभावान्न स्यादिति ।

अनेन सूत्रेण सिद्ध्यति। अत्र च प्रयुक्तस्य कृञः भावनावाचित्वात् तदर्थे हरि-हिरण्यरूपकर्तृकरणकारकयोः अन्वयस्याबाधितत्वात् सामर्थ्यस्योपपत्तौ समासः निर्बाध इति कृञ्प्रकृतिककृदन्तस्य कर्तृकरणतृतीयान्तेन सह समासविधानेन ''कर्तृकरणयोः कृता बहुलम्'' (पा. 2-1-32) इत्यस्य चारितार्थ्येन ''नखभिन्न'' इत्यादावप्रवृत्तावपि वैयर्थ्याभावेन नखभिन्नादिषु मीमांसकमते सामर्थ्याभावात् समासो न स्यात्।

अत्र **शाङ्कर्यां** - ''हरिणा कृतं हरिकृतमि''त्यत्र मीमांसकमतेऽपि कृधातोर्व्यापार-वाचकत्वात् तन्निरूपितकर्तृत्वं हरौ साक्षाद्विद्यते। तथा च प्रत्यासत्त्या कृत्प्रत्यय-प्रकृतिभूतधातूपास्थाप्यक्रियानिरूपितकर्तृकरणवाचकतृतीयान्तं कृदन्तेन समस्यत इति ''कर्तृकरणे कृते'' (पा. 2-1-32)त्यस्यार्थात् क्रियामनध्याहृत्यैव साक्षात् धात्वर्थान्वयेन शास्त्रस्य चारितार्थ्येन कर्तृत्वाद्यन्यथानुपपत्त्याक्षिप्यमाणस्व-कर्तृकादिक्रियाजन्यत्वरूपपरम्परासम्बन्धमादाय ''हरित्रात'' इत्यादौ तत्प्रवृत्ते-रयोगात् मुख्याभावे एव गौणग्रहणं युज्यते नान्यथेत्यर्थादिति भावः'' इति बहु-सम्यगुपपादितम्। अत्र सर्वाः व्याख्याः एकाभिप्राया एव ।

अथ मीमांसकः पुनरेवं प्रत्यवतिष्ठते - ''नखभिन्न'' इत्यादौ परम्परासम्बन्धेन अन्वयमाश्रित्य सामर्थ्योपपादनं मास्तु। किन्तु आक्षिप्तायामेकस्यामेव क्रियायां द्वयोरपि कारकयोः अन्वयात् एकक्रियान्वयित्वमाश्रित्य सामर्थ्यमुपपादयामः।

एकक्रियान्वयित्वरूपमपि सामर्थ्यमवश्यमङ्गीकरणीयं ''नीलोत्पलं, धवखदिरौ'' इत्यादि समाससिद्ध्यर्थम्। तथा हि - एकस्यामेव क्रियायां कर्मादिरूपेण यदर्थयोः अन्वयः तयोः पदयोः तदेव एकक्रियान्वयित्वमेव सामर्थ्यमिति मीमांसकैः अङ्गी-कृतम्। अत एव ''नीलोत्पलमि''त्यादौ समासः सिद्ध्यति। मीमांसकानां मते नीलोत्पलशब्दौ आकृत्यधिकरणन्यायेन अन्वयव्यतिरेकाभ्यां च नीलगुण-उत्पलत्वजातिपरौ। अतः नीलोत्पलशब्दयोः सामानाधिकरण्येन अन्वयः न

भवतीति असामर्थ्यात् समास एव न प्राप्तः। अतोऽत्र तैः सामर्थ्यमित्थमुपपाद्यते-उत्पलमस्तीति उत्पलस्य कर्तृत्वेन अस्ति क्रियायामन्वयः, तादृशोत्पलनिष्ठं नील-रूपमिति आश्रयद्वारा नीलरूपस्याप्यस्तिक्रियायामन्वयः। अथवा उत्पलमुद्दिश्य सत्ता विधीयते तादृशसत्तामुद्दिश्य तदाश्रयत्वेन नीलगुणो विधीयते। एवम् एकस्यामस्तिक्रियायां कर्तृभावेन उद्देश्यविधेयभावेन वा अन्वयमाश्रित्य नीलो-त्पलयोः एकक्रियान्वयित्वरूपसामर्थ्यसत्त्वात् समासो निर्बाध इति। एवं "नख-भिन्न" इत्यादावपि एकस्यामेव क्रियायां नखानां साक्षात् करणत्वेन भिन्नपदार्थस्य कर्मत्वेनान्वयात् सामर्थ्यमस्तीति न समासानुपपत्तिरिति। एवं "धवखदिरा"विति द्वन्द्वेऽपि एकेन सम्बन्धेन एकक्रियान्वयित्वरूपमेव सामर्थ्यं सर्वाभ्युपगतमिति मीमांसकः शङ्कते -**न चेति** ॥ विस्तरस्तु **काशिकाशाङ्करीभ्याम्** अवसेयः ।

9.4.1. असूर्यंपश्याः

एतद्दूषयति - **असूर्यं पश्येति** ॥ असूर्यशब्दे कर्मणि उपपदे दृश्धातोः कर्तरि "असूर्यललाटयोः दृशितपोः" (पा. 3-2-36) इति सूत्रेण खश् प्रत्ययः विधीयते। खशः शित्वात्सार्वधातुकसंज्ञायां दृशेः पश्यादेशः खित्वाच्च उपपदस्य मुमागमः । "असूर्यं पश्ये"ति रूपम्। सूर्यकर्मकदर्शनाभाववत्यः राज्ञ्य इति बोधः। "न सूर्य" इति "असूर्य" इति समासे "नलोपो नञः" (पा. 6-3-73) नञः नस्य लोपे सति असूर्यशब्दः समस्तः सिद्ध्यति। अत्र चेयं शङ्का - अत्र नञः सूर्यशब्देन समास एव दुर्लभः। यतः अनयोः द्वयोः परस्परमन्वयाभावात्।उभयोः पृथक्पृथक्दर्शन-क्रियायामन्वयात्। यदि नसूर्यशब्दयोः नञ्तत्पुरुषः स्यात् तर्हि "अनश्व" इत्यादा -विव "अश्वभिन्न" इतिवत् "सूर्यभिन्न" इति बोधः स्यात्, ततश्च "असूर्यंपश्या" इत्यस्य सूर्यभिन्नं पश्यन्तीत्यर्थः स्यात्,यश्चात्र न विवक्षितः। यतः सूर्यमपि न पश्यन्तीति बोधस्यैव विवक्षितत्वात्। विवक्षितश्च बोधः सूर्यस्य दर्शनक्रियायां कर्मत्वेनान्वयेन, नञः प्रसज्यप्रतिषेधरूपमादृत्य दर्शनक्रियायामन्वयेनैव च सिद्ध्यतीति नञ्-सूर्यशब्दयोः परस्पराकाङ्क्षाभावेन "भार्या राज्ञः पुरुषो देवदत्तस्ये"तिवदसामर्थ्यात् समासो दुर्लभ इति "असूर्य" शब्दस्यैवासिद्ध्या तदुपपदे खश्विधानं सुतरामनुपपन्नमिति। तत्रेयं समाहितिः - सत्यम्। अत्र असामर्थ्यात् समासः वस्तुतः न प्राप्त एव। अथापि तस्मिन्नुपपदे खश्विधानस्य वैयर्थ्यापत्त्या तत्सामर्थ्यात्सामर्थ्याभावेऽपि समासः अङ्गीक्रियते। अत एवास्य

असमर्थसमास इति व्यवहारः। असामर्थ्येऽपि ज्ञापकात् समास इत्यर्थः। "असूर्य" शब्द विषये एवं शङ्कासमाधाने महाभाष्ये एव दृश्येते। "असूर्य" इत्यसमर्थः समास इत्येव भाष्यकारस्य निर्णयः।समासे अन्वितयोः परस्परान्वयाभावेऽपि तयोः द्वयोः एकक्रियान्वयित्वरूपसामर्थ्यं स्वीकृत्य समासो यद्युपपादयितुं शक्यः, तर्हि अत्रापि "असूर्य"शब्दे तादृशसामर्थ्यसत्त्वात् असमर्थसमास इति भाष्यकारव्यवहारस्य अनुपपत्तिः स्यात्। नचेष्टापत्तिः।अश्राद्धभोजी (ब्राह्मणः), अपुनर्गेयाः (श्लोकाः) इत्यादीनामपि असमर्थसमासत्वानुपपत्तेः। तथा च "सुडनपुंसकस्ये" (पा.1-1-43)त्यत्र प्रसज्यप्रतिषेधनञा नपुंसकशब्दस्य सामर्थ्याभावेऽपि समासकरणात् ज्ञापकात् केषाञ्चित् नञ्समासानां असामर्थ्येऽपि गमकत्वात् साधुत्वमङ्गीक्रियत इत्याद्युपपादकं समर्थ(पा.2-1-1)सूत्रस्थं भाष्यमसङ्गतं स्यात्। किञ्च "अमाषं हरमाणम्, अकिञ्चित्कुर्वाणम्, अगाधादुत्सृष्टम्" इत्यादीनामपि एकक्रियान्वयित्वमाश्रित्य सामर्थ्ये उपपन्ने, सामर्थ्याच्च साधुत्वे "अयमस्त्यसमर्थसमासो नञ्समासो गमकः, तस्य साधुत्वं माभूत्, अकिञ्चित्कुर्वाणम्, अमाषं हरमाणम्, अगाधादुत्सृष्टम्" इत्यादेरसाधुत्वप्रतिपादकं समर्थ (पा.2-1-1) सूत्रभाष्यमिदमसङ्गतं स्यात्। एतत्सर्वं मनसि समाकलय्य असूर्यशब्दे समर्थसमासत्त्वमङ्गीकुर्वाणानां मतं दूषयति - **इष्टापत्तावित्यादिना। कृतःसर्वो मृत्तिकयेत्यादि॥**

अत्र मूले द्विविधः पाठः उपलभ्यते - "कृतः सर्वो मृत्तिकयेत्यत्र कृतः सर्वमृत्तिकः इत्यापत्ते"रित्येकः पाठः। अयञ्च **दर्पण-काशिका-शाङ्कर्यभिमतः**। अन्यश्च "कृतः सर्वो मृत्तिकयेत्यत्र कृतसर्वमृत्तिक इत्यापत्तेः" इति। अयञ्च **प्रभा-परीक्षा-तत्त्वदर्शिनीसम्मतः** पाठः। अत्र प्रथमपाठसमर्थिका **शाङ्करी** - "कृतः सर्वो मृत्तिकया इत्यर्थे कृतः सर्वमृत्तिक इति सर्वमृत्तिकयोः समासापत्तिः। मृत्तिकायाः करणत्वेन सर्वशब्दस्य च कर्मत्वेन स्ववृत्तिबहिर्भूतकृतशब्दावयवकृधात्वर्थेऽन्वयेन एकक्रियान्वयित्वरूपसामर्थ्यस्य सत्त्वादित्यर्थः। अस्मन्मते तु मृत्तिकायाः करणकारकत्वेन कारकस्य च क्रिययैवान्वयात् सर्वशब्दस्य क्रियाशब्दत्वाभावेनान्वयायोग्यतया असामर्थ्यान्नैव समासो भवतीति भावः" इति । अत्र दृष्टान्ततया सर्वचर्मण इति प्रदर्श्य "सर्वः चर्मणा कृतः" इत्यर्थे सर्वचर्मशब्दयोः असामर्थ्यात् समासाप्राप्तौ निपातनात्समास इत्युक्तं "सर्वचर्मणः कृतः खखञौ" (पा. 5-2-5)

इति सूत्रे इत्यादिना स्वपक्षं समर्थयति **शाङ्करी**। तथा हि - "सर्वचर्मणः कृतः खखञौ" (पा. 5-2-5) इति सूत्रेण सर्वचर्मशब्दात् कृतः इत्यर्थे ख-खञ्प्रत्ययौ विधीयेते। अत्र "सर्वः चर्मणा कृतः" इति विग्रहः। सर्वशब्दार्थकर्मणः चर्मशब्दार्थ -करणस्य च परस्परान्वयाभावात् सामर्थ्याभावेन समासाप्राप्तौ "समर्थानां प्रथमाद्वा" (पा. 4-1-82) इत्यधिकारात् ख-खञोरप्राप्तौ विध्यानर्थक्यापत्तौ निपातनात् समासः अङ्गीकृतः। असूर्यादिष्विव असामर्थ्येऽपि समास इति तदर्थः। यदि चैकक्रियान्वयित्वरूपं सामर्थ्यं वृत्तिप्रयोजकं तर्हि अत्रापि "कृत" इति तद्धिता -र्थाङ्गकृधात्वर्थे सर्वचर्मणोरन्वयात् सामर्थ्यस्य सिद्धौ समाससिद्ध्यर्थं निपातना-श्रयणमयुक्तं स्यात्। अनेन च स्पष्टं यत् समासानन्विततद्वाह्यपदप्रतिपाद्यार्थे अन्वयमाश्रित्य परस्परमनन्वितयोः समासो न भवतीति। पूर्वं प्रक्रान्तश्च सन्दर्भः "नखभिन्न" इत्यादौ असामर्थ्यप्रतिपादनरूपः। तत्रापि समासान्तर्गतपदाप्रतिपाद्य-कृञर्थक्रियायामन्वये असामर्थ्यमेवेति स्पष्टयितुमुपक्रान्तः। यदि च सामर्थ्यं स्यात् तर्हि "सह सुपा" (पा. 2-1-4) इति सूत्रेण समासः स्यात् इत्यापादनमपि पक्षस्या -स्यैवोपोद्बलकम्। यतः "सह सुपे" (पा. 2-1-4)ति सूत्रेण द्वयोरेव समास इति समर्थसूत्रे सिद्धान्तितत्वात्। **काशिकायामपि** इत्याद्यपत्तेरिति प्रतीकमुपादाय - "न चात्रापीष्टापत्तिः। तत्र समासाभावस्यैव सर्वानुमतत्वात्। अत एव "सर्वचर्मणः" (पा. 5-2-5) इति सूत्रे सर्वश्चर्मणा कृत इत्यर्थे "सर्वचर्मण" इति निपातनात्समास इत्युक्तम्" इति प्रथमपाठस्यैव समर्थनं दृश्यते । श्रीमद्भिः विद्यानिवासमिश्रवर्यैः सम्पादिते बृहद्भूषणेऽपि प्रथमपाठ एव दृश्यते ।

द्वितीयपाठानुसारिणामयमभिसन्धिः। समर्थ(पा. 2-1-1) सूत्रे भाष्ये "असूर्यं पश्यानि मुखानि, अपुनर्गेया श्लोकाः, अश्राद्धभोजी ब्राह्मणः, अलवणभोजी ब्राह्मणः"इत्यसमर्थसमासानां "सुडनपुंसकस्ये"(पा.1-1-43)ति नियमात् साधुत्वं साधितम्। अत्र कैयटेन असमर्थसमासेऽपि क्रियायामुभयोः सन्निपातात् एकार्थी-भावस्तद्वारकोऽस्त्येव त्युक्तम्। एतद्व्याख्यायामुद्योते नागेशः "क्रियायामुभयो-रिति। इदं चिन्त्यम्। "कृतः सर्वो मृत्तिकये"त्यादौ समासापत्तेः।" इति कैयट-वचनस्य चिन्त्यतामुक्तवान्। प्रस्तुतः सन्दर्भः असूर्यंपश्येत्यादिवृत्त्यन्तर्गतवृत्तेः साधुत्वप्रतिपादकः। तत्रैकक्रियान्वयित्वेन परस्परमनाकाङ्क्षयोरपि एकार्थीभाव इति कैयटाभिप्रायस्य चिन्त्यतां वदति नागेशः। तथा एकार्थीभावाङ्गीकारे "कृतः सर्वो

मृत्तिकये"ति विग्रहे "कृतसर्वमृत्तिक" इति अनिष्टं रूपमापद्येत इति नागेशस्याशयः इति एते मन्यन्ते। पूर्वोक्तः कैयटग्रन्थ एव कौण्डभट्टेनापि "न चैकक्रियान्वयित्व"मित्यादिना अनूद्य खण्डित इति तु सत्यम्। यद्यपि "सह सुपे" (पा.2-1-4)ति समासः "कृतः सर्वो मृत्तिकया" इति त्रयाणां न सिद्ध्यति द्वयोरेवेति नियमात्,अथापि प्रथमं सर्वमृत्तिकयोः समासे ततः कृतशब्देन समास इति, "द्व्यह्नजात" इत्यादिबहुपदतत्पुरुषस्येव वा सामर्थ्ये सति कथञ्चित्समासो बहुपदोऽप्युपपादयितुं शक्य इति वा "कृतसर्वमृत्तिक" इत्यापत्तिः समर्थनीया। वस्तुतः "कृतः सर्वमृत्तिकः" इति प्रयोगस्य "कृतसर्वमृत्तिक" इति प्रयोगस्य च सर्वथा अनिष्टत्वात् अनयोः साधुत्वस्य सर्वैः तिरस्कृतत्वाच्च अनिष्टापादनमेवात्र मुख्यमुद्देश्यमिति न तावान् विरोधः अनौचित्यं वा पाठद्वये। प्रभातत्त्वदर्शिन्योः प्रथमपाठेऽपि अन्वयः सुकरः। तत्र विशिष्यायमेव पाठः इति नोक्तत्वात् तद्व्याख्यायाः पाठद्वयेऽपि योजयितुं शक्यत्वात्।ताभ्यां प्रकाशिते ग्रन्थे मूले एव केवलं तस्य पाठस्य दृश्यमानत्वात्। परन्तु परीक्षायास्तु द्वितीयः पाठ एव सम्मत इति ज्ञायते। तत्र हि विधायकाभाव इति प्रतीकमुपादाय "कर्तृकरणे"(पा. 2-1-32) इति सूत्रस्य "हिरण्यकृतमि"त्यत्र साक्षात्सम्बन्धे चरितार्थत्वेन एतादृशसामर्थ्येऽप्रवृत्त्या विधायकाभावः इति व्याख्यातम्। कृतशब्देन समासेऽहि "कर्तृकरणे" (पा. 2-1-32) इत्यस्य प्रसक्तिः। अतः द्वितीयपाठ एव अर्थात् "कृतसर्वमृत्तिक" इत्यापत्तेरिति पाठः परीक्षासम्मतः। वस्तुतः "कृतसर्वमृत्तिक" इत्यत्र "कर्तृकरणे" (पा. 2-1-32) इत्यस्य प्रसङ्ग एव नास्ति। तथा चेत् "सर्वमृत्तिकाकृतः" "मृत्तिकाकृतसर्व" इति वा स्यात्। किञ्चात्र मूलेऽपि "सह सुपे"(पा.2-1-4)त्यनेनैव समास आपादितः। अतोऽत्र परीक्षाव्याख्या चिन्त्या। अत्र तु प्रथमपाठ एव युक्ततरः। साधकप्रमाणानि पूर्वमेवोदाहृतानीति न पुनः तान्यत्रानूद्यन्ते। अथात्र "कृतः सर्वः मृत्तिकया येन" इति विग्रहे कृतसर्वमृत्तिक इति बहुव्रीहिः भवेद्वा न वेति तु सुधीभिर्विचारणीयम्। ॥**नचात्रेति**॥ "सर्वमृत्तिक" इत्यत्र सामर्थ्ये सत्यपि समासविधायकाभावात् समासो न भवति। तृतीयान्तेन समासस्तु तृतीयान्तर्थकृतगुणवचनेन अर्थशब्देन पूर्वादिभिः कृदन्तेन च विहितः। अत्रत्यः सर्वशब्दः नह्युक्तेष्वन्तर्भवति। अतः सामर्थ्ये सत्यपि समासविधायकाभावात्

किञ्च भावनायास्तिङर्थत्वे भावयति घटमितिवत् भवति घटमित्यपि स्यात्, धात्वर्थफलाश्रयत्वरूपकर्मत्वसत्वात्। न चाख्यातार्थव्यापाराश्रयत्वेन कर्तृत्वात् तत्संज्ञया कर्मसंज्ञायाः बाधात् न द्वितीयेति वाच्यम्।

समासो नेति वक्तुं शक्यते किल इति शङ्कितुराशयः। तन्निराचष्टे - **सह सुपेति** । "सह सुपा"(पा. 2-1-4) इति सूत्रं लक्षणम् अधिकारश्च। अतः सति सामर्थ्ये समासविशेषविधायकाभावे च अनेन सूत्रेण समासः विधीयते भूतपूर्वादौ। एवं चात्रापि यदि सामर्थ्यं स्यात् तर्हि तेन सूत्रेण समासः स्यात् इति भावः। यदि च "सह सुपे"(पा. 2-1-4)ति न विधायकं तर्हि असूर्यादिष्वपि समासो न स्यात्। समासविधायकलक्षणान्तराभावात्। ननु तत्र असूर्येति निपातनादेव समास इति न तत्रास्य सूत्रस्यापेक्षा। तथा सर्वचर्मीणः भूतपूर्व इत्यादिष्वपि। तत्रापि निपातनादिना समाससिद्धेः इति चेन्न। नैकधा नैकम् इत्यादिसाधनार्थं तस्य विधायकत्वस्यापि अवश्यापेक्षितत्वात्।

ननु "सह सुपा" (पा. 2-1-4) इति सूत्रेऽपि समर्थपरिभाषोपतिष्ठते इति सामर्थ्ये सत्येव तस्यापि प्रवृत्तिः। अतः असमर्थसमासेषु तस्य प्रवृत्तिरेव न। किन्तु निपातनादिनैव समासः साधनीयः। किञ्च "सह सुपे" (पा. 2-1-4)ति समासः न सार्वत्रिकः। तथा सति "द्वितीयाश्रिते" (पा. 2-1-24) इत्यादीनां वैयर्थ्यप्रसङ्गात्। तथा च प्रयुक्तानां विशेषविध्यलक्ष्याणां च समासानां साधनमेव "सह सुपे" (पा. 2-1-4)त्यस्य लक्ष्यम्। ततश्च "सह सुपे"(पा. 2-1-4) त्यस्याश्रयणम् अगतिकगतिकं भवति। "कृतः सर्वमृत्तिक" इत्यादीनां प्रयोगाणां सर्वैरनादृतत्वात् अप्रयुक्त-त्वमिति "यथालक्षणमप्रयुक्ते" इति भाष्योक्त्या तत्र लक्षणस्याप्रवृत्तिरेव। अतः "कृतः सर्वः मृत्तिकये"त्यत्र अनभिधानादेव न समासः इति चेत् दोषान्तरमाह - **किञ्चेति** । **तत्त्वदर्शिन्यां** तु साधकान्तरमाहेत्येवावतरणं किञ्चेत्यस्य वर्तते। नारुचिः प्रदर्शिता। **परीक्षापि** तत्त्वदर्शिन्या समाभिप्राया वर्तते। **दर्पणे** तु "योगविभागस्यानिष्टानापादकत्वादाह - किञ्चेति" इत्यस्ति। "सह सुपे" (पा. 2-1-4) त्यनेन इष्टसाधनमेवकार्यं नानिष्टापादनमिति तदर्थः। अयमेवाशयः अत्रैव अवतरणिकायां विशदीकृतः। **प्रभा** च काशिकामक्षरशः अनुवदति ।

काशिकायाः अवतरणग्रन्थः व्युत्पत्त्यावहः। अतः सोऽत्र उल्लिख्यते। तत्रहीत्थं रचिताऽवतरणिका - "ननु कृतः सर्व इत्यादावनभिधानान्न समासः। किं च "सह

सुपा" (पा. 2-1-4) इत्यसार्वत्रिकम्। तेनैव सर्वत्र समाससिद्धौ "द्वितीया-श्रिते"(पा. 2-1-24)त्यादिना पुनः समासविधानवैयर्थ्यात्। अन्यथा तत्तत्सूत्रैः तत्पुरुषादिसंज्ञा एव विधीयेरन्। अत एवानेन समासस्यागतिकत्वं तत्र तत्रोक्तम्। किञ्च "कर्तृकरणे कृता"(पा. 2-1-32) इत्यादिना विहितस्य समासस्य कृत्प्रकृतिक-कृदन्तविषये एव प्रवृत्तिः स्यात् तर्हि सूत्रकारः सूत्रं स्पष्टं तथैव कृतवान् स्यात्। तथा अकृत्वा सामान्यसूत्रप्रणयनसामर्थ्यात् "देवत्रातो गले ग्राह" इति श्लोक-वार्तिके "देवत्रात" इति निर्देशाच्च क्रियाद्वारकसामर्थ्यमादाय कृदन्तेन कारकस्य समास इत्यभ्युपगमात् "नखभिन्न" इत्यादिसमासासिद्धिरूपो दोषो नास्त्येव। कृद्ग्रहणसामर्थ्यादपि क्रियाद्वारकसामर्थ्यमादाय कृदन्तेन कारकस्य समास इत्ययमर्थः सिद्ध्यति, "कर्तृकरणे"इति न्यासेनैव सुपा इत्यनुवृत्त्या कृदन्तेनैव समासस्य सिद्धेः। "काष्ठैः पचतितराम्" इत्यादिषु समासस्य बहुलग्रहणेनापि वारणात् बहुलग्रहणादेव सुबुत्पत्तेः प्रागेव समासस्य सिद्धत्वात् इत्यभिप्रेत्य दूषणा -न्तरमाह - किञ्चेति"इति॥ धातोः व्यापारार्थकत्वसाधिकामसाधारणां युक्तिं प्रतिपादयितुमुपक्रमते इति साधकान्तरमाहेति तत्त्वदर्शिन्यवतरणिकायाः हृदयम्। सा च परमा युक्तिः प्रयोज्यस्य कर्तृत्वसिद्धिः। तथा च व्यापारस्यापि धात्वर्थत्वे एव प्रयोज्यस्य कर्तृत्वं तदाश्रितप्रत्ययादिसिद्धिश्च नान्यथेति भावः।

॥**भावयति घटमिति** ॥ भूधातोः प्रयोजकव्यापारे विवक्षिते णिच् प्रत्ययः। भूधातोः केवलम् उत्पत्तिरूपफलवाचकत्वे णिजर्थः तदनुकूलव्यापारः। तथा च णिजन्तस्य भवतेः उत्पत्त्यनुकूलव्यापारार्थकत्वं सिद्धम्। णिजर्थव्यापारस्य फलं च भूधात्वर्थः उत्पत्तिः, तदाश्रयत्वात् घटस्य कर्मत्वे सति "घटं भावयति" इति प्रयोगः सिद्ध्यति। णिजन्तात्परं प्रयुक्तः आख्यातस्तु णिजर्थव्यापारस्यैव अनुवादकः। अत एव तत्समानाधिकरणदेवदत्तादेः अभिहितत्वात् प्रथमा सिद्ध्यति "देवदत्तः घटं भावयति" इति। तथा च मीमांसकमते अत्र घटस्य "कर्तुरीप्सिततमं कर्म" (पा. 1-4-49) इति सूत्रेण कर्मसंज्ञा, न तु प्रयोज्यकर्तृत्वेन "गतिबुद्धीति" (पा. 1-4-52) सूत्रेण।तथा च यद्यपि प्रयोजकव्यापारो णिजर्थः, प्रयोजकत्वं च प्रयोज्यं विना न भवति, तथापि विचार्यमाणेऽस्मिन् मीमांसकमते तत्र घटादिषु प्रयोज्यत्वाभावेऽपि फलाश्रयत्वेनैव कर्मत्वं भवति इति वक्तव्यम्।

आख्यातार्थव्यापाराश्रयत्वस्य कर्तृत्वे "पाचयति देवदत्तो विष्णुमित्रेण" इत्यत्र विष्णुमित्रस्याकर्तृतापत्तौ तृतीयानापत्तेः, "ग्रामं गमयति देवदत्तो विष्णुमित्रम्" इत्यत्र विष्णुमित्रस्याकर्तृतापत्तौ ग्रामस्य गमिकर्मतानापत्तेश्च। तथा च "ग्रामाय गमयति देवदत्तो विष्णुमित्रम्" इत्यपि न स्यात् "गत्यर्थकर्मणि द्वितीयाचतुर्थ्यौ चेष्टायामनध्वनि" (पा.2-3-12) इति गत्यर्थकर्मण्येव चतुर्थीविधानात्।

एतेन णिजन्ते आख्यातार्थे उभयं तदाश्रयत्वाद्देवदत्तयज्ञदत्तयोः कर्तृतेत्यपास्तम्।

9.5. आख्यातशून्ये देवदत्तः पक्तेत्यादौ देवदत्तस्य कर्तृत्वं न स्यात्

किं च तस्मिन्प्रयोगे य आख्यातार्थ इत्यस्यावश्यकत्वेनाख्यातशून्ये "देवदत्तः पक्ता" इत्यादौ देवदत्तस्याकर्तृतापत्तेरिति दिक्।

यतः तत्र घटादेः आख्यातार्थव्यापाराश्रयत्वरूपकर्तृत्वस्योपपादयितुमशक्यत्वात्। णिजन्ते णिजर्थव्यापार एव आख्यातेनोच्यत इति पूर्वमेव प्रतिपादितत्वात्। तथा च यथा "भावयति घटम्" इत्यत्र उत्पत्तिरूपफलाश्रयत्वमाश्रित्य घटस्य कर्मत्वं तथा शुद्धभवतेः प्रयोगेऽपि घटस्य उत्पत्तिरूपधात्वर्थफलाश्रयत्वात् कर्मत्वं स्यादिति "भवति घटम्" इति द्वितीया स्यादिति दोषः। अयं च दोषः आपाततः आपाद्यते। न त्वस्मिन् नैर्भर्यम्। अयं च उपक्रमः अग्रे प्रदर्श्यमानस्य महादोषस्य प्रतिपादनार्थम्। अत एवात्र पुनः मीमांसकमतमाश्रित्य स्वयमेव समाधातुमुपक्रमते - न चेति । अत्र "भावयति घटम्" इत्यत्र यथा घटस्य उत्पत्तिरूपधात्वर्थाश्रयत्वात् कर्मत्वम्, तथा "भवति घट" इत्यत्रापि घटस्य तादृशधात्वर्थोत्पत्त्याश्रय -त्वमिति कर्मत्वे सति द्वितीया स्यादिति दोषः आपादितः। अत्र भवति घटम् इति दार्ष्टान्तिकः। भावयति घटम् इति दृष्टान्तः। अनयोः द्वयोः दृष्टान्तदार्ष्टान्तिकयोः एकरूपता नास्ति। दार्ष्टान्तिके शुद्धः भूधातुः। दृष्टान्ते तु स एव णिजन्तः। किञ्च धातोः फलव्यापारोभयवाचकत्वपक्षेऽपि घटस्यैवोभयाश्रयत्वात् फलाश्रयत्वेन प्राप्तं कर्मत्वं व्यापारश्रयत्वरूपकर्तृत्वेन बाधितमिति कर्मत्वाभावात् द्वितीया न भवतीति वैयाकरणैरत्र समाधीयते। मीमांसकैरपि अत्र तादृशमेव समाधानं दातुं शक्यम्। भवतीत्यत्र धातुः उत्पत्तिरूपफलवाचकः। तिप्प्रत्ययस्तु व्यापारार्थकः। ततश्च घटे उत्पत्तिरूपफलाश्रयत्वं आख्यातार्थव्यापारश्रयत्वं चेत्युभयमस्तीति आख्यातार्थ-व्यापाराश्रयत्वरूपकर्तृत्वेन फलाश्रयत्वरूपकर्मत्वस्य बाधितत्वात् कर्तृसंज्ञैवेति न द्वितीयेति समाहितुं शक्यम्। "घटं भावयती"त्यत्र तु आख्यातार्थः णिजर्थ एवेति

तत्र घटनिष्ठव्यापारस्य आख्यातार्थत्वाभावात् घटस्य केवलं फलाश्रयत्वाच्च कर्मत्वमेव। अतोऽत्र न दोषः।"घटः भवति" इत्यत्र घटस्य आख्यातार्थव्यापाराश्रयत्वेन कर्तृत्वात्। आख्यातार्थव्यापाराश्रयत्वमेव हि मीमांसकमते कर्तृत्वम्। अतः नोक्तदोषः मीमांसकानां मतेऽपीति।

एवं मीमांसकमतेन स्वयं समाधिमुक्त्वा, संदर्भवशात् तन्मते कर्तृत्वं परिष्कृत्य, आख्यातार्थव्यापाराश्रयत्वस्य च कर्तृत्वे च दोषं प्रदर्शयति - **पाचयति देवदत्तो विष्णुमित्रेण** इति ॥ विष्णुमित्रः पचति, तेन देवदत्तः पाचयति इति सन्दर्भः। "विष्णुमित्रः पचति" इत्यण्ण्यन्तावस्थायां तिप्रत्ययार्थव्यापाराश्रयत्वेन विष्णुमित्रस्य कर्तृत्वं सुलभम्। "विष्णुमित्रेण देवदत्तः पाचयति" इत्यत्र पच्धात्वर्थः मीमांसकमते विक्लित्तिरूपफलमात्रम्। णिच्प्रत्ययार्थस्तु देवदत्तगतः प्रेरकव्यापारः। तिप्रत्ययार्थस्तु णिजर्थ एव। अर्थात् प्रेरकव्यापार एव। तथा च आख्यातार्थप्रेरकव्यापाराश्रयत्वात् देवदत्तस्य कर्तृत्वं सिद्धम्। प्रयोज्यस्य विष्णुमित्रस्य व्यापारस्तु न कस्याप्यर्थ इति विष्णुमित्रे पूर्वोक्तस्य आख्यातार्थव्यापाराश्रयत्वस्याभावेन कर्तृत्वस्य निरूपयितुमशक्यत्वात् कर्तृत्वाभावे कर्तरि तृतीया न स्यात्। वैयाकरणानां मते पच्धातुरेव विक्लित्तिरूपफलं तदनुकूलव्यापारं च बोधयतीति धात्वर्थविक्लित्त्यनुकूलव्यापाराश्रयत्वात् कर्तृत्वं सुलभमिति तृतीयोपपत्तिः। किञ्च मीमांसकमते पाचयतीत्यत्र णिजेव दुर्लभः। तथा हि - "तत्प्रयोजको हेतुश्च"(पा1-4-55) इति सूत्रेण कर्तृप्रयोजकस्य हेतुसंज्ञा विधीयते। तादृशहेतुगतव्यापारे विवक्षिते धातोः "हेतुमति च" (पा. 3-1-26) इति सूत्रेण णिज्विधीयते। देवदत्तस्य हेतुत्वे एव तत्र णिच्-प्रत्ययः देवदत्तस्य हेतुत्वं च विष्णुमित्रनिष्ठकर्तृत्वाधीनम् । विष्णुमित्ररूपकर्तृप्रयोजकत्वेन देवदत्तस्य विवक्षणीयत्वात्। तथा च यावत्पर्यन्तं विष्णुमित्रस्य कर्तृत्वं न सिद्ध्यति तावत् पर्यन्तं देवदत्तस्य हेतुत्वमपि न सिद्ध्यतीति तद्गतव्यापारविवक्षायां विधीयमानः णिच् अपि दुर्लभ इति भावः। तथा च एतादृशानां प्रयोगाणां विलयापत्तिरिति तात्पर्यम्।तदेवाह - **अकर्तृतापत्तावित्यादिना**॥ अत्र अकर्तृतापत्ताविति प्रतीकमुपादाय कृतं **काशिकायास्तदुपपादनम्** अवश्यमेव ज्ञातव्यम्। अतस्तदेवात्र यथावत् निर्दिश्यते - "अकर्तृतापत्ताविति। सर्वस्यैव यत्किञ्चित् आख्यातार्थव्यापाराश्रयत्वात् समभिव्याहृतेत्यावश्यकम्। एतदेव तस्मिन् प्रयोगे यदाख्यातम्

तदर्थव्यापाराश्रयत्वमेव कर्तृत्वं वाच्यमिति अग्रे मूले एवोक्तम्। प्रकृते च आख्यातस्य न प्रयोज्यव्यापारोऽर्थः, अपि तु णिजर्थव्यापार एव तेनानूद्यते। अत एव प्रयोजकस्य कर्तृत्वनिर्वाहः। अत एव आख्यातार्थव्यापारान्वयिन्येव तदर्थ-संख्यान्वयनियमात् "गुरुः शिष्याभ्यां पाचयति" इत्यत्र गुरुपदात् प्रथमोपपत्तिः, पाचयतीत्येकवचनोपपत्तिश्च। एवं च आख्यातार्थव्यापारानाश्रयत्वात्प्रयोज्यस्य कर्तृत्वानापत्तिरिति भावः। करणतृतीयैवेयमिति तु न शङ्क्यम्। तथा सति कर्तुः प्रयोजकस्यैव हेतुतया देवदत्तस्याहेतुतापत्तौ णिजुत्पत्तेरसंभवापत्तेः। न च "तत्प्रयोजक"(पा. 1-4-55) इत्यत्र तत्पदेन धात्वर्थानुकूलव्यापारवान् गृह्यते, अतः न णिजनुत्पत्त्यापत्तिः, प्रयोज्यस्य कर्तृसंज्ञाविरहेऽपि धात्वर्थानुकूलव्यापारा-श्रयत्वादिति वाच्यम्। "स्वतन्त्रः कर्ता" (पा. 1-4-54) इति पूर्वसूत्रेणैव कर्तृसंज्ञा-विधानात् तत्पदेन कर्तृसंज्ञकस्यैव परामर्शार्हत्वात् कारकमात्रस्यैव धात्वर्था(फला) -नुकूलव्यापाराश्रयतया कारकमात्रप्रयोजकव्यापारे णिजुत्पत्त्यापत्तेः । न चेष्टा-पत्तिः।"काष्ठैः पाचयति, दर्शयति भवं भक्तः" इत्यादिप्रयोगाणां दर्शनादिति वाच्यम्। "काष्ठानि पचन्ति" "पश्यति भवः" इत्यण्यन्तावस्थायां काष्ठादीनां कर्तृत्वविवक्षायां सत्यामेव तत्प्रेरणायाम् तादृशप्रयोगाणामिष्टत्वादिति भावः।"-इति । इयमेव व्याख्या **सरला-शाङ्करी-प्रभा-तत्त्वदर्शिनी**षु अंशतः अनूदिता । **दर्पणे**ऽपि काशिकायाः आशयः एव सूचनामात्ररूपेणास्ति ।

अथात्र "ग्रामं गमयती"ति ग्रन्थस्य अवतरणिकाः अपि तत्तद्व्याख्यासु रचिताः परिशील्यन्ते। तत्र **दर्पणे परीक्षायां सुबोधिन्यां** च एकविधा एव अवतरणिकास्ति। तत्र **दर्पणे** - "ननु विष्णुमित्रस्याकर्तृत्वेऽपि करणत्वविवक्षयैव तत्र तृतीया सुलभे-त्यत आह" इत्यस्ति। इयं चायुक्तैवेति पूर्वोक्तकाशिकापर्यालोचनेन ज्ञायते। "विष्णुमित्रेण" इत्यत्र तृतीया यथाकथंचित् साधनीयेति नात्रोद्दिष्टम्। विष्णुमित्रस्य प्रयोज्यकर्तृत्वमाश्रित्य साधनीयमित्येव सन्दर्भः। ततश्च यावत्तस्य प्रयोज्यकर्तृत्वं न सिद्धं तावत् कर्तृतृतीयानापत्तिः,ततश्च णिजनापत्तिरिति तात्पर्यम्।**तत्त्वदर्शिन्यां** तु –"ननु णिज्समभिव्याहृताख्यातस्य व्यापारद्वयार्थकत्वं स्वीक्रियते।तेन प्रयोज्य -प्रयोजकयोरुभयोरपि कर्तृत्वनिर्वाहोऽत आह -" इत्यस्ति। इयमपि न युक्ता। प्रयोज्यस्य एवं कर्तृत्वनिर्वाहे "ग्रामं गमयती"त्यत्र दोषस्यैवाभावात्। किञ्च तथा णिज्समभिव्याहृताख्यातस्य व्यापारद्वयार्थकत्वे प्रयोज्यप्रयोजकयोरुभयोरपि

कर्तृत्वस्याख्यातेनाभिधानात् देवदत्तपदोत्तरमिव विष्णुमित्रपदोत्तरमपि प्रथमैव स्यादिति तृतीयादौर्लभ्यं तदवस्थमेव। किञ्चात्र पच्धात्वर्थविक्लित्तेः (फलस्य) णिजर्थप्रेरणव्यापारस्य च परस्परमन्वयोऽपि न सुलभः। प्रेरणायाश्च व्यापार-विषयिण्या एव लोकप्रसिद्धत्वात्। तथा च मध्ये व्यापारान्तरमन्तर्भाव्य सम्बन्धः वक्तव्यः।एवं च "ओदनं पाचयति देवदत्तो विष्णुमित्रेण" इत्यत्र ओदनादेः देवदत्त -निष्ठक्रियाजन्यफलाश्रयत्वमेव वक्तव्यं स्यादिति तेषां पच्यादिकर्मत्वं लोकसिद्धं न स्यात्। किञ्चैवं साक्षादोदनादीनां कर्मत्वस्वीकारे दोषोऽपि। तदेव आह - **ग्रामं गमयतीत्यादिना**। "विष्णुमित्रः ग्रामं गच्छति" इति प्रयोगे विष्णुमित्रगतकर-चरणादिव्यापारजन्यसंयोगाश्रयत्वेन ग्रामस्य ईप्सिततमत्वात् "कर्तुरीप्सिततमं कर्म" (पा. 1-4-49) इति सूत्रेण कर्मसंज्ञायां, "गत्यर्थकर्मणि द्वितीयाचतुर्थ्यौ चेष्टायामनध्वनि" (पा. 2-3-12) इति सूत्रेण द्वितीयायां ग्रामं गच्छतीति प्रयोगः। तेनैव सूत्रेण तस्मिन्नेवार्थे चतुर्थी अपि विहितेति चतुर्थ्यां "ग्रामाय गच्छती"ति प्रयोगः। एवं च "ग्रामं गच्छति विष्णुमित्रः, ग्रामाय गच्छति विष्णुमित्र" इति प्रयोगद्वयमपि "ग्रामकर्मकः विष्णुमित्रकर्तृकः गमनव्यापार" इत्येव बोधं जनयति। इयमणण्यन्तावस्था। अत्र च ण्यन्तावस्थायां विवक्षितायां "गतिबुद्धि-प्रत्यवसानार्थशब्दकर्माकर्मकाणामणि कर्ता स णौ" (पा. 1-4-52) इति सूत्रेण गत्यर्थकर्तुः विष्णुमित्रस्य कर्मसंज्ञायां "ग्रामं गमयति देवदत्तो विष्णुमित्रम्" इति प्रयोगः। अत्रैव ग्रामशब्दात् चतुर्थी कृत्वा "ग्रामाय गमयति" इति प्रयोगोऽपि इष्टः। यतः अत्रापि कर्मवाचकात्ग्रामशब्दात् "गत्यर्थकर्मणि द्वितीयाचतुर्थ्यौ" (पा. 2-3-12) इति सूत्रेणैव द्वितीयाचतुर्थ्योः प्राप्तेः। सः न सिद्ध्येत्। तथा हि - विचार्यमाणमीमांसकमते गमयतीत्यत्र गम्धात्वर्थः संयोगः। णिच्प्रत्ययार्थः तदनुकूलव्यापारः। तिप्रत्ययस्तु णिजर्थमेव अनुवदति। तथा च आख्यातार्थ-व्यापाराश्रयत्वरूपं कर्तृत्वं प्रयोजके देवदत्ते अस्तीति तस्य कर्तृत्वं निर्विवादम्। तदीयव्यापारः नाम णिजर्थव्यापारः तद्व्यापारजन्यं फलं संयोगः तदाश्रयत्वेन ग्रामस्य "कर्तुरीप्सिततमं कर्म" (पा. 1-4-49) इति कर्मसंज्ञा वक्तव्या। तथा चात्र संयोगरूपफलस्य देवदत्तनिष्ठप्रेरणाव्यापारजन्यत्वात् कर्त्रा देवदत्तेन स्वक्रियया प्रेरणया विष्णुमित्रद्वारा आप्तुमिष्यमाणत्वेन ग्रामस्य कर्मसंज्ञा वक्तव्या। तथाचात्र ग्रामस्य णिच्प्रत्ययार्थव्यापारकर्मत्वमेव न तु गमनक्रियाकर्मत्वमिति "गत्यर्थ-

कर्मणि" (पा. 2-3-12) इति सूत्रस्याप्रवृत्त्या "कर्मणि द्वितीया" (पा. 2-3-2) इति सूत्रेण द्वितीयायां "ग्रामं गमयति देवदत्तो विष्णुमित्रम्"इत्येव प्रयोगः स्यात्। ग्रामस्य गत्यर्थकर्मत्वाभावात् "गत्यर्थकर्मणि" (पा. 2-3-12) इति सूत्रा- प्रवृत्तेः चतुर्थ्याः अप्रसक्त्या "ग्रामाय गमयति देवदत्तो विष्णुमित्रम्" इति प्रयोगः न स्यात्। तदेव सूचयति - **ग्रामस्य गमिकर्मत्वानापत्तेरिति** ॥ व्यापारस्य धात्वर्थत्ववादिनां वैयाकरणानां मते तु अयं सिद्ध्यत्येव। गमयतीत्यत्र गम्धातोः संयोगानुकूलव्यापारोऽर्थः। णिच्प्रत्ययस्य च तदनुकूलव्यापारः। तिङ्प्रत्ययस्य च कर्ता अर्थः। स च प्रयोजक एव। णिजन्तार्थप्रधानव्यापाराश्रयत्वस्यैवात्र तिङर्थत्वात्। तथा चात्र प्रयोजकव्यापारस्य फलं प्रयोज्यव्यापारः गमनम्। तस्य फलं संयोगः। तदाश्रयत्वात् ग्रामस्य गमिकर्मत्वमिति "ग्रामाय" इति चतुर्थी सुलभा। नन्वत्र वैयाकरणमतेऽपि ग्रामस्य गमिकर्मत्वं दुर्लभम् । प्रयोज्यस्य विष्णुमित्रस्य अकर्तृत्वेन प्रत्युत कर्मसंज्ञकत्वेन विष्णुमित्रक्रियाजन्यसंयोगाश्रयस्य ग्रामस्याकर्मत्वात् इति चेन्न। "कर्तुरीप्सिततममि"(पा. 1-4-49) तिसूत्रे स्वातन्त्र्य -रूपकर्तृत्वस्यैव विवक्षितत्वात् तस्य च विष्णुमित्रेऽबाधितत्वात् तस्य च धात्वर्थ-व्यापाराश्रयत्वरूपत्वात्। न चैवं मीमांसकमतेऽपि विष्णुमित्रस्य तादृशं स्वातन्त्र्यं धात्वर्थफलानुकूलव्यापाराश्रयत्वरूपं विष्णुमित्रस्यास्तीति कृत्वा कर्तृत्वात् ग्रामस्य कर्मसंज्ञा सिद्ध्यतीति वाच्यम्। "कर्तुरीप्सिततम"(पा. 1-4-49)मिति सूत्रे कर्तृ-पदेन यदि तादृशं धात्वर्थफलानुकूलक्रियाश्रयत्वरूपं स्वातन्त्र्यं विवक्षितं सर्वेषां कारकाणां स्वक्रियाद्वाराप्रधानफलोत्पादकत्वेन तस्य कारकमात्रे अतिप्रसक्त्या "माषेष्वश्वं बध्नाती"त्यादौ बन्धनकर्मणः अश्वस्य स्वक्रियाद्वारा माषाणामीप्सित-तमत्वेन माषाणां कर्मत्वे द्वितीयापत्तेः। कर्मसंज्ञायाः अधिकरणसंज्ञापवादत्वात्। तथा च मीमांसकैः आख्यातार्थव्यापाराश्रयत्वरूपमेव कर्तृत्वं वक्तव्यमिति तादृश-कर्तृत्वस्य विष्णुमित्रे अभावात् तत्क्रियाजन्यफलाश्रयस्य ग्रामस्य गमिकर्मत्वं नास्तीति चतुर्थ्यनापत्तिः। न चात्र प्रकृतधातुसम्बन्धिकारकचक्रप्रयोक्तृत्वरूपं स्वातन्त्र्यं विवक्ष्यते इति न दोष इति वाच्यम्। "काष्ठैः पाचयती" त्यादावचेतने तादृशस्वातन्त्र्यस्य निरूपयितुमशक्यत्वात्। तथा च ग्रामस्य गमिकर्मत्वसाधनार्थं प्रकृतधात्वर्थव्यापाराश्रयत्वरूपमेव स्वातन्त्र्यं विवक्षणीयं नान्या गतिरिति तात्पर्यम्।

अत्रेदं तत्त्वम्। "देवदत्तः विष्णुमित्रेण पाचयती" त्यादिणिजन्तस्थले प्रयोज्यस्य कर्तृत्वं साधयितुं मीमांसकानां कृते **पञ्च** विकल्पाः। यत्किञ्चित् आख्यातार्थव्यापारा-श्रयत्वं कर्तृत्वमिति **प्रथमः**। एवं स्वीकारे सर्वेषां कारकाणां कुत्रचित् यत्किंचिदाख्यातार्थव्यापाराश्रयत्वमिति सर्वेषां कर्तृत्वं स्यात्। तथा च "माषेष्वश्वं बध्नाती"त्यत्र अश्वस्य कर्तृसंज्ञायां "कर्तुरीप्सिततमं कर्म" (पा. 1-4-49) ति कर्मसंज्ञा स्यात्। अतः प्रथमः विकल्पः न युक्तः। अथ **द्वितीयः** प्रयोजक-व्यापारस्य णिचा अभिधानात् प्रयोज्यव्यापारः आख्यातार्थः इति। एवं चेत् मीमांसकानां मते आख्यातार्थव्यापाराश्रयत्वस्यैव हि अभिहितत्वप्रयोजकत्वात् अभिहिते प्रथमेति प्रयोज्यवाचकात्प्रथमा स्यात् प्रयोजकव्यापारस्य च आख्यातार्थत्वाभावात् तदाश्रयस्य अनभिहितत्वेन प्रयोजकवाचकात् तृतीया स्यात्। तथा च "देवदत्तेन विष्णुमित्रः पाचयती "ति स्यात् , न तु "देवदत्तः विष्णुमित्रेण पाचयति" इति। किं च आख्यातार्थव्यापाराश्रये एव आख्यातार्थ-संख्यान्वयात् "गुरुः शिष्याभ्यां पाचयति " इत्यत्र प्रयोज्यव्यापारस्य आख्याता-र्थत्वे पाचयतीत्येकवचनप्रयोगो न स्यात्, अपि तु "गुरुणा शिष्यौ पाचयतः" इत्यनिष्टप्रयोगः स्यात्। अतः **द्वितीयो**ऽपि न युक्तः। अथ **तृतीयः** कल्पः णिच्प्रकृतिकाख्यातेन उभयोरपि व्यापारः बोध्यते इति। अस्मिन्नपि पक्षे देवदत्तस्य कर्तृत्वमिव विष्णुमित्रस्यापि कर्तृत्वस्य आख्यातेनाभिधानात् देवदत्तस्येव विष्णु-मित्रस्याप्यभिहितत्वात् देवदत्तपदोत्तरमिव विष्णुमित्रपदोत्तरमपि प्रथमा एव स्यात् तृतीया न स्यात्। किं चात्र उभयोरपि व्यापारयोः प्राधान्यस्य समत्वात् प्रधान-व्यवहारोच्छेदापत्त्या "हेतुमति च" (पा. 3-1-26) इत्यनुशासनविरोधः स्यात्। अतः एते **त्रयः** अपि विकल्पाः प्रयोज्यस्य विष्णुमित्रस्य न कर्तृत्वसाधकाः। अथ प्रकृतधात्वर्थानुकूलव्यापाराश्रयत्वं कर्तृत्वम्, आख्यातानभिहितोऽपि स व्यापारः कर्तृत्वप्रयोजकः इति **चतुर्थः कल्पः** तर्हि सर्वेषां कारकाणां कर्तृत्वापत्त्या "माषेष्वश्वं बध्नाती" त्यादौ माषाणां कर्मसंज्ञापत्तिः। अथ प्रकृतधातुसम्बन्धिकारक-चक्रप्रयोक्तृत्वं कर्तृत्वं इति **पञ्चमः कल्पः** तर्हि विष्णुमित्रस्य कर्तृत्वसिद्धावपि "काष्ठैः पाचयती "त्यादौ काष्ठाद्यचेतनेषु उक्तकर्तृत्वस्याभावात् कर्तृसंज्ञाऽभावेन तृतीया न स्यात्। अतः अवश्यमेव व्यापारस्य धात्वर्थत्वमङ्गीकरणीयम्। तथा चेत् धात्वर्थणिजर्थव्यापारयोराश्रयत्वेन प्रयोज्यप्रयोजकयोः कर्तृत्वमप्युपपादयितुं

शक्यम्। अभिधानानभिधानव्यवस्था, द्वयोःप्रकृत्यर्थणिजर्थव्यापारयोर्मध्ये प्राधान्या -प्राधान्ये, प्रयोज्यप्रयोजकयोः कर्तृप्रयोजकव्यवहार इत्येतत्सर्वम् उपपद्यते।

एतत्सर्वं मनसिकृत्य आह - **एतेनेति** ॥ "एतेन - पूर्वोक्तप्रयोगानिर्वाहेण " इति **काशिका** । "ग्रामं गमयती " ति प्रयोगानिर्वाह इत्यर्थः। "आख्यातार्थव्यापारा-श्रयस्य कर्तृत्वनिरासेनेत्यर्थः" इति **दर्पणः परीक्षा** च। ग्रामस्य गमिकर्मत्वानिर्वाह -दोषेण इति **तत्त्वदर्शिनी** । **उभयमिति** । प्रयोज्यप्रयोजकव्यापारोभयमित्यर्थः। **अपास्तमिति**। णिजन्तप्रकृतिकाख्यातस्योभयार्थकत्वेऽपि तस्य आख्यातस्य णिजन्तधातुयुक्तत्वात् गत्यर्थकधातुयुक्तत्वाभावेन प्रयोज्यस्य विष्णुमित्रस्य गत्यर्थ धातुयुक्ताख्यातार्थव्यापाराश्रयत्वरूपगत्यर्थकर्तृत्वाभावात् तद्व्यापारेणाप्यमानस्य ग्रामस्य गत्यर्थकधातुकर्मत्वानापत्त्या चतुर्थ्यनापत्तिरेवेति **काशिकाशाङ्कर्यौ**। "आख्यातस्य व्यापारद्वयाभिधायकत्वेन विष्णुमित्रस्य कर्तृत्वोपपादनेऽपि तत्कर्तृत्वस्याख्यातेनाभिधानात् देवदत्तपदोत्तरमिव विष्णुमित्रपदोत्तरं तृतीया-दौर्लभ्यम्। एवमाख्यातार्थव्यापाराश्रयत्वस्य उभयोरप्यविशिष्टत्वात् प्रधान-व्यवहारोच्छेदापत्त्या "हेतुमति च"(पा. 3-1-26) इत्यनुशासनविरोधश्च" इति **दर्पणः**। **प्रभापरीक्षे** चात्र दर्पणमनुसरतः। **सरला** काशिकानुसारिणी। **तत्त्वदर्शिनी** अपि ग्रामस्य गमिकर्मत्वानिर्वाहरूपं दोषं प्रदर्शयन्ती काशिकामेवानुसरति। अत्र काशिका सन्दर्भानुगुणा ।

ननु आख्यातार्थव्यापाराश्रयत्वमिव कर्तृत्वं धात्वर्थानुकूलव्यापाराश्रयत्वमपि स्वी-क्रियते। परन्तु नैतदाख्यातार्थव्यापाराश्रयत्वमिव सार्वत्रिकम्। किन्तु क्वाचित्कम् प्रमाणानुमेयं च। "ग्रामं गमयति देवदत्तो विष्णुमित्रम् " इत्यत्र विष्णुमित्रस्य कर्तृत्वं गम्धात्वर्थसंयोगानुकूलव्यापाराश्रयत्वम्। तस्यैव कर्तृत्वस्य अण्यन्ता-वस्थायाम् आख्यातार्थत्वात्। तथा हि - "गतिबुद्धी" (पा. 1-4-52)ति सूत्रेण अण्यन्तावस्थायां कर्तुः ण्यन्तावस्थायां कर्मसंज्ञा विधीयते। तथा च णौ कर्म-संज्ञोद्देश्यभूतस्य कर्तृत्वम् अण्यन्तावस्थाधीनम्। न तु ण्यन्तावस्थाधीनम्। "विष्णुमित्रः ग्रामं गच्छति" इति अण्यन्तावस्था। अस्यामवस्थायां गम्यर्थसंयोगा-नुकूलाख्यातार्थव्यापाराश्रयत्वात्विष्णुमित्रस्य कर्तृत्वं सिद्धम्। अण्ण्यन्तावस्था गतकर्तृत्वस्यैवात्र कर्मसंज्ञाहेतुत्वेन इदानीमाख्यातार्थव्यापाराश्रयत्वरूपकर्तृत्वा-भावेऽपि भूतपूर्वं तत्त्वमालक्ष्य इदानीं तस्मिन् वर्तमानं गम्यर्थानुकूलव्यापारा-

श्रयत्वमेव कर्तृत्वप्रयोजकमिति सूत्रप्रामाण्येन स्वीक्रियते। अन्यथा णिजन्ते कुत्रापि प्रयोज्यस्य कर्तृत्वमेव न स्यात्। तथा च प्रयोजकस्याहेतुत्वे णिज्विधानमेव व्यर्थं स्यात्। अण्यन्तावस्थायां यस्य आख्यातार्थव्यापाराश्रयत्वं तस्यैव प्रकृते आख्यातार्थव्यापाराश्रयत्वाभावेऽपि णिच्प्रकृतिधात्वर्थानुकूलव्यापाराश्रयत्वेन कर्तृत्वं स्वीक्रियते इति "कर्तुरीप्सिततममि"(पा. 1-4-49)ति सूत्रेण ग्रामस्य कर्मसंज्ञा तन्निमित्तकद्वितीयाचतुर्थ्यौ च सिद्ध्यतः। एवं च ण्यन्ते ग्रामस्य कर्मत्व-निर्वाहार्थम् प्रयोज्यव्यापारस्य सम्बन्धरूपेण निवेशनक्लेशोऽपि नास्ति। स च प्रयोज्यव्यापारः तदुत्तरद्वितीयातृतीयाभ्यामेवाभिधीयते णिजन्ते । अतः ग्रामस्य गमिकर्मत्वं सिद्धमिति न चतुर्थ्यनुपपत्तिः। किञ्च ग्रामस्य गत्यर्थकर्मत्वाभावेऽपि "ग्रामाये"ति ग्रामशब्दात् चतुर्थी साधयितुं शक्या एव सम्प्रदानसंज्ञामाश्रित्य । "पत्ये शेते" इत्यादाविव क्रियारूपकर्मणा अभिप्रेतस्यापि सम्प्रदानत्वात्। तथा हि - सम्प्रदानसंज्ञासूत्रे भाष्यं - "क्रियापि कृत्रिमं कर्म। क्रियापि क्रियया ईप्सितं भवति। कया संदर्शनादिक्रियया" इति । "गत्यर्थ" (पा. 2-3-12) सूत्रमपि भाष्यकारेण ग्रामायेत्यादिषु सम्प्रदानसंज्ञामाश्रित्य चतुर्थीं संसाध्य प्रत्याख्यातम्। तथा हि - "किमर्थं पुनरिदमुच्यते। चतुर्थी यथा स्यात्। अथ द्वितीया सिद्धा। सिद्धा कर्मणीत्येव। चतुर्थ्यपि सिद्धा। कथम्, सम्प्रदाने इत्येव। न सिद्ध्यति। "कर्मणा यमभिप्रैति स सम्प्रदानम्"(पा.1-4-32) इत्युच्यते। क्रियया चासौ ग्राममभिप्रैति। कया क्रियया गमिक्रियया। क्रियाग्रहणमपि तत्र चोद्यते" इति हि तत्र भाष्यम्। यथा च सन्दर्शनादिक्रियायाः अपि पृथक् धात्वर्थत्वेन विवक्षया संदर्शनादिक्रियया आप्तुमिष्टस्य शयनस्य कर्मत्वं ततः तेन कर्मणा अभिप्रेतस्य पत्युः सम्प्रदानत्वं च पत्ये शेते इत्यादिषु उपपाद्यते तथा गम्यर्थानुकूलव्यापारस्य तदनुकूलव्यापारस्य च णिजन्तार्थत्वेन णिजर्थप्रेरणाव्यापारस्य कर्म गम्यर्था-नुकूलव्यापारो भवतीति तया क्रियया आप्तुमिष्यमाणस्य ग्रामस्य सम्प्रदानसंज्ञा चतुर्थी च सिद्ध्यतः। वैयाकरणानां मते गम्धातोः संयोगानुकूलव्यापारः अर्थः, णिचः तदनुकूलप्रेरणव्यापारः। तथा च प्रयोजकः स्वप्रेरणव्यापारस्य कर्मभूतगमि-क्रियया ग्रामसम्बन्धमिच्छतीति ग्रामस्य सम्प्रदानसंज्ञा। अयमत्र विवेकः। प्रयोज्यविष्णुमित्रव्यापारजन्यसंयोगरूपफलाश्रयत्वविवक्षायां ग्रामस्य कर्मत्वं प्रयोजकव्यापारस्य प्रयोज्यव्यापारद्वारकसम्बन्धविवक्षायां ग्रामस्य संप्रदानत्वम्

इति। सम्प्रदानत्वं तु प्रयोजकदृष्ट्यैव । कर्मत्वं तु उभयदृष्ट्यापि । कार्यकारणभूतयोः द्वयोरपि क्रिययोः पदार्थत्वं तु आवश्यकम्। एतच्च संप्रदानसूत्रे कैयटोद्योतयोः स्पष्टम्।

मीमांसकमते फलमात्रस्य धात्वर्थत्वात् तदनुकूलः व्यापारः, तदनुकूलश्च व्यापारः इति व्यापारद्वयं पृथक् णिजर्थतया स्वीक्रियते।आख्यातार्थस्तु तयोर्मध्ये विशेष्यभूत एव । प्रधानस्यैव आख्यातेन अनुवादात्। तथा च ग्रामस्य सम्प्रदानत्वमाश्रित्य तस्य प्रयोगस्य साधयितुं शक्यत्वात् न दोषः इति चेदाह - **किञ्चेति** ॥ अत्र **काशिका - शाङ्करी - प्रभा तत्त्वदर्शिन्यः** गत्यर्थसूत्रस्य प्रत्याख्यानपक्षमाश्रित्य अवतरणिकां रचितवत्यः । **काशिकायामन्योऽपि** पक्षः ग्रामस्य गत्यर्थकर्मतासाधकः एवमुपन्यस्तः – "ननु गत्यर्थकर्मपदेन तदर्थसंयोगाश्रयत्वे सति तदनुकूलव्यापारानाश्रयत्वेन विवक्षितो यः तदभिन्नोऽर्थो विवक्षितः लक्ष्यानुरोधात्" इति । "गत्यर्थकर्मणी"(पा. 2-3-12)तिसूत्रे कर्मपदं न "कर्तुरीप्सिततमं कर्म"(पा. 1-4-49) इति सूत्रविहितकर्मसंज्ञकपरम्। अपितु लक्षणया संयोगा - नुकूलव्यापारव्यधिकरणसंयोगाश्रयत्वरूपम्। ततश्च ग्रामाय गमयतीत्यत्र ग्रामस्य "कर्तुरीप्सिततम"(पा. 1-4-49)मिति कर्मसंज्ञाभावेऽपि चतुर्थी सिद्ध्यति इति अस्य तात्पर्यम्। एवमवतार्य तत्र असन्तोषेण "किञ्च "गत्यर्थे"(पा. 2-3-12)ति सूत्रं भाष्ये प्रत्याख्यातमिति प्रत्याख्यानपक्षः तत्र उक्तः । शाङ्कर्यां काशिकाया एवानुवादः दृश्यते । अथ **दर्पणपरीक्षयोः** अवतारिका अन्यादृशी एव । तत्र हि - "ननु णिजाख्यातान्यतरार्थव्यापाराश्रयत्वं कर्तृत्वम्। अस्मन्मते (मीमांसकमते) फलमात्रस्य गणपठितधात्वर्थत्वेन तदनुकूलणिजर्थव्यापाराश्रयत्वेन विष्णुमित्रस्यापि कर्तृत्वात् दौर्लभ्येन न उक्तानुपपत्तिरत आह-" इति **दर्पणे**, अस्यैवानुवादः **परीक्षायां** च अस्ति । अस्य आपाततः दर्शनेन णिजर्थः प्रयोज्यव्यापारः आख्यातार्थः प्रयोजकव्यापारः इति ग्रन्थाभिप्रायः भासेत, परन्तु न तथा । पूर्वोदाहृतभाष्यरीत्या गमनक्रियायाः प्रेरणक्रियाकर्मत्वमाश्रित्य ग्रामस्य संप्रदानत्वं वक्तव्यम्।तथा च णिजन्तेन गमयतीत्यादौ गमनक्रियया सह तदनुकूलप्रेरणापि बोध्यते।मीमांसकमते गम्धातोः केवलफलवाचकत्वात् व्यापारद्वयं णिचा बोध्यते इत्यर्थः। तथा च प्रयोज्यव्यापारे बोधिते तदाश्रयत्वेन विष्णुमित्रस्य कर्तृत्वमपि सुलभम्। तादृशकर्मणा अभिप्रेतस्य ग्रामस्य सम्प्रदानत्वमपि सुलभम् ,उभयोरपि

गमनक्रियाश्रितत्वात्। अथवा प्रयोजक एव स्वप्रेरणाव्यापारफलभूत गमनक्रिया-द्वारा ग्रामसम्बन्धमिच्छतीत्यपि व्याख्यातुं शक्यम्। अतः इयमवतरणिकापि न दुष्टेति विभावयामः । ॥**तस्मिन् प्रयोगे इति** ॥ आख्यातार्थव्यापाराश्रयत्वमिति मीमांसकानां कर्तृत्वलक्षणं केवलान्वयि । यतः सर्वस्यापि पदार्थस्य यत्किंचिदा-ख्यातार्थव्यापाराश्रयत्वस्य निरूपयितुं शक्यत्वात्। तथा च "घटः भवति" इति प्रयोगे आख्यातार्थव्यापाराश्रयत्वेन घटस्य कर्तृत्वात् तादृशकर्तृत्वमादाय "घटं करोति" इत्यत्रापि घटस्य कर्तृत्वापत्तौ द्वितीया न स्यात्।

"शक्तिमात्रासमूहस्य विश्वस्यानेककर्मणः।
सर्वदा सर्वथा भावात् क्वचित् किंचित् विवक्ष्यते ॥" (वा.प.साध-2)

इति कारिकया "सर्वेषु पदार्थेषु सर्वाः शक्तयः कर्तृत्वादिरूपाः केवलान्वयिन्यः" इति वदति भर्तृहरिः साधनसमुद्देशे । अतः तत्तत्प्रयोगगताख्यातार्थव्यापारा-श्रयत्वमेव कर्तृत्वमिति परिष्करणीयम्। आख्याततदर्थव्यापाराश्रयवाचकयोः एकवाक्यस्थत्वमावश्यकमिति तदर्थः। "देवदत्तः ओदनं पचति" इत्यत्र पचधातू-त्तरतिङ्प्रत्ययेन विक्लित्त्यनुकूलव्यापारबोधात् तदाश्रयस्य देवदत्तस्यैव कर्तृत्वं प्रकृते न तु ओदनस्य। ओदनस्य "ओदनं भवति" इत्यादिवाक्यान्तर्गततिङर्थ-भवनादिक्रियाश्रयत्वेऽपि प्रकृते आख्यातस्य तदर्थत्वाभावात् अत्र ओदनस्य तादृश -व्यापाराश्रयत्वेनाविवक्षणात्। तथा च तिङन्तघटितवाक्येष्वेव तिङर्थव्यापारा-श्रयस्य कर्तृत्वमुपपादयितुं शक्यं मीमांसकानां मते ।तथा सति यत्र आख्यातान्त-प्रयोगो नास्ति तत्र कस्यापि पदार्थस्य कर्तृत्वमेव न भवेत्। तदेव उदाहरणमुखेन प्रदर्शयति - "देवदत्तः पक्ते"ति । "पक्ता" इत्यत्र पच्धातोः "ण्वुल्तृचा"(पा. 3-1-133) विति कर्तरि तृच्प्रत्ययः । मीमांसकमते पच्धातोः विक्लित्तिरूपफलमात्रं धात्वर्थः।तृच्प्रत्ययार्थः कर्ता।व्यापारस्तु न कस्यचिदप्यर्थः।व्यापारबोधकः तिङ् प्रत्ययः नास्ति । तथा च धात्वर्थकृत्प्रत्ययार्थयोः परस्परमन्वयस्यैवाभावेन कृत्प्रत्ययार्थकर्तुः विक्लित्त्यनुकूलव्यापाराश्रयत्वस्याप्रतीतेः तत्समानाधिकरण-देवदत्ते तादृशकर्तृत्वस्यानापत्तिः । यद्यपि आख्यातशून्यं वाक्यं मीमांसकैः नाभ्युपेयते "अस्तिर्भवन्तीपरोऽप्रयुज्यमानोऽप्यस्ती"ति अस्तिपदाध्याहारेण वाक्यस्य पूर्णता सम्पादनात्, तथापि अत्र अस्ति पदाध्याहारेण अस्-धातु-समभिव्याहृततिङा सत्तारूपव्यापारस्यैव बोधनात् देवदत्तस्य सत्ताकर्तृत्वमेव

सिद्ध्येत् न तु पाककर्तृत्वमित्यर्थः। अतोऽत्र अकर्तृतापत्तेः इत्यस्य पाकक्रिया-निरूपितकर्तृत्वानापत्तेरित्यर्थः । तथा च पच्धातोः कर्तरि तृच्प्रत्ययानापत्तिः ।

ननु तिङन्तस्थले यथा आख्यातार्थभावनया कर्ता आक्षिप्यते तथा कृदन्तस्थले कर्त्रा व्यापार आक्षिप्यते। तथा च कृत्प्रत्ययार्थकारकाक्षिप्तभावनायां धात्वर्थ-फलस्य कृत्प्रत्ययार्थकर्तुश्चान्वयसंभवात् पक्तेत्यत्र पाककर्तुरेव बोधो भवति तृच्-प्रत्ययश्च सिद्ध्यति । पक्तादिशब्दानां "पचति" इत्यादि यद्धातुप्रकृतिकाख्यातार्थ-व्यापाराश्रयत्वं यस्य गृहीतं तत्र तद्धातोः कृत् भवतीत्यर्थः। एवं च आक्षिप्तभावना-श्रये वाच्ये कृदित्यर्थः सिद्ध्यति । तथा च आख्यातार्थव्यापाराश्रयत्वं कृदाक्षिप्त-भावनाश्रयत्वं वा कर्तृत्वं सिद्धम्। अथ "शाब्दस्य शाब्देनैवान्वय" इति नियम-माश्रित्य आक्षिप्तभावनायाम् आक्षिप्तकर्त्रादिषु शाब्दफलादीनां संख्यायाश्च अन्वयः न साधीयः तर्हि तिङन्ते कर्तृकर्मणोः निरूढलक्ष्यत्वमिव कृदन्ते कृत्प्रत्ययेन भावनापि विशेषणत्वेन लक्षणया बोध्यते इत्यङ्गीकुर्मः। तथा च धातुविहितप्रत्यय-वाच्यव्यापाराश्रयत्वं कर्तृत्वं सिद्ध्यति । धातुविहितेतिप्रत्ययविशेषणाच्च न करण-तृतीयार्थव्यापाराश्रयेऽतिव्याप्तिः । अतश्चास्माकं मतेऽपि न दोष इति चेन्न । बहुत्र अनेकक्लिष्टकल्पनापत्तेः। तदेतत्सर्वं ध्वनयन्नाह - **दिगिति**॥ धातुविहितप्रत्ययार्थ - व्यापाराश्रयत्वस्य कर्तृत्वेऽपि प्रयोज्ये विष्णुमित्रादौ कर्तृत्वं दुर्लभम्। तथा हि - "ग्रामं गमयति देवदत्तो विष्णुमित्रम्" इत्यत्र णिच्प्रत्ययेन प्रयोज्यव्यापारः उच्यते आख्यातेन प्रयोजकव्यापार उच्यत इति धातुविहितप्रत्ययार्थव्यापाराश्रयत्वेन कर्तृत्वं विष्णुमित्रस्योपपादनीयं तच्च न युक्तम्। णिजर्थतया प्रयोज्यव्यापारस्य विवक्षितुमशक्यत्वात् "हेतुमति च" (पा. 3-1-26) इत्यनुशासनविरोधात्। "हेतु-मति च" (पा. 3-1-26)त्यनेन हि प्रयोजकव्यापारे वाच्ये एव णिज्विधीयते । अनेनैव णिचः प्रयोज्यप्रयोजकव्यापारोभयार्थकत्वमपि निरस्तम्। अवस्थान्तर-गताख्यातार्थव्यापाराश्रयत्वमाश्रित्य अवस्थान्तरे कर्तृत्वोपपादनमपि न सम्यक्। तथा चेत् पुनः सर्वेषु कारकेषु अवस्थान्तरकर्तृत्वमाश्रित्य कर्तृत्वमेव स्यात्। तथा च काष्ठानां "काष्ठानि पचन्ति" इत्यवस्थान्तरगतकर्तृत्वमादाय "काष्ठैः पचति" इत्यत्रापि काष्ठानां कर्तृत्वापत्तिः । किञ्च अण्यन्तावस्थागतकर्तृत्वमाश्रित्य कर्म-संज्ञाया इव ण्यन्तावस्थायां प्रयोज्यस्य कर्तृत्वस्य उपपादने "गतिबुद्धी"(पा. 1-4-52)ति सूत्रं प्रमाणं न भवति । तथा च मीमांसकानां मते "ग्रामं गमयति

विष्णुमित्रम्, शत्रूनगमयत्स्वर्गम्" इत्यादौ प्रयोज्यविष्णुमित्रादेः कर्मत्वेऽपि कर्तृत्वस्याभावात् "ण्यन्ते कर्तुश्च कर्मणः" इति भाष्यविरोधः । ण्यन्ते कर्तृत्ववति कर्मणि एव कर्मप्रत्यय इति तद्भाष्यार्थः । न च "कर्तुश्च कर्मणः" इति भाष्यमसङ्गतं संज्ञान्तराभाववति कर्तृपदसङ्केतेन अत्र प्रयोज्यस्य "गतिबुद्धी"(पा. 1-4-52)ति कर्मसंज्ञाविधानेन कर्तृत्वासम्भवादिति वाच्यम्। एकस्मिन् व्यापारे एकस्य पदार्थस्य कर्तृत्वकर्मत्वाभ्यामन्वयाभावेऽपि व्यापारद्वये एकस्यैव कस्मिंश्चित् कर्तृत्वेन अन्यस्मिंश्च कर्मत्वेनान्वये बाधकाभावात्। णिजन्तस्थले शुद्धधात्वर्थव्यापारः णिजर्थप्रयोजकव्यापार इति व्यापारद्वयम्। तथा च एकस्यैव प्रयोज्यस्य शुद्धधात्वर्थव्यापारे कर्तृत्वेन णिजर्थव्यापारे कर्मत्वेन च चान्वयः।अतो न विरोधः। किञ्च धातोः व्यापारार्थकत्वे एव "पत्ये शेते " इतिवत् प्रयोजकव्यापारप्रयोज्यस्य प्रयोज्यव्यापारस्य धातुवाच्यस्य कर्मत्वमाश्रित्य ग्रामादीनां सम्प्रदानसंज्ञा सिद्ध्यति । मीमांसकमते गमयतीति णिजन्ते संयोगानुकूलः प्रयोज्यव्यापारः न कस्यचित् वाच्यः।न हि णिजर्थः सः।णिचः तत्र शक्तिग्राहकप्रमाणाभावात्। णिचः व्यापारद्वयार्थकत्वं कथंचिदप्युपपादयितुं न शक्यमिति पूर्वमेवोपपादितम्। तथा च ग्रामायेति चतुर्थ्यनापत्तिरूपः दोषः दुष्परिहर एव । किञ्च धातोः व्यापारार्थकत्वाभावे "धातोः कर्मणः समानकर्तृकात् इच्छायां वा" (पा. 3-1-7) इति सूत्रेण इषिकर्मणः इषिणा एककर्तृकात् धातोः इच्छायां विहितः सन्प्रत्ययः न स्यात्। धातोः केवलफलवाचकत्वे तस्य इषिणा एककर्तृकत्वं कथं स्यात्? नहि सन्प्रत्ययार्थ एव सः भवितुमर्हति । तादृशव्यापारस्य धातुवाच्यस्य सन्प्रत्यये कारणत्वात्। एवं "धातोरेकाचो हलादेः क्रियासमभिहारे यङ्" (पा. 3-1-22) इति यङ् अपि न स्यात्। क्रियायाः पौनःपुन्ये भृशार्थे च धातोः यङ्विधानात्। यङः स्वप्रकृत्यर्थान्वितस्वार्थबोधकत्वात् धात्वर्थगतेः पौनःपुन्ये विवक्षिते धातोः यङ् भवतीति धातोः केवलफलवाचकत्वे तत्र पौनःपुन्यभृशार्थयोः अन्वयासम्भवात् यङुत्पत्तिरपि न स्यात्। एवं कर्मव्यतीहारे विहितानां णजादिप्रत्ययानां धातोः केवलफलवाचकत्वे अनुत्पत्त्या तद्विधानमेव व्यर्थं स्यात्। एवं "समानकर्तृकयोः पूर्वकाले"(पा. 3-4-21) इति सूत्रासङ्गतिः।समानकर्तृकयोः क्रिययोः पूर्वकालवृत्तिक्रियायां वर्तमानाद्धातोः क्त्वाप्रत्ययः भवतीति सूत्रार्थः।धातोः क्रियावाचकत्वाभावे तु तदसङ्गतिः स्पष्टा । किञ्च मीमांसकेन धात्वर्थफलप्रकारका-

9.6. भूवादयो धातवः इति सूत्रव्याख्या – धातुत्वपरिष्कारः

सूत्रानुपपत्तिमपि मानत्वेन प्रदर्शयन्नुक्तार्थस्य स्वोत्प्रेक्षिततत्वं निरस्यति-किं चेति। धातुसंज्ञाविधायकं "भूवादयो धातवः" (पा.1-3-1) इति सूत्रम्। तत्र भूश्च वाश्चेति द्वन्द्वः आदिशब्दयोर्व्यवस्थाप्रकारवाचिनोरेकशेषः। आदिश्च आदिश्च आदी ततो भूवौ आदी येषान्ते भूवादय इति बहुव्रीहिः। तथा च भूप्रभृतयो वासदृशा धातव इत्यर्थः। तच्च क्रियावाचकत्वेन। तथा च क्रियावाचकत्वे सति भ्वादिगणपठितत्वं धातुत्वं पर्यवसन्नम्। अत्र हि क्रियावाचित्वमात्रोक्तौ वर्जनादिरूपक्रियावाचके "हिरुक्"नाना इत्यादावतिव्याप्तिरिति भ्वादिगणपठितत्वमुक्तम्॥ 9 ॥

नुकूलत्वसंसर्गकभावनाविशेष्यके बोधे धात्वाख्यातानुपूर्वी-धातुकृदानुपूर्व्योः कारणतावच्छेदकत्वमङ्गीकरणीयम्। तत्र परस्परव्यभिचारवारणाय अव्यवहितो–त्तरत्वघटितत्वानन्तकार्यकारणभावकल्पनापत्तिः। व्यापारस्य धात्वर्थत्ववादिना तु तादृशधात्वानुपूर्व्या एव कारणतावच्छेदकत्वमङ्गीकार्यमिति लाघवम्। किञ्च व्यापारस्य प्रत्ययार्थत्वे अनेकप्रत्ययानाम् अनेकव्यापारेषु अनन्तशक्तिकल्पना स्यात्। तथा च तिङामनन्तव्यापारार्थकत्वात् पचतीत्यादिषु संयोगाद्यनुकूल-व्यापारबोधवारणाय विक्लित्त्यनुकूलव्यापारबोधाय च तत्तदर्थबोधे तत्तद्धातुसमभि-व्याहारस्य कारणता कल्पनीयेति गौरवपरम्परा । "तद्धेतोरेव तद्धेतुत्वे मध्ये किं तेने"ति न्यायेन धातोरेव व्यापारवाचकत्वे लाघवमपि ।

किञ्च मीमांसायां व्याकरणधिकरणे शक्तत्वस्यैव साधुत्वेन सिद्धान्तितत्वात् साधुत्वं व्याकरणधीनमिति व्याकरणस्य च तत्तदर्थपुरस्कारेण तेषां तेषां पदानां साधुत्वबोधनार्थं प्रवृत्त्या तत्तत्प्रकृतिप्रत्ययादीनां व्याकरणशास्त्रबोधितेऽर्थे एव साधुत्वमिति अर्थान्तरे प्रयोगे असाधुत्वमेव स्यात्। व्याकरणशास्त्रेण च क्रिया-वाचकस्यैव धातुसंज्ञा विहितेति क्रियावाचकत्वाभावे धातोः केवलफलवाचकत्वे धातुसंज्ञानापत्त्या "धातोः" (पा. 3-1-91) इत्यधिकारविहितप्रत्ययानुपपत्तिः । केवलफलवाचकत्वेन प्रयोगे धातोरसाधुत्वं च स्यात्। तदेव उपपादयितुं किञ्च क्रियावाचकतामित्यादि कारिकार्धमवतारयति - **सूत्रानुपपत्तिमित्यादिना** ।

9.6.1. **भूवादिसूत्रव्याख्या**

सूत्रस्य -"भूवादयो धातवः" (पा. 1-3-1) इति धातुसंज्ञाविधायकस्य । **मानत्वेन** - व्यापारस्यापि धात्वर्थत्वे प्रमाणत्वेन। **उक्तार्थस्य** - धातोः व्यापारा-

र्थकत्वस्य पूर्वोक्तस्य। **स्वोत्प्रेक्षितत्वम्** - केवलस्वयुक्तिसाध्यत्वम्। **निरस्यति** - निराकरोति। शास्त्रान्तरे युक्तिविशेषसाधितस्य विषयस्य प्रमाणत्वेऽपि न व्याकरणे केवलयुक्तिविशेषसाधितस्य प्रामाण्यम्। अपितु तस्यापि मुनित्रयसम्मतस्यैव । अतः तस्य सूत्रवार्तिकभाष्यान्यतमप्रामाण्यमवश्यं प्रदर्शनीयम्। अन्यथा तस्मिन् अप्रामाण्यात् पाणिनीयानामनुपादेयतैव स्यात् इति तात्पर्यम्। भूवादिसूत्रव्याख्या-परस्य ग्रन्थस्य अवतरणिका **काशिकायामित्थं** रचिता या च अक्षरशः **प्रभाशाङ्करीभ्यामनूदिता तत्त्वदर्शिन्यापि** अनुमोदिता -"ननु भूवादय इत्यस्य भूरादिर्येषामिति बहुव्रीहिणा भूप्रभृतयो धातुसंज्ञा इत्येवार्थो न तु भ्वादिगणपठिता क्रियावाचकाः धातुसंज्ञा इति, तद्बोधकशब्दाभावात्। कथं तर्हि भूवादय इति निर्देशोपपत्तिः। निपातनाद्वकारागम इति गृहाण । ननु तथापि तदानर्थक्यं दुष्परिहरमेवेति चेन्न। "भूवादीनां वकारोऽयं मङ्गलार्थः प्रयुज्यते" इति वार्तिककारै -रेव परिहृतत्वात्। मङ्गलार्थः - मङ्गलसूचकः । यथाऽपूर्वस्य दध्यादेर्लाभो लोके मङ्गलसूचकस्तथेत्यर्थः। अथवा सति वकारे अविकृतभूशब्दोच्चारणेन महाव्याहृति-रेफान्तभूशब्दस्मरणसम्पादनद्वारा तस्य मङ्गलसूचकत्वमिति कैयटीये स्पष्टम्। एवं च न सूत्रानुपपत्तिः परमते इत्याशङ्कां निराचिकीर्षुः सूत्रार्थमाह - **तत्र भूश्च वाश्चेत्यादिना** ॥ **व्यवस्थेति**॥ स्वाभिधेयाऽपेक्षावधिनियमः व्यवस्था । यस्मात् पूर्वो नास्ति परश्चास्ति स प्रथमः। कस्मिंश्चित् अयं प्रथम इति उक्ते सति कस्मात् इति नियमेन अवधेः आकाङ्क्षा भवति । तथा च भू इति प्रथम इति ज्ञाते कस्मात् इत्याकाङ्क्षायां सर्वोऽपि अनन्तरः दशगण्युपदिष्टः धातुसमूहः गृह्यत इति भू इति प्रथमावयवकः सर्वोऽपि धातुसमुदायः भ्वादिशब्देनोच्यते । **प्रकारेति**॥ प्रकारः सादृश्यम्। एवं च एकस्य आदिशब्दस्य व्यवस्थाबोधकत्वं द्वितीयस्य च सादृश्य-बोधकत्वमित्यर्थः । न चादिशब्दस्य प्रकारार्थत्वे मानाभावः। "वसिष्ठादयो ब्रह्मर्षय" इत्युक्ते वसिष्ठसदृशा इत्यर्थप्रतीतेः सत्त्वात्। "देवदत्तादयः आढ्या अभिरूपतराः पक्षवन्तः" इत्युक्ते देवदत्तप्रकाराः इत्यर्थप्रतीतिरिति भाष्येऽपि आदिशब्दस्य सादृश्यार्थकत्वमुक्तम्। भूवौ इति द्वन्द्वः । आदीति एकशेषः । तथा च द्वाभ्यां द्वयोः यथासंख्यमन्वयः स्वीक्रियते । तथा च भूप्रभृतयः वासदृशाः इत्यर्थः।नन्वत्र भूशब्देन "भू" धातोरेव कथं ग्रहणम् भूम्यर्थकभूशब्दस्यापि सत्त्वात् इति चेत् वासाहचर्येण इति गृहाण। तथा हि - वा शब्दः गतिगन्धनार्थकः

क्रियावाची विकल्पार्थः निपातश्च । अर्थद्वयेऽपि सः असत्त्वार्थकः । तथा च असत्त्वार्थकवासाहचर्यात् भूशब्दः असत्त्वार्थकः क्रियावाची एव गृह्यते । न तु भूम्यर्थकः। तस्मिन्नर्थे तस्य सत्त्वार्थकत्वात्। तथा च वाशब्दसाहचर्येण भू इत्यनेन असत्त्वार्थकस्य क्रियावाचकस्यैव बोधात् तत्साहचर्यात् वाशब्देनापि क्रियावाची एव बोध्यते । ततश्च परस्परसाहचर्यात् द्वयोः क्रियावाचिनोः ग्रहणात् भ्वादयः वादयः धातवः भूप्रभृतयः वासदृशाश्च धातवः इति सिद्ध्यति । वाशब्दस्यात्र साहचर्येण क्रियावाचकस्यैव निर्धारणात् तत्सादृश्येन क्रियावाचिनां धातुसंज्ञेति सिद्ध्यतीति भावः । अत्र **सरलायां** बोधः इत्थं प्रदर्शितः - "भूशब्दस्य निष्ठत्वसम्बन्धेन व्यवस्थावाचकादिशब्देऽन्वयः । वा शब्दस्य च प्रतियोगित्व-सम्बन्धेन प्रकारवाचकादिशब्देऽन्वयः। भूवेत्यनयोः विशेष्यभूतयोः आदिशब्दयोश्च परस्परमभेदेन अन्वयः। भूनिष्ठाद्यवयवतानिरूपकाभिन्नाः वाप्रतियोगिकसादृश्य-विशिष्टाः धातुसंज्ञका इत्यर्थः। इति। पुनस्तत्रैव द्वन्द्वसमासाद्यनुपपत्तिरित्थ-माशङ्किता - "ननु भूवाशब्दयोर्भिन्नसम्बन्धेनान्यत्रान्यत्रान्वये सहविवक्षाऽभावेन द्वन्द्वानुपपत्तिः सकृदुच्चरितः शब्दः सकृदर्थं गमयति इति नियमात् सकृदुच्चरितादि शब्देनैकस्यैवोपस्थितिनियमादर्थद्वयोपस्थित्यनुपपत्तिः, "एकपदोपस्थाप्यार्थद्वयस्य परस्परमभेदसम्बन्धेनान्वयोऽव्युत्पन्नः" इति व्युत्पत्तेः अभेदान्वयानुपपत्तिश्चेति । अत्र भूवार्थयोः एकत्रानन्वयेन सहविवक्षाभावात् द्वन्द्वः दुर्लभः आदिशब्दस्यै-कस्यैवोच्चारणात् द्वयोरप्रतीतिः, आदिशब्दार्थयोः अभेदान्वयस्य अनुपपत्तिः तादृशव्युत्पत्तेरभावात् इति दोषत्रयमुक्तम्। वस्तुतः एतत् त्रयं दोषाभासरूपम्। यथा च "आद्यन्तौ टकितौ" (पा. 1-1-46) इत्यादौ साहित्यावच्छिन्ने साहित्या-वच्छिन्नस्य अन्वयमात्रेण द्वन्द्वसाधुत्वं तथा अत्रापि । अत्र च शास्त्रे यथासंख्य-सूत्रारम्भसामर्थ्यात् एतादृशद्वन्द्वस्य साधुत्वं स्वीक्रियते। अन्यथा "पाघ्राध्मा" (पा. 7-3-78) इत्यादिविधीनां वैयर्थ्यप्रसङ्गः। लोके तु एतादृशस्य द्वन्द्वस्यासाधुत्वमेव। अथ सकृदुच्चरितन्यायोऽपि "सरूपाणा"(पा. 1-2-64)मिति सूत्र प्रत्याख्यानभाष्य -प्रामाण्येनात्र शास्त्रे नाश्रीयते । प्रत्यर्थं शब्दनिवेशः इत्यस्य "अर्थमर्थं प्रति अर्थौ अर्थौ प्रति अर्थान् अर्थान् प्रति" इति त्रिविधविग्रहस्वीकारेण शब्दस्य एकार्थ-बोधकत्वमिव अनेकार्थबोधकत्वस्यापि सहजसिद्धत्वात्। अन्यथा एकशेष एव असङ्गतः स्यात्। तथा च एकशेषसूत्रारम्भपक्षे तत्प्रत्याख्यानपक्षे च शब्दस्य

सकृदुच्चरितस्यैवानेकार्थबोधकत्वं शास्त्रेणैव बोध्यते। अत एव च तत्र द्विवचनादि। अथैकेन शब्देन उपस्थापितयोरभेदेनान्वयोऽव्युत्पन्न इति। सापि व्युत्पत्तिः तन्त्रस्थले "विद्वन्मानसहंसे"त्यादौ मानसशब्देन मनोमानससरोवरयोः बोधे द्वयोरभेदान्वयस्वीकारात् न सार्वत्रिकी। परन्तु यच्छब्दवाच्यावर्थौ पृथक् भेदेन विवक्षितौ तयोः अभेदेनान्वयो न भवति तदुत्तरविभक्तिवाच्यसंख्यानन्वयात्। यथा च रामौ इत्यत्र रामाभिन्नो राम इति बोधो न भवति द्वित्वान्वयानुपपत्तेः। तथा च अत्र एकशेषे कृते "आदी" इति द्विवचने सति द्वयोः आदिशब्दयोः अभेदेनान्वयस्तु अशक्य एव। अतः अत्र एक एव आदिशब्दः तन्त्रेण उभयार्थकः निर्दिष्टः तस्मिन्नेव भूवौ इति द्वन्द्वस्यान्वय इति कथंचित् समाधातव्यं स्यात्। वस्तुतः अत्र आदिशब्दार्थयोः अभेदः न शब्दार्थः। "भूप्रभृतयः वासदृशाः धातवः" इत्येव सूत्रार्थः। द्वयोः सामानाधिकरण्येन सम्बन्धस्तु पार्ष्टिकः। "भूप्रभृतयः धातवः वा सदृशाः धातवः" इति बोधे सति लक्षणद्वयेनापि लक्ष्यमाणस्यैकत्वेन लक्षणद्वयस्य सामानाधिकरण्यं सिद्ध्यतीति भावः। यथा "पीनो देवदत्तः शिखी च"। अत्र लक्ष्यमाणस्य देवदत्तस्यैकत्वात् शिखापीनत्वयोः सामानाधिकरण्येन पीनत्वे सति शिखावत्त्वं देवदत्तस्य लक्षणं पर्यवस्यति। अतः न काचिदनुपपत्तिः। एतदेव सूचयति **भूप्रभृतयो वासदृशाः धातवः इत्यर्थः**॥ इति। यद्यप्यत्र **सरलायां** समाधानरूपेण "भूवादयश्च भूवादयश्च भूवादय इति तन्त्रावृत्त्यन्यतरनिर्देश-स्वीकारेणादोषात्" इत्युक्तं तन्न युक्तम्। "भूवादीनां वकारोऽयं मङ्गलार्थः प्रयुज्यते" इति वकारस्य मङ्गलार्थत्वमाश्रित्य "भूवादय" इत्यस्य भूप्रभृतयः इत्यर्थेऽनुपपत्त्यभावेऽपि भूवादयः इत्यस्मात् वा सदृशाः इत्यर्थस्त्वनुपपन्न एव। अथोभयत्र वकारः मङ्गलार्थः भूप्रभृतयः भूसदृशाः धातव इत्येवार्थः भूसादृश्यं च क्रियावाचकत्वेन भवतु इति तदपि न युक्तम्। तत्र भूवाशब्दयोः परस्पर-साहचर्येणैव द्वयोरपि क्रियावाचकत्वं लभ्यते। वकारः मङ्गलार्थश्चेत् साहचर्य-मेवोपपादयितुं न शक्यमिति पुनः भूशब्देन सत्त्वार्थकस्यापि ग्रहणं स्यात्। अथ भूवादयः इति प्रथमे यथा वकारस्य मङ्गलार्थता तथा द्वितीये भूशब्दस्य मङ्गलार्थता तथा च न दोषः इति तदपि न। न केनापि पूर्वतनेन वैयाकरणेन भूशब्दस्य मङ्गला-र्थतायाः अनुक्तेः। भाष्येऽपि वकारविषये एव मङ्गलार्थत्वप्रस्तावात्। किंच भूवा - शब्दयोर्द्वयोः सार्थकयोः सह प्रयोगे एव सहचरितन्यायस्य प्रवृत्तिः। पक्षेऽस्मिन्

एकदा वकारः निरर्थकः अन्यदा भूशब्दः निरर्थकश्चेत् (मङ्गलार्थत्वेन), साहचर्यमेव नास्तीति द्वयोः क्रियावाचिनोः ग्रहणाभावे पूर्वोक्त एव दोषः। किञ्चात्रोत्तरग्रन्थ-विरोधोऽपि । क्रियावाचिन इति प्रतीकमुपादाय भूवाशब्दयोः परस्परसाहचर्येण क्रियावाचित्वस्योपपादनात्। अतोऽत्र **सरला** उपेक्ष्या । **तच्चेति** ॥ वा सादृश्यं चेत्यर्थः । **क्रियावाचकत्वेनेति** ॥ वा गतिगन्धनयोः इति धातुपाठात् वाधातोः यथा गत्यादिरूपक्रियावाचित्वं तथा भूप्रभृतीनामपि सत्तादिरूपक्रियावाचित्वात् तत्सादृश्यम्। एवं चात्र अर्थतः सादृश्यं गृह्यते न शब्दतः । शब्दतः सादृश्य-स्वीकारे तस्य अव्यावर्तकत्वमेव स्यात्। वाधातोः शब्दतः अदादिगणे पाठात् शब्दतः सादृश्यम् आदादिकत्वेन स्वीकृतं चेत् भ्वादिषु पुनः अव्याप्तिः । एवं गत्यर्थकत्वेन सादृश्यस्वीकारेऽपि अगत्यर्थेषु भ्वादिष्वव्याप्तिः । अतः क्रिया-वाचित्वेन सादृश्यमित्यर्थः । व्याख्यानादेतादृशविशेषप्रतिपत्तिरित्यर्थः । "नन्वेवमपि वाधातोः धातुत्वं न स्यात्। स्वस्मिन् स्वसादृश्यस्य निरूपयितु -मशक्यत्वादिति चेन्न । प्रयोगभेदेन शब्दभेदादर्थभेद इति न्यायमाश्रित्योप-पादयितुं शक्यत्वात्। यथा वातीत्येतद्धटकवाशब्दस्य क्रियावाचित्वं तथा वातः इत्येतद्धटकवाशब्दस्यापि । क्रियावाचकत्वेन सादृश्यस्वीकारादेव भूम्यर्थकभू-शब्दस्य विकल्पार्थकनिपातवाशब्दस्य च न धातुत्वम्। अन्यथा भूम्यर्थकभू-शब्दस्य विकल्पार्थनिपातवाशब्दस्य च धातुत्वेन प्रातिपदिकत्वाभावात् सुबभावे पदत्वानापत्त्या "भूस्तिष्ठति वा गच्छति वे" त्यत्र अतिङन्तात्पदात्परं तिङन्तं निहन्यत इत्यर्थकेन "तिङ्ङतिङः" (पा. 8-1-28) इति सूत्रेण तिष्ठति गच्छति रूपयोस्तिङन्तयोः निघातो न स्यात् न स्याच्च सुप् , भूशब्दवाशब्दयोः पदत्वा -भावादिति भावः।एवं च भूस्त्वा वा मा वा न पातयिष्यति इत्यत्र "त्वामौ द्वितीयायाः" (पा. 8-1-23) इत्यस्य प्रवृत्तिर्न स्यात्" इति **शाङ्करी** । "अत्र क्रियावाचिन इत्यस्य यदि क्रियात्वावच्छिन्नशक्यतानिरूपितशक्ततावन्त इत्यर्थः तदा क्रियात्वव्याप्यधर्मेण क्रियावाचकानां पच्यादीनां धातुत्वानापत्तिः । अतः क्रियात्वव्याप्यधर्मावच्छिन्नवाचिन इत्येवार्थः । तथा च क्रियासामान्यवाचिनां क्रियाविशेषवाचिनां च धातुत्वं सिद्ध्यति । यद्वा धातुत्वरूपशक्ततावच्छेदकत्वेन सर्वे धातवः क्रियासामान्यवाचकाः तत्तदानुपूर्वीरूपेण तु क्रियाविशेष वाचका इति क्रियात्वावच्छिन्नवाचकत्वमेव क्रियावाचकत्वमित्युक्तेऽपि न क्षतिः । अत एव

10. गणपठितत्त्वमात्रोक्तौ दोषप्रदर्शनम्

तावन्मात्रोक्तौ चाह-

सर्वनामाव्ययादीनां यावादीनां प्रसङ्गतः ।

न हि तत्पाठमात्रेण युक्तमित्याकरे स्फुटम्॥ 10 ॥

गणपठितत्वमात्रोक्तौ सर्वनामा यो "या" तस्यापि धातुत्वं स्यात्। तथा च "याः पश्यसि" इत्यादौ "आतो धातोः"(पा.6-4-140) इत्यालोपापत्तिः । ननु लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणान्न सर्वनाम्नो ग्रहणं तस्य लाक्षणिकत्वात्

परममूले भावकर्मप्रक्रियायामुक्तं - धातुत्वेन सकलधातुवाच्या" इति **प्रभा**। अत्र परममूलं च शब्दकौस्तुभः । **क्रियावाचित्वमात्रोक्ताविति** । अत्र मात्रपदेन भ्वादिगणपठितत्वदलव्यवच्छेदः । लक्षणे भ्वादिगणपठितत्वरूपदलाभावे दोषं कथयति - **हिरुक् नानेति** । वर्जनाद्यर्थबोधकहिरुङ्नानेत्याद्यव्ययानामपि क्रियावाचित्वेन धातुत्वं स्यादिति भावः । क्रियावाचित्वं च क्रियाबोधकत्वं क्रियावाचकत्वेन व्यवहारविषयत्वं वा इत्येवं स्वीकृत्य वर्जनार्थकानामेतेषां क्रियाविशेषणत्वेन क्रियावाचकत्वेन व्यवहारविषयत्वमस्तीति दोषः प्रदर्शितः । वस्तुतः अत्र क्रियावाचित्वशब्देन कारकान्वयितावच्छेदकसाध्यत्वावच्छिन्ना क्रियान्तराकाङ्क्षानुत्थापिका कालान्वययोग्या च या क्रिया तद्वाचित्वमभिप्रेतम्। हिरुगित्यादीनां विशेषणत्वेन विशेष्यभूतक्रियाकाङ्क्षायाः सत्त्वात् क्रियान्तराकाङ्क्षोत्थापकत्वमेवेति न दोषः । किञ्च तदर्थे कारकान्वयितावच्छेदकत्वं कालान्वयश्च न भवतः । अतः दोषान्तरमाह - **इत्यादाविति** । अत्रादिपदेन "शिश्ये "इति भावतिङन्तस्य ग्रहणम्। अत्र पूर्वोक्तलक्षणलक्षितक्रियावाचकत्वस्य सत्त्वात् धातुसंज्ञायाः अतिव्याप्तिः । धातुसंज्ञायां सत्याम् एकारस्य "आदेच उपदेशेऽशिति" (पा. 6-1-45) इति आत्वं स्यात्। तिङन्तस्य तु उपदेशाभावात् नात्वप्रसक्तिरिति एकारस्य तदापत्तिर्बोध्या । तङापत्तिस्तु न । उक्तार्थत्वात्। नन्वत्र आत्वापत्तिरपि नास्ति । अशितीति पर्युदासपक्षे इव प्रसज्यप्रतिषेधपक्षेऽपि शित्परत्वयोग्यतैव आत्वप्राप्तौ निमित्तमिति अत्र तदभावात् नात्वम् इति चेत् तर्हि आणवयति वट्टयतीत्यादीनामपभ्रंशानामपि उक्तक्रियावाचित्वात् धातुसंज्ञायाम् एतेषां शास्त्रविषयत्वापत्त्या साधुत्वापत्तिः ।अतः भ्वादिगणपठितत्वरूपदलनिवेशो लक्षणेऽनिवार्यः।आज्ञापयतीत्यर्थे आणवयति, वर्तयतीत्यर्थे वट्टयतीति अपभ्रंशौ ॥ 9 ॥

इत्यत आह - वेत्यादि । अव्यये "वा" इत्यादावतिप्रसङ्गस्तादृशस्यैव गणेऽपि पाठेन निर्णयासंभवात्। तथा च विकल्पार्थको "वाति "इति प्रयोगः स्यादिति भावः । न च गतिगन्धनाद्यर्थनिर्देशो नियामकः तस्यार्थानादेशनादिति भाष्यपर्यालोचनयाऽऽ - धुनिकत्वलाभात्॥ 10 ॥

तावन्मात्रोक्ताविति ॥ क्रियावाचकत्वं विहाय गणपठितत्वमात्रोक्तावित्यर्थः । तथा सति "या" इति सर्वनाम्नि "वा सु मा माङ्" इत्याद्यव्ययेषु च धातुत्वापत्तिः दोषः। नन्वस्मिन् पक्षे भूवादयः इत्यत्र वाकारोच्चारणं व्यर्थं स्यादिति चेन्न । तस्य मङ्गलार्थत्वस्यापि व्याख्यातुं शक्यत्वात्। "भूवादीनां वाकारोऽयं मङ्गलार्थः प्रयुज्यते" इति वार्तिकात्। वस्तुतस्तु वाकारार्थोऽपि अत्र विवक्षित इति बोधनार्थमेव पुनः तत्रैव उत्तरार्धेन "भुवो वार्थं वदन्तीति भ्वार्था भूवादयः स्मृताः" इति पक्षान्तरं सूचितम्। अत्र च भ्वादिशब्देन व्यवस्थावाचकेन अवध्याकाङ्क्षायां धातुपाठान्तकण्ड्वादिगणचरमधातुः अवधित्वेन गृह्यत इति उपद्विसहस्रधातूनां सर्वेषां ग्रहणम्। न तु भ्वादिगणपठितानामेव । अत्र च तत्तद्गणविशेषप्रयुक्तधातूद्देश्यकप्रत्ययादिविधानमेव प्रमाणम्। अत्र **प्रभायां** लक्ष्यस्थानां भ्वादिगणपाठबाह्यत्वात् तत्र धातुत्वानापत्तिराशङ्क्य इत्थं परिहृता - नन्वेवमपि लक्ष्यस्थानां भ्वादीनाम् आबन्तयावादीनामव्ययानां च गणबाह्यत्वमेवेति कथं लक्ष्याणां सङ्ग्रहः अतिव्याप्ति -श्चेति चेदत्रोच्यते - भ्वादिगणपठितत्वमित्यस्य भ्वादिगणपठितशब्दवृत्ति-आनुपूर्वीसदृशानुपूर्वीमत्त्वमर्थ इति अव्याप्तेः परिहारः।"या वा मु सु मा माङ्" इत्यादिसर्वनाम-अव्यय-उपसर्गादिषु अतिव्याप्तिसम्भवश्च।सर्वत्र गणसूत्रेषु तत्तद्गणपठितशब्दवृत्त्यानुपूर्वीसदृशानुपूर्वीमत्त्वमेव बोध्यम्। यथा "सर्वादीनि सर्वनामानि" (पा. 1-1-27) इत्यत्र सर्वादिगणपठितशब्दवृत्त्यानुपूर्वी सदृशानुपूर्वीमन्ति सर्वनामसंज्ञकानीत्यर्थः। अन्यथा कुत्रापि लक्ष्ये गणप्रयुक्तं कार्यं न स्यादिति तत्तत्सूत्रवैयर्थ्यापत्तिः । एतेन षोपदेशपाठादुपसर्गव्यावृत्त्या "सु" इत्यस्य धातुसंज्ञापादनं न युक्तमित्यपास्तम्। षोपदेशानां लक्ष्यस्थानां दन्त्यादित्वेन लक्ष्यस्थदन्त्यादीनामेव "षु" इत्यादिधातुपाठस्थैः ग्रहणात् किञ्चिदिवानुपूर्वीभेदेऽपि "धात्वादेः षः सः" (पा. 6-1-64) इत्यादिसूत्रप्रामाण्येन तथाङ्गीकारात्। "या" शब्दस्य धातुत्वे दोषमाह - **याः पश्यसीत्यादिना** । यच्छब्दस्य सर्वनाम्नः स्त्रियां प्रथमं प्रातिपदिकत्वात् द्वितीयाबहुवचने शस्प्रत्यये तन्निमित्तीकृत्य "त्यदा-

दीनामः" (पा. 7-2--102) इति अत्वे पररूपे "अजाद्यतष्टाप्" (पा. 4-1-4) इति टापि सवर्णदीर्घे "या + अस्" इति जाते पूर्वसवर्णदीर्घे रुत्वविसर्गयोः याः इति द्वितीयाबहुवचनान्तं पदम्। तत्सूचयितुमेव "पश्यसी"ति क्रियापदम्। तथा च अत्र "या + अस्" इत्यवस्थायां धातुपाठगतयाशब्दवृत्त्यानुपूर्वीसदृशानुपूर्वीमद्या-शब्दस्य धातुत्वे "आतो धातोः" (पा. 6-4-140) इति "विश्वप" इत्यादिष्विव आकारलोपे "यः" इत्यनिष्टरूपापत्तिरिति भावः । न चात्र यच्छब्दस्य धातुत्वे अधातुरिति पर्युदासात् प्रातिपदिकत्वमेव न भवतीति प्रातिपदिकत्वाभावे विभक्तिरेव नोत्पद्येत इति वाच्यम्। यत् इति शब्दस्य भ्वादिगणे पाठाभावेन विभक्त्युत्पत्तिवेलायां धातुसंज्ञायाः अप्राप्त्या प्रातिपदिकत्वस्य निर्बाधत्वात् विभक्त्युत्पत्तिः निर्बाधा । विभक्त्युत्पत्त्यनन्तरमेव त्यदाद्यत्वे स्त्रीत्वविवक्षायां टापि निष्पन्नः "या" शब्द एव धातुपाठपठितयाशब्दनिष्ठानुपूर्वीसदृशानुपूर्वीमानिति इदानीं धातुत्वेऽपि पूर्वं प्रातिपदिकत्वमाश्रित्य कृतानां कार्याणामनिवृत्त्या शस्-प्रत्यये परे तन्निमित्तकभसंज्ञानिमित्तककार्यस्य आकारलोपस्यापत्तिः एव दोषः । अतः तदेव आह- **लोपापत्तिरिति** । न च "आतो धातोः" (पा. 6-4-140) इत्यस्य लाक्षणिकविषयेऽप्रवृत्या न दोषः।"या" इत्यत्र आकारस्य लाक्षणिकत्वादिति वाच्यम्। "आतो धातोः" (पा. 6-4-140) इति सूत्रविषये लक्षणप्रतिपदोक्त-परिभाषायाः अप्रवृत्तेः । यदि च सा प्रवर्तेत तर्हि "पशुष" इत्यादावाकारलोपो न स्यात्। तथा हि - "पशुं सनोति" इति विग्रहे पशुशब्दे कर्मणि उपपदे "जनसन-खनक्रमगमो विट्"(पा. 3-2-67) इति विट् प्रत्ययः । सः सर्वलोपी । "पशु-सन् इति जाते "विड्वनोरनुनासिकस्यात्" (पा. 6-4-41) इति नकारस्य आत्वे सवर्णदीर्घे च "पशुसा"इति जाते, षत्वे "पशुषा" इति प्रातिपदिकम्। तस्मात् द्वितीयाबहुवचने विवक्षिते शस्प्रत्यये "आतो धातोः" (पा. 6-4-140) इत्याकार-लोपे "पशुषः" इति रूपम्।अस्यापि "पशुषा" इत्यत्रत्यस्य आकारस्य लाक्षणिकत्वात् आकारलोपाभावे तु "पशुषः" इति रूपं न सिद्ध्येत्।

अथ धातुसंज्ञाविषये लक्षणप्रतिपदोक्तपरिभाषा प्रवर्तते वा न वा? यद्यपि मूले नन्वित्यादिना लक्षणप्रतिपदोक्तपरिभाषामाश्रित्य "याः" इत्यत्र धातुसंज्ञा न भवति प्रतिपदोक्तस्य "या" इत्यस्यैव भ्वादिपदेन ग्रहणादित्यरुचेः "वा" इति निपाते धातुसंज्ञापादिता।अथापि अत्रारुचिः लक्षणप्रतिपदोक्तपरिभाषाश्रयणद्वारा धातु-

संज्ञायाः अप्रवृत्त्या "या" इत्यत्र प्रसक्तलोपवारणेन वा, धातुसंज्ञायां सत्यामपि प्रकारान्तरेण तत्र प्रसक्तलोपवारणेन वा इत्यस्ति विचारणीयम्। अत्र **काशिका-कारः** धातुसंज्ञाविषये लक्षणप्रतिपदोक्तपरिभाषायाः अप्रवृत्तिमेव स्वीकरोति । तथा च "या" इति सर्वनाम्नि प्रवृत्ता धातुसंज्ञा वारयितुं न शक्या, किन्तु प्रकारान्तरेण "आतो धातोः" (पा. 6-4-140) इति लोपः वारयितुं शक्यः इति अतः नन्वितिग्रन्थस्यावतरणिका इत्थं रचनीयेति कथयति - "यदि तु

"नकारजावनुस्वारपञ्चमौ झलि धातुषु ।
सकारजः शकारश्चेर्षाट्टवर्गस्तवर्गजः ॥" (सि.कौ.भ्वादि.)

इत्यभियुक्तोक्तेः लक्षणप्रतिपदोक्तपरिभाषाप्रवृत्तिर्वक्तुमशक्या तत्परिभाषाप्रवृत्तौ हि धातुविशिष्टघटकत्वं नकारादेर्न संभवतीति तथाभियुक्तोक्त्या धातुसंज्ञायाम् उक्तपरिभाषा न प्रवर्तत इत्यङ्गीकार्यमित्युच्यते तर्ह्यस्तु धातुसंज्ञा तथापि "आतोऽ-नाप" इति वार्तिकान्न प्रकृते आकारलोप इत्यत आह" इत्यवतरणिका बोध्या" इति । **प्रभाकारस्तु** धातुसंज्ञायां लक्षणप्रतिपदोक्तपरिभाषाप्रवृत्तिमङ्गीकरोति । "नकारजावनुस्वारे"त्यादिना उक्तानि सर्वाणि कार्याणि त्रैपादिकानि, अतः धातुसंज्ञां प्रति तेषां कार्याणामसिद्धत्वात् धातुसंज्ञायां कर्तव्यायां नकारादीनां धातुविशिष्टघटकत्वस्य सत्त्वात् न दोषः । अतः "या" इत्यस्मिन् लाक्षणिके न धातुसंज्ञा इति मूलस्य यथावदर्थकथनमेवोचितमिति । अनुस्वारश्चुत्वष्टुत्वपर-सवर्णानां त्रैपादिकत्वेन धातुसंज्ञायां तेषामसिद्धत्वमुपपाद्य कथंचित् तेषु प्रतिपदो-क्तत्वमाश्रित्य धातुसंज्ञायां सिद्धायामपि "आदेच उपदेशेऽशिति"(पा. 6-1-45) इत्यात्त्वस्य अपरनिमित्तकत्वेनान्तरङ्गत्वात् "पै" इत्यादिधातूनामेचां प्रथममात्त्वे कृते आकारान्तस्य प्रतिपदोक्तत्वाभावेन धातुसंज्ञा न स्यात्। एतदेव सूचयति **दर्पणकारः** "पै" इत्यस्य पा इति रूपं विलम्बोपस्थितिकमिति। एवं "द्यति स्यति" इत्यादिष्वपि तथा। अतः धातुसंज्ञायां लक्षणप्रतिपदोक्तपरिभाषायाः अप्रवृत्तिरेव युक्तेति" **काशिका** एव युक्ता । **लक्षणेति** ॥ "लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणम्" इति परिभाषा । यद्यपि लक्षणशब्दः लक्ष्यतेऽन्वाख्यायते साधुशब्दः अनेनेति व्युत्पत्त्या शक्त्या सूत्रमेव बोधयति अथापि अत्र लक्षणशब्दस्य तादृश-शक्यार्थस्वीकारे तात्पर्यानुपपत्त्या तदनुसन्धानसापेक्षत्वसम्बन्धेन लक्षणेन निर्वृत्तं लाक्षणिकमेवात्र लक्षणशब्देनोच्यते। तथा चात्र लक्षणशब्दो लक्षणया लाक्षणिक-

बोधकः इत्यर्थः । प्रतिपदोक्तत्वं च स्वीयोद्देश्यतावच्छेदकज्ञानायोपयुज्यमानानुपूर्वीमत्पदघटितशास्त्रविधेयत्वरूपम्। तद्भिन्नत्वं लाक्षणिकत्वमिति **तत्त्वदर्शिनी।** अनुगमप्रक्रियामाश्रित्य प्रतिपदोक्तत्वं प्रभायां लक्षितम्। तत्तु तत्र एव द्रष्टव्यम् । लाक्षणिकं लक्षणानुसन्धानसापेक्षत्वात् विलम्बोपस्थितिकं प्रतिपदोक्तं तु उपदेशसमानानुपूर्वीकत्वात् लक्षणाद्यनुसन्धानानपेक्षत्वात् शीघ्रोपस्थितिकम्। तथा च शीघ्रोपस्थितिके प्रवृत्या संज्ञायाः चारिताथ्र्यात् न विलम्बोपस्थितिके "या" इति सर्वनाम्नि प्रवृत्तिरिति । वस्तुतस्तु "क्तः,श्नः" इत्यादिषु आकारलोपसिद्ध्यर्थम् "आतोऽनाप" इति न्यासः स्वीकृत इति तत्र अनाप इति पर्युदासेन आब्भिन्नाकारस्यैव लोपविधानेन "या" इत्यस्य धातुसंज्ञायामपि तस्याकारस्य आब्रूपत्वात् न लोपप्रसक्तिरिति दोषान्तरमाहेत्येव अवतरणिका अत्र युक्ता। ततश्च "या" इत्यत्र दोषाभावेऽपि विकल्पार्थके "वा" इत्यस्मिन् धातुसंज्ञा दुर्वारित्यर्थः । तदेव वदति- **अव्यये वा इत्यादाविति** ॥ ननु वातीति प्रयोगः इष्ट एव । अतः तस्य धातुत्वेऽपि न क्षतिरित्यत आह **विकल्पार्थक** इति । "वा गतिगन्धनयोः" इति धातुः । विकल्पार्थस्तु निपातः। गतिगन्धनार्थकत्वे "वाती"ति प्रयोगः इष्टः। तदा "वा" इत्यस्य धातुत्वमिष्टम्। न तु विकल्पार्थस्य "वा" इत्यस्य। इदानीं तस्यापि धातुत्वापत्तिरित्यर्थः । गत्याद्यर्थस्य विकल्पार्थस्य च समानानुपूर्वीकत्वात् उभयोरपि प्रतिपदोक्तत्वमेवेति लक्षणप्रतिपदोक्तपरिभाषया अन्यतरस्य निवृत्तिः न शक्या। किन्तु क्रियावाचकत्वविशेषणेनैव सा शक्या । गत्याद्यर्थस्य क्रियावाचित्वात् विकल्पार्थस्य अतथात्वात्। ननु विकल्पोऽपि क्रियैव । विपूर्वक "क्लृप्" धातोः भावे घञि निष्पन्नत्वात्। तथा च क्रियावाचकत्वविशेषणेऽपि अत्र धातुत्वं विकल्पार्थके दुर्वारमिति चेन्न। अत्र क्रियाशब्देन साध्यरूपक्रियायाः क्रियान्तराकाङ्क्षानुत्थापिकाया एव विवक्षणात्। घञन्तोपस्थाप्या तु द्रव्यरूपेति तत्र क्रियान्तराकाङ्क्षोत्थानात् न सा धात्वर्थो भवतीत्यर्थः । तथा च विकल्पार्थकनिपातस्य धातुत्वे विकल्पयतीत्यर्थे वातीति प्रयोगः स्यादित्यर्थः । वस्तुतस्तु विकल्पार्थकस्य धातुत्वेऽपि नात्र लादीनामुत्पत्तिः। अत्र तादृशभावन बोधकत्वाभावात्। अतो न वातीति प्रयोगप्रसङ्गः । अत एव भाष्ये धातोरिति तव्यदादयः प्रसज्यन्ते इत्याशङ्क्य "तव्यदादयः साधने विधीयन्ते, साधनं च क्रियायाः, क्रियाभावात् साधनाभावः, साधनाभावात् सत्यामपि धातुसंज्ञायां तव्यदादयो न

भवन्ती"त्युक्तम्। तत्र कैयटः - यथैव दिवं पश्यति इत्यत्र बाह्यक्रियापेक्षे कर्मणि द्वितीया एवं तव्यदादयोऽपि स्युः इति पूर्वपक्षिणः आशयम् अन्तरङ्गधातु-वाच्यक्रियापेक्षे साधने सावकाशा तव्यदादयः बाह्यक्रियापेक्षे साधने नोत्पद्यन्ते इति सिद्धान्तिनः आशयं च स्पष्टीकृतवान्। अतः "वा" शब्दस्य निपातस्य धातुत्वेऽप्रातिपदिकत्वात् सुबनापत्तिः दोषः इति **शाङ्करीतत्त्वदर्शिन्यौ** । "ननु "निपातस्यानर्थकस्य प्रातिपदिकसंज्ञा वक्तव्ये"ति वचनम् अनर्थकपदं विहाय पठामः,ततश्च सर्वेषां निपातानां प्रातिपदिकसंज्ञा सिद्ध्यतीति चेदाह – आदीति" इति **तत्त्वदर्शिनी**। **काशिकायां** तु "यद्यपि निपातस्यानर्थकस्येत्यवश्यमनर्थक-निपातानां प्रातिपदिकसंज्ञार्थमारब्धव्यं तथा च तत्रानर्थकस्य निपातस्य संज्ञा-विधानेन चरितार्थतया सर्वतो बलीयसो निषेधस्य अधातुः इत्यस्य बाधे मानाभावः इत्याशयः। इत एवस्वरसाद्वा यावादीनामित्यादिपदम्" इत्यस्ति । अस्यैव तात्पर्यं तत्त्वदर्शिन्यां स्पष्टीकृतमिति स्वीकर्तुं शक्यम्। अत्र **तत्त्वदर्शिन्यां** - "आदीति । तेन दिवित्यव्युत्पन्नस्य धातुत्वापत्तिर्दोषो बोध्यः। तथा चाधातुरिति प्रतिषेधात् प्रातिपदिकत्वानापत्तिः।न च "त्रसिगृधिधृषिक्षिपेः क्नुः"(पा. 3-2-140) इति "क्नु" प्रत्ययस्यापि "नु"धात्वानुपूर्वीसमानानुपूर्वीकत्वेन तत्र धातुत्वापत्तिः कुतो न दत्ता न चेष्टापत्तिः।"अचिश्नुधातुभ्रुवामिति"(पा. 6-4-77) इति उवङापत्तेरिति वाच्यम्। तत्सूत्रे श्नुप्रत्ययग्रहणेन प्रत्ययस्योवङादेशश्चेत् श्नुप्रत्ययस्यैवेति नियमस्य शक्यत्वात्।" इत्यस्ति। व्युत्पादकमिदम्। **दर्पण - परीक्षा - शाङ्करी प्रभासु** "अव्यये वा इत्यादावित्यादिना सु इत्युपसर्गस्य मा माङ् इति स्वराद्योश्च संग्रहः । षु प्रसवे मा माङ् माने इत्यादि धातूनां समानानुपूर्वीकाणां गणे पाठेन अन्यतरधातुत्वनिर्णयासम्भवात् प्रसवार्थे "सुवति" इतिवत् शोभनार्थे "सुवति" इति प्रयोगः स्यात्, तथा मानार्थे माति मिमीते इतिवत् निषेधार्थेऽपि स्यात्। क्रियावाचकत्वे सतीति सत्यन्तस्य लक्षणे निवेशे तु न दोषः। तेषां क्रिया-वाचकत्वाभावात्" इति आदिशब्दप्रयोगतात्पर्यं सम्यगेव प्रकाशितम्। विस्तरस्तु तत एवावगन्तव्यः।वस्तुतः दर्पणादिषु प्रतिपादितः पूर्वोक्तः भूषणे एव कौण्डभट्टेन इत्थं प्रतिपादितः - "आदिना सु इत्युपसर्गस्य माङ् मा इति स्वराद्योश्च संग्रहः । न च षत्वपाठात् उपसर्गव्यावृत्तिः । "साध संसिद्धा"वित्यस्य मूर्धन्यादित्वाय षोपदेशलक्षणवत्त्वं तत्त्वमित्यन्यत्र निर्णीतत्वात्। तथा च समीचीनवर्जनाद्यर्थे

सुवति मिमीते मातीत्यापत्तिः। "षु प्रसवे" "माङ् मा माने" इति धातूनां सत्त्वात् निर्णयासंभवात्" इति । किंच तत्रैव "वे"त्याद्यव्ययानां गतिगन्धनाद्यर्थकधातुभ्यः क्विबादिभिः व्युत्पादनं शङ्क्यम्, गमनादिकर्तेद्यापत्तेः अर्थान्तरत्वा(विकल्पादि)-नापत्तेः।एवं सर्वेषां निपातानां कृदन्तत्वात् सिद्धौ निपातस्यानर्थकस्येति वार्तिकस्यानुक्तिसंभवापत्तेश्चेत्यादि ध्येयम् इति अस्ति व्युत्पादकम् स्पष्टार्थं च ।

ननु "वा गतिगन्धनयोः" इति धातुपाठे अर्थनिर्देशपूर्वकं धातूनामुपदेशेन तस्यार्थनिर्देशस्यैव तत्तदानुपूर्वीविशिष्टस्य धातुसंज्ञायां नियामकत्वं स्वीक्रियते, तथा च प्रकृते "वा" शब्दस्य गतिगन्धनार्थकस्यैव धातुत्वं न विकल्पार्थकस्येति न दोषः इति चेन्न । पाणिनिना धातुपाठे केवलं धातूनामेवोपदेशात् अर्थनिर्देशा-करणात्। अत्र च "भूवादयो धातवः"(पा. 1-3-1) इति प्रकृतसूत्रे "परिमाणग्रहणं कर्तव्यम् , इयान् अवधिर्धातुसंज्ञो भवतीति वक्तव्यम् , कुतो ह्येतत् भूशब्दो धातुसंज्ञो भवति न पुनः "भ्वेध" शब्द इति वार्तिकं तद्भाष्यं च प्रमाणम्। यदि च "भू सत्तायाम् एध वृद्धौ" इति पाणिन्युपदिष्टः धातुपाठः स्यात् तर्हि कियान् अवधिः धातुसंज्ञः इति प्रश्नस्यैव नोदयः परिमाणग्रहणं कर्तव्यमिति प्रस्तावस्यापि असङ्गतत्वापत्तिश्च । एतदेवाशङ्क्य निराकरोति - **न च गतिगन्धने**त्यादिना । **तस्य** - अर्थनिर्देशस्य । **अर्थानादेशनादि**ति । अर्थस्य –सत्तादेः, अनादेशनात् - अनाम्नानात् अकथनादित्यर्थः । इदं भाष्यं "समर्थ"(पा. 2-1-1) सूत्रस्थम्। तत्रहि -" को हि नाम समर्थो धातुप्रातिपदिकप्रत्ययनिपातानामर्थानादेष्टुम्" इत्युक्तम्। ननु "चुटू" (पा. 1-3-7) इति सूत्रे भाष्ये "यदयमिरितः कांश्चिन्नुमनुषक्तान् पठति "उचुन्दिर् निशाङ्कने" "स्कन्दिर् गतिशोषणयोः" इति तेन नेरितामिद्विधि"रिति इरितामिद्विध्यभाव इति नुमभावज्ञापनसन्दर्भे अर्थविशिष्टधातुनिर्देशात् पूर्वोक्त-भाष्यविरोध इति चेन्न । अर्थानादेशनादित्यस्य सर्वत्रार्थानादेशनादित्यर्थकत्वात्। एतदेव "नमोवरिवश्चित्रङः"(पा. 3-1-19) इति सूत्रे भाष्ये "एवमर्थं खल्वप्याचार्य -श्चित्रयति क्वचिदर्थानादिशति क्वचिन्ने"त्यादिना सूचितम्। अत एव "श्लिष आलिङ्गने" (पा. 3-1-46) इत्याद्युपपद्यते । "कुर्द खुर्द क्रीडायामेव" इत्यत्रत्यैव-कारस्य धातूनामनेकार्थत्वे ज्ञापकत्वं च संगच्छते । एवं च पूर्वोक्तभाष्यत्रय-प्रामाण्यात् सर्वधात्वर्थनिर्देशोऽपाणिनीय इति न तस्य संज्ञानियामकत्वमित्यर्थः। इदानीमुपलभ्यमानः धातुपाठेऽर्थनिर्देशस्तु धातुवृत्तिकारैः भीमसेनादिभिः कृतः

11. क्रिया धात्वर्थ इति चेदन्योन्याश्रयः

नन्वस्तु "क्रियावाचकत्वे सति गणपठितत्वं धातुत्वम् ", क्रिया च धात्वर्थ एव, न व्यापार इत्याशङ्कां समाधत्ते-

धात्वर्थत्वं क्रियात्वञ्चेद्धातुत्वं च क्रियार्थता।
अन्योऽन्यसंश्रयः स्पष्टस्तस्मादस्तु यथाऽऽकरम् ॥ 11 ॥

यदि क्रियात्वं धात्वर्थत्वमेव तर्हि धातुत्वग्रहे तदर्थत्वरूपक्रियात्वग्रहः, क्रियात्वग्रहे च तदवच्छिन्नवाचकत्वघटितधातुत्वग्रह इत्यन्योन्याश्रय इति ग्रहपदं पूरयित्वा व्याख्येयम्। यथाश्रुतेचान्योन्याश्रयस्योत्पत्तौ ज्ञप्तौ वा प्रतिबन्धकत्वा -भ्युपगमेनासङ्गत्यापत्तेः।

आधुनिकः । तदेव सूचयति - पूर्वं प्रदर्शितभाष्यप्रामाण्येन इदानीमुपलभ्यमानस्य कृत्स्नस्य अर्थनिर्देशस्य आधुनिकत्वमिति - **आधुनिकत्वलाभात्** इत्यनेन । यद्यपि भीमसेनादिभिरपि गुरुपरम्परया प्राप्त एवार्थः ग्रन्थस्थः कृतः अथापि स उपलक्षण -भूत एव नत्वर्थान्तरनिवृत्तिपरः सुखमनुभवतीत्यादौ भ्वादीनां धातुत्वानापत्तेः। उक्तं च –

"क्रियावाचित्वमाख्यातुम् एकैकोऽर्थः प्रदर्श्यते ।
प्रयोगतोऽनुसर्तव्या अनेकार्था हि धातवः ॥" इति ।'

एवं च वा सु मा माङ् दिव् इत्यादिनिपातानामव्ययानां च धातुसमानानुपूर्वीकाणां धातुसंज्ञावारणार्थं धातुलक्षणे "क्रियावाचकत्वे सति" इति विशेषणमत्या-वश्यकम्।व्यापारस्य धातुवाच्यत्वे एव धातूनां क्रियावाचित्वं सिद्ध्यतीति "भूवादयो धातवः" (पा. 1-3-1) इति सूत्रमेव धातोः क्रियावाचित्वे प्रमाणमिति सिद्धम्॥ 10 ॥

अथ मण्डनमिश्रानुयायी पुनरित्थं वदति - भवता यदुक्तं "भूवादयो धातवः" (पा.1.3.1) इति सूत्रं धातुत्वग्रहे प्रमाणं, तदेवास्माकमपि। क्रियावाचकाः भ्वादयः धातुसंज्ञका इत्येवार्थः अस्माभिरपि स्वीक्रियते। अतः अस्माकं मते सूत्रविरोधः नास्ति। किन्तु तत्र क्रियाशब्देन न लोकप्रसिद्धा क्रिया स्वीक्रियते। किन्तु धात्वर्थ एव। स च धात्वर्थः फल रूप एव। फलस्यापि क्रियापदेन व्यवहारः "कर्मवत्कर्मणा तुल्यक्रियः" (पा.3.1.87) इत्यादि सूत्रभाष्ये दृश्यते। अतः

न च "अन्यतमत्वं धातुत्वम्", "भूवादयः"(पा.1-3-1) इत्यस्य वैयर्थ्यापत्ते - रित्यभिप्रेत्याह - अस्त्विति। व्यापारसन्तानः क्रिया, तद्वाचकत्वे सति गणपठितत्वमित्यर्थः।

"क्रियावाचकत्वे सति गणपठितत्वं धातुत्वमि"ति लक्षणमस्माकं मतेऽपि सङ्गच्छते इति तदाह - **नन्वित्यादिना।**

11.1. **अन्योन्याश्रयदोषविचारः**

धात्वर्थत्वमिति॥ "क्रियावचनो धातुः" इति लक्षणम्। तत्र क्रिया नाम का इति जिज्ञासायां या धातुसंज्ञकेन प्रतिपाद्यते सा इति वक्तव्यम्। तथा च धात्वर्थरूप-क्रियाज्ञाने धातुसंज्ञाज्ञानमपेक्षितम् , धातुसंज्ञाज्ञाने च क्रियाज्ञानमपेक्षितमिति स्वज्ञानाधीनज्ञानाधीनज्ञानविषयत्वरूपःअन्योन्याश्रयदोषः प्राप्तः।अन्योन्याश्रयश्च उत्पत्तौ ज्ञप्तौ च प्रतिबन्धकः। उत्पत्तौ यथा - देवदत्तस्य यज्ञदत्तात् यज्ञदत्तस्य देवदत्ताच्च उत्पत्तिः न भवति, कार्याव्यवहितनियतपूर्ववर्तिनः एव कारणत्वात् तस्य च उभयत्रासम्भवात्। ज्ञप्तौ यथा - "हलन्त्यम् " (पा.1-3-3) इत्यत्र इत्पदार्थज्ञाने हल्पदार्थज्ञानस्य कारणत्वं, हल्पदार्थज्ञाने इत्पदार्थज्ञानस्य कारणत्वं न सम्भवति। अन्योन्याश्रयः स्थितौ न प्रतिबन्धकः। यथा - पृथिवीजलयोः आधाराधेयभाव इत्यादावुभयोः परस्पराधाराधेयभावेन स्थितेः सर्वाभ्युपगमात्।

॥**ग्रहपदमिति**॥ "प्रकृते धात्वर्थस्य क्रियात्वे सति क्रियात्वस्य धात्वर्थत्वे बाधकाभावेन क्रियावाचकत्वे सतीति विशेषणदानस्य अनुचितत्वापत्ते"रिति **दर्पणः।** धात्वर्थत्वस्य क्रियात्वे, क्रियात्वस्य धात्वर्थत्वे बाधकाभावेन दोषोद्भावन-मसङ्गतं स्यात् अतः तज्ज्ञानप्रतिबन्धकत्वमेव सूचनीयमिति अत्रान्योन्याश्रयस्य ज्ञप्तिप्रतिबन्धकत्वमिति सूचयितुं ग्रहपदं पूरणीयमित्यर्थः। अनेनात्र अन्योन्या-श्रयस्य ज्ञप्तिप्रतिबन्धकत्वं सूच्यत इति भावः। यदि च क्रियाशब्दः लोकप्रसिद्ध-व्यापारसन्तानवाचकः, तदा तु क्रियात्वज्ञाने धातुत्वज्ञानस्य अनावश्यकत्वात् न दोष इति भावः। क्रियाशब्देन फलस्य लोके व्यवहाराभावादिति तात्पर्यम्।

॥**न चान्यतमत्वमिति**॥ धात्वर्थत्वं क्रियात्वमिति लक्षणघटकधातुत्वं, यावन्तो धातुपदव्यवहार्याःतदन्यतमत्वरूपं स्वीक्रियते।तथाच भ्वाद्यन्यतमत्वं धातुत्वमिति लक्षणं पर्यवसन्नम्। ततश्च धातुपदव्यवहारे क्रियायाः अपेक्षायाः अभावेन नान्योन्याश्रयः इति आक्षेप्तुः आशयः। तदेतत् प्रत्याचष्टे - **वैयर्थ्यापत्तेरिति॥**

धातुपदव्यवहार्यान्यतमत्वं धातुत्वमिति स्वीकारे "भूवादयो धातवः" (पा. 1.3.1) इत्यनुशासनमेव व्यर्थं स्यात्। "धातोः कर्मणः" (पा. 3.1.7) इत्यादि सूत्रेषु तदन्यतमत्वरूपधातुत्वविशिष्टस्य ग्रहणेन इष्टसिद्धेः। तथा च अनुशासनस्य वैयर्थ्यं स्यात्। ननु सूत्रमप्यावश्यकम् धातुपदव्यवहार्यान्यतमत्वरूपलक्षणे धातुपदार्थ-परिचायनाय इति चेन्न। व्यापारसन्तानरूपक्रियावाचकत्वं विना "भूवादयः"(पा. 1-3-1) इति वाक्यार्थबोधासम्भवेन धातुपदार्थज्ञानासम्भवात् तदन्यतमत्वस्य ज्ञातुमशक्यत्वात्। ॥**तस्मादस्तु यथाकरमिति**॥ अतः "भूवादयो धातवः" (पा. 1.3.1) इति सूत्रभाष्योक्तरीत्या "क्रियावचनो धातुः", "क्रिया च व्यापारसन्तान" इत्येव युक्तम्। तथा च व्यापारसन्तानवाचकत्वे सति गणपठितत्वं धातुत्वमित्येव लक्षणं सूत्रात् सिध्यति। पचादिषु च अधिश्रयणादिरूपव्यापारसन्तानवाचित्वं, गणपठितत्वं चास्तीति लक्षणसमन्वयः। तत्तद्धातुवाच्यः व्यापारसन्तानस्तु लोकतः ज्ञेयः।

सन्दर्भेऽस्मिन् **भूषणग्रन्थोऽयमवश्यमवधेय** इति यथावत् सोऽत्र अनूद्यते- "वस्तुतस्तु न क्रियावाचकत्वे सति गणपठितत्वं लडादिप्रयोजकं, क्रियात्वस्यैकस्याभावेन अननुगमात्। किन्तु संज्ञाविशेषः। संज्ञाशब्दानां जातिवाचित्वपक्षे जातिविशेषो वा तन्नियामकः। सूत्रं च तत्परिचायकम्। तत्रोक्ताग्रिमकारिकाभिः परिचायकाव्याप्त्यतिव्याप्ती विचार्येते। तत्रापि क्रियाशब्दस्य साध्यत्वेनाभिधीयमान-व्यापारे एव साङ्केतिकशक्तेः स एव गृह्यते सूत्रे वाशब्दसूचनयेति न सूत्रं धातोः क्रियार्थत्वसाधनायाभिहितम्। किन्तूक्तयुक्तिभिः साधितार्थस्य स्वोत्प्रेक्षितत्वनिरास-सूचनायेति तत्त्वम्।" स्पष्टोऽयं ग्रन्थः इति नानुवादः क्रियते। अस्यैव अनुवादः **दर्पणे** "केचित्तु भ्वादिषु जातिरिति व्यवहारात् क्रियात्वमपि जातिरेव, शक्यता-वच्छेकतयैव शक्ततावच्छेकतयाप्यसति बाधके जातिसिद्धेः निष्प्रत्यूहत्वात्। भूवादिसूत्रं तु अनभिज्ञप्रतीतिपरम् तादृशजातिपरिचायकप्रदर्शकपरमित्याहुः" इति कृतः। **काशिकायामपि** अत्रवदन्तीत्यादिना पूर्वोक्तः भूषणग्रन्थः अक्षरशः अनूदितः। **तत्त्वदर्शिन्यां** तु वस्तुतस्त्वित्यारभ्यैव स अनूदितः।

अथ पुनः फलमात्रस्य धात्वर्थत्ववादी मीमांसकः सूत्रसार्थक्यं स्वमते इत्थं समुप-स्थापयितुं प्रयतते - धात्वर्थः फलमात्रमेव। धातुलक्षणमपि क्रियावाचकत्वे सति गणपठितत्वमेवास्तु पूर्वोक्तम्। परन्तु अत्र लक्षणे क्रियाशब्दः क्रियते इति क्रियेति

ननु सत्तादीन् फलांशानन्यतमत्वेनादाय तद्वाचकत्वे सति गणपठितत्वं लक्षणमुच्यताम्। धात्वर्थत्वात् तेषां क्रियाशब्देन व्यवहारो भाष्यादौ कृतोऽप्युपपत्स्यत इति चेन्न, अन्यतममध्ये विकल्पस्यापि "विकल्पयति"इति प्रयोगानुसारात् प्रवेशावश्यकत्वेन तदर्थके "वा" इत्यव्यये उक्तरीत्या गणपठितत्वसत्त्वेनाऽतिव्याप्तेरिति ॥ 11 ॥

कर्मव्युत्पत्त्या फलपरः। यथा च व्यापारसन्तानरूपक्रियायाः धात्वर्थत्वपक्षेऽपि व्यापारसन्तानविशेषान्यतमवाचकत्वमेव भवता अभ्युपगन्तव्यं, तथा सत्तादिफल-विशेषान् अन्यतमत्वेन उपादाय गणपठितविशेषिततद्वाचकत्वं धातुत्वमिति कल्पयामः। तथा च नान्योन्याश्रयः इति। तदेवाह - **ननु सत्तादीनिति। तेषां क्रियाशब्देन व्यवहारः भाष्यादौ दृष्ट** इति। स च "कर्मवत्कर्मणा तुल्यक्रियः" (पा. 3.1.87) इति सूत्रे भाष्ये। तेन सूत्रेण हि कर्मणा तुल्यक्रियस्य कर्तुः कर्मवद्भावो विधीयते। कर्मणा तुल्यक्रियत्वं च कर्तुः फलाश्रयत्वरूपमेव। ततश्च तत्र धात्वर्थः फलरूप एव, तदाश्रयत्वेन च कर्मकर्तरि कर्मवद्भावः। तथा च कर्मकर्तरि प्रयुज्य-मानेषु पचादिषु धातुसंज्ञासिद्ध्यर्थं "क्रियावचनो धातु"रिति लक्षणे क्रियाशब्दस्य यौगिकत्वमाश्रित्य फलवाचकत्वमपि स्वीकरणीयम्। ततश्च "सत्ताद्यन्यतमक्रिया-वाचकत्वे सति गणपठितत्वं धातुत्वमि"त्येवास्तु भूवादिसूत्रार्थः इति अस्माकं मतेऽपि नान्योन्याश्रयःइति भावः। भाष्यादावित्यत्रादिशब्देन काशिकावृत्त्यादि-सङ्ग्रहः। तन्निराचष्टे - **नेति**। सत्तादिरूपफलानां मध्ये विकल्पस्यापि अन्तर्भावात् , सत्तादिफलान्यतमवाचकत्वं "वा" इति विकल्पार्थकस्य अव्ययस्य, तथा गणपठित "वा"- इत्यानुपूर्वीकत्वं च अस्तीति तस्यापि धातुत्वापत्तिः। तदेव कथयति- **अतिव्याप्तेरिति**। किञ्च व्याकरणे क्वचित् क्रियाशब्दस्य यौगिकत्वस्वीकारेऽपि लोके क्रियाशब्दस्य व्यापारसन्तानरूपे अर्थे एव प्रसिद्ध्या तस्यैवार्थस्य "क्रिया-वचनो धातु"रिति लक्षणे क्रियाशब्देन ग्रहणं न तु काचित्कस्य फलस्य। किञ्च अन्यतमत्वादिघटितानां लक्षणानां गुरुत्वात् , लोकप्रसिद्धव्यापारसन्तानत्वस्यैव क्रियापदार्थत्वे, तदर्थबोधकत्वरूपलक्षणस्य लघुत्वाच्च, क्रियावाचकत्वरूपलक्षण-घटकक्रियाशब्देन लोकप्रसिद्धस्य व्यापारस्य एव ग्राह्यताया उचितत्वाच्च मीमांसकानां व्यापारस्य धात्वर्थत्वाऽवादिनां सूत्रविरोधः दुष्परिहर एवेति तत्त्वम्।

12. अस्त्यादावपि क्रियाप्रतीतिप्रतिपादनम्

नन्वस्यैव धातुत्वे "अस्ति" इत्यादौ क्रियाप्रतीत्यभावादस्त्यादीनां तदवाचकानामधातुत्वप्रसङ्ग इत्यत आह-

---

11.2. **धात्वर्थत्वं क्रियात्वं चेत्यादिकारिकायाः व्याख्यान्तरप्रतिपादनम्**

अथास्याः कारिकायाः केचित्त्वित्यादिना प्रकारान्तरेण व्याख्याकृता **भूषणे**। तथा हि - मीमांसकः वैयाकरणं प्रति आक्षेपमित्थं करोति - धात्वर्थः यदा भवता व्यापारः अङ्गीक्रियते तदा धात्वर्थत्वं क्रियात्वमिति आगतम्। तथा च क्रियात्वज्ञाने धात्वर्थविशेषणीभूतधातुज्ञानं, तज्ज्ञाने पुनः क्रियात्वज्ञानमिति अन्योन्याश्रयः आगतः। तस्मात् आख्यातार्थ एव क्रिया। इति। तदा वैयाकरणः समाधत्ते- **अस्तु यथाकरमिति**। अत्र क्रियाशब्दः लोकप्रसिद्धव्यापारसन्तानवाचकः। अतः व्यापारवाचकत्वे सति गणपठितत्वं धातुत्वमिति लक्षणे, व्यापारस्य धात्वर्थत्वे वा न काप्यनुपपत्तिः।

लोकप्रसिद्धक्रियार्थकत्वस्वीकारादेव यस्य धातोः यस्यां क्रियायां लोकप्रसिद्धिः तस्य तदर्थे एव धातुत्वमिति, विकल्पक्रियायाः लोके धातुवाच्यत्वेन प्रसिद्धौ सत्यामपि "वा"शब्दार्थत्वेन प्रतीयमानत्वाभावात् न "वा" इति विकल्पार्थस्य अव्ययस्य धातुत्वापत्तिः। अन्यतमत्वादिघटितलक्षणेषु तु अयं दोषः दुष्परिहरः। तदुक्तमित्थं स्पष्टं **काशिकायाम्** -"एतेन भ्वाद्यन्यतमत्वमेवास्तु धातुत्वं, तच्च न क्रियार्थगर्भम् , अथवा गणपठितत्वे सति सत्ताद्यर्थकत्वमेव भूधातोः धातुत्वं, एवं तत्तदर्थमाश्रित्य सर्वेषां धातूनां प्रत्येकं धातुत्वमूह्यम्। अर्थस्य विशिष्योपादानात् अन्योन्याश्रयोऽपि न। अथवा सर्वफलान्यतमत्त्वेनोपादाय गणपठितविशेषिततद्वाचकत्वमेव सूत्रार्थः कल्प्यतामि"ति अपास्तम्। लोकप्रसिद्धव्यापारसन्तानवाचकक्रियाशब्दमाश्रित्य व्यापारवाचकत्वे सति गणपठितत्वं धातुत्वमिति लक्षणेनैव सिद्धेः अन्यतमत्वादिगर्भाणाम् उक्तपक्षाणां गुरुत्वात्। चरमपक्षे विकल्पार्थक"वा"शब्दे अतिप्रसङ्गतादवस्थ्याच्च। एतेन यस्माद्धातोः यो योऽर्थः लोके प्रतीयते, तत्तदर्थविशिष्टस्यैव तस्यैव धातोः गणे पाठेन भ्वादिगणपठितत्वं धातुत्वमित्येवालमिति केनचिदुक्तमपि परास्तम्। लोकप्रसिद्धानां तेषां सर्वेषामर्थानां दुर्ज्ञेयत्वात्। इति॥11॥

क्रियावाचित्वमेव धातुत्वं, सा च क्रिया लोकप्रसिद्धः व्यापार एवेत्युपपाद्य, तस्याः

अस्त्यादावपि धर्म्यंशे भाव्येऽस्त्येव हि भावना।

अन्यत्राशेषभावात्तु सा तथा न प्रकाशते ॥ 12 ॥

अस्त्यादौ-"अस् भुवि" इत्यादौ, धर्म्यंशे-धर्म्मिभागे, भाव्ये-भाव्यत्वेन विवक्षिते, अस्त्येव-प्रतीयत एव। अयमर्थः-"स ततो गतो न वा" इति प्रश्ने, महता यत्नेन"अस्ति" इति प्रयोगे सत्तारूपफलानुकूला भावना प्रतीयत एव। उत्पत्त्यादिबोधने तु सुतराम्। "रोहितो लोहितादासीद् धुन्धुस्तस्य सुतोऽभवत्" (रामायणम्) इत्यादिदर्शनात्।

धात्वर्थत्वं च सूत्राक्षरानुगुणमिति च उक्त्वा, सर्वेषां धातूनां क्रियावाचित्वं व्यवस्था -पयितुं शङ्कते - **नन्वित्यादिना**। **अस्यैव** - भ्वादिगणपठितत्वे सति क्रियावाचकत्वस्यैव। "क्रियावाचकत्वस्यैवेत्यर्थः,एवकारेण फलमात्रवाचकत्वव्यवच्छेदः" इति **दर्पणः**। **धातुत्वे**-धातुसंज्ञायाम्, **अस्तीत्यादौ**–सत्तार्थकासादिधातुषु, **क्रियाप्रतीत्य –भावात्** - सत्तारूपफलमात्रबोधकत्वेन व्यापारसन्तानरूपक्रियाप्रतिपत्तेरभावात्, तत्तत्कालसम्बन्धरूपसत्तायाः एव तत्र प्रतीतेः, **तदवाचकानां** – व्यापारावाचकानाम् अस्त्यादीनाम् , **अधातुत्वप्रसङ्गः** - धातुसंज्ञा न स्यात्। न चेष्टापत्तिः। धातुसंज्ञायाः अभावे धातोर्विहितलडादीनामनुत्पत्तिप्रसङ्गात्। **अस्त्यादावपि** - अस्त्यादिधातुष्वपि, **धर्म्यंशे** - धर्मिभागे सत्तादिफलरूपे, **भाव्ये**-भाव्यत्वेन - उत्पाद्यत्वेन विवक्षिते, भावना, **अस्त्येव** - प्रतीयते एव। उत्पाद्यत्वस्य भावनासंस्पर्शमन्तरेणाप्रतीतेः। उक्तं च **दर्पणे** - "भाव्यत्वेन भावनानिष्पाद्यत्वेनेत्यर्थः। फलसाधकव्यापारस्य जिज्ञासितत्वे इति यावत् " इति। तदेव विवक्षास्थलं प्रश्नोत्तरभावेन दर्शयति - **अयमर्थ** इत्यादिना। **गतो न वेति**। गत इति कर्तरि क्तः "गत्यर्थाकर्मके"ति (पा. 3-4-72) सूत्रेण। **इति प्रश्ने** इति। प्रश्न इत्यनेन भावनायाः जिज्ञास्यत्वं बोध्यते। "सः ततो गतो न वा किम् ?" इति प्रश्नस्य स्वरूपम्। "महता यत्नेन अस्ति" इति उत्तरम्। अत्र समाधानेन सत्तारूपफलस्य महता यत्नेन साध्यमानत्वमुपपाद्यत इति अत्र भावनायाः अपि प्रतीतिरस्त्येव। यद्यपि सत्तार्थकधातुप्रयोगे क्वचिदेव भावनायाः स्पष्टतया प्रतीतिः, तथापि उत्पत्त्याद्यर्थकत्वे तु भावनाप्रतीतिमन्तरेण बोध एव नास्तीति सूचयति - **उत्पत्त्यादिबोधने तु सुतरामिति**। उत्पत्त्यनुकूलभावनाप्रतीतेः सर्वानुभवसिद्धत्वात् , तत्र तादृशबोधस्य न केनाप्यपलपितुमशक्यत्वात्। एतदेव द्योतयितुं सुतरामित्यत्र तरप्प्रत्ययप्रयोगः।

किञ्च, अत्र भावनाविरहे लडादिव्यवस्था न स्यात् , तस्या एव वर्त्तमानत्वादि - विवक्षायां तद्विधानात्। "क्रियाभेदाय कालस्तु सङ्ख्या सर्वस्य भेदिका" इति वाक्यपदीयादिति।

उत्पत्त्यर्थकत्वे रामायणप्रयोगं प्रदर्शयति - "रोहितो लोहिताद् आसीत् , धुन्धुस्तस्य सुतोऽभवत् " इति। अत्र असधातोः भूधातोश्च सत्तार्थकत्वे अन्वयानुपपत्तिः, पञ्चम्यर्थहेतुत्वानन्वयापत्तेः। वंशावल्यामुत्पत्त्यर्थकत्वस्यैवौचित्यात्।

12.1. सुतरामित्यादिमूलप्रतीकमादाय कृतायाः दर्पणावतरणिकायाः विमर्शः

अथात्र "सुतराम् " इत्यस्य अवतरणिका **दर्पणे** इत्थं विहिता यापि परिशीलनमर्हतीति यथावत् उल्लिख्यते - "ननु स ततो गतो न वेति वाक्यात् गेहाद्यवधिकविभागानुकूलव्यापाराश्रयत्वतदभावान्यतरस्य जिज्ञास्यत्वम् अवगम्यते,"महता यत्नेन अस्ती"ति वाक्यात् अस्तेः व्यापाराद्यर्थकत्वाभ्युपगमेऽपि चैत्रादिकर्तृकसत्तानुकूलव्यापार एवेति कथमेतयोः प्रश्नोत्तरत्वं, तथा हि - यद्धर्मावच्छिन्ने जिज्ञासितयद्धर्मावच्छिन्नस्य सम्बन्धो यत्प्रश्नवाक्यात् प्रतीयते, तद्धर्मावच्छिन्ने जिज्ञासिततद्धर्मावच्छिन्नसम्बन्धबोधकवाक्यस्योत्तरता। यदाहुः -

"जिज्ञासितपदार्थस्य संसर्गो येन गम्यते।
तदुत्तरमिति प्रोक्तम् अन्यदाभासशाब्दितम्॥" इति।

यथा घटत्वावच्छिन्नजिज्ञासितधर्मावच्छिन्नसम्बन्धबोधकस्य "कस्मात् घट" इति प्रश्नवाक्यस्य "दण्डात् घट" इति घटत्वावच्छिन्ने जिज्ञासितदण्डत्वावच्छिन्नस्य हेतुहेतुमद्भावबोधकं वाक्यमुत्तरं भवति। तथा प्रकृतेऽपि "गत" इति वा "ने"ति वा उत्तरं भवितुमर्हति, न त्वस्तीति, नेदमुत्तरं भवितुमर्हति। किञ्च कथञ्चिदस्योत्तरत्वाभ्युपगमेऽपि उत्तरवाक्ये यत्नेनेत्युपादानात् , यत्नपदबोध्ययत्ननिष्पाद्यत्वबोधेनैवोत्तरमिति, न ततो धातोरस्तेः व्यापारार्थकत्वं सिद्ध्यति इत्यरुचेराह- **उत्पत्त्यादिबोधने तु सुतराम्** " इति। अयं ग्रन्थः अत्यन्तं व्युत्पादकः। यद्यपि प्रश्नोत्तरयोः समानविषयकत्वमपेक्षितमेव, अथापि लोके एतादृशानि उत्तराण्यपि सन्त्येवेति, अत्र सत्तया समूहितस्य "न गत" इत्यस्योत्तरत्वमिति स्वीकरणीयम्। तथा च अनयोः प्रश्नोत्तरत्वे न किञ्चिद्बाधकम्। एतदेव मनसिकृत्य अन्यव्याख्याकृद्भिः नात्रारुचिः प्रदर्शितः।

"रोहितो लोहिताद् आसीत् " इत्यत्र उत्पत्त्यर्थकत्वं नाम उत्पत्त्याश्रयत्वम्। एवञ्चाश्रयताबोधस्य सर्वानुमतत्वेन सैवाश्रयता साध्यत्वेनाभिधीयमानत्वात् व्यापारः, पौर्वापर्यं कालगतं तत्रारोप्यते।

ननु तत्रापि उत्पत्तिरूपं फलमेव धात्वर्थोऽस्तु। तथापि रोहिताश्रयिका भूतानद्यतनोत्पत्तिः इति अभिमतबोधलाभात् इति चेत् - आह - **किञ्चेति**। **अत्र** - अस्तीत्यादिषु, **भावनाविरहे** - भावनायाः (व्यापारस्य) बोधाभावे। **लडादि - व्यवस्थेति**। "वर्तमाने लट्" (पा. 3.2.123) इत्यादिलकारविधायकसूत्रेषु धातोः इत्यनुवृत्या कालस्य क्रियायामेवान्वयेन वर्तमानार्थवृत्तेः धातोः लडिति, लडादिः धातोः व्यापारार्थकत्वे एव सिद्ध्यति। तदेव उपपादयति - **तस्या एवेति**। **तस्याः** - भावनायाः एव वर्तमानत्व-भूतत्व-भविष्यत्वादिविवक्षायां लडादेः विधानात्। केवलं फलस्य धात्वर्थत्वे कालान्वयस्य तत्रासम्भवात् लडादिरेव न भवेत् , अनन्वितार्थत्वात्। कालस्य कुतः क्रियायामेवान्वय इत्याशङ्कायां वाक्यपदीयं प्रमाणं प्रदर्शयति - **क्रियाभेदायेति**। क्रियाभेदायेति "तुमर्थाच्च भाववचनात् " (पा. 2.3.15) इति चतुर्थी। क्रियां भेत्तुं - विशेषयितुं, कालो - लडादिबोध्यः अस्तीत्यर्थः। लडाद्यर्थकालः क्रियामात्रभेदकः इत्यर्थः। **सञ्ज्ञा तु सर्वस्य** – आख्यातार्थस्य प्रातिपदिकार्थस्य च सर्वस्यापि, **भेदिका** - विशेषणमित्यर्थः। एवं च स्वविशिष्टक्रियायाः इतरक्रियाव्यावर्तकः काल एवेत्यर्थः। क्रियायां कालान्वये एव इतरव्यावृत्तिरिति क्रियायामेव कालान्वय इत्यर्थः। अत्र च भाष्याकाराद्यनुभव एव प्रमाणम्। तथा हि "नान्तरेण क्रियां भूतभविष्यद्वर्तमानादिकालाः व्यज्यन्ते। अस्त्यादिभ्यश्च भूतभविष्यद्वर्तमानादिकालाः व्यज्यन्ते" इति भूवादि(पा. 1-3-1)सूत्रे भाष्यकारः। अत एव च वर्तमानक्रियादिवृत्तेरित्यादिना "वर्तमाने लड्" (पा. 3.2.123) इत्यादिसूत्राणि व्याख्यातानि। अत एवास्तीत्यादौ क्रियात्वनिर्वाहः। एतत्सर्वमित्थं स्पष्टयति **काशिका** – "अस्तिभवतिविद्यतीनामात्मभरणमर्थः।आत्मा सत्ता, सत्ता चाषष्ठाद्भावविकारात् अनुस्यूतं यद्रूपं सदितिप्रत्ययवेद्यं तत् , तद्विषयव्यापारश्च आत्मभरणस्वरूपधारणपदाभ्यामुच्यते। स्पष्टं चेदं भूवादि(पा. 1-3-1)सूत्रे भाष्ये। **निरुक्ते**ऽपि - "अस्तीत्युत्पन्नस्य सत्त्वस्यावधारणम् " इति। "अस्तीति चोत्पन्नस्य सत्त्वस्य सत्तावतोऽवधारणमाचष्टे" इति निरुक्तभाष्यकारः" इति।

नन्वेवम् अस्ति इत्यत्र स्पष्टं कुतो न बुध्यत इत्यत आह - अन्यत्रेति। अशेषभावात् - भावनायाः फलसमानाधिकरणत्वात्। तथाच भावनायाः फलसामानाधिकरण्यं तत्स्पष्टत्वे दोष इति भावः।

नन्वेवम् "किं करोति" इति प्रश्ने, "पचति" इत्युत्तरस्येव "अस्ती"त्युत्तरमपि स्यादिति चेत् , इष्टापत्तेः,आसन्नविनाशं कञ्चिदुद्दिश्य "किं करोति" इति प्रश्ने, पचतीत्युत्तरस्येव, "अस्ति" इत्युत्तरस्य सर्वसम्मतत्वात्। इतरत्र तु सुस्थतया निश्चिते "किं करोति" इति प्रश्नः, पाकादिविशेषगोचर एवेत्यवधारणात् "अस्ति" इति नोत्तरमिति ॥ 12 ॥

नन्वेवं -सर्वत्र धातोः व्यापारार्थकत्वे, स्पष्टतया अस्तीत्यादौ कुतः फलव्यतिरेकेण व्यापारस्य अप्रतीतिः इति चेदाह - परममूले - **अन्यत्रेति**। अन्यत्र यथा इति यथा शब्दः अध्याहर्तव्यः। अन्यत्र सकर्मकस्थले पचति, गच्छतीत्यादौ। यथा सकर्मकस्थले फलात् पृथक् व्यापारस्य प्रतीतिः, सा अस्त्यादौ तथा कुतो नेति प्रश्नः। "अशेषभावात् " इति उत्तरम्। अशेषभाव एव तथा अप्रतीतौ दोष इत्यर्थः। अशेषभाव इत्यस्य विवरणं **भावनायाः फलसामानाधिकरण्यात्** इति। अशेषभावशब्दः कथं फलसमानाधिकरणतां बोधयतीति प्रश्ने तदित्थं निरूपितम् **दर्पणे** -" शेषः - फलव्याप्त्यतिरिक्तः, भावः - अधिकरणम् (भवत्यस्मिन्निति अधिकरणघञन्तः भावशब्दः) यस्येति बहुव्रीहिणा शेषभावशब्दः फलव्यधिकरण -बोधकः। स च भावप्रधानो निर्देशः। तथा च फलवैयधिकरण्यं शेषभावशब्दार्थः। न शेषभावः अशेषभावः इति नञ्तत्पुरुषे अशेषभावशब्दस्य फलसमानाधि-करणत्वरूपोऽर्थः सिद्ध्यति इति। **दोष** इति। तादृशबोधप्रतिबन्धकः, अथवा फलव्यापारोभयबोधानुत्पत्तिप्रयोजकः इत्यर्थः। तथा च दूरत्वादिकं वस्तुविशेषस्य स्पष्टप्रतिपत्तौ यथा प्रतिबन्धकं, तथा फलसामानाधिकरण्यं फलात् पृथक् व्यापारस्य बोधे प्रतिबन्धकमिति भावः। तदुक्तं **दर्पणे** - "एकमात्राधिकरणक-फलसामानाधिकरण्यस्य स्वरूपतो भावनास्पष्टभानप्रतिबन्धकत्वाभ्युपगमात् न स्पष्टं तत्प्रतीतिः, स्पष्टत्वं च फलप्रतीत्यनभिभूतत्वमित्यर्थः"। इति।

अथ अस्त्यादीनां व्यापारार्थकत्वे किं करोति इति व्यापारविशेषविषयकः प्रश्नः यथा पचादिषु भवति, तथा अस्त्यादिष्वपि स्यात् , तथा च किं करोति - पचति इतिवत् किं करोति - अस्ति इत्यादि स्यात् इति शङ्काम् इष्टापत्त्या समाधत्ते-

इष्टापत्तेः इति। कस्मिंश्चित् सन्दर्भविशेषे "किं करोती"ति प्रश्नस्य उत्तरम् "अस्ती"ति तवापि सम्मतमेवेति सन्दर्भविशेषप्रदर्शनपुरःसरमित्थं निरूपयति- **आसन्नविनाशमित्यादिना**। **आसन्नविनाशः** - अत्यासन्नमरण इत्यर्थः। वैद्यैः अचिरान्मरिष्यतीति निश्चितः कश्चिदित्यर्थः। तमुद्दिश्य तत्सम्बन्धी कश्चन केनचित् पृष्टः "किं करोती"ति, तदा तु "अस्ती"त्युत्तरमेव तस्य भवति। अस्तीत्यस्य इतोऽपि जीवतीत्यर्थः। अतश्च प्राणधारणानुकूलस्य व्यापारस्य तत्र स्पष्टं प्रतीतिरस्त्येव। अथ सुस्थविषये किं करोतीति प्रश्नस्य अस्तीत्युत्तरं कुतो नेति स्वयमाशङ्क्य समाधत्ते - **सुस्थतयेति**। सुस्थस्य सत्तानुकूलव्यापाराश्रयत्वं प्रष्टापि ज्ञातमेव, अतः तदा किं करोतीति प्रश्नः सत्तां नावगाहते किन्तु पचनादिव्यापारविशेषमेवेति न तदास्तीत्युत्तरमिति। "किं करोति" इति प्रश्नस्य अनवगतव्यापारविशेषपरत्वात्। तदुक्तं **काशिकायाम्** - "सत्तानुकूलव्यापारनिश्चये किं करोतीति प्रश्नः अन्यविषयक एवेत्यवधारणात् अस्तीत्युत्तरं तत्र नेत्यर्थः" इति।

एवं सकर्मकस्थले इव अकर्मकस्थलेऽपि फलव्यापारोभयार्थकत्वं साधितम् । यत्र व्यापारविषयकः सन्देहः, तत्रापि व्यापारप्रतीतिरस्तीति युक्त्या वाक्यपदीयभाष्यादि -प्रमाणैश्च निरूपितम्। अनेन सर्वत्र फलव्यापारोभयप्रतीतिरेव, न क्वापि केवलस्य फलस्य वा व्यापारस्य वा प्रतीतिरिति आगतम्।

12.2. अकर्मकस्थले क्वचित् फलं विना व्यापारभानम्

वस्तुतस्तु सर्वत्र व्यापारप्रतीतिः नियता। फलस्य प्रतीतिस्तु न सर्वत्र नियता। सकर्मकस्थले एव सा नियता। अकर्मकस्थले तु क्वचित् फलं विना व्यापारमात्रमेव प्रतीयते। विषयममुं कौण्डभट्टः **भूषणे** इत्थं प्रकाशयति - "वस्तुतो भूवादय(पा. 1-3-1) इति सूत्रानुरोधात् धातूनां क्रियावाचकत्वस्यावश्यकत्वेऽपि फलवाचकत्वं नावश्यकम्। अतोऽस्त्यादौ सत्तादिरेव क्रिया, अत एव "पश्यति भवः" "पच्यते तण्डुलः स्वयमेव" इत्यादौ विषयतादिरूपफलस्यैव क्रियात्वात् तदाश्रयभवादेः कर्तृत्वोपपत्तिरित्युक्तम्। "एकदेशे समूहे वा व्यापाराणां पचादयः" इति वाक्यपदीयकारिकाव्याख्यावसरे हेलाराजीयेऽपि तद्धात्वर्थक्रियात्वं च तद्धात्वर्थाविशेषणत्वे सति तद्धातुजन्यशाब्दबोधविषयताविशिष्टत्वम् , अतो न "तण्डुलं पचति" "घटं भावयति" "पश्यति भवम्" इत्यादौ विक्लित्त्यादिरूपक्रियाश्रयत्वात् कर्तृतापत्त्या कर्तृसंज्ञया कर्मसंज्ञायाः बाधात् द्वितीयानापत्तिः।

तस्मिन् प्रयोगे फलस्य तद्धात्वर्थविशेषणत्वेन उक्तक्रियात्वाभावात्। कर्मकर्तृप्रयोगे तु फलस्योक्तक्रियात्वसत्त्वात् उपपद्यते "तण्डुलः पच्यते स्वयमेव" इत्यादिः प्रयोगः। सत्यन्तघटकतत्पदानुपादाने "पचति भवती"त्यादौ पचाद्यर्थस्य क्रियात्वा -नापत्तिरतस्तदुपादानम्। नच यथाश्रुतेऽपि "घटं भावयती"त्यादौ कर्मसंज्ञा "पचति देवदत्त" इत्यादौ सावकाशां कर्तृसंज्ञां बाधत इति नानुपपत्तिरिति वाच्यम्। "चैत्रो ग्रामं गच्छति, पश्यति भव" इत्यादावपि धातूपात्तफलाश्रयत्वाच्चैत्रादेरपि कर्मत्वा-पत्तौ द्वितीयापत्तेः। "घटं भावयती"त्यत्र भवनस्य णिजन्तधात्वर्थविशेषणत्वेऽपि भ्वर्थाविशेषणत्वेन भ्वर्थक्रियात्वापत्त्या तदाश्रयस्य कर्तृतापत्तिस्तु न, इष्टापत्तेः। अत एव क्रियाभेदादुभयमप्यस्तीति "ण्यन्ते कर्तुश्च कर्मण" इति भाष्ये उभयथापि व्यवहारः कृतः। नन्वेवं क्रियात्वस्य धातुत्वघटिततया अन्योऽन्याश्रय-तादवस्थ्यमिति चेन्न। धातुत्वस्य जात्यादिरूपत्वात् , भूवादिसूत्रं तु तत्परिचायक-मिति प्रागेवोक्तम्। तद्धात्वर्थफलत्वमपि तद्धात्वर्थविशेषणत्वविशिष्टतद्धात्वर्थ-त्वम्। अतः प्रयोज्यव्यापारस्य अणिजन्तधात्वर्थाफलत्वेऽपि णिजन्तधात्वर्थ-फलत्वात् तदाश्रयस्य तत्र कर्मत्वमुपपद्यते। "पश्य मृगो धावती"त्यत्र धावन-क्रियायाः दृशिफलत्ववारणाय प्रथमदले तत्पदम् , अन्यथा तदाश्रयत्वात् मृगस्य कर्मतापत्तौ मृगपदात् द्वितीयापत्तिः। एवं च "पच्यते ओदनः स्वयमेव" "घटो भवति" इत्यादौ आश्रयत्वं व्यापारं प्रकल्प्य फलव्यापारोभयार्थकल्पनं तत्र तत्रोक्त -मनादेयम्। भावयतीत्यादौ भवनाश्रयत्वानुकूलव्यापारप्रतीतेरनुभवविरहाच्च, भवनानुकूलव्यापारस्यैव ततः प्रतीतेः। तथा चैतन्मते केवलव्यापारार्थकत्व-मकर्मकत्वम्। फलव्यापारोभयवाचकत्वं सकर्मकत्वं बोध्यम्। जीव प्राणधारणे, नृती गात्रविक्षेपे, स्रंसु ध्वंसु अधः पतने, इत्याद्यनुशासनेन एतादृशानां प्राणादि-विशिष्टधारकसंयोग-गात्रविशिष्टविक्षेपादिक्रियामात्रवाचकत्वेन उभयवाचकत्वा-भावात्, विशिष्टस्यैव क्रियात्वात्। दधात्यादेस्तु संयोगधारणक्रियोभयवाचकत्वात् सकर्मकत्वोपपत्तिः। "गात्रं धत्ते" इत्यादिप्रयोगोपपत्तिश्च। पतधातोरपि गमिवदु -भयार्थकत्वात् ऊर्ध्वं पतति, नरकं पतति इत्यादिप्रयोगनिर्वाहः।" इति। नागेशोऽपि अकर्मकस्थले केवलव्यापारार्थकत्वमेव हि धातोः प्रतिपादयति। अतश्चात्र उभयोरैकमत्यमेवेति सिध्यति॥12॥

13.0 धातोः फलव्यापारोभयवाचकत्वे सर्वस्य सकर्मकत्वापत्तिशङ्कापरिहारौ

नन्वेवं भावनायाः फलनियतत्वात् , फलाश्रयस्य च कर्मत्वात् , सर्वेषां क्रियावाचकत्वे सकर्म्मकतापत्तिरित्यत आह-

13.1 धातोः अकर्मकत्व-सकर्मकत्वनिर्वचनम्

फलव्यापारयोरेकनिष्ठतायामकर्म्मकः।
धातुस्तयोर्धर्म्मिभेदे सकर्म्मक उदाहृतः ॥ 13 ॥

एकनिष्ठतायाम् -एकमात्रनिष्ठतायां भिन्नाधिकरणावृत्तितायामिति यावत्। तेन गम्यादौ फलस्य कर्त्तृनिष्ठत्वेऽपि नातिव्याप्तिः। अकर्म्मको यथा - भ्वादिः। तयोः- फलव्यापारयोः आश्रयभेदे सकर्मक इत्यर्थः। उक्तञ्च वाक्यपदीये -

---

एवमस्त्यादावपि फलव्यापारोभयवाचकत्वं संसाध्य सकर्मकाकर्मकव्यवस्थां निरूपयितुमुपक्रमते - **नन्वेवमिति**। **एवम्** अकर्मकाणामपि सकर्मकाणामिव फल-व्यापारोभयार्थत्वे, **भावनायाः** - व्यापारस्य, **फलनियतत्वात्** - फलव्याप्यत्वात् । भावनावाचकत्वस्य फलवाचकत्वव्याप्यत्वात् इति **दर्पणः**, फलानुकूलव्यापारस्यैव भावनापदार्थत्वात् इति **काशिका**। **फलाश्रयस्य च कर्मत्वात्** - व्यापारव्यतिरेकेण भासमानस्य फलस्य आश्रयभूतस्य कर्मत्वस्य पचादिषु दर्शनात् , **सर्वेषां** -धातूनां , **क्रियावाचकत्वे** - फलानुकूलव्यापारार्थकत्वे, **सकर्मकतापत्तिः** । फलव्यापारोभय-वाचकेषु पचादिषु सकर्मकत्वदर्शनात्। **इत्यत आह** - इति शङ्कायामाह- **फलव्यापारयोः** इति।

13.1.1. **सकर्मकत्वादिलक्षणविचारः**

सर्वेषां धातूनां फलव्यापारोभयवाचकत्वेऽपि न सर्वेषां सकर्मकत्वापत्तिः, फल-व्यापारयोः एकाश्रयत्वे अकर्मकत्वम् , भिन्नाश्रयकत्वे सकर्मकत्वमिति व्यवस्थायाः सूपपादत्वात्। तदेव कथयति - **एकनिष्ठतायामिति**। एकनिष्ठतायामित्यस्य एकमात्रनिष्ठतायाम् , भिन्नाधिकरणावृत्तितायामिति व्याख्या करणीयेति सारः। एकमात्रनिष्ठत्वं च तद्व्यक्तिभिन्नानिष्ठत्वे सति तन्निष्ठत्वम् इति **काशिका**। एकेतरा-वृत्तित्वे सति एकवृत्तित्वमिति **दर्पणः**। फलव्यापारयोरन्यतरस्य अन्यतराधिकरण -भेदाधिकरणावृत्तित्वमित्यर्थः। एवं व्याख्यानस्य फलमाह - **गम्यादाविति**। गम्धात्वर्थफलस्य संयोगस्य अधिकरणं देवदत्तः स्वीकृतश्चेत् , तद्भिन्नाधिकरणेऽ-

आत्मानमात्मना बिभ्रदस्तीति व्यपदिश्यते।
अन्तर्भावाच्च तेनासौ कर्म्मणा न सकर्म्मकः॥ इति ।

बिभ्रदिति। तेन स्वधारणानुकूलो व्यापारोऽत्रापि गम्यत इति भावः।तेन - कर्म्मणा सकर्म्मकत्वन्तु न, अन्तर्भावात् - फलांशेन सामानाधिकरण्यसत्त्वादित्यर्थः।

पि ग्रामे तस्य वृत्तिरिति तस्य एकमात्रनिष्ठता नास्तीत्यर्थः। अतः गमिः सकर्मक एव, न त्वकर्मकः इति भावः। तथा च भिन्नाधिकरणावृत्तिफलव्यापारोभयवाचकत्वमकर्मकत्वमिति लक्षणं पर्यवसितम्। तत्र विशेष्यांशस्य परित्यागेन उक्तं सारे **भिन्नाधिकरणावृत्तितायाम्** इति। भिन्नत्वं च व्यापाराधिकरणापेक्षया स्वीकृतं चेत् स्वार्थव्यापारानधिकरणावृत्तिफलवाचकत्वं लक्षणं पर्यवसितं भवति। भिन्नत्वं यदि फलाधिकरणापेक्षया विवक्षितं तर्हि स्वार्थफलानधिकरणावृत्तिव्यापारवाचकत्वं लक्षणं पर्यवसितं भवति। अनयोः द्वयोः मध्ये व्यापाराधिकरणापेक्षया भिन्नत्वस्वीकार एव समुचित इति **दर्पणः**। तथा च स्वार्थव्यापारानधिकरणावृत्तिफलवाचकत्वम् अकर्मकत्वमिति लक्षणं पर्यवसितम्। एतत् लक्ष्ये ग्राहयति - **यथा भ्वादिरिति**। आत्मधारणानुकूलव्यापारार्थकत्वात् अस्तेः, तत्र फलस्य आत्मधारणस्य, तदनुकूलव्यापारस्य च एकमात्रनिष्ठत्वमिति अकर्मकत्वमिति सिद्ध्यति।

एवमकर्मकं लक्षयित्वा सकर्मकं लक्षयति परममूले - **तयोः** इत्यादिना। **तयोः**- फलव्यापारयोः, **धर्मिभेदे** - आश्रयभेदे सकर्मकः धातुः, **उदाहृतः** - उक्तः। अत्र च "धर्मिभेद"शब्देन स्वार्थफलव्यधिकरणव्यापारवाचकत्वं, स्वार्थव्यापारव्यधिकरणफलवाचकत्वं वा सकर्मकत्वलक्षणं पर्यवसितम्। तत्र वैयधिकरण्यं च तदधिकरणावृत्तित्वरूपमिति गम्यादौ संयोगादिफलस्य परस्पराधिकरणवृत्तिभिन्नत्वाभावात् गम्यादावव्याप्तिः। अतः तद्व्याचष्टे - **आश्रयभेदे** इति। तथा चात्र प्रथमलक्षणे कर्तृभिन्नतदधिकरणावृत्तित्वरूपस्य, द्वितीये तदनधिकरणावृत्तित्वरूपस्य च निवेशान्नानुपपत्तिरिति **दर्पणः**। तथा च कर्तृभिन्नं यत्स्वार्थफलाधिकरणम् , तदधिकरणावृत्तिव्यापारवाचकत्वमिति प्रथमलक्षणं, स्वार्थव्यापारानधिकरणावृत्तिफलवाचकत्वमिति द्वितीयलक्षणं पर्यवसितम्। अतश्च न सकर्मकत्वाकर्मकत्वव्यवस्थानुपपत्तिरिति भावः।

"आत्मानं जानाति" "इच्छति" इत्यादौ च द्वावात्मनौ - शरीरात्मा, अन्तरात्मा च। तत्रान्तरात्मा तत्कर्म्म करोति येन शरीरात्मा सुखदुःखे अनुभवतीति "कर्म्मवत्कर्मणा" (पा० सू० 3-1-87) इति सूत्रीयभाष्योक्तरीत्या भिन्नाधिकरणनिष्ठतामादाय सकर्म्मकत्वमित्यवधेयम् ॥ 13 ॥

अस्त्यादेः अपि फलव्यापारोभयवाचकत्वं यद्यपि पूर्वमेव सप्रमाणमुपपादितम्, अथापि द्विर्बद्धं सुबद्धं भवतीति न्यायेन पुनस्तत्र वाक्यपदीयं प्रमाणमुपदर्शयति– **आत्मानात्मने**ति । **आत्मानं** - सत्ताम् , **आत्मना** - स्वेन, **बिभ्रत्** - तदनुकूल-व्यापारः सन् , **अस्तीति, व्यपदिश्यते** - व्यवह्रियते। ततश्च फलाश्रयस्य आत्मनः धात्वर्थतावच्छेदककोटिप्रविष्टत्वात् , धात्वर्थोपसङ्गृहीतत्वेन अकर्मकमित्यर्थः। **तेन कर्मणा** - सत्तारूपफलाश्रयरूपकर्मणा, **असौ** - अस्तिः, **सकर्मकः न**। कुतः? **अन्तर्भावात्** - फलेन सह व्यापारस्य सामानाधिकरण्यादित्यर्थः। तदुक्तं **फलांशेने**ति। स्वकर्मकधारणरूपफलेन सह तदनुकूलव्यापारस्य सामानाधि-करण्यात्, एकाधिकरणवृत्तित्वादिति यावत्। फलांशेन इत्यस्य फलरूपेण स्वधारणरूपधात्वर्थतावच्छेदकेन धात्वर्थस्य व्यापारस्य सामानाधिकरण्यमिति अस्य वाक्यस्य तात्पर्यम्।

नन्वेवम् "आत्मानं जानाति" इत्यादौ पूर्वोक्तसकर्मकत्वलक्षणस्य अव्याप्तिः, ज्ञानादिरूपफलस्य कर्तृमात्रनिष्ठतया सकर्मकत्वानुपपत्तेः इत्यत आह - **आत्मानं जानातीत्यादि**। अत्र उपाधिभेदेन आत्मभेदः कल्प्यते। तत्र कर्ता अन्तःकरणा-वच्छिन्नः आत्मा। कर्म च शरीरावच्छिन्नः आत्मा। तथा च व्यापाराश्रय-फलाश्रययोः भेदात् सकर्मकत्वं सिद्ध्यति। **भाष्योक्ते**ति । भाष्यं च "कर्मवत्कर्मणा तुल्यक्रियः" (पा. 3.1.87) इति सूत्रस्थं मूले एव उल्लिखितम्।

नन्वेवं जीवत्यादेरपि औपाधिकं भेदमाश्रित्य सकर्मकत्वं स्यादिति चेन्न। फलाश्रया -वाचकत्वे सति स्वार्थफलव्यधिकरणव्यापारवाचित्वं सकर्मकत्वमिति परिष्कारात् कर्मणः अत्र धात्वर्थत्वेन धात्वर्थे एवान्तर्भावात् इति सारकृदाशयः।

नागेशस्तु "एतच्छास्त्रीयकर्मसंज्ञकार्थान्वय्यर्थकत्वं सकर्मकत्वमि"ति सकर्मकत्वं लक्षयति। ततश्च जीवतीत्यादिषु तादृशकर्मसंज्ञकपदाभावात् तदर्थान्वयित्वं नास्तीति न सकर्मकत्वमित्यर्थः। लक्षणे अन्वयश्च पृथगुपस्थितयोः संसर्गरूपः। अतः यत्र कर्मणः पृथगुपस्थितिः, तादृशकर्मनिष्ठफलबोधकत्वं सकर्मकत्वमिति

14.0पाक इत्यादौ प्रकृतिप्रत्ययाभ्यां क्रियायाःसाध्यसिद्धावस्थयोः प्रतीत्युपपादनम् -

नन्वसत्त्वभूतक्रियाया धात्वर्थत्वे "पाकः" इत्यत्रापि तत्प्रत्ययापत्तिः। नचेष्टापत्तिः, "कृदभिहितो भावो द्रव्यवत् प्रकाशते" इति भाष्यविरोधादित्यत आह-

आख्यातशब्दे भागाभ्यां साध्यसाधनरूपता।

प्रकल्पिता यथा शास्त्रे स घञादिष्वपि क्रमः ॥ 14 ॥

आख्यातशब्दे "पश्य मृगो धावति" इत्यादौ, भागाभ्यम् तिङन्ताभ्याम्। प्रकृतिप्रत्ययभागाभ्यामिति विवरणकारोक्तमपव्याख्यानम् , पचतीत्यत्राऽपि भागद्वयसत्त्वात्। साध्यसाधनरूपता यथाक्रमं ग्राह्या।

फलितम्। एवञ्च "फलाश्रयावाचकत्वे सति" इति विशेषणेन पूर्वोक्तलक्षणस्य परिष्कारः अपि नावश्यकः, तस्य गौरवरूपदोषग्रस्तत्वात् , "अध्यायिसा भूमय" इत्यादौ कर्मप्रत्ययेनैवाधारस्य बोधात्, सकर्मकत्वानुपपत्तेश्चे"ति तस्याशयः ॥13॥

एतावता प्रबन्धेन धातुसामान्ये व्यापारप्रतीतिः साधिता। स च व्यापारः साध्यत्वेन प्रतीयमाना क्रियेत्यपि साधितम्। साध्यत्वं च क्रियान्तराकाङ्क्षानुत्थापकतावच्छेदकत्वरूपमुत्पाद्यत्वमिति चोक्तम्। तच्चासत्त्वभूतत्वमित्यपि प्रतिपादितम्। तादृशक्रियैव कारकान्वययोग्येत्यपि प्रतिपादितम्। तथा च धातुना साध्यरूपायाः असत्त्वभूतायाश्च क्रियायाः अभिधाने, तदुत्तरं विहितानां घञादिभावप्रत्ययानामपि "भावे" (पा. 3.3.18) इत्यधिकारे विहितानां प्रकृत्यर्थानुवादकत्वेन असत्त्वभूतक्रियाबोधकत्वमेव प्राप्तम्। तथा च "कृदभिहितो भावो द्रव्यवत् प्रकाशते" इति भाष्यसिद्धान्तविरोधः। कृदभिहितः - घञादिभावप्रत्ययाभिहितः, भावः - धात्वर्थः क्रियारूपः,द्रव्यवत् - द्रव्येण तुल्यं द्रव्यवत् इति तृतीयान्तात् "तेन तुल्यं क्रिया-चेद्वतिः" (पा. 5.1.115) इति वतिः। द्रव्येण तुल्यं नामार्थेन तुल्यं प्रकाशते भासते इत्यर्थः। द्रव्यधर्माणि लिङ्गसङ्ख्याकारकत्वानि गृह्णातीत्यर्थः। यद्वा द्रव्यं क्रियान्तराकाङ्क्षोत्थापकतावच्छेदकरूपसिद्धत्ववत् , तेन तुल्यं प्रकाशते इत्यर्थः। सिद्धत्वेन भासते इत्यर्थः। तथा च "धातुना साध्यावस्थापन्ना क्रियाभिधीयत" इति सिद्धान्तविरोधः समापतितः। भाष्यकारेण सिद्धावस्थतापन्नक्रियाप्रतीतेः प्रतिपादनात् इति शङ्कायां समुत्पन्नायां भाष्यविरोधस्तु विरोधाभास एव, वस्तुतः

तदपि भाष्यमस्मत्पक्षसाधकमेवेति निरूपयितुमुपक्रमते - **आख्यातशब्दे** इत्यादि कारिकया।

14.1. आख्यातशब्दे इत्यत्र समासविचारः

इयं च कारिका वाक्यपदीयस्था सन्दर्भानुगुणेति अत्र योजिता। कारिकायाम् अत्राख्यातशब्देन तिङन्तद्वयघटितं "पश्य मृगो धावति", "पचति भवति"इत्यादि -वाक्यमत्रोद्दिष्टम्। "मृगो धावति पश्येति साध्यसाधनरूपते"ति तदुत्तरवाक्यपदीय -कारिकापि अस्यां व्याख्यायां प्रमाणम्।"आख्याते शब्दौ यस्मिन्" इति बहुव्रीहि-समासः।**सुबोधिनीकारास्तु** आख्यातशब्दव्युत्पत्तिविषये विविधमतानीत्थं परिशीलयन्ति -"आख्यातशब्दे इति–आख्यातशब्दौ स्तो यत्रेति मत्वर्थीयेन अर्श-आद्यच्प्रत्ययेन तिङन्तद्वयघटितवाक्ये इत्यर्थ इति केचित् – तन्न, तत्पुरुषे सति मत्वर्थीयोऽजिति वृत्तिद्वये गौरवात्। आख्याते शब्दौ यत्रेति बहुव्रीहिर्वाक्य-रूपान्यपदार्थे इत्यपरे, तदपि न।अन्यपदार्थनिरूपितशक्तिकल्पने गौरवात्। ततश्च आख्यातयोः शब्दे(वाक्ये) इति षष्ठीतत्पुरुषः, अवयवावयविभावसम्बन्धश्चात्र षष्ठ्यर्थः।तथा च तिङन्तद्वयनिष्ठावयवत्वनिरूपितावयवित्ववद्वाक्यात्मकशब्दे इत्यर्थः" इति। तत्पुरुषेणैवापेक्षितार्थसिद्धौ बहुव्रीहिपर्यन्तमनुधावनं न युक्तमिति तेषामाशयः।अन्ये सर्वे बहुव्रीहिमेवाश्रयन्ते। अत्र तत्पुरुषापेक्षया बहुव्रीहिरेव शीघ्रप्रतिपत्तिकर इति तेषामाशयः स्यात्। अथात्र तत्पुरुषः भवितुमर्हति वा न वेत्यपि विचारणीयम्। यद्यपि षष्ठीसमासविषये कोऽपि विशिष्टः नियमः नास्ति अथापि गमकत्वे सत्येव सः।अवयवावयविभावसंबन्धं पुरस्कृत्य षष्ठीसमासः अवयववाचकस्य विशेष्यत्वे एव प्रचुरतयोपलभ्यते "मत्पाणिः" इत्यादौ। अवयविनः विशेष्यत्वे च तादृशसमासः मृग्य एव। अत एवात्र षष्ठीसमासः न स्वीकृतः अन्यैः व्याख्यातृभिरित्यनुमीयते।

आख्यातशब्दे - तिङन्तद्वयघटितवाक्ये, **भागाभ्यां** - तिङन्ताभ्यां पश्य धावतीति तिङन्ताभ्यां, यथा क्रमशः **साध्यसाधनरूपता** पश्येत्यत्र साध्यावस्थतापन्न-क्रियायाः प्रतीतिः, धावतीत्यत्र धावनक्रियायाः दर्शनक्रियायां कर्मत्वेनान्वयेन साधनरूपतायाः प्रतीतिः इति तावन्मात्रेण दृष्टान्तता। न तु धावतिक्रियायाः सत्त्व -रूपता अनेन प्रतिपाद्यते। साध्यत्वसाधनत्वाभ्यां प्रतीतिमात्रेऽयं दृष्टान्तः। **शास्त्रे प्रकल्पिता** - धावनादिक्रियासु शास्त्रेण कर्मत्वादिकमुपपादितं, **तथा घञादिष्वपि-**

घञन्तेषु पाक इत्यादिष्वपि प्रकृतिप्रत्ययाभ्यां क्रमशः साध्यसाधनरूपता क्रियायाः प्रतिपाद्यते इत्यर्थः।"पश्य धावती"त्यनयोः विषये यादृशः क्रमः अनुसृतः, तादृश एव क्रमः पाक इत्यादि घञन्तेष्वपि अनुसरणीय इत्यर्थः। तथा च धातुना साध्या -वस्थापन्नायाः क्रियायाः अभिधानं, घञादिभावप्रत्ययानां तु सिद्धावस्थापन्नायाः क्रियायाः अभिधानमिति उभयविधापि क्रिया भावप्रत्ययान्तेषु बुध्यते इत्यर्थः। तथा च "कृदभिहित" इति पूर्वोक्तभाष्येण सह न विरोधः, प्रत्युत घञादिभिः सिद्धावस्थतापन्नभावाभिधाने तत्प्रमाणमेवेति तदपि साधकमेवेत्याशयः। एतदेव स्पष्टयति - "आख्यातशब्दे - पश्य मृगो धावतीत्यादौ, भागाभ्यां तिङन्ताभ्यामि" -त्यादिना। कृदभिहित इति भाष्ये कृच्छब्दः कृत्प्रत्ययमेव बोधयति, न कृदन्तमिति भावः। तथा च "कृदभिहित" इति भाष्यस्य भावकृदन्तविषयकत्वेन शङ्का, भावकृद्विषयकत्वेन समाधानमित्यर्थः।

14.2. हेलाराजकृतव्याख्यायाः अपव्याख्यानत्वसूचनपूर्वकं स्वमतप्रतिपादनम्

अस्याः कारिकायाः विवरणकारेण हेलाराजेन आख्यातशब्दे इत्यस्य तिङन्ते पचतीत्यादाविति व्याख्यातम्। यथा पचतीति तिङन्ते धातुरूपप्रकृत्या साध्यत्वेन स्वार्थोऽभिधीयते, साधनरूपोऽर्थस्तिङा अभिधीयते, तथा "पाक" इत्यत्र धातुना साध्यत्वेन क्रिया बोध्यते, प्रत्ययेन तु सिद्धत्वरूपेण बोध्यते। आख्यातशब्दे इति एकवचनान्तप्रयोगेण आख्यातश्च स शब्दश्च इति कर्मधारय एवाश्रीयते इति च व्याख्यातम्। इदं व्याख्यानम् अपव्याख्यानमिति भूषणसारकृदाशयः। तदेव कथयति - **प्रकृतिप्रत्ययभागाभ्यामिति विवरणकारोक्तमपव्याख्यानम्** इति। अपव्याख्याने हेतुं कथयति - **पचतीत्यत्रापि** इत्यादिना। अस्यायमाशयः - यद्यत्र पचतीत्याख्यातमेव दृष्टान्ततया वाक्यपदीयकारेणाभिप्रेतं, तर्हि आख्याते इत्येव वदेत् , आख्यातशब्दे इति कथनात् अत्र कर्मधारयः न, किन्तु बहुव्रीहिरिति अवगन्तव्यम्। तथा च तिङन्तद्वयघटितवाक्यपरत्वमस्य सिद्धम्। तदैव शब्द-शब्दोपादानं सार्थकं भवति। किञ्च दार्ष्टान्तिके "पाक" इत्यत्र प्रकृतिप्रत्यय-भागाभ्यामुभाभ्यां क्रियायाः एव सिद्धसाध्यरूपायाः प्रतीतिः इति, दृष्टान्तेऽपि भागद्वयेन क्रियाद्वयस्यैव प्रत्याय्यता युक्ता। तच्च न पचतीत्यत्र। धातुना साध्यस्वरूपाया अभिधानेऽपि तिङा केवलसाधनस्यैव अभिधानात्। "पश्य

साध्यत्वम् - क्रियान्तराकाङ्क्षानुत्थापकतावच्छेदकरूपवत्त्वम्। साधनत्त्वम् - कारकत्वेनान्वयित्वम्। स घञादिष्वपीति। प्रकृत्या साध्यावस्था, प्रत्ययेन साधनावस्था। इयान् परं विशेषः - घञाद्युपस्थाप्या लिङ्गसङ्ख्यान्वयिनी, कारकान्वयिनी च। आख्यातान्तोपात्ता तु नैवम्। तथापि कारकत्वेनान्वयित्वमात्रेण दृष्टान्तदार्ष्टान्तिकतेत्यवधेयम्।

धावती"त्यत्र तु भागद्वयेन तिङन्तद्वयेन क्रियाद्वयप्रतीतिः, तत्र एका साध्यरूपा, अन्या साधनरूपा चेति क्रियाद्वयप्रत्यायनात् दृष्टान्तत्वमपि सङ्गच्छते। ततश्च तिङन्तद्वयघटितमेव वाक्यं, यत्र आख्यातान्तबोध्यक्रिया साधनरूपेण प्रतीयते, दृष्टान्तः भवितुमर्हति, न तु पचतीति आख्यातम् इति। एतदेव स्पष्टयति- **साध्यसाधनरूपता यथाक्रमं ग्राह्येति।** अथ साध्यत्वसाधनत्वे लक्षयति– **साध्यत्वमित्यादिना।**

कारकत्वेनान्वयित्वमिति। कारकत्वव्याप्यरूपेण अन्वयित्वमित्यर्थः। तथा च "पचति भवति" इत्यत्र तिङन्तबोध्यक्रियायाः कारकत्वव्याप्यकर्तृत्वेन, "पश्य धावती"त्यत्र कारकत्वव्याप्यकर्मत्वेन च अन्वयः।

नन्वनयोः आख्यातद्वयघटितवाक्यघञन्तयोः दृष्टान्तदार्ष्टान्तिकभावो न युज्यते, दृष्टान्ते क्रियायाः लिङ्गसङ्ख्यानन्वयित्वं, दार्ष्टान्तिके तु घञुपस्थाप्यायाः लिङ्गसङ्ख्यान्वयित्वमिति वैषम्यस्य सिद्धत्वात् इत्यत आह - **इयान्परमिति।** अत्र न सर्वांशतया सादृश्यं विविक्षितं, किन्तु यत्किञ्चिद्धर्मवत्वेनैव। अतो न दोषः। तदेव उपपादयति- **घञादीति।** भावकृत्प्रत्ययेन घञादिना उपस्थाप्या तु लिङ्गसङ्ख्यान्वय -वती, कारकत्वान्वयिनी च। **आख्यातान्तेन** तिङन्तेन उपस्थाप्या तु न लिङ्ग-सङ्ख्यान्वयवती इति भेदः दृश्यते। तथापि उभयत्र कारकत्वेन अन्वयित्वं समानमिति दृष्टान्तदार्ष्टान्तिकता। न हि दृष्टान्तदार्ष्टान्तिकभावे सर्वांशे साम्यं नियामकम् , अपि तु यत्किञ्चिदंशे एव। अन्यथा लोकप्रसिद्धं चन्द्रमुखयोरपि तन्न स्यात्।

अथात्र **दर्पणे** धात्वर्थस्य कारकत्वेनान्वयित्वे कारकत्वेनानन्वयित्वरूपमसत्त्वं तस्याः भज्येतेति शङ्का उद्भाव्य इत्थं परिहृता -" कर्तृत्वकर्मत्वेतरकारकत्वा-नन्वयित्वस्यैव कारकत्वेनानन्वयित्वमित्यनेन विवक्षणात् न दोष" इति। तथा च

नच घञन्ते धातुना तथाभिधाने मानाभावः, ओदनस्य पाकः" इति कर्म्मषष्ठ्या मानत्वात्। नचाध्याहृततिङन्तक्रियान्वयात् षष्ठी, "कर्तृकर्म्मणोः कृति" (पा० सू० 2-3-65) इति कृदन्तेन योग एव तद्विधानात् , "न लोकाव्ययनिष्ठाखलर्थतृनाम् " (पा० सू० 2-3-69) इति लादेशयोगे षष्ठीनिषेधाच्च। एवंरीत्या "काष्ठैः पाकः" इत्याद्यपीष्टमेव।

एवं फलांशोऽपि धातुना असत्त्वावस्थापन्न एवोच्यते। अत एव "स्तोकं पचति" इतिवत् "स्तोकं पाकः" इत्युपपद्यते इति ॥ 14 ॥

लिङ्गसङ्ख्यानन्वयित्वे सति कर्तृत्वकर्मत्वेतरकारकत्वेन अनन्वयित्वमेव असत्त्वभूतत्वमित्यर्थः। अत्र वाक्यपदीयं प्रमाणं प्रदर्शयति -

> क्रिया न युज्यते लिङ्गक्रियानाधारकारकैः।
> असत्त्वरूपता तस्या इयमेवावधार्यताम् ॥ इति।

तथा च क्रियानाधारकारकेण, लिङ्गेन च अयोग एव क्रियायाः असत्त्वरूपतेति अनया कारिकया ज्ञायते। अत्र कारके क्रियानाधारेतिविशेषणेन साक्षात् क्रियाधारकारकद्वयस्य व्यावृत्तिः बोध्यते। अत्र क्रियाशब्दः धात्वर्थपरः। तथा च फलाश्रयव्यापाराश्रयकर्तृकर्मणोः व्यावृत्तिरिति, तदितरकारकायोग एव क्रियायाः असत्त्वरूपत्वमित्यर्थः। तथा च कर्तृत्वेन, कर्मत्वेन च क्रियायाः अन्वयेऽपि असत्त्वरूपतायाः भङ्गः नास्तीत्यर्थः। क्रियान्तराकाङ्क्षानुत्थापकतावच्छेदकत्वमिति लक्षणापेक्षया साधनाकाङ्क्षोत्थापकतावच्छेदकधर्मत्वमसत्त्वभूतत्वमिति लक्षणं युक्तमिति **दर्पण**कारस्य आशयः।

अथेदानीं घञन्ते प्रकृत्या धातुना साध्यावस्थतापन्नायाः क्रियायाः अभिधाने प्रमाणं प्रदर्शयितुमुपक्रमते - **न चेति**। **तथाभिधाने** साध्यत्वेनाभिधाने, **मानाभावः न**, अपि तु स्पष्टं प्रमाणमस्त्येव। तदेव निरूपयति - "**ओदनस्य पाक**" इति। "ओदनस्य पाक" इत्यत्र ओदनशब्दात् "कर्तृकर्मणोः कृति" (पा. 2.3.65) इति कर्मणि षष्ठी। अनेन सूत्रेण षष्ठ्याः कर्मत्वेन कर्मणि, कर्तृत्वेन कर्तरि शक्तिः अनुशिष्यते। तथा च अत्र षष्ठ्याः द्वितीयातृतीयातुल्यत्वेन कारकबोधकत्वात् , पाक इत्यादिघञन्तेन सिद्धभावमात्रस्याभिधाने कारकाणां साध्यस्वभावक्रियान्वयित्वनियमेन ओदनस्य कर्मत्वेन सिद्धभावे अन्वययोग्यतायाः अभावात् "कर्तृकर्मणोः कृति" (पा. 2.3.65) इति अनुशासनमेव अनुपपन्नं स्यात्। सम्बन्ध-

सामान्यविवक्षायां तु "षष्ठी शेषे"(पा. 2.3.50) इति सूत्रेणैव षष्ठीसिद्धेः अनुशासनमेव व्यर्थं स्यात्। तथा चेदमनुशासनमेव ज्ञापकं घञादिभावप्रत्ययान्ते साध्यरूपायाः क्रियायाः बोधे। "साध्यावस्थतापन्नक्रियायोगं विना कर्मत्वा-सम्भवात् तादृशावस्थापन्नक्रियानिरूपितस्यैव हि कारकत्वात्" इति **कान्तिः**। अथ कृदन्ते साध्यरूपायाः क्रियायाः अप्रतीतावपि न कर्मणि षष्ठ्यनुपपत्तिः, भवति इत्यादितिङन्तमध्याहृत्य गम्यमानसाध्यक्रियासम्बन्धमाश्रित्य कर्मत्वस्योप-पादयितुं शक्यत्वात् इति शङ्कां निराचष्टे - **न चेति**। **क्रियान्वयादिति**। क्रियान्वय-माश्रित्य इत्यर्थः। अत्र ल्यब्लोपे पञ्चमी।

14.3. कर्तृकर्मणोः कृति इति सूत्रार्थनिर्धारणम्

शङ्कामिमां समाधत्ते - "**कर्तृकर्मणोः कृति**" इति। "कर्तृकर्मणोः कृति"(पा. 2-3-65) इति सूत्रेण कृदन्तेन कृदन्तबोध्यसाध्यक्रियया योगे एव कर्तृकर्मणोः कर्तृत्वेन कर्मत्वेन च कर्तृकर्मरूपयोः षष्ठी विधीयते।अतः नान्यतिङन्तनिरूपितकर्तृत्वा-दिकं विवक्षितुं शक्यम्। किञ्च तथा अध्याहृततिङन्तबोध्यक्रियान्वयमादाय यदि सर्वत्र कृदन्ते षष्ठी उपपाद्येत, तर्हि "न लोकाव्ययनिष्ठाखलर्थतृनाम्" (पा. 2.3.69) इति लादेशयोगे षष्ठीनिषेध एव व्यर्थः स्यात्। न चैवं सर्वत्र षष्ठीनिषेधे "कर्तृकर्मणोः कृति" (पा. 2.3.65) इति सूत्रवैयर्थ्यापत्त्या अध्याहृततिङन्त-निरूपितकर्तृत्वादौ षष्ठी, साक्षाच्छ्रुततिङन्तनिरूपितकर्तृत्वादौ षष्ठीनिषेधः इति व्यवस्थायां न दोष इति वाच्यम्। ओदनस्य पाक इत्यादौ "कर्तृकर्मणोः कृति" (पा. 2-3-65) इत्यस्याप्रवृत्तावपि "वस्त्रस्य कृति"रित्यादिक्तिन्नन्ते तस्य चरितार्थत्वात्, न वैयर्थ्यमिति, न तथा कल्पनापि शक्या। "कर्तरि कृत्" (पा. 3.4.67) इति सूत्रे भाष्ये हि क्तिन्-प्रत्ययस्य तुमुनादीनामिव साध्यक्रियानुवादकत्वमुक्तम्। ततश्च तादृशकृदन्ते सूत्रस्य चारितार्थ्यमस्तीति "ओदनस्य पाक" इत्यादौ कर्मषष्ठ्याः अनुपपत्तिरेव स्यात्। किञ्च "ओदनस्य पाकः - ओदनपाकः" इति समासोऽपि न स्यात् षष्ठ्यन्तस्य कृदन्तेन सह सामर्थ्याभावात्। न चासामर्थ्येऽपि "कृद्योगा षष्ठी समस्यते" इति वचनादेव समासो भविष्यतीति वाच्यम्। "वस्त्रस्य कृतिः - वस्त्रकृतिः" इत्यादौ तस्य वचनस्य चारितार्थ्यात्। न चात्र "ओदनपाक" इत्यादौ शेषषष्ठ्यैव समासो भवतु इति वाच्यम्। "नलपाक" इत्यादौ नलकर्तृत्वादि-प्रकारकबोधस्य अनुभवसिद्धस्यानुपपत्तेः, "आश्चर्यो गवां दोहोऽगोपेन" इत्यत्र

अगोपपदादपि शेषषष्ठीप्रसङ्गात्। न च "उभयप्राप्तौ कर्मणि" (पा. 2.3.66) इति नियमः। तस्य प्रत्यासत्त्या "कर्तृकर्मणोः कृति" (पा. 2.3.65) इत्यस्यैव नियामकत्वात्। तथा च अध्याहृततिङन्तबोध्यसाध्यक्रियानिरूपितकारकत्वमाश्रित्य षष्ठ्याः उपपादनमशक्यमेवेति कृदन्तबोध्यसाध्यक्रियानिरूपितकारकत्वमेव उपपादनीयमिति कृत्वा कृदन्ते "पाक" इत्यादौ साध्यावस्थतापन्नक्रियाबोधोऽपि आवश्यकः।इति। पूर्वोक्तः विषयः **कान्त्यां** सङ्क्षेपेण सूचितः, **काशिकायां** किञ्चित् विस्तरेण प्रतिपादितः। अथ **दर्पणे** "नलोके"(पा.2-3-69)तिप्रतीकमुपादाय "इदं च समाधिसौकर्यादुक्तम्। प्रत्यासत्त्या यद्धात्वर्थफलाश्रयत्वं तद्धात्वर्थ-कारकस्यैव कर्मतालाभेन, भवत्यर्थस्य क्रियात्वेऽपि तदर्थफलाश्रत्वाभावेन ओदने कर्मत्वस्यैव दुरुपपादत्वात्। (तथा च पाकपदार्थस्य साध्यक्रियात्वे एव ओदनस्य कर्मत्वं नान्यथेति भावः।) ननु तत्र माभूत् (कर्मणि षष्ठी) कृद्योगा षष्ठी, शेषषष्ठ्यैव तथा प्रयोगोपपत्तेरिति चेन्न। सर्वत्र सम्बन्धषष्ठ्यैव प्रयोगोपपत्त्या कर्तृकर्मणोरित्यादिविधिवैयर्थ्यापत्तेः। यदि च "जगतः कर्ते"त्यादौ कर्मत्वेन कर्मत्वप्रकारकसर्वसिद्धबोधोपपत्त्यर्थं समासस्थले "गतिकारकोपपदात् कृत् " (पा. 6.2.139) इत्यादिविहितस्वरनिर्वाहार्थं च तस्यावश्यकतेति विभाव्यते, तर्हि प्रकृते किं तत्प्रयोजनं पाणिपिहितम् ? " इत्युक्तम्। तथा च कर्तृत्वेन कर्मत्वेन च बोधनिर्वाहाय, सामासिकस्वराद्यर्थं च सूत्रमावश्यकम्। तादृशबोधश्च कृदन्ते साध्यावस्थतापन्नक्रियाबोधमन्तरा नेति प्रकृत्या साध्यावस्थतापन्नक्रियाबोधः अङ्गीकरणीय एव इति तात्पर्यम्।

ननु असत्त्वभूतायाः साध्यरूपायाः क्रियायाः कृत्प्रकृत्यर्थत्वे "काष्ठैः पाकः" इत्यपि स्यात्, काष्ठानां घञ्प्रकृतिपचधातुप्रतिपाद्यपचनक्रियानिरूपितकरणत्वस्य सम्भवात्, आख्यातेनैव साध्यस्वरूपा भावनोच्यते इति मीमांसकमते, तादृशप्रयोगस्य अनिष्टत्वात् इति शङ्कामिष्टापत्त्या समाधत्ते - **काष्ठैः पाक इत्याद्य-पीष्टमेवे**ति। मीमांसकाभ्युपगम एव प्रयोगाणां प्रामाण्यमापादयति, अनभ्युपगमः अप्रामाण्यं चेति नास्त्येव। सर्वत्र लोक एव प्रमाणम्। तथा च "ओदनस्य पाक" इतिवत् "काष्ठैः पाकः" इत्यपि साध्वेव, उभयोः तुल्यत्वात्।

अथ कृदन्तस्थले धातुना यथा साध्यस्वभावा क्रिया अभिधीयते, तथा फलमपि साध्यरूपमसत्त्वावस्थारूपमेव अभिधीयते। अन्यथा कारकाणां साध्यत्वेनोपस्थिते

एवान्वय इति नियमात् विशेषणत्वेनाभेदेनान्वयेऽपि साध्यत्वेनोपस्थिते-रावश्यकत्वात् "स्तोकं पाक" इति प्रयोगो न स्यात्। स्तोकपदात् द्वितीया न स्यादित्यर्थः। अत्र हि विक्लित्तिरूपं फलं साध्यरूपमसत्त्वभूतं च धातुना अभि-धीयते। तस्य च फलस्य व्यपदेशिवद्भावेन फलाश्रयत्वमाश्रित्य कर्मत्वात् , तद्विशेषणे समानाधिकरणे स्तोकादिशब्दे द्वितीया सिध्यति। स्तोकस्य धात्वर्थफल-विशेषणत्वेन कर्मत्वात् "कर्तुरीप्सिततममि" (पा. 1.4.49)त्यनेनैव कर्मसंज्ञया द्वितीया।

नन्वत्र फलान्वये फलस्य कृत्प्रकृत्यभिधेयत्वात् "कर्तृकर्मणोः कृति" (पा. 2.3.65) इति षष्ठी स्यात् स्तोकादिभ्यः इति चेन्न। कर्तृसाहचर्येण तत्र धात्वर्थेन सह अभेदेन अनन्वयिनः एव कर्मणः तस्मिन् सूत्रे कर्मपदेन ग्रहणात्। अत एव "पूजनात् पूजितम्" (पा. 8.1.67) इति सूत्रभाष्ये "दारुणं यथा भवति तथा अध्यापक" इत्यर्थे "दारुणाध्यापक" इति रूपसिद्ध्यर्थं मलोपवचनम् आरब्धम्। दारुणमिति, फलविशेषणमिति, तस्य कर्मत्वं स्वतः सिद्धम्। तथा च यद्यत्रापि कर्मणि "कर्तृकर्मणोः"(पा. 2-3-65) इति षष्ठी स्यात्, ततः षष्ठी समासेन दारुणस्य अध्यापकः "दारुणाध्यापकः" इति इष्टरूपसिद्धेः मलोपवचनं व्यर्थं स्यात्। ततश्चानेन प्रसङ्गेन ज्ञायते यत् "कर्तृकर्मणोः कृति" (पा. 2.3.65) इति षष्ठी धात्वर्थे भेदेन अन्वययोग्ये कर्मण्येव, न तु समानाधिकरणे विशेषणे इति।

14.4. क्रियाविशेषणानां कर्मत्वमिति वचनविमर्शः

अथात्र व्याख्यासु क्रियाविशेषणानां कर्मत्वमिति विषये विचारः कृतः। "इदं तु नापूर्वं वचनम् , किन्तु फलस्य व्यपदेशिवद्भावेन फलाश्रयत्वेन कर्मत्वमाश्रित्य तद्विशेषणस्यापि कर्मत्वात् कर्मणि द्वितीयेति द्वितीया। तथा च फलविशेषणे एव द्वितीया। स्तोकं पाक इत्यत्रापि तथैव। व्यापारविशेषणत्वे तु यथायोगं तृतीया। अत एव "ज्योतिष्टोमेन स्वर्गकामो यजेते"त्यत्र यज्यर्थव्यापारविशेषणे ज्योतिष्टोमपदे तृतीया। "वेगेन धावती"त्यत्रापि तथा। ये च स्तोकादीनां कर्मत्वं न स्वाभाविकं किन्तु "क्रियाविशेषणानां कर्मत्वम्" इति अपूर्वेण वचनेन आतिदेशिक-मिति कथयन्ति, तेषां मते "स्तोकं पाक" इत्याद्युपपत्तावपि "ज्योतिष्टोमेने"-त्यत्रापि कर्मत्वेन द्वितीयापत्तिः दुर्वारा" इत्यादि **कान्त्यां** प्रतिपादितम्।

15.घञन्ते सिद्धसाध्यस्वभावक्रियाप्रतीतेः स्पष्टीकरणम्

एतदेव स्पष्टयति-

साध्यत्वेन क्रिया तत्र धातुरूपनिबन्धना।
सिद्धभावस्तु यस्तस्याः स घञादिनिबन्धनः ॥ 15 ॥

अथ **दर्पणे** क्रियाविशेषणानां द्वितीयां केचिदित्थं साधयन्तीति तन्मतमित्थं प्रदर्शितम् - "अन्ये तु "ओजः सहोऽम्भसा वर्तते" (पा. 4.4.27) इत्यधिकारे "तत्प्रत्यनुपूर्वमीपलोमकूलमि" (पा. 4.4.28)ति सूत्रे द्वितीयान्ततच्छब्दग्रहणं ज्ञापकं क्रियाविशेषणात् द्वितीयेत्यस्यार्थस्य। स्तोकाद्यर्थस्य कर्मत्वमपि न, फलस्य फलाश्रयत्वाभावात् , एवञ्च "स्तोकं पाक" इत्यादौ "कर्तृकर्मणोः कृति" (पा. 2.3.65) इति न स्तोकादिभ्यः षष्ठीप्रसक्तिः, कर्मत्वाभावादित्याहुः।" इति। तदित्थं "पाक" इत्यादिघञन्तस्थले प्रकृत्या साध्यावस्थापन्ना, घञ्प्रत्ययेन सिद्धा-वस्थापन्ना च क्रिया प्रतीयते इत्युक्तम्। अथात्र प्रश्नः, किं पाक इत्यादौ पृथक् पृथक् क्रियाद्वयं बोध्यते, उत एकैव क्रिया उभयस्वभावा इति। अत्र एकैव क्रिया उभयस्वभावा इति समाधानम्। तर्हि एकस्या एव परस्परविरुद्धसाध्यसिद्धत्वाभ्यां कथं भानमिति चेदुच्यते - यथा सम्बन्धिभेदात् (शिष्यभागिनेयरूपसम्बन्धिभेदात्) एकस्यैव व्यक्तिविशेषस्य आचार्यत्वमातुलत्वाभ्यामुपस्थितिः, तथा कारकलिङ्गादि -सम्बन्धिभेदेन बोधकभेदेन च तयोरेकाधिकरणवृत्तित्वेनोपस्थितौ बाधकाभावः इति। यथा वा "पश्य मृगो धावती"त्यत्र एकस्यैव धावनस्य मृगं प्रति साध्यत्वं, दर्शनं प्रति साधनत्वं, तथा एकस्यैव धात्वर्थस्य साध्यत्वेन प्रकारता, सिद्धत्वेन विशेष्यता (भावे इत्यनुशासनात्)। एकनिष्ठत्वाच्च तयोः न स्फुटं ग्रहो बोधे। अत एव "घञ्वाच्यो भावः प्रधानम्" इति सङ्गच्छते। "कर्तरि कृत्" (पा. 3.4.67) इति सूत्रे भाष्येऽप्युक्तम् - "घञ्वाच्यो भावो बाह्यः प्रकृत्यर्थात्" इति **कान्ति-काशिके**॥14॥

एवं प्रतिपादितं प्रकृतिप्रत्ययाभ्यां साध्यसिद्धस्वभावक्रियाप्रतिपादनं कारिकान्तरेण पुनः स्पष्टयति - **साध्यत्वेनेति**॥ **तत्र** - पाक इत्यादि भावप्रत्ययस्थले, **साध्यत्वेन क्रिया** - साध्यस्वभावा क्रिया, (साध्यत्वेनेति प्रकृत्यादित्वात् तृतीया) **धातुरूप-निबन्धना** - धातुसंज्ञकानुपूर्वीबोध्या। धातुरूपं निबन्धनं प्रतीतिनिमित्तं यस्याः इत्यर्थः। प्रतीतिनिष्ठं निमित्तत्वं प्रतीयमाने उपचरितमिति बहुव्रीहौ क्रियायाः

नच घञादिभिः सिद्धत्वेनाभिधाने मानाभावः, "पाकः" इत्युक्ते, भवति नष्टो वेत्याद्याकाङ्क्षोत्थापनस्यैव मानत्वात् ,धातूपस्थाप्यायां तदसम्भवस्योक्तत्वात् , "स्तोकः पाकः" इत्यनापत्तेश्च। तस्माद्धात्वर्थान्वये स्तोकादिशब्देभ्यो द्वितीया। घञर्थान्वये प्रथमा, पुँल्लिङ्गता चेति तत्सिद्धये घञादेः शक्तिरुपेया। एतेन घञादीनां प्रयोगसाधुतामात्रमिति नैयायिकनव्योक्तमपास्तम्।

प्राधान्योपपत्तिः" इति **काशिका**। **तस्याः** - तस्याः एव क्रियायाः, **यः सिद्धभावः** या सिद्धतावस्था, सत्त्वरूपता, **सः घञादिनिबन्धनः** - घञादि (लिङ्गसङ्ख्यादियोग्य) भावप्रत्ययबोध्या इत्यर्थः।

अत्र च मुख्यमुद्देश्यं घञाद्यन्ते घञादिभिः सिद्धावस्थापन्नाक्रियाभिधानसमर्थनम्। यतः पूर्वं धातुना साध्यत्वेन क्रियायाः अभिधाने युक्तिप्रमाणे प्रदर्शिते। अत्र हि **कान्त्यां** "अत एव "भोक्तुं पाक" इत्यादौ क्रियार्थक्रियोपपदे विधीयमान-तुमुनादिसिद्धिः। क्रियापदस्य साध्यत्वविशिष्टव्यापारे एव प्रवृत्तेः। न च "पदार्थः पदार्थे"ति न्यायेन एकदेशभूतधात्वर्थक्रियायाः उपपदत्वमादाय कथं तुमुन्निति वाच्यम्। "भोक्तुं गतः", "देवदत्तेन गतो ग्रामः", "कृतपूर्वी कटम्" इत्यादौ कारकाणां गुणभूतक्रियायामन्वयदर्शनेन उक्तन्यायस्य क्रियातिरिक्तविषयत्वमि-त्याशयात्। वस्तुतः "भोक्तुं पाकः", "भोक्तुं गतः" इत्यादौ तुमुन् असाध्वेव। क्रियार्थायां क्रियायामित्युक्त्या प्रत्यासत्त्या क्रिययोरेकजातीयत्वलाभेन स्वप्रकृतिक -प्रत्ययार्थं प्रति अगुणीभूतायाः साध्यावस्थतापन्नमात्रायाः एव क्रियार्थक्रियायाः ग्रहणात्।नन्वेवमुक्तरीत्या "पञ्चकृत्वः पाकः" इत्यादौ कृत्वसुजपि न स्यात् , तद्विधावपि एतादृक्क्रियायाः ग्रहणसम्भवात् इति चेन्न। यत्र विधौ क्रियावाचक-शब्दग्रहणं, तत्रोक्तक्रियायाः (अगुणीभूतायाः साध्यावस्थतापन्नमात्रायाः) एव ग्रहणम्। यत्र क्रियारूपार्थग्रहणं तत्र गुणीभूतादेरपि ग्रहणमित्यदोषात्। तुमुन्विधौ च उपपदत्वेन (क्रियाशब्देन) शब्दग्रहणम् , इतरत्र नेति बोध्यम्"। इति। व्युत्पादकमिदं विचारणीयञ्च।

अतश्च साधनीयमिदमेवावशिष्टमिति तदेव साधयितुमुपक्रमते -**नचेति**। सिद्धत्वेन अभिधाने मानाभावः इति न। प्रमाणानां बहूनां सद्भावात्। तत्रैकं प्रमाणं प्रदर्शयति -**पाक इत्युक्ते** इति। पाक इति पदश्रवणसमनन्तरमेव इत्यर्थः। **आकाङ्क्षो -त्थानस्य** - यथा घटः देवदत्तः इत्यादिसत्त्वबोधरूपपदश्रवणे तद्योग्यक्रियाकाङ्क्षा

जायते "अस्ति, जायते, नष्टः, गतः, आगतः" इत्यादि, तथा "पाक" इत्युक्तेऽपि "अस्ति, नष्टः, जातः" इत्यादिक्रियाकाङ्क्षोत्थानमेव प्रमाणम्। तत्रापि साध्यक्रिया -काङ्क्षोत्थानमेव प्रमाणमित्यर्थः। अनया आकाङ्क्षयैव घञादिप्रत्ययान्तोपस्थाप्य-क्रियायाःद्रव्यतुल्यतापि सिध्यति। तथा च क्रियाकाङ्क्षोत्थापकत्वमेव सत्त्वभूतत्वम्। तदेव प्रतिपादयति - **मानत्वादिति**। सर्वलिङ्गसङ्ख्यायोगदर्शनाच्चेत्यपि बोध्यम्। तादृशक्रियान्तराकाङ्क्षोत्थापकत्वं धातूपस्थाप्यायां तु नास्तीति पूर्वमेवोपपादितं क्रियान्तराकाङ्क्षानुत्थापकतावच्छेदकरूपवत्वं साध्यत्वमित्यादिना। तदेव सूचयति-**उक्तत्वादिति**।

स्तोकः पाक इत्यनापत्तेः इति। "धातूपस्थाप्यायाः क्रियायाः लिङ्गानन्वयितया तत्र स्तोकपदार्थान्वये पुंस्त्वानुपपत्त्या सामान्ये नपुंसकमिति नपुंसकत्वस्यैवापत्ते"रिति **काशिका**। "घञा सिद्धावस्थक्रियाया अबोधने धात्वर्थविशेषणवाचकस्तोकादि-शब्दस्य लिङ्गसर्वनामनपुंसकत्वापत्ति"रिति भाव इति **दर्पणः**।

तस्मादिति॥ धातुना, भावविहितप्रत्ययेन च साध्यसिद्धस्वरूपायाः क्रियायाः बोधस्य अङ्गीकारादेव। **धात्वर्थान्वये** – धात्वर्थफलान्वये। फलस्यापि व्यपदेशि-वद्भावेन फलाश्रयत्वमाश्रित्य कर्मत्वात् , तद्विशेषणीभूतस्तोकाद्यर्थस्यापि कर्मत्वेन तद्वाचकात् द्वितीया सिध्यतीति "स्तोकं पाक" इति प्रयोगः सिध्यति। स्तोकादीनां धात्वर्थव्यापारविशेषणत्वे तु धात्वर्थव्यापारस्याकर्मत्वात् तस्यासत्त्वरूपत्वाच्च प्रातिपदिकार्थे प्रथमा, सामान्ये नपुंसकमिति नपुंसकत्वं च। यथा "ज्योतिष्टोमेन भक्तिपूर्वं यजेत" भक्तिपूर्वमित्यस्य भावनाविशेषणत्वेन प्रथमा, नपुंसकत्वं च। ज्योतिष्टोमस्य तु यागविशेषणत्वेन तृतीया। अत्रेदमवधेयम् - "पाक" इत्यादि घञाद्यन्तेषु धातुना साध्यस्वभावौ फलव्यापारौ बोध्येते। कौण्डभट्टमते फलस्यापि पृथक्पदार्थत्वात् तत्र विशेषणत्वेन स्तोकाद्यन्वयो भवति। नागेशमते तु पदार्थैक-देशे व्यापारविशेषणीभूते फले अन्वयः स्वीक्रियते। एवं घञ्प्रत्ययेनापि सिद्धावस्था -पन्नौ फलव्यापारौ बोध्येते। परन्तु तत्र फलस्य पार्थक्येन बोधे प्रयोजनाभावात् , सर्वत्र घञाद्यन्तेषु व्यापारमुख्यविशेष्यकबोधस्यैवानुभवात् घञादीनां फलविशिष्ट -व्यापारबोधकत्वमेव स्वीक्रियते। तथा च तत्र फलस्य मतद्वयेऽपि(नागेश-कौण्डभट्टयोरुभयोर्मतेऽपि) पदार्थैकदेशत्वमेवेति घञाद्युपस्थाप्यफले स्तोकाद्य-न्वयः न भवति। किन्तु प्रधानार्थभूतव्यापारे एव इति **शाङ्करी**।

घञर्थान्वये - घञर्थभूतसिद्धावस्थतापन्नक्रियान्वये। व्यापारस्य अकर्मत्वेन तद्विशेषणे द्वितीयायाः अप्राप्ते प्रातिपदिकार्थमात्रे प्रथमेत्यर्थः इति **काशिका**। वस्तुतः विशेषणविशेष्ययोः समानलिङ्गवचनकत्वनियमेन विशेष्यं घञाद्यन्तमाश्रित्य तद्विशेषणीभूतस्तोकादिषु विभक्तिरित्यर्थः। ततश्च "स्तोकेन पाकेन" इत्यादिप्रयोगसिद्धिः। एतत्सिद्ध्यर्थं घञादिष्वपि धात्वर्थात् पृथग्भूते सिद्धरूपे फलावच्छिन्नव्यापारेऽवश्यं शक्तिः स्वीकरणीया। तदेव वदति - **तत्सिद्धये घञादेः शक्तिः अभ्युपेयेति**। यदि च घञादीनां धात्वर्थानुवादकत्वं, साधुत्वार्थकत्वं वा, तदा घञादिभिः साध्यस्वरूपक्रियाया एवाभिधानात्, तस्याः असत्त्वरूपत्वाच्च, तत्र लिङ्गसङ्ख्याद्यन्वयाभावेन तद्बोधकविभक्त्यनुत्पत्त्या "पाक" इति पुल्लिङ्गे प्रयोगो न स्यात् , तथा पाकौ, पाका इति प्रयोगोऽपि न स्यात् , किन्तु औत्सर्गिकमेकवचनं, सामान्ये नपुंसकमिति नपुंसकलिङ्गता च स्यात्। तथा तद्विशेषणीभूतस्तोकादिपदेष्वपि तथैव स्यात् , तथा च "स्तोकः पाकः, स्तोका पक्ति"रित्यादिप्रयोगाणाम् असिद्धिः स्यात्।"घञादेरित्यादिपदेन क्त्वातुमुन्क्तिन्नादयः" इति **शाङ्करी**। क्त्वातुमुनोरव्ययकृत्त्वेन तत्रासत्त्वरूपायाः क्रियायाः एवाभिधानौचित्यत्वात् क्तिन्ल्युडादयः आदिपदग्राह्याः।

अथ घञर्थान्वये इति प्रतीकमुपादाय **तत्त्वदर्शिन्यां** "धात्वर्थव्यापारस्य विशेषणतया घञर्थमुखप्रेक्षित्वाभिप्रायेणेदम्। स्तोकादेस्तु धात्वर्थव्यापारान्वय एवेति भावः" इत्युक्तम्। अनेन "स्तोकः पाकः" इत्यादिष्वपि स्तोकादेः धात्वर्थव्यापारान्वय एवेति तदभिप्रायः अवगम्यते। अयं च न मूलानुगुणः।

एतेनेति॥ घञादीनां भावविहितप्रत्ययानां सिद्धावस्थतापन्नक्रियावाचकत्वव्यवस्थापनेनेत्यर्थः। **प्रयोगसाधुतामात्रमिति**। मात्रपदेन वाचकत्वव्यवच्छेदः। **नैयायिकनव्योक्तमिति**॥ नैयायिकनव्यपदेन कातन्त्रपरिशिष्टकारादयः अभिप्रेताः इति **दर्पणकाशिके**। तन्मतं चेत्थम् –"धातूनां सुब्विभक्त्यप्रकृतित्वात् तदर्थे सुबर्थसङ्ख्याकर्मादीनामन्वयानुपपत्त्या धातोरिव घञाद्यन्तस्यापि क्रियावाचकत्वमभ्युपेयम्। घञाद्यन्तस्य च प्रातिपदिकत्वेन सुब्विभक्तिप्रकृतित्वात् तदर्थे सुबर्थसङ्ख्याकर्मादीनामन्वयश्च सिद्ध्यति। धातुना यादृशव्यापारोऽभिधीयते, तादृश एव घञाद्यन्तेनापि इयान् विशेषः – स्तोकादीनां क्रियाविशेषणानां धात्वर्थविशेषणत्वविवक्षायां द्वितीया, घञर्थक्रियाविशेषणत्वे घञन्तसमानविभक्तिकत्वम्। ततश्च

न च घञन्तशक्त्युपस्थाप्यान्वये "स्तोकः पाकः" इति भवतीति वाच्यम् , घञन्तानुपूर्व्याः शक्ततावच्छेदकत्वे गौरवादनुशासनाच्च घञादेरेव तथा शक्तिकल्पनादिति दिक्। एवञ्च घञ्शक्त्यभिप्रायेण "कृदभिहितः" इति भाष्यम् , अतो न तद्विरोध इति भावः ॥ 15 ॥

घञन्तेनापि प्रकृत्यर्थस्यैवानुवादात् घञा न कोऽप्यर्थविशेषः प्रतिपाद्यते, अपि तु प्रयोगसाधुत्वार्थमेवानुशिष्यते घञादिः, घञादीनामभावे धातोः प्रातिपदिकत्व-निषेधेन सुब्विभक्त्यप्रकृतित्वात् पाकः, पाकौ, पाकं, पाकेनेत्यादिप्रयोगाणा-मनापत्तिः। तथा च धातुना यादृशी क्रिया बोध्यते, घञन्तेनापि तादृशी एव क्रिया बोध्यते। विशेषस्तु घञन्तोपस्थाप्यक्रियायां लिङ्गसङ्ख्याद्यन्वयः। ततश्च स्तोकादीनां घञन्तोपस्थाप्यक्रियाविशेषणत्वेन "स्तोकः पाकः" इत्यादिप्रयोगा अपि निराबाधाः।" इति। अस्येदं समाधानम्। धातुना यादृशी क्रियाभिधायते, तादृशी एव घञन्तेनाभिधीयत इत्ययुक्तम्। धातुना असत्त्वभूतायाः क्रियायाः अभिधानात्, घञन्तेनापि तस्या एवाभिधानं स्यात्। तथा सति, तस्याः असत्त्वरूप -त्वात् लिङ्गसङ्ख्याद्यन्वयायोग्यत्वात् घञाद्यन्तात् विभक्त्युत्पत्तिरेव न स्यात्। अथवा नपुंसकैकवचनमेव स्यात्। लिङ्गानुशासनबलात् तत्तदन्तानां तत्तल्लिङ्गता-भ्युपगमेऽपि सङ्ख्याकारकविशेषबोधकप्रत्ययोत्पत्तिस्तु न स्यात्। अपि तु सर्वत्र प्रथमायाः एकवचनमेव स्यात्। अतः धातूपस्थाप्यक्रियायाः, घञन्तोपस्थाप्य-क्रियायाश्च वैलक्षण्यमवश्यं वक्तव्यम्। तच्च सिद्धसाध्यावस्थाभेदेनैव। ततश्च सिद्धावस्थापन्ना क्रिया घञर्थः सिध्यति। उक्तं च **भाष्यकारेण** – "घञ्वाच्यो भावो बाह्यः प्रकृत्यर्थात्" इति "कर्तरि कृत्" (पा. 3.4.67) इति सूत्रे।

नन्वेवमपि घञः तत्र शक्तिर्मास्तु। घञन्तस्यैव तादृशक्रियाबोधकत्वशक्तिरस्तु। तथा च घञन्तशक्त्या उपस्थाप्ये व्यापारे विशेषणत्वेनान्वयेन "स्तोकः पाकः" इत्यादि सिध्यतीति शङ्कते - **न चेत्यादि**।

घञन्तशक्त्युपस्थाप्यान्वये - घञन्तशक्त्युपस्थाप्ये अन्वये सतीत्यर्थः। अयमत्र शङ्कितुराशयः। विशिष्टशक्तिवादिनां वैयाकरणानां घञि शक्तिकल्पनेऽपि समुदाये प्रातिपदिकसंज्ञाद्यनुरोधेन शक्तिस्वीकारावश्यकतया समुदायशक्त्यैव निर्वाहे तदवयवे तत्कल्पनमनर्थकमिति घञादीनामनर्थकत्वेन प्रयोगसाधुतामात्रार्थता इति। **सरलायामिदं स्पष्टम्**। समाधत्ते - **घञन्तानुपूर्व्याः शक्ततावच्छेदकत्वे**

गौरवात् इति। गुरुभूतानुपूर्व्याः शक्ततावच्छेदकत्वापेक्षया अनुशासनानुगुण्यात् "कर्तरि कृत्" (पा. 3.4.67) इति सूत्रभाष्यप्रामाण्याच्च घञ्त्वस्यैव शक्तता-वच्छेदकत्वमुचितम्। संभवति लघौ शक्ततावच्छेदकत्वे गुरौ तत्स्वीकारस्य सर्वतन्त्रविरुद्धत्वादिति भावः। तदेव स्पष्टयति - **अनुशासनाच्चे**ति। अयं भावः- यद्यपि वैयाकरणैः वृत्तिमात्रे समुदायशक्तिरभ्युपेयते एव, अन्यथा अर्थवत्त्वाभावेन प्रातिपदिकसंज्ञा न स्यात्, "कृत्तद्धित" (पा. 1.2.46) सूत्रेऽपि अर्थवत्पदानुवृत्ते-रुक्तत्वात्, प्रत्ययानां स्वप्रकृत्यर्थान्वितस्वार्थबोधकत्वनियमेन पाकादिशब्देषु सुब्विभक्त्यर्थस्य प्रकृत्यर्थेनान्वयस्यौचित्यात्। सिद्धावस्थापन्नव्यापारस्य घञर्थत्वेऽ-पि (घञः सुप्प्रकृतित्वाभावात्) तत्र सुब्विभक्त्यर्थसङ्ख्याद्यन्वयो न स्यात् , तथापि "भावे" (पा. 3.3.18) इति अनुशासनात् घञोऽपि शक्तिरावश्यकी एव। अन्यथा ण्वुलादेरपि शक्तिः न सिध्येत्। इष्टापत्तौ "कर्तरि कृत्" (पा. 3.4.67) इत्यनु--शासनवैयर्थ्यापत्तेः। न च भ्वाद्यन्तर्भावेन समुदायशक्तिकल्पनायां नियामकत्वं तस्य सूत्रस्येति वाच्यम्। सूत्राक्षरमर्यादया एतादृशार्थस्यालाभात्। किञ्च कृत्प्रत्ययस्य कर्त्रादिषु शक्त्यभावे खशादिषु प्रत्ययेषु "कर्तरि शप्" (पा. 3.1.68) इति सूत्राप्रवृत्त्या "जनमेजय" इत्यादौ शबाद्यनुत्पत्त्या "जनमेजय" इत्यादि रूपासिद्धिः। अतश्च अनुशासनं, "कर्तरि कृत्" (पा. 3.4.67) सूत्रस्थं "घञ्वाच्यो भावो बाह्यः प्रकृत्यर्थात्" इति, "कृदभिहितो भावो द्रव्यवत् प्रकाशते" इति भाष्यं च प्रमाणीकृत्य प्रक्रियादशायां घञादिष्वपि शक्तिः कल्पनीयेत्यर्थः। अयमेवात्र दिगर्थत्वेन **काशिकायां** प्रतिपादितः। **प्रभाशाङ्करीसुबोधिनीषु** अयमेवानूदितः। **दर्पणे** तु "घञादीनां व्यापारावाचकत्वेऽपि क्रियाविशेषणात् द्वितीयेत्यत्र क्रिया-पदस्य पाकार्थकतया तथानुपस्थाप्यपरत्वात् "स्तोक" इत्यादौ धातूपात्तपाकस्यो -क्तविशेषणवैकल्यात् न तद्विशेषणवाचकपदात् द्वितीयापत्तिरत आह – दिगिति। तदर्थस्तु स्यादेवं यदि "क्रियाविशेषणात् द्वितीये"ति स्वतन्त्रमनुशासनं स्यात्, किन्त्वस्मदुक्तफलितार्थमेव तत्। तथात्वे वा त्वन्मते "स्तोकं पाक" इत्यनापत्तेश्च" इति ग्रन्थः दृश्यते। अत्र अवतरणिकायां स्पष्टता नास्ति। अस्य अयमभिप्रायः स्यात् - "क्रियाविशेषणात् द्वितीया" इति वाचनिकमस्तीति पक्षेऽपि क्रियाशब्देने -तराविशेषणीभूतपाकादिरूपः धात्वर्थ एव गृह्यते। तथा च यत्र पाकादेः विशेष्यत्वेन उपस्थितिः, तादृशक्रियाविशेषणे द्वितीयेत्यर्थः पर्यवस्यति। घञन्ते

16. संबोधनाद्यष्टकस्य क्रिययैव साधुत्वम्

ननु कारकाणां भावनान्वयनियम एव पाक इत्यत्रापि कर्मषष्ठ्यनुसारेण भावनायाः वाच्यत्वं सिद्ध्येत्। तदेव कुत इत्याशङ्कां समाधत्ते –

सम्बोधनान्तं कृत्वोर्थाः कारकं प्रथमो वतिः।
धातुसम्बन्धाधिकारनिष्पन्नमसमस्तनञ् ॥ 16 ॥
तथा यस्य च भावेन षष्ठी चेत्युदितं द्वयम्।
साधुत्वमष्टकस्यास्य क्रिययैवावधार्य्यताम् ॥ 17 ॥

"पाक" इत्यादौ क्रियायाः तथानुपस्थापनात् न तत्र विशेषणे स्तोकादौ द्वितीया इति। अत्र दर्पणे तथानुपस्थाप्यपरत्वात् इत्यस्य इतरविशेषणीभूतविशेषणत्वेनानुपस्थाप्यपरत्वादिति व्याख्या कार्या। अत एव "स्तोकं पाक" इत्यनापत्तेरिति उत्तरग्रन्थसङ्गतिः। अयं च ग्रन्थः न सन्दर्भानुगुणः। अत एव न केनापि व्याख्यात्रा अयं ग्रन्थः अनूदितः। **तत्त्वदर्शिन्यां** तु दिगर्थत्वेन "स्तोकादीनां धात्वर्थफलविशेषणत्वे कर्मत्वात् द्वितीया, धात्वर्थव्यापारविशेषणत्वे प्रथमा, नपुंसकत्वं च, घञर्थव्यापारविशेषणत्वे प्रथमा पुंस्त्वं चे"ति व्यवस्था प्रदर्शिता। **कान्तिव्याख्यायामप्ययमेवदिगर्थः** प्रतिपादितः। अत्रानौचित्यं तु नास्ति। किन्तु घञादिष्वपि अवश्यं शक्तिः कल्पनीयेति प्रतिपादनसन्दर्भेऽयं "दिक्"शब्दः प्रयुक्त इति **काशिकाव्याख्यैवात्र** युक्ततरेति विभावयामः। प्रसङ्गममुं उपसंहरति-**एवञ्चेति**। घञादिभावप्रत्ययान्तेषु प्रकृत्या साध्यावस्थायाः, घञ्प्रत्ययेन सिद्धावस्थापन्नायाश्च क्रियायाः प्रतीतेः ओदनस्य पाकः, स्तोकं पाकः, स्तोकः पाकः इत्यादिप्रयोगानुरोधेन अङ्गीकर्तव्यतया "कृदभिहितो भावः द्रव्यवत् प्रकाशते"इति भाष्यस्थकृच्छब्दः घञादिप्रत्ययमेव बोधयतीति, घञ्शक्त्यभिप्रायकमेवेदं भाष्यम्, न तु घञन्तशक्त्यभिप्रायकम्। अत्र च "घञ्वाच्यो भावो बाह्यः प्रकृत्यर्थात्"इति भाष्यमपि अनुकूलम्।ततश्च न तद्भाष्यविरोधः इति भावः॥15॥

ननु कारकाणां भावनान्वय इति। कारकाणां भावनायामेव अर्थात् व्यापारे एवान्वयः न तु धात्वर्थे फले इति नियमः यदि स्यात्, तर्हि "ओदनस्य पाक" इत्यादिषु कर्मणिषष्ठ्याः कृद्योगहेतुत्वात्, तत्सिद्ध्यर्थं कृदन्ते अपि भावनायाः वाच्यत्वमभ्युपेयं स्यात्। स नियम एव मास्तु। कारकाणां धात्वर्थे अर्थात् फले

एवान्वयोऽस्तु इति मण्डनमिश्रानुयायिनां मतमनूद्य कारकाणां क्रिययैव व्यापारेणैवान्वये साधुत्वमिति प्रतिपादयितुमुपक्रमते - **सम्बोधनान्तमित्यादिना।** अस्याः कारिकायाः अवतरणिकायाः व्याख्यैव न कृता **दर्पण-काशिका-प्रभा-सरलादिषु।** **तत्त्वदर्शिन्यां** तु "ओदनस्य पाक इत्यादौ कर्मषष्ठ्यनुसारेण घञन्ते धातुना असत्त्वरूपभावनोपस्थितिरेवाङ्गीक्रियते। तच्च कारकाणां भावनान्वय-सिद्ध्यधीनमिति स एव प्रथमं निरूपणीयः। तच्च नोपपद्यते। कारकाणां धात्वर्थफला -न्वये बाधकाभावेन भावनान्वयनियमासिद्धेरिति मण्डनमतानुयायिनामाशङ्का-समाधानपरतया मूलमवतारयति - नन्विति" इति अवतरणिका रचिता। एषा च अवतरणिका **भूषणस्थावतरणिकायाः** अनुवाद एव। तत्रापि "नन्वस्तु धात्वर्थे एव कारकाणामन्वयः न तु भावनायामेवेति नियमः। तथा च न तदनुरोधेन भावनायाः वाच्यत्वं घञादौ सिध्यतीति आशङ्कां निरसितुमाह - सम्बोधनान्तमिति" इत्यस्ति। अत्र विषयस्य स्पष्टत्वात् व्याख्यायाः अपेक्षा नास्त्येव। अत एव अन्यव्याख्याभिः अत्र उपेक्षा कृता। **शाङ्कर्यां** तु नन्विति अवतरणिकैव यथावदनूदिता। वस्तुतः अत्र निरूपणीयोंऽशः कारकाणां भावनायामेवान्वयः इति नियमः। अथापि प्रसङ्गात् व्यापारान्वयेनैव साधुत्ववतामन्येषामपि उपन्यासः अत्र कृतः। न केवलं कारकाणामन्वयसिद्ध्यर्थमेव धातोः व्यापारवाचित्वमङ्गीकरणीयम् , अपि तु सम्बोधनविभक्त्यर्थादीनामन्वयसिद्ध्यर्थमपि इति धातोः व्यापारार्थकत्वं निस्सन्देहं प्रसिध्यतीति भावः। **सम्बोधनान्तं** - सम्बोधनविभक्त्यर्थद्वारा सम्बोधनान्तस्य, क्रियावाचकेन धातुना अन्वय इत्यर्थः। सम्बोधनविभक्त्यन्तार्थस्य सम्बोधनस्य क्रियायामन्वय इत्यर्थः। सम्बोध्यस्य उद्देश्यत्वात् , वाक्यार्थप्रधानीभूतक्रियायाश्च विधेयत्वात् उद्देश्ये विधेयेऽन्वयस्य क्लृप्तत्वादिति भावः।

कृत्वोऽर्थाः – क्रियाभ्यावृत्त्यर्थे विहितानां प्रत्ययानामपि क्रियावाचकेनैवान्वयस्य आवश्यकत्वात्।

कारकम् - क्रियानिर्वर्तकस्य कारकत्वात् तस्य कारकस्य क्रियान्वयस्यैव युक्तत्वात्।

प्रथमः वतिः - "तेन तुल्यं क्रिया चेद्वतिः" (पा. 5.1.115) इति सूत्रविहितवति-प्रत्ययार्थः सादृश्यमपि क्रियायामेवान्वेति। क्रियानिरूपितसादृश्ये एव तद्विधानात्।

धातुसम्बन्धाधिकारनिष्पन्नम् - "धातुसम्बन्धे प्रत्ययाः" (पा. 3.4.1) इत्यधिकारे।

16.1. सम्बोधनान्तस्य क्रियायामन्वयः

सम्बोधनान्तस्य क्रियायामन्वयः, "त्वं ब्रूहि देवदत्त" इत्यादौ निघातानुरोधात् , "समानवाक्ये निघातयुष्मदस्मदादेशाः" इत्यनेन समानवाक्ये एव तन्नियमात्। उक्तञ्च वाक्यपदीये-

सम्बोधनपदं यच्च तत् क्रियायां विशेषणम्।

व्रजानि देवदत्तेति निघातोऽत्र तथा सति ॥ इति ॥ (वा.प.द्वि.5)

"पचति भवति देवदत्तः" इत्यादौ तु सूत्रभाष्यादिरीत्यैकवाक्यतासत्त्वात् स्यादेव निघातः, "तिङ्ङतिङः" (पा. 8-1-28) इति सूत्रयता तिङन्ताना - मप्येकवाक्यतास्वीकारात्। "एकतिङ्वाक्यम् " इति वदतां वार्त्तिककाराणां मते परं न। वस्तुतस्तु "एकतिङ्विशेष्यकं वाक्यम् " इति तदभिप्रायस्य हेलाराजीयादौ, वैयाकरणभूषणेऽस्माभिश्च प्रतिपादितत्वात्तन्मतेऽपि भवत्येवेत्यवधेयम् ॥

विहिततुमुनादिप्रत्ययानामपि क्रियासम्बन्धे एव विधानात् तुमुन्नाद्यन्तार्थस्य क्रिययैवान्वय इत्यर्थः।

<u>असमस्तनञ्</u> - प्रसज्यप्रतिषेधरूपस्य नञर्थस्यापि क्रिययैवान्वयः। "प्रसज्य-प्रतिषेधोऽयं क्रियया सह यत्र नञ्" इति वचनात्।

तथा यस्य च भावेनेति॥ तथा - सम्बोधनान्तादिवत् , **यस्य च भावेन** - "यस्य च भावेन भावलक्षणम् " (पा. 2.3.37) इति सूत्रविहिता सप्तमी, **षष्ठी च** - "षष्ठी चानादरे" (पा. 2.3.38) इति सूत्रविहिता षष्ठी सप्तमी च इति, **उदितम्** - उक्तम् , **द्वयं** - षष्ठीसप्तमीद्वयं भावलक्षणे विहितम्, आहत्य अष्टानामेतेषां, **साधुत्वं क्रिययैव** क्रियान्वयेनैव न त्वन्यथा, इत्यवधार्यताम् इति कारिकार्थः। क्रिययैवेत्यत्र एवकारः अयोगव्यवच्छेदार्थः। योगः सम्बन्धः। अयोगः सम्बन्धाभावः। तस्य व्यवच्छेदः निवृत्तिः। निषेधद्वयेन क्रियासम्बन्धः अष्टकस्य दृढीक्रियते॥

16.1.1. **संबोधनप्रथमापदार्थविचारः**

अथ प्रत्येकम् एकैकस्य क्रियान्वयं निरूपयति - **सम्बोधनान्तस्येति**। सम्बोधनविभक्त्यन्तस्येत्यर्थः। **क्रियायाम्** - प्रवर्तनाविषयभूतायां साध्यक्रियाया-मेव, अन्वयः। तत्र तदन्वये निघातोपपत्तिमेव प्रमाणयति - **निघातानुरोधादिति**। "आमन्त्रितस्य च" (पा. 8.1.19) इति सूत्रेण विहितानुदात्तस्वरसिद्ध्यर्थमि-त्यर्थः।"आमन्त्रितस्य च" (पा. 8.1.19) इति सूत्रेण पदात्परस्य अपदादौ

स्थितस्य आमन्त्रितस्य (सम्बोधनविभक्त्यन्तस्य) सर्वस्यानुदात्तः विधीयते। तत्स्वरसिद्ध्यर्थं सम्बोधनान्तस्य क्रियान्वयः। आवश्यकः। "त्वं ब्रूहि देवदत्त" इत्युदाहरणम्। अत्र अपदादिस्थः ब्रूहीतिपदात्परश्च "देवदत्त" इति सम्बोधनान्तः। तस्य अनेन सर्वानुदात्तत्वं सिध्यति। ननु तदर्थं क्रियान्वयस्य का अपेक्षा इति चेदाह - **समानवाक्ये** इति। "समर्थः पदविधिः" (पा. 2.1.1) इति सूत्रे वार्तिकमिदम्। समानवाक्यं च "आख्यातं सविशेषणं वाक्यम्" "एकतिङ् वाक्यम्" इति तत्रैव लक्षितम्। वाक्यगतानां पदानां सर्वेषां साक्षात् आख्यातान्वये एव समानवाक्यत्वमिति, एकतिङन्तघटितमेव वाक्यं समानवाक्यमिति च उक्तत्वात्, "त्वं ब्रूहि देवदत्त" इत्यत्र सम्बोधनविभक्त्यन्तस्य आख्यातेन(तिङन्तेन) अन्वयाभावे, आमन्त्रितस्य समानवाक्यत्वाभावेन निघातस्वरः न स्यात्। तच्च सम्बोधनान्तार्थस्य क्रियान्वये एव घटते। अन्यथा अनुदात्तस्वरविधानमेव व्यर्थं स्यादिति भावः। तथा चात्र भाष्यम् - "समानवाक्ये इति प्रकृत्य निघातयुष्मदस्मदादेशाः वक्तव्याः। किं प्रयोजनम्? नाना वाक्येषु मा भूवन्निति। "अयं दण्डो हरानेन", "ओदनं पच तव भविष्यति", "ओदनं पच मम भविष्यति" इति"। "अयं दण्डो हरानेन" इत्यत्र "तिङ्ङतिङः" (पा. 8.1.28) इति अतिङन्तात्परस्य तिङन्तस्य विहितःनिघातः, "ओदनं पच तव भविष्यति", "ओदनं पच मम भविष्यति" इत्यत्र पदात्परयोः युष्मदस्मदोर्विहितावादेशौ च न भवन्ति, निमित्तनिमित्तिनोः समानवाक्यत्वाभावात् इति तद्भाष्याशयः। आमन्त्रितस्य आख्यातविशेषणत्वाभावेन "त्वं ब्रूहि देवदत्त" इत्यत्र तिङन्तामन्त्रितयोः परस्परान्वयाभावात् एकवाक्यस्थत्वाभावेन "अयं दण्डो हरानेन" इत्यादाविव निघातः न सिध्येत्। तथा च निघातविधानमेव व्यर्थं स्यादिति भावः। तथा च आमन्त्रितस्य निघातविधानं सम्बोधनान्तार्थस्य क्रियान्वयमनुमापयति। उक्तार्थे वाक्यपदीयं प्रमाणयति- **उक्तञ्चेति**। सम्बोधनपदमिति वाक्यपदीये द्वितीयकाण्डे पञ्चमी कारिका। सम्बोधनपदम् - सम्बोधनान्तं, यत्, तत् क्रियायां विशेषणम् - साक्षात् क्रियायां विशेषणम्। तथासति - साक्षात्क्रियाविशेषणत्वे सत्येव, "व्रजानि देवदत्त" इति वाक्ये व्रजानीति पदात्परस्य देवदत्तेति आमन्त्रितस्य "आमन्त्रितस्य च" (पा. 8.1.19) इति सूत्रेण विहितः निघातः सिध्यति। तथा च "व्रजानि देवदत्त" इत्यत्र सम्बोधनप्रथमायाः सम्बोधनमर्थः। तत्र देवदत्त इति प्रातिपदिकार्थस्य देवदत्तस्य

अन्वयः। तथा च "देवदत्त" इति सम्बोधनप्रथमान्तस्य देवदत्तसम्बन्धि सम्बोधनमित्यर्थः। तस्य सम्बोधनस्य विषयतासम्बन्धेन व्रजानीतिलोडन्तबोध्य-व्रजनक्रियायामन्वयः। तथा च "व्रजानि देवदत्त" इति वाक्यस्य देवदत्तसम्बन्धि-सम्बोधनविषयः मत्कर्तृकं गमनं इति बोधः। तथा च सम्बोधनान्तस्य व्रजन-क्रियायां साक्षाद्विशेषणत्वलाभात् एकवाक्यत्वं सिद्ध्यति इति निघातः सिद्ध्यति इति प्राचीनानाम् आशयः। अस्मिन् पक्षे सम्बोधनं ज्ञानोद्देश्यकेच्छा। सम्बोधन-प्रथमायाः ज्ञाने इच्छायां च विशकलितशक्तिद्वयम्। ज्ञाने प्रकृत्यर्थस्य देवदत्तादेः समवेतत्वसम्बन्धेन अन्वयः। देवदत्तसमवेतं ज्ञानमित्यर्थः। तस्मिन् ज्ञाने उद्देश्यतासम्बन्धेन इच्छायाः अन्वयः। तथा च इच्छाविषयः देवदत्तसमवेतं ज्ञानमित्यर्थः। तस्य ज्ञानस्य विषयतासम्बन्धेन वाक्यार्थे व्रजनक्रियायामन्वयः। तथा च इच्छाविषयदेवदत्तसमवेतज्ञानविषयः मत्कर्तृकं प्राप्तकालिकं व्रजनमिति बोधः। अत्र इच्छाविषयज्ञानसमवायितया प्रातिपदिकार्थस्य देवदत्तादेः बोधात् ज्ञानसमवायितया उद्देश्यत्वरूपं सम्बोध्यत्वं प्रातिपदिकार्थस्य देवदत्तादेः सिद्ध्यति। "त्वं ब्रूहि देवदत्त" इत्यत्रापि "इच्छाविषयदेवदत्तसमवेतज्ञानविषयः त्वत्कर्तृकं प्रवर्तनाविषयः ब्रवणम् " इति बोधः। तथा "राम मां पाही"त्यत्र इच्छाविषयराम - समवेतज्ञानविषयः मत्कर्मकत्वत्कर्तृकाशंसाविषयः रक्षणम् " इति बोधः। प्रौढ-मनोरमायां "राम मां पाही"ति वाक्यस्य "रामसम्बन्धिसम्बोधनविषयः मत्कर्तृकं रक्षणम् " इति बोधः प्रदर्शितः। इदमेव प्राचीनमतं काशिकाव्याख्यायाम् अन्येतु कल्परूपेण प्रदर्शितम्।

पूर्वोक्तस्य मतस्य पर्यालोचनेन निमित्तनिमित्तिनोः साक्षादन्वये सत्येव "तिङ्ङतिङः" (पा.. 8.1.28) इति, "आमन्त्रितस्य च" (पा. 8.1.19) इति च निघातः सिद्ध्यतीति ज्ञायते। तथा सति नद्याः यत्कूलं तत्र तिष्ठतीत्यर्थे "नद्याः तिष्ठति कूले" इति वाक्ये निमित्तनिमित्तिनोः "नद्याः तिष्ठति" इत्यनयोः साक्षादन्वयाभावात् तिष्ठति शब्दे "तिङ्ङतिङः" (पा. 8.1.28) इति निघातो न स्यात्। अत्र च निघातः भाष्यकारसम्मतः। अतः साक्षात्परम्परया वा आख्यात-विशेषणत्वमेव विवक्षणीयमिति नव्याः। तथा च नद्याः कूलद्वारा क्रियान्वयात् निमित्तनिमित्तिनोः एकवाक्यस्थत्वात् तयोः परस्परं साक्षादन्वयाभावेऽपि निघातः सिद्ध्यति।

तथा "व्रजानि देवदत्त" इत्यत्रापि "जानीही"त्यध्याहृत्य प्रेरणाविषयज्ञाने व्रजनस्य कर्मतया देवदत्तस्योद्देश्यतया च अन्वयात् "व्रजानि देवदत्त" इत्यनयोः एकवाक्यत्वं सिद्धमिति, द्वयोरेकवाक्यस्थत्वात् "देवदत्त" इत्यत्र आमन्त्रितनिघातः सिध्यति। जानीहीत्यध्याहारः न शब्दाध्याहारः किन्तु अर्थाध्याहारः। अतः "एकतिङ् वाक्यम्" इति लक्षणेनापि न विरोधः। अग्रे इदमेव स्पष्टीक्रियते।

वस्तुतस्तु सम्बोधनं न प्रथमाविभक्त्यर्थः। प्रथमायाः प्रातिपदिकार्थे विधानात् सम्बोधनप्रथमायाः अपि प्रातिपदिकार्थानुवादकत्वस्यैव युक्तत्वात्। ततश्च "सम्बोधने च" (पा. 2.3.47) इति सूत्रस्य सम्बोधनाधिके प्रातिपदिकार्थे वर्तमानात् प्रातिपदिकात् प्रथमेत्यर्थः। तच्च सम्बोधनमभिमुखीभावः। अयं च प्रातिपदिकार्थ एवेति लिङ्गादिवत् प्रातिपदिकार्थद्रव्यविशेषणमेव भवति। तथा च "राम" इति सम्बुद्ध्यन्तस्य "अभिमुखीभावाश्रयः रामः" अर्थः। अभिमुखीभावश्च परोक्तार्थग्रहणे सादरत्वाभ्युपगमः, आनुकूल्यप्रदर्शनं वा। अभिमुखीभावस्य फलं प्रवृत्तिनिवृत्ती। उक्तं च वाक्यपदीये-

सिद्धस्याभिमुखीभावमात्रं सम्बोधनं विदुः।
प्राप्ताभिमुख्यो ह्यर्थात्मा क्रियासु विनियुज्यते॥ (वा.प.सा.163) इति।

सिद्धस्य - सम्बोध्यत्वेन सिद्धस्य, उद्देश्यत्वेन सिद्धस्येति यावत्। अनेन सम्बोधन-विभक्तेः अनुवाद्यविषयत्वं बोधितम्। अभिमुखीभावः - अनभिमुखः अभिमुखः सम्पद्यते तथा भावः - सम्मुखीभावः, सम्बोधनान्तपदघटितवाक्यप्रयोक्तुः अभिप्रेतस्य अर्थस्य ग्रहणे आनुकूल्यम्। तद्व्यञ्जकं च तादृग्चेष्टितं मुखपरावृत्त्या-दिकम्। तन्मात्रं सम्बोधनम्। तेन सम्यक् ज्ञापनं सम्बोधनमित्यादि मतान्तर-व्यावृत्तिः।एवं सम्बोधनविभक्त्यन्तपदश्रवणेन, प्राप्ताभिमुख्यः - प्रयोक्तुः वचनार्थ-ग्रहणे आनुकूल्यमापन्नः, अर्थात्मा - अर्थपूर्णः आत्मा, प्रयोक्त्रभिप्रेतार्थज्ञानवान्, शाकपार्थिवत्वात् मध्यमपदलोपीसमासः। अथवा अर्थ्यते बोध्यते इत्यर्थः, स च आत्मा च इति कर्मधारयः। सम्बोध्यमानः इत्यर्थः। क्रियासु – प्रयोक्तृज्ञाप्य-क्रियासु, विनियुज्यते - प्रेर्यते। तथा च क्रियासु विनियोगफलकः अभिमुखीभावः सम्बोधनम् इति सिद्धम्।ततश्च सम्बोध्यस्य वाक्यार्थभूतक्रियायाश्च उद्देश्यविधेय-भावोऽपि फलितः। तथा च सम्बोध्यस्य प्रवर्तनाविषयक्रियायां विधेयभूतायां साक्षादुद्देश्यत्वेनान्वयः।"राम मां पाही"त्यस्य "अभिमुखीभवद्रामोद्देश्यकं प्रवर्तना-

विषयः मत्कर्मकं रक्षणं" इति बोधः। तथा च सम्बोधनं प्रकृत्यर्थं प्रति विशेषणम्। प्रकृत्यर्थः रामादिरूपः उद्देश्यत्वेन क्रियायां विशेषणमित्यर्थः।एवं च उद्देश्यस्य विधेयक्रियायामेवान्वयस्यौचित्येन सम्बोधनान्तस्य क्रियान्वयः न्यायसिद्ध एवेति भावः। "त्वं ब्रूहि देवदत्त" इति वाक्यस्यापि "अभिमुखीभवद्देवदत्तोद्देश्यकं प्रवर्तनाविषयः त्वत्कर्तृकं ब्रवणम् " इति बोधः।"व्रजानि देवदत्त" इत्यत्र देवदत्तव्रजनयोः परस्परोद्देश्यविधेयभावेनान्वयासम्भवात् "जानीही"ति अध्याहार्यम्। अत्र जानीहीत्येव वाक्यार्थविशेष्यक्रियासमर्पकम्। तत्र च देवदत्तस्य उद्देश्यत्वेन, व्रजनस्य कर्मत्वेनान्वयः। "व्रजानि देवदत्त" इत्यनयोः साक्षादन्वयाभावेऽपि, तयोः द्वयोः एकक्रियान्वयत्वेन एकवाक्यस्थत्वमिति निघातः सिद्ध्यति। न चैवं जानीहीत्यध्याहारे आख्यातद्वयघटितत्वात् एकवाक्यत्वं न स्यात् , ततश्च निघातः न स्यादिति वाच्यम्। वाक्यैकदेशन्यायेन "व्रजानि देवदत्त" इति वाक्यैकदेशस्यैव "व्रजानि देवदत्त, जानीहि" इति वाक्यार्थबोधकत्वेन श्रूयमाणैकतिङ्घटितत्वात् एकवाक्यत्वस्य सूपपादत्वात्। यत्र च विधेयवाचकक्रियापदं नास्ति, केवलसम्बोधनविभक्त्यन्तस्यैव प्रयोगः, यथा मूर्खेत्यादौ, तत्र तादृशक्रियावाचकपदाध्याहारेण शाब्दबोधः। "तिङ्समानाधिकरणे प्रथमा" इति वार्तिकस्वारस्यात् प्रथमाया अपि कारकविभक्तित्वेन सम्बोधनप्रथमाया अपि कारकविभक्तित्वेन क्रियान्वयः स्पष्टः। "सहयुक्तेऽप्रधाने" (पा. 2.3.19) इति सूत्रे प्रथमायाः कारकविभक्तित्वं भाष्यकारेण स्पष्टमभिहितम्।

दर्पणे तावत् सम्बोध्यस्य प्रवर्तनाविषयक्रियायामेव अन्वयः उक्तः। तत्र सम्बोध्यस्य देवदत्तादेः स्वोद्देश्यकप्रवर्तनाविषयरूपपरम्परासम्बन्धेन क्रियान्वयः उक्तः। सम्बोध्यस्य च क्रियान्वये युक्तिरित्थम् प्रदर्शिता - "सम्बोधनस्य अनुवाद्य –विषयतया, अनुवाद्यस्य विधेयसाकाङ्क्षतया, विधेयतायाश्च क्रियानिष्ठत्वेन तत्रैव सम्बोधनान्तार्थान्वयौचित्यात्"इति।"त्वं ब्रूहि देवदत्ते"ति वाक्यस्य च "अभिमुखी -भवनानुकूलव्यापारविषयदेवदत्तोद्देश्यकप्रवर्तनाविषयत्वदभिन्नकर्तृकं भाषणम्" इति बोधः वर्णितः। अनेन बोधेन अभिमुखीकरणानुकूलः व्यापारः सम्बोधनपदार्थ इति ज्ञायते। तस्य च पुनः प्रातिपदिकार्थे विशेषणत्वं च लक्ष्यते। एवं विधः बोधः न प्राचीनवैयाकरणसम्मतः, न वा नव्यवैयाकरणसम्मतः इति उपेक्ष्यः। अथ **शाङ्कर्यामपि** "स्वप्रयुक्तशब्दबोध्याज्ञातार्थबोधानुकूलव्यापारानुकूलव्यापारः

सम्बोधनपदार्थ" इत्युक्त्वा "राम मां पाही"त्यत्र लक्षणसमन्वयः इत्थं प्रदर्शितः- स्वपदेन "राम मां पाही"तिवचनप्रयोक्ता कश्चिद्रामभक्तः। तेन प्रयुक्तो यश्शब्दः राम मामित्यादिः, तद्बोध्योऽज्ञातश्च योऽर्थः मां पाहीति वाक्यार्थः, तद्बोधानुकूलः यः अभिमुखीभावः सादरत्वसम्पत्तिरूपः रामनिष्ठो व्यापारः, तदनुकूलः भक्तनिष्ठः "राम मां पाही"ति शब्दप्रयोगरूपो व्यापारः इति। अयं च ग्रन्थः सम्बोधनशब्दात् योगमर्यादया लब्धस्य अर्थस्य प्रदर्शकः। न तु बोधविषयीभूतार्थप्रतिपादकः। अत एव "राम मां पाही"ति वाक्यस्य "अभिमुखीभवद्रामोद्देश्यकप्रवर्तनाविषयः मत्कर्मकं रक्षणमि"त्येव बोधः प्रदर्शितः। अनेन च सम्बोधनपदार्थः अभिमुखी-भाव एवेति स्पष्टं ज्ञायते। **कान्त्यां** तु तत्क्रियायां विशेषणमिति प्रतीकमुपादाय सम्बोध्यमानदेवदत्तविषयव्रजनक्रियायाः सम्बोध्यमानदेवदत्तेन अन्यक्रियातो व्यावर्तनात् व्यावर्तकत्वरूपविशेषणत्वमित्यर्थः इत्युक्तम्। अनेन सम्बोध्यमान-देवदत्तस्य व्रजनक्रियायामेवान्वयः कथञ्चिदिति तदभिप्रायः। एतच्च सम्बोधनं प्रथमाविभक्त्यर्थः।तस्य सम्बोधनस्य विषयतया व्रजनक्रियायामन्वय इति प्राचीन -मते एव पर्यवस्यति। एतादृशः अन्वयः यद्यपि कान्तिकारस्य नाभिप्रेतः, अथापि कारिकायाः भट्टोजीमतमवलम्ब्यैव व्याख्येयत्वेन तथा व्याख्यातम्। अत एव अग्रे तेनैव "सम्बोधनविभक्तेरनुवाद्यविषयतया अनुवाद्यस्य च विधेये एवान्वयेन विधेयतायाश्च क्रियानिष्ठत्वेन तस्यामेवान्वयो वाच्य इति युक्तमित्यग्रे स्फुटी-करिष्यते" इति स्वमतं सिद्धान्तभूतमुक्तम्। **बृहद्भूषणे** कौण्डभट्टेनापि "केचित् सम्बोधनविभक्तेरनुवाद्यविषयतया, अनुवाद्यस्य विधेये साकाङ्क्षित्वात्, विधेयस्य च क्रियारूपत्वात् तस्य तत्रैवान्वय इति अर्थसिद्धमेवैतत्, नापूर्वम्। "देवदत्त त्वं सुन्दरः" इत्यादौ गुणोऽपि विधेय इति चेत्, तत्रापि क्रियाकाङ्क्षाशान्तये (असीत्यादि) क्रियापदस्याध्याहार्यतया तत्रैवान्वय इति वदन्ति" इति पूर्वोक्त एवाशयः प्रकटीकृतः।अयमेव कौण्डभट्टस्य स्वाशयः स्यात् यश्च नव्यैरनन्तरं प्रतिपादितः।

निघातयुष्मदस्मदादेशाः एकाख्यातघटिते समानवाक्ये एव भवेयुरिति नियमेन "पचति भवति देवदत्त" इत्यत्र "देवदत्त" इति सम्बुद्ध्यन्तस्य आमन्त्रितस्वरो न शक्यः कर्तुम्, अनेकाख्यातघटितत्वात् वाक्यस्य। अथ अनेकाख्यातघटितस्यापि

एकवाक्यत्वं भाष्यकारेण भूवादि(पा. 1-3-1)सूत्रे प्रतिपादितम्, "अपाक्षीद्देवदत्तोऽ -वेहि", "पचति भवति" इत्यादिषु एकवाक्यत्वमभ्युपगम्य इति चेत् - सत्यम्।

16.1.2. वाक्यलक्षणविचारः

"एकतिङ् वाक्यम् " इति पारिभाषिकवाक्ये एव निघातादयः इति वार्तिकारेण स्पष्टमुक्तत्वात् वार्तिकमते पूर्वोक्तवाक्ये देवदत्तपदस्य आमन्त्रितनिघातः न भवत्येव। परन्तु सूत्रभाष्यमतयोस्तु आख्यातद्वयघटितेऽस्मिन् वाक्येऽपि निघातादयः स्युरेव। तदेव उपपादयति -**"पचति भवति" इत्यादाविति**। आदिपदेन "पश्य मृगो धावति देवदत्त", "ईक्षस्व देवदत्त हतशायिकाः शय्यन्ते" इत्यादि ग्रहणम्। तत्र प्रथमं अनेकाख्यातघटितमपि एकं वाक्यमित्यत्र सूत्रकारस्य सम्मतिं प्रदर्शयति - **तिङ्ङतिङ इत्यादिना**। "तिङ्ङतिङ" (पा. 8.1.28) इति सूत्रेण पाणिनिः अतिङन्तात् परस्यैव तिङन्तस्य निघातस्वरं विधत्ते। यदि च पूर्वोक्तवार्तिककार-मतमाश्रित्य निघातादीनां एकतिङन्तघटिते समानवाक्ये एव प्रवृत्तिः, तर्हि तिङन्तात्परस्य तिङन्तस्य समानवाक्ये असम्भवात् तत्सूत्रस्थं "अतिङः" इति पदं व्यर्थं स्यात्। अनेकतिङन्तघटिते निघातप्राप्तौ सत्यामेव, तद्वारणाय तस्य आवश्यकता। ततश्चेदमतिङ्ग्रहणम् अनेकाख्यातघटितेष्वपि एकवाक्यत्वं स्वीकृत्य निघातादिः प्रवर्तते इति ज्ञापयति। अनेन च "पूर्वं स्नाति ततो भुङ्क्ते" इति तिङन्तद्वयघटिते वाक्ये तिङन्तयोः द्वयोरपि निघातः सिद्ध्यति। तथा "पचति भवति देवदत्त" इत्यत्रापि देवदत्तपदस्य आमन्त्रितस्वरः सिद्ध्यति। अथास्मिन् पक्षे "व्रजानि देवदत्त", "पचति भवति देवदत्ते"त्यादिषु निघातक्रियावाचकस्य जानीही -त्याख्यातस्य अध्याहारेऽपि वाक्यैकदेशन्यायाश्रयणं विनैव निघातः सिद्ध्यति। तदुक्तं भर्तृहरिणा वाक्यपदीये -

> बहुष्वपि तिङन्तेषु साकाङ्क्षेष्वेकवाक्यता।
> तिङन्तेभ्यो निघातस्य पर्युदासस्तथार्थवान्॥ (वा.प.द्वि-442) इति।

तथा च लौकिकवाक्यत्वमेव सूत्रवाक्यकाराभिमतमिति ज्ञायते। लौकिकं वाक्यं च "अर्थैकत्वादेकं वाक्यं साकाङ्क्षं चेद्विभागे स्यात् " (मी.) इति,

> "साकाङ्क्षावयवं भेदे परानाकाङ्क्षशब्दकम्।
> क्रियाप्रधानं गुणवत् एकार्थं वाक्यमुच्यते ॥" (वा.प. द्वि-4) इति,

"सुप्तिङन्तचयो वाक्यं क्रिया वा कारकान्विता" (अमर-प्रथम-शब्दादि-2)

इति च लक्षितं सुबन्तचय-तिङन्तचय-सुप्तिङन्तचयरूपं त्रिविधम्। "त्वया शयितव्यम् " इति सुबन्तचयस्य, "पचति भवति" इति तिङन्तचयस्य, "पश्य मृगो धावति", "रामः वनं गच्छति" इत्यादि सुप्तिङन्तचयस्योदाहरणानि। "क्रिया वा कारकान्विता" इत्यत्र वा शब्दः चेदर्थकः। कारकान्विता क्रिया बोध्या चेदित्यर्थः।अनेन वाक्ये क्रियायाः प्राधान्यं,वाक्यार्थमुख्यविशेष्यत्वरूपं बोधितम्। "आख्यातं सविशेषणं वाक्यम् ", "आख्यातं साव्ययकारकविशेषणं वाक्यम् " इति लक्षितं वाक्यमपि लौकिकमेव। लक्षणयोरुभयोरपि एकार्थकत्वमेव। अनयोर्मध्ये "आख्यातं सविशेषणं वाक्यम् " इति सर्वसङ्ग्राहकं भवति। अत्र च आख्यातपदं न तिङन्तपरं, किन्तु क्रियावाचकपरम् , तेन "त्वया शयितव्यम् " इत्यादीनां तिङन्ताघटितानामपि वाक्यत्वं सिद्ध्यति। "शयितव्यम् " इत्यस्य सुबन्तत्वेऽपि क्रियावाचकत्वात् न वाक्यलक्षणाव्याप्तिः। उक्तं हि **कान्त्यां** सुप्तिङन्तचयो वाक्यमिति अमरलक्षणव्याख्यायाम् - "सुप् च तिङ् च सुप्तिङ्। सुब्विशिष्टं तिङ् सुप्तिङ्। तयोः (द्वयोः सुप्तिङ्-शब्दयोः) एकशेषे, अन्तशब्देन समासः। तेन सुबन्तचय-तिङन्तचय-सुप्तिङन्तचयानां त्रयाणां लक्षणानां लाभः। तत्र प्रथमस्य "चैत्रेण शयितव्यम् " इत्युदाहरणम्। द्वितीयस्य "पचति भवती"ति। तृतीयस्य "चैत्रः पचति" इति। क्रिया वेति विशेषणेन निरर्थकसमुदायव्यावृत्तिः। सुप्तिङन्त-चयपदेन केवलपचतीत्यादेः व्यावृत्तिः। अस्यापि कर्त्रादिविशिष्टक्रिया-बोधकत्वात्।" इति।

भाष्यकारेणापि भूवादिसूत्रे "का तर्हीयं वाचो युक्तिः, पचति भवति, पक्ष्यति भवति, अपाक्षीद्भवति। सैषा वाचो युक्तिः, पच्यादिक्रियायाः भवतिक्रियायाः कर्त्र्यो भवन्ति।" इति तिङन्तचयस्य, "अपाक्षीद्देवदत्तोऽवेहि" इति अनेकतिङन्तघटित-सुप्तिङन्तचयस्य च एकवाक्यत्वं प्रतिपादितम्। निघातयुष्मदस्मदादेशानां विषये पारिभाषिकम् "एकतिङ्वाक्यम् " इति वाक्यलक्षणं वदतः वार्तिककारस्य मते तु "पचति भवति देवदत्त" इत्यत्र निघातः न। "व्रजानि देवदत्त" इत्यत्र जानीहीति शब्दाध्याहारपक्षे वार्तिककारमते निघातो न। वाक्यैकदेशन्यायेन अर्थाध्याहारे तु भवत्येव निघातः।

अत्र **तत्त्वदर्शिन्यां** "समानवाक्याधिकारः, पारिभाषिकम् एकतिङ् इति वाक्यं चाश्रित्य अतिङ्ग्रहणं प्रत्याचक्षाणस्य कात्यायनस्य मतेनाह - **एकतिङिति**।" इति

एकतिङ्वाक्यमिति वदतामिति ग्रन्थस्य अवतरणिका रचिता। समानवाक्याधिकार-प्रस्तावः वाक्यलक्षणं च समर्थसूत्रे व्यपेक्षासामर्थ्योपपादनसन्दर्भेऽस्ति। तत्र अतिङ्ग्रहणप्रत्याख्यानसन्दर्भ एव नास्ति। वस्तुतः पारिभाषिकं वाक्यलक्षण-माश्रित्य अतिङ्ग्रहणं भाष्यकारेण प्रत्याख्यातम्। तथा च निघातयुष्मदस्मदादेशेषु एकतिङन्तघटितमेव समानवाक्यम्। अत्र वार्तिककारभाष्यकारयोः न मतभेदः। यद्यपि "अतिङ्" इति सूत्रयतः सूत्रकारस्य मते अनेकतिङन्तघटितेऽपि वाक्ये निघातादीनां प्रवृत्तिः स्यात् , अथापि यथोत्तरं मुनीनां प्रामाण्यात् अनेकतिङन्त-घटिते वाक्ये निघातादीनामप्रवृत्तिरेव। स्पष्टमिदं **काशिकायाम्** - "परे तु एकतिङ्वाक्यमिति स्वशास्त्रीयनिघातादिकार्यमात्रोपयोगि, तेन "पश्य मृगो धावती"त्यादावेतदसत्त्वेऽपि न क्षतिः। अत एव एतदाश्रित्य "तिङ्ङतिङः" (पा. 8.1.28) इति सूत्रस्थमतिङ्ग्रहणं प्रत्याख्यातम् अष्टमे भाष्ये, एवञ्चोक्तस्थले ("पचति भवति देवदत्त") "देवदत्त" इत्यस्य निघाताभाव एव लभ्यते। यथोत्तरं मुनीनां प्रामाण्यमिति प्राहुः।" इति ग्रन्थेन। **दर्पणे कान्त्यां** च विशेषोऽयं सूचितः। एवं सूत्रवार्तिककारयोः मतभेदं प्रदर्श्य सम्भवति मतैक्ये मतभेदस्यान्याय्यत्वात् मतभेद एव नास्ति, सूत्रकृदभिप्रेत एवार्थः वार्तिककारस्यापि सम्मत इति प्रतिपादयति - **वस्तुतस्तु** इति। "एकतिङ् वाक्यम् " इति लक्षणे एकतिङ्शब्देन एकं तिङन्तं न विवक्षितम्। किन्तु "एकतिङ्विशेष्यकम् " इत्यर्थः विवक्षितः। तथा च एकतिङन्तार्थविशेष्यकबोधजनकं वाक्यमिति वाक्यलक्षणं पर्यवसन्नम्। अनेका-ख्यातघटितेषु "पश्य मृगो धावती"त्यादिष्वपि एकतिङन्तार्थस्यैव मुख्य-विशेष्यत्वात् , अन्यतिङन्तार्थस्य प्रधानतिङन्तार्थे एव विशेषणाच्च एकवाक्यत्वं सिद्ध्यति। एकतिङ् वाक्यमित्यस्य उक्तः अर्थः हेलाराजेन वाक्यपदीय-व्याख्यायामुक्त इति प्रमाणयति - **हेलाराजीये** इति। "तिङन्तान्तरयुक्तेषु" (वा.प. द्वि-451) इति कारिकाव्याख्यायाम् - "वार्तिककारस्यापि एकतिङित्यत्र एकतिङं प्रधानतिङन्तापेक्षया प्रतिपाद्यमानं सूत्रकारमतानुगुण्यं भजत एवेत्यनयोर्नास्ति मतभेदः।" इति हेलाराजेनोक्तम्।

अत्र **दर्पणे** "बहुष्वपि तिङन्तेषु" इति कारिकाव्याख्यायाम् हेलाराजेनोक्तमिति उक्तम्। तन्न। "तिङन्तान्तरयुक्तेषु" (वा.प. द्वि-451) इति कारिकाव्याख्यायामेव अस्य ग्रन्थस्योपलभ्यमानत्वात्।

16.2. कृत्वोऽर्थाः

कृत्वोऽर्थाः। "संख्यायाः क्रियाभ्यावृत्तिगणने कृत्वसुच्" (पा० सू० 5-4-17) इति क्रियायोगे तत्साधुत्वोक्तेः, क्रियाया अभ्यावृत्तिः - पुनः पुनर्जन्म, तस्मिन् द्योत्ये इति तदर्थात्।

भूषणे इति। तत्र हि -"भाष्यकारानुयायिनस्तु "पचति भवति", "ईक्षस्व शय्यन्ते हतशायिकाः" "पश्य मृगो धावति" इत्यादौ एकतिङभावात् कथमेकवाक्यता, कथं वा "तिङ्ङतिङः" (पा. 8.1.28) इति सूत्रे अतिङन्तात् परस्य पर्युदासः, तिङन्तात् परस्य तिङन्तस्य वाक्यान्तरप्रविष्टतया निघाताप्रवृत्तेः। उक्तं हि वाक्यपदीये -

बहुष्वपि तिङन्तेषु साकाङ्क्षेष्वेकवाक्यता ।
तिङन्तेभ्यो निघातस्य पर्युदासस्तथार्थवान् ॥ (वा.प. द्वि-450) इति।

तस्मात् "एकतिङ्विशेष्यकम् वाक्यम् " इति वार्तिकमतमभ्युपेयम्।" इति ग्रन्थेन कौण्डभट्टेन सूत्रवार्तिककारयोः मतभेदः नास्तीति प्रतिपादितम्। तथा च अनेक-तिङन्तघटितेष्वपि निघातादीनां प्रवृत्तिरस्त्येवेति कौण्डभट्टस्याशयः। तदुक्तम्-**तन्मतेऽपि भवत्येवेत्यवधेयमिति**। नागेशस्तु "पारिभाषिकमेकतिङिति निघातादि - प्रयोजकं, तच्चैकतिङन्तघटितमेव, अतः अनेकाख्यातघटितवाक्येषु निघातादीनां प्रवृत्तिर्नास्ति, पारिभाषिकं वाक्यमाश्रित्य "तिङ्ङतिङः" (पा. 8.1.28) इति सूत्रस्था-तिङ्ग्रहणस्य भाष्यकृता प्रत्याख्यानात्। तथा च वार्तिकभाष्यकारयोः न मतभेदः किन्तु सूत्रवार्तिककारयोः। यथोत्तरं मुनीनां प्रामाण्यात् भाष्यकारसमर्थितं वार्तिक -मतमेव युक्तम् " इत्यभिप्रैति।

एवं सम्बोधनस्य क्रियायामेवान्वय इति सप्रमाणं निरूप्य कृत्वसुजादि-प्रत्ययार्थस्यापि क्रियान्वयेनैव साधुत्वं निरूपयितुमुपक्रमते - **कृत्वोऽर्थाः** इति। कृत्वः अर्थः येषां ते इति बहुव्रीहिः। अत्र "कृत्वः" शब्दः कृत्वोऽर्थसदृशपरः। तथा च कृत्वसुजर्थसदृशः अर्थः येषामिति बहुव्रीहिसमासार्थः फलति। "उष्ट्रस्य मुखमिव मुखं यस्येति उष्ट्रमुख" इतिवत् कृत्वसुचः अर्थ इव अर्थः यस्येत्यर्थे समासः इत्यर्थः। "उष्ट्रमुख" शब्देऽपि उष्ट्रशब्दः उष्ट्रमुखवाचकः। तथा च उष्ट्र इव - उष्ट्रमुखमिव मुखं यस्येति सामानाधिकरणबहुव्रीहिरेव। कृत्वसुचः अर्थः क्रियाभ्यावृत्तिगणनम्। ततश्च तदर्थबोधकानां प्रत्ययार्थानां क्रिययैव अन्वयः

इत्यर्थः। क्रियाभ्यावृत्तिगणनबोधकाः "सङ्ख्यायाः क्रियाभ्यावृत्तिगणने कृत्वसुच्" (पा. 5.4.17) इति कृत्वसुच्, "द्वित्रिचतुर्भ्यः सुच्" (पा. 5.4.18), इति सुच्, "एकस्य सुकृच्च" (पा. 5.4.19) इति सुकृदादेशेन सह सुच् "विभाषा बहोर्धाऽविप्रकृष्टकाले" (पा. 5.4.20) इति धा, इत्येवं कृत्वसुच्, सुच्, धा इति त्रयः प्रत्ययाः अत्र कृत्वोऽर्थाः इति बहुवचनान्तेनोच्यन्ते। "तद्धितश्चासर्वविभक्तिः" (पा. 2.1.38) इति सूत्रे "कृत्वोऽर्थाः" इति भाष्यकारवचनव्याख्यायां कृत्वसुच्, सुच्, धा इति प्रत्ययत्रयं तदर्थत्वेन प्रतिपादयति कैयटः। अतः अत्र "कृत्वसुच्, सुच् द्वावेव कृत्वोऽर्थप्रत्ययौ, बहुवचनं तु लक्ष्यबहुत्वाभिप्रायेणेति" **प्रभाव्याख्या** चिन्त्या। अत्र च "पञ्चकृत्वो भुङ्क्ते, द्विः/त्रिः/चतुः/ सकृत् भुङ्क्ते, बहुधा भुङ्क्ते" इत्युदाहरणानि। **क्रियाभ्यावृत्तिगणने**ति। क्रियाभ्यावृत्तिगणने वर्तमानेभ्यः सङ्ख्यावाचकेभ्यः स्वार्थे कृत्वसुजिति "सङ्ख्यायाः क्रियाभ्यावृत्तिगणने" (पा. 5.4.17) इति सूत्रार्थः। अभ्यावृत्तिगणनयोग्याश्च क्रियाः एककर्तृकाः तुल्यजातीयाश्च। भिन्नजातीयासु भिन्नकर्तृकासु अभ्यावृत्तिप्रतीतेरननुभवात्। क्रियाभ्यावृत्तिः प्रत्ययेन द्योत्यते। **क्रियायोगे** इति। "पञ्चकृत्वो भुङ्क्ते" इत्यत्र पञ्चशब्दस्य पञ्चसङ्ख्योत्पत्तिरित्यर्थः। तत्र कृत्वसुच् तात्पर्यग्राहकः। उत्पत्तिमदर्थश्च क्रिया एवेति पञ्चशब्दार्थस्य पञ्चसङ्ख्योत्पत्तेः स्वसमभिव्याहृतक्रियायामेवान्वयः इति क्रियायोगे एव कृत्वसुजादेः साधुत्वं लभ्यते। एवं च "पञ्चकृत्वो भुङ्क्ते" इत्यस्य पञ्चसङ्ख्योत्पत्तिका वर्तमानकालिका एककर्तृका भुजिक्रियेति बोधः। कृत्वसुजादीनां क्रियान्वये एव साधुत्वात् "द्वौ घटावि"त्यर्थे "द्विः घट" इति प्रयोगो न भवति। तथा च "द्विः घटः" इति प्रयोगाभावोऽपि कृत्वसुजाद्यर्थस्य क्रियायोगज्ञापकः।

एवं कृत्वोऽर्थस्य क्रियान्वये एव साधुत्वात् , यत्र क्रियापदं न श्रूयते, तत्र क्रियापद -मध्याहृत्य क्रियान्वयः वक्तव्यः, यथा "द्विदशाः" इत्यत्र अध्याहृताऽऽवृत्तिक्रियायाः जन्मगणने सुच् "द्विः आवृत्ताः दश" इति। अन्ततः अस्तीति वा अध्याहार्यमिति **कान्तिः**।

अत्र सर्वाः व्याख्याः एकरूपा एव। **कान्त्यां** तु "पञ्चकृत्वो भुङ्क्ते" इत्यत्र कृत्वसुजन्तस्य पञ्चत्वसङ्ख्योत्पत्तिमदर्थपरत्वं वर्णितम्। तस्य च क्रियायां अभेदेनैवा -न्वयः। तथा च पञ्चत्वसङ्ख्योत्पत्तिका (पञ्चत्वसङ्ख्योत्पत्तिमदभिन्ना) भुजिक्रिया इति बोधः। उत्पत्तिपर्यन्तार्थकत्वमन्यव्याख्यासु प्रतिपादितम्। उत्पत्तिपर्यन्तार्थकत्वे

तादृशोत्पत्तेः आश्रयत्वसम्बन्धेन क्रियायामन्वयः वक्तव्यः, उत्पत्तिमदर्थकत्वे अभेदेन क्रियान्वय इति विशेषः। कृत्वसुजादिप्रत्ययान्तानां क्रियाविशेषणत्वात् सामानाधिकरण्येनैव तदर्थस्य विशेषणीयत्वात् उत्पत्तिमदर्थकत्वमेव युक्तमिति विभाव्यते। अत्र विद्वांस एव प्रमाणम्।

अथ **कान्त्यां** कर्तृबहुत्वे "पञ्चकृत्वो भुञ्जते" इत्युदाहरणमपि दर्शितम्। पञ्चसङ्ख्योत्पत्तिका वर्तमानकालिका तत्तत्कर्तृका भुजिक्रियेति बोधः। कर्तृभेदेन क्रियाभेदः, क्रियाभेदेन च तत्तत्क्रियायाः पञ्चसङ्ख्योत्पत्तिकत्वं च अवगम्यते।

क्रियाभ्यावृत्तिगणने इत्यत्र अभ्यावृत्तिशब्दार्थं स्पष्टीकरोति - **पुनः पुनः जन्मेति**। यथा उपाय-अभ्युपाय-शब्दयोः एकार्थकत्वं, तथा आवृत्ति-अभ्यावृत्ति-शब्दयोरपि एकार्थकत्वं स्यादिति भ्रमनिरासाय अभ्यावृत्तिपदार्थः स्पष्टं निरूप्यते। यदि च तस्य आवृत्त्यर्थकतैव स्यात् तर्हि आवृत्तिशब्दस्य द्वितीयादिप्रवृत्तावेव लोके रूढत्वेन, प्राथमिकक्रियाप्रवृत्तेः आवृत्तावन्तर्भावात् "पञ्चकृत्वो भुङ्क्ते" इत्यर्थे "चतुः भुङ्क्ते"इति प्रयोगापत्तिः।"षट्कृत्वो भुङ्क्ते" इत्यर्थे "पञ्चकृत्वो भुङ्क्ते" इत्यापत्तिश्च। किञ्च यदि सूत्रस्थाभ्यावृत्तिशब्दस्यावृत्तिपरत्वं, तर्हि "अभि" इति शब्दप्रयोग एव व्यर्थः स्यात्।अतश्चात्र अभिग्रहणात् अभिमुखावृत्तिः जन्मलक्षणा प्रवृत्तिरित्यर्थः स्वीक्रियते। तथा च व्यवहाराय अभिमुखीप्रवृत्तिः पुनः पुनः जन्म अभ्यावृत्तिशब्दार्थः। ततश्च प्राथमिकप्रवृत्तिरपि अत्र गणनायां स्वीक्रियते इति न पूर्वोक्तप्रयोगप्रसङ्गः। एवञ्च एककर्तृकाणां तुल्यजातीयक्रियाणां, पुनः पुनः जन्मनः गणनायां सङ्ख्यावाचकेभ्यः कृत्वसुजादयः भवन्तीत्यर्थः। एतच्च "एकस्य सकृच्च" (पा. 5.4.19) इति सूत्रे भाष्ये इत्थं प्रतिपादितम् - "न तु पुनः पुनरावृत्तिरभ्यावृत्तिः। किं तर्हि, अभिमुखीप्रवृत्तिरभ्यावृत्तिः। पूर्वा च परे प्रत्यभिमुखी, परे च पूर्वा प्रत्यभिमुख्यौ"इति।अत्र कैयटः - "अस्ति हि तासां प्रवृत्तीनां एकसाधनानां परस्परापेक्षा - एतावत्यः एताः प्रवृत्तयः इति। "सकृद् भुङ्क्ते" इत्यादौ तु एकस्या अपि वृत्तेः स्वरूपलाभं प्रत्याभिमुख्यमस्ति" इति। तथा च अभिमुखीवृत्तिः अभ्यावृत्तिरिति पक्षे "अभिवृत्ति"रित्येवालमिति मध्ये प्रयुक्तः आङ् निरर्थक इति फलति इति **तत्त्वदर्शिनी**। अथ तत्त्वदर्शिन्यां "सङ्ख्यायाः क्रियाभ्यावृत्तिगणने" (पा. 5.4.17) इति सूत्रस्थस्य एकैकस्यापि पदस्य सार्थक्यमुदाहरणप्रत्युदाहरणादि–

16.3. कारकम्

कारकम्। "कारके"(पा. 1-4-23) इत्यधिकृत्य तेषां व्युत्पादनात्। कारकशब्दो हि क्रियापरः, करोति कर्तृकर्म्मादिव्यपदेशानिति व्युत्पत्तेः। तथाचाग्रिमेष्व-पादानादिसंज्ञाविधिषु क्रियाऽर्थककारकशब्दानुवृत्त्या क्रियान्वयिनामेव संज्ञेति भाष्ये स्पष्टम्।

प्रदर्शनपुरःसरं प्रतिपादितम् , तत्तु तत एव अवगन्तव्यम्। अत्र हि **काशिका**- "अत्र सूत्रे क्रियापदं स्पष्टार्थम् , द्रव्यादेः उत्पत्तेरेकत्वेन तस्य गणनयोग्य-जन्माप्रसिद्धेः। (क्रियासमूहरूपत्वेन) अनेकस्याः अपि क्रियायाः निवृत्तभेदायाः (एका क्रिया इति प्रतीतिविषयायाः) धातुवाच्यतया तस्याः तादृशजन्मसम्भवः। सङ्ख्यायाः तत्तत्सङ्ख्यावत्तया बोधनरूपगणने हेतुत्वात् सूत्रे गणनपदं विनापि गणनलाभे लोके ये गणनायां प्रसिद्धाः एकादयः तेषामेव परिग्रहार्थं तत्। तेन युग्मोभादिशब्दाः न (सूत्रविषयाः) इति स्पष्टमाकरे।" इति। अस्यैव विस्तृता व्याख्या तत्त्वदर्शिन्याम्।

16.3.1. **कारकपदार्थविचारः**

कारकमिति। कर्तृ-कर्म-करणादिरूपं षड्विधं कारकमित्यर्थः। तस्यापि कारकस्य क्रियान्वये एव साधुत्वमित्यर्थः। एतच्च "कारके" (पा. 1.4.23) इति सूत्रभाष्यात् ज्ञायते। तत्र हि भाष्ये "कारके"(पा. 1.4.23) इत्यस्य द्विधा व्याख्या कृता। तत्र प्रथमव्याख्यायां कारके इति व्यत्ययेन प्रथमार्थे सप्तमी। ततश्च कारकमित्यर्थः। अयं च संज्ञाधिकारः। अस्य च अपादानादिसंज्ञाविधायकेषु अनुवृत्त्या वाक्यभेदेन अपाये ध्रुवं कारकसंज्ञं भवति, उक्तं च अपादानसंज्ञं भवतीत्येवं रूपेण व्याख्यानात् कारकसंज्ञायाः अपादानादिभिः समावेशः सिध्यति। अन्यथा एकसंज्ञाधिकारात् कर्तृकर्मादिसंज्ञकानां कारकसंज्ञा न स्यात्। कारकमिति महासंज्ञाकरणाच्च अन्वर्थसंज्ञेयम्। उक्तं हि तत्र भाष्ये "अन्वर्थसंज्ञा यथा विज्ञायेत - करोतीति कारकमिति।" तथा च क्रियाजनकमिति ज्ञाते जनकस्य जन्याकाङ्क्षया क्रियायामेव तस्यान्वयः। ततश्च क्रियानन्वयिनः कारकत्वं न भवति। यथा- "ब्राह्मणस्य पुत्रं पन्थानं पृच्छति।" अत्र ब्राह्मणस्य पुत्रविशेषणत्वेन क्रियान्वया-भावात् कारकत्वं न भवति। अतश्चास्मिन्नपि पक्षे कारकस्य क्रियान्वयित्वनियमः

सिद्धः। अथ द्वितीया व्याख्या कारके इत्यस्य सप्तम्यन्तत्वमेवाश्रित्य। अत्र पक्षे कारके इत्यस्य क्रियायामित्यर्थः। उक्तं च भाष्ये - "अथवा यावद्ब्रूयात् क्रियायाम् इति तावत् कारके इति। एवं च कृत्वा निर्देश उपपन्नो भवति कारके इति।" "क्रियात्र सूत्रे कारकेनोच्यते। सा हि कर्त्रादीनि विशिष्टव्यपदेशयुक्तानि करोति। विषयत्वेन चायमधिकारः। क्रियायां विषये यद्भवमित्यादि वस्तु सम्पद्यते।" इति तत्र **कैयटः**। "विषयत्वं जनकत्वमेवे"ति तत्र **नागेशः उद्योते**। पूर्वोक्तग्रन्थनिचयेन करोति कर्तृकर्मादिव्यपदेशानिति व्युत्पत्त्या कारकशब्दः क्रियापरः सिद्धः। अथास्मिन् पक्षे सप्तम्यन्तस्य "कारके" इत्यस्य स्वरितत्वप्रतिज्ञानात् अपादानादि -संज्ञाविधायकेषु उपस्थित्या अन्वयीत्यध्याहारेण अपाये ध्रुवं क्रियायाम् अन्वितं सत् अपादानं भवतीत्यादिरूपेण व्याख्यायां षण्णां कारकाणां क्रियान्वयित्वेनैव तत्तद्व्यपदेश इति लाभात् तेषां क्रियान्वयित्वनियमः सिद्ध्यति। अत्र द्वितीयं पक्षमव -लम्ब्य कारकाणां क्रियान्वयनियमं प्रतिपादयति - **कारकशब्दो हीत्यादिना। क्रियान्वयिनामेवे**ति॥ अत्रायं विचारः। भाष्योक्तद्वितीयपक्षेण "क्रियान्वयित्वं कारकत्वमि"ति, प्रथमपक्षेण "क्रियाजनकत्वं कारकत्वमि"ति लक्षणद्वयं सिद्ध्यति वा, क्रियाजनकत्वेन क्रियाकारकयोः जन्यजनकभावे निर्धारिते जन्यस्य जनका-काङ्क्षया, जनकस्य जन्याकाङ्क्षया च परस्परमन्वयः स्वयमेव सिद्ध्यतीति क्रिया-जनकत्वमेव कारकत्वमिति लक्षणं पक्षद्वयसाधारणं वेति। अत्र द्वितीयपक्षे अन्वयीत्याध्याहृत्य व्याख्याने द्वितीयपक्षेण द्वितीयलक्षणं सिद्ध्यति।

द्वितीयपक्ष एव कौण्डभट्टस्य अभिप्रेत इति **कान्तिः**। उक्तं च - "अनेन "क्रियान्वयित्वं कारकत्वमि"त्युक्तं भवति। वस्तुतः"क्रियाजनकत्वमेव कारकत्वम्" "करोति कर्तृकर्मादिव्यपदेशानि"त्युत्पत्त्यर्थककरोतिना भाष्ये व्युत्पादनादिति सुबर्थनिर्णये वक्ष्यामः" इति। **दर्पणे**ऽपि "अन्ये तु" इत्युपक्रम्य पक्षद्वये प्रथम-पक्षस्यैव युक्तत्वमित्थं प्रतिपादितमित्थम् - "अन्ये तु उत्तरभाष्ये "करोति, क्रियां निर्वर्तयती"ति व्युत्पत्तिप्रदर्शनात् कारकत्वं, अत एव "ब्राह्मणस्य पुत्रं पन्थानं पृच्छति" इत्यादौ ब्राह्मणस्य न कारकत्वं, पुत्रेणान्यथासिद्धत्वात्, अत एव तेषां न क्रियायामन्वयः, क्रियाजनकमिति ज्ञाते का सा क्रियेत्याकाङ्क्षोदयेन क्रियाया अपि जनकाकाङ्क्षया च तत्रैवान्वयस्यौचित्यात्, अत एव "गतिकारकोपपदात् कृत्"

16.4. प्रथमो वतिः -धातुसम्बन्धाधिकारनिष्पन्नम्

प्रथमो वतिः। "तेन तुल्यं क्रिया चेद्वतिः" (पा. 5-1-115) इति विहितः, तत्र यत्तुल्यं सा क्रिया चेदित्युक्तत्वात्।

धातुसम्बन्धाधिकारे। "धातुसम्बन्धे प्रत्ययाः" (पा. 3-4-1) इत्यधिकृत्य तेषां विधानात्।

(पा. 6.2.139) इत्यादौ कारकशब्दस्यापादानपरता सङ्गच्छते, "कारक" इति तु प्रथमार्थे सप्तमीत्याहुः" इति। **काशिकायां** तु पक्षद्वयमपि एकाभिप्रायमेव, उभयत्र "क्रियाजनकत्वरूपमेव कारकत्वमभिप्रेतम्" इति निरूपितमित्थम् - "ध्रुवमपायेऽ -पादानम् " (पा. 1.4.24) इत्यत्र क्रियायामित्यनुवृत्तौ क्रियायां जनकाकाङ्क्षया क्रियायां यदपाये ध्रुवमित्यनेन क्रियाजनकमित्यर्थसम्पत्त्या, जनकस्य जन्या- काङ्क्षया तत्रैवान्वय उचित इति तदन्वयिनामेवापादानसंज्ञेत्यर्थः" इति। इमां काशिकामनुसृत्य क्रियापरकारकशब्दानुवृत्तिपक्षे अन्वयीतिपदाध्याहारः नावश्यकः इत्येव ज्ञायते। सप्तम्यर्थः विषयत्वं तच्च जनकत्वरूपमिति नागेशोऽपि अमुमेवाशयं प्रकाशयति। भाष्योक्तपक्षद्वये अभिप्रायभेदकल्पनापेक्षया उभयोः समन्वय एव युक्त इति काशिकैवात्र युक्तेति विभावयामः। अयमेव कौण्डभट्टस्या- प्याशय इति **भूषण**ग्रन्थपर्यालोचनया ज्ञायते। तत्र हि भाष्योक्तं पक्षद्वयं प्रतिपाद्य पक्षद्वयेऽपि कारकस्य क्रियान्वयनियमः प्रतिपादितः। तदित्थम् - "करोतीति कारकमिति योगाश्रयणात् क्रियानन्वयिनो न कारकत्वम्। अपादानादिसंज्ञा- विधिषु क्रियार्थककारकशब्दानुवृत्त्या क्रियान्वयिनामेव संज्ञेति भाष्यादौ स्पष्टम् " इति। अथ क्रियान्वयित्वं कारकत्वमिति लक्षणं दुष्टमिति नागेशेन मञ्जूषादिषु प्रतिपादितम्। तच्च खण्डितं लक्षणं कौण्डभट्टस्येति न मन्तव्यम्। एतेन कारक- लक्षणे कौण्डभट्टनागेशयोः मतभेदं वदन्ति पूर्वोक्तव्याख्यातृवचनानि परास्तानि।

प्रथमो वतिः॥ अष्टाध्याय्यां वतिप्रत्ययविधायके द्वे सूत्रे "तेन तुल्यं क्रिया चेद्वतिः" (पा. 5.1.115) "तत्र तस्येव" (पा. 5.1.116) इति। तत्राष्टाध्यायीक्रमेण प्रथमः वतिः"तेन तुल्यं क्रिया चेद्वतिः" (पा. 5.1.115) इति विहितः वतिप्रत्ययः। तृतीयासमर्थात् अर्थात् उपमानवाचकात् तृतीयान्तात् तुल्यमित्यर्थे वतिप्रत्ययः उपमेयस्य क्रियारूपत्वे इति सूत्रार्थः। उपमेयस्य क्रियारूपत्वकथनेन तन्निष्ठ- सादृश्यप्रतियोगिनः उपमानस्यापि क्रियारूपत्वमुक्तप्रायम्। समानयोरेवो-

पमानोपमेयभावसम्भवात्। अत्रोदाहरणं "ब्राह्मणवत् अधीते क्षत्रियः" इति। उपमानोपमेययोः क्रियारूपयोः सतोरेव वतिप्रत्ययविधानात् अत्र ब्राह्मणकर्तृकाध्ययनक्षत्रियकर्तृकाध्ययनयोः उपमानोपमेयभावः वक्तव्यः। तथा चात्र ब्राह्मणशब्दः ब्राह्मणं न बोधयति, किन्तु ब्राह्मणगताध्ययनक्रियां बोधयति। "समुदाये प्रवृत्ताः शब्दाः अवयवेऽपि भवन्ती"ति अत्र ब्राह्मणगताध्ययनबोधकः ब्राह्मणशब्द इत्यर्थः "ग्रामो दग्धः", "पटो दग्ध" इतिवत्। ब्राह्मणशब्दबोध्यं तत्कर्तृकाध्ययनमत्रोपमानभूतम्। क्षत्रियकर्तृकाध्ययनमुपमेयभूतम्। सौष्टवादिः साधारणो धर्मः।ततश्च ब्राह्मणकर्तृकाध्ययनसदृशं क्षत्रियकर्तृकं वर्तमानकालिकमध्ययनमिति बोधः।उपमानस्य उपमेये एवान्वयेन, उपमेयस्यात्र क्रियारूपत्वेन, उपमानभूतक्रियावाचकवत्यन्तस्य क्रियान्वये एव साधुत्वमिति स्पष्टमेव। यत्र च वाक्ये क्रियापदं न श्रूयते, यथा - "अरविन्दवत् सुन्दरं मुखम्" इत्यादौ, तत्रापि भवतीत्यादिक्रियापदमध्याहृत्य वत्यन्तार्थस्य क्रियान्वयः वक्तव्यः।अरविन्दभवनसदृशं मुखकर्तृकं भवनमिति शाब्दबोधः।अरविन्दमुखयोः सौन्दर्यधर्मकसादृश्यप्रतीतिस्तु पाश्चात्या व्यञ्जना गम्या। अस्य वतेः क्रियातुलनायामेव प्रयोगात् "ब्राह्मणेन तुल्यमस्य रूपम्" इत्यर्थे ब्राह्मणशब्दात् वतिर्न भवति। अत एव द्रव्यगुणयोः तुलनायाम् अन्यः वतिप्रत्ययः "तत्र तस्यैव" (पा. 5.1.116) इति विहितः। तस्य वतेः षष्ठ्यन्तात् सप्तम्यन्ताच्च विधानात् तृतीयान्तात् वतिः द्रव्यगुणयोः तुलनायाम् असाधुरेव। "तेन तुल्यं क्रिया चेद्वतिः" (पा. 5.1.115) इति सूत्रविहितवतेः क्रिययोरुपमानोपमेयभावे एव प्रवृत्तिरित्यत्र तत्सूत्रस्थं भाष्यमिदं मानम् - "यदि च तृतीयासमर्थमपि क्रिया प्रत्ययार्थोऽपि क्रिया ततस्तुल्यं भवति" इति।"ननु तृतीयासमर्थस्य सत्त्वरूपत्वात् क्रियायाश्च असत्त्वरूपत्वात् कथं क्रिया तृतीयासमर्थमिति चेदुच्यते - सम्प्रति तृतीयासमर्थस्य क्रियारूपार्थवाचकत्वासम्भवात् भूतपूर्वगतिर्विज्ञायते। यस्यार्थस्य क्रियार्थताऽभूत्, सम्प्रति तृतीयादिविभक्तियोगेन क्रियारूपताभावेऽपि असत्त्वभावापन्न एव तृतीयाविभक्त्यन्तवाच्यः स्वीक्रियते, विधानसामर्थ्यात्। "उपमानपदार्थः उपमेयपदार्थश्च क्रियेति यावत्" इति प्रभायाः अपि इदमेव तात्पर्यम्। अत्र प्रायः सर्वाः व्याख्याः एकरूपा एव।

धातुसम्बन्धाधिकार इति। "धातुसम्बन्धे प्रत्ययाः" (पा. 3.4.1) इति सूत्रेण धात्वर्थसम्बन्धे ये प्रत्ययाः विहिताः तेषामपि (क्रियान्वयेनैव) व्यापारार्थकधातु-सम्बन्धेनैव साधुत्वमिति भावः। तथा हि "धातुसम्बन्ध" इत्यत्र "धात्वोः सम्बन्ध" इति विग्रहः। अत्रत्यं धातुपदं धात्वर्थपरम्। तथा च धात्वर्थयोः यः सम्बन्धः प्रत्ययार्थद्वारकः विशेषणविशेष्यभावः, तस्मिन्, कालविशेषे विहितानां कालान्तरेऽपि साधुत्वप्रतिपादनाय सूत्रमिदमारब्धम्। अत्र च धात्वर्थशब्देन धात्वर्थत्वेन प्रसिद्धोऽर्थः गृह्यते, न तु सम्प्रति धातुना प्रतिपाद्यमानः। ततश्च मतुबादिप्रत्यय-बोध्यापि अस्त्यादिक्रिया अत्र धात्वर्थशब्देन गृह्यते। ततश्च "गोमान् आसीत् " इत्यत्र अस्तीति वर्तमानकालिकसत्तायां विहितोऽपि मतुप् "आसीत्" इति प्रधान-तिङन्तानुरोधात् भूतकाले पर्यवस्यति। तथा च अतीतसत्ताकगोमत्कर्तृका अतीता सत्तेति बोधः। एवं "वसन् ददर्शावतरन्तमम्बरात् " (शिशु. 1.1) इति माघकवि-प्रयोगे वर्तमानकाले विहितलडादेशशतृप्रत्ययस्य भूतकाले साधुत्वमनेन सूत्रेण बोध्यते। अतीतवासकर्तृकर्तृकम् अतीतकालिकं दर्शनमिति बोधः। एवं "सोम-याज्यस्य पुत्रो भविते"त्यत्र भूते विहितणिनेः प्रधानीभूतभवनक्रियाकालानुरोधात् भविष्यदर्थकत्वम्। भविष्यत्सोमयागकर्तृरभिन्नपुत्रकर्तृकं भविष्यत्कालिकं भवनमिति बोधः। धातुसम्बन्धे प्रत्ययाश्च अप्रधानक्रियाबोधकधातोरेव भवन्तीति कालविशेषे विहितप्रत्ययानां विषये एवास्य सूत्रस्य प्रवृत्तिरिति तिङ्विषये नास्य सूत्रस्य प्रवृत्तिः। ततश्च तिङन्तबोध्यकालविशेषमनुसृत्य, धात्वर्थसम्बन्धबोधकप्रत्यय-बोध्यकालस्य परिवर्तनमित्यर्थः। अत एव "वसन् ददर्श" त्यत्र प्रधानतिङन्तबोध्य-भूतकालानुगुण्येन शतृप्रत्ययार्थकालस्यापि भूतरूपेण परिवर्तनम्। न तु शतृ-प्रत्ययार्थवर्तमानतानुगुण्येन लिडर्थकालपरिवर्तनम्। **काशिकायामस्य** "याहि याहीति याति" इति उदाहरणं दत्तम्। अत्र हि "क्रियासमभिव्याहारे लोट् लोटो हिस्वौ वा च तध्वमोः" (पा. 3.4.2) इति सूत्रेण क्रियासमभिहारार्थे लोट् विहितः। "क्रियासमभिहारे द्वे वाच्ये" इति लोडन्तस्य द्वित्वम्। तथा च याहि याहीत्यस्य पुनः पुनः यानमित्यर्थः। तस्य च तिङन्तबोध्ययानक्रियया सह सामान्यविशेष-भावेन अन्वयः। तथा च वर्तमानकालिकम् अन्यकर्तृकं पुनः पुनः यानमिति बोधः। धातुसम्बन्धाधिकारपदेन "धातुसम्बन्धे प्रत्ययाः" (पा. 3.4.1) इति सूत्राद-नन्तराणि सूत्राणि परामृश्यन्ते इति कृत्वा तथा उदाहृतम्। **बृहद्भूषणे** तु "भोक्तुं

पचति" इत्युदाहृतम्। "तुमुण्ण्वुलौ क्रियायां क्रियार्थायाम्" (पा. 3.3.10) इति तुमुन् धातुसम्बन्धाधिकारे, अर्थात् तृतीयाध्यायस्य चतुर्थपादे नास्ति। अतः कथमेतदुदाहृतमिति आशङ्क्य **काशिकायामेव** तदित्थं समाहितम् -"तत्र यद्यपि तुमुण्ण्वुलाविति विहितस्तुमुन् न धातुसम्बन्धे इत्यधिकारे विहितः, तथापि क्रियावाचिन्युपपदे एव विहितत्वात् क्रियासम्बन्धनिमित्तकत्वमक्षतमेवेति उदाहरणसङ्गतिः" इति। तथा च तृतीयाध्यायचतुर्थपादीयधातुसम्बन्धार्थकप्रत्यया एवात्र धातुसम्बन्धाधिकारनिष्पन्नमिति पदेन न विवक्षिताः, किन्तु धातुसम्बन्धे विहिताः अन्ये च प्रत्ययाः अत्र विवक्षिताः इति भावः। अथवा तुमुनः साक्षाद्धातुसम्बन्धाधिकारेऽविधानेऽपि, तदर्थकानां प्रत्ययानां "से" इत्यादीनामत्र विधानात् तुमुनः अपि तदधिकारसम्बन्धित्वमिति। एवं कथञ्चित् तुमुन्विषये गतिकल्पनायामपि शतृशानचोः तदधिकारान्तर्गतत्वमुपपादयितुमशक्यम्। वस्तुतस्तु "धातुसम्बन्धे प्रत्ययाः"(पा. 3.4.1) इति नाधिकारसूत्रम्। उत्तरत्र तस्यानुवृत्तिरपि नास्ति। किञ्चास्य सूत्रस्य "गोमान् आसीत् ", "अग्निष्टोमयाज्यस्य पुत्रो जनिता", "अग्निष्टोमयाज्यस्य पुत्रो भविता", "भावि कृत्यमासीत्" इत्येवोदाहरणानि भाष्ये प्रदत्तानि। अत्र सर्वत्र प्रधानक्रियाकालमनुसृत्य तत्सम्बद्धाप्रधानक्रियाकालस्य परिवर्तनमिति, तादृशकालबोधकत्वमेव तत्र तत्तत् प्रत्ययस्येति बोधयितुं सूत्रमिद -मारब्धमिति व्याख्यातम्। अन्ते च भाष्ये इदं सूत्रमेव प्रत्याख्यातम्। तथा च "अग्निष्टोमयाजीति व्यवह्रियमाणः अस्य पुत्रो भविता" इति "अग्निष्टोमयाज्यस्य पुत्रो भविता" इति वाक्यार्थः। अत्र "अग्निष्टोमयाजी"ति पदं वाक्यैकदेशन्यायेन, "अग्निष्टोमयाजीति व्यवह्रियमाणः" इति वाक्यांशार्थबोधकः।उक्तं च भाष्ये- "एवं तर्हि वाक्यमेवैतदेवं जातीयकं प्रयुज्यते।अग्निष्टोमयाजीत्येतत्तस्मिन् भविता। कस्मिन्? योऽस्य पुत्रो भविता। कदा? यदानेन अग्निष्टोमेनेष्टं भवति।" इति। किञ्चैवं सूत्रेण विहितकालातिरिक्ते काले प्रत्ययविधाने "भावि कृत्यमासीत् " इति प्रयोगः एव अनुपपन्नः स्यात्। यतः अनेन सूत्रेण भावीत्यस्यैव भूतकालबोधकत्वात् अतीतकृत्यकर्तृकातीतसत्तेति बोधः वर्णनीय इति "भावी"ति शब्देनैव अतीतत्वस्य बोधात् , असधातोः लङ् न स्यात्। उक्तं च कैयटेन -"भाविकृत्यमासीदित्यत्र भाविशब्दस्य भूतकालत्वे भाव्यासीच्छब्दयोः पर्यायत्वात् युगपत् प्रयोगो न स्यात् " इति। अतोऽपि सूत्रमिदमनावश्यकम् । एवञ्चात्र "धातुसम्बन्धे

16.5 असमस्तनञ्

असमस्तनञ्। समासायोग्यः प्रसज्यप्रतिषेधीयो नञित्यर्थः, उत्तरपदार्थान्वयेऽपि समासविकल्पेन पक्षेऽसमस्तत्वाद् यथाश्रुतग्रहणायोगात्।

न चासमस्तनञः क्रियान्वये मानाभावः, न त्वं पचसि, न युवां पचथः, चैत्रो न पचति, घटो न जायते इत्यादौ क्रियाया एव निषेधप्रतीतेः। अत एव विद्यमानेऽपि घटे तादृशप्रयोगः।

तथा च "घटो नास्ति" इत्यत्राप्यस्तित्वाभाव एव बोध्यते। नहि "घटो न जायते, नास्ती"त्यनयोर्धात्वर्थभेदमन्तरेणास्ति विशेषः। तथाच "भूतले न घटः" इत्यत्राप्यस्तीत्यध्याहार्य्यम् , प्रकारतासम्बन्धेन नञर्थविशेष्यकबोधे धातुजन्य - भावनोपस्थितेर्हेतुत्वस्य क्लृप्तत्वात्। शेषं नञर्थनिर्णये (निरूपणे) वक्ष्यते ॥ 16 ॥

प्रत्ययाः" (पा. 3.4.1) इत्यधिकृत्य तेषां विधानात् " इति मूलस्य "धातोः" (पा 3-1-9) इत्यादिवत् अस्य सूत्रस्य अधिकारसूत्रत्वे समन्वयः अशक्य एव। कारिकास्थधातुसम्बन्धाधिकारनिष्पन्नशब्दस्यापि धातुसम्बन्धं निमित्तीकृत्य यैः प्रत्ययाः विहिताः, तादृशविधिनिष्पन्नमिति व्याख्या करणीया। तथासति शतृ, शानच्, तुमुन्, ण्वुल्, क्त्वा, णमुल् इत्यादयः धात्वर्थसम्बन्धमाश्रित्य विहिताः सर्वे सङ्गृहीताः भविष्यन्ति। एतेषां समेषां साक्षात्क्रियान्वयोऽपि क्लृप्त एव। तथा च अस्य सूत्रस्य परिभाषासूत्रतुल्यतैवेति "इत्यधिकृत्य" इति शब्देन सूचयति कौण्डभट्टः इति मन्तव्यम्। "भोक्तुं पचती"त्युदाहरणेनापि कौण्डभट्टस्य अयमेव आशय इति स्पष्टं ज्ञायते।

प्रसज्यप्रतिषेधरूपस्य नञः क्रियान्वये एव साधुत्वमिति निरूपयति-**असमस्तनञ्** इति। अत्र "असमस्त"शब्दस्य समासाघटक इति व्याख्यायाम् "अब्राह्मण" इत्यादिषु समासस्य वैकल्पिकत्वात् "न ब्राह्मण" इति वाक्येऽपि नञःउत्तरपदेन अन्वयो न स्यात् , अतः असमस्तशब्दं अन्यथैव व्याख्याति - **समासायोग्य** इति। अविद्यमानं समस्तं - समासः यस्येति, समस्तशब्दस्य समासयोग्ये लक्षणां स्वीकृत्य न समस्तं - समासयोग्यम् इति वा विग्रहः वक्तव्यः। "न ब्राह्मण" इत्यत्र नञः समस्तत्वाभावेऽपि समासयोग्यत्वात् नतत्रायं नियमः। अत्र समास-योग्यता च समर्थसमासयोग्यतैव विवक्षिता, अतः असूर्यपश्येत्यादिषु समस्त-क्रियान्वयेऽपि न क्षतिः। एतदेव स्पष्टं प्रतिपादयति - **प्रसज्यप्रतिषेधीय** इति।

प्रसज्य - आपाद्य, प्रतिषेधः - निषेधः प्रसज्यप्रतिषेध इति सुप्सुपेति समासः। "प्रसज्य क्रियागुणौ ततः पश्चान्निवृत्तिं करोति" इति "नञ्"(पा.2-2-6)सूत्रोक्त-भाष्यात्, तादृशनिषेधार्थकः शब्दः (नञ्) अपि प्रसज्यप्रतिषेधशब्देनोच्यते। प्रसज्यप्रतिषेधमर्हतीति विग्रहे प्रसज्यप्रतिषेधशब्दात् "तदर्हती"(पा.5-1-63)ति छप्रत्यये निष्पन्नः प्रसज्यप्रतिषेधीयशब्दोऽपि तादृशनञमेव बोधयति। तथा च प्रसज्यप्रतिषेधप्रसज्यप्रतिषेधीयशब्दौ पर्यायौ। "प्रसज्यप्रतिषेधस्तु क्रियया सह, यत्र नञ्" इत्युक्तत्वात्। तिङन्तोपस्थाप्यक्रियान्वयी एव समासायोग्यः नञ्, तिङन्तेन समासविधानाभावात्। "उपपदमतिङ्" (पा. 2.2.19) इति तिङन्तेन समासनिषेधाच्च। अत्र **दर्पणे**ऽपि प्रसज्येति प्रतीकमुपादाय - "प्रतिषेधशब्दः कर्म-घञन्तः बाहुलकात् , प्रसज्य - आपाद्य, प्रतिषेधः - प्रतिषेधविषयः - प्रतियोगी यस्य, तादृशाभावोऽर्थो यस्य इति व्युत्पत्त्या अभावार्थक इत्यर्थ" इति "प्रसज्य-प्रतिषेधीय"शब्दःव्याख्यातः।अनया व्याख्यया"तस्येदम्"(पा. 4.3.120) इत्यर्थे छप्रत्यय इति ज्ञायते। परन्तु "वृद्धाच्छः" (पा. 4.2.114) इत्यस्य तु अत्र प्रवृत्तिर्न भवति, प्रसज्यप्रतिषेधशब्दस्य वृद्धत्वाभावात्। अत एव **काशिकायां** "तदर्हती" (पा.5.1.63)ति छप्रत्यय इत्युक्तम्। किञ्च प्रतिषेधशब्दे बाहुलकात् कर्मघञन्तत्वा-श्रयणमप्यनावश्यकम्। भावघञन्तत्वेनापि निर्वाहस्य पूर्वमेवोपपादितत्वात्। अतोऽत्र दर्पणव्याख्या उपेक्ष्या। असमस्तनञ् शब्दस्य समासयोग्यः नञ् इत्यर्थ-कल्पनायां प्रयोजनं प्रदर्शयति - **उत्तरपदार्थान्वयेऽपी**ति॥ समासविकल्पपक्षे "उत्तरपदार्थान्वयेऽपि असमस्तत्वात् " इति अस्य वाक्यस्य अन्वयक्रमः। तथा च "न ब्राह्मण" इति वाक्ये समासाभावपक्षे असमस्तस्य नञः उत्तरपदार्थेन समभि-व्याहृतपदार्थेन वा अन्वयात् क्रियान्वयाभावात् **यथाश्रुतस्य** - असमस्तशब्दस्य समस्तभिन्नार्थस्य, **ग्रहणायोगात्** - स्वीकारायोगात् , तथा स्वीकारे व्यभिचारादि-त्यर्थः। तथा च व्यभिचारवारणाय असमस्तनञित्यस्य समासायोग्यः इत्येवार्थः विवक्षणीय इति भावः।

ननु समासायोग्यस्य नञः क्रिययैवान्वय इत्ययुक्तं, "भूतले घटो नास्ति" इत्यत्र घटाभावकर्तृकास्तिक्रियैव प्रतीयते, न तु घटकर्तृकसत्ताभावः,तथा "भूतले न घट" इत्यत्रापि भूतलाधिकरणकः घटाभाव इत्येव बोधः अनुभूयते। न च भूतला-धिकरणकघटकर्तृकसत्ताया एव अभावो नञा बोध्यत इति वाच्यम्। अनुभव-

विरोधात्। यत्र भूतले वर्तमानकालावच्छेदेन घटसम्बन्धाभावः तत्र भूतलाधिकरणकवर्तमानकालिकसत्तायाः अप्रसिद्ध्या तादृशसत्तावबोधनासम्भवाच्च। द्वितीये क्रियाऽभावस्यैवाभावात् इत्याशङ्क्य समाधत्ते - **न चासमस्तनञः** इत्यादि। **न त्वमिति**॥ नञर्थस्य नामार्थे अन्वयस्वीकारे, "न त्वं पचसि" इत्यत्र युष्मदर्थस्य प्रतियोगितया नञर्थाभावे, अभावस्य च कर्तृत्वेन पाकक्रियायामन्वये च "त्वद्भिन्न-कर्तृकपाकक्रिये"ति बोधात् लडर्थस्य युष्मदर्थसामानाधिकरण्याभावात् मध्यम-पुरुषो न स्यात् "युष्मद्युपपदे सामानाधिकरणे स्थानिन्यपि मध्यमः" (पा.1.4.105) इति युष्मदर्थसामानाधिकरण्ये एव मध्यमपुरुषविधानात्। किञ्चात्र "शेषे प्रथमः" (पा. 1.4.108) इति प्रथमपुरुषः स्यात्। तथा "नाहं पचामि" इत्यत्र नञर्थाभावे अस्मच्छब्दार्थस्य प्रतियोगित्वेनान्वयं स्वीकृत्य मद्भिन्नकर्तृकपाक-क्रियेति बोधः यदि स्वीक्रियते तर्हि लटः अस्मत्सामानाधिकरण्याभावात् उत्तम-पुरुषः न स्यात् , सर्वदा एतादृशप्रयोगेषु प्रथमपुरुषः एव स्यात्। नञर्थाभावे प्रतियोगित्वेन क्रियायाः विशेषणत्वे तु नञर्थविशेषणीभूतक्रियायां कर्तृत्वेन युष्मदस्मदर्थयोः अन्वयात् तयोः लडर्थसामानाधिकरण्यमाश्रित्य मध्यमोत्तम-पुरुषव्यवस्था सिद्ध्यति।तथा च "न त्वं पचसि" इत्यत्र "युष्मदर्थाभिन्नलडर्थकर्तृ-निष्ठवर्तमानकालिकपचिक्रियायाः अभावः" इति बोधः। तथाचैतादृशः बोध एव प्रसज्यप्रतिषेधनञर्थस्य क्रियान्वये मानमित्यर्थः। तस्य प्रतियोगितया युष्मदाद्य-र्थान्वये तु युष्मदादौ लकारवाच्यकर्तृवाचकत्वरूपसामानाधिकरण्याभावात् मध्यमपुरुषाद्यनुपपत्तिः, युष्मदाद्यर्थप्रतियोगिकाभावस्यैकत्वेन द्विवचनाद्यनुप-पत्तिश्च। तदेव सूचयति - "**न युवां पचथ**" इति। त्वदभाव इत्यर्थे द्वित्वाद्यभावात् द्विवचनाद्यसिद्धिः पुरुषव्यवस्थासिद्ध्या सह समुचीयते। एवं मध्यमोत्तमपुरुष-व्यवस्थानुपपत्तिं प्रदर्श्य, वस्तुतः प्रथमपुरुषोऽपि नोपपद्यत इति प्रदर्शयति -**चैत्रो न पचतीति**॥ अत्र चैत्रप्रतियोगिकाभावस्य कर्तृत्वस्वीकारे, पाके तत्कर्तृत्वबाधात् प्रथमपुरुषोऽपि न स्यात्। अथ नैयायिकरीत्या तिङर्थकृतेः प्रतियोगितया अभावेऽ-न्वये, अभावस्य च प्रथमान्तार्थे चैत्रादौ अन्वये च "पाकानुकूलकृत्यभाववान् चैत्र" इति बोधे कृतेः प्रथमान्तार्थचैत्रादिभिः साक्षादनन्वयात् पुरुषव्यवस्थापक-निमित्ताभावेन कोऽपि पुरुषः न स्यात्। अत्र **दर्पणे** - "एवं चैत्रप्रतियोगिकाभाव-कर्तृकत्वोपगमे पाके तत्कर्तृकत्वबाधः, पाकानुकूलकृत्यभावार्थकत्वे त्वन्मते

पुरुषव्यवस्थापकाभावेन कदाचिन्मध्यमोत्तमयोरापत्तिश्चेति बोधयितुं चैत्रो न पचतीत्युक्तम्।" इति। अस्यायं भावः - नैयायिकमते कृतेः अन्वय एव पुरुष-व्यवस्थाप्रयोजकः। कृतेः विशेषणतया युष्मदर्थेऽन्वये मध्यमपुरुषः, अस्मदर्थेऽ-न्वये उत्तमः, अन्येन तादृशेन सत्त्ववाचकेनान्वये प्रथमपुरुष इति व्यवस्था। अत्र तु कृतेः नञर्थाभावेऽन्वयात् , प्रथमान्ते अन्वयाभावात् पुरुषव्यवस्थापकाभावात् कोऽपि पुरुषः न स्यात् , अथवा पदत्वसम्पादनार्थं यः कोऽपि पुरुषः स्यादिति। अत्र च तात्पर्यं पुरुषव्यवस्थाप्रयोजकाभावात् पुरुषव्यवस्था न स्यादिति बोधने एव, न तु अन्यपुरुषापत्तिप्रदर्शने। अथात्र **प्रभायां** - "चैत्र इति। अभावे एकत्व-विशिष्टचैत्रादेः विशेषणत्वे अभावस्य एकत्वात् एकवचनस्य सिद्धावपि, प्रति-योगिनो द्वित्वादिविशिष्टत्वेऽपि एकवचनमेव स्यात् " इत्युक्तम्। अस्य अयमाशयः-यथा "चैत्रो न पचती"त्यत्रैकवचनं, तथा "चैत्रौ न पचतः", "चैत्रा न पचन्ती"-त्यादौ द्विवचनबहुवचनानुपपत्तिः,एकवचनापत्तिश्च, अभावस्य एकत्वात् इति। वस्तुतः पुरुषव्यवस्थायाः एवाभावेन पुरुषस्यैव कस्यापि अनुपपत्तौ, कस्यापि वचनस्य अनुपपत्तिरेव। वचनस्य तत्तत्पुरुषभेदरूपत्वात्। अथेदानीं नञर्थाभावस्य क्रियान्वये प्रमाणभूतम् असाधारणं प्रयोगमुपन्यस्यति - **घटो न जायत** इति। अनेन वाक्येन घटाभावकर्तृका उत्पत्तिः बोध्यते वा, घटकर्तृकोत्पत्त्यभावो वा? न प्रथमः कल्पः। अत्यन्ताभावस्य नित्यत्वेन तस्मिन् उत्पत्तिकर्तृकत्वस्य बाधात्। अतः द्वितीयकल्प एव आश्रयणीयः नैयायिकेनापि। ततश्चात्र यथा क्रियानिषेधस्यैव प्रतीतिः, तथा अन्येष्वऽपि प्रयोगेषु क्रियानिषेधस्यैव प्रतीतिः, पुरुषवचनव्यवस्था-सिद्धेरेव तत्प्रतीतिनियामकत्वात्। तदेव स्पष्टयति - **क्रियाया एव निषेधप्रतीतेः** इति।

ननु "घटो न जायते" इत्यत्रापि अभावस्यैव उत्पत्तिकर्तृकत्वमङ्गीकुर्मः। न च नित्येऽभावे तदनुपपत्तिरिति वाच्यम् । उत्पादविनाशयोगिन एवाभावस्य अङ्गी-कारात् इति चेन्न। तस्मिन्नपि पक्षे "घटो न जायते" इत्यस्य "घटाभावो जायते" इत्यर्थः वक्तुं न शक्यः। विद्यमानेऽपि घटे "घटो न जायते" इति प्रयोगात्। घटे वर्तमाने घटाभावस्योत्पत्तेः वक्तुमशक्यत्वात्। तदेवाह - **अत एव** इति॥ **अत एव** - क्रियाप्रतियोगिकाभावबोधनादेव। **विद्यमाने घटे तादृशप्रयोगः** इति। घटवत्ता-निश्चये घटाभावबोधस्यावश्यकत्वात्। घटस्य विद्यमानतादशायां प्रयोगकालीन-

जननाभावस्य घटे सत्त्वात् घटकर्तृकोत्पत्त्यनुकूलव्यापाराभावः बोधयितुं शक्यः, घटाभावे तु तादृशकर्तृत्वाभावात् उक्तप्रयोगानुपपत्तिरिति भावः। तथा चात्यन्ताभावस्य नित्यत्वे वा अनित्यत्वे वा पक्षद्वयेऽपि "घटो न जायते" इति वाक्यस्य तात्पर्यं घटकर्तृकोत्पत्त्यभावे एव। नञः क्रियान्वयं विना तादृशबोधस्यासम्भवात् अवश्यमेव नञः क्रियान्वयः अभ्युपगन्तव्यः। अत्र **काशिका** -"विद्यमानेऽपि घटे -घटस्य विद्यमानतादशायामपि। घटस्य विद्यमानत्वे घटाभावबोधनस्याशक्ततया तत्र क्रियानिषेधोऽवश्यमभ्युपगन्तव्यः इति भावः। यद्यप्यविद्यमानतादशायामपि घटात्यन्ताभावे नित्ये जननाश्रयत्वस्य बाधात् घटाभावबोधनं न सम्भवति, अतस्तत्रापि क्रियाया एव निषेधबोधोऽभ्युपगन्तव्यः, एवं च विद्यमानत्वोक्तिः निरर्थिका, तथापि उत्पादविनाशयोग्यभावाभ्युपगमपक्षे घटाभावे जननाश्रयत्वबोधः सम्भवतीति तस्य विद्यमानत्वानुसरणम्।" इति। अत्र **शाङ्कर्यां** "तादृश प्रयोग इति।"घटो न जायत" इत्येतादृशः प्रयोगः इत्यर्थः।घटावस्थितिदशायां घटे स्वकर्तृकोत्पत्त्यनुकूलव्यापाराभावस्य सत्त्वादिति भावः। असमस्तनञर्थाभावस्य प्रतियोगितया नामार्थान्वये तु घटाभावे घटनिष्ठोत्पत्त्यनुकूलव्यापारविरहात्तादृशप्रयोगो न स्यादित्याशयः।" इति व्याख्यातम्। अत्र "घटाभावे घटनिष्ठोत्पत्त्यनुकूलव्यापारविरहात्" इति असङ्गतम्। "घटाभावे उत्पत्त्यनुकूल - व्यापारविरहात् " इत्येव युक्तम्। **तथा चेति**॥ "घटो न जायते" इति प्रयोगबलात् नञः क्रियाप्रतियोगिकाभावबोधकत्वे निश्चिते, घटो नास्तीत्यत्रापि "घटकर्तृकास्तित्वाभाव" इत्येव बोधः स्वीकरणीयः। तत्सूचयति - **अस्तित्वाभाव एवेति**॥ घटकर्तृकसत्ताया एव अभावः, न तु घटाभाव इत्यर्थः। अत्र एवकारेण बोधान्तरस्य व्यावृत्तिं बोधयति। ननु "घटो न जायते" इत्यत्र घटाभावकर्तृकोत्पत्तेः वक्तुमशक्यत्वात् तत्र तथा बोधोऽस्तु, "घटो नास्ती"त्यत्र तु घटाभावस्यापि सत्ताकर्तृत्वस्य उपपादयितुं शक्यत्वात् अत्र घटाभावकर्तृकसत्तेत्येव बोधोऽस्तु इति चेदाह - **न हीति**॥ "जायते", "अस्ति" इत्यनयोः धात्वर्थभेदं विना भेदाभावात् उभयोः एकविधबोधाभ्युपगम एव युक्तः। सर्वत्र एकविधबोधाभ्युपगमे कार्यकारणभावकल्पनालाघवमपीति अग्रे वक्ष्यति।

ननु सर्वत्र एकविधः बोधः भवितुमर्हति चेत् भवदुक्तं सम्यगेव। परन्तु यदधिकरणकघटादिकर्तृकवर्तमानसत्ता अप्रसिद्धा, तत्र तु बोधान्तरं ग्राह्यमेव, तथा

"घटो नास्ती"त्यत्रापि भवतु इति चेन्न। तत्रापि आरोपादिरूपा सत्ता अस्त्येवेति न तत्र नियमस्य व्यभिचारः। नन्वेवमपि क्रियापदरहितवाक्ये "घटो न पट" इत्यादौ नञा क्रियाप्रतियोगिकाभावस्य बोधयितुमशक्यत्वात् नियमभङ्ग एवेति चेन्न। तत्रापि अस्तीत्यध्याहारात्। तदेव उपपादयति - **तथा चेति। अध्याहार्यम्** इति॥ "अस्तिर्भवन्तीपरोऽप्रयुज्यमानोऽप्यस्ती"ति"अनभिहित"(पा. 2.3.1) सूत्रभाष्यात् क्रियान्ताराभावे अस्तिक्रियाध्याहारेण वाक्यपरिसमाप्तेः साधनीयत्वात्। तथा च "भूतले न घटः" इत्यत्रापि अध्याहृतास्तिक्रियाप्रतियोगिकाभाव एव नञा बोध्यत इति न कुत्रापि नियमभङ्गः। एवं स्वीकारेण यल्लाघवं कार्यकारणभावे सिद्धं तदेव उपपादयति - **प्रकारतासम्बन्धेने**ति॥ नञर्थाभावनिष्ठविशेष्यतानिरूपितप्रकारता-सम्बन्धेन शाब्दबुद्धित्वावच्छिन्नं प्रति भावनानिष्ठविषयतासम्बन्धेन धातुजन्योपस्थितिर्हेतुरिति कार्यकारणभावः "घटो न जायते", "न त्वं पचसि" इत्याद्यनुरोधेन क्लृप्तः। अतः "भूतले न घटः" इत्यादावपि अस्तीत्यध्याहारेण एकविध एव कार्यकारणभावः सर्वत्रेति लाघवम्। अन्यथा तत्तत्प्रयोगानुसारं अनेकविधकार्यकारणभावः कल्पनीय इति गौरवं स्पष्टम्। अत्र कार्यकारणभावे प्रकारता अभावत्वावच्छिन्नविषयतानिरूपिता ग्राह्या, अतः "घटो नास्ती"ति वाक्यजन्यबोधे प्रकारतायाः घटादौ वर्तमानत्वेऽपि न व्यभिचार इति **काशिका**। **दर्पणे** नञर्थाभावनिष्ठविशेष्यतानिरूपितप्रकारतासम्बन्धेन शाब्दबुद्धित्वावच्छिन्नं प्रति विशेष्यतासम्बन्धेन धातुजन्योपस्थितिः कारणमिति कार्यकारणभावः प्रतिपादितः। **तत्त्वदर्शिन्या**मपि अयमेवानूदितः। **भूषणे** तु पूर्वोक्तः नञर्थाभावनिष्ठविशेष्यतानिरूपितप्रकारतासम्बन्धेन शाब्दबुद्धित्वावच्छिन्नं प्रति भावनानिष्ठविषयतासम्बन्धेन धातुजन्योपस्थितिः कारणमिति कार्यकारणभावः एव वर्णितः।

शाङ्कर्यामपि "नञर्थाभावनिष्ठविशेष्यतानिरूपितप्रकारतासम्बन्धेन शाब्दबुद्धित्वावच्छिन्नं प्रति धातुजन्योपस्थितिः कारणमित्येवं कार्यकारणभावस्य क्लृप्तत्वादित्यर्थः। अत्र यत्किञ्चिन्निष्ठप्रकारतानिरूपितनञर्थाभावनिष्ठविशेष्यताकशाब्दबोधजननं कार्यं, तादृशाभावनिष्ठविशेष्यतानिरूपितप्रकारतासम्बन्धावच्छिन्नधातुजन्यव्यापाररूपभावनोपस्थितिः कारणमिति बोध्यम्" इति भूषणोक्तमेवोक्तम्। **क्लृप्तत्वादि**ति॥ "एतादृशकार्यकारणभावानङ्गीकारे उक्तनियमानिर्वाह इति तस्या-

वश्यकत्वात्" इति **काशिका**। **शाङ्करी** काशिकानुसारिणी। वस्तुतस्तु "घटो न जायते", "न त्वं पचसि", "नाहं पचामि" इत्यादिप्रयोगसाधनाय सर्वैरपि उक्तपूर्वः कार्यकारणभावः अवश्यमाश्रयणीय इति अयं सर्वसम्मतत्वेन क्लृप्तः। अतः **अनेनैव** - सर्वमतसिद्धेन कार्यकारणभावेनैव सर्वत्र बोधोपपत्तौ तस्य त्यागः नोचित इति भावः। **शेषमिति**॥ **दर्पणे** अस्य व्याख्या इत्थमस्ति - "ननु "अत्वं पचसि" इत्यादाविव अत्रापि नञः पर्युदासद्योतकत्वाभ्युपगमात् युष्मल्लक्ष्यार्थे त्वद्भिन्ने सामानाधिकरण्याबाधात् न पुरुषव्यवस्थानुपपत्तिः, सङ्ख्यायास्तत्राबाधात् न द्विवचनानुपपत्तिरपीति पूर्वोक्तः कार्यकारणभाव एव अप्रामाणिक इति तदनुरोधेन "भूतले न घटः" इत्यादौ अस्त्यध्याहारः कल्पयितुं न शक्यः। "घटो न जायते" इत्यादौ प्रसज्यप्रतिषेधार्थकनञ्स्थले तु यथा नानुपपत्तिः तथा वक्ष्यते। तथा च "भूतले न घटः" इत्यादौ भूतलवृत्तिः घटाभावः इति बोधे न बाधकमिति चेदाह - शेषमिति। "न त्वं पचसि", "अत्वं पचसि" इत्यनयोः सर्वदा समानार्थकत्वं, तर्हि पर्युदासमाश्रित्य त्वद्भिन्ने लक्षणामाश्रित्य, कथञ्चित् पुरुषव्यवस्था उपपादयितुं शक्यते। परन्तु न तथा। "न त्वं पचसि" इति वाक्यस्य सर्वत्र त्वद्भिन्नकर्तृक-पाकाभावबोधकत्वाभावात्। यदा युष्मदर्थभिन्नकर्तृको न पाकः, किन्तु त्वत्कर्तृक-पाकाभाव एव सन्दर्भः तदा "न त्वं पचसी"ति प्रयोगः दृश्यते। अतः एतत्प्रयोगोप-पत्त्यर्थं अत्र प्रसज्यप्रतिषेधार्थकत्वमेवाङ्गीकरणीयम् इति पूर्वोक्तकार्यकारण-भावस्यावश्यकतेति शेषपदार्थः, नैयायिकमतमपि नञर्थनिर्णये एव व्यक्ती-भविष्यति इत्याह - नञर्थनिर्णये वक्ष्यत इति।" **प्रभायां** - "अत्र नैयायिकाः" इत्यारभ्य इत्थं व्याख्यातम् - "भूतले न घटः" इत्यस्य भूतलनिरूपिताधेयत्वा-भाववान् घटः इति, "अहं नास्मि", "त्वं नासि" इत्यादौ त्वदभावे, मदभावे च युष्मदस्मदोर्लक्षणा। ततश्च युष्मदस्मदर्थस्य तिङा सामानाधिकरण्यात् पुरुष-व्यवस्था सिध्यति। "युवां न स्थः", "घटौ न स्तः" इत्यादौ प्रतियोगिनः द्वित्वादिविशिष्टत्वे सत्तानिरूपिततिङर्थाश्रयत्वप्रतियोगिकाभावस्य द्वित्वविशिष्ट-युष्मदाद्यर्थेऽन्वयस्वीकारेण "सत्तानिरूपिताश्रयाभाववन्तौ युवाम्", "सत्ता-निरूपिताश्रयाभाववन्तौ घटौ" इति बोधात् द्विवचनाद्युपपत्तिः। "घटो न जायते" इत्यत्रापि तिङर्थाश्रयत्वप्रतियोगिकाभावस्यैव नञर्थत्वेन "उत्पत्त्यनुकूलव्यापारा–

17.1. भावलक्षणषष्ठीसप्तम्यौ

"यस्य च भावेन भावलक्षणम्" (पा. 2-3-37) इत्यत्र भावनार्थकभावशब्देन तद्योगे साधुत्वान्वाख्यानलाभात्।

श्रयत्वाभाववान् घटः" इति बोधः। "वायौ रूपं नास्ति" इत्यत्र वायुनिरूपिताधेयताभाववद्रूपमिति बोधः। इति वदतः नैयायिकान् प्रत्याह - शेषमिति। यदा कश्चिदपि पाकं न करोति तदापि "न त्वं पचसि", "नाहं पचामि" इत्यादि प्रयोगाः इष्यन्ते। ते न सिद्ध्येयुः। युष्मदादिभिन्नकर्तृकपाकस्यैवाभावात्। न च देशान्तरे युष्मदाद्यर्थभिन्नकर्तृकपाकः सम्भवतीति वाच्यम्। एवमपि इह नगरे पाकसामान्या-भावसत्त्वे "इह नगरे त्वं न पचसि" इत्यादिप्रयोगानामसिद्धिः। एवं "सामान्यादिषु समवायसम्बन्धेन सत्ता नास्ती"ति प्रयोगानापत्तिः, समवायसम्बन्धेन सामान्यादिषु कस्यापि पदार्थस्यावृत्तितया समवायसम्बन्धावच्छिन्नसामान्यादिवृत्तित्वस्य अप्रसिद्धेः, सामान्यादिवृत्तित्वं समवायसम्बन्धावच्छिन्नत्वाभाववत् इति बोधस्य वक्तुमशक्यत्वादिति। **काशिकायां** तु - शेषम् - आरोपितत्वं नञ्द्योत्यमित्यादि इत्येव व्याख्यातम्। **शाङ्करी** तु काशिकानुसारिणी एव। **तत्त्वदर्शिन्यां** तु- "शेषमिति। शिष्टमित्यर्थः। सामान्ये नपुंसकमिति नपुंसकत्वम्। वक्ष्यत इति नञर्थनिर्णये "अभावो वा तदर्थोऽस्तु" इत्यादिकारिकाव्याख्याने। तत्र हि- आरोपितत्वं नञ्द्योत्यं न भवति, आरोपबोधस्य अनुभवविरुद्धत्वात्। अस इत्यादौ नञर्थाभावस्य प्रतियोगिनि विशेषणत्वेनान्वयेनापि सर्वनामकार्यं सिद्ध्यति। यदि च नञर्थाभावस्य विशेष्यत्वमेवेष्टं तर्ह्यपि "एतत्तदोः"(पा. 6.1.132)इति सूत्रे अनञ्समासग्रहणात् ज्ञापकात् सर्वनामकार्यं सूपपादम्। अतश्च लोकानुभवसिद्धः अभावः एव नञर्थः। तत्र पर्युदासस्थले समस्ते उत्तरपदार्थे, असमस्ते समभिव्याहृतनामार्थे, प्रसज्यप्रतिषेधे धात्वर्थक्रियायामन्वयः इति कौण्डभट्टाशयः।" इति व्याख्यातम्। वस्तुतः शेषमित्यस्य नञर्थविषये वक्तव्यमवशिष्टमित्यर्थः। स च आरोपितत्वादिरूपः पर्युदासार्थः इति काशिकाव्याख्यैव अत्र युक्ता॥ 16॥

17.1.1. यस्य च भावेन इत्यादि सूत्रार्थविचारः

द्वितीयकारिकायां "यस्य च भावेन","षष्ठी च" इति पदकदम्बाभ्यां तद्घटितसूत्रद्वयं बोध्यते इत्याह - **यस्य च भावेनेत्यादि**॥ "यस्य च भावेन भावलक्षणम्" (पा. 2.3.37) इति सूत्रेण यन्निष्ठभावेन भावः लक्ष्यते, तद्वाचकात् सप्तमी विधीयते।

अत्र सूत्रे भावशब्दः क्रियापरः। द्वितीयः भावशब्दः क्रियान्तरपरः। तथा च यदर्थनिष्ठक्रिया अर्थान्तरनिष्ठक्रियायाः लक्षणं भवति ज्ञापकं भवति, तद्वाचकात् लक्षणक्रियाश्रयवाचकात् - ज्ञापकक्रियाश्रयवाचकात् प्रातिपदिकात् सप्तमी इत्यर्थः। सूत्रे भावलक्षणमित्यस्य भावस्य लक्षणं - ज्ञापनमित्यर्थः। अत्र च भाव-शब्देन प्रमाणान्तरेण ज्ञातायाः क्रियायाः एव ग्रहणम्, तथा च यत्र क्रिया प्रमाणा-न्तरेण ज्ञाता, परन्तु तदधिकरणदेशः कालो वा न ज्ञातः, तस्मिन् सन्दर्भे एव अस्याः सप्तम्याः प्रवृत्तिः। क्रियायाः क्रियान्तरदेशकालपरिच्छेदकत्वं च ज्ञातदेश-कालायाः एव भवितुमर्हति इति यत्सम्बन्धिनी ज्ञातदेशकाला क्रिया यन्निष्ठायाः अज्ञातदेशकालक्रियायाः यत्र ज्ञापिका तत्र सप्तमीति सूत्रार्थः पर्यवस्यति। एवञ्च प्रसिद्धदेशकाला क्रियैव अत्र लक्षणं भवितुमर्हति। यथा - "ब्राह्मणेषु अधीयानेषु गतः देवदत्तः"। ब्राह्मणकृतमध्ययनं निर्ज्ञातकालमिति, तेन अध्ययनेन अज्ञात-कालं देवदत्तस्य गमनं लक्ष्यते। अत्र यद्यप्यध्ययनक्रियायाः एव क्रियान्तर-लक्षकत्वं, अथापि क्रियायाः असत्त्वरूपत्वात्, तद्वाचकधातोरप्रातिपदिकत्वाच्च तदाश्रयबोधकादेव प्रातिपदिकात् सप्तमी अनेन सूत्रेण विधीयते। एतदेव "यस्य च भावेन" इति सूत्रार्धेन सूच्यते। तथा च तादृशक्रिया -वाचकादेव सप्तमीत्यर्थः। तादृशक्रियाश्रयत्वं च कर्तृकर्मणोरेवेति तादृशक्रियाश्रयकर्तृकर्मान्तरवाचकात् प्रातिपदिकात् सप्तमीत्यर्थः। "ब्राह्मणेषु अधीयानेषु" इति कर्तरि उदाहरणम्। अधीयानब्राह्मणनिष्ठज्ञापकतानिरूपितज्ञाप्यतावदतीतकालिकगमनाश्रयः देवदत्त इति बोधः। यद्यपि अत्र शाब्दं लक्षकत्वं ब्राह्मणानामेव अथापि क्रियाविशिष्ट-ब्राह्मणानामेव तदिति "शिखी ध्वस्त" इत्यादिष्विव विशेषणीभूतक्रियायाः तत् पर्यवस्यति। "गोषु दुह्यमानासु गत" इति कर्मणि उदाहरणम्। "दुह्यमानगोनिष्ठ-ज्ञापकतानिरूपितज्ञाप्यतावदतीतकालिकगमनाश्रयः" इति बोधः। अत्र **काशिका**-"गोषु दुह्यमानासु" इत्यत्र गोपदोत्तरसप्तम्याः ज्ञाप्यज्ञापकभावात्मकः सम्बन्धोऽ-र्थः। दुह्यमानानां गवां ज्ञापकत्वं, ज्ञाप्यत्वं च गमनक्रियायां शब्दतः प्रतीयते, पर्यवसानं तु तद्गतदोहनक्रियायां, निर्ज्ञातकालक्रियाया एव अनिर्ज्ञातकालक्रियाया स्वसहचरितकालावच्छिन्नत्वज्ञापकत्वात्।" इति। "भावलक्षणम्" इत्युपादानात् ज्ञापकत्वरूपसप्तम्यर्थस्य क्रियायामन्वयः, अत एव "गोषु दुह्यमानासु गतः" इत्यादौ दोहनक्रियाधारकाले गमनपरिच्छेदकत्वं बुध्यते" इति **दर्पणः**।

"षष्ठी चानादरे" (पा. 2-3-38) इति तदग्रिमसूत्रेऽपि चकाराद्यस्य च भावेनेत्यायातीत्यर्थः।साधुत्वमिति - तत्स्वरूपं तु वक्ष्यते।

"गोषु दुह्यमानासु गतः" इत्यादौ "धातुसम्बन्धे प्रत्ययाः" (पा. 3.4.1) इति भूते लट् इति प्रभा। देशस्योदाहरणं "सति गुणे द्रव्यत्वमस्ति" इति। अत्र गुणकर्तृक-सत्ताया अधिकरणदेशः पृथिव्यादिः ज्ञातः इति, गुणकर्तृकसत्ता सामानाधिकरण्य -सम्बन्धेन द्रव्यत्वकर्तृकसत्तायाः ज्ञापिकेत्यर्थः। अथात्र **तत्त्वदर्शिन्यां** स्वाधार-कालेन क्रियायाः क्रियान्वयलक्षकत्वं त्रिधा भवितुमर्हतीति सोदाहरणमित्थं प्रति-पादितम् - "ज्ञापकक्रियाणां मध्ये काचित् क्रिया स्वाधारकालेन अन्यां क्रियां परिच्छिनत्ति, "गोषु दुह्यमानासु गत" इयादौ। चैत्रः कदा गत इति प्रश्नस्योत्तर-मिदम्। काचित् स्वाधारकालाव्यवहितपूर्वकालेन परिच्छिनत्ति -"गोषु धोक्ष्य-माणासु गतः" इत्यादौ।काचित् स्वाधारकालाव्यवहितोत्तरकालेन "गोषु दुग्धासु" इत्यादौ" इति। अत्रेदं ज्ञातव्यम्। ज्ञाप्यक्रियायाः प्रमाणान्तरेण सिद्धौ सत्यां तदधिकरणकालविशेषज्ञापनसन्दर्भे एव इयं सप्तमी, न तु अपूर्वत्वेन प्रतिपाद्य-मानायां क्रियायाम्। चैत्रः गत इति प्रमाणान्तरेण ज्ञाते सत्येव "कदा गत" इति कालविशेषजिज्ञासायाः उत्पत्तेः।तथा च "राहूपरागे स्नायात् ", "विवाहे नान्दी-मुखं कुर्यात् " इत्यादौ स्नानादेः मानान्तराप्राप्तत्वात् नात्र सप्तमी भावलक्षण-सप्तमी, किन्तु अधिकरणसप्तम्येव। इतोऽपि विशेषजिज्ञासायां शब्दरत्नशेखरादि-ग्रन्थाः, तद्व्याख्यानानि द्रष्टव्यानि। **साधुत्वान्वाख्यानलाभादिति।** अयम्भावः- "यस्य च भावेन भावलक्षणम् " (पा. 2.3.37) इति सूत्रेण क्रियाज्ञापक-क्रियावाचकात् सप्तमी विधीयते। भावलक्षणमित्युपादानात् ज्ञापकत्वरूप-सप्तम्यर्थस्य ज्ञाप्यरूपक्रियायामेवान्वयः। अत "गोषु दुह्यमानाषु गत" इत्यादौ दोहनादिक्रियाधारकालेन गमनादिक्रियापरिच्छेदकत्वं बुध्यते इति **दर्पणः**। अस्याः सप्तम्याः क्रियान्वये लोकानुभवोऽपि प्रमाणमित्यर्थः।

"षष्ठी चानादरे" (पा. 2.3.38) इत्यत्र यस्य च भावेनेति सूत्रं सम्पूर्णमनुवर्तते। अनादरे इति विषयसप्तमी। अनादरे गम्यमाने यन्निष्ठक्रिया क्रियान्तरज्ञापिका, तदाश्रयवाचकात् षष्ठीसप्तम्याविति सूत्रार्थः। "पुत्रे रुदति, पुत्रस्य रुदतः वा पिता प्राव्राजीत् " इत्युदाहरणम्। "पिता कदा प्राव्राजीत् " इति प्रश्नस्योत्तरमिदम्। रोदनध्वनेः परितः वर्तमानैः श्रवणेन तत्कालोऽपि ज्ञात इति रोदनक्रियया

अज्ञातकाला प्रव्रजनक्रिया लक्ष्यत इत्यर्थः। अनेन सह पुत्रे अनादरभावोऽपि लक्ष्यते। अनादरविशिष्टं प्रव्रजनं अत्र धात्वर्थः। प्रव्रजने अनादरवैशिष्ट्यं च सामानाधिकरण्य-स्वोत्तरकालिकत्वसम्बन्धाभ्याम् इति **तत्त्वदर्शिनी**। रोदनकर्त्र-भिन्नपुत्रादिविशिष्टमतीतकालिकं यद्व्रजनं तदाश्रयः पित्रादिरिति बोधः। व्रजने पुत्रादिवैशिष्ट्यं च स्ववृत्तिरोदनकालिकत्व-स्वविषयकानादरसामानाधिकरण्योभय-सम्बन्धेन इति **प्रभा**। रोदनकर्त्रभिन्नपुत्रादिज्ञाप्यम् अनादरविशिष्टं प्रव्रजनमिति बोधः। अत्र रोदनक्रिया स्वाधारकालेन व्रजनक्रियां परिच्छिनत्ति। पुत्रादिनिष्ठ-रोदनक्रियाधिकरणकालपरिच्छिन्ना अनादरविशिष्टा पित्रादिकर्तृका व्रजनक्रियेति पार्ष्टिको बोधः। एवञ्च ज्ञाप्यज्ञापकभावसम्बन्धबोधिकयोः षष्ठीसप्तम्योः (तदर्थ-सम्बन्धद्वारा) क्रियान्वये एव साधुत्वं सूत्रद्वयात्प्रतीयते इति भावः। तदाह **साधुत्वमिति**॥ ननु साधुत्वं च शक्तत्वम्। तच्च एतेषां क्रियान्वयाभावेऽपि अस्त्येव। प्रत्येकं कर्त्रादिरूपबोधकत्वात् इति चेत् आह - **तत्स्वरूपमिति**॥ साधुत्व-स्वरूपमित्यर्थः। **वक्ष्यत** इति॥ शक्तिनिर्णयप्रकरणे शक्तिनिरूपणप्रसङ्गे "असाधु-रनुमानेन" (कारिका 38) इति कारिकाव्याख्यावसरे वक्ष्यत इत्यर्थः। तत्र हि-शक्तत्वमेव साधुत्वमिति नैयायिकमीमांसकानां मतमित्युक्त्वा, शक्तत्वं न साधुत्वम् अपभ्रंशादिभ्यो बोधोदयात् तेषां शक्तत्वेन साधुत्वप्रसङ्गात् , किन्तु व्याकरणैक-व्यङ्ग्या पुण्यजनकतावच्छेदिका जातिः एव साधुत्वमिति उक्तम्। पुण्यजनकता-वच्छेदिकायाः जातेः ज्ञापकं च व्याकरणमिति, यस्मिन्नर्थे यः शब्दः व्याकरणेन व्युत्पादितः सः तस्मिन्नर्थे एव साधुः अन्यत्र असाधुरिति, प्रकृते व्याकरणेन अस्य अष्टकस्य क्रियान्वये एव साधुत्वान्वाख्यानात् क्रियान्वये एव साधुत्वं नान्यथेति सिद्धम्।

नन्वस्तु अस्य अष्टकस्य क्रियान्वये एव साधुत्वम्। क्रियाशब्दस्य धात्वर्थमात्रे प्रसिद्ध्या, फलस्यापि "क्रियते असौ" इति योगाश्रयेण क्रियारूपत्वेन, क्रियारूप-फलान्वयेन अस्य अष्टकस्य साधुत्वं सिध्यतीति, नास्य अष्टकस्य भावनान्वय-नियमः सिद्धः, यमनुसृत्य "पाक" इत्यादौ भावनायाः धातुवाच्यत्वं साध्यते। "क्रियायाः परिनिष्पत्ति"रित्यादौ फलपर्यायतया क्रियाशब्दः वाक्यपदीयादिषु प्रयुक्तोऽपि दृश्यते। भाष्येऽपि क्रियापदस्य फलेऽपि प्रयोगः दृश्यते।

17.2 क्रियाशब्दः व्यापारे रूढः

क्रिययैवेति। अयं भावः - भूवादिसूत्रादिषु प्रायशः क्रियाशब्देन भावनाव्यपदेशात्, तत्र तस्य साङ्केतिकी शक्तिः। फलांशे क्वाचित्कः क्रियत इति यौगिकः प्रयोगः। तथा च संज्ञाशब्दस्यानपेक्ष्यप्रवृत्तत्वेन बलवत्त्वाद् भावनान्वय एव साधुता लभ्यते। अत एव संज्ञाशब्दप्राबल्यात् "रथन्तरमुत्तराग्रन्थपठितऋक्ष्वेव गेयम्, नतु वेदे तदुत्तरपठ्यमानऋक्षु" इति नवमे निर्णीतम्।

अतः फलार्थकत्वेन प्रसिद्धस्य क्रियाशब्दस्यैव "क्रियाभ्यावृत्तिगणने" इत्यादिषु ग्रहणं भवितुमर्हति। साक्षात् परम्परया वा क्रियाफलान्वयेनापि एतेषां साधुत्वस्य उपपत्तौ सत्यां नोक्तरीतिः धातोः व्यापारार्थकत्वसाधिका।इति चेदुच्यते- **अयम्भाव इति॥** सर्वाः व्याख्याः अवतरणिकायामस्यां समाः।

17.2.1. **क्रियाशब्दव्युत्पत्तिविचारः**

क्रियाशब्दः द्विविधः। एकः रूढः, अन्यः यौगिकः। तत्र क्रियते या सा क्रियेति योगमर्यादया सिद्धस्य यौगिकस्य क्रियाशब्दस्य फलमर्थः। अवयवाद्यर्थपर्यालोचनं विनैव लोकप्रसिद्ध्या भावनाबोधकः क्रियाशब्दः रूढः। यद्यपि क्रियावचनो धातुः, भाववचनो धातुः इत्यादिसन्दर्भेषु "भूवादयो धातवः" (पा. 1.3.1) इत्यत्र, "लक्षणहेत्वोः क्रियायाः" (पा. 3.2.226) इत्यादिषु च भावनापर्यायत्वमस्य क्रियाशब्दस्य, "कर्मवत् कर्मणा तुल्यक्रियः" (पा. 3.1.87) इत्यादिषु फलार्थक्रियाशब्दस्य च व्यवहारः शास्त्रे दृश्यते, अथापि भावनापर्यायत्वेनैव शास्त्रे क्रियाशब्दः बाहुल्येन प्रयुक्त इति, लोके शास्त्रान्तरेषु च क्रियाशब्दस्य भावनापर्यायत्वेन व्यवहारः दृश्यत इति च हेतोः भावनायां क्रियाशब्दस्य रूढिशक्तिः सिध्यति। तदेवाह - **तत्र तस्य साङ्केतिकीशक्तिः** इति॥ साङ्केतिकी शक्तिः -सङ्केतेन अभिव्यङ्ग्या रूढिः इत्यर्थः। फलविषये तु स शब्दः शास्त्रे एव क्वचित् "कर्मवत् कर्मणा तुल्यक्रियः" (पा. 3.1.87) इत्यादौ प्रयुक्तः, न वा लोके, न वा शास्त्रान्तरे इति सा च योगमर्यादया सिद्धा शक्तिः यौगिकी भवति। अवयवार्थाद्यनुसन्धाननैरपेक्ष्येण रूढिशक्त्या अर्थः शीघ्रं बोधविषयो भवति, अवयवार्थाद्यनुसन्धानद्वारैव योगशक्त्या बोधात् योगशक्त्या अर्थः विलम्बेन बोधविषयो भवति। बोधे तद्बोध्यार्थस्य शीघ्रोपस्थितिं विलम्बेनोपस्थितिं च अनुलक्ष्य लोकसिद्धोऽयं प्रवादः "रूढिः योगात् बलीयसी"ति। तथा च यत्रैकस्यैव शब्दस्य रूढ्या, योगेन

च अर्थद्वयबोधकत्वं, तत्र असति बाधके रूढ्या सिद्धस्यैव अर्थस्य स्वीकारः युक्तः। तथा च क्रियाशब्दः कारिकायां प्रयुक्तः भावनापर्याय एव।

अत्र **शाङ्करी** - "योगात् प्रकृतिप्रत्ययार्थसम्बन्धात् आगतः यौगिकः। अवयवशक्त्यसहकृतसमुदायशक्तिमात्रेण अर्थप्रतिपादिका रूढिः, समुदायशक्तिनिरपेक्षयावयवशक्त्या अर्थप्रतिपादिका योगशक्तिः। अवयवार्थानुसन्धानापेक्षत्वेन योगार्थस्य विलम्बोपस्थितिकत्वात् बहिरङ्गत्वम् , अवयवशक्त्यनुसन्धानानपेक्षत्वेन रूढ्यर्थस्य शीघ्रोपस्थितिकत्वात् अन्तरङ्गत्वम् इति, अन्तरङ्गबहिरङ्गभावमूलकेन "योगाद्रूढिः बलीयसी"ति न्यायेन क्रियाशब्देन व्यापाररूपभावनाया एव ग्रहणस्यावश्यकत्वेन भावनारूपक्रियान्वये एवाष्टकस्य साधुत्वं न तु फलान्वयेन इति भावः।"

तदेव उपपादयति - **संज्ञाशब्दस्येत्यादिना। अनपेक्ष्य प्रवृत्तत्वेन** – प्रकृतिप्रत्ययशक्त्यनुसन्धानमनपेक्ष्य अर्थबोधकत्वेन,बलवत्त्वात्। शीघ्रतया अर्थोपस्थापकत्वमेव बलवत्त्वे बीजम्। तथा च उक्तस्य अष्टकस्य भावनान्वयेनैव साधुत्वं, नान्यथा। "संख्यायाः क्रियाभ्यावृत्तिगणने" (पा. 5.4.17), "तेन तुल्यं क्रिया चेद्वतिः" (पा. 5.1.115) इत्यादिषु क्रियाशब्दः भावनापर एव, न तु योगशक्त्या फलपरः। एवं क्रियाशब्दस्य बाहुल्येन संज्ञाशब्दत्वात् व्यापारापरपर्यायभावनावाचित्वमेवेति उक्त्वा, संज्ञाशब्दस्य बलवत्त्वं मीमांसकैरपि अङ्गीकृतमिति नावमिकमधिकरणं प्रमाणयति - **अत एवेति**॥ संज्ञाशब्दस्य अवयवार्थानपेक्षया प्रवृत्तेरेव, तस्य बलवत्त्वमाश्रित्य मीमांसायाः नवमाध्याये उत्तराशब्दार्थनिर्णयः कृतः। तदेव प्रतिपादयति - **रथन्तरमिति**। मीमांसाशास्त्रे नवमाध्याये द्वितीयपादे पञ्चममधिकरणम् "यद्योन्यामुत्तरयोः गायती"ति वाक्यस्थोत्तराशब्दार्थनिर्णयाय प्रवृत्तम्। तस्य च अधिकरणस्य सारोऽयम् -

छन्दस्थयोरुत्तरास्थयोर्वा गीतेरिहोहनम्।
अविशेषाद्विकल्पः स्यात् अन्त्यः संज्ञाबलित्वतः॥ इति। (शा.दी.9.2.5.23)

तथा हि - सामवेदिनां सामगानपाठसम्बन्धिनौ द्वौ ग्रन्थौ। तत्र एकः छन्दोनामकः, यत्र विविधसामगानप्रकाराणां रथन्तरादीनाम् उपदेशः एकैकां ऋचमालम्ब्य विहितः। एताः रथन्तरादिसामप्रकरणानाम् आधारभूताः ऋचः एव सामयोनि-

शब्देन अभिधीयन्ते। अथ द्वितीयः ग्रन्थः उत्तरानामकः,यत्र एकैकस्य सामगान–प्रकारस्य कृते त्रीणि सूक्तानि पठ्यन्ते, येषां त्रयाणां मिलित्वा "तृच" शब्देन व्यवहारः। तत्रैकस्मिन् तृचे तत्तत्सामगानप्रकारस्य योनिभूता ऋक् या छन्दोग्रन्थे तत्तत्सामप्रकारयोनिभूतत्वेन निर्दिष्टा प्रथमा भवति, इतरे द्वे तदुत्तरे भवतः। एते च अयोनिभूते। अनयोः द्वयोरपि प्रथमं निर्दिष्टां तत्तद्योनिमनु गानं करणीयं भवति। एतदेव "यद्योन्यां तदुत्तरयोः गायति" इति मन्त्रेण बोध्यते।

अत्र "यद्योन्यां तदुत्तरयोः गायति" इति वाक्यविषये संशयः। अनेन वाक्येन योनिभूत-ऋचः उत्तरयोः तद्योनितुल्यं गायनं विधीयते। योनिभूताः ऋचः छन्दो-ग्रन्थेऽपि उपदिष्टाः उत्तराग्रन्थेऽपि उपदिष्टाः। ततश्च छन्दोग्रन्थे तत्तद्योन्युत्तरयोः, उत्तराग्रन्थे तत्तद्योन्युत्तरयोश्च पूर्वतनयोनितुल्यं गायनमनेन प्रतिपाद्यते वा, उत्तराग्रन्थे तत्तद्योन्युत्तरयोः अयोनिभूतयोः ऋचोः एव तत्पूर्वतनयोनितुल्यं गायनमनेन प्रतिपाद्यते वेति संशयः। अत्र पूर्वपक्षः उत्तराशब्दस्य व्यवस्था-वाचकत्वात् तत्तद्योन्युत्तरयोः ग्रन्थद्वये स्थितयोरपि गायनमनेन प्रतिपाद्यत इति। सिद्धान्तस्तु उत्तराग्रन्थे तत्तद्योन्युत्तरं पठितयोः अयोनिभूतयोः तत्पूर्वतन-योनितुल्यं गायनं प्रतिपाद्यत इति।

17.2.2. उत्तराशब्दार्थनिर्णयविचारः

उत्तराशब्दः सम्बन्धिरूपशब्देनैव लोके प्रसिद्धः। शास्त्रे तु अयं शब्दः संज्ञाशब्दत्वेनापि प्रसिद्धः। "उत्तराः अध्यापयामः" इति व्यवहारे प्रतिसम्बन्धिनः अनुपादानेन उत्तराशब्दस्य संज्ञारूपेण पृथक्शक्तेः कल्पनीयत्वात्। तथा च द्वौ उत्तराशब्दौ। एकः व्यवस्थावाची प्रतिसम्बन्धिसापेक्षः।अन्यः संज्ञावाची।अन्या-नपेक्षवृत्तिः। द्वयोः मध्ये यश्च व्यवस्थावाची सः अवध्यंशे नित्यसाकाङ्क्षः। उत्तरयोरित्युक्ते तत्र कस्मादित्येवमवध्याकाङ्क्षायाः नियमेन जायमानत्वात् तस्मा-दवधिवाचकपदान्तरसापेक्षत्वेनैव अयं स्वार्थं प्रतिपादयति। पदान्तरानपेक्षायाम् अयमनर्थक एव स्यात्। तदुक्तं शाबरभाष्ये अस्मिन्नेवाधिकरणे - "सर्वे हि सम्बन्धिशब्दाः पदान्तरमनपेक्षमाणाः न किञ्चिदप्यर्थमाहुः। तस्मादपेक्षितं पदान्तरम्। इतरथा अपरिपूर्णार्थं वाक्यम् अनभिधायकमेव स्यात् कस्यचिद-प्यर्थस्य।" इति। उत्तराशब्दस्य ग्रन्थविशेषे संज्ञात्वेन विनियुक्तस्य ग्रहणे तु तस्य

पदान्तरनिरपेक्षत्वात् केवलं श्रवणमात्रेणैव परिपूर्णार्थबोधकत्वम्। उक्तं च तत्रैव भाष्ये - "संज्ञासंज्ञिग्रहणे न पुनः पदान्तरमपेक्ष्यते, श्रुत्यैव परिपूर्णार्थो गृह्यते" इति। उत्तराशब्दस्य व्यवस्थावाचिनः पदान्तरसापेक्षत्वात् विलम्बेनार्थबोधकत्वम्। संज्ञावाचिनः उत्तराशब्दस्य तु पदान्तरनिरपेक्षत्वात् शीघ्रतया अर्थबोधकत्वमिति, संज्ञावाचिना उत्तराशब्देन तन्नामकग्रन्थस्य शीघ्रमुपस्थित्या उत्तराग्रन्थे पठितयोरेव ग्रहणमिति सिद्धान्तिनः आशयः। अयं सर्वोऽपि विचारः ऊहप्रकरणे रथन्तरं सामप्रकारमाश्रित्य कृत इति रथन्तरविषयकत्वेनास्य व्यवहारः। ततश्च रथन्तरम् उत्तराग्रन्थे तदुत्तरपठिताऽयोनिभूतऋचोरेव गेयं, न तु अन्यत्र तदुत्तरं पठ्यमानासु ऋक्षु इति निर्णयः। अस्मिंश्च निर्णये संज्ञाशब्दस्य प्राबल्यं रूढिशक्त्या निश्चीयते। यतस्तत्र प्रकृतिप्रत्ययात्मकावयवार्थानुसन्धानस्य अनपेक्षितत्वात् , समुदायशक्त्यैव तस्य श्रवणमात्रेण अर्थोपस्थापकत्वात्। प्रकृते च उत्तराशब्दवत् क्रियाशब्दोऽपि द्विविधः, एकः व्यापाररूपभावनावाचकः रूढः, अन्यः फलरूप-क्रियावाचकः यौगिकः। ततश्च यौगिकस्य प्रकृतिप्रत्ययात्मकावयवार्थानु-सन्धानेनैवार्थबोधकत्वात् ततः बोधः विलम्बेन भवति इति क्रियाशब्दात् फल-बोधः श्रवणमात्रेण न भवति, अतः तत् (फलं) सामान्यतः क्रियाशब्दार्थो न भवति। अत एव लोके क्रियाशब्देन व्यापारभावनापर्यायभूतक्रियाया एव बोधः। अतश्च लोकप्रसिद्धा क्रियैव शास्त्रेऽपि क्रियाशब्दार्थः इति कारकादीनां भावनान्वये एव साधुत्वं, नान्यथा। **नवमे निर्णीतमिति**॥ मीमांसाशास्त्रे नवमाध्याये द्वितीयपादे पञ्चमेऽधिकरणे त्रयोविंशतितमेन सूत्रेण ऊहलक्षणे निर्णीतमिति भावः। तथा च जैमिनेः सूत्रं "नैमित्तकं तूत्तरात्वम् आनन्तर्यात् प्रतीयते"(मी. 9-2-5-23) इति। नैमित्तिकमित्यस्य साङ्केतिकमित्यर्थः। तथा च संज्ञानिमित्तमेव उत्तरात्वम् , आनन्तर्यात् - सम्बन्ध्यपेक्षारूपव्यवधानाभावात् , प्रतीयते इत्यर्थः। एतदेवोक्तं-संज्ञाशब्दप्राबल्यादिति। तथा च यथा तत्र सम्बन्धिशब्दात् रूढितुल्यसंज्ञाशब्दस्य प्राबल्यं श्रवणमात्रेणार्थबोधकत्वमाश्रित्य स्वीकृतं तथेहापि यौगिकक्रियाशब्दा-पेक्षया रूढिक्रियाशब्दस्य प्राबल्यमिति, क्रियाशब्दस्य रूढ्या प्रतिपाद्य एव अर्थः स्वीकार्य इति भावः।

अत्र **कान्त्यां प्रभायां** च "रथन्तरमुत्तरयोः गायति" इति विषयवाक्यमुदाहृतम्। अन्यत्र तु "यद्योन्यां तदुत्तरयोः गायति" इति। अत्र यच्छब्देन रथन्तरस्यैव

किञ्च फलांशोऽपि भावनायां विशेषणम् , कारकाण्यपि क्वचित्तथाभूतानि इति "गुणानाञ्च परार्थत्वादसम्बन्धः समत्वात् स्यात्" (मी. 3-1-22) इति न्यायेन सर्वे सेवका राजानमिव भावनायामेव परस्परनिरपेक्षाण्यन्वियन्ति। "नहि भिक्षुको भिक्षुकान्तरं याचितुमर्हति सत्यन्यस्मिन्नभिक्षुके" इति न्यायेनापि फलं त्यक्त्वा भावनायामेवान्वियन्तीति मीमांसका अपि मन्वते। एवञ्च "विशेष्यतया कारकादिप्रकारकबोधं प्रति धातुजन्यभावनोपस्थितिर्हेतुः"इति कार्य्यकारणभावस्य क्लृप्तत्वात् यत्रापि "पक्ता" "पाचक" इत्यादौ भावना गुणभूता, तत्रापि क्लृप्त - कार्य्यकारणभावानुरोधात् तस्यामेवान्वय इत्यवसीयते, इत्यादि भूषणे प्रपञ्चितम्। केचितु भूतले घटः देवदत्तो घटमित्यादावन्वयबोधाकाङ्क्षानिवृत्त्योरदर्शनान्न तव्द्यतिरेकेण साधुत्वलाभ इत्याहुः ॥17॥

परामर्शः। तेनाभिप्रायेण पूर्वोक्तव्याख्याद्वये रथन्तरमिति पठितं स्यात्। मीमांसा-ग्रन्थेषु यद्योन्यामित्येव विषयवाक्यमस्ति।

नन्वेवं सर्वत्र क्रियाशब्देन रूढ्यर्थस्वीकारे "कर्मवत् कर्मणा तुल्यक्रियः" (पा. 3.1.87) इति सूत्रासङ्गतिः। तत्र भावनारूपक्रियाश्रयत्वस्य कर्मणि उपपादयितु-मशक्यत्वात्। ततश्च तत्र क्रियापदं फलबोधकमित्येव स्वीकार्यम्। किञ्च अस्ति भवति विद्यते इत्यादिषु सत्तारूपफलस्यैव साध्यत्वेन प्रतीतिरपि अङ्गीकृता, तस्या एव सत्तायाः क्रियात्वमपि स्वीकृतम्। किञ्च क्रियते उत्पाद्यते अनयेति करण-व्युत्पत्त्या क्रियाशब्दः भावनाबोधकः,"क्रियते सा क्रिया" इति कर्मव्युत्पत्त्या फल-बोधकः इति उभयत्र तस्य क्रियाशब्दस्य यौगिकत्वमेव सिद्ध्यति। तथा च फले यौगिकः, भावनायां रूढः इति निर्णेतुं न शक्यत इति यन्मीमांसाशास्त्रीयं नावमिक -मधिकरणमत्रोदाहृतं, तन्नार्थसाधकं, तत्सिद्धान्तानुगुण्याभावात् इति चेत् आह - **किञ्चेति**। अस्तु नाम भावनापर्यायस्य क्रियाशब्दस्यापि यौगिकत्वम्। तथा च क्रियाशब्दस्य अर्थद्वये प्रयोगः आगतः। तयोर्मध्ये यस्मिन् प्रचुरः प्रयोग स एव तस्य स्वारसिकोऽर्थ इति निर्णेयम्। लोके हि क्रियाशब्दः व्यापारपर्यायत्वेन प्रसिद्धः न तु फलपर्यायत्वेन। शास्त्रे एव क्रियाशब्दस्य फले क्वचित् प्रयोगात्। अथ शास्त्रे क्रियाशब्देन अर्थद्वयस्य बोधस्वीकारात् अत्र कारिकायां क्रियाशब्दः फलपरोऽपि भवितुमर्हति किलेति चेदुच्यते - **किञ्च फलांशोऽपीति**। अस्य ग्रन्थस्य आरम्भकारिकायां "फलव्यापारयोर्धातु"रिति कारिकायां "फले प्रधानं व्यापार"

इत्यादिना स्पष्टतया फलस्य व्यापारविशेषणत्वस्यैतच्छास्त्रसिद्धान्ततयोपपादनात् क्रियायाः फलव्यापाररूपार्थद्वये फलस्य व्यापारपर्यायक्रियाविशेषणत्वमेवेति सिद्धम्। कारकाणामपि "कारके" (पा. 1.4.23) इति सूत्रे भाष्यकारेण "अथवा यावद्ब्रूयात् क्रियायामिति तावत् कारके" इति क्रियाविषयस्य क्रियाजनकत्वेन क्रियान्वयित्वरूपस्य कारकत्वस्य सिद्धान्तितत्वात् कारकाणामपि क्रिया-विशेषणत्वं सिद्धम्। सा च क्रिया फलं वा व्यापारो वा भवतु। परन्तु कारकाणां क्रियायां विशेषणत्वमेवेति तु सिद्धम्।

17.2.3. क्वचित्तथा भूतानीति पाठविमर्शः

तदाह - **कारकाण्यपि क्वचित् तथा भूतानि** इति। **क्वचित्** - क्रियापदप्रतिपाद्ये कुत्रचित्। **तथाभूतानि** -विशेषणानीत्यर्थः। भूषणे तावत् "क्वचित् तथाभूतान्येवे" -ति पाठः।अस्य वाक्यस्य व्याख्याः परिशीलनीयाः। अत्र प्रायः सर्वे व्याख्यातारः तत्त्वदर्शिनीकारं परित्यज्य एकविधामेव व्याख्यां कृतवन्तः। दर्पणे "कर्त्राख्यात-स्थले दृष्टत्वादिति भाव" इति व्याख्यानेन क्वचित् - कर्त्राख्यातस्थले इत्यर्थः दर्पणाभिमतः इति ज्ञायते। तथैव काशिकायामपि "क्वचित् तथाभूतानि देवदत्त-स्तण्डुलं पचतीत्यादौ कारकाणि भावानां प्रति विशेषणतामापन्नानि इत्यर्थः। कृदन्ते कारकाणां भावानां प्रति विशेष्यत्वात् क्वचिदिति।"इति, **कान्त्यामपि**- "क्वचित् - पाकं करोतीत्यादौ, तथाभूतानि - भावानां प्रति विशेषणभूतानि" इति पूर्ववदेव व्याख्यातम्। अन्या अपि व्याख्याः पूर्वोक्ताभिप्राया एव। तत्त्वदर्शिन्यां तु भूषणग्रन्थपाठः स्वीकृतः।व्याख्यातञ्च"कश्चिद्गुणभूतानीति।क्वचिदर्थे गुणभूतान्येव इत्यर्थः। पक्ता, पाचकः, पक्व इत्यादौ कारकस्य धात्वर्थापेक्षया प्राधान्यावगमेऽपि तस्य अस्ति, तिष्ठति, गच्छतीत्यादिपदान्तरबोध्येऽर्थे गुणतैव न तु कदापि तस्या सर्वात्मना प्रधानभावः। एवं च फलस्य भावनायामन्वयो निर्विवादः। कारकाणां भावनायामन्वयस्य विवादग्रस्तत्वेऽपि क्वचिदर्थे गुणभावो निर्विवादः। स चार्थः फलं वा व्यापारो वास्तु। सर्वथा च फलस्य, कारकणां च गुणभाव एव। अत एव "क्वचिद्गुणभूतान्येव" इत्येवकारसहितः पाठः भूषणे। एवं च फलस्य कारकाणां च कुत्रचित् विशेषणत्वेन गुणभावात् "गुणानाञ्च परार्थत्वात् असम्बन्धः समत्वात् स्यात्" इति न्यायेन कारकाणां फले अन्वयासम्भवात् भावनायामेवान्वयः सिद्ध्यति" इति। तत्रैव दर्पणादिव्याख्यानामयुक्तता इत्थं प्रतिपादिता - "तदुक्तरीत्या

कारकाणां क्वचित् गुणभावस्य क्वचित्प्राधान्यस्य चाभ्युपगमे "गुणानाञ्चे"ति न्यायाविषयतया प्रकृतार्थसिद्ध्यनापत्तेश्च" इति। अत्र तत्त्वदर्शिनीकारैः महता अभिनिवेशेन कारकाणां सर्वत्र क्वचिद्गुणत्वमेवेति सम्यक्प्रतिपादितम्। युक्तं चैतत् ,"यत्रापि पक्ता, पाचक इत्यादौ भावना गुणभूता तत्रापि क्लृप्तकार्यकारणभावानुरोधात् तस्यामेवान्वय इत्यवसीयते" इति उत्तरग्रन्थानुरोधात्। तथा च क्वचित् इत्यस्य क्वचित्स्थले तिङन्ते पाकं करोतीत्यादौ इति व्याख्यैव ग्रन्थकृदभिमतेति अन्यव्याख्यापेक्षया तत्त्वदर्शिनीकाराणां व्याख्यैव युक्तेति विभाव्यते।

तथा हि - "अस्तिर्भवन्तीपरोऽप्रयुज्यमानोऽप्यस्ती"ति वचनात् अन्ततः अस्तिपदाध्याहारस्य मीमांसकमते वैयाकरणानां मते च आवश्यकत्वात् ओदनस्य पक्तेत्यादावपि अध्याहृतास्तिक्रियायां कृदर्थकारकस्य विशेणतयैव अन्वयः मीमांसकैः वैयाकरणैः अवश्यं वक्तव्यः। "त्वया शयितव्यमि"त्यादिष्वपि अस्त्यध्याहाराभावेऽपि कारकस्य विध्याद्यर्थकतव्यप्रत्ययान्तबोध्यक्रियायामेवान्वयः। "ओदनस्य पक्ते"त्यादौ पचधात्वर्थक्रियायाः कृत्प्रत्ययार्थे विशेषणत्वेऽपि, कृत्प्रत्ययबोध्यकारकस्य अन्यत्रान्वयरूपविशेषणत्वस्य अव्याघातात् न काचिदनुपपत्तिः। किञ्चात्र "कारकाणां धात्वर्थफलेन्वयोऽस्तु" इति मीमांसकवचनं निराक्रियते। तच्च कारकाणां क्वचिदपि वाक्यार्थविशेष्यत्वाभावप्रतिपादनेनैव सिद्ध्यति। मीमांसकमते फलस्य धात्वर्थत्वात् , तस्य च भावनायामन्वयः कारकत्वेनेति तेषां सिद्धान्तः। किञ्च राजसेवकदृष्टान्तः, भिक्षुकदृष्टान्तश्च सर्वदा सर्वत्र कारकाणां विशेषणत्वे एव युज्येते। अतः तत्त्वदर्शिनीकाराणां गुरूणां व्याख्यैव युक्ततमा। अयमेव कौण्डभट्टस्यापि आशय इति "कारकाणि च क्वचित्तथाभूतान्येव" इति एवकारघटितभूषणग्रन्थेन अवगम्यते।

17.2.4. गुणानां च परार्थत्वात् .. इत्यादिन्यायविचारः

अथेदानीं कारकाणि कस्यां क्रियायां विशेषणानीति प्रश्नः। किं फलरूपक्रियायाम् उत व्यापाररूपक्रियायामिति। न फलरूपक्रियायाम्। फलस्यापि कारकवत् क्वचिद्गुणभावात् विशेषणत्वेन विशेषणे विशेषणान्वयस्य अयुक्तत्वात्। तदेव प्रतिपादयति मीमांसान्यायप्रदर्शनद्वारा - **गुणानामिति**॥ "गुणानां च परार्थत्वात् असम्बन्धः समत्वात् स्यात् " (मी. 3.1.22) इतीदं जैमिनीयं सूत्रं तृतीयाध्यायस्थम्। अस्यार्थः – गुणानां - विशेषणानां, परार्थत्वात् - विशेष्योपकारित्वात्

समत्वात् - विशेष्योपकारित्वरूपसमानधर्मत्वात् , असम्बन्धः - परस्परं तेषां सम्बन्धाभाव एव, गुणप्रधानाभावेन अन्वयाभाव एव स्यादिति। मीमांसाशास्त्रे अयं न्यायः अग्न्याधानप्रकरणे वारणवैकङ्कतादिपात्रविशेषस्य यज्ञाङ्गत्वसाधनार्थं स्वीकृतः। तथा हि - आधानप्रकरणे वारणवैकङ्कतानि यज्ञसंयुक्तानि पात्राणि श्रूयन्ते। वारणो यज्ञावचरो, वैकङ्कतो यज्ञावचर इति तयोः निर्देशः। यज्ञावचर इत्यस्य यज्ञानुष्ठानहेतुरित्यर्थः। ततश्च एतेषां पात्राणां यज्ञसम्बन्धः ज्ञायते। आधानप्रकरणे एव। अन्यत्र पवमानेष्ठयः अपि पठिताः। यद्यपि आधानप्रकरणे एतानि पात्राणि पठितानि, अथापि साक्षात् आधाने एतेषामुपयोगः न भवति। आधानं नाम कस्मिंश्चित् विशिष्टे देशे अग्निस्थापनम्। अतः तस्य यज्ञत्वं नास्तीति यज्ञसम्बन्धित्वेन ज्ञातानां पात्राणां न तत्र सम्बन्धः।यदा च आधाने साक्षात् सम्बन्धः नोपपन्नः, तदा तदङ्गसम्बन्धः कश्चन भवितुमर्हति वेति विचारणीयम्। तत्रैव आधानप्रकरणे पवमानेष्टीनामपि विधानात् , पवमानेष्टयः यद्याधानाङ्गानि, तर्हि यज्ञसम्बन्धिपात्राणि तत्र सम्बन्धं प्राप्नुयुः इति पवमानेष्ट्यङ्गानि भवेयुः, अन्यथा दर्शपूर्णमासादिसर्वयज्ञाङ्गानि भवेयुरिति संशयः। अत्र च अनेन न्यायेन इत्थं निर्णयः क्रियते - यथा आधानं यज्ञाङ्गं, तथा पवमानेष्टयः अपि साक्षाद्यज्ञाङ्गानि। अतः उभयोरपि समप्राधान्यमेवेति, तयोः द्वयोः मध्ये अङ्गाङ्गिभावो न भवति। यज्ञाङ्गयोः तयोः द्वयोरपि गुणत्वेन समत्वात् असम्बन्ध एव। तथा च तेषां पात्राणां यज्ञसम्बन्धावगमात् दर्शपूर्णमासादिसर्वयज्ञाङ्गतैवेति। तथा प्रकृतेऽपि फलमपि भावानायामेवान्वितमिति, भावनाङ्गभूते फले कारकाणामन्वयः न भवति, किन्तु प्रधानभूतभावनायामेव। अत्रैव लौकिकं दृष्टान्तमपि प्रदर्शयति - **सर्वे सेवका इति॥** राज्ञः सेवकौ द्वौ। तत्र एकः नापितः, अन्यः दीपदर्शी। तावुभावपि साक्षात् राजानमेव सेवेते, न परस्परमिति। तयोः द्वयोः अन्यसेवकत्वेन समत्वात् परस्परं सेव्यसेवकभावरूपसम्बन्धः तयोर्मध्ये न युक्तः। तथैव फलस्यापि कारकत्वात् , अन्येषां कारकाणां फलेऽन्वयः अयुक्त इत्यर्थः। महाभाष्यकारेणाप्युक्तम् "उपदेशेऽजनुनासिक इत् "(पा. 1-3-2) इति सूत्रे - "न ह्युपाधेरुपाधिर्भवति" इति। उपाधेः - विशेषणस्य, उपाधिः - विशेषणं न भवति, सत्यन्यस्मिन् योग्ये विशेष्ये इति तस्य भावः। तथा च यथा सेवकानां परस्परनिरपेक्षाणां साक्षात् राजसेवनं, तथा कारकाणामपि परस्परनिरपेक्षाणामेव भावनायामन्वयः।तदेवाह -

परस्परनिरपेक्षाणीति। **अन्वियन्ति** - वी गतिप्राप्तिव्रजनकान्त्यवसादनेषु इति धातौ वी ई इति सवर्णदीर्घेण ईधातुः प्रश्लिष्टः। अनुपूर्वात् तस्मात् कर्तरि लटि प्रथमाबहुवचने रूपम्। ई+झि, शप्, धातोः अदादित्वात् शपः लुक्, झोऽन्तः, इयङादेशः। धात्वर्थफलस्य विशेष्यत्वेनान्वययोग्यतायां सत्यामपि, परतन्त्रे तस्मिन् न कारकाणामन्वयः, किन्तु विशेष्याकाङ्क्षापूरणसमर्थभावनायामेव । फलांशस्यापि विशेष्याकाङ्क्षापूरणसामर्थ्यस्य भावनायामेव सत्त्वात्। एतदुपष्टम्भकतया मीमांसाशास्त्रे विशेषातिदेशाध्याये स्थिते शतोक्थ्यादौ स्तोत्रवृद्धिसम्बद्धाधिकरणे स्थितं न्यायमुदाहरति - **नहि भिक्षुक** इति। मीमांसाशास्त्रे अष्टमाध्यायः विशेषातिदेशाध्यायः इति प्रसिद्धः। "प्रकृतिवद्विकृतिः कर्तव्या" इत्यतिदेशः। स च कुत्रत्यस्य कुत्रेति विचारः अस्मिन् अध्याये प्रवर्तते। तत्र तृतीयपादे पञ्चममधिकरणं "शतोक्थ्यादौ ज्योतिष्टोमात् स्तोत्रोपचयाधिकरणमि"ति प्रसिद्धम्। तथा हि"शतोक्थ्यं भवति, शतातिरात्रं भवति" इति श्रूयते। अत्र चतुर्थेऽधिकरणे शतत्वसम्पादनार्थं ज्योतिष्टोमस्य शतकृत्वः अभ्यासः, उत द्वादशाहस्य दशरात्रस्य दशकृत्वोभ्यास इति विकल्प्य द्वादशाहस्य दशरात्रस्य दशकृत्वोऽभ्यास इति सिद्धान्तितम्। ततः दशरात्रस्य दशकृत्वोभ्यासेन सिद्धे शतोक्थ्ये उक्थ्यस्तोत्राणि ज्योतिष्टोमादागच्छन्ति वा, द्वादशाहादागच्छन्ति वा इति संशयः,उभयत्र उक्थ्यस्तोत्राणां सत्त्वात्। तदस्मिन् पञ्चमेऽधिकरणे विचार्यते। अत्र उक्थ्यस्तोत्राणि ज्योतिष्टोमे एव उपदिष्टानि, अतश्च तेषां ज्योतिष्टोमप्रकृतित्वं प्रसिद्धम्। तेषामेव उक्थ्यस्तोत्राणां विकाराः द्वादशाहे पठ्यन्ते। अस्य शतोक्थ्यस्य द्वादशाहोपचयरूपत्वात् तत्रत्योक्थ्यविकाराणामेव अत्रागमनमिति पूर्वपक्षः। सिद्धान्तस्तु उक्थ्यपदश्रवणमात्रेण ज्योतिष्टोमगतोक्थ्यस्तोत्राणामेव प्रथमप्रतीतिः, द्वादशाहगतानां तु तद्विकारत्वात् न तथेति, शतोक्थ्ये तेषां ज्योतिष्टोमगतोक्थ्यस्तोत्रविकारत्वमेवेति। सन्दर्भेऽस्मिन् अयं न्यायः उपन्यस्तः - "न हि भिक्षुको भिक्षुकान्तरं याचितुमर्हति, सत्यन्यस्मिन्नभिक्षुके" इति। अत्र द्वादशाहः, शतोक्थ्यमिति एते द्वे भिक्षुकतुल्ये। यतः तत्र उक्थ्यस्तोत्राणाम् उपदेशाभावात् ज्योतिष्टोमे एव तेषामुपदेशात्। ज्योतिष्टोमं याचित्वा उक्थ्यस्तोत्राणि प्राप्तवान् द्वादशाहः अत्र प्रथमभिक्षुकः। अथेदानीं उक्थ्यस्तोत्राणि याचमानः शतोक्थ्याख्यः द्वितीयः भिक्षुकः। अयं च कं याचयेदिति। द्वादशाहस्य

स्वसदृशत्वात् न हि तस्मात् याचनं युक्तमिति, उक्थ्यस्तोत्रप्रकृतितः ज्योतिष्टोमा -देव आदानं युक्तमिति। अभिक्षुके ज्योतिष्टोमे वर्तमाने भिक्षुकान्तरस्य द्वादशाहस्य याचनमयुक्तमिति। अत्र उक्थ्यस्तोत्राणां ज्योतिष्टोमात् स्वीकारे, द्वादशाहात् स्वीकारे वा, क्रतौ वैगुण्यं न भवत्येव। अथापि प्रकृतिभूतानामेव प्रथममुपस्थित्या ततः साक्षात् स्वीकार एव उचितः। प्रकृते च सन्दर्भे धात्वर्थफलस्य कारक-विशेष्यत्वयोग्यतायां सत्यामपि, ततोऽपि प्रधानभूतभावनायाः सत्त्वात् भावनायाः एव विशेष्यत्वमित्यर्थः। वाक्यार्थप्रधानीभूतस्य, तदितरस्य च आकाङ्क्षा-शामकत्वेऽपि प्रधानेनैवान्वयः युक्तः इति भावः। उक्तञ्च **भूषणे** - "कारकाणां नित्यपरतन्त्राणां विशेष्याकाङ्क्षायां धात्वर्थफलांशस्य तथान्वययोग्यतायामपि तस्यापि परतन्त्रस्य विशेष्याकाङ्क्षापूरणसमर्थायां भावनायामेव विशेषातिदेशा-ध्यायाधिकरणन्यायेन (मी.अ.8-पा.3-अ.5-सू.10) अन्वयः। "न हि भिक्षुको भिक्षुकान्तरं याचितुमर्हति सत्यन्यस्मिन्नभिक्षुके" इति न्याये ह्याकाङ्क्षाशामकत्व-क्लृप्तिरेव बीजम्। तत्तुल्यमत्रापि" इति। **मीमांसकाः अपि मन्वते** इति। पूर्वोक्तेन न्यायेन कारकाणां भावनायामेव अन्वय इति कारकप्रकारकबोधं प्रति विशेष्यतया आख्यातजन्यभावनोपस्थितिः हेतुरिति मीमांसका अपि स्वीकुर्वन्ति। एवञ्च भावनायामेव कारकान्वयनियमे च अयं कार्यकारणभावः सिद्धः इति भावः। स चेत्थं "कारकादिप्रकारकबोधं प्रति विशेष्यतया भावनोपस्थितिः कारणम् " इति कार्यकारणभावः। सा च भावनोपस्थितिः धातुजन्या आख्यातजन्या वेति विकल्पः। यद्यपि मीमांसका मण्डनमिश्रादयः आख्यातजन्यभावनोपस्थितेरेव कारणत्वं स्वीकुर्वन्ति। स च कार्यकारणभावः तिङन्तघटित -वाक्यस्थले घटते। न तु "काष्ठैः ओदनस्य पक्ते"त्यादौ। तत्र भावनोपस्थितेरभावेन विशेष्यस्य अभावे वाक्यार्थबोध एव न स्यात्। अतः भावनायाः धात्वर्थत्वमाश्रित्य तत्रापि काष्ठादि-कारकाणां भावनान्वयः वक्तव्यः। तदेव प्रतिपादयति - "**कारकादिप्रकारकबोधं प्रति विशेष्यतया धातुजन्यभावनोपस्थितिः कारणम्** " इति। अत्र कारकादीत्यत्र आदिपदेन फलांशसङ्ग्रहः। लडर्थवर्तमानत्वादिसङ्ग्रहः इति **दर्पणः**। **यत्रापीति**॥ "काष्ठैः ओदनस्य पक्ता" "काष्ठैः ओदनस्य पाचकः" इत्यादौ, **भावना गुणभूता** इति। कृदन्तस्थले प्रत्ययार्थप्राधान्यमाश्रित्य धात्वर्थभावना यत्र कृदर्थ-कर्तृविशेषणभूता। **तत्रापि, क्लृप्तकार्यकारणभावे**ति। कारकादिप्रकारकबोधं प्रति

विषयतया धात्वर्थभावनोपस्थितिः कारणमिति। **तस्यामेव** –कृदर्थविशेषणीभूतभावनायामेव, **अन्वयः** - कारकाणामन्वयः इति **अवसीयते** - निश्चीयते। अत्र **प्रभा**- "ननु कृत्स्थले पक्ता, पक्व इत्यादौ विक्लित्त्यनुकूलव्यापाराश्रयः, व्यापारजन्यफलाश्रय इति क्रमेण बोधात् भावनाया अपि कर्तृकर्मादौ विशेषणत्वात् "गुणानाञ्च परार्थत्वादसम्बन्धः समत्वात् स्यात्" इति न्यायेन भावनायामपि कारकान्वयो न स्यादिति चेदाह - यत्रापीति। अनुरोधादिति – कार्यकारणभावान्तरकल्पने गौरवात् इति भावः।" इति॥ क्लृप्तकार्यकारणभावेतिप्रतीकमुपादाय **कान्त्यां** "धात्वर्थप्रकारकबोधं प्रति विशेष्यतया कृज्जन्योपस्थितिः कारणम्" इति क्लृप्तकार्येत्यर्थ इति व्याख्यातम्। **प्रभायां** तु "विशेष्यतासम्बन्धेन कारकादिप्रकारकशाब्दबुद्धित्वावच्छिन्नं प्रति भावनात्वसमानाधिकरणविषयतासम्बन्धेनोपस्थितिः कारणम्" इति सिद्धकार्यकारणभावात् इत्यर्थः"इति व्याख्यातम्। अत्र कान्तिव्याख्या तु चिन्त्या। क्लृप्तकार्यकारणभावमाश्रित्य पक्तेत्यादौ गुणभूतभावनायामेव कारकान्वय इति, तत्र च क्लृप्तः कार्यकारणभावः "कारकप्रकारकबोधं प्रति विशेष्यतया धात्वर्थभावनोपस्थितिः हेतुः" इति कार्यकारणभाव एव। न तु प्रकृतिप्रत्ययार्थन्यायसिद्धः कान्त्युक्तः कार्यकारणभावः। गुणीभूतक्रियायामपि कारकान्वस्यैव प्रतिपिपादयिषितत्वात्।

ननु तिङन्ते भावनायाः प्रतीतेः सत्यामपि कृदन्ते पक्तेत्यादौ तस्याः प्रतीतिः नास्त्येव। परन्तु उभयत्र तिङन्ते कृदन्ते च फलस्य प्रतीतेः फलप्रतीतिः क्लृप्ता। भावनाप्रतीतिस्तु न तथा। तिङन्ते तस्याः प्रतीतेरपि कृदन्ते तस्याः प्रतीतेः सन्दिग्धत्वात्। ततश्च विशेष्यतया कारकप्रकारकबोधं प्रति धात्वर्थफलोपस्थितिः कारणमिति अस्तु कार्यकारणभावः इति चेन्न। कारकीभूतस्य धात्वर्थस्य भावनायामनन्वयापत्तेः। उक्तः कार्यकारणभावः स्वीक्रियेत तर्हि धात्वर्थफलस्य कारकत्वात् तस्य स्वस्मिन्नेवान्वयः वक्तव्यः। न हि स्वयमेव स्वकारकम्। किञ्च विधिवाक्येषु भावनायां कारणतया अन्विते धात्वर्थे कारकान्वये वाजपेयाधिकरणविरोधापत्तिरित्यादि सूचयन्नाह - **भूषणे प्रपञ्चितमिति**।

अयं हि तत्रत्यः ग्रन्थः –"फलांशोपस्थितिरेवास्तु कारणं, काष्ठेनोदनस्य पक्तेत्यादौ क्लृप्तत्वादिति चेन्न। कारकीभूतधात्वर्थस्य भावनायामनन्वयापत्तेः। न हि स्वयमेव स्वकारकम्। विधिवाक्ये धात्वर्थफलांशस्य कारणतयान्वयेन तत्र कारकान्वये

वाजपेयाधिकरणभङ्गापत्त्या कारणान्तरोपसङ्ग्रहेण प्रयोगविधेरबोधकत्वापत्तेश्च। क्रियान्वयित्वं विना कारकत्वस्यैव दुर्वचत्वाच्च, फलान्वितत्वस्य तत्रैवाव्याप्तेर-योगादित्यादि कारकार्थनिर्णये वक्ष्यते। तस्मात् पाक इत्यादावोदनस्येत्यादिकारका-न्वयाय भावनायाः वाच्यत्वमावश्यकमिति सिद्धम् " इति। अयमेव हि **काशिकादि** -व्याख्यासु अनूदितः। अस्यायमाशयः - तिङन्ते कृदन्ते च सर्वत्र धात्वर्थफलस्य उपस्थितेः क्लृप्तत्वात् तत्रैव कारकान्वयस्वीकारे धात्वर्थफलस्यापि करणकर्मादि-कारकत्वेन, तस्य अन्वयार्थं फलान्तराभावेन तस्य अनन्वयापत्तौ वाक्यार्थबोध एव न स्यात् इति प्रथमदोषः। विधिवाक्येषु "ज्योतिष्टोमेन यजेत" इत्यादिषु धात्वर्थ-फलस्य यागस्य भावनायामन्वय इति स्वसिद्धान्तविरोधः। ततश्च वाजपेया-धिकरणस्यैव असङ्गततापत्तिरिति द्वितीयः दोषः। तदर्थं तिङन्ते भावनान्वय-स्वीकारे तत्र कारकाणां फलान्वयित्वाभावेन "कारकाणां धात्वर्थफलान्वयः" इति कार्यकारणभावस्य अव्याप्तिः इति तृतीयः दोषः। क्रियाजनकत्वस्यैव कारकत्वात् , कारकाणां क्रियाकाङ्क्षाया स्वाभाविकत्वात् , तामाकाङ्क्षां शमयितुं तेषां भावनारूप-क्रियान्वयस्यैव युक्तत्वात् , कारकान्वयार्थं सर्वत्र कृदन्ते तिङन्ते च भावनाबोधः आवश्यकः इति भावः।

17.2.5. वाजपेयाधिकरणविचारः

अथात्र वाजपेयाधिकरणप्रसङ्गः आगत इति तदेवात्र किञ्चित् प्रस्तूयते – मीमांसा-शास्त्रे प्रथमाध्याये चतुर्थपादे षष्ठम् अधिकरणं वाजपेयाधिकरणमिति व्यवह्रियते। "वाजपेयेन स्वाराज्यकामो यजेत" इति श्रूयते। अत्र वाजपेयशब्दस्य योगार्थ आश्रीयते चेत् "वाजस्य अन्नस्य पेयं द्रवीभूतो रस" इति व्युत्पत्त्या वाजपेयशब्दो यवागूपरो भवति। ततश्च "दध्ना जुहोती"त्यादिष्विव यवागूरूपः गुणः अनेन विधीयते इति गुणविधित्वं स्वीकार्यम्। स्वाराज्यरूपफलस्यापि अत्र श्रवणात् विनियोगविधित्वं स्वीकरणीयम्। तथा च धात्वर्थयागस्य वाजपेयरूपगुणेन स्वाराज्यफलेन च सम्बन्धो वक्तव्यः. स च एकदा वक्तुमशक्यः। ततश्च "वाजपेयेन यागं भावयेत् " इति गुणविधित्वे, "यागेन स्वाराज्यं भावयेत् " इति विनियोग-विधित्वे च वाक्यार्थः वर्णनीय इति, धात्वर्थस्य यागस्य आवृत्त्या उभयसम्बन्धः (वाजपेयद्रव्यस्वाराज्यफलयोः) वक्तव्यः। तथा च वाक्यभेदापत्तिः। तस्य वाक्य-दोषत्वात् तदपाकरणाय सोमेन यजेतेत्यादिष्विव वाजपेयवता यागेन स्वाराज्यं

भावयेदिति मत्वर्थलक्षणा आश्रयणीया। मत्वर्थलक्षणा तु पददोषः। अतः मत्वर्थलक्षणापि परित्यक्ता। वाजपेयपदं च न योगेन द्रव्यवाची, किन्तु रूढ्या तत्प्रख्यशास्त्रात् यागनामधेयमिति स्वीकृत्य वाजपेयनामकयागेन स्वाराज्यं भावयेदिति एकवाक्यता उक्ता। अत्र च वाजपेयशब्दस्य तत्प्रख्यशास्त्रात् कर्मनामधेयत्वाभ्युपगमः वाक्यभेदरूपं वाक्यदोषं, लक्षणारूपपददोषं च वारयितुमेव।

अथात्र शङ्का - यजेतेत्यत्र प्रकृत्या धातुना यागमात्रमुच्यते। प्रत्ययांशेन भावना। तयोः समभिव्याहारात् कर्मत्वकरणत्वसाधारणं सम्बन्धमात्रं प्रतीयते। अतश्च यागस्य उभयसाधारण्यात् भावनापि यागकर्मिका, यागकरणिका चेति द्विरूपा भवति। सा च भावना तन्त्रेण यागकरणिकतांशेन फलसम्बन्धं (स्वाराज्यरूपफलसम्बन्धं) यागकर्मिकतांशेन गुण(वाजपेयद्रव्य)सम्बन्धं च लभते इति मत्वर्थलक्षणां विनैव यागे गुणविधानमुपपन्नं भवति, वाजपेयेन यागं कुर्यात् , यागेन च स्वाराज्यमिति। अतोऽयं गुणविधिः इति।

अत्रोच्यते - धात्वर्थभावनयोः सम्बन्धमात्रस्यैव आख्यातबोध्यत्वे तस्याः भावनायाः अनिर्धारितत्वात् नोक्तरूपोऽन्वयः सिद्ध्यति। तथा हि - फलस्य (स्वाराज्यस्य) साधनापेक्षित्वात् यागकरणिकैव भावना तत्सम्बन्धमर्हति। तथा गुणस्य (वाजपेयद्रव्यस्य) साध्यापेक्षित्वात् यागकर्मिकैव भावना तत्सम्बन्धमर्हति। आख्यातात् सम्बन्धसामान्यावगतिरेव न भवति। किन्तु समभिव्याहारात् पदान्तरान्वयपर्यालोचनया लक्षणया सम्बन्धविशेषस्यैवावगतिः। एवञ्च यागस्य कर्मपरत्वे गुणस्यैव सम्बन्धः, करणपरत्वे फलस्यैव सम्बन्धः इति वाक्यभेदादिकं विना उभयसम्बन्धः वक्तुं न शक्यः। किञ्च यागो यस्मिन्नेव क्षणे करणात्मना अवगम्यते, न सः तस्मिन्नेव क्षणे साध्यात्मना प्रतीयते। तस्मात् तन्त्रन्यायस्य नात्र सम्बन्धः। किञ्च साध्यसाधनभूतयोः यागयोः नात्र सम्बन्धः। साध्यत्वे प्राधान्य-उद्देश्यत्व-अनुवाद्यत्वानां, साधनत्वे गुणत्व-उपादानत्व-विधेयत्वानां च विरुद्धानां धर्माणां भासमानत्वात्। धात्वर्थस्य अक्रियात्वाच्च न यागस्य भावनामनन्तरीकृत्य साक्षात् फलगुणोभयसम्बन्धः वक्तुं शक्यः। कारकरूपस्य यागस्य साक्षात्कारकान्तरान्वयस्य अव्युत्पन्नत्वात्। एवञ्च गुणविधित्वे तस्य वाक्यभेदं वारयितुं सोमेन यजेतेत्यादिष्विव मत्वर्थलक्षणा स्वीकरणीया। तद्वरं वाजपेयं सुराद्रव्यमस्मिन्निति सुराग्रहविधानात् तत्प्रख्यतया नामधेयत्वमिति।

अस्मिन् च विचारे भाट्टमीमांसकैः स्पष्टमभिहितं यत् कारकरूपस्य यागस्य साक्षात् कारकान्तरान्वयः अव्युत्पन्न इति, धात्वर्थस्य अक्रियात्वात् न यागस्य भावनामनन्तरीकृत्य साक्षात् फलगुणोभयसम्बन्धः शक्य इति। ततश्च भावनां विना कारकान्वयस्य दुरुपपादत्वात् कारकान्वयाय कृदन्तेष्वपि भावनाप्रतीतिः अङ्गीकार्या। तथा च तिङन्तेऽपि सा प्रतीयते, कृदन्तेऽपीति उभयसाधारण्येन सा भावना प्रकृत्यर्थः सिध्यति। लाघवात्। अन्यथा अनेककृत्प्रत्ययानां तत्र पृथक् शक्तिः कल्पनीया, तत्तद्भावनाविशेषप्रतिपादनार्थं तत्तद्धातुसमभिव्याहारस्य कारणत्वं कल्पनीयमिति महद्गौरवम्।

प्रकारान्तरेण कारकाणां भावनान्वयनियममुपपादयतां मतमाह - **केचित्त्विति। भूतले घट** इति। भूतलाभिन्नमधिकरणम् , एकत्वविशिष्टो घटः इति बोधस्य सत्त्वेऽपि, "सर्वं हि वाक्यं क्रियया परिसमाप्यते" इति न्यायेन अस्तिक्रियाध्याहारेणैव "भूतलाधिकरणिका घटकर्तृकसत्ता" इति बोधस्य सम्भवात्, क्रियापदाभावे वाक्यघटकयावत्पदार्थानां परस्परमन्वयबोधस्य, आकाङ्क्षाशान्तेश्च अदर्शनात् तादृशवाक्यस्य असाधुत्वमेवेति। उदाहरणान्तरं प्रदर्शयति - "**देवदत्तो घटम्** " इति। अत्रापि पश्यतीत्यादिक्रियाध्याहारेणैव "देवदत्तकर्तृकं, घटकर्मकं दर्शनम् " इति बोधानुभवात्, क्रियापदाभावे तादृशान्वयबोधस्य आकाङ्क्षानिवृत्तेश्च अदर्शनात् असाधुत्वमेवेति। **तद्व्यतिरेकेण** - क्रियापदेन अस्तिपश्यतीत्यादितिङन्तेन विना, **न साधुत्वम्** - पूर्वोक्तवाक्यद्वयस्य साधुत्वं न भवति। **आहुः इति**। आहुः इत्यनेन अरुचिः सूच्यते। सा च तयोः वाक्ययोः असाधुत्वांशे, न तु अन्वयबोधाभावाकाङ्क्षाऽनिवृत्तिविषये। "नीलो घटः", "चैत्रः सुन्दरः" इत्यादौ क्रियाकाङ्क्षायाः सत्त्वेऽपि साधुत्वस्याङ्गीकारात्। यदि च क्रियासाकाङ्क्षवाक्ये साधुत्वं न स्यात् तर्हि "गामित्युक्ते कर्मनिर्दिष्टं कर्ता क्रिया चानिर्दिष्टे" इत्यादिभाष्योक्तेरसाधुत्वं स्यात्। ततश्च योग्यक्रियाध्याहारेण तत्र अन्वयबोधः आकाङ्क्षानिवृत्तिश्च साधनीयौ। "क्रियापदाकाङ्क्षामात्रेण न कारकाणां भावनान्वयलाभः, फलांशसम्बन्धेनापि तदाकाङ्क्षानिवृत्तेः चिन्त्यमिदमि"ति **भूषणे।**

17.2.6. आहुरिति मूलस्य कान्तिव्याख्या

अथ "चैत्रः सुन्दरः" इत्यादौ अस्तिपदमध्याहृत्य बोधो वर्णनीयो वा, पदाध्याहारं विनापि बोधः उपपद्यते वा, सर्वं वाक्यं तिङन्तघटितमेवेति नियमः शक्यो वेत्यादि

विषयकः विचारः **कान्त्यां** कृतः अत्यन्तं हृद्यः ज्ञातव्यश्चेति स एवात्रानूद्यते- "आहुरित्यस्वरसोद्भावनम्। तद्बीजं तु तिङन्तोपस्थितक्रियारहितस्यापि वाक्यस्य "त्वया एधितव्यम् " इत्यादेः इष्टत्वमेव। "वाक्यम् तदपि मन्यन्ते यत्पदं गर्भित-क्रियम् " (वा.प.द्वि. 326) इति हरिणाप्युक्तम्। पिण्डीमित्येतदपि वाक्यमिति तदर्थः। उक्तं च तेनैव –

"आख्यातशब्दे नियतं साधनं यत्र गम्यते।
तदप्येकं समासार्थं वाक्यमित्यभिधीयते॥" (वा.प.द्वि. 326)

इति एकक्रियात्मकस्य प्रविशेत्यादेः वाक्यत्वम्। एतेन क्वचिदेकपदात्मकवाक्ये एव इतरान्विते शक्तिरिति मीमांसकरीतिः ऊरीक्रियते इति सूचितम्। नन्वेवम् एकपदात्मकस्यैव वाक्यत्वे "प्रविश" इत्यनेनैव "गृहं प्रविशे"ति वाक्यार्थस्य, "पिण्डी"मित्यनेनैव "पिण्डीं भक्षये"ति वाक्यार्थस्य च बोधे, "गृहं प्रविश", "पिण्डीं भक्षय" इति समुदितप्रयोगो न स्यादिति चेन्न। तेषां शब्दान्तरत्वेन प्रयोगे लाघवस्य अनादरेण च प्रयोगसम्भवात्। अत्र प्राञ्चः- भीमसेनाद्यवयवभीमादि-शब्देन विशिष्टभीमसेनादिपदस्मरणवत् , प्रविशेत्यादिवाक्यैकदेशेनापि "प्रविश गृहम् " इति वाक्यस्मरणं, ततः बोध इति स एवाध्याहार इत्युच्यत इति वदन्ति। तन्न युक्तम्। बोद्धृणां वाक्यस्मरणेनैव बोध इत्यत्र प्रमाणाभावात्, तथा अननुभवाच्च। स्मृतस्य वृत्त्या अर्थबोधकत्वाभावेन अप्रातिपदिकत्वात् सुबाद्य-नापत्तेश्च। "उच्चारित एव शब्दः प्रत्यायकः, नानुच्चारितः" इत्यणुदित् (पा. 1.1. 69) सूत्रभाष्यात् स्मृतात् बोधाभावाच्च। एतेन प्रविशेत्यादि क्रियादिना कारकाद्य-ध्याहार इति पक्षः निरस्तः। किञ्च अध्याहारः किम् आक्षेपो वा अनुमानं वा? तत्रापि किं वा शब्देन आक्षेपानुमाने उत अर्थेन? नाद्यः। स्वार्थप्रतिपादनव्यग्रेण शब्देन शब्दाक्षेपानुमानयोः असम्भवात् । नान्त्यः। अर्थस्य शब्दान्तरार्थेण सम्बन्धाभावात्। एतेन शब्देन अर्थाक्षेप इति निरस्तम्। उपात्तशब्दस्य शब्दान्तरार्थेन असम्बन्धात्। न च परम्परासम्बन्धेन सम्बन्धः वक्तुं शक्य इति वाच्यम्। परम्परासम्बन्धस्य आक्षेपानुमितिप्रयोजकत्वाभावात्। "पीनो देवदत्त" इत्यादिवदनुपपत्त्यभावेन आक्षेपासम्भवात्। आक्षेपस्य अनुमानातिरेकेण अनङ्गीकाराच्च। अथ अर्थेन अर्थानुमानमिति चेत् तज्जन्यबोधस्य शाब्दत्वं न स्यात्। तस्मात् तत्तदर्थे विशिष्टपदस्य वाक्यस्य च शक्तिग्रहकाले तदवयवानामपि शक्तिग्रहात् विशिष्टार्थबोधः।

18. वतेः कारकस्य च क्रियाभिन्ने अन्वयमभ्युपगच्छतां नैयायिकानां खण्डनम्

स्वयमुपपत्तिमाह

यदि पक्षेऽपि वत्यर्थः कारकञ्च नञादिषु।

अन्वेति त्यज्यतां तर्हि चतुर्थ्योः स्पृहिकल्पना ॥ 18 ॥

"पर्वतो वह्निमान्, धूमात् , महानसवत् ", भूतले न घटः, "भूतले घटः" इति आदिपदात्। एवमादिष्वनुशासनविरोधेऽपि यदि साधुत्वमन्वयबोधश्चाभ्युपेयते तर्हि चतुर्थ्योः स्पृहिकल्पनाऽपि त्यज्यतामित्यर्थः। अनुशासनानुरोधतौल्ये अर्द्धजरतीयमयुक्तमिति भावः ॥ 18 ॥

अयमेव वाक्यैकदेशन्याय इत्युच्यते। उक्तं च "इग्यणः सम्प्रसारणम् " (पा. 1.1.45) इति सूत्रभाष्ये "दृश्यन्ते हि वाक्येषु वाक्यैकदेशान् प्रयुञ्जानाः, पदेषु पदैकदेशान्" इति। अतश्चाध्याहारो मानसं ज्ञानम् " इति॥ अनेन शब्दाध्याहारवादः निरस्तः। किञ्च एकस्यैव पदस्य सम्पूर्णवाक्यार्थबोधकत्वकल्पनायां लाघवमपि। "गृहं प्रविशे"ति वाक्यात् (इव) "गृहं" "प्रविश" इति एकपदात्मकवाक्यादपि अविलम्बेन वाक्यार्थोपस्थितिरनुभूयते।अतः तादृशेषु स्थलेषु इतरान्वितार्थे शक्तिकल्पनमेव समुचितम् " इति। ॥17॥

स्वयमुपपत्तिमिति॥ अत्र **दर्पणे** "उक्ताष्टकस्य भावनायामन्वये साधकोपमासरूपां तामुक्त्वा अनन्वये बाधकोपमासरूपां तामाह" - इत्यवतरणिका दृश्यते। अन्यैस्तु वत्यर्थनञर्थयोः क्रियातिरिक्तेऽपि अन्वयमुपगच्छतां नैयायिकानां मतं प्रदर्शितम्। दर्पणेऽपि पूर्वोक्तावतरणिकातः परं खण्ड्यमानं नैयायिकमतमेव प्रदर्शितम्। एतच्च भूषणग्रन्थस्य अनुवाद एव। भूषणग्रन्थे तु स्वयमुपपत्तिमाहेति नास्ति। नैयायिक-मतमुपन्यस्य तत्खण्डनपरतयैव कारिका अवतारिता। **प्रभायां** हि - "स्वयमिति-कारिकाकृतेत्यर्थः। आत्मना कल्पितामुपपत्तिमाहेत्यर्थः। एतेन स्वयमित्यस्य आत्मनेत्यर्थकत्वेन स्वयमाहेत्यसङ्गतमित्यपास्तम्। अथवा प्रकृत्यादिभ्यः इत्यभेदे तृतीया। आत्माभिन्नो ग्रन्थकार आहेत्यर्थः। उपपत्तिम् - क्रियायाम् अनन्वये बाधकप्रदर्शनारूपां युक्तिमित्यर्थः"।इत्युक्तम्।

वस्तुतः स्वयं शब्दस्य प्रायशः आत्मनेति तृतीयान्तार्थकत्वेऽपि, आत्मार्थे, आत्मीयार्थे च प्रयोगाः दृश्यन्ते। कुत्रचिच्च उक्तेऽर्थे दार्ढ्यप्रदर्शनार्थमपि स्वयं शब्दः प्रयुज्यते। अत्रापि उक्तार्थे दार्ढ्यं प्रदर्शयति ग्रन्थकार इति व्याख्यातुं शक्यते। अत्र दर्पणव्याख्या तु अन्यैस्सर्वैरनन्तरैः उपेक्षिता। यदि चेयं व्याख्येया

तर्हि स्वोक्तौ दार्ढ्यं प्रदर्शयन् ग्रन्थकारः, अष्टकस्यास्य क्रियया अनन्वयेऽसाधुत्वमेवेति स्पष्टयन्, तथा वदतां नैयायकादीनां मतं दूषयति इति व्याख्यातव्या। **भूषणस्थः** अस्याः कारिकायाश्च अवतरणग्रन्थश्चेत्थम् - "यत्तु "भूतले न घटः" इत्यत्र "भूतलाधेयत्वाभाववान् घटः" इति बोधान्न क्रियाध्याहारापेक्षा। एवं "पर्वतो वह्निमान् भवितुमर्हति धूमात् महानसवत् " इति वेदान्तिकृतप्रयोगे प्रतिज्ञावाक्ये क्रियापदप्रयोगो वृथेति क्वचित् तर्के दूषितम्। तदनूद्य दूषयति" - इति। अयमेव ग्रन्थः सर्वैः व्याख्यातृभिः अनूदितः।

॥**यदि पक्षे** इति॥ पक्षे - पर्वतादौ सन्दिग्ध -साध्यके, **वत्यर्थः** - सादृश्यम् , **अन्वेति** - अनुयोगितासम्बन्धेन पक्षे "महानसप्रतियोगिकसादृश्यवान् पर्वत" इत्येवं रूपेणान्वेति,**कारकं च** -"भूतले न घटः","भूतले घटः"इत्यादिषु अधिकरण -कारकं, **नञादिषु** - प्रथमोदाहरणे नञर्थाभावे, द्वितीये च घटे एव, **अन्वेति** - क्रियान्वयं विना साक्षात् अन्वेति, इति तथा स्वीक्रियते चेत् "पुष्पेभ्यः" इति यत्र चतुर्थ्यन्तमात्रं तत्र चतुर्थ्याः साधुत्वसिद्ध्यर्थं, **स्पृहिकल्पना** - स्पृहयतेरध्याहारः, त्यज्यतामिति कारिकार्थः।नैयायिका हि तत्र चतुर्थीविभक्तेः साधुत्वार्थं स्पृहयतीति शब्दाध्याहारमेव कथयन्ति, न वा अर्थाध्याहारं, न वा तदर्थकधात्वन्तरघटितपदाध्याहारम्। अत्र चोपष्टम्भकतया "स्पृहेरीप्सितः" (पा. 1.4.36) इत्यनुशासनमेव प्रमाणयन्ति। परार्थानुमाने उदाहरणस्थवतेर्विषये, तथा कारकाणां विषये च पाणिनीयमनुशासनं नानुसरन्ति। अतः कुत्रचिदनुशासनानुरोधः कुत्रचित् परित्यागश्च नैयायिकानामयुक्त इति भावः। तदेव उपपादयति - "**पर्वतो वह्निमान्**" इत्यादि। **अनुशासनविरोधेऽपी**ति। "तेन तुल्यं क्रिया चेद्वतिः" (पा. 5.1.115) "कारके" (पा. 1.4.23) इत्यनुशासनविरोधेऽपीत्यर्थः। साधुत्वं च व्याकरणव्यङ्ग्यः जातिविशेषः। तच्च व्याकरणशास्त्रानुसारेणैव भवति। व्याकरणं च वैयाकरणानां कृते नास्माकमिति यदि नैयायिकः अभिप्रैति, व्याकरणं विनापि साधुत्वमनुभव - बलात् उपपादयितुमिच्छति, तर्हि सर्वथा व्याकरणं परित्यक्तव्यमेव। क्वचित्स्थले व्याकरणानुरोधः, क्वचिन्नेति अयुक्तमेव। अतश्च "पुष्पेभ्यः" इत्यादौ व्याकरणमनुसृत्य चतुर्थ्युपपादनं क्रियते,तर्हि महानसवदित्यत्रापि व्याकरणमनुसृत्यैव बोधः वर्णनीयः।स चेत्थम् - "महानसवत् " इत्यत्र महानसपदं महानसवृत्तिवह्निकर्तृकसत्तापरम्। पर्वतपदं च तद्वृत्तिवह्निपरम्।अस्तीत्यध्याहारः।तथा च महानसवृत्ति-

वह्निकर्तृकसत्तासदृशी पर्वतवृत्तिवह्निकर्तृकसत्ता इति बोधः। ततश्च वत्यर्थस्य सादृश्यस्य प्रतियोगित्वमनुयोगित्वं च क्रियाया एव सिद्ध्यति। एवं "भूतले घट" इत्यत्रापि अस्तीत्यध्याहृत्य भूतलाधिकरणवृत्तिः घटकर्तृकसत्ता इत्येव बोधः। "भूतले न घटः" इत्यत्र भूतलाधिकरणवृत्तिः या घटकर्तृका सत्ता तत्प्रतियोगिकः अभावः, अभावप्रतियोगिनी सत्ता इति वा बोधः। तथा च परार्थानुमानस्वरूपं केनचिद्वेदान्तिना प्रतिपादितं "पर्वतो वह्निमान् भवितुमर्हती"त्यादि रूपमेव युक्तम्। महानसपर्वतयोः सादृश्यं तु पार्ष्टिकमिति भावः। उक्तं च **परीक्षायाम्** - "एवं च स्वसिद्धान्तानुरोधेन "भूतले न घट" इत्यस्यान्वयबोधजननायास्तीति पदमध्या- हार्यम्। "पर्वतो वह्निमान्" इत्यत्रापि भवितुमर्हतीति पदमध्याहार्यम्। प्रतिज्ञा- वाक्यमपि "पर्वतो वह्निमान् भवितुमर्हति" इत्याकारकमेव प्रयोक्तव्यम्। तत्रार्हण- क्रियायामुदाहरणवाक्यघटकवतिप्रत्ययार्थसादृश्यस्यान्वयः। वत्प्रकृतिमहानसादि- शब्दानां महानसादिकर्तृकभवने लक्षणा चाङ्गीकार्या। "तेन तुल्यं क्रिया चेद्वतिः" (पा. 5.1.115) इत्यनुशासनानुरोधादिति भावः।" इति। । **अनुशासनानुरोधे**ति। शब्दानुशासनस्य कुत्रचित् अनुसरणं, तर्हि तत्तुल्येऽन्यत्रापि अनुसरणमेव युक्तम्। अथ अननुसरणं, तर्हि तत्तुल्येऽन्यत्रापि तदननुसरणमेव युक्तम्। एकत्रानु- सरणं, एकत्राननुसरणमिति अयुक्तम्। "तेन तुल्यं क्रिया चेद्वतिः" (पा. 5.1.115) इति सूत्रं "स्पृहेरीप्सित" (पा. 1.4.36) इतिवत् प्रमाणमेव। उभयोरपि ऋषि- प्रोक्तत्वात् साधुत्वान्वाख्यापकत्वाच्च। तयोर्मध्ये एकस्य प्रामाण्यमपरस्याप्रामाण्य- मित्यत्र किमपि विनिगमकं नास्ति। अतः अनुसरणीयं चेदुभयमप्यनुसरणीयम्। त्यक्तव्यं चेदुभयमपि त्यक्तव्यम्। अर्धजरतीकामुकवत् एकस्मिन् विषये इच्छा, अन्यस्मिन् विषयेऽनिच्छा न युक्तेति भावः।

तदेव उपपादयति - **अर्धजरतीये**ति। यथा च कश्चित् कामुकः जरत्याः मुखं न कामयते, अङ्गान्तरं तु कामयते, तथा अत्र शास्त्रे शास्त्रैकदेशानुरोधकामना, शास्त्रैकदेशाननुरोधकामना च न युक्ते इत्यर्थः। व्यतिरेके चायं दृष्टान्तः।

18.1. अर्धजरतीयशब्दविचारः

अथात्रार्धजरतीयशब्दव्युत्पादनविषयकः विचारः क्रियते। अत्रास्ति महान् मत- भेदः व्याख्यातृषु। तदेव किञ्चिदत्र प्रस्तूयते। अत्र **दर्पणः** - "इदमर्थे गहादित्वात् छः, क्वचिदनुशासनानुरोधः, क्वचिन्नेत्यर्धजरतीसदृशमित्यर्थः। तथा च

स्वीय-सिद्धान्तप्रच्युतिरूपबाधकभिया अत्रापि "पर्वतो वह्निमान् भवितुमर्हती"त्येव प्रतिज्ञा अङ्गीकरणीया, न तु क्रिया वाचकपदशून्या सेति नोक्तनियमे व्यभिचारः, "भूतले न घट" इत्यादौ यद्वक्तव्यं तदुक्तं, वक्ष्यते वाधिकमिति भावः।" इति। **काशिकायां** "जरत्याः अर्धमिति अर्धजरती। तत्सदृशमर्धजरतीयम्। "समासाच्च तद्विषयात् " (पा. 5.3.106) इति छः। यथा जरत्याः अर्धं कामयतेऽर्थं नेति तथेत्यर्थः" इति व्याख्यातम्। **परीक्षायां** गहादित्वात् छः अर्धजरतीसादृश्यमित्यर्थः। क्वचिदनुशासनोपादानं, क्वचित् त्याग इति रीत्या त्यागोपादानाभ्यामर्धजरतीसादृश्यम्।" इति दर्पण एवानूदितः। **सरला** तु काशिकानुसारिणी। **प्रभायां** तु "जरत्याः अर्धम् अर्धजरती। तत्सदृशमर्धजरतीयम्। "समासाच्च तद्विषयात् " (पा. 5.3.106) इतीवार्थे छः। यद्वा गहादित्वात् भवार्थे छः" इति काशिक - दर्पणयोः अनुवादः कृतः। ततः परं भाष्यसम्मतोऽप्ययं न्याय इति "अणिञो" (पा.4.1.78)रिति सूत्रभाष्यसन्दर्भः उदाहृतः। अर्धजरतीसदृशं शास्त्रस्य त्यागोपादानं, तत्सदृशं च औचित्यानौचित्यम्। एकं सादृश्यं समासार्थः। द्वितीयं चेवार्थः।" इति व्याख्याय इवार्थविषयकसमासात् इवार्थे छप्रत्ययेन काकतालीयमिव अर्धजरतीयमिति सूचितम्। अत्र समासस्य इवार्थकत्वं यद्यपि सूचितम् , अथापि स्पष्टतया "अर्धमिव जरतीव" इति काकतालवत् पूर्वोत्तरपदयोः द्वयोरपि इवार्थकत्वं वा, "अर्धं जरत्या इव" इति इवार्थकत्वं वा, "अर्धं जरती इव" इति इवार्थकत्वं वेति स्पष्टतया नोक्तम्। **शाङ्कर्यां** तु - "अर्धं जरत्याः अर्धजरती, तत्सदृशमर्धजरतीयम्। "समासाच्च तद्विषयात्" (पा. 5.3.106) इति इवार्थे छप्रत्यय इति व्याचक्षते (काशिकाकाराः इति शेषः)। किंत्वत्रार्धजरतीत्येकदेशिसमासस्य इवार्थविषयत्वं कथमिति चिन्त्यम्। एकदेशिसमासोत्तरं गहादित्वादिदमर्थे छ इति व्याख्यानेऽपि (दर्पणकाराणां), एकदेशिसमासस्य पूर्वपदार्थप्रधानत्वात् जरत्याः अर्धस्य इदमित्यर्थः स्यात् , स तु नेष्टः, किञ्च जरत्याः अर्धमिदमिति अर्धस्येदं शब्दस्य च सामानाधिकरण्यमभीष्टं न स्यात् , अतः "शिवभागवत" इत्यत्रेव युगपद् वृत्तिः करणीया। अत्र शिवभगवच्छब्दयोः पूर्वं कर्मधारये कृते, ततस्तद्धितवृत्तौ शैवभागवत इति स्यात्। आदौ तद्धितवृत्त्या भागवतं संसाध्य पश्चाच्छिवेन समासविवक्षायां शिवस्य भगवत्यन्वयो न स्यात्। वृत्त्यन्तर्गतत्वेन भगवच्छब्दार्थस्य एकदेशत्वात् पदार्थः पदार्थेनेति न्यायात्।

अतस्तत्र शिवभगवच्छब्दयोः, भगवदपत्यार्थयोश्च युगपद्वृत्तिद्वये कृते शिवस्य भगवतोऽपत्यमिति वृत्त्यर्थावबोधकं वाक्यं भवति। तद्वत् जरत्याः अर्धेन इदमर्थेन च सम्बन्धविवक्षायां युगपद्वृत्तिद्वये कृते जरत्याः इदमर्धमिति वृत्त्यर्थावबोधकवाक्ये इदमर्धशब्दयोः सामानाधिकरण्यं सिध्यति। जरत्या इदमिति जरतीयं, अर्धं च तज्जरतीयं चेति कर्मधारये कृते इदन्त्वेन विवक्षितं यज्जरतीसम्बन्धि तदर्धमित्यर्थबोधात् निरुक्तरीत्यापि अर्धेदंशब्दयोः सामानाधिकरण्यं निर्वोढुं शक्यम्। ततश्च जरत्याः इदमर्धं कामयते, इदं नेत्ययुक्तं, तथा क्वचित् पाणिन्यनुशासनमनुस्रियते, क्वचित्त्यज्यते चेत्येतदप्यर्धजरतीसादृश्यादत्यन्तायुक्तमिति भावः" इति गहादित्वात् छप्रत्यय इति दर्पणकाराशयः समर्थितः, काशिकाकारस्य च आशयस्य चिन्त्यता प्रतिपादिता। **तत्त्वदर्शिनी**कारास्तु "समासाच्च तद्विषयात्" (पा. 5.3.106) इति छः। तथा हि - "समासाच्च तद्विषयात्" (पा. 5.3.106) इत्यनेन इवार्थविषयसर्वावयवकात् समासात् इवार्थे छविधानात् समासे इवार्थद्वयनिर्वाहाय जरतीशब्दो जरत्याः अर्धान्तरे, नाम तस्याः जघनरूपे अर्धान्तरे वर्तते। अर्धशब्दश्च प्रत्यासत्त्या जरत्या एवार्धान्तरे मुखे वर्तते। अर्धमिव जरतीव इत्यर्धजरती। इवार्थे समासः अनेन छ विधानेन ज्ञाप्यते। पूर्वोत्तरपदयोः (अर्धजरतीशब्दयोः) जरत्यर्धकामना-जरत्यर्धाकामनयोः लक्षणा। सामानाधिकरण्येन च तयोरन्वयः। एवञ्च जरत्यर्धकामना-जरत्यर्धाऽकामनासदृशरूपोऽर्थः समासेन बोध्यते। स च प्रकृते शास्त्रानुरोधकामना, तदनुरोधाकामनारूपः। स एवोपमेय - भूतोऽर्थः। तस्माच्च समासात् प्रकृतसूत्रेणेवार्थे छः। अर्धजरतीवार्धजरतीयम्। कामुकनैयायिकयोः प्रवृत्त्योरुपमानोपमेयभावः। स्पष्टं चेदं "अणिञोरनार्षयोः" (पा. 4.1.78) इति सूत्रे भाष्यप्रदीपोद्योते" इति उद्योतस्थं नागेशमतमेव अनूचुः। अयमत्र सङ्ग्रहः - दर्पणकारस्तावत् अर्धजरतीयशब्दं गहादिषु अन्तर्भाव्य इदमर्थे छप्रत्ययेन साधयति। सरलापरीक्षाकारावपि तथा। शाङ्करीकारोऽपि शिवभागवत -वत् युगपद्वृत्तिद्वयमाश्रित्य गहादित्वात् छप्रत्ययेन अर्धजरतीयशब्दं साधयति। तथा चैतेषां मते "जरत्याः अर्धस्य इदम्" इति, "जरत्याः इदमर्धम्" इति वा अर्ध -जरतीयशब्दस्य विग्रहः सिध्यति। इदमर्थश्च सादृश्यानुयोगी द्वितीयकल्पे। अर्धशब्दश्च तत्कामनायां लाक्षणिकः। ततश्च जरत्याः अर्थविषयककामनासदृशी नैयायिकशास्त्रैकदेशानुरोधकामनेत्यर्थः। प्रथमकल्पेऽपि अर्धशब्दस्य लक्षणया

तद्विषयककामना अर्थः। सा उपमानभूता। इदं शब्दश्च उपमेयभूतनैयायिककामनां बोधयति। षष्ठी एवात्र द्वयोः सादृश्यसम्बन्धं बोधयति इति तेषामाशयः। काशिकायां "जरत्या अर्धमर्धजरती, तत्सदृशमर्धजरतीयमि" ति "समासाच्च तद्विषयात् " (पा. 5.3.106) इति छप्रत्ययः" इत्युक्तम्। "समासाच्च तद्विषयात् " (पा. 5.3.106) इति सूत्रेण इवार्थविषयकात् समासात् इवार्थे छप्रत्यय इति सर्वविदितोऽयं विषयः। ततश्च अर्धजरतीशब्देऽपि इवार्थप्राधान्यं प्रदर्शनीयम्। तदर्थबोधकविग्रहे इवशब्दः आवश्यकः। स च प्रकाशितकाशिकाग्रन्थे न दृश्यत इति काशिकाग्रन्थे प्रकाशिते उपलभ्यमानं पाठमाश्रित्य शाङ्कर्यामाक्षेपः कृतः। ग्रन्थस्य चिन्त्यताप्युक्ता। वस्तुतस्तु जरत्याः अर्धमिव अर्धजरती इति,तत्र इवशब्दघटितः पाठ एव काशिकाकाराभिमतः इति अवश्यमेव वक्तव्यम्। अन्यथा "समासाच्च तद्विषयात् " (पा. 5.3.106) इति सूत्रेण छप्रत्ययः एव न स्यात्। अत्र पक्षे अर्धशब्दस्य तत्कामनाकामनयोः लक्षणा। तत्सदृशे नैयायिकस्य शास्त्रानुरोधाननुरोधकामने समासार्थभूते। छप्रत्ययान्तस्य च कामुकप्रवृत्तिसदृशीनैयायिकप्रवृत्तिरर्थः। प्रभाकारस्याप्ययमेवाशयः। तत्त्वदर्शिनीकाराणामपि आशयः अयमेव। परन्तु अर्धजरतीशब्दे ते जरत्याः अर्धमिव, जरत्या अर्धे इव इति वा विग्रहं न स्वीकुर्वन्ति। किन्तु - "अर्धमिव जरती इव" इति विग्रहं स्वीकुर्वन्ति। इवार्थविषयकसर्वावयवकात् एव समासात् छप्रत्यय इति तत्सूत्रार्थ इति तेषामाशयः। एवञ्च "काकताल"मित्यत्र यथा विग्रहः तथैवात्रापि इति तेषामाशयः। वस्तुतः अयं नागेशस्यैव आशयः। "अणिञो" (पा. 4.1.78)रिति सूत्रे भाष्यवार्तिकयोरुल्लिखितस्य अस्य उद्योते इत्थमेव विग्रहः प्रदर्शितः।

इदमत्र विचारणीयम्। अत्र छप्रत्ययः गहादित्वाद्वा, समासाच्चेत्यादिना वेति। प्रकृतः सन्दर्भः पक्षेऽपि वत्यर्थः कारकं च नञादिष्वन्वेति इति वदतां नैयायिकानां निरासः। पाणिनीयमनुशासनमाश्रित्य "तेन तुल्य" (पा. 5-1-115)मिति सूत्रेण विहितस्य वतिप्रत्ययान्तस्य क्रियायामन्वये एव साधुत्वं, तथा कारकाणामपि क्रियान्वयेनैव साधुत्वमिति उभयत्र पाणिनीयमाश्रित्य क्रियायामेव अन्वयः वक्तव्यः। अथ पाणिनीयमुल्लङ्घ्य स्वेच्छया तत्रान्वयनिर्णयः क्रियते, तर्हि "पुष्पेभ्यः" इत्यादिचतुर्थ्यन्तार्थस्यापि कुत्रचित् अक्रियायामन्वयो भवतु, ततश्च तत्र चतुर्थ्याः साधुत्वार्थं स्पृहधातुरध्याहरणीयः, तत्रैवान्वयः वक्तव्य इति भवद्वचनमयुक्तम्।

"पुष्पेभ्यः" इत्यत्र पाणिन्यनुरोधेन स्पृहिकल्पना चेत् , महानसवत् इत्यत्रापि पाणिन्यनुरोधेन क्रियान्वयकल्पनैव युक्ता। अनुशासनस्य एकत्र स्वीकारः अन्यत्र त्याग इत्येवं रूपस्य अर्धजरतीयस्य अनुचितत्वात्। इति। तस्मादत्र इवार्थद्वय-मावश्यकम्। समासेन हि कामुककामनाकामनासदृशे नैयायिकशास्त्रानुरोधा-ननुरोधकामने बोधनीये। छान्तेन च तदुपलक्षितयोः कामुकनैयायिकयोः प्रवृत्त्यो-रुपमानोपमेयभावः वक्तव्यः। ततश्च कामुकप्रवृत्तिवत् नैयायिकप्रवृत्तेरनुचितत्वम् उपहासास्पदत्वं च ज्ञायते इति अन्वयदृष्टान्ततापि अत्र वक्तुं शक्यते। तथा च कामुकप्रवृत्तिसदृशीनैयायिकप्रवृत्तिः नोचितेति भावः। एकदेशिसमासात् इदमर्थे, भवार्थे वा गहादित्वं प्रकल्प्य छप्रत्ययेऽपि उपमानोपमेयभावः स्पष्टं न प्रत्येतुं शक्यः। युगपद्वृत्तिद्वयकल्पना तु निष्प्रमाणा, अभिप्रेतार्थासाधिका च।

अयं च अर्धजरतीन्यायः "अणिञोरनार्षयोः" (पा. 4.1.78) इति सूत्रे भाष्य-वार्तिकयोः उदाहृतः। तथा हि - अनेन सूत्रेण गोत्रे यावणिञौ विहितौ लौकिकौ, तदन्तयोः गुरूपोत्तमयोः प्रातिपदिकयोः ष्यङ् विधीयते। अयं ष्यङ् आदेशो वा प्रत्ययो वेति विकल्प्य भाष्ये पक्षद्वये गुणदोषौ विचारितौ। आदेशपक्षश्च समर्थितः सूत्रे षष्ठीनिर्देशमाश्रित्य। अथ प्रत्ययत्वे ष्यङि अनुबन्धाकरणत्वरूपं लाघवं समर्थ्य, आदेशपक्षेऽपि तत्समर्थयितुं प्रयासः कृतः - "आदेशत्वेऽपि अनुबन्धो न कर्तव्यः। इञः यादेशेऽपि "यङः चाप्" (पा. 4.1.74) इति चापः अप्राप्तावपि टापा एव रूपसिद्धिर्भवति।न च यादेशे स्थानिवद्भावेन ञित्त्वात् "ञ्नित्यादि-र्नित्यम् "(6.1.197) इति आद्युदात्तस्वरः स्यादिति वाच्यम्। इञि ञकारस्य इत्संज्ञामकृत्वैव यादेशात् तत्र ञित्त्वाभावात् नाद्युदात्तस्वरः।अतः आदेशपक्षेऽ-पि लाघवमेव" इति। तदा प्रत्ययत्ववादिना आदेशपक्षे अनुबन्धाकरणे दोष-प्रतिपादनमित्थं कृतम् - "*अस्थानिवत्वे दोषस्ते वृद्धिरत्र न सिध्यति।* अस्थानिवत्वे दोषो वृद्धिस्ते न प्राप्नोति औडुलोम्या, शारलोम्येति। *न वार्ध-जरतीयत्वं स्वरो मे न भविष्यति।* न चेदानीमर्धजरतीयं लभ्यम् - वृद्धिर्मम भविष्यति, स्वरो नेति। तद्यथा - "अर्द्धं जरत्याः कामयतेऽर्द्धं नेति॥" अस्याय-माशयः - इत्संज्ञामकृत्वा इञः यादेशेन ञित्त्वप्रयुक्तः आद्युदात्तस्वरः वारयितुं शक्यः। अथापि आदेशयकारे ञित्त्वाभावात् औडुलोम्या, शारलोम्या इत्यादिषु "तद्धितेष्वचामादेः" (पा. 7.2.117) इति आदिवृद्धिः न सिध्यति। ततश्च इञः

ञकारस्येत्त्वं वक्तव्यम्। तथा सति स्थानिवद्भावेन यादेशे ञित्त्वेन वृद्धिः साधयितुं शक्या, परन्तु ञित्त्वप्रयुक्तः आद्युदात्तस्वरोऽपि स्यात्। अथेदानीं वृद्धिरस्तु, स्वरो मास्तु इति तु वक्तुं न शक्यते, कार्यविशेषाय ञित्त्वस्य स्वीकारः, कार्यान्तराय तत्परित्याग इति अर्धजरतीयत्वम् आश्रयितुं न शक्यम्। इति। अत्र अर्ध-जरतीयमिति प्रतीकमुपादाय कैयटः - "समासाच्च तद्विषयात्" (पा. 5.3.106) इति छप्रत्ययः। "मुखं न कामयते, अङ्गान्तरं तु जरत्याः कामयते" इति। अस्यैव कैयटग्रन्थस्य विवरणमित्थं विहितम् नागेशेनोद्योते - "इवार्थे समासः, इवार्थे प्रत्ययइतीवार्थद्वयनिर्वाहाय जरतीशब्दोऽर्थान्तरे वर्तते, अर्धशब्दश्च प्रत्यासत्त्या जरत्याः एवार्द्धान्तरे, तौ च कामनाऽकामनालाक्षणिकौ। एवञ्च तादृशकामनाऽ-कामनादिसदृशवृद्ध्यादिकामनाऽकामनाप्रयोज्या, तज्जन्यप्रवृत्तिसदृशी तव प्रवृत्ति-रित्यर्थः। व्यतिरेके च दृष्टान्तः। यथा तत्र विषयभेदात्तादृशकामनादि तथा प्रवृत्त्यादि च वक्तुं शक्यं, नैवं प्रकृते, एकनिमित्तत्वात् कार्यद्वयस्येति तात्पर्यम्" इति।

18.2. समासाच्च तद्विषयात् - सूत्रपर्यालोचनम्

अथात्र "अर्द्धजरती" शब्दे विग्रहः कथम्? एतत्समालोचयितुं प्रथमं "समासाच्च तद्विषयात्" (पा. 5.3.106) इति सूत्रं पर्यालोचनीयम्। तत्रेदं भाष्यम् - "तदित्यनेन किम् प्रतिनिर्दिश्यते? छः। कथं पुनः समासो नाम छविषयः स्यात्? (अनेनैव छस्य विधानात् छविषयस्यार्थस्य अनुवादो नोपपद्यत इति भावः) एवं तर्हि इवार्थः। (इवार्थविषयात् समासात् छः इत्यर्थः) यदि तर्हि समासोऽपीवार्थे, प्रत्ययोऽपि, समासेनोक्तत्वात् प्रत्ययो न प्राप्नोति। (उक्तार्थानामप्रयोग इति न्यायादिति भावः) एवं तर्हि द्वाविवार्थौ। (समासेन प्रतिपाद्यः इवार्थः, छेन प्रतिपाद्यश्च भिन्नौ। अतः समासेन एकस्य इवार्थस्य अभिधानेऽपि, द्वितीयस्य अनुक्तत्वात् तत्र छो भवतीत्यर्थः।) कथं? (एतदेव दृष्टान्तमुखेन दर्शयति) काकागमनमिव, तालपतनमिव काकतालम्। काकतालमिव काकतालीयम्।" इति। अत्र कैयटः - "वृत्तिविषये काकतालशब्दौ काकतालसमवेतक्रियावाचिनौ। तत्र काकागमनं देवदत्तागमनस्योपमानम्, तालपतनं दस्यूपनिपातस्य। तालेन तु यः काकस्य वधः सः देवदत्तस्य दस्युना वधस्योपमानमिति वधादिः काकतालीयादिशब्दवाच्यः सम्पद्यते।" इति। तथा चात्रोदाहरणे "काकतालीय" इति

छान्तान्तर्गत "काकताल"शब्दस्य "काक इव, ताल इव" इति विग्रहः प्रदर्शनीयः। काकतालौ च तत्समवेतक्रियालाक्षणिकौ। अत्र च समासे उपमेयभूतयोः देवदत्त-दस्युसमवेतयोः क्रिययोः प्राधान्यम्। तल्लक्षितश्च काकवधसदृशः देवदत्तस्य वधः तद्धितवृत्तिविषयः।

अथात्र कश्चन प्रश्नः। इवार्थविषयकात् समासात् इवार्थे प्रत्यय इत्युक्ते "शस्त्री - श्यामे"ति समासात् छः भवति वा न वा? न भवति। कुतः? शस्त्रीश्यामादीनां तु अन्तर्भूतेवार्थानाम् उपमेयप्रधानानाम् उपमेयान्तरेण सम्बन्धाभावाच्छस्य न प्रसङ्गः इति कैयटः। अत्र नागेशः - "यद्यपि शस्त्र्युपमितदेवदत्तस्यान्यत्रोपमानत्वं वक्तुं शक्यं तथापि तत्र यदि श्यामत्वेनैव सादृश्यं तर्हि शस्त्रीश्यामपदप्रयोगेणैव सिद्धावितरवैयर्थ्यम् , धर्मान्तरेण तु सादृश्यं न प्रतीयत इति भावः। किञ्च तद्विषयादित्यस्य इवार्थविषयसर्वावयवकादित्यर्थः। शस्त्रीश्यामेत्यादौ पूर्वपदमेव इवार्थविषयमिति न दोषः।" इति। ननु काक इव ताल इवेति विग्रहे काकताल-पदार्थयोः परस्परमन्वयाभावात् सामर्थ्याभावात् समासो न स्यादिति चेन्न। तयोः द्वयोरर्थयोः सामानाधिकरण्येन अन्वयः स्वीक्रियते। तथा हि - "काकताल"शब्दे पूर्वपदमुपमानकाकागमनपरम्, उत्तरपदं च उक्तपूर्वपदार्थसमानाधिकरणोपमान-तालपतनपरम्। समुदायश्च उपमेयदेवदत्तागमनसमानाधिकरणचोरपतनपरः। एवञ्च उपमानकाकागमनसमानाधिकरणोपमानतालपतनोपमेयं देवदत्तागमन-समानाधिकरणं चोरपतनमित्यर्थः। अत्र विशिष्टयोः एव उपमानोपमेयभावः। विशिष्टे विशिष्टनिरूपितोपमेयत्वबोधात् विशेषणे विशेषणनिरूपितम् , विशेष्ये विशेष्यनिरूपितं च तदौपम्यं पर्यवस्यति। ततः तद्धितसमभिव्याहारे समासा - र्थोपमानप्रयोज्योपमानभूततालकृतकाकवधोपमेयः समासार्थोपमेय(देवदत्तागमन-समानाधिकरणदस्युपतन)प्रयोज्यः चोरकृतो देवदत्तवध इति बोधः। "काकताल" इति समासश्च अस्मादेव ज्ञापकात् , सुप्सुपेति वा। द्वन्द्वस्तु नात्र । सहविवक्षायाः अभावात्।

पूर्वोक्तस्य समासाच्चेति सूत्रव्याख्यायाः अयं सारः - इवार्थविषयकात् समासात् इवार्थे छप्रत्ययः भवति। अत्र समासोऽपि न विध्यन्तरप्राप्तः किन्तु छविधि-सामर्थ्यादेवाभ्यूहितः। एवञ्च यत्र सूत्रान्तरेण इवार्थे समासः न प्राप्तः, यत्र च इवार्थ एव विशेष्यभूतः अन्यपदार्थः, तत्र छविधानात् ज्ञापकात् समासः। ततश्च

इवार्थान्तरे छप्रत्ययः। अत्र नागेशः पूर्वोत्तरपदयोः द्वयोरपि इवार्थे वर्तमानत्वे एव अस्य सूत्रस्य प्रवृत्तिरिति मन्यते। यद्यप्येतत् न भाष्यकारेण कण्ठतः उक्तम् , अथापि काकागमनमिव, तालपतनमिवेति "काकताल"शब्दस्य छप्रकृतेः अर्थप्रदर्शनात् ज्ञायते इति तस्याशयः। शस्त्रीश्यामादिषु उभयोः पूर्वोत्तरपदयोः इवार्थेऽवर्तमानत्वात् न छ इति च मन्यते। न्यासकारादयस्तु इवार्थान्यपदार्थात् समासात् इवार्थे छप्रत्यय इति स्वीकुर्वन्ति। उक्तं च **न्यास**कारेण "यदीवार्थ-विषयात् समासाच्छो विधीयते, शस्त्रीश्यामा, पुरुषव्याघ्र इत्यत्रापि प्राप्नोति। नैष दोषः। नह्यत्र समास इवार्थे वर्तते। किं तर्हि पूर्वपदमुत्तरपदं वा। शस्त्री वा(इव) श्यामा, पुरुषोऽयं व्याघ्र इवेति। अथाप्येकदेशस्यैवेवार्थे वर्तमानत्वात् समासोऽपी -वार्थ उच्यते, तथापि समासेनैवोक्तत्वात् न भविष्यति। यस्तु समासः स क इवार्थे वर्तते, समासार्थादपर इवार्थो यत्रास्ति तत्रायं प्रत्यय उक्त" इति। **पदमञ्जर्या**मपि शस्त्रीश्यामेत्यादौ एक एव इवार्थः, सोऽपि समासेऽन्तर्भूत इति छो न भवती-त्युक्तम्। अत्र समासेऽन्तर्भूत इति कथनेन तस्यार्थस्य अप्राधान्यं बोधितं भवति। एवञ्च यत्र इवार्थः अन्वितपदार्थाऽविशेषणीभूतस्सन् प्रधानतया भासते, तादृशे-वार्थविषयात् छप्रत्ययविधानज्ञापकसिद्धात् समासात् इवार्थे छप्रत्यय इत्यर्थः। इवार्थप्राधान्यं चोपमेयप्राधान्यरूपम्। तस्य च अन्यपदार्थत्वेन भानं समासे।

अथार्द्धजरतीयशब्दविषये किञ्चित् पर्यालोचयामः। अयं "समासाच्च तद्विषयात्" (पा. 5.3.106) इति सूत्रविहितछप्रत्ययान्तत्वेन साधनीयश्चेत् "अर्धजरती"ति समासस्य विग्रहः कथम् ? अर्धमिव, जरतीव, अर्धजरतीशब्दौ जरत्याः मुख-जघनसम्बन्धि-अकामनाकामनवाचकौ। तत्तुल्ये नैयायिकशास्त्रानुरोध कामनाऽ-कामने समासार्थः इति नागेशः। अत्र तु अनौचित्यमेव नास्ति।

काकतालीयादिषु नान्या गतिः। परन्तु अर्धजरतीये पदद्वये लक्षणां विनापि इवार्थ-विषयः समासः विध्यन्तरेण अप्राप्तः उपपादयितुं शक्यः। जरत्याः अर्धे इव "अर्ध -जरती" इत्यपि विग्रहः वक्तुं शक्यः। अत्र चेवार्थस्याधिकस्य भानात् न केनापि सूत्रेण समासः प्राप्तः। इवार्थ एवात्र प्रधानः। अत्र अर्धशब्दस्यैव अर्धद्वयविषयक-कामनाकामनयोः लक्षणा। एवञ्च जरत्याः उत्तरार्धविषयकामनापूर्वार्धविषयाऽ-कामनातुल्ये शास्त्रानुरोधाननुरोधकामनेत्यर्थः। तत्प्रयोज्योपमानभूतकामुक-प्रवृत्त्युपमेयभूता नैयायिकप्रवृत्तिः छप्रत्ययार्थः। अथ अर्धशब्दे जात्येकवचनता-

माश्रित्य "जरत्याः अर्धमिव" इत्यपि विग्रहः भवितुमर्हति। अर्धविषयककामना-तुल्या शास्त्रैकदेशानुरोधकामना इति समासार्थः, परिशेषाच्च अन्यार्धविषयकाऽ-कामनायाः बोधः। तत्प्रयोज्यकामुकप्रवृत्तितुल्या नैयायिकप्रवृत्तिरित्यर्थः। अयमेव काशिकाकारस्य आशयः स्यात्। **सरलायां** - "जरत्याः अर्धमिव अर्धजरती, तत्सदृशमर्धजरतीयम्। "समासाच्च तद्विषयादि" (पा.5.3.106) ति छः। यथा जरत्याः अर्धं काम्यतेऽर्धं न, तथात्रायुक्तमिति" काशिकाशय एवानूदितः।

दर्पणकारादीनां गहादित्वकल्पनं तु नोक्तार्थसाधकम्। तथा हि - अर्धं जरत्याः अर्धजरती। तस्या इदमिति अर्धजरतीयमिति शब्दस्य यथा कथञ्चित् निर्वाहेऽपि कामुकनैयायिककामनयोः कामुकनैयायिकप्रवृत्त्योश्च उपमानोपमेयभावः सम्यक् न भासते। एतादृशमेव इवार्थे कन् प्रत्ययकल्पनमपि।

यदप्युक्तं शङ्करशास्त्रिभिः "जरत्या अर्धस्येदमिति अर्थो नेष्टः" इति तदपि न युक्तम्। शिवभागवतवत्समासकल्पनापेक्षया अत्र अर्धशब्दस्य तत्कामनाकामना-विषयकलक्षणया, तत्सम्बन्धितां च तत्सादृश्येनेति स्वीकृत्य उक्तकामुककामनाऽ-कामनतुल्ये नैयायिकशास्त्रानुरोधाननुरोधकामने इति व्याख्यातुं शक्यत्वात्। परन्तु अत्र कामुकनैयायिकयोः प्रवृत्तिसादृश्यं न लक्ष्यते। यदप्युक्तं तैरेव एकदेशि-समासस्य इवार्थविषयत्वाभावात् "समासाच्च तद्विषयात्" (पा. 5.3.106) इति छो न भवतीति, तदपि न युक्तम्। जरत्याः अर्धमिव, जरत्याःअर्धं इव इति विग्रहे नायमेकदेशिसमासः, इवार्थस्य अधिकस्य मुख्यतया भानात्। तस्मादयमपरः इवार्थविषयकः समासः यस्तावत् छप्रत्ययविधानसामर्थ्यात् सिध्यति, यस्य छप्रत्ययविध्यङ्गतयैव साधुत्वं न स्वातन्त्र्येण। योऽप्यन्यः पक्षः तेषामेव जरत्या इदं जरतीयं, अर्धं च तज्जरतीयं चेति स तु नोक्तार्थसाधक एवेति नितरामुपेक्ष्यः।

अथ मीमांसाकोशे तावत् न्यायसुधाग्रन्थात् अर्धजरतीयन्यायः इत्थमुल्लिखितः "केनचित् पाशुपतेन सर्वजरत्यो योषितोऽनुपभोग्यत्वात् सर्वतरुण्याश्च वृद्धेऽरुचि-प्रसङ्गात् अर्धजरत्यानयने दूतः प्रेषितः" इति। अतश्च अर्धजरतीयशब्दोऽयं अर्थान्तरे सन्दर्भान्तरे च प्रयुज्यत इति ज्ञायते। अस्य निष्पादनं तु गहादित्व-कल्पनया छप्रत्ययेन साधनीयम्। परन्त्वयं न प्रकृतसन्दर्भानुगुणः।

बृहदारण्यकोपनिषद्भाष्ये सन्दर्भान्तरेऽयमर्धजरतीयशब्दः प्रयुक्तः। यथा - "न जानीमो विषयसन्धायामिव अन्तरालेऽवस्थानेऽर्धजरतीयकौशलम्" इति। "यथा

19. कर्त्रादौ विहितानामिन्यादीनां क्रिययैवान्वयः

एवं कर्त्रादौ विहितानामिन्यादीनां क्रिययैवान्वय इत्याह-

अविग्रहा गतादिस्था यथा ग्रामादिकर्म्मभिः।
क्रिया सम्बध्यते तद्वत् कृतपूर्व्यादिषु स्थिता ॥ 19 ॥

न जागर्ति स्वपिति" इति अन्तरालेऽवस्थानं दुर्घटम् , यथा चार्धं कुक्कुट्याः पाकाय, अर्धश्च प्रसवाय इति कौशलन्नोपलभ्यते" इति तद्व्याख्या।

अथ "महानसवत् " इत्यत्र "तेन तुल्यं" (पा. 5.1.115) इति सूत्रेण वतिश्चेत् तस्य क्रियान्वय एव वक्तव्य इति भवितुमर्हतीत्याद्यध्याहारः कार्यः। "तत्र तस्येवे" (पा. 5.1.116)ति वतिश्चेत् तस्य क्रियान्वयनियमाभावात् पक्षे पर्वतादौ अन्वयः सुकरः। **कान्तिकारस्तु** "महानसवत् " इत्यत्र "तत्र तस्येवे" (पा. 5.1.116)ति सूत्रविहितवतिं स्वीकृत्य, तस्य पक्षेऽन्वयस्य युक्ततां प्रतिपादयति। एतच्चायुक्तम्। सादृश्यानुयोगिपर्वतस्यापि सप्तम्यन्तत्वापत्तेः इति **सुबोधिनी**। महानसवत्पर्वते, पर्वतस्य वेत्यापत्तेः इति **प्रभा**। ॥18॥

क्रियाकारकयोः नित्यसाकाङ्क्षत्वात् कारकाणां विशेष्यभूतक्रियायामिव गुणभूत-(विशेषणीभूत)क्रियायामप्यन्वयः, यदि च साध्यस्वभावा सा भवति। कृदन्ते पाचकादिषु धात्वर्थभूतासाध्यस्वभावा क्रिया विशेषणीभूय कृत्प्रत्ययार्थकर्त्रादिषु अन्वेति "सत्त्वप्रधानानि नामानि" इति निरुक्तात् , "प्रकृतिप्रत्ययार्थयोः प्रत्ययार्थः प्रधानम् " इति न्यायाच्च। एवं च "ग्रामं गत" इत्यादिक्तप्रत्ययार्थकर्तृविशेषणी-भूतायामपि साध्यावस्थापन्नायां "गम्"धातुवाच्यायां गमनक्रियायां ग्रामादिकारका-न्वयः भवितुमर्हति, सुबर्थकारकप्रकारकबोधं प्रति धातुजन्यभावनोपस्थिते-र्हेतुत्वस्य पूर्वमेवोपपादितत्वात्। वृत्तौ विशेषणीभूते विशेषणान्वयाभावनियमस्य नित्यसापेक्षविषये सङ्कोचात् इत्युपपादयितुमुपक्रमते - **एवं कर्त्रादाविति**। **एवं** - सम्बोधनाद्यष्टकवत् , **कर्त्रादौ** - कर्तरि भावे च, विहितानाम् , **इन्यादीनां** - इनि, ठन् इति पाञ्चमिकौ तद्धितप्रत्ययौ, क्त्वा,तुमुन् इति अव्ययकृत्प्रत्ययौ च अत्र इन्यादिशब्देन विवक्षिताः, ततश्च तेषां, तदर्थानां क्रिययैव अन्वये साधुत्वमित्यर्थः। "पूर्वादिनिः" (पा. 5.2.86) "सपूर्वाच्च" (पा.5.2.87) "श्राद्धमनेन भुक्तमिनिठनौ" (पा. 5.2.85) "इष्टादिभ्यश्च" (पा. 5.2.88) इति पाञ्चमिकौ इनिठनौ। "समानकर्तृकयोः पूर्वकाले"(पा. 3.4.21)"तुमुण्वुलौ क्रियार्थायाम् क्रियायाम् "

(पा. 3.3.10) इति त्त्वातुमुन्प्रत्ययौ। ततश्च इन्यादीनामित्यत्र आदिशब्दः प्रकारे। पूर्वोक्तौ तद्धितौ इनिठनौ "अनेन" इति कर्तरि विहितौ। ततश्च कर्तृकारकार्थयोः तयोः क्रियायामेवान्वये साधुत्वमित्यर्थः। तथा "अव्ययकृतो भावे" इत्यनुशासनात् अव्ययकृतः भावार्थकत्वेन तस्य च तिङन्तबोध्यप्रधानक्रियायां पूर्वकालिकत्वा- दिनान्वयः,तयोरपि क्रियायामेव साधुत्वमित्यर्थः।तदेवोपपादयति - "**अविग्रहा**" इत्यादिना। इयं कारिका भट्टोजीदीक्षितेन स्वयं न रचिता, अपि तु प्रकृतसन्दर्भोपकारकत्वात् वाक्यपदीयात् गृहीता। वाक्यपदीये तृतीयकाण्डे (का.67) वृत्तिसमुद्देशे वृत्तौ पदार्थैकदेशभूतक्रियायामपि कारकान्वयनिरूपणाय इयं कारिका रचिता। इमां च कारिकां “ननु च तद्धितार्थे कर्तरि गुणीभूता क्रिया वृत्तावभेदेन प्रतीयते।न तु कर्तृभेदेन स्वरूपप्राधान्येनेति कथं तस्याः कटादेः कर्मणो योग इत्याशङ्क्य निदर्शनेनैतद् व्युत्पादयति” इति अवतारितवान् हेला-राजः।"कृतपूर्वी कटम्","अधीती व्याकरणे" इत्यादौ इन्याद्यर्थकर्तुः विशेष्यत्वेन वृत्त्येकदेशक्रियायामन्वयः, कटादेश्च कर्मत्वेन तस्यामेवान्वय इति प्रतिपादन-मस्याः कारिकायाः मुख्यमुद्देश्यम्। स च विषयः प्रकृतसन्दर्भानुगुण इति सा कारिका भट्टोजीदीक्षितेन अत्र संगृहीता। अत्र "ग्रामं गत" इति दृष्टान्तः। "कृतपूर्वी कट"मिति दार्ष्टान्तः।"ग्रामं गत" इत्यादिनिरुपपदकृदन्तेषु कृत्प्रत्ययार्थ- कर्तृकर्मादिविशेषणीभूतक्रियायाम् कारकान्वयः सर्वैरेवाभ्युपगतः। अतस्तदेव दृष्टान्ततया स्वीकृत्य "कृतपूर्वी"त्यादिष्वपि विशेषणीभूतक्रियायाम् इन्यर्थकर्त्रादेः तत्रैव कटादेश्च कर्मणः अन्वय इत्युपपादयति **अविग्रहे** -त्यादिना।अत्रायं विशेषः - यत्र च "गत" इत्यादिषु क्तप्रत्ययार्थकर्तुः विशेष्यत्वेऽपि, तस्य कारकत्वसिद्ध्यर्थं स्वविशेषणीभूतक्रियायामन्वयः वक्तव्यः। कारकस्य क्रियया सह नित्य-साकाङ्क्षत्वात्। तत्तु पूर्वमेवोपपादितम्। अतश्च अयं दृष्टान्तभूतः विषयः जातः। तथैव क्तप्रत्ययार्थगुणीभूतक्रिया ग्रामादिकर्मसम्बन्धमनुभवन्ती अपि दृष्टा।अन्यथा तत्र कारकसुब्विभक्तेरेवानुत्पादात्। अतश्चायं उभयथा दृष्टान्तः।

कारिकायाम् अविग्रहेति पदस्य "नास्ति विग्रहो यस्या" इति नार्थः।वृत्त्यैकदेशार्थ-बोधने विग्रहशब्दाप्रयोगात् , वृत्त्यर्थावबोधकस्यैव विग्रहत्वात्। अतोऽत्र विग्रह-शब्दः यौगिकः इति सूचयन् तदर्थं निरूपयति - **न विविच्येति**।विविच्य ग्रहः

न विविच्य ग्रहः - ग्रहणं यस्याः सा अविग्रहा - गुणीभूतेति यावत्। यथा च "ग्रामं गतः" इत्यत्र क्तप्रत्ययार्थगुणीभूतापि क्रिया ग्रामादिकर्म्मभिः सम्बध्यते, तथा "कृतपूर्वी कटम्" इत्यत्रापि गुणभूता इन्यादिभिरित्यर्थः।

नच वृत्तिमात्रे समुदायशक्तेर्वक्ष्यमाणत्वात् तत्रान्तर्गता भावना पदार्थैकदेश इति कथं तत्रान्वय इति वाच्यम्, नित्यसापेक्षेष्वेकदेशेऽपि "देवदत्तस्य गुरुकुलम्", "चैत्रस्य नप्ता" इत्यादाविवान्वयाभ्युपगमात्। एवं भोक्तुं पाकः, भुक्तवा पाक इत्यत्रापि द्रष्टव्यम् ॥ 19 ॥

यस्याः सा विग्रहा, न विग्रहा अविग्रहेति। विविच्य ग्रहः - भेदेन ज्ञानम्। न विग्रहः यस्याः सा अविग्रहा इति वा विग्रहः। तात्पर्यार्थमाह - न विविच्य ग्रहः यस्या इति। वृत्तौ जहत्स्वार्थाऽभिन्नैकार्थीभावाभ्युपगमेन घटादिषु घटत्वादेरिव गतादिषु गमनादिक्रियायाः पदार्थैकदेशत्वमिति, न तस्याः पृथक् पदार्थत्वमिति, पृथक्पदार्थरूपेण अगृहीता इत्यर्थः।

"विविच्येति। भेदेनेत्यर्थः। विशेष्यतयेति शेषः। कर्तुः सकाशात् पृथक् ग्रहण-रहितेति यावत्। तथा च प्रधानार्थकर्त्रा संसृष्टयापि क्रियया कारकाणामन्वय इति सकलार्थः" इति **कान्तिः**। "विविच्य - पृथग्भूय। इतराविशेषणत्वेनेति यावत्" इति **काशिका**। शाङ्करी-प्रभा-तत्त्वदर्शिन्यः काशिकानुसारिण्यः। वस्तुतस्तु वृत्तिमात्रे समुदायशक्तेः दीक्षितादिभिरङ्गीकारात् गतादिषु गमनादिक्रियायाः पदार्थैकदेशत्वात् तस्याः पृथक् पदार्थत्वेन अभानात् इत्यर्थः। अत्र पृथक्ग्रहण-रहितेति कान्तिव्याख्या युक्ततरा। अत एव "न च वृत्तिमात्रे समुदायशक्ते-र्वक्ष्यमाणत्वा"दित्यादिः अनन्तरं वर्तमानः सारग्रन्थः सङ्गच्छते। ततश्च अविग्रहा इत्यस्य पदार्थैकदेशत्वेन विशेषणीभूतः इत्यर्थः। तदेव वदति - **गुणीभूतेति यावत्** इति। दृष्टान्तमाह -"ग्रामं गत" इति। गम्धातोः "गत्यर्थाकर्मके" (पा.3.4.72)ति कर्तरि क्तः। कृदन्ते सत्त्वप्राधान्यात्, प्रत्ययार्थप्राधान्याच्च क्तप्रत्ययार्थः कर्ता विशेष्यः। तद्विशेषणं च तत्प्रकृत्यर्थः उत्तरदेशसंयोगानुकूलः व्यापारः। तथा च "गत" इत्यस्य संयोगानुकूलव्यापाराश्रयः इत्यर्थः। तत्र प्रत्ययार्थकर्तृविशेषणीभूत-व्यापारजन्यसंयोगाश्रयत्वेन ग्रामस्य कर्मत्वात् "ग्रामम्" इति द्वितीया। ग्रामस्य कर्मणः स्वनिष्ठसंयोगानुकूलत्वसम्बन्धेन क्तप्रत्ययार्थविशेषणीभूते व्यापारेऽन्वयः। तथा च "ग्रामाभिन्नकर्मनिष्ठसंयोगानुकूलव्यापाराश्रयः" इति "ग्रामं गत" इत्यस्य

बोधः। सुबर्थकारकप्रकारकबोधे विशेष्यतया धातुजन्यव्यापारोपस्थितेः कारणत्वात् क्तप्रत्ययार्थविशेषणीभूतायामपि क्रियायां सुबर्थकारकान्वयः स्वीक्रियते। एवं च यथा "ग्रामं गत" इत्यत्र क्तप्रत्ययार्थकर्तारं प्रति विशेषणीभूता तत्प्रकृत्यर्थरूपा गमनक्रिया पदार्थान्तरेण ग्रामरूपकर्मणा सम्बध्यते, गत इति पदार्थैकदेशभूतापि वा गमनक्रिया ग्रामरूपकर्मणा सम्बध्यते, तथा कृतपूर्वीकटमित्यत्रापि इन्यर्थकर्तृ-विशेषणीभूता कृञ्धात्वर्थक्रिया कटादिभिः सम्बध्यते। तदाह - **यथेत्यादि**।

अत्र हि मूलग्रन्थे पाठभेदोऽपि दरीदृश्यते। **प्रभादर्पणाभ्यां** प्रकाशिते, **दर्पण-काशिकाभ्यां** प्रकाशिते, **तत्त्वदर्शिन्या** च प्रकाशिते, भूषणसारे "यथा च - ग्रामं गत इत्यत्र क्तप्रत्ययार्थगुणीभूतापि क्रिया ग्रामादिकर्मभिः सम्बध्यते" इति पाठः दृश्यते। **दर्पणपरीक्षाभ्यां, शाङ्कर्या** च प्रकाशिते भूषणसारे "तथा च ग्रामं गत इत्यत्र यथा क्तप्रकृत्यर्था गुणीभूतापि क्रिया ग्रामादिकर्मभिः सम्बध्यते" इति, **सरलासुबोधिनीभ्यां** प्रकाशिते "तथा च ग्रामं गत इत्यत्र यथा क्तप्रकृत्यर्थो गुणीभूतापि क्रिया ग्रामादिकर्मभिः सम्बध्यते" इति च पाठभेदः उपलभ्यते। तात्पर्यं तु एकमेव। शाङ्करीसरलापाठौ यद्यपि समौ अथापि "क्तप्रकृत्यर्था" "क्तप्रकृत्यर्थ" इति स्वल्पः भेदः दृश्यते। अनयोः मध्ये सरलापाठः युक्तः अर्थशब्दस्य नित्यपुंस्त्वात्। एतेषु पाठभेदेषु यथा चेत्यादि **दर्पणकाशिकाभ्यां** प्रकाशितभूषणसारपाठ एव युक्ततम इति स एवात्र स्वीकृतः।

19.1. **कृतपूर्वी कटम्**

॥**कृतपूर्वीति**॥ पूर्वं कृतः अनेनेति लौकिकविग्रहः। तत्र पूर्वमिति क्रिया विशेषणम्। अत्रायं विवेकः। लौकिकविग्रहे तावत् "कृत" इत्यत्र क्तप्रत्ययः कर्मण्येव। परन्तु अलौकिके सः भावे। अत एव कर्मणोऽनभिहितत्वात् कटादिषु द्वितीया, कृतपूर्वी कटमिति प्रयोगश्चोपपद्यते। अन्यथा "कृतपूर्वी कट" इति स्यात्। ननु वाक्येऽपि भावक्तान्तस्य प्रयोगोऽस्त्विति चेन्न। तथा सति "कृतः पूर्वमनेन कटमि"ति स्यात्। अतश्च तद्धितवृत्तावेव तत्रापि इन्यन्ते एव क्तप्रत्ययः भावक्तान्तः, वाक्ये तु कर्मण्येव। अन्यथा "भावकर्मणोः" (पा. 1.3.13) इत्यनुशासनविरोधापत्तेः। उक्तं च भाष्यकारेण "कर्तृकर्मणोः कृति" (पा. 2.3.65) इति सूत्रे भाष्ये - "यदा वाक्यं न तदा प्रत्ययः, यदा प्रत्ययः सामान्येन तदा वृत्तिः" इति। न तदा प्रत्ययः इत्यस्य भावे न क्तप्रत्ययः इत्यर्थः, कृञः सकर्मकत्वात्। यदा प्रत्ययः इत्यस्य

भावे इति शेषः। किञ्च तत्रैव "योऽसौ कृतकटयोरभिसम्बन्धः स उत्पन्ने तद्धिते निवर्तते" इत्युक्तम्। ततश्च तद्धितेऽकृते "कृतः कटः पूर्वमनेन" इत्येव वाक्यमिति स्पष्टम्। इनिप्रत्यये चिकीर्षिते एव तत्र भावार्थकत्वम्। ततश्च "पूर्व+अम् कृत+सु" इत्यलौकिकविग्रहे तद्धितवृत्त्यङ्गभूते भावक्तान्तकृतपूर्वशब्दयोः सुप्सुपेति समासः। "श्राद्धमनेने" (पा.5.2.85)ति सूत्रात् अनेनेत्यनुवृत्तौ "पूर्वादिनिः, सपूर्वाच्च" (पा. 5.2.86,87) इति कर्तरि इनि प्रत्ययः। अनन्तरं च क्रियायाः कर्माकाङ्क्षायां कटादिभिः सम्बन्धः। ततश्च "कृतपूर्वी कटम्" इति कटस्य कर्मत्वात् द्वितीया।

ननु पूर्वं कृतः अनेनेति विग्रहे क्तप्रत्ययस्य कर्मबोधकत्वात् कर्मणोऽभिहितत्वेन कटमिति द्वितीया न प्राप्नोति इति चेदत्र **कान्तिः**- "अत्र कृतेति न कर्मणि क्तः। कटपदोत्तरं द्वितीयानापत्तेः। अपि तु फलांशे आहार्याभावारोपमात्रेण अकर्मकत्वं स्वीकृत्य "नपुंसके भावे क्तः"(पा. 3.3.114) इति भावे क्तः। कर्मत्वेन सामान्यकर्म सदपि नान्तरीयकत्वादविवक्षितमेव। ततः पूर्वशब्देन वृत्तौ, कृतपूर्वशब्दात् तद्धितः इनिः कर्तरि। तदुत्तरं भावक्तान्तैकदेशस्य कर्मान्वयिधात्वर्थविवक्षायां कटादिकर्मणा योगः। यथा नवीनमते "णेरणा"(पा.1.3.67)विति सूत्रे द्वितीयवाक्यस्य (अण्यन्तस्य यत्कर्म तदेव ण्यन्ते चेदिति वाक्यस्य) सामान्यभूतोदाहरणे "स्थलमारोहयति मनुष्यान् हस्ती"ति भाष्योदाहृते "मनुष्याः हस्तिनमारोहन्ति" इत्यण्यन्तावस्थायां स्थलरूपकर्मानन्वयिधात्वर्थसत्त्वेऽपि, ण्यन्ते तत्रैव स्थलरूपकर्मान्वयिधात्वर्थविवक्षया स्थलादिकर्मणो योगः तद्वत् प्रकृतेऽपि। कृति किम् ? कृतो ये कर्तृकर्मणी तत्र यथा स्यात् अन्यस्य ये कर्तृकर्मणी तत्र मा भूदिति "कर्तृकर्मणोः"(पा. 2.3.65) इति सूत्रभाष्याच्च। तद्धितोत्पत्त्यनन्तरं कर्मणो विवक्षानङ्गीकारे तु उक्तभाष्यानुपपत्तिः। एतेन भावक्तान्तकृञर्थे कटकर्मत्वान्वयमन्यत्रातिप्रसङ्गापादनेन दूषयन् कश्चिन्नानुमन्तव्यः। एतादृशव्यवस्थायाः उक्तभाष्यप्रामाण्येन प्रयोगद्वयविषयायाः अन्यत्रास्वीकारात्। अत्र "कर्तृकर्मणो" (पा. 2.3.65)रिति षष्ठी तु न। तत्र कृतीत्येतत्सामर्थ्यात् कृदन्तशक्तिज्ञानसहकारेण उपस्थितकृत्प्रकृत्यर्थक्रियानिरूपितकर्तृकर्मणोरेव षष्ठीति तदर्थात्। अन्यथा तिङ्योगे "न लोके" (पा. 2.3.69)ति निषेधेनार्थात् कृद्योगे एव षष्ठी सिद्धौ तद्वैयर्थ्यं स्पष्टमेवेति तत्रैव भाष्ये स्पष्टम्। इह तु "कृञ्धातु-

क्तप्रत्यय-पूर्वशब्द-इनिप्रत्यय"शक्तिज्ञानसहकृततद्धितान्तशक्त्यैव पूर्वकालक्रिया-कर्तृणां परस्परविशिष्टानां बोधेन कृदन्तशक्तिज्ञानमपि तत्र सहकारि। अन्यत्र कृञः क्तस्य भावार्थकस्य प्रयोगाभावेन तदन्तमात्रस्य पृथक्शक्तिग्रहे मानाभावात्। चतुर्णामेकार्थीभावे द्वयोरपि सोऽस्त्येवेति नात्र कृतोऽसाधुत्वम्। "तण्डुलानां पाचकतरः" इत्यादौ च न दोषः। पाचकादिपदस्य पृथक्प्रयोगसत्त्वेन कृदन्तशक्ति-ग्रहस्यापि सत्त्वात् तदन्तशक्तिज्ञानसहकारेणैव समुदायादुपस्थितिरिति षष्ठ्याः सौलभ्यात्। एतेन निष्ठान्तत्वात् "न लोके" (पा. 2.3.69)ति निषेधेन, उक्तो-दाहरणे कटपदात् षष्ठ्यभावसिद्धौ "कर्तृकर्मणोः" (पा. 2.3.65) इति सूत्रे कृद्ग्रहणं व्यर्थमित्यपास्तम्। उक्तरीत्या अत्रापि निष्ठान्तपदज्ञानसहकारेणोपस्थितक्रिया-न्वयिनोः कर्तृकर्मणोः षष्ठी नेत्यर्थेन निषेधाप्रसरात्। इह असामर्थ्यात् कथं तद्धित इति तु नाशङ्कनीयम्। कृतपूर्वशब्दात् भावक्तान्तघटितात् तद्धितोत्पत्तिकाले कटा-द्यन्वयाभावेन सामर्थ्यात्। तद्धितोत्पत्त्यनन्तरं तु क्रियाद्वारकसम्बन्धेन तद्धितार्थ-कर्त्रा "कट" इत्यादेः सम्बन्ध इत्यन्यत्। अत एव वृत्तस्य विशेषणयोगो नेति निषेधोऽपि न प्रवर्तते। तस्य वृत्त्यैकदेशविशेषणांशे एव प्रसक्तेः। अत एव राजपुरुष इत्यादौ विशेषणराजादेः न विशेषणान्तरान्वयः। विशेष्यस्य तु पुरुषादेः भवत्येव। "सविशेषणानां वृत्तिर्न"त्यस्य तूक्तरीत्या प्रसक्तिरेव नास्ति। तद्धितवृत्तेः पूर्वं सविशेषणत्वाभावात्। नित्यैकार्थीभावलक्षणसामर्थ्यवादिमते तयोः वचनयोः भाष्ये प्रत्याख्यानाच्च। एतेनोक्तनिषेधात् कथं वृत्तिरित्यपास्तम्। वाक्ये त्वेवं रीत्या कर्मणोऽविवक्षा नेति "कृतः कटम्" इत्यादि न। एतेनासामर्थ्यात् तद्धितो न स्यादि-त्यपास्तम्। ईदृशी च रीतिः "अधीती व्याकरणे" इत्यत्र च द्रष्टव्या। परमन्त्ये द्वितीयां बाधित्वा सप्तमी "क्तस्येन्विषयस्य कर्मण्युपसङ्ख्यानम् " इति वार्तिकात्। इन्प्रकृतिभूतक्तान्तस्य योगेऽनभिहिते कर्मणि अभिधेये सप्तमीति तस्यार्थः। अधीतीत्यस्य च कर्मक्तान्तत्वे सप्तमी न स्यादिति तत्राप्युक्तरीतिरेव सर्वापि अनु-सरणीयेति सकलशाब्दिकानां पन्थाः। इममेवार्थं-

सप्तमी स्यात् कर्मणि वा यदीष्टादिपदादिनिः।
अन्ये तु नित्यमेवात्र सप्तमीत्याचचक्षिरे॥ (पदवाक्यरत्नाकरे - 165 श्लोकः)

इति सप्तमीकारकशेषे उपाध्यायाः (गोकुलनाथोपाध्यायाः) अनुमेनिरे। परं विकल्पोक्तिः पक्षान्तरत्वेन तेषां निष्प्रमाणा। भाष्याद्यसम्मतत्वात्। भट्टाचार्या-

स्तत्रोदासीना एव। शब्दशक्तिप्रकाशिकाकारा अपि अमुमेव प्रयोगं व्याकरणा-न्तरस्थवचनान्तरेण साधयन्तीति सर्वं सुस्थम्। एवं सति द्वितीयान्तघटिताधीती व्याकरणमिति प्रयोगसाधनार्थं केषाञ्चित् श्रमोऽपि निष्फल एवेति सुधियो विभावयन्तु।" इति॥ अयं च कान्तिग्रन्थः अत्यन्तं व्युत्पादकः।

अस्य अयं सारः- "कर्तृकर्मणोः कृति"(पा. 2-3-65) इति सूत्रे "कृति किम् ? तद्धिते मा भूत्। कृतपूर्वी कटम्" इति सिद्धान्तकौमुदी। तस्मिन् सूत्रे कृतीत्यभावे कृतपूर्वीति तद्धितवृत्त्यैकदेशक्तान्तनिरूपितकर्मत्ववति कटेऽपि षष्ठी स्यात्, तद्वारणार्थं कृतीति समाधानम्। अत्रायं प्रश्नः - तद्धितवृत्त्यैकदेशोऽपि कृतशब्दः कृदन्त एव। तद्बोध्यक्रियानिरूपितं कर्मत्वमेव कटस्य। अतः कृतीति पदेन वारणं कथम् ? इति। तस्य च समाधानं इत्थं कृतमत्र - "एवं सति कृतीति व्यर्थं स्यात्। अतः तत्सामर्थ्यात् कृदन्तशक्तिसहकारेण उपस्थिता या प्रकृत्यर्थक्रिया तन्नि-रूपितकर्तृकर्मणोरेव षष्ठीति व्याख्यायते। "ओदनस्य पाचक" इत्यत्र "पाचक" इति कृदन्तशक्तिसहकारेण उपस्थिता या सकर्मिका पचनक्रिया तन्निरूपित-कर्मत्वस्य ओदने सत्त्वात् ओदनशब्दात् षष्ठी।यस्य कृदन्तस्य स्वातन्त्र्येण प्रयोगः तादृशकृदन्तशक्तिग्रहप्रयोज्यतत्प्रकृत्यर्थक्रियानिरूपितकर्तृकर्मणोः षष्ठी-त्यर्थः।कृतपूर्वीत्यत्र "पूर्वं कृतमनेन" इति विग्रहे कृञ्धातोः सकर्मकत्वेऽपि कर्मणोऽविवक्षया अकर्मकत्वमध्यारोप्य "नपुंसके भावे क्तः" (पा. 3.3.114) इति क्तप्रत्ययेन निष्पन्नेन "कृत" इति भावक्तान्तेन पूर्वशब्दस्य तद्धितवृत्त्यङ्गतया सुप्सुपेति समासः। ततः कृतपूर्वशब्दात् कर्तरि "सपूर्वाच्च" (पा. 5.2.87) इति इनिः। ततः परं पुनः कृञः सकर्मकत्वविवक्षया कटमित्यनेन अन्वयः। तथा चात्र कृत इति क्तप्रकृत्यर्थक्रियायां कटस्य कर्मत्वेनान्वयात् षष्ठी प्राप्ता। तां वारयितुं "कृति" इति पदम्। अस्य च भावक्तान्तस्य कृतपदस्य केवलस्य स्वातन्त्र्येण प्रयोगः नास्ति। अपि तु तद्धितवृत्त्यङ्गतयैव तस्य प्रयोगः। सोऽपि इन्विषये एव। ततश्च कृतपूर्वीत्यत्र "कृञ्धातुः – क्तप्रत्ययः - पूर्वशब्दः - इनिप्रत्ययः" इति एतेषां चतुर्णां शक्तिज्ञानसहकारेण तद्धितान्तशक्त्यैव पूर्वकालिकक्रियाकर्तृबोधः। अस्मिन् तद्धितान्तशक्तिजन्यबोधे तदवयवीभूतकृतशब्दार्थज्ञानमपि कारणम्। अथापि अत्र प्रयुक्तस्य भावक्तान्तस्य कृतशब्दस्य स्वातन्त्र्येण प्रयोगाभावात् , कृतशब्दोप-स्थापितक्रियायाः तद्धितान्तशक्त्यैव बोधात्, अत्र कर्मत्वेन अन्वितात् कटशब्दात्

षष्ठी न भवति, किन्तु द्वितीयैव। एतादृशव्यवस्थार्थमेव तत्र कृतिग्रहणम्। "कर्तृकर्मणोः कृति"(पा. 2-3-65) इत्यत्र कृद्ग्रहणेन यादृशोऽर्थः विवक्षितः, तादृशोऽर्थ एव "न लोके"(पा. 2.3.69)ति षष्ठीनिषेधसूत्रस्थनिष्ठाग्रहणेनापि विवक्ष्यते। तथा च यस्य निष्ठान्तस्य स्वातन्त्र्येण प्रयोगार्हता, तत्प्रकृत्यर्थनिरूपितकर्तृकर्मणोः षष्ठी नेत्यर्थः। ततश्च "कृतपूर्वी कटम् " इत्यत्र निष्ठान्तस्य कृतशब्दस्य स्वातन्त्र्येण प्रयोगानर्हत्वात् अत्र षष्ठीनिषेधस्यापि अप्रवृत्तिः। तथा च षष्ठीविधिनिषेधाविषयत्वमस्य प्रयोगस्य सिद्ध्यति। स्वातन्त्र्येण प्रयोगार्हकृदन्तोपस्थाप्यक्रियाकर्तृकर्मणोरित्यर्थस्वीकारात् "ओदनस्य पाचकतरः" इत्यत्र पाचकशब्दादतिशये तद्धिते तरपि, तद्धितान्तशक्तिग्रहप्रयोज्योपस्थितिविषयत्वेऽपि पचनक्रियायाः स्वातन्त्र्येण प्रयोगार्हकृदन्तोपस्थाप्यत्वेन तन्निरूपितकर्मणः ओदनस्य षष्ठी भवत्येव।"पाचक"शब्दस्य कृदन्तस्य स्वातन्त्र्येण प्रयोगार्हत्वात्।

अथेदानीमयं प्रश्नः उदेति - इनिप्रत्ययार्थे समासे अन्वितः कृतशब्दः अविवक्षितकर्मकत्वेन कृञः अकर्मकत्वमाश्रित्य भावे क्तप्रत्ययेन साधितः। ततश्च कृतशब्दबोध्यक्रिया कर्माकाङ्क्षाभाववतीति,तद्धितवृत्त्यनन्तरं तत्रैव पुनः कर्माकाङ्क्षा कथम् ? एकस्मिन्नेव प्रयोगे प्रथमम् अविवक्षा, अनन्तरं विवक्षेति युज्यते वा? इति।

यद्यप्येवं सर्वत्र न युज्यते परन्तु कुत्रचित् युज्यत एव। तत्र दृष्टान्तरूपेण "णेरणौ" (पा. 1.3.67) इति सूत्रस्थमुदाहरणमुदाहृतम्। तथा हि - "णेरणौ" (पा. 1.3.67) इति सूत्रस्य ण्यन्तादात्मने पदं स्यात् अणौ यत्कर्म णावपि तदेव कर्म चेत् , अण्यन्तावस्थायां यत् कर्म णौ चेत्स कर्ता इत्यर्थः प्रथमं स्वीकृतः।तत्र अण्यन्तावस्थायां यत्कर्म (या क्रिया) ण्यन्तावस्थायां तदेव कर्म चेत् ण्यन्तादात्मनेपदमित्यस्य नियमस्य अभावे "स्थलमारोहयति हस्ती मनुष्यान्" इत्यत्रापि आत्मनेपदं स्यादिति दोषः उक्तः।अस्य वाक्यस्य अण्यन्तावस्थायां वाक्यम् -"मनुष्या हस्तिन -मारोहन्ति"।अत्र अण्यन्तावस्थायां स्थलं कर्मत्वेन न विवक्षितम्।तथा चात्र स्थलरूपकर्मानन्वयिधात्वर्थः विवक्षितः। ण्यन्तावस्थायां तु स्थलरूपकर्मान्वयिधात्वर्थः विवक्षितः। तथा च अवस्थाभेदेन कर्मसम्बन्धविवक्षाविवक्षे भवितुमर्हतः। अथैवं सर्वत्र अवस्थाभेदेन विवक्षाविवक्षे न शक्ये।किन्तु केवलं स्थलद्वये एव। तच्च स्थलद्वयं तद्धितेन्विषयम्। तत्रैकं "सपूर्वाच्चे" (पा. 5.2.87)ति, यस्य "कृतपूर्वी कट"मित्युदाहरणम्। द्वितीयं च "इष्टादिभ्यश्चे" (पा. 5.2.88)ति। अस्य च

"अधीती व्याकरणे" इत्युदाहरणम्। अत्र च प्रमाणम् "क्तस्येन्विषयस्य कर्मण्युपसङ्ख्यानम्" इति कर्मणि सप्तमीविधायकं वार्तिकम्। तथा हि - अधीतीत्यत्र कर्मक्तान्तात् न इन्प्रत्ययः। तथा सति "अधीती व्याकरणम्" इति स्यात् कर्मणोऽभिहित्वात्। अतः अकर्मकत्वविवक्षया भावे क्तप्रत्ययः। ततः इन्प्रत्ययः। ततश्च कर्माकाङ्क्षा। तस्यां च व्याकरणादिकर्मसम्बन्धः। ततश्च द्वितीयायां प्राप्तायां तां बाधित्वा सप्तमीविधानम्।तथा चैतत्सूत्रद्वयविषये एव तथा विवक्षाविवक्षे। नान्यत्र।

कृतपूर्वीकटमित्यत्र असामर्थ्यशङ्कापि न। पूर्वं कृतमनेन इति विग्रहे इन्प्रत्यये करणीये कटादिविशेषणविवक्षाभावेन "सविशेषणानामिति" निषेधायोगात्। इन्नन्तेन सह कटादिकर्मविभक्त्यन्तप्रयोगेऽपि न बाधकम्। "कृतपूर्वी कटम् " इत्यत्र कटस्य क्रियाद्वारकसम्बन्धेन इन्यर्थकर्तरि एव अन्वयस्वीकारात्। प्रधानस्य वृत्तस्यापि विशेषणयोगः भवत्येवेति न "वृत्तस्य विशेषणयोगो ने"ति निषेधः। उक्तं च वाक्यपदीये -

अकर्मकत्वे सत्येवं क्तान्ते भावाभिधायिनि ।
ततः क्रियावता कर्त्रा योगो भवति कर्मणाम् ॥ (वा.प. तृ.वृत्ति. - 66)

इति। वस्तुतः एकार्थीभावसामर्थ्यं सिद्धान्तयित्वा "सविशेषणानां वृत्तिर्न, वृत्तस्य वा विशेषणयोगो ने"त्येते वचने भाष्ये प्रत्याख्याते। अतस्तद्विरोधोऽकिञ्चित्करः। इति॥

अयं कान्तिग्रन्थः एव **शाङ्कर्यामनूदितः**। अथात्र **तत्त्वदर्शिन्याम्** "इनिप्रत्ययार्थः कृतिरपि" इति खण्डदेवमतमुपक्षिप्य सम्यक् निराकृतं, तच्च तत एव ज्ञातव्यं जिज्ञासुभिः।**गुणभूतेति**॥ क्तप्रत्ययार्थे गुणीभूतेति **काशिका** ।उक्तञ्च – " गुणभूतेति क्तप्रत्ययः कर्मसामान्ये इति पक्षे ।क्तः भावे इति पक्षेऽपि तत्रैव विशेषणतामापन्नेत्यर्थः " इति ।

इन्यादिभिरिति॥ तदर्थभूतकर्त्रादिभिरित्यर्थः। अत्रायं सन्देहः – गुणभूता क्रिया इन्यादिभिः सम्बध्यते इति वा, इन्यादिभिः गुणभूता कटादिभिः सम्बध्यते इति वा अन्वय इति। दृष्टान्ते "ग्रामं गत" इत्यत्र क्तप्रत्ययार्थकर्तरि विशेषणीभूतायां ग्रामादिकर्मणां विशेषणत्वेनान्वय इत्युक्तत्वात् दार्ष्टान्तिकेऽपि इन्याद्यर्थकर्त्रादिविशेषणीभूतक्रियायां कटादिकारकान्वय इति व्याख्या समुचिता । अत एवात्र

बह्वीषु व्याख्यासु इन्यादिभिः गुणभूतेति व्याख्या दृश्यते । अत्र हि **दर्पणे** दृष्टान्तदार्ष्टान्तिकयोः सूक्ष्मः भेदः प्रतिपादितः, समन्वयश्चेत्थं वर्णितः। तथा हि - " वस्तुतस्तु दार्ष्टान्तिके स्ववाचकप्रकृतिकप्रत्ययार्थे अन्यस्मिन्वा गुणीभूता कटादि - कर्मभिरिति व्याख्येयम् ।नातः कृतपूर्वीति प्रयोगघटकक्तस्य धात्वर्थानुवादक-त्वेऽपि क्षतिः। पूर्वकालिकक्रियाकर्तेति ततो बोधेन तादृशक्रियायाः इन्यर्थकर्तरि गुणत्वात्। नाप्ययं भावाधिकारीयः, स्वातन्त्र्येणाऽप्रयोगात् ।अत एव "भोक्तुं गत-मेतेन" इत्यादि प्रयोगोपपत्तिः, भावानधिकारीयभावविहितप्रत्ययस्य धात्वर्थानु-वादकत्वात् प्रकृत्यर्थक्रियाया अगुणत्वात्।एवम् " अव्ययकृतो भावे " इत्युक्तेः "पाक" इत्यादिप्रयोगस्थघञर्थापेक्षया तुमुनाद्यर्थे वैलक्षण्यानुभवात् , तुमुनादीना-मपि साध्यमात्रस्वभावभावार्थकत्वमित्यन्यत्र विस्तरः।" इति।

अस्य अयं भावः – "ग्रामं गत" इत्यत्र गम्धातूत्तरक्तप्रत्ययः कर्तारं बोधयति । तस्मिंश्च प्रत्ययार्थकर्तरि गम्-धात्वर्थः विशेषणम् । तथा च तत्र कृत्प्रत्ययार्थकर्तृ-विशेषणीभूता गमनक्रिया ग्रामादिकर्मभिः सम्बध्यते। तथा च क्तप्रत्ययार्थ-विशेषणीभूता क्रिया अत्र दृष्टान्तभूता । दार्ष्टान्तिकभूता क्रिया "कृतपूर्वी"त्यत्र क्तान्तबोध्या क्रिया। अनयोः द्वयोः दृष्टान्तदार्ष्टान्तिकतैव न युज्यत इति आक्षेपः। कुतः? दृष्टान्ते क्तप्रत्ययार्थकर्तरि विशेषणतयान्वयात् तत्र क्रिया गुणभूतैव, परन्तु दार्ष्टान्तिके "कृत" शब्दे क्रिया प्रधानतयैव भासते, न तु कृत्प्रत्ययार्थविशेषणत्वेन । अत्रस्थकृत्प्रत्ययस्य केवलं धात्वर्थानुवादकत्वात् ।तथा हि – " भावे " (पा.3-3-18) इत्यधिकारविहितघञाद्यपेक्षया अयं भावे विहितः प्रत्ययः विलक्षणः । अत एवास्य स्वातन्त्र्येणाप्रयोगः। ततश्च "पाक" इत्यत्र सिद्धावस्थापन्ना क्रिया प्रत्ययार्थ इति स्वीकृत्य प्रत्ययार्थप्राधान्यं, तत्र च प्रकृत्यर्थस्य विशेषणत्वं चोच्यते, न तथात्र निरूपयितुं शक्यम्। तथा च "कृतपूर्वी"ति वृत्त्यन्तर्गतकृतशब्दैकदेशस्य क्त-प्रत्ययस्य स्वप्रकृत्यर्थसाध्यक्रियानुवादकत्वमेवेति तत्र धात्वर्थक्रिया इतराविशेषण -त्वेनैव भासते।ततश्चात्र कृतशब्दबोध्यक्रियायां गतशब्दबोध्यक्रियासाम्यं नास्ति। तथा च स्ववाचकप्रकृतिकप्रत्ययार्थे विशेषणीभूता ग्रामादिभिः यथा सम्बध्यते,तद्वत् कृतपूर्वीत्यत्र स्थिता क्रियेति साम्यं वक्तुं न शक्यते । अतः अत्र सादृश्य-निरूपकत्वेन स्ववाचकप्रकृतिकप्रत्ययार्थविशेषणत्वं वक्तुं न शक्यम् ।अपि तु स्व-वाचकभिन्नपदार्थविशेषणत्वमेव।एतच्च उभयत्र तुल्यम् ।"गत" इत्यत्र स्वं गमन-

क्रिया स्ववाचकः गम् धातुः, तद्भिन्नं पदं(शक्तं पदमिति लक्षणमाश्रित्य) क्त-प्रत्ययः, तदर्थः क्तप्रत्ययार्थः कर्ता, तद्विशेषणत्वं गमनक्रियायाः।कृतपूर्वीत्यत्र तु स्वं कृञर्थक्रिया, स्ववाचकः कृञ्धातुः, तद्भिन्नं पदम् इनिप्रत्ययः, तदर्थः तद्धिते-निप्रत्ययार्थः कर्ता, तद्विशेषणत्वं तस्याः इति तदेवोक्तं " स्ववाचकप्रकृतिप्रत्यया-र्थेऽन्यस्मिन्वे " त्यादिना।तदेव विशदीकृतं च " पूर्वकालिकक्रियाकर्तेति बोधेन तादृशक्रियायाः इन्यर्थकर्तरि गुणत्वात्।नाप्ययं भावाधिकारीयः, स्वातन्त्र्येणा-प्रयोगात्।" इति। किञ्चात्र **दर्पण**कारः भावार्थकानाम् अव्ययकृतामपि भावविहित-घञादिभिः भेदं प्रदर्शयति । यथा च "कृत" इत्यत्र क्तस्य धात्वर्थानुवादकत्वं, ततश्च तत्र साध्यस्वरूपाया एव क्रियायाः प्राधान्यं, तथा तुमुन्नाद्यन्तेष्वपि साध्य-स्वरूपायाः क्रियायाः प्राधान्यमेव, अव्ययकृतां च धात्वर्थानुवादकत्वमेव, अत एव "भोक्तुं गतमेतेन" इति प्रयोगोपपत्तिः।एतदेव स्पष्टं वदति – "भावानाधिकारीय-भावविहितप्रत्ययस्य धात्वर्थानुवादकत्वात् प्रकृत्यर्थक्रियायाः अगुणत्वात् ।तुमुन्ना-दीनामपि साध्यमात्रस्वभावार्थकत्वमित्यन्यत्र विस्तर " इति । **परीक्षाकारे**णापि इदमेव सङ्क्षेपेणोक्तम् – " विशेष्यत्वविशेषणत्वाभ्यां वैषम्येऽपि परान्वयित्वमात्रे दृष्टान्ततयोपपादनात् । तत्रायं विशेषः – दृष्टान्ते गुणीभूता क्रिया ग्रामादिकर्मभिः साक्षादन्वेति, दार्ष्टान्तिके तु गुणीभूता क्रिया परम्परया अन्यस्मिन् विशेषणमि-ति"।कृतपूर्वीतिपदबोध्या कृञ्धात्वर्थभूता क्रिया क्तार्थद्वारा इन्यर्थकर्तरि विशेषण-मिति अस्याशयः ।

वस्तुतः अत्र गुणभूता क्रिया इन्यादिभिः(तदर्थकर्त्रादिभिः)सम्बध्यते इति व्याख्यैव कार्या । तथा हि – यद्यपीयं कारिका वाक्यपदीयस्था, अथापि तत्र अत्र च सन्दर्भः किञ्चिद्भिन्नः।वाक्यपदीये तु गुणभूतक्रियायामपि कारकान्वयनिरूपणं सन्दर्भः । अत्र तु यथा वत्यादीनां क्रियान्वयेनैव साधुत्वं, तथा इन्यादीनामपि क्रियान्वयेनैव साधुत्वमिति सन्दर्भः।तथा च " पूर्वादिनिः, सपूर्वाच्च (पा.5-2-86,87) " इतीनि-प्रत्ययस्य कर्तरि विधानात् , तस्य क्रियापेक्षायां प्रत्यासत्त्या करोत्यर्थक्रिया संनह्यतेऽन्तरङ्गत्वादिति इन्याद्यर्थस्य क्रिययैवान्वय इति प्रकृतार्थसिद्धिरिति गुरवः **तत्त्वदर्शिनः**। एतदाशयेनैव कृतपूर्वी कटमित्यत्रापि गुणभूता इन्यादिभिरित्यर्थे इति सारे उक्तम् । **बृहद्भूषणे**ऽपि " तस्मात् पाक इत्यादौ धात्वर्थांशमादाय कर्म-करणादिविभक्तिवत् कृतपूर्वी कटमित्यादावपि कर्त्राद्यर्थकाः प्रत्ययाः" इति

अस्याः कारिकायाः व्याख्या उपसंहृता । तथा च इन्यादिप्रत्ययसिद्ध्यर्थं कृतपूर्वेति समासार्थविशेष्यभूतकृञर्थक्रियायाम् इन्यर्थकर्तुरन्वयः। इनिप्रत्ययार्थस्य कर्तुः कृञर्थक्रियायामन्वयानङ्गीकारे प्रत्ययानां स्वप्रकृत्यर्थान्वितस्वार्थबोधकव्युत्पत्ति-विरोधात् इनिप्रत्यय एव नोत्पद्येतेति भावः। समस्तस्यैव इनिप्रकृतित्वात् तदर्थ-विशेष्ये इनिप्रत्ययार्थान्वयस्य निराकर्तुमशक्यत्वात् । अतश्चात्र द्वितीया व्याख्यैव युक्ता ।

न चेति ॥ नन्वत्र क्रिया न केवलं गुणभूता । अपि तु पदार्थैकदेशोऽपि । वृत्तिमात्रे एकार्थीभावस्य स्वीकारात् ।स चैकार्थीभावः जहत्स्वार्थरूपः।वृत्तौ अन्वितानां स्वार्थत्यागः, समुदायशक्त्या च विशिष्टार्थबोध इति सिद्धान्तः । तथा च "गत" इत्यत्र वा "कृतपूर्वी" त्यत्र वा अवयवार्थ एव नास्ति, अपि तु गमनक्रियाश्रयः, पूर्वकालिकक्रियाश्रय इत्येव समुदायशक्त्या अखण्डोऽर्थः प्रतिपाद्यते । तथा चात्र उभयत्र क्रिया न पदार्थः अपि तु पदार्थैकदेशः।पदार्थान्तरनिष्ठप्रकारतानिरूपित-विशेष्यतासम्बन्धेन शाब्दबोधं प्रति मुख्यविशेष्यतया पदजन्यपदार्थोपस्थितिः कारणम्।अत एव "नीलो घट" इत्यत्र घटत्वेनोपस्थितघटपदार्थे एव नीलपदार्थोऽ - न्वेति, न तु तदेकदेशघटत्वे ।अत एव नित्यो घट इति न प्रयोगः, नित्यपदार्थस्य घटपदार्थैकदेशघटत्वे अन्वययोग्यतायां सत्यामपि अन्वयानभ्युपगमात्।एवञ्च प्रकृते मुख्यविशेष्यतया उपस्थित्यभावेन तत्र ग्रामादिकारकाणामन्वयासम्भवः । एतत्कार्यकारणभावमूलक एव “पदार्थः पदार्थेनान्वेति, न पदार्थैकदेशेन” इति न्यायः। **वृत्तिमात्रे** इति ॥ मात्रशब्दस्य कार्त्स्न्यमर्थः तथा च न केवलं समासे, अपि तु कृत्तद्धितैकशेषसनाद्यन्तधातुष्वपीत्यर्थः।तथैव न केवलं सोपपदकृत्सु, किन्तु सर्वत्र कृदन्ते ।**वक्ष्यमाणत्वादिति**॥ “समासे खलु भिन्नैव शक्तिः” (का.31) इत्यादिना समासशक्तिनिर्णये इति शेषः । तत्र समासपदस्य वृत्तिसामान्यपरतया व्याख्यानादिति भावः। **तत्रान्तर्गतेति**॥ गतः, कृतपूर्वीत्यदिषु कृदन्ततद्धितान्त-वृत्त्युपस्थाप्या भावना - क्रिया, पदार्थैकदेशो भवति। **कथमिति**॥ गत इत्यादौ कृद्वृत्तिसत्त्वेन गमनकर्तृरूपगतपदार्थैकदेशगमनक्रियायां कर्मान्वयासम्भवः। पदार्थः पदार्थेनान्वेति न पदार्थैकदेशेन इति न्यायविरोधात् । अत एव “ ऋद्धस्य राजपुरुष” इत्यादयो न प्रयोगाः।आदिभूतो यः पाकः तत्कर्तेत्यर्थे आदिः पाचक इत्यादयश्च न। एवञ्च "ग्रामं गत" इत्यत्र गमनकर्तृरूपपदार्थे एकदेशभूतायां

क्रियायां (भावनायां) कर्मान्वयासम्भवः।तथा च दृष्टान्तासिद्धिः।एवं "कृतपूर्वी कट"मित्यत्रापि कटस्य, इन्यर्थकर्तुश्च पदार्थैकदेशे कृञर्थेऽन्वयासम्भव इति शङ्का।

19.2. देवदत्तस्य गुरुकुलम्

समाधत्ते – **नित्यसापेक्षेष्वित्यादिना।** नित्यसापेक्षेषु - नित्यं सम्बन्ध्यन्तरसापेक्षेषु गुर्वादिषु इत्यर्थः।नित्यसापेक्षत्वं च स्वनिरूपकाकाङ्क्षाव्याप्यज्ञानविषयत्वमिति **प्रभा।** स्वं नित्यसाकाङ्क्षत्वेन जिघृक्षितं गुर्वादि। एवञ्च यत्र यत्र गुरुत्वज्ञानं, तत्र तत्र तन्निष्ठगुरुत्वस्य निरूपकं किमिति आकाङ्क्षायाः सत्त्वेन आकाङ्क्षायाः व्यापकत्वं, गुरुत्वज्ञानस्य व्याप्यत्वमित्यर्थः। तथा च गुरुत्वे व्याप्यज्ञानविषयत्वमस्तीति गुरुत्वं नित्यसाकाङ्क्षम् । यथा च "वसिष्ठो गुरुः" इति वसिष्ठनिष्ठे गुरुत्वज्ञाने सति, कस्य गुरुरिति आकाङ्क्षायाः नियमेन जायमानत्वं दिलीपदशरथादिपदार्थान्वयेनैव तस्याः निवृत्तेश्च अनुभूयमानत्वं तथा "देवदत्तस्य गुरुकुलम् " इत्यत्र गुरुकुलमित्यत्रापि गुरुशब्दोपस्थाप्यगुरुत्वस्य निरूपकत्वेन देवदत्तस्योपस्थितिरनिवार्या । अन्यथा तन्निरूपकाकाङ्क्षायाः अनिवृत्तेः । तथा च देवदत्तस्य गुरोः कुलमित्यत्र या व्यपेक्षा, सा देवदत्तस्य गुरुकुलमित्यत्राप्यस्त्येव । अत्र देवदत्तस्येति षष्ठ्याः निरूपकत्वमर्थः । तच्च गुरुपदार्थैकदेशगुरुत्वेऽन्वेति । तथा च देवदत्तनिरूपित-गुरुत्ववत्सम्बन्धिकुलमिति बोधः ।

अत्र सर्वाः व्याख्याः एकविधा एव मूलस्य व्याख्याने। तासां सर्वासां सारोऽत्र निदर्श्यते –नित्यं सम्बन्ध्यन्तरसापेक्षेषु शब्देषु उपसर्जनतया वृत्तिघटकेषु सत्स्वपि तेषु वृत्त्यैकदेशभूतेष्वेव तन्निरूपितविशेषणस्य देवदत्तादेः अन्वयो भवति ।

"देवदत्तस्य गुरोः कुलम्" इति वाक्येन यादृशः बोधः, तादृश एव बोधः "देवदत्तस्य गुरुकुलम् " इत्यनेनापि भवति ।एतदेव भाष्यकारेण गमकत्वमित्युक्तम् । अत्र हि गुरुत्वस्य शिष्यमन्तरानुत्पाद्यमानत्वात् गुरुः शिष्यांशे नित्यसापेक्ष इति, तदाकाङ्क्षाशमनायोपस्थितस्य देवदत्तपदोपस्थापितस्य देवदत्तरूपपदार्थस्य, गुरुकुलशब्दार्थैकदेशेन गुरुणा सह अन्वयः भवति । तथा चात्र पदार्थस्य पदार्थैकदेशेऽन्वयोऽङ्गीकरणीय इति "पदार्थः पदार्थेनान्वेति न पदार्थैकदेशेन" इति व्युत्पत्तेः नित्यसापेक्षव्यतिरिक्तविषयत्वं कल्पनीयमिति भावः। तथा च यथा

"ऋद्धस्य राज्ञः पुरुष" इति वाक्ये सविशेषणेन राज्ञा सह पुरुषशब्दस्य समासो न "सविशेषणानां वृत्तिर्न" ति निषेधात्, यथा च राजपुरुष इति समासैकदेशे राज्ञि ऋद्धस्येति विशेषणान्वयो न, "वृत्तस्य विशेषणयोगो न" इति निषेधात् तथा "देवदत्तस्य गुरुकुलम्" इत्यादिषु न वा समासनिषेधः, न वा गुरुकुलमिति समासैकदेशे गुरौ विशेषणान्वयाभावः। वृत्त्यर्थैकदेशेऽर्थे विशेषणान्वयस्य विशेषणान्वयाभावस्य च निरूपकं गमकत्वं, तदभावश्च। देवदत्तस्य गुरोः कुलमिति वाक्येन योऽर्थः बोध्यते स एव "देवदत्तस्य गुरुकुलम्" समासघटितेन वाक्येनापि बोध्यते इति गमकत्वात् वृत्त्येकदेशे पदार्थान्वयः अङ्गीक्रियते । " ऋद्धस्य राज्ञः पुरुषः " इति वाक्येन योऽर्थः बोध्यते, न स " ऋद्धस्य राजपुरुषः " इति समासघटितेन बोध्यत इति अगमकत्वात् समासैकदेशे विशेषणान्वयः नाङ्गीक्रियते । प्रायः नित्यसापेक्षेष्वेव पदार्थस्य पदार्थैकदेशेऽन्वयः अङ्गीक्रियते । तथा च "पदार्थः पदार्थेने" ति न्यायस्य नित्यसापेक्षातिरिक्तत्वमिति सिद्ध्यति । तदुक्तं वाक्यपदीये –

सम्बन्धिशब्दः सापेक्षः नित्यं सर्वः समस्यते ।
वाक्यवत्सा व्यपेक्षा हि वृत्तावपि न हीयते ॥ (वा.प.तृ. वृत्ति. - 47)

इति। हि - यतः, देवदत्तस्य गुरोः कुलमिति वाक्ये या व्यपेक्षा - आकाङ्क्षा, सा वृत्तावपि न हीना भवति, न निवर्तते, अतो नित्यसापेक्षः सम्बन्धिशब्दः सर्वोऽपि समस्यते, नित्यसापेक्षशब्दस्योपसर्जनस्य स्वसम्बन्धनिरूपकविशेषणान्वयो भवति। तथा च देवदत्तस्य यो गुरुःतस्य कुलमिति वाक्यवदेव "देवदत्तस्य गुरु - कुलम् " इत्यस्मादपि बोधो भवति, तादृशबोधानन्तरमेवाकाङ्क्षानिवृत्तेः। यद्यप्यत्र "पदार्थः पदार्थेनान्वेती " त्यादिन्यायविरोधः, तथापि तस्य न्यायस्य नित्यसापेक्षा-तिरिक्तत्वेन सङ्कोचात् वृत्त्यैकदेशेऽपि विशेषणपदार्थान्वयो निर्बाधः ।

अथ पदार्थः पदार्थेनेति न्यायस्य सङ्कोचं विनैव पक्षान्तरं वाक्यपदीये उक्तम् –

समुदायेन सम्बन्धो येषां गुरुकुलादिना ।
संस्पृश्यावयवांस्तेषु युज्यन्ते तद्वता सह ॥ (वा. प. तृ. वृत्ति. - 48)

पक्षेऽस्मिन् देवदत्तादेः वृत्त्यर्थविशेष्येण कुलेनैवान्वयः। परन्तु न साक्षात् । अपि तु षष्ठ्यन्तार्थस्य देवदत्तसम्बन्धस्य स्वाश्रयगुरुसाध्यत्वरूपपरम्परासम्बन्धेन कुलेनैवा

-न्वयः।अवयवद्वारकसम्बन्धेन समुदायार्थेन सम्बन्धेऽवयवमपि विशेषणं सामर्थ्यात् स्पृशतीति भावः।येषाम् अर्थानाम् देवदत्तादीनां, गुरुकुलादिना समुदायेन सम्बन्धः, ते तु - तेऽप्यर्थाः देवदत्तादयः, अवयवान् गुर्वादीन् संस्पृश्य तद्वता कुलादिना सह युज्यन्त इति कारिकार्थः । "समर्थ" (पा.2-1-1) सूत्रे भाष्ये सापेक्षमसमर्थं भवतीति प्रस्तावे भवति हि विशेष्यस्य सापेक्षत्वेऽपि समास इति निरूपणात्परं "यत्र तर्ह्यप्रधानं सापेक्षं भवति तत्र वृत्तिर्न प्राप्नोति – देवदत्तस्य गुरु-कुलम् , देवदत्तस्य गुरुपुत्रः, देवदत्तस्य दासभार्ये" ति शङ्कायां " नैष दोषः । समुदायापेक्षात्र षष्ठी सर्वं गुरुकुलमपेक्षते" इति अयं पक्षः प्रस्तुतः । तत्रैव कैयटे पूर्वोक्ता हरिकारिका उल्लिखिता ।

अनन्तरं च तत्रैव भाष्ये समुदायापेक्षा षष्ठी तु वक्तुं न शक्यते । तथा सति "देवदत्तस्य गुरुपुत्रः" इत्यदिषु देवदत्तस्य यो गुरुः तस्य पुत्र इति न गम्येत किन्त्वन्यस्यापि गुरुपुत्रः देवदत्तस्यापि सम्बन्धीत्यपि प्रतीतिः स्यात्। यतस्तु खलु नियोगतो देवदत्तस्य यो गुरुः तस्य यः पुत्र इत्येष एवार्थो गम्यते अतः नैषा षष्ठी समुदायापेक्षा भवितुमर्हति। किन्त्ववयवापेक्षैव। सापेक्षस्यासमर्थत्वे अत्र गुरुपुत्रा-दिषु वृत्तिर्न स्यात्। अतः सापेक्षमसमर्थं भवतीति वक्तुं न शक्यम्। अथ सापेक्षेऽपि सामर्थ्याङ्गीकारे "महत्कष्टं श्रित" इत्यत्र सापेक्षे वृत्तिः प्राप्नोति। तद्वारणार्थं सविशेषणानामिति वचनमारम्भणीयम्।तथा सति पुनः देवदत्तस्य गुरुकुलमि-त्यादिषु वृत्तिर्न प्राप्नोतीति तत्साधनार्थम् "अगुरुपुत्रादीनाम् " इति पूर्वोक्तस्य सङ्कोचः करणीयः।तथा च " सविशेषणानां वृत्तिर्न वृत्तस्य वा विशेषणयोगो न अगुरुकुलपुत्रादीनम्" इतिवचनमारम्भणीयमित्युक्तम्। अनन्तरं च तस्य वचनस्य प्रत्याख्यानं कृतम् । पक्षे चास्मिन् "महत्कष्टं श्रित" इत्यादिषु वृत्तिः अगमकत्वान्न भवतीति समाहितम् । यत्र च गमकत्वं तत्र सापेक्षस्यापि वृत्तिर्भवति इति उक्त्वा देवदत्तस्य गुरुकुलमित्यादि तत्रोदाहृतम्। इदं च भाष्यं देवदत्तस्य गुरुकुलमि-त्यादौ देवदत्तादेः वृत्त्यैकदेशे उपसर्जनेऽन्वये प्रमाणम् । अयमेव पक्षः "सम्बन्धि-शब्दः" (वा.प.तृ.वृत्ति -47) इति कारिकया हरिणा प्रतिपादितः।उक्तपक्षद्वये उपसर्जनस्य सापेक्षस्यापि गमकत्वे वृत्तिर्भवतीति पक्ष एव मुख्यः । "देवदत्तस्य गुरुपुत्रः" इत्यादिषु समुदायापेक्षषष्ठ्याः उपपादयितुमशक्यत्वात्।अमुमेव पक्षमा-श्रित्य सविशेषणानामित्यादिवचनप्रत्याख्यानाच्च । अतः अत्र कौण्डभट्टेन अयमेव

पक्षः स्वीकृतः। पक्षे चास्मिन् "पदार्थः पदार्थेनेति" न्यायस्य सङ्कोचः करणीयः । स च सङ्कोचः सम्बन्धिशब्देषु अवृत्तावपि आवश्यकः चैत्रस्य नप्ता, घटादन्यः इत्यादिषु तत्सङ्कोचं विना अनिर्वाहात्।उपपादयिष्यते चैतदुपरिष्टात् ।उक्तं च **काशिकायाम्** – "यद्यपि सर्वत्र एकदेशघटितपरम्परासम्बन्धेनान्वय इति पक्षान्तरमिति समर्थ(पा2-1-1)सूत्रे भाष्ये उक्तं, तथाप्युक्तस्थले एकदेशे एवाकाङ्क्षासत्त्वात् अनुभवानुरोधाच्च प्रथमपक्ष एवोरीकृतः।अत एव देवदत्तस्य गुरुकुलम् , चैत्रस्य नप्ता इत्यादिवाक्यजन्यशाब्दबोधानन्तरं गुरुर्देवदत्तीयो वा न वा, जन्यत्वं चैत्रीयं वा न वेति संशयानुत्पत्तिश्चाञ्जस्येन सङ्गच्छते" इति ।

अथात्र **तत्त्वदर्शिन्यां** नित्यसापेक्षेष्वपि गमकत्वे सत्येव एकदेशान्वयः, सापेक्षेण सह वृत्तिश्च ।तथा च नित्यसापेक्षेषु सर्वत्र एकदेशान्वयेऽपि सामर्थ्यं वृत्तिश्चेति तु न चिन्तनीयमितीत्थं सम्यगुदाहरणप्रदर्शनपुरस्सरं निरूपितम् – "गमकत्वमेव एकदेशान्वयेऽपि वृत्तिप्रयोजकं, न नित्यसापेक्षत्वम्। स्पष्टं चेदं समर्थसूत्रे (पा.२-१-१) " सुप आत्मनः क्यच् " (पा. ३-१-८) इति सूत्रे भाष्ये च सूक्ष्मदृशाम् । अत एव "तत्रोपपदं सप्तमीस्थम् " (पा. ३-१-९२) इति सूत्रस्थं भाष्यं सङ्गच्छते । तत्र हि – "अथ च्व्यन्ते उपपदे किमणा भवितव्यम् अकुम्भं कुम्भं करोति कुम्भीकरोति मृदम् इति प्रश्ने "न भवितव्यम् । किं कारणम् ? प्रकृतिविवक्षितत्वात्। प्रकृतिविवक्षायां च्विः विधीयते ।तत्सापेक्षं, सापेक्षमसमर्थं भवती " ति समाहितम्।

प्रकृतिविवक्षायामित्यस्य प्रकृतेः विकृत्यभिन्नत्वेन विवक्षायां विकृतिवाचकात् च्विरित्यर्थः।तत्रावश्यं विकारेण प्रकृतिविशेषोऽपेक्षणीयः,तदनपेक्षायां च्वेरभावात् । ततश्च यथा " महान्तं कुम्भं करोति" इत्यत्र अण् न भवति, एवं मृदं कुम्भीकरोतीत्यादावपि । सापेक्षत्वेनासामर्थ्यात् इति भाष्याशयः । नित्यसापेक्षत्वस्य वृत्तिप्रयोजकत्वे प्रकृते विकारस्य प्रकृत्यंशे नित्यसापेक्षत्वेनासामर्थ्याभावात् अणो दुर्वारतया तद्भाष्यमसङ्गतं स्यात् । अतो नित्यसापेक्षत्वं न वृत्तौ प्रयोजकं किन्तु गमकत्वमेव। गमकत्वं च शिष्टानां तस्यार्थबोधकत्वम् । तस्माद् गमकत्वे सति भवति विशेषणसम्बन्धः, अगमकत्वे तु न । अत एव "किमोदनः शालीनाम् " इत्यादेरुपपत्तिः।एवञ्च नित्यसापेक्षेष्विति गमकत्वोपलक्षणमेव, अन्यथा देवदत्तस्य गुरुकुलमित्यादेः साधुत्वे उपपादितेऽपि "किमोदनः शालीनाम्" इत्यादेः साधुत्वस्योपपादयितुमशक्यत्वात् " ॥ इति ।

अथ नित्यसापेक्षेष्वेकदेशान्वयस्य प्रसिद्धमुदाहरणं देवदत्तस्य गुरुकुलम् इति। तच्च प्रतिपादितम्। तेनैव प्रतिपिपादयिषितः सिद्ध इति चैत्रस्य नप्तेत्युदाहरणान्तरानुधावनं किमर्थमिति शङ्कायां **काशिकायां** चैत्रस्य नप्तेतीतीत्थमवतारितम् – "समासे तद्घटकपूर्वपदे वा प्राचीनतार्किकमते शक्ते र्लक्षणायाश्च अभावेन गुरुर्न पदार्थैकदेश इति स्थलान्तरमनुसरति –चैत्रस्य नप्तेति।" इति। अस्यायमाशयः – नैयायिकाः सर्वे वृत्तावपि व्यपेक्षावादिनः। राजपुरुषादि न पदम्। किन्तु वाक्यम्। तत्र राजपदं राजानमेव बोधयति पुरुषपदं च पुरुषम्। राजपुरुषयोस्सम्बन्धस्तु संसर्गमर्यादया भासते। न चात्र प्रातिपदिकार्थयोरभेदान्वयः शङ्क्यः। तस्य समासे सङ्कोचात्। अतश्च न समासे शक्तिः,न वा पूर्वपदे लक्षणेति प्राचीनाः नैयायिकाः। अतश्च तेषां मते "गुरुकुलम्" इति षष्ठीसमासे गुरुशब्देन गुरोरुपस्थित्या तस्य पदार्थत्वेन तस्मिन् देवदत्तस्येत्यादि पदार्थान्तरस्यान्वय निर्बाध इति दृष्टान्तान्तरं प्रदर्शयति चैत्रस्य नप्तेति। पूर्वोल्लिखिते काशिकाग्रन्थे "समासे तद्घटकपूर्वपदे वा शक्तेर्लक्षणायाश्चाभावेन" इत्यस्य समासे शक्तेः पूर्वपदे लक्षणाया श्चाभावेन इत्यर्थः। व्याख्यातं चैवं **प्रभायां शाङ्कर्याञ्च**। वस्तुतः इदमयुक्तम्। "ऋद्धस्य राज्ञः पुरुषः" इत्यादिष्वपि ऋद्धस्येति विशेषणान्वयापत्तेः। तैस्त्वत्र वृत्तिवारणाय सविशेषणानामिति वचनमेवाश्रीयते। तथा सति "देवदत्तस्य गुरुकुलम्" इत्यत्रापि वृत्त्यप्रसङ्गे पुनः "अगुरुपुत्रादीनाम्" इति वचनमाश्रयणीयम्। भवतु नाम तेषां मते तथा। परन्तु अयं सर्वोऽपि विचारः वैयाकरणमतमाश्रित्य क्रियते। अत एव च "वृत्तिमात्रे समुदायशक्तेरङ्गीकारात्" इति अत्र आक्षेपः कृतः। ततश्च वैयाकरणमतविरुद्धं नैयायिकमतमाश्रित्यारुचिवर्णनं नोचितम्। अतोऽत्र द्विधा अवतरणिका भवितुमर्हति – "देवदत्तस्य गुरुकुलम्" इत्यत्र देवदत्तस्य वृत्त्यैकदेशे गुरौ नान्वयः। किन्तु परम्परासम्बन्धेन गुरुकुले एव, समर्थसूत्रे भाष्ये अस्यापि पक्षस्य प्रतिपादितत्वात्। अतः नात्र विशेषणस्य देवदत्तादेः वृत्त्येकदेशेऽन्वयः, न वा "पदार्थः पदार्थेने" ति न्यायविरोध इति चेदेकदेशान्वयस्य उदाहरणान्तरमाह – चैत्रस्य नप्तेति" इत्येका, ससम्बन्धिशब्दस्थले एकदेशान्वयः अवश्यमाश्रयणीय इत्यत्र दृष्टान्तान्तरमाह" इति द्वितीया च। **तत्त्वदर्शिन्यां** तु "एकार्थीभावविरहितं दृष्टान्तं दर्शयति – चैत्रस्य नप्तेति" इति वर्तते। नप्तृशब्दस्य व्युत्पत्तिपक्षे कृदन्तत्वेन तत्राप्येकार्थीभावसत्त्वात् अव्युत्पत्तिपक्षे एवेयमपि अवतरणिका

सङ्गच्छते । **शाङ्कर्यां** तु केचिज्जरन्नैयायिकाः न समासे शक्तिं, नापि समासे पूर्वपदे लक्षणामङ्गीकुर्वते । किन्तु राजपुरुष इत्यत्र पुरुषपदं राजसम्बन्धिपुरुषपरं राजपदं तात्पर्यग्राहकमित्येवमुत्तरपदलक्षणां वदन्ति । तद्रीत्यात्र गुरुर्न पदार्थैकदेश इति, तत्र विशेषणान्वयस्य साहजिकत्वात् नायं दृष्टान्त इत्यतो दृष्टान्तान्तरं दर्शयति – चैत्रस्य नप्तेति" इत्यस्ति अवतरणिका। इयं तु न युक्ता। जरन्नैयायिकैः, वा अन्य-नैयायिकैर्वा कैरपि तत्पुरुषे उत्तरपदे लक्षणा नोक्ता। केवलं बहुव्रीहौ चित्रगु-रित्यादिषु अन्वयक्लेशादुत्तरपदे लक्षणा स्वीकृता । अतः जरन्नैयायिकपक्ष-रूपेणास्य प्रतिपादनं न सम्यक्। अथ उत्तररपदे लक्षणापक्षे "गुरुकुलम्" इत्यत्र कुलशब्द एव गुरुकुलं बोधयति, गुरुशब्दः तात्पर्यग्राहक इति गुरुः लक्ष्यार्थैकदेश एव भवति इति एकदेशान्वयं विना तत्र गतिरेव नास्ति । अतश्च अयं ग्रन्थः अत्यन्तमयुक्तः उपेक्षणीयः ।

चैत्रस्य नप्तेति ॥ जन्यशरीरजन्यशरीरं नप्तृपदार्थः। तदेकदेशप्रथमजन्यत्वे चैत्र-निरूपितत्वादिरूपषष्ठ्यन्तार्थान्वयः। तथा च चैत्रनिरूपितजन्यत्ववच्छरीरजन्य-शरीरमिति बोधः। न च षष्ठ्यर्थसम्बन्धस्य विशेष्ये अन्वयः युक्तः। तथा सति पुत्रेऽपि तादृशप्रयोगापत्तेः। तस्यापि पितामहजन्यजन्यत्वात् चैत्रनिरूपित-प्रयोज्यत्वाश्रयाच्च। न च प्रयोज्यत्वं परम्पराजन्यत्वमेवेति न दोष इति वाच्यम् । चतुर्थादिपुरुषेऽपि तथा प्रयोगापत्तेः । तथा च नप्तृपदार्थैकदेशजन्यत्वे चैत्ररूप-पदार्थान्वयस्य स्वीकार्यत्वेन ससम्बन्धिकस्थले पदार्थः पदार्थेनेति न्यायस्य सङ्कोचः करणीय इत्यर्थः। यद्यपि स्वजन्यजन्यसम्बन्धेन चैत्रस्य नप्तृपदार्थ-विशेष्येऽन्वयः शक्यः, अथापि एकदेशान्वये एव लोकानुभवः दृश्यते । अत एव एतद्वाक्यश्रवणोत्तरं जन्यत्वं चैत्रीयं वा न वेति न सन्देहः। अथात्र कथञ्चित् परम्परासम्बन्धेन नप्तृपदार्थविशेष्येऽप्यन्वयसम्भवादाह – **इत्यादीति** ॥ आदिना घटादन्यः, घटात् पृथक् इत्यादिपरिग्रहः। "घटादन्य" इत्यत्र भेदवद्रूपान्यपदार्थैकदेशभेदे पञ्चम्यन्तार्थघटनिष्ठप्रतियोगित्वस्य अन्वयः। "घटात्पृथक्" इत्यत्र पृथक् पदार्थैकदेशे पृथक्त्वे पञ्चम्यन्तार्थघटनिष्ठावधित्वस्य अन्वयः। शिवभागवत इत्यप्युदाहरणमिति **तत्त्वदर्शिनी** ।शरैः शातितपत्रक इत्यपि आदिपदार्थ इति **दर्पणः** । ॥**अन्वयाभ्युपगमादिति**॥ गुरुत्वादेः नियतान्यनिरूप्यत्वेन तदुपस्थितौ नियमेन जायमानायाः निरूपकाकाङ्क्षायाः

निवृत्त्यर्थं देवदत्तादिपदार्थान्वयवत् प्रकृतेऽपि किंसाधनकं गमनरूपं साध्यमिति साधनाकाङ्क्षानिवृत्तये ग्रामादिरूपकर्मकारकान्वयस्यावश्यकत्वमित्यर्थः । एवञ्च पूर्वस्यां सप्तदशकारिकाव्याख्यायाम् उपसंहारे "यत्रापि पाचकः पक्ता इत्यादौ भावना गुणभूता, तत्रापि क्लृप्तकार्यकारणभावानुरोधात् तस्यामेवान्वय इत्यवसीयते " इति ग्रन्थस्थस्य तस्यामेव(भावनायामेव) अन्वय इत्यस्य विशेष्ये एकदेशघटितपरम्परासम्बन्धेन अन्वय इति पक्षे भावनायामेव साक्षात् सम्बन्ध इत्यर्थः। स च विशेष्यभूतभावनायां (ग्रामं गच्छतीत्यादौ), सम्बन्धघटितायां (ग्रामं गत) इत्यादौ वा, एवं च तादृशनियमेन भावनाघटितसम्बन्धं विना अन्यत्रान्वय एव व्यावर्त्यत इत्यर्थः।

अवतरणिकायाम् इन्यादीनामित्यत्र आदिपदग्राह्यं निरूपयति – एवं भोक्तुं पाक इत्यादिना इति **दर्पणः**। तथा चादिपदग्राह्यौ क्त्वातुमुनौ। कारिकायां "गतादिस्था" इत्येतद्घटकादिपदग्राह्यमाह – भोक्तुमिति **प्रभा**। "भोक्तुं पाक" इत्यत्र धात्वर्थ-भावनायां विशेषणीभूतपच्यर्थभावनायामेव तुमुन्क्त्वार्थभावनयोरन्वय इति तस्या-शयः। "उक्तमर्थमन्यत्राप्यतिदिशति – एवमिति" इति **तत्त्वदर्शिनी** । अयं च दर्पणस्यैवानुवादः । इन्यादिरिव क्त्वातुमुन्प्रत्यययोरपि क्रियायामेवान्वय इत्येवात्र निरूपणीयत्वात् ।

19.3. भुक्त्वा पाकः, भोक्तुं पाकः

भोक्तुं पाक इति॥ "तुमुण्ण्वुलौ क्रियायां क्रियार्थायाम् "(पा.3-3-10) इति सूत्रेण क्रियार्थायां क्रियायां तुमुन् विधीयते। यथा "अध्येतुं शालां गच्छति " । "अव्यय-कृतो भावे" इत्यनुशासनात् अव्ययकृत्प्रत्ययभूतेन तुमुना धात्वर्थ एवानूद्यते। भावनाधिकारीयभावार्थप्रत्ययानां धात्वर्थानुवादकत्वस्य पूर्वमेवोक्तत्वात्। तथा चात्र साध्यावस्थापन्ना क्रियैव प्रधाना । यद्यप्युद्देश्यत्वरूपं तादर्थ्यमपि अत्र बुध्यते । सोऽप्यर्थः द्योत्य एव। प्रयोगे चास्मिन् तुमुन्प्रकृति-उपपदार्थयोः तादर्थ्यवद् समान -कर्तृकत्वमपि अभिधानबलाद् लभ्यते। अध्येतुं शालां गच्छतीत्यत्र भविष्यद-ध्ययनोद्देश्यकं अध्ययनकर्तृकर्तृकं शालाकर्मकगमनमिति बोधः। एवं च तुमुनः क्रियायोगे एव विधानात्तुमुन्नन्तबोध्यक्रियायाः साध्यावस्थापन्नक्रियायामेवान्वयः वक्तव्यः। तथा च पाक इत्यत्र घञ्प्रकृतिपच्धात्वर्थक्रियायां तस्या अन्वयः।

"आख्यातशब्द" इति कारिकया घञादिप्रकृतिभूतधातुवाच्यायाः क्रियायाः साध्यत्वेन भानं, विशेषणीभूतायामपि तस्यां कारकान्वयश्च प्रतिपादितः। अत एव तद्योगे भोक्तुमिति तुमुन् सिद्ध्यति । अन्यथा तुमुन्विधायकसूत्रस्थक्रियाग्रहणस्य साध्यावस्थतापन्नव्यापारार्थकत्वेन घञाद्यन्तेषु तादृशक्रियाया अप्रतीतौ विधानमेव व्यर्थं स्यात् । अत्र प्रकृतिभूतायाः क्रियायाः विशेषणत्वेऽपि तस्यामन्वयाभ्युपगमेनैव तुमुन् सिद्ध्यति । एवमेव प्रत्ययान्तरं निर्दिशति – **भुक्त्वा पाक** इति ॥ अत्र "समानकर्तृकयोः पूर्वकाले" (पा. 3-4-21) इति क्त्वाप्रत्ययः। अस्यापि अव्ययकृत्प्रत्ययत्वेन साध्यावस्थतापन्नभावनानुवादकत्वम् ।पौर्वापर्यं च सम्बन्धः क्त्वाद्योत्यः,समानकर्तृकत्वं च प्रधानक्रियया सह।उदाहरणं च भुक्त्वा पचति इति। अत्र तिङर्थविशेष्यभूतपच्यर्थभावनायाम् क्त्वान्तार्थसाध्यस्वभावभोजनक्रियायाः अन्वयः।एवमेव "भोक्तुं पाक" इत्यत्रापि "पाक" इति घञ्प्रकृतिकपच्धातूपस्थाप्यायामन्वयः। यद्यप्यत्र पचिक्रिया विशेषणीभूता घञर्थे, अथापि विशेषणीभूतायामपि पचिक्रियायामेव भुजिक्रियाया अन्वयादस्य "भोक्तुं पाक" इत्यस्य साधुत्वम् ।एवमेव " भोक्तुं गतः, भुक्त्वा गतः " इत्यादिष्वपि।अयं विशेषः – यथा गतादिशब्देषु प्रकृत्यर्थः क्रिया, प्रत्ययार्थश्च कारकम् , तयोश्च परस्परं विशेषणविशेष्यभावश्च, न तथा भावघञन्तस्थले ।अत्र तु एकैव क्रिया प्रकृतिप्रत्ययाभ्यामसत्त्वसत्त्वस्वभावा विशेष्यविशेषणभावापन्ना च अभिधीयते । अस्याः साध्यस्वभावतामाश्रित्य कारकाद्यन्वयः, सिद्धस्वरूपतामाश्रित्य लिङ्गसङ्ख्यादियोगः । उक्तं च नागेशेन " एकस्यैव धात्वर्थस्य साध्यत्वेन प्रकारता, सिद्धत्वेन विशेष्यता, एकनिष्ठत्वाच्च तयोः न स्फुटग्रहो बोधे।" इति । " साध्यत्वेन क्रिया तत्रे"ति कारिकाव्याख्याने मञ्जूषायामपि "एकस्यैव सम्बन्धिभेदात् आचार्यत्वमातुलत्वादिवत् एकस्या एव क्रियायाः प्रकृतिप्रत्ययरूपसम्बन्धिभेदात् उपस्थितिः " इति स्पष्टमभिहितम् । " गतिकारकोपपदात्कृत् " (पा. ६-२-१३९) इति सूत्रे भाष्ये " कृदभिहितो भावो द्रव्यवद्भवति क्रियावदपि इत्युक्तम् । ततश्च एकस्या एव भिन्नरूपेणोपस्थितिरिति ज्ञायते। अतश्च घञादिभावप्रत्ययान्तस्थले क्रियाद्वयं प्रकृतिप्रत्ययभागाभ्यामुपस्थाप्येते, तयोर्विशेषणविशेष्यभाव इति न मन्तव्यम् । तादृश्यः व्याख्याः अपि चिन्त्याः ।

अथ "कर्तुं गत" इति वत् कृत्प्रकृत्यर्थक्रियायां विशेषणीभूतायामन्वयमाश्रित्य तुमुन्नर्थकण्वुलः प्रयोगः स्याद्, ततश्च "कारको गत" इति स्यादिति चेत्तत्र अनभिधानमेवाश्रयणीयमिति **दर्पणः**। "भोक्तुं गत" इत्यादिषु तुमुनः साधुत्वेऽपि, "भोक्तुं पाक" इति घञन्तेन योगे तुमुनः साधुत्वविषये अस्ति मतभेदः। भूषणसारे भोक्तुं पाक इति पाकादियोगे तुमुनः साधुत्वोक्तिः "गतिकारकोपपदात्कृत्" (पा. 6-2-139) इति सूत्रस्थकैयटानुरोधेन। तत्र हि "कृदभिहितो भावो द्रव्यवद्भवति क्रियावदपि" इति भाष्ये क्रियावदपीति प्रतीकमादाय " तेन तुमुन्, भोक्तुं पाक इत्यादौ क्रियोपपदाश्रयः प्रत्ययः" इति तेनोक्तम् ।

वस्तुतस्तु "भोक्तुं पाक" इत्यादेरसाधुत्वमेव। तथा हि - " उपपदमतिङ्" (पा. 2-2-19) इति सूत्रे भाष्ये अतिङ्ग्रहणस्य कारको व्रजतीति प्रत्युदाहरणं प्रथमं प्रदर्शितम्। अतिङ्ग्रहणाभावे अत्र समासः स्यादिति। नेदं प्रत्युदाहरणं सुप्सुपेत्यनुवर्तनात् सुबन्तेनैव समासादिति तत्खण्डितम् । तर्हि अत्र तिङ्शब्देन तिङन्तार्थो लक्ष्यते। तथा च यत्सुबन्तं तिङन्तार्थं बोधयति, तादृशक्रियावाचकशब्देनोपपदस्य समासवारणं प्रयोजनं, ततश्च "कारको गत" (कर्तुं गत इत्यर्थे) इति प्रत्युदाहरण -मित्युक्तम्। अनन्तरं "नैतत्क्रियावाचि" इति तत्खण्डनं कृतम् ।(अत्रोदाहरणे गत शब्दः क्रियावाची न भवति इत्यर्थः।)तस्य अयमाशयः – अत्र "तुमुण्ण्वुला" (पा.3-3-10) विति सूत्रेण ण्वुलेव न भवति, तत्र क्रियार्थायामिति स्त्रीलिङ्ग-निर्देशेनैव तत्फलक्रियायाः लाभसम्भवात् , क्रियाग्रहणसामर्थ्यात् प्रत्यासत्त्या क्रिययोः सजातीयत्वलाभे प्रत्ययार्थविशेषणतानापन्नसाध्यतामात्रापन्नक्रियावाचक - पदे एव तुमुनादिविधानात्,गतशब्दे क्तप्रत्ययार्थविशेषणीभूतां क्रियामाश्रित्य तुमुन्नर्थः ण्वुल् न भवति । अतः तादृशप्रयोगस्यैव अप्रसक्त्या तत्र समासापत्तिः दूरतोऽपास्ता।तथा च "कर्तुं गत" इत्याद्यसाध्वेव। "गतिकारकोपपदात्कृत्" (पा.6-2-139) इति सूत्रे कृद्ग्रहणप्रयोजनविचारे "यत्क्रियायुक्ताः प्रादयः तं प्रत्येवो -पसर्गगतिसंज्ञास्स्युः" इति "प्रभवनम्" इत्यत्रैव स्वरः स्यात् , प्रणीः, प्रणायकः इत्यत्र न स्यात् । कृद्ग्रहणे तु कृदन्तमात्रस्य ग्रहणात् विशेषणीभूतक्रियकेऽपि प्रवृत्तिरित्युक्तम्। तथा च यत्र लक्षणे क्रियावाचकशब्दग्रहणं तत्र प्रधानीभूतसाध्य-मात्रावस्थापन्नक्रियाग्रहणमिति कृद्ग्रहणेन ज्ञापितत्वात् , "तुमुण्ण्वुला" (पा.3-3-10) सूत्रे क्रियाग्रहणात् तत्र प्रधानीभूतसाध्यमात्रावस्थापन्नक्रियार्थक्रियायामुपपदे

एव तुमुन्ण्वुलौ भवत इति "भोक्तुं पाक" इत्यादिषु तुमुन् न भवति। अथ यत्र क्रियावाचकशब्दग्रहणं नास्ति, किन्तु क्रियारूपार्थग्रहणं तत्र तु विशेषणीभूतां साध्यावस्थापन्नां क्रियां निमित्तीकृत्य प्रत्ययाः सिद्ध्यन्ति। तथा च क्त्वा-कृत्वसुजादिविधायकेषु क्रियाशब्देन क्रियारूपार्थग्रहणात् भुक्त्वा पाकः, द्विः पाकः, पञ्चकृत्वः पाकः इत्यादि साध्वेव। "संख्याया क्रियाभ्यावृत्तिगणने कृत्वसुच्" (पा. 5-4-17) इत्यत्र क्रियाशब्देन क्रियामात्रग्रहणं, न तु प्रधानीभूतक्रियाग्रहणं, द्विर्वचनं, द्विः प्रयोगः, द्विरावृत्तिरित्यादिप्रयोगदर्शनात्। वस्तुतः तत्रत्यं क्रियापद-मुत्तरत्रानुवृत्त्यर्थमेवेति कृत्वसुजादीनामपि प्रयोगः साधुरेव इति **काशिका**कारः भाष्यप्रदीपोद्योतकृतस्तु इत्यारभ्य नागेशमतं स्वसिद्धान्तं च प्रत्यपीपदत् । ततश्च कृदर्थविशेषणीभूतां क्रियामाश्रित्य कृत्वसुजादयो न भवन्तीति नागेशाशयं वर्णयन्ती **प्रभा**व्याख्या चिन्त्या। अथ यदि द्विः पाक इत्यादीनां प्रयोगो नास्तीति विभाव्यते तत्रानभिधानमेवाश्रयणीयम् इति भावः। कृत्वोर्थानां विषये अयमेव सिद्धान्तः। अत्र वैयाकरणेषु मतभेद एव नास्ति।

अयमत्र निष्कर्षः।विशेषणीभूतां क्रियामाश्रित्य क्त्वातुमुनौ भवतः इति दीक्षितकौण्डभट्टयोर्मतम् । तुमुन् न भवतीति नागेशः। क्त्वा तु भवति, एवं कृत्वोऽर्थाः सुजादयोऽपि भवन्ति ॥19॥

पूर्वस्यां कारिकायां यथा पचतीत्यादिषु प्रत्ययार्थविशेष्यभूतां भावनामादाय भोक्तुं पचति, गत्वा पचतीत्यादौ क्त्वातुमुनादयः, तथा पाक इत्यादिषु प्रत्ययार्थ-विशेषणीभूतामपि भावनामादाय भवन्ति, तथा च भोक्तुं पाकः, गत्वा पाकः इत्यादिप्रयोगसिद्धिरित्युपपादितम् । सर्वत्र च धातुना साध्यस्वभावा एव भावना अभिधीयत इति तस्यामेव तुमुनादिप्रकृतिबोध्याया अपि पूर्वोत्तरकालिकत्वादि-सम्बन्धेनान्वयः। इतः पूर्वमेव सम्बोधनाद्यष्टकस्यापि साध्यस्वभावभावनाया-मेवान्वय इति प्रतिपादितम् । तत्रापि धातुवाच्यायां साध्यस्वभावायां प्रत्ययार्थ-विशेष्यभूतायां विशेषणभूतायां वा भावनायामन्वय इत्येव स्वीकरणीयम् । अष्टके च कृत्वसुजादिप्रत्ययानां ग्रहणात् तेषामपि विशेष्यभूतायां विशेषणभूतायां वा धात्वर्थभावनायामन्वय इति सिद्धम्। तथा च यथा द्विः पचति इत्यस्य साधुत्वं, तथा द्विः पाक इति प्रयोगस्यापि साधुत्वापत्तिः। न चेष्टापत्तिः। द्विःपाकः,

20. कृत्वोऽर्थेषु अतिप्रसङ्गशङ्का समाधानञ्च

अतिप्रसङ्गमाशङ्क्य समाधत्ते-

कृत्वोऽर्थाः क्त्वातुमुन्वत्स्युरिति चेत् सन्ति हि क्वचित्।
अतिप्रसङ्गो नोद्भाव्योऽभिधानस्य समाश्रयात् ॥ 20 ॥

"भोक्तुं पाकः" भुक्त्वा पाक इत्यादौ, "तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम्" (पा. 3-3-10) "समानकर्तृकयोः पूर्वकाले" (पा. 3-4-21) इति क्रियावाचकोपपदे क्रिययोः पूर्वोत्तरकाले विधीयमाना अपि तुमुन्नादयो गुणभूतां तामादाय यथा जायन्ते, तथा कृत्वोऽर्था अपि स्युः। "एकः पाकः" इत्यत्र, "एकस्य सकृच्च" (पा. 5-4-19) द्वौ पाकौ, त्रयः, चत्वार इत्यत्र "द्वित्रिचतुर्भ्यः सुच्" (पा. 5-4-18) पञ्च इत्यत्र कृत्वसुच् स्यात्। तथाच "सकृत् पाकः, द्विस्त्रिश्चतुः पाका" इत्याद्यापत्तिरिति चेदिष्टापत्तिः, "द्विर्वचनम्" इत्यादिदर्शनात्।

अतिप्रसङ्गस्त्वनभिधानान्नेत्याह - अतीति। "नहि वचिरन्तिपरः प्रयुज्यते" इत्याद्यभियुक्तोक्तरीत्या समाधेयमिति भावः।

त्रिःपाकः, चतुःपाक इत्यादिप्रयोगास्तु भाष्यकारेणैव नैतत् क्रियावाची, किन्तु द्रव्यवाचीत्युक्त्वा, द्रव्यस्याभ्यावृत्त्यसम्भवात् सुजादीनामप्राप्तिरेवेति वारिताः। परन्तु पाक इति शब्दार्थेऽपि साध्यक्रियायाः विशेषणत्वेन सत्त्वात् तदन्वयमाश्रित्य सुजादिषु प्राप्तेषु द्विःपाक इत्यादिप्रयोगा अनिष्टा अपि भवेयुः इतीमां शङ्कामेवोद्भावयति – अतिप्रसङ्गमिति। गुणभूतायां धातुवाच्यायामन्वय इति पक्षे द्विः पाक इत्यादिप्रयोगापत्तिरूपम् अतिप्रसङ्गमित्यर्थः। **आशङ्क्येति**॥ कारिकायां कृत्वोऽर्थाः क्त्वातुमुन्वत्स्युरिति चेत् इति भागेनेति शेषः। एतदेव व्याख्याने स्पष्टं प्रतिपादितं "भोक्तुं पाक इत्यारभ्य तथा सकृत्पाकः, द्विस्त्रिश्चतुः पाक इत्याद्यापत्ति-रिति चेत् " इति ग्रन्थपर्यन्तम् । समाधत्ते - **सन्ति हि क्वचित्** इति । द्विर्वचनम् , द्विःप्रयोगः द्विरावृत्तिरित्यादिप्रयोगदर्शनात् कृत्वोऽर्थस्यापि गुणीभूतधातुवाच्य-भावनायामप्यन्वयः अध्यवसीयते । ततश्च द्विःपाक इत्यादीनां प्रयोगाणामिष्टापत्ति-रेव । नन्वेवं सकृत्पाकः द्विस्त्रिश्चतुःपाक इति प्रयोगाणां साधुत्वे प्रयोगः स्यात् । भाष्यकारस्तु नैतान् प्रयोगानङ्गीकृतवान्। अतः विशेषणीभूतां क्रियामादाय कृत्वसुजादयो न भवन्ति इति चेत् – तर्हि द्विर्वचनं, द्विःप्रयोगः, द्विरावृत्तिः इत्यादिप्रयोगाणामसाधुत्वं स्यात् । तथा हि – " द्विर्वचनेऽचि " (पा. 1-1-59)

इति सूत्रयता सूत्रकारेण भावकृदन्तबोध्यक्रियायां सुजर्थस्य अन्वयः प्रदर्शितः । भाष्यकारेणापि "द्विःप्रयोगो द्विर्वचनं षाष्ठम्" इति वदता प्रयोग इति घञन्तबोध्य-क्रियायां सुजर्थस्यान्वयः प्रदर्शितः । एवं द्विरण्विधिः द्विरावृत्तिः इत्यादयोऽपि प्रयोगाः भाष्यकारीयाः कृत्वोऽर्थानां विशेषणीभूतसाध्यस्वभावायामपि क्रियाया-मन्वयं सुस्पष्टं ज्ञापयन्ति । यदि च तादृशः एक एव प्रयोगः तर्हि निपातनमाश्रित्य साधुत्वं वक्तुं शक्यते । परन्तु प्रयोगबाहुल्यात् सामान्यसूत्रेणैव तेषु सुजादयः साधनीया इति अवश्यमेव धातूपस्थाप्यायां कृदर्थविशेषणीभूतायामपि क्रियायां सुजाद्यर्थान्वयः स्वीकार्यः। ननु "द्विः प्रयोगो द्विर्वचनम्" इत्यत्र प्रयुज्यते असा-विति प्रयोगः, उच्यते असाविति वचनमिति कर्मव्युत्पत्त्या बाहुलकात् कर्मणि घञ् ल्युट् च। ततश्च कारककृदन्ते प्रकृतिभूतधातुना साध्यस्वभावा क्रिया बोध्यते, तस्यां च विशेषणीभूतायामपि सुजाद्यर्थान्वय इत्यत्र स भाष्यप्रयोगः मानं भवति, न तु भावकृत्प्रत्ययान्तप्रकृतिभूतधात्वर्थे, तथा च भावप्रत्ययप्रकृतिभूतधात्वर्थ-क्रियायां सुजाद्यर्थान्वये मानं नास्तीति चेन्न। द्विरावृत्तिः, द्विरण्विधिरित्यादीनां सत्त्वात् । अत्र आवृत्तिरिति भावक्तिन्नन्तमेव । तथा द्विरण्विधिरित्यपि भावकि-प्रत्ययान्तम् । नन्वेवं "द्विः पाक" इत्यादि कुतो न भवतीति चेदुच्यते –

"अभिधानलक्षणाः कृत्तद्धितसमासा" इत्यभियुक्तोक्त्या, यत्र सुजादिप्रयोगे तादृशः क्रियाभ्यावृत्तिरूपः अर्थः प्रतीयते तत्रैव सुजादिः।"द्वौ पाकौ" इत्यत्र क्रियाभ्या-वृत्ति गणनं न प्रतीयते। अतः सुज्न । "द्वौ पाकौ" इत्यत्र कस्मान्न भवति? नैतत् क्रियागणनम् , किं तर्हि द्रव्यगणनम् " इति भाष्यस्याप्ययमेवाशयः। अभिमुखी प्रवृत्तिः अभ्यावृत्तिः। सा च जन्मरूपा। अत्र न तथा क्रियाजन्मग्रहणं यथा द्विः पचतीत्यत्र । क्रियाजन्मगणनार्थत्वं यदि विवक्षितं तर्हि "द्वौ पाकौ " इति द्विवचनं न स्यात्। एकवचनमेव स्यात् द्विरावृत्तिरितिवत्। तथा च यत्र क्रियाजन्म गणनात्मकमर्थमभिधातुं समर्थाः कृत्वोऽर्थाः तत्र स्युरेव। यथा द्विरावृत्तिरित्यादि। अत्र च लोक एव प्रमाणम् । गमकत्वे सति वृत्तिः, गमकत्वाभावे वृत्त्यभावः इत्यर्थः । अत एव गमकत्वमाश्रित्य सापेक्षेऽपि देवदत्तस्य गुरुकुलं, शिवभागवत इत्यादौ वृत्तिराद्रियते।गमकत्वाभावादेव च ऋद्धस्य राज्ञः पुरुषः, महर्षेः वसिष्ठस्यापत्यमित्यादिषु षष्ठीसमासो वा अपत्यप्रत्ययो वा न भवति। तथा च कृत्वसुजादीनां गुणभूतक्रियामाश्रित्य प्रवृत्तौ अप्रवृत्तौ च अभिधानानभिधाने

आश्रयणीये । तदेव कारिकाया उत्तरार्धं सूचयति – **अभिधानस्य समाश्रयात् अतिप्रसङ्गः नोद्भाव्य** इति। अत्र दृष्टन्तं वक्ष्यति – **न हि वचिरन्तिपरेत्यादिना** । "अभिधानलक्षणाः कृत्तद्धितसमासा" इत्यभियुक्तोक्तेः येषां तद्धितप्रत्ययान्तानां प्रयोगः प्रामाणिकः तेषां साधुत्वम् अन्वाख्येयं शास्त्रेण। "सकृत्पाक" इत्यादि-प्रयोगे तु प्रामाण्ये विवादात् तस्य साधुत्वान्वाख्यानाय "एकस्य सकृच्च" (पा.5-4-19) इत्येतदत्र न प्रवर्तत इति भावः। ननु गुणप्रधानभावो भिन्नयोः पदार्थयोः।पाक इत्यादौ च घञ्-धातुभ्यां प्रतिपाद्यक्रियायाः सिद्धसाध्यस्वभावायाः एकत्वमभ्युपेयते।अतः कथं गुणप्रधानभावः। कथं वा गुणीभूतसाध्यक्रिया-माश्रित्य क्त्वातुमुनादयः इति चेद् – उच्यते। "साध्यत्वसिद्धत्वाभ्यामसत्त्वसत्त्व-रूपाभ्यां धर्माभ्यामुपाधिभ्यामेकस्यामेव क्रियायां भेदः कल्प्यते।ततश्च विशेषण-विशेष्यभावे न किञ्चित् बाधकम्। तत्र "प्रकृतिप्रत्ययौ सहार्थं ब्रूत" इत्यादिक्लृप्त-न्यायेन प्रत्ययप्रतिपाद्यायाः सिद्धस्वभावायाः प्राधान्यम्। प्रकृत्यर्थभूतसाध्य-स्वभावा क्रिया तस्यां विशेषणतया भासते। एकज्ञानविषयत्वं च संसर्गः। एवं च यथा गतादिषु विशेषणतया भासमानक्रियायामेव कारकान्वयः तथा कृत्वोऽर्थाः अपि भवन्ति। अतिप्रसङ्गस्तु अनभिधानादेव वारणीय" इति **परीक्षा** अत्र हृद्या । एवञ्च यथा वचन्तीत्यस्य व्याकरणशास्त्रसाध्यत्वेऽपि लोके प्रयोगाभावेन हेतुना तत्र शास्त्रस्याप्रवृत्तिः, तथा "द्विः पाक" इत्यादिष्वपीति भावः। पाकादिषु धातुना साध्यस्वभावायाः क्रियायाः अभिधाने **कान्तिः** वाक्यपदीयमित्थं प्रमाणतया प्रदर्शयति –

लकृत्यक्तखलर्थानां तथाव्ययकृतामपि ।
रूढिनिष्ठाघञादीनां धातुः साध्यस्य वाचकः ॥ (वा. प. तृ. क्रिया.52)

इति।लः - लादेशाः तिङः, शतृशानजादि च, कृत्याः - तव्यदादयः कृत्यप्रत्ययाः, क्तः - नपुंसके भावे विहितः क्तप्रत्ययः, खलर्थाः - खल् प्रत्ययः, तस्यार्थे विहिताः युच्, णिनिः, क्तिच्, क्त्वा च, अव्ययकृतः - क्त्वा, तुमुन्, णमुल्, रूढिः - क्तिन् प्रत्ययः (क्तिन्प्रत्ययस्य रूढिरिति प्राचां व्यवहारः।), रूढिशब्दाः ताच्छीलिका इति हेलाराजः।निष्ठा - क्त, क्तवतु प्रत्ययौ कारकार्थौ। घञादयः - घञ्, अच्, अप्, श इत्यादयः "भावे" (पा.3-3-18) " अकर्तरि च कारके संज्ञायाम् " (पा.3-3-19) इत्यधिकारे विहिताः। आदिना सुजादयः इति हेलाराजः। एतेषां प्रत्ययानां

प्रकृतिभूतो धातुः साध्यस्वभावक्रियावाचकः। अस्यां च साध्यस्वभावायां कारकादीनामन्वयः इति अस्य श्लोकस्य भावः ।]

भोक्तुं पाक इति॥ " तुमुण्ण्वुलौ क्रियायां क्रियार्थायाम् " (पा.3-3-10) इति सूत्रेण क्रियाफलकक्रियावाचके उपपदे सति, फलीभूतक्रियावाचकधातोः तुमुण्ण्वुलौ विधीयेते। फलीभूता च क्रियोत्तरकालभाविनी एव भवतीति उपपदार्थक्रियोत्तरकालिकत्वं फलीभूतक्रियायाः सिद्धम्। ततश्च तुमुन्नर्थः पूर्वकालिकत्वरूपः। भोक्तुं व्रजतीत्यत्र फलीभूतभोजनपूर्वकालीना व्रजनक्रियेति बोधः। अत्र च सूत्रे उपपदं क्रियावाचकं भवेत् तच्च पदरूपं (सुप्तिङन्तरूपं) वा अपदरूपं (धातुरूपं) वा भवितुमर्हति।एवं " समानकर्तृकयोः पूर्वकाले " (पा. ३-४-२१) इति सूत्रेण एककर्तृकयोः द्वयोः क्रिययोः परस्परं पूर्वोत्तरकालिकत्वबोधनाय पूर्वकालिकक्रियावाचकात् क्त्वाप्रत्ययो भवति। भुक्त्वा व्रजतीत्युदाहरणम् । अत्र क्त्वाप्रत्ययार्थः उत्तरकालिकत्वम्।ततश्च भोजनोत्तकालीना समानकर्तृका व्रजनक्रियेति बोधः। अत्रोभयत्र उपपदसंज्ञायाः प्रयोजनं नास्ति, अतस्तत्र उपपदे सतीति नार्थः। किन्तु क्रियावाचके सतीत्येवार्थः। तच्च क्रियावाचकं पदमपदं वा।अत एव "भुक्त्वा गत" इत्यत्र क्त्वाप्रत्ययः। यदि तत्र क्रियावाचकस्य सुप्तिङन्तरूपस्य पदस्यैव ग्रहणे तु गम्धातोः पदत्वाभावात् तदप्राप्तिः स्पष्टैव। तदेव निरूपयति - **भोक्तुं पाको, भुक्त्वा पाक** इत्यादौ इति। **पूर्वोत्तरकाले** इति॥ पूर्वोत्तरकालबोधका इत्यर्थः।तत्र तुमुन्नर्थः पूर्वकालिकत्वम् । क्त्वार्थश्चोत्तरकालिकत्वम् । एतच्च सम्बन्धविधया भासते। न तु पदार्थत्वेन। ततश्च तुमुन्क्त्वाद्योत्यावेतौ सम्बन्धाविति भावः।तत्र क्त्वातुमुन्वाच्या क्रिया विशेषणम्। तिङन्तबोध्या च विशेष्यम् । ततश्च तिङन्तबोध्यायां प्रधान - क्रियायाम् क्त्वादिप्रकृत्यर्थस्य विशेषणत्वेनान्वयः। **तुमुन्नादय** इति॥ "तुमुण्ण्वुलौ क्रियायां क्रियार्थायाम्" (पा.3-3-10),"समानकर्तृकयोः पूर्वकाले " (पा.3-4-21), " विभाषा बहोर्धाऽ विप्रकृष्टकाले " (पा.5-4-20) इति विहिताः तुमुन्, ण्वुल्, क्त्वा, धा आदयः। **गुणभूतां** - विशेषणभूतां, **ताम्** - साध्यस्वरूपां धातुवाच्याम् ,**आदाय** - निमित्तीकृत्य, **यथा जायन्ते** - उत्पद्यन्ते, व्यवहारविषयाः भवन्ति, **तथा** - तेन प्रकारेण, **कृत्वोऽर्थाः अपि** - कृत्वसुच्, सुच्, धा आदयः प्रत्ययाः अपि स्युः। तथा सति सकृत्पाकः, द्विः पाकः, त्रिः पाकः, चतुः पाकः पञ्चकृत्वः पाकः, इति प्रयोगाः स्युः। तत्र सुजादिविधायाकान् सूचयति – **एकस्येत्यादिना** ।

गुणभूतामिति ॥ यद्यपि यथा पाचक इत्यादाविव प्रकृत्यर्थप्रत्ययार्थयोः पार्थक्येनोपस्थितिः तयोश्च गुणप्रधानभावेन शाब्दबोधे भानम् , तथा पाक इत्यत्र साध्यसिद्धा - वस्थतापन्नक्रियाया एकत्वात् द्वयोः प्रकृत्यर्थप्रत्ययार्थयोः पार्थक्येन शाब्दबोधे भानं नास्ति, तथापि प्रकृतिप्रत्ययरूपवाचकभेदेन एकस्यैवार्थस्य भेदकल्पनया गुणप्रधानभावः उपपद्यते। एकार्थवृत्तित्वेन च गुणप्रधानभावस्य स्फुटं बोधे ग्रहणाभावेऽपि तत्र लिङ्गसंख्यासम्बन्धवशात् प्रत्ययार्थस्य प्राधान्यमवसीयते। अव्ययकृदन्तस्थले तु प्रत्ययार्थस्य लिङ्गसंख्यासम्बन्धाभावात्, प्रत्ययस्य धात्वर्थानुवादकत्वमेवेति तत्र साध्यरूपाया एव क्रियायाः भानमिति पूर्वमेवोक्तम् । पूर्वोल्लिखित**परीक्षा**ग्रन्थस्याप्ययमेवाशयः। साध्यत्वेन क्रिया तत्रेति कारिकया एकस्यामेवावस्थायां प्रकृत्या साध्यरूपत्वं, प्रत्ययेन च सिद्धरूपत्वं च एकस्याः क्रियाया एव प्रतिपाद्यते, न तु कदाचित् प्रकृत्या साध्यत्वं, कदाचित् प्रत्ययेन सिद्धत्वम् । एकस्यैव चैत्रादेः सम्बन्धिभेदात् आचार्यत्वपितृत्वादीति दृष्टान्तेनापि अयमेवार्थः सिद्ध्यति। न ह्याचार्यत्वसत्तादशायां चैत्रादौ पितृत्वमपैति। उक्तं च नागेशेन –"एकस्यैव धात्वर्थस्य साध्यत्वेन प्रकारता, सिद्धत्वेन विशेष्यता, एकनिष्ठत्वाच्च तयोर्न स्फुटग्रहो बोधे। एतेन घञ्वाच्यो भावः प्रधानमिति ग्रन्थाः व्याख्याताः" इति। विषयममुमित्थं समर्थयन्ति **तत्त्वदर्शिनः** गुरुचरणाः -" मृगो धावति पश्य " ति हरिप्रतिपादितदृष्टान्तान्तरमस्मदाशयमेवोपोद्बलयति। युक्तं चैतत्। अन्यथा प्रकृत्या क्रियायाः साध्यत्वेनोपस्थितौ प्रत्ययस्य तात्पर्यग्राहकतादशायाम् ओदनस्य पाक इत्यादौ प्रकृत्यर्थान्वयित्वेन कर्मषष्ठ्युपपत्तावपि पाक इत्यत्र सिद्धरूपेण भासमानस्यार्थस्याभावेन लिङ्गसंख्यानन्वयापत्तिः। एवं प्रत्ययेन सिद्धरूपेणोपस्थितौ धातोस्तात्पर्यग्राहकतादशायां साध्यत्वेन भासमानस्यार्थस्याभावात् ओदनस्येति कर्मषष्ठ्यनुपपत्तिः। न हि कदाचित् कर्मषष्ठ्याः कदाचित् लिङ्गसङ्ख्ययोरुपपत्तिरिति वक्तुं पार्यते। अतः सर्वदा भावप्रत्ययान्तस्थले उभयरूपायाः क्रियायाः भानमस्त्येव। एतेन द्विर्वचनमित्यत्र "स्ववृत्तिक्रियात्ववत्सम्बन्धेन साध्यभाषणविशिष्टं सिद्धभाषणमिति वचनशब्देन बोधः। एवमेव पाक इत्यादावपि बोध्यमि " ति **पञ्चोलिनः** परास्ताः" इति । एवं " गत इत्यादौ यत्र क्रियायाः गुणभूतत्वं तत्र तुमुन्क्त्वादीनां त्वसाधुत्वमेव, क्रियाप्राधान्ये एव तत्प्रवृत्तेरिति दिक्।" इत्यप्ययुक्तमिति तेषामाशयः। तुमुन्विषये मतभेदेऽपि क्त्वाविषये गतादि-

शब्दयोगे मतभेदाभावात् त्त्वाविषयेऽसाधुत्वप्रतिपादनमयुक्तमिति तात्पर्यम् । **एकः पाक** इति॥ ननु क्रियाभ्यावृत्तिगणने हि कृत्वसुजादयः प्रत्ययाः विहिताः। अभ्यावृत्तिश्च पुनःपुनः जन्म। एवञ्च यत्र क्रियायाः पुनः पुनः जन्मनो गणनं तत्रैव सङ्ख्यावाचकात् कृत्वसुजादयः भवन्ति ।एकशब्देन च क्रियाभ्यावृत्तिगणनाभावात् कथं सुच् ? इति चेत् सत्यम् ।"एकस्य सकृच्च "(पा.5-4-19) इति सूत्रेणैव एकशब्दात् सुच्, तत्सन्नियोगेन सकृदादेशश्च विधीयेते। अत्र च "क्रियाभ्यावृत्ति-गणने" इति संपूर्णं न सम्बध्यते।अपि तु तदेकदेशक्रियागणनमात्रं सम्बध्यते। एतदर्थमेव "संख्यायाः क्रियाभ्यावृत्तिगणने कृत्वसुच्" (पा.5-4-17) इति सूत्रे क्रियाग्रहणम्। अन्यथा अभ्यावृत्तिः (पुनः पुनः जन्म) क्रियाया एव सम्भवतीति कृत्वसुज्विधायके सूत्रे क्रियाग्रहणं व्यर्थं स्यात्। अतश्च तदुत्तरत्र अनुवृत्त्यर्थमेवेति कैयटादौ स्पष्टम् । तेन च सकृत्पचतीति प्रयोगः साध्यते। एवं भावकृद्विशेषणीभूतधात्वर्थसाध्यक्रियायां कृत्वसुजादीनामन्वयस्वीकारे "सकृत्पाकः" इति प्रयोगः स्यात्। एवं द्वौ पाकावित्यर्थे द्विः पाक इति, त्रयः पाका इत्यर्थे त्रिः पाक इति, चत्वारः पाकाः इत्यर्थे चतुः पाक इति, पञ्च पाका इत्यर्थे पञ्चकृत्वः पाकः इति प्रयोगाः स्युः। इति शङ्का । समाधत्ते – **इष्टापत्तिरि**ति॥ कृदर्थविशेषणीभूतक्रियान्वयमभ्युपगम्य यथा त्त्वादयो भवन्ति, तथा कृत्वसुजादयोऽपि भवन्त्येव । प्रामाणिकप्रयोगदर्शनात् । तदेव प्रदर्शयति – **द्विर्वचनमि**ति॥ "द्विर्वचनेऽचि" (पा. 1-1-59) इति सूत्रकारेण "द्विःप्रयोगो द्विर्वचनं" इति भाष्यकारेण च ल्युडर्थविशेषणीभूतधात्वर्थसाध्यक्रियान्वयमाश्रित्य सुच् प्रयुक्तः।अतः त्त्वादिरिव कृत्वसुजादीनामपि प्रयोगः प्रामाणिक एवेति भावः।ननु द्विर्वचनमित्यस्य सौत्रत्वात् साधुत्वं भवतु, तेन प्रयोगेण सामान्यतया विशेषणीभूतक्रियान्वयेऽपि सुजादय इति किमर्थं ज्ञापनीयमिति चेदाह – **इत्यादी**ति। यदि च द्विर्वचनमिति एक एव तादृशः प्रयोगः, तर्हि सौत्रत्वं निपातनं वाश्रित्य तस्य केवलं साधुत्वमभ्युपगन्तुं शक्यते । परन्तु तादृशाः अनेके प्रयोगाः सन्ति। यथा – द्विःप्रयोगः, द्विरावृत्तिः, द्विरण्विधिः इत्यादयः। यदि च निपातनमाश्रित्य केवलं द्विर्वचनशब्दस्यैव साधुत्वमुक्तं स्यात् ,तर्हि एतेषामसाधुत्वं स्यात्। परन्तु एतेऽपि प्रयोगाः भाष्यवार्तिककाराभ्यां प्रयुक्ताः।अतश्च कृत्वोऽर्थानामपि विशेषणीभूतक्रियायामन्वयेऽपि साधुत्वं स्वीकरणीयमेव।

केचित्तु "क्रियाभ्यावृत्तिगणने" इत्यत्र क्रियाग्रहणं व्यर्थम्। तस्या एवाभ्यावृत्तिसंभवेन सामर्थ्यात्तल्लाभात्। तथाच साध्यमात्रक्रियालाभाय तदिति वाच्यम्। न च पाक इत्यादौ तादृशीति नातिप्रसङ्गः। द्विर्वचनमिति च द्विःप्रयोगो द्विर्वचनमिति व्युत्पत्त्या "द्विर्वचनेऽचि" इति ज्ञापकं वाश्रित्योपपादनीयमित्याहुः॥20॥

नन्वेवं सामान्यनियमाङ्गीकारे शिष्टैरनभ्युपगतानां प्रयोगाणामपि साधुत्वं स्यात्। भाष्यकारेणैव सकृत्पाकः, द्विःपाकः, इत्यादीनामप्रयोगः प्रतिपादितः। तथा च "सकृत्पाक"इत्यादीनां प्रयोगाणामभ्युपगमः भाष्यविरुद्ध इति चेदाह – **अतिप्रसङ्गस्त्वनभिधानादिति॥** यदि च सकृत्पाकादीनामप्रयोग एवेष्टः, सामान्यनियमेन च तत्र सुजादीनामतिप्रसङ्गः इति मन्यते तर्हि अनभिधानमाश्रित्य "वचन्ती" त्यादिवत् एते प्रयोगाः वारणीयाः इति भावः। अस्यायमाशयः – यस्मात्प्रयोगाच्छिष्टलोकस्य बोधाभावः,तस्यानभिधानमिति शास्त्रे व्यवहारः। एतच्च "तदस्य तदस्मिन्निति स्यादिति" (पा.5-1-16) इति सूत्रे भाष्ये स्पष्टम्। तत्र हि द्वयी विवक्षा प्रायोक्त्री, लौकिकी चेत्युक्तम्। प्रयोक्तृशब्देन व्यवहारार्थं प्रयोगकर्तारः विवक्षिताः, ये चापभ्रंशानपि प्रयुञ्जते। अतस्तद्विवक्षा न शास्त्रप्रवृत्तौ नियामिका। किन्तु लौकिकी एव। अत्र लोकशब्देन शिष्टानां लोकः विवक्षितः, स हि यत्रार्थे यं शब्दं धर्मबुद्ध्या परशिष्टबोधनाय प्रयोक्तुमिच्छति, तद्विवक्षा शास्त्रप्रवृत्तौ प्रयोजिका। अयं च विषयः तत्रत्यकैयटे स्पष्टः। "शिष्टपरिज्ञानार्था अष्टाध्यायी, शिष्टाश्च शब्दतत्त्वविदः साक्षात्कृतपरावराः, ते यस्मिन्नर्थे यस्य शब्दस्य साधुत्वमभ्युपगच्छन्ति, सः प्रमाणमि" ति पृषोदरादि(पा. 6-3-109)सूत्रे भाष्यकारेणोक्तम्। तथा च शिष्टैरनभ्युपगतेषु प्रयोगेषु शास्त्रस्य प्रवृत्तिरेव न भवतीति द्विः पाक इत्यादीनां शिष्टानभ्युपगमात् तत्र सुजादिविधायकशास्त्राप्रवृत्तिरेवेति भावः। एतदेव "यथालक्षणमप्रयुक्ते" इति वचनेनाप्युच्यते। यथा च वचन्तीति साधनार्थं शास्त्रं न प्रवर्तते तथा द्विः पाक इत्यादीनामपि साधनाय शास्त्रं न प्रवर्तत इति भावः।

20.1. अतिप्रसङ्गवारणमन्यथेति वदतां केचित्तु वादिनां मतप्रतिपादनम्

अनभिधानाश्रयणं विनैव कृत्वसुज्विधायके क्रियाग्रहणसामर्थ्यात् द्विः पाक इत्यादिप्रयोगाः वारयितुं शक्यन्ते इति केचिन्मन्यते। तन्मतमनुवदति – **केचित्त्विति॥** तेषामयमाशयः –"संख्याया क्रियाभ्यावृत्तिगणने कृत्वसुच्" (पा. 5-4-17) इति सूत्रेण क्रियाभ्यावृत्तिग्रहणे कृत्वसुच् विधीयते। अभ्यावृत्तिशब्दस्य

पुनः पुनः भवनमर्थः। तच्च भवनं नैकम् । किन्तु अनेकम् । तथा च पुनः पुनः जन्मनो गणनम् अभ्यावृत्तिगणनम्। तत्र द्रव्यगुणयोः पुनः पुनः जन्म गणन-योग्यं नास्ति, यतः एकैव तेषामुत्पत्तिः। क्रियायास्तु धातुतो निवृत्तभेदाया एव प्रतीतिरिति पुनः पुनरुत्पत्तिरावृत्तिश्च भवति। तथा च पुनर्जन्मयोग्यस्यैव आवृत्तिः अभ्यावृत्तिशब्देनोच्यत इति, तद्योग्यतायाः क्रियामात्रनिष्ठत्वात् सूत्रे क्रियापदं विनैव क्रियाभ्यावृत्तिरूपार्थसिद्धौ पुनः क्रियाग्रहणं विशेषप्रतिपत्त्यर्थम्। यथा हि "तुमुण्वुलौ क्रियायां क्रियार्थायाम्" (पा. 3-3-10) इत्यत्र क्रियार्थायामिति स्त्रीलिङ्गनिर्देशबलादेव विशेष्यभूतक्रियासिद्धौ, कृतस्य क्रियाग्रहणस्य विशेष्यभूत-साध्यमात्रस्वभावक्रियार्थज्ञापकत्वमाश्रित्य "भोक्तुं पाक" इत्यादिप्रयोगाः वार्यन्ते नव्यैः। तथा च कृत्वसुज्विधायके क्रियाग्रहणं साध्यमात्रस्वभावक्रियाग्रहणार्थं भविष्यति। पाकादिभिस्तु सिद्धसाध्यस्वभावा क्रियाभिधीयते न साध्यमात्र-स्वभावेति तामादाय कृत्वसुजादयः न भवन्ति। उक्तश्चैतत् कैयटेन "एकस्य सकृच्च" (पा. 5-4-19) इति सूत्रे भाष्यप्रदीपे। तथा च द्विः पाक इत्यादि नातिप्रसङ्गः। द्विर्वचनम् , द्विः प्रयोग इत्येतौ तु " द्विर्वचनेऽचि " (पा. 1-1-59) इति ज्ञापकं, "द्विः प्रयोगो द्विर्वचनम्" इति भाष्यव्युत्पत्तिं चाश्रित्य उपपादनीयौ । इति ॥

तस्या एवेति ॥क्रियाया एवेत्यर्थः। एवकारेण द्रव्यगुणव्यवच्छेदः। तयोः सकृदेवोत्पत्तेः। क्रियायास्तु नैकस्या अपि निवृत्तभेदायाः धातुवाच्यत्वमभ्युपेयते । अतः तस्याः पुनः पुनरुत्पत्तिः सम्भवति इति भावः। **साध्यमात्रेति** ॥ प्रत्ययार्थागुणीभूतसाध्यस्वभावेत्यर्थः। **तादृशीति** ॥ घञ्प्रकृत्युपस्थाप्या वा घञुप-स्थाप्या वा न तादृशीति भावः। **नातिप्रसङ्गः** इति॥ सकृत्पाकः, द्विः पाक इत्यादि-प्रयोगातिप्रसङ्ग इति भावः। **ज्ञापकमिति** ॥ साध्यमात्रस्वभावत्वाभावेऽपि सुज्भवती-त्याद्यर्थे ज्ञापकमित्यर्थः। ज्ञापकसिद्धस्य असार्वत्रिकत्वात् नातिप्रसङ्ग इति भावः। **आहुरिति** ॥ सारग्राहिण इति शेषः इति **दर्पणः**। तथा च केचिन्मतमेव सिद्धान्तभूत-मिति दर्पणकाराशयः। अयं च ग्रन्थः काशिकया, परीक्षया च प्रकाशिते दर्पण-व्याख्याने उपलभ्यते। अन्ये सर्वे व्याख्यातारः केचिन्मते ग्रन्थकारस्यारुचिरेवेति तामरुचिमित्थं निरूपयन्ति – कृत्वसुज्विधायके क्रियाग्रहणेन साध्यमात्र-स्वभावाया एव क्रियायाः ग्रहणमिति व्याख्याने प्रमाणं नास्ति। किञ्च उत्तरत्रानु-वृत्त्यर्थं क्रियाग्रहणमावश्यकमिति न तस्य वैयर्थ्यम् । तथा हि – " एकस्य सकृच्च "

(पा. 5-4-19) इति सूत्रेण एकशब्दात् सुच् सकृदादेशश्च विधीयेते। अत्र च पूर्वसूत्रात् अभ्यावृत्तिग्रहणं न सम्बध्यते, एकस्याः क्रियाव्यक्तेः एकशब्दप्रतिपाद्यायाः अभ्यावृत्त्यसम्भवात्। तथा च एकस्यां गणनायां सुच्सकृदादेशौ इति सूत्रार्थः सम्पन्नः। ततश्च यथा एकवारं पचतीत्यर्थे सकृत्पचतीति, तथा एको देवदत्तः इत्यर्थेऽपि सकृद्देवदत्त इति प्रयोगः स्यात् । तद्वारणार्थं क्रियायाः गणने एव एकशब्दात् सुच्, सकृदादेशश्च भवत इति वक्तव्यम्। एतच्च कृत्वसुज्विधायकसूत्रात् क्रियाग्रहणानुवृत्त्यैव साधनीयम्। यदि च तत्र क्रियाग्रहणं न स्यात् तर्हि सकृत्विधायकसूत्रस्य उक्तप्रकारेण व्याख्या न शक्येति सकृद्देवदत्त इत्यादिप्रयोगापत्तिः। ननु उत्तरार्थस्यापि क्रियाग्रहणस्य "इह किञ्चित्रपो" इति न्यायेन कृत्वसुच्सूत्रेऽपि प्रयोजनमुपपादयितुं शक्यमिति, क्रियाग्रहणेन तथा ज्ञापयितुं शक्यमिति चेन्न। भाष्यानुक्तत्वेन "इह किञ्चित्रपो" इति न्यायेन यथेच्छकल्पनायाः अन्याय्यत्वात् । तथा च सकृत्पाकः, द्विः पाकः, त्रिः पाकः, चतुः पाकः, पञ्चकृत्वः पाक इत्यादिप्रयोगाः इष्टा एव। उक्तं च हेलाराजेन " लकृत्यक्तखलर्थानाम् " (वा. प. तृ. क्रि.52) इति कारिकाव्याख्याने कृत्यादियोगे कृत्वसुजादयो भवन्त्येवेतीत्थं – " कृत्येत्यादि। क्तो नपुंसकविषयः। रूढिशब्दाः ताच्छीलिकाः, घञादयः भावकर्मादिविहिताः, आदिना सुजादयः। द्विःशयितव्यम् , द्विस्सुकरः, द्विर्हसितम्, द्विर्दत्तवान्, द्विः कर्ता, द्विः पाकः, द्विर्भुक्त्वा गतः इत्युदाहरणानी"ति । सुजादीनां विशेषणीभूतायां साध्यक्रियायामन्वयस्वीकारस्य प्रयोजनानि इत्थं निरूपयन्ति तत्त्वदर्शिनो गुरवः – " अत एव द्विः प्रयोगः, द्विर्वचनेऽचि, द्विर्बद्धं सुबद्धं भवति, इत्यादि सङ्गच्छते। सङ्गच्छते च "आवृत्तिरसकृदुपदेशात्" (व्यास. 4-1-1) इति वैयासकं सूत्रं "सकृच्छ्रवणं सकृन्मननं सकृन्निदिध्यासनम् , न हि सकृत्प्रयुक्ताभ्यां शास्त्रयुक्तिभ्यामनवगतो विशेषः शतकृत्वोऽपि प्रयुज्यमानाभ्यामवगन्तुं शक्य" इति तत्रत्यं शारीरकभाष्यं च। " एकस्य सकृच्च " (पा. 5-4-19) इति सूत्रभाष्यस्थकैयटस्तु चिन्त्य एव। " द्विर्वचनेऽची " (पा.1-1-59)- ति ज्ञापकात् क्वचिद्व्याद्यन्तप्रयोगेऽपि कृत्वोऽर्थप्रत्ययो भवतीति तत्सूत्रशेषस्थस्वग्रन्थेन विरोधात्" इति।

21. शक्तत्व-साधुत्वयोः व्याप्य-व्यापकभावप्रतिपादनम्

ननु सिद्धान्ते बोधकतारूपा शक्तिराख्यातशक्तिग्रहवतां बोधादावश्यकी, इति धातोरेव भावना वाच्या, नाऽऽख्यातस्येति कथं निर्णय इत्याशङ्कां समाधत्ते-

भेद्यभेदकसम्बन्धोपाधिभेदनिबन्धनम्।
साधुत्वं तदभावेऽपि बोधो नेह निवार्य्यते ॥ 21 ॥

भेद्यम् -विशेष्यम् , भेदकम् -विशेषणं तयोर्यः सम्बन्धस्तस्य यो भेदस्तन्निबन्धनं साधुत्वम्।

अथ पूर्वोक्तदर्पणग्रन्थात् विलक्षणः दर्पणग्रन्थः प्रभया सह प्रकाशिते इत्थमुपलभ्यते यश्चारुचिप्रदर्शकः केचिन्मतस्य –"आहुरिति। – आहुरित्यस्वरसः सूचितः। तद्बीजन्तु क्रियापदस्योक्तार्थपरत्वेऽपि उक्तातिप्रसङ्गस्यापरिहारेण तस्य स्पष्टप्रतिपत्त्यर्थतैवोचिता। अनभिधानाश्रयणेनैवोक्तापत्तिवारणे द्विर्वचनमित्यादिप्रयोगाणां लोकसिद्धानां ज्ञापकानुसरणेनोपपत्तिश्च अनुचितेति।" इयं च व्याख्या व्याख्यान्तरेभ्यः युक्ततरा ॥ 20 ॥

21.1. **भेद्यभेदककारिकायाः अवतरणिका**

इत्थम् एतावता (विंशत्या कारिकाभिः) प्रबन्धेन भट्टोजिदीक्षितः धात्वाख्यातार्थविषये मतान्तरनिरासपूर्वकं व्याकरणसिद्धान्तं प्रतिष्ठाप्य प्रकरणमिदमुपसंजिहीर्षुः सिंहावलोकनन्यायेन पुनरेकवारं व्याकरणबोध्येऽर्थे प्रकृतिप्रत्ययानां प्रयोगे साधुत्व -मन्यथा असाधुत्वमेवेति महाभाष्यकारेण पस्पशाह्निकोक्तं विशदयन् अर्थान्तरे तेषां प्रयोगेऽनृतवदनप्रयुक्तं प्रायश्चित्तं मीमांसकानां दुष्परिहरमेवेति निरूपयितुमुपक्रमते – **भेद्यभेदकमित्यादिना**। तां च व्यचिख्यासुः कौण्डभट्टः तामित्थमवतारयति – **नन्विति** ॥ **सिद्धान्ते** इति। "इन्द्रियाणां स्वविषयेष्वि" ति (का.37) कारिकया शक्तिनिर्णये बोधकारणत्वमनादिभूतं शक्तिरिति व्युत्पादितम्। ततश्च बोधजनकत्वं शक्तिरिति वैयाकरणानां सिद्धान्ते इत्यर्थ इति प्रायः सर्वाः व्याख्याः। **कान्त्यां** तु वाक्यस्फोटरूपे इत्युक्तम्। अस्याप्यर्थप्रतिपादकस्य स्फोटपदार्थत्वात् बोधकत्वं शक्तिरिति सिद्धान्ते पर्यवसानं बोध्यम्। **तत्त्वदर्शिन्यां** तु अन्यथैव व्याख्या कृता। तत्र हि –"एवं धातोरसत्त्वभावनावाचित्वे पाक इत्यादावपि तादृशभावनाभानापत्तिमिष्टापत्त्या परिहृत्य, तत्रौदनस्य पाक इत्यादिप्रयोगान् प्रमाणतया निदर्श्य अतिप्रसङ्गमनभिधानान्निवार्य भावनायाः आख्यातवाच्यत्व-

निराकरणपुरस्सरं भावनायाः धातुवाच्यत्वं सिद्धान्तितम् । तत्र सिद्धान्ते मीमांसकपर्यनुयोगं प्रदर्श्य निराकरोति - नन्विति " इत्यस्ति अवतरणिका। सिद्धान्ते इति प्रतीकमुपादाय च "भावना धातुवाच्येति सिद्धान्ते स्वीकृतेऽपी" ति व्याख्यातम् । **बोधकतारूपेति**॥ शक्तिनिर्णयोक्तदिशा बोधकत्वमेव शक्तिरिति सिद्धान्ते "आख्यातं भावनाविषयकबोधजनकम् " इति रूपा। **आख्यातशक्ति ग्रहवताम्** इति॥ आख्याते - तिङ्प्रत्यये, शक्तिः- आख्यातं भावनाबोधकम् इति रूपा शक्तिः, तस्याः ग्रहो ज्ञानं, तद्वताम्। आख्याते भावनाविषयकशक्तिग्रहवतां मीमांसकानाम् बोधात् - आख्यातात् भावनायाः बोधात्। **आवश्यकी**ति ॥ बोधकतारूपा शक्तिरिति योज्यम्। तथा च वैयाकरणानाम् आख्यातेन यथा कर्तृकर्मादिबोधः, तथा मीमांसकानां भावनाबोध इति कर्तृकर्मादिषु यथा आख्याते शक्तिः कल्प्यते तथा भावनायामपि शक्तिः कल्प्येति मीमांसकानां पर्यनुयोगः । **इतीति**॥ इति हेतोः। **कथं निर्णय** इति ॥ धातोरेव भावना वाच्या नाख्यातस्येति निर्णयः कथमिति प्रश्नः। उभयविधबोधानुभवेन उभयत्र शक्तिः कल्पनीया आख्यातस्येति एकस्मिन्नेवार्थे शक्तिरपरत्र नेति निर्णयः अशक्य इति आशङ्कितुः आशयः। वैयाकरणश्च तस्याभिप्रायमभ्युपगच्छन्निव "भवदुक्तो बोधः भवद्दर्शन व्युत्पन्नानामनुभवविषय एव। तत्र न कस्यचिदपि विप्रतिपत्तिः। यस्य यस्य यादृशी व्युत्पत्तिः तस्य तस्य तादृशो बोध इति पूर्वमेवास्माभिः प्रतिपादितम् । अत एव तत्तच्छास्त्रव्युत्पन्नानां बोधे वैलक्षण्यमपि सर्वानुभवसिद्धम् । स्वस्वव्युत्पत्तिसिद्धं बोधं वारयितुं न कोऽपि क्षमः। एवं स्थितेषु विलक्षणेषु बोधविशेषेषु कस्मिन् बोधे साधुत्वं, कस्मिंश्च नेति विचारणीयो विषयः। यतः मीमांसकैरेव असाधुप्रयोगे प्रायश्चित्तं विधीयते। अतः प्रायश्चित्तीयता भीतिः मीमांसकानामेवाधिकेति तैरेव शब्दसाधुत्वविषये सम्यग्ज्ञातव्यम्, तथा च व्यवहर्तव्यम् च" इति तमनुनेतुमिच्छुः उपक्रमते – **भेद्यभेदके**त्यादिना। इयं च भेद्यभेदकेति कारिका हरिकारिकेति तिङर्थवादे मञ्जूषायां नागेशः। परन्त्वियं कारिका इदानीमुपलभ्यमाने वाक्यपदीये नोपलभ्यते ।अतः इयं भर्तृहरिकृतमहाभाष्यव्याख्यायां स्यात्, या च व्याख्या पूर्णतयेदानीं नोपलभ्यते । अथवा कालक्रमेण वाक्यपदीयात् भ्रष्टा स्यात्। **भूषणे** तु भेद्येति सम्प्रदाय इत्युक्तम् ।तथा च सम्प्रदायरूपेण पठ्यमानेयं कारिका अज्ञातमूलेति स्यादस्य आशयः। **कान्त्यामपि** भूषणपङ्क्तिरेवानूदिता। भेद्यं च भेदकं

च भेद्यभेदके इति द्वन्द्वः।तयोः सम्बन्धः भेद्यभेदकसम्बन्धः इति षष्ठीतत्पुरुषः। तादृशसम्बन्ध एवोपाधिः इति कर्मधारयः। तादृशोपाधेः भेद इति पुनः षष्ठी - तत्पुरुषः।तादृशभेदः निबन्धनं यस्येति बहुव्रीहिः। इदं च साधुत्वस्य विशेषणम्। अर्थस्तु पूर्वमेवोक्तः। कारिकायां पूर्वार्धस्य समस्तस्य इत्थमेव व्युत्पत्तिः प्रदर्शिता कौण्डभट्टेन भेद्यं विशेष्यमित्यारभ्य तन्निबन्धनं साधुत्वमित्यन्तेन। इयं च कारिका " तेन तुल्यं क्रियाचेद्वतिः "(पा. 5-1-115) इति सूत्रव्याख्याने प्रौढमनोरमायां "महानसवत्" इत्त्यदिषु वत्यर्थस्य पक्षान्वयेऽसाधुत्वप्रतिपादनसन्दर्भे उल्लिखिता। व्याख्यातं च " किं विशेष्यके किं प्रकारके किं संसर्गके बोधे उद्देश्ये किं साधु किं नेत्येव शास्त्रीयविचारविषयः। उक्तं हि भगवता "सत्यामर्थावगतौ शब्दैश्चाप-शब्दैश्च भक्ष्याभक्ष्यादिवन्नियमः क्रियते " इति। अत्र च शब्दरत्नकारः – भेद्यं - विशेष्यं, भेदकं - विशेषणं, सम्बन्धः - तयोः संसर्गः, उपाधिः - पश्वादिः इति व्याख्यामकरोत्। अनया व्याख्यया भेद्यं च भेदकं च सम्बन्धश्च उपाधिश्च भेद्यभेदकसम्बन्धोपाधयः। तेषां भेदः जातावेकवचनम् । तेषां ये भेदाः, तन्निबन्धनं साधुत्वमिति व्युत्पत्तिः लभ्यते। तथा च अस्यां व्याख्यायां भेद्यादिचतुर्णां द्वन्द्वः, ततः भेदशब्देन षष्ठीतत्पुरुषः, ततः निबन्धनशब्देन बहुव्रीहिरिति व्युत्पत्तिः सिद्ध्यति ।

इयं च कारिका तिङर्थवादमञ्जूषायां तिङां कर्तृकर्माद्यर्थकत्वमेवेति निरूपयता नागेशेन उल्लिखिता। तत्र हि कलाव्याख्यायां कारिकापूर्वार्धः इत्थं व्याख्यातः – " भेद्यं - विशेष्यं, भेदकं - विशेषणं, तयोः सम्बन्धः, तद्रूपाः ये उपाधयः, तेषां यो भेदः तन्निबन्धनं साधुत्वमित्यर्थः" इति। एतदनुसारं भेद्यभेदकसम्बन्धानां द्वन्द्वः, ततः उपाधिशब्देन कर्मधारयः, ततः भेदशब्देन षष्ठीतत्पुरुषः। ततः निबन्धन-शब्देन बहुव्रीहिश्च। अत्रायं विवेकः – प्रथमव्याख्यायां विशेषणविशेष्यभावसम्बन्ध -रूपोपाधेः यो विशेषः तन्निबन्धनं साधुत्वमित्यर्थः। द्वितीयव्याख्यायां विशेषण-विशेष्य-सम्बन्ध–उद्देश्यानां यः भेदः, तत्तन्निष्ठप्रत्येकभेदाश्रितं साधुत्वमित्यर्थः। तृतीयव्याख्यायां भेद्यभेदकसम्बन्धरूपोपाधीनां यो भेदः तन्निबन्धनं साधुत्वमि-त्यर्थः। अत्र प्रथमव्याख्यैव कौण्डभट्टसम्मता।

भिद्यते अन्यस्माद् व्यावर्त्यतेऽसौ इति भेद्यम्। विशेष्यमित्यर्थः।भिद् धातोः कर्मणि " ऋहलोर्ण्यत् " (पा. 3-1-124) इति ण्यत् । विशेष्यताश्रय इति यावत्।

भिनत्ति - अन्यस्मात् व्यावर्तयति इति भेदकम्। "ण्वुल् तृचौ" (पा. 3-1-133) इति कर्तरि ण्वुल्। विशेषणमित्यर्थः। विशेषणताश्रय इत्यर्थः। विशेषणमेवा - वच्छेदकतया इतरव्यावर्तकम् । यथा च घटत्वमेव घटं पटादिभ्यो व्यावर्तयति। तयोः सम्बन्धः विशेषणविशेष्यभावः। अयमेव संसर्गः संसर्गताख्यविषयताश्रय इत्यर्थः। सविकल्पके हि ज्ञाने विषयतात्रयं भासते। विशेष्यता, विशेषणता, संसर्गतेति। तत्र घट इति ज्ञाने घटत्वं विशेषणम् । अतस्तत्र विशेषणतारूपा विषयता अस्ति। घटरूपं द्रव्यं विशेष्यम्। अतस्तत्र विशेष्यतारूपा विषयता अस्ति। घटत्वविशिष्टो घट इति बोधे घटत्वघटयोः विशेषणविशेष्यभावः सम्बन्धः। अतस्तत्र संसर्गतारूपा विषयता अस्ति। विशेषणविशेष्यभावश्च सार्वत्रिकः, विशेषणविशेष्ययोः सम्बन्धः सामान्यरूपेण भासते । तन्निरूपकः पुनः समवायादिः, तत्र तत्तद्विशेषरूपेण भासते । तथा च पदार्थस्य पदार्थान्तरात् भेदकत्वेन विशेषणविशेष्यभाव एव इतरव्यावर्तको धर्मः। स एव उपाधिः- इतरव्यावर्तकः, तस्य च यः भेदः - विशेषः समवायादिसम्बन्धः, तन्निमित्तं साधुत्वम् इति कारिकापूर्वार्धः ।

अस्य अयं भावः। घटादिशब्दानां घटत्वादिकं प्रवृत्तिनिमित्तम् । तदेव भेदकम् । यश्च तदाश्रयीभूतः घटादिः तदेव भेद्यम्। तयोः घटत्वघटयोः यः विशेषण-विशेष्यभावः घटत्वनिरूपितविशेष्यत्वं घटे, घटनिरूपितविशेषणत्वं घटत्वे इति तयोः परस्परसम्बन्धः, स एव सम्बन्धः उपाधिः - इतरव्यावर्तकः। अयमेव घटं पटादिभ्यो व्यावर्तयतीति भावः। तस्य च यः भेदः - विशेषणविशेष्यभावनिरूपकः समवायादिः। एतन्निबन्धनं साधुत्वं शब्दस्य । अस्य अयमर्थः। समवायसम्बन्धेन घटत्वविशेषणकघटविशेष्यकबोधकत्वशक्तिरेव घटशब्दे। तथा च समवायेतर-सम्बन्धेन कालिकादिना, घटघटत्वयोः विशेषणविशेष्यभावव्यत्यासेन वा बोधकत्वं घटशब्दे नास्तीति, तादृशार्थबोधाय यदि घटशब्दः प्रयुक्तः तर्हि असाधुरेव स भवति।तथा च यादृशसम्बन्धेन यादृशविशेषणान्विते विशेष्ये यादृशानुपूर्व्याः सूत्रकाराद्यन्यतमेन साधुत्वमुक्तं, स शब्दस्तस्मिन्नेवार्थे साधुः अन्यत्रासाधुः। यथा "अस्व" इति दन्त्यमध्यः शब्दः दरिद्रे एव साधुः न तु तुरगे, तथा "अश्व" इति तालव्यमध्यः तुरग एव साधुः न दरिद्रे। एवं च "लः कर्मणि च भावे चाकर्मकेभ्यः" (पा. 3-4-69) इति सूत्रेण लकाराणां तदादेशानाम् आख्यातानां

अयमर्थः - व्याकरणस्मृतिः शब्दसाधुत्वपरा। तत्रैव अवच्छेदकतया कल्प्यमान-धर्म्मस्य शक्तित्वं वदतां मीमांसकानां पुनः शक्तत्वं साधुत्वमित्येकमेवेति तद्रीत्या विचारे साधुत्वनिर्णये एव शक्तिनिर्णय उच्यते।

अतिरिक्तशक्तिवादेऽप्याख्यातानामसाधुता भावनायां स्यादेव। एवञ्च चतुर्थ्यर्थे तृतीयाप्रयोगवद्धात्वर्थभावनायामाख्यातप्रयोगे, याज्ञे कर्मण्यसाधुशब्दप्रयोगात् "नानृतं वदेत् " इति निषेधोल्लङ्घनप्रयुक्तं प्रायश्चित्तं दर्शनान्तरीयव्युत्पत्तिमतां स्यादेवेति।

कर्तृकर्मादिवाचकत्वस्य बोधितत्वात् आख्यातं कर्त्राद्यर्थे एव साधुः, तदतिरिक्तेऽर्थे भावनायामसाधुरेव। तथा चाख्यातस्य भावनाभिधायकत्वे व्याकरणशास्त्रविरोधात् असाधुता स्यादेव। एवं "भूवादयो धातवः" (पा. 1-3-1)" क्रियावचनो धातुः" "भाववचनो धातुः" "कश्च धात्वर्थः? क्रिया " ("उपसर्गाच्छन्दसि धात्वर्थे " (पा. 5-1-118) इति सूत्रभाष्ये) इत्यादिसूत्रवार्तिकभाष्यैः धातोः भावनावाचित्वस्य निर्धारितत्वेन भावनायामेव धातोः साधुत्वं शक्तिश्चेति अन्यार्थे अन्यशब्दप्रयोगवत् धात्वर्थभावनायां तिङ्प्रयोगः असाधुरेव भवति इति भावनावाचित्वेन तिङां प्रयोगे अनृतवदनमेवेति, तन्निमित्तकं प्रायश्चित्तं मीमांसकानां दुष्परिहरमेव । किञ्च याज्ञे कर्मणि तथा प्रयोगे क्रतौ वैगुण्यापत्तिः।

ननु व्याकरणस्मृते "अथ शब्दानुशासनम्" इति भाष्यात् शब्दशास्त्रमित्यभियुक्त-व्यवहाराच्च साधुत्वमात्रबोधकत्वम् ।न तु शक्तिग्राहकत्वम्। "लोकतोऽर्थप्रयुक्ते शब्दप्रयोगे शास्त्रेण धर्मनियम " इति वार्तिकात् "मृजेः अक्ङित्सु प्रत्ययेषु मृजि-प्रसङ्गे मार्जिः साधुर्भवती" ति वृद्धिसंज्ञासूत्रभाष्यात् ," साधुत्वज्ञानविषया सैषा व्याकरणस्मृतिः"(वा. प. ब्र.141)इति वाक्यपदीयाच्च व्याकरणस्य साधुत्वमात्र-बोधकत्वं लभ्यते न तु शक्तिग्राहकत्वम् । पदपदार्थसम्बन्धस्य लोकत एव सिद्धेः लोके तत्तदनुभवमाश्रित्य अर्थनिर्णय इति, मीमांसकानां तिङैव भावनाबोधानु-भवात्, तस्य तदर्थकत्वमेवेति, तिङ्क्ष भावनायां शक्तिः ज्ञायते। व्याकरणबोध्यस्य तिङन्तस्यैव प्रयोगात् साधुत्वमप्यक्षतम् । ततश्च तिङां भावनायां शक्तिः सिद्ध्यतीति न कश्चिद्दोषः इति वदन्तं मीमांसकं निरसितुम् कारिकायाः अस्याः अत्रोल्लेखने तात्पर्यं स्पष्टयितुं च आह – **अयमर्थ** इत्यादिना ॥ **अयमर्थ** इति ॥ वक्ष्यमाण इत्यर्थः। तथा हि – मीमांसकास्तावत् साधुशब्देभ्य एव बोध-

मङ्गीकुर्वन्ति। **नासाधुभ्यः**। तथा च बोधजनकतारूपायाः शक्तेः साधुशब्दमात्रवृत्तितया, जात्यखण्डोपाधिव्यतिरिक्तानां सावच्छिन्नत्वनियमेन बोधजनकतायाः अपि सावच्छिन्नत्वात् , तदवच्छेदकतया साधुत्वमेव धर्मः कल्प्यत इति शक्तिसाधुत्वयोः समनियतत्वेन एकत्वात् साधुत्वमेव शक्तत्वं पर्यवसितम् । तथा च व्याकरणस्य साधुत्वमात्रप्रतिपादकत्वेऽपि साधोरेव तन्मते बोधकत्वेन शक्तिनिर्णायकत्वमपि सिद्धम् ।तथा च " लः कर्मणी " (पा. ३-४-६९) ति सूत्रेण तिङां कर्तरि कर्मणि च विधानेन तेषां तयोरेव बोधने साधुत्वमिति भावनाभिप्रायेण तिङ्प्रयोगः असाधुरेवेति, तस्य तिङः भावनाबोधकत्वमेव न सिद्धमिति तात्पर्यम् । तदेव उपपादयति – **व्याकरणस्मृतिरि**त्यादिना । "साधुत्वज्ञानविषया सैषा व्याकरणस्मृतिः " (वा. प. ब्र.141) इति वाक्यपदीयात् , " सिद्धे शब्दार्थसम्बन्धे लोकतोऽर्थप्रयुक्ते शब्दप्रयोगे शास्त्रेण धर्मनियमः" इति वार्तिकात् ,"अथ शब्दानुशासनम् " इति भाष्याच्च व्याकरणस्य साधुशब्दप्रतिपादकत्वं सिद्धम् । एतच्च सर्वाभ्युपगतं तत्त्वम् । साधोरेव बोधकत्वमिति मते साधव एव शब्दाः शक्ताः, नासाधवः।तथा च **तत्रैव** - साधुशब्दे बोधजनके, **अवच्छेदकतया** – बोधजनकतावच्छेदकतया। साधुशब्दज्ञाननिष्ठबोधजनकतावच्छेदकतया इति **दर्पणः**। कल्प्यमानः धर्मः साधुत्वम् , तस्य बोधकतारूपशक्तिसमनियतत्वात् (तदन्यूनानतिरिक्तवृत्तित्वात्) शक्तिस्वरूपतैव सिध्यति। साधुशब्देभ्य एव बोधोत्पत्त्यङ्गीकारेण शक्तेः साधुत्वमात्रवृत्तितया शक्तत्वम् (शक्तिः) एव साधुत्वं भवति । न तु तदतिरिक्तम्। **इति** – हेतोः, **मीमांसकानां पुनः** - एवं साधोरेव वाचकत्वमङ्गीकुर्वतां मीमांसकानां तु, अत्र पुनः इत्यस्य तु इत्यर्थः। साधुशब्दस्यैव वाचकत्वमभ्युपगच्छतां मीमांसकानां मते इत्यर्थः। **शक्तत्वं साधुत्वमेकमेवेति** । "अनादिवाचकत्वमेव साधुत्वं, तद्विपर्ययश्च असाधुत्वम्" इति साधुपदव्युत्पत्त्यधिकरणे (मी. 1-3-9-24,29)मीमांसकोक्तरीत्या शक्तत्वमेव साधुत्वं पर्यवस्यति। वाचकत्वं च बोधजनकत्वमेवेति, बोधजनकतायाः (सावच्छिन्नत्वनियमेन) अवच्छेदकतया कल्प्यमानः धर्मः साधुत्वमेव भवति । ततश्च दण्डनिष्ठकारणतावच्छेदको धर्मः दण्डत्वं यथा न कारणतातो भिन्नं, तथा साधुत्वावच्छेदको धर्मः शक्तिः न साधुत्वाद्भिन्नः। तथा च शक्तत्वसाधुत्वयोरभेदः सिद्धः। **तद्रीत्या** – तादृशमीमांसकमतरीत्या। **विचारे** - समालोचने सति, साधुत्वनिर्णयः एव शक्ति-

निर्णयः भवति। व्याकरणस्य साधुत्वनिर्णायकत्वेन मीमांसकेनाप्यभ्युपगमात् , साधुत्वशक्तत्वयोरैक्येन अनिच्छतापि तेन व्याकरणमाश्रित्यैव शक्तिः निर्णेतव्या भवति। ततश्च व्याकरणप्रतिपाद्येऽर्थे एव शब्दः शक्तस्सन् साधुर्भवतीति तिङादि-प्रत्ययानां व्याकरणशास्त्रबोधिते कर्त्रादौ प्रयोगे एव साधुत्वम् , तिङां कर्त्रादि-भिन्नाबोधकत्वमिति च सिध्यति ।

॥**अतिरिक्तशक्तिवादेऽपीति**॥ "असाधुशब्दादपि बोधोदयात् साधुत्वं शक्तत्व-समनियतं न। किन्तु साधुत्वापेक्षया अतिरिक्तमेव। शक्तत्वं च बोधजनकत्वं पदार्थान्तरम् , इच्छाविशेषो वा। साधुत्वं च अनपभ्रष्टतेत्यादिरूपं पदार्थान्तरं, व्याकरणशिष्टप्रयुक्तत्वान्यतरव्यङ्ग्यो जातिविशेषो वा। अत एव अत्रायं साधुः, अत्रायं शक्तः इति साधुशक्तशब्दयोः पार्थक्येन व्यवहार उपपद्यते" इत्ययं वादः साधुत्वात् पार्थक्येन शक्तिनिरूपकः,एतादृशेऽतिरिक्तशक्तिवादे यद्यपि तिङा शक्तेः, शक्तिभ्रमाद्वा भावनावाच्या भवेत्। तथापि गाव्यादिषु अपभ्रंशेषु यथा गवादिबोधकत्वेऽपि शिष्टाननुगृहीतत्वेन व्याकरणाबोध्यत्वेन च असाधुत्वं, तथा तिङः भावनाबोधकत्वस्य व्याकरणाबोध्यत्वेन, तथा प्रयोगे असाधुता स्यादेवेति तदेव निरूपयति – **आख्यातानामित्यादिना**॥ **भावनायां** - भावनाबोधनेच्छया प्रयुक्तानाम् , **आख्यातानां** - तिङाम् , असाधुता स्यादेव । असाधुत्वमेव स्यादिति तथा प्रयोगे अनृतवदनप्रयुक्तप्रायश्चित्तं मीमांसकानां दुष्परिहरमेवेति तात्पर्यम् । व्याकरणस्मृतेः साधुत्वज्ञापनार्थकत्वेऽपि साधुत्वस्य पूर्वोक्तरीत्या अर्थविशेष-निबन्धनत्वेन अर्थवशसम्पन्नमेव शक्तिनिर्णायकत्वमिति, व्याकरणविरोधात् चतुर्थ्यर्थे तृतीयाप्रयोगवत् भावनायां तिबादिप्रत्ययस्य असाधुत्वं स्यादेवेति तात्पर्यार्थ इति **काशिका**। व्याकरणस्मृतेः साधुत्वज्ञापनार्थकत्वेऽपि साधुत्वस्य अर्थविशेषविशिष्टे एव शब्दविशेषे एव नियतत्वेन अर्थापेक्षया शक्तिनिर्णायकत्व-मपि सिद्धमेव। तदुक्तं शक्तिग्रहं व्याकरणेत्यादिना। तथा च आख्यातेन भावना-बोधेऽपि सूत्रकाराद्यन्यतमेन आख्यातस्य भावनायां शक्तेरबोधनात् असाधुता स्यादेवेति **प्रभा**। **तत्त्वदर्शिन्यामपि** " न च व्याकरणं साधुत्वमात्रतात्पर्यकं न चार्थव्यवस्थापकमिति वाच्यम्। व्याकरणं शक्तिग्राहकमिति वृद्धव्यवहारस्य असङ्गततापत्तेः।अर्थविशेषपुरस्कारेणैव साधुत्वस्य भाष्यसङ्गतत्वाच्च। " पदसमय ज्ञानार्थं व्याकरणम् " इति न्यायभाष्ये वात्स्यायानोक्तेश्चेति " एतदेव स्पष्टीकृतम्।

21.2. जौमिनिव्याख्यातृभिरेव विरोध इति उदाहरणमुखेन निरूपणम्

अथात्र **काशिकायां** तिङ्बोध्यार्थविशेषे जैमिनिपाणिन्योर्मध्ये मतभेदे धर्मप्रतिपादकजैमिनीयाशयस्य प्राधान्यमिति तिङः भावनाबोधे एव साधुत्वमिति शङ्का समाधानञ्चेत्थं प्रतिपादितम् –"नन्वेवं महामुनिजैमिनिसूत्रविरोधेन पाणिनिस्मृतिर्बाध्येतेति चेन्न। साधुत्वांशे पाणिनिस्मृतेर्बलवत्त्वात्। शब्दानुशासनस्य साधुत्वानुशासनार्थमेव प्रणीतत्वात्। वस्तुतस्तु जैमिनीयवचनव्याख्यातृविरोधेऽपि तत्सूत्रविरोधलेशोऽपि नावतरति। तथा हि –"भावार्थाः कर्मशब्दाः क्रिया प्रतीयेतैष ह्यर्थो विधीयते" (मी. 2-1-1) इति भावार्थाधिकरणे जैमिनिसूत्रम्। दद्याज्जुहुयादित्यादयः कर्मशब्दाः भावार्थाः। प्राधान्येन क्रियार्थकाः," भावप्रधानमाख्यातम् " इति निरुक्तात्, अतस्तेभ्यः क्रिया प्रतीयते - प्राधान्येन प्रतीयते, हि – प्राधान्याद्धेतोः, एष एव - क्रियारूप एवार्थो विधीयते न तु द्रव्यरूपः। क्रियायाश्चाशुतरविनाशित्वात् कालान्तरभाविफलजनकता न सम्भवतीति द्वारमपूर्वं कल्प्यमिति तदर्थः। एतत्सूत्रात् भावना प्रत्ययार्थो न कर्तेत्यादिकं तु न लभ्यते इति विभावनीयमिति दिक्" इति। दद्यादित्यादितिङन्तैः क्रियाप्रधानतया बोध्यते इत्येव जैमिनिसूत्रात् लभ्यते, न तु आख्याता(तिङ)र्थो भावनेति । वैयाकरणानां मतेऽपि तिङन्ते धात्वर्थभावनाप्राधान्यमेवेति नात्र मीमांसासूत्रकारस्य पाणिनेश्च मतभेदः। स्पष्टीकृतं चैतत् कुमारिलभट्टैः तन्त्रवार्तिके भावार्थाधिकरणे "द्व्यर्थस्य धातोः भेदेनार्थे कथ्यमाने यागेनेति विशेषरूपं कारणात्मना निष्कृष्टम् । इतरत्तु भावनात्मकं सामान्यरूपं शब्दान्तरेण भावयेदित्यनेन कथ्यते। अथवा केचित् करणांशकर्तृसंख्यादयः प्रकृतिप्रत्यययोः इत्यपि शक्यं वक्तुम्। तथा च सूत्रकारभाष्यकाराभ्यां भावार्थाः कर्मशब्दाः इति सामानाधिकरण्यमेवाश्रितम्। न भावार्थत्वेन प्रत्ययाः कथिताः । शास्त्रे तु सर्वत्र प्रत्ययार्थो भावनेति व्यवहारः " इति । यजेत इत्यस्य विवरणं यागेन भावयेदिति। इदं विवरणं धातोरेव विवरणमिति, विशेषरूपः यागः, सामान्यरूपा भावना च धात्वर्थ एवेति, तत्र भावनायाः प्राधान्यमिति, विशेषरूपस्य यागस्य करणत्वेन भावनायामन्वय इति वैयाकरणसिद्धान्तः। एतदेव "द्व्यर्थस्य धातोः भेदेनार्थे कथ्यमान" इत्यादिना कुमारिलभट्टैरपि अनूदितम् । द्व्यर्थस्य धातोः इति कथनेन विशेषरूपः यागः, सामान्यरूपा भावना च धात्वर्थ एवेति स्पष्टम्। अथवा इत्यारभ्य यागेनेत्यत्र करणांशः,

प्रकृत्यर्थत्वेन, कर्तृसंख्यादयः प्रत्ययार्थत्वेन च उक्ताः। भावनायाः प्रत्ययार्थत्वं मतद्वयेऽपि नास्त्येव। तदेव स्पष्टमुक्तम् –"न भावार्थत्वेन प्रत्ययाः विहिताः" इति। अनेन स्पष्टं यत् तिङां भावनार्थत्वे मीमांसासूत्रकारभाष्यकारयोः अभिनिवेशो नास्तीति, आख्यातस्य भावनार्थकत्वे प्रमाणं मृग्यमेवेति। तद्व्याख्यातृभिः वृत्तिकारादिभिः आख्यातवाच्यत्वेन भावनां साधयितुं महता प्रयासेन सूत्रमिदमन्यथा इत्थं व्याख्यातम् – "भावः भावनारूपः आख्यातार्थः, तस्य परिच्छेदः अर्थः-प्रयोजनं येषां ते भावार्थाः। ते च धात्वर्थाः यागदानादयः। आख्यातेन भावनायाः सामान्यरूपायाः उपस्थित्या तस्याः व्यापकत्वेन, यजेतेत्यत्र तां भावनाम् इतरदानादिभावनातो व्यावर्तयन् यागरूपो धात्वर्थः अवच्छेदको भवति। एवमवच्छेदकीभूताः ये यागादयः, तद्वाचकाः शब्दाः धातव इति यावत् । तेभ्यः क्रिया-अपूर्वं प्रतीयेत - ज्ञायेत। हि - यतः एषोऽर्थो विधीयते। एकपदश्रुत्या तस्यैव विधानात्। यो विधीयते तस्यैव तत्र कारणत्वेनान्वय इति व्याप्तिः इति। एषा व्याख्या च क्लिष्टा जैमिनिसूत्राक्षराननुगुणा च । तथा च अस्माकं तद्व्याख्यातृभिरेव विरोधः, न तु मूलभूतजैमिन्यादिभिरिति भावः।

॥**स्यादेवेति**॥ "भावनाबोधकत्वेन सूत्रकारादिभिरननुशिष्टत्वात् कर्तृबोधकत्वेनैव तदनुशासनादिति भावः इति" **दर्पणः**। दर्पणे तत्रैव असाधुता स्यादेवेति प्रतीक–मुपादाय "आख्याताच्छक्तिभ्रमेण भावनाबोधेपि तत्र तस्यासाधुता स्यादेवेत्यर्थः। तथा च भाष्यकृता – "सिद्धे शब्दार्थसम्बन्धे" (म. भा. आ.१) इत्यत्र "समानायामर्थावगतौ साधुभिर्भाषितव्यं नासाधुभिरिति गम्यागम्येति वन्नियमः क्रियते" इति पस्पशायामुक्तम्। एवञ्च यादृशविशेषणान्वितयादृशविशेष्यबोधे यादृशानुपूर्व्याः सूत्रकृदाद्यन्यतमसम्मतत्वं तादृशबोधे तादृशानुपूर्वीकः शब्दः साधुर्नान्यत्र। अत एवास्वशब्दोऽश्वे न साधुः किन्तु निःस्वे । अश्वशब्दो निःस्वे न साधुः किन्तु तुरग इति सङ्गच्छते" इति पाठान्तरमस्ति। अयमेव दर्पणग्रन्थः **कान्त्यां परीक्षायां** चानूदितः। तथा हि – "अयं भावः – यस्मिन् विशेष्ये यादृशविशेषणान्विते यादृशानुपूर्व्याः सूत्रवार्तिकभाष्यकाराद्यन्यतमेन साधुत्वमुक्तं स शब्दः तत्र साधुः अन्यत्र असाधुः। अत एव दन्त्यमध्यास्वशब्दस्य अश्वे न साधुता । धातोश्च भावनानभिधायकत्वे असाधुत्वमेव स्यात् । व्याकरणेन तस्यैव साधुत्वबोधनात् ।

न चैषा व्याकरणस्मृतिः निर्मूलेति वाच्यम्। "तस्माद् ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च" इति श्रुतेरेव मूलत्वात्।

"पाणिनीयं महाशास्त्रं पदसाधुत्वलक्षणम् ।
सर्वोपकारकं ग्राह्यं कृत्स्नं त्याज्यं न किञ्चन ॥"

इति पराशरोपपुराणाच्च। नन्वाख्यातेन भावनाभिधानस्य जैमिन्याचार्यैरुपवर्णितत्वात्कथं तदर्थे तस्यासाधुतेति चेन्न ।वाक्यार्थविचारार्थमेव तच्छास्त्रप्रवृत्त्या तेषामत्र पदार्थविचारे तात्पर्याभावात्। व्याकरणस्य च कोशादिवच्छक्तिपरिच्छेदकत्वात्। यदाहुः – शक्तिग्रहमित्यादि" इति **कान्तिः**। "आख्यातस्य शक्तिभ्रमात् ततो भावनायाः बोधेऽपि तत्र तस्यासाधुता स्यादेव। सूत्रकाराद्यन्यतमेन तत्र तस्य शक्तेरबोधनात् । अत एव गम्यागम्यदृष्टान्तेन पस्पशायां भाष्यकृता –"समानायामर्थावगतौ शब्दैश्चापशब्दैश्च तत्र धर्मनियमः क्रियते, साधुभिर्भाषितव्यं नासाधुभिरिति ।" इति **परीक्षा** । **सरलायां** च " तन्मते व्याकरणस्य साधुत्वमात्रनिर्णायकत्वेऽपि अर्थविशेषनिबन्धनमेव तेषां शब्दानां पूर्वोक्तरीत्या साधुत्वमिति भावनाभिप्रायेण आख्यातानां साधुत्वालाभात्।" इति पूर्वोक्त एव सङ्क्षेपेण स्पष्टं च प्रतिपादितः । अन्ये च व्याख्यातारः उभयविधदर्पणस्यैवानुवादं कृतवन्तः। अत्र **परीक्षा** युक्ततमा ।

नन्वस्तु असाधुत्वम् । असाधोरपि वाचकत्वमस्त्येव भवन्मते । अतो भावनाबोधो भवत्येवेति चेदाह – **तथा चेति**॥ तथा चेति स्थाने एवं चेति पाठो प्राचीनेषु भूषणसारप्रकाशनेषूपलभ्यते। "भावनायामाख्यातस्यासाधुत्वसिद्धौ फलितमाह" इति **परीक्षा । तथा च (एवं च)** - तस्यासाधुत्वे च । ननु लोके असाधुभिः व्यवहारः न निषिद्धः। निरूपितं चैतत् भाष्यकारेण यर्वाणोपाख्यानमुल्लिख्य पस्पशायाम् इति चेदाह – **याज्ञे कर्मणि** इति ॥ यर्वाणोपाख्यानेन लोकव्यवहारेऽसाधुप्रयोगे प्रत्यवायाभावः सूच्यते । तत्रैव पुनः " याज्ञे कर्मणि नापभाषन्ते" इति उक्त्वा याज्ञे कर्मणि अपभाषणं न कर्तव्यमित्यपि सूचितम्। व्याकरणप्रयोजनप्रतिपादनसन्दर्भे च "आहिताग्निरपशब्दं प्रयुज्य प्रायश्चित्तीयां सारस्वतीमिष्टिं निर्वपेत् , प्रायश्चित्तीया मा भूमेत्यध्येयं व्याकरणम्" इति कथयता याज्ञे कर्मणि अपशब्दप्रयोगः प्रायश्चित्तप्रयोजक इत्यपि सूचितम्। तथा ऊहार्थमपि व्याकरणमध्येतव्यमिति विकृतियागेषु प्रकृतियागवन्मन्त्राणां साधूनाम् सूर्यायेत्यादीनाम्

ऊहः प्रयोजनमित्युक्तम् । मीमांसाशास्त्रे च दर्शपूर्णमासप्रकरणे " नानृतं वदेत् " इति श्रूयते। अत्रानृतशब्दः अपशब्दपरः। अस्य च निषेधस्य क्रत्वर्थत्वं मीमांसाशास्त्रे निर्णीतम् । तच्चानृतं द्विविधम् – शब्दानृतम् , अर्थानृतं चेति। गाव्यादि–शब्दानृतम् । अर्थानृतम् अन्यार्थकस्य अर्थान्तरे प्रयोगः यथा निःस्वे अश्वशब्द-प्रयोगः।एतदुभयमपि यज्ञानृतं प्रायश्चित्तायैव कल्पते इति मीमांसकराद्धान्तः।तथा च लौकिकानामपशब्दप्रयोगे प्रत्यवायाभावेऽपि यज्ञार्थं प्रवृत्तानां मीमांसकाना-मपशब्दप्रयोगः प्रत्यवायायैव भवति, क्रतुवैगुण्याय च भवति । अत एव याज्ञिकैः सावधानैर्भाव्यमिति हि स्थितिः। ततश्च व्याकरणेनानुशिष्टादन्यस्मिन्नर्थे तिङः प्रयोगे असाधुत्वात् "नानृतं वदेत्" इति निषेधोल्लङ्घनप्रयुक्तं प्रायश्चित्तम् अनिवार्यमेव स्यात् ।

तदेव उदाहरणमुखेन प्रतिपादयति - ॥**चतुर्थ्यर्थे तृतीयाप्रयोगवदिति**॥ " अग्नये त्वा जुष्टं निर्वपामी " त्यादिषु व्यत्ययानुशासनाऽलक्ष्येषु चतुर्थ्यन्तस्य अग्नये इत्यस्य स्थाने तदर्थे "अग्निना " इति तृतीयान्तः प्रयोगः व्याकरणेन अनुशिष्टस्य अर्थस्य अबोधकत्वादसाधुरिति सर्वसम्मतो विषयः।तथा च सुब्विभक्तेरनुशिष्टादर्थाद-न्यस्मिन्प्रयोगे यथा असाधुत्वं तथा तिङ्विभक्तेरपि अनुशिष्टात् कर्तृकर्मादि-रूपादन्यस्मिन् भावनारूपेऽर्थे असाधुत्वमेव।ततश्च भावनायां तिङां प्रयोगं कुर्वतां मीमांसकानां "नानृतं वदेत्" इति निषेधोल्लङ्घनप्रयुक्तं प्रायश्चित्तं स्यादेव। **दर्शनान्तरीयव्युत्पत्तिमताम्**॥ अन्यद्दर्शनं दर्शनान्तरम्। व्याकरणादन्यद्दर्शनं मीमांसादर्शनम् । तदनुयायिनः दर्शनान्तरीयाः मीमांसकाः।तेषां या व्युत्पत्तिः तिङां भावनाबोधकत्वमिति व्युत्पत्तिः। तद्वतां तेषां मीमांसकानामित्यर्थः। अनेन तिङर्थं कृतिं स्वीकुर्वतां नैयायिकानामपि प्रायश्चित्तीयता स्यादेवेति सूचितम् । नन्वेवंविधः शब्दो यद्यसाधुः तर्हीतो बोधो न स्यात् , शाब्दबोधं प्रति साधुत्वस्य कारणत्वात् तदभावनिश्चयस्य च प्रतिबन्धकत्वादिति चेन्न। शाब्दबोधं प्रति साधुत्वस्य अकारणत्वात् ,तदभावनिश्चयस्य अप्रतिबन्धकत्वाच्च।उक्तञ्च महाभाष्य-कारेण " समानायमर्थावगतौ शब्देन चापशब्देन च शास्त्रेण धर्मनियमः " इति । एतच्च असाधुरनुमानेन इति कारिकाव्याख्याने शक्तिनिर्णये स्पष्टं निरूपयिष्यते । अथ असाधोस्साक्षाद्वाचकत्वमनङ्गीकुर्वाणानां मतेऽपि साधुशब्दस्मरणद्वारा शक्ति -

ननु त्वन्मते "नानृतम् " इति निषेधः क्रत्वर्थ एव न सिद्ध्येत् , आख्यातेन कर्त्तुरुक्तत्वाच्छ्रुत्या पुरुषार्थतैव स्यात् , प्रकारणाद्धि क्रत्वर्थता, तच्च श्रुतिविरोधे बाध्यते, इति चेन्न, "तिङर्थस्तु विशेषणम् " इत्यनेन परिहृतत्वात्। नहि गुणभूतः कर्ता निषेधं स्वाङ्गत्वेन ग्रहीतुमलम्। भावना तु प्रधानं तं ग्रहीतुं समर्थेति प्रकारणात् क्रत्वर्थतैव। अस्तु वा क्रतुयुक्तपुरुषधर्मः, अनुष्ठाने विशेषाभावात्। "जञ्जभ्यमानोऽनुब्रूयान्मयि दक्षक्रतू" इति वाक्योक्तमन्त्रविधिवदित्यादि भूषणे प्रपञ्चितम्।

भ्रमाद्वा असाधोः बोधो भवत्येव । तदेवोक्तं कारिकायां **बोधो नेह निवार्यते** इति । ततश्च असाधोः बोधः सर्वसम्मत एव।

ननु व्याकरणनये वाक्यस्फोट एव मुख्यः। अन्ये च पदस्फोटादयः कल्पिता एव । उक्तं च – "प्रकृतिप्रत्ययविभागः तत्तदर्थविभागश्च सर्वः कल्पित एव । परमार्थतस्तु वाक्यस्फोट एव मुख्य इति सिद्धान्तात् " इति। तथा च तिङां कर्तृकर्माद्यर्थकत्वस्य काल्पनिकत्वात् काल्पनिकेऽर्थे कथं साधुत्वासाधुत्वविचारः इति चेदुच्यते – वाक्यस्फोट एव मुख्य इति वैयाकरणसिद्धान्तः। स्फोटशब्दस्यस्फुटत्यर्थोऽस्मादिति व्युत्पत्त्या अर्थप्रतिपादकवाचकपरत्वात् । स एव च वाचकः शक्तिग्राहकशिरोमणिना वृद्धव्यवहारेण प्रथमं वाक्ये एव शक्तिग्रहात् तस्यैव लोके निराकाङ्क्षार्थबोधकत्वात् । तत्र देशकालव्यक्तिभेदेन वाक्यानामानन्त्यात् प्रतिवाक्यं सङ्केतग्रहस्य अशक्यत्वात् अनन्तानां वाक्यानामन्वाख्यानस्य असम्भवाच्च कल्पनया तत्र पदानि, तेषु च प्रकृतिप्रत्ययविभागं च परिकल्प्य, कल्पिताभ्याम् अन्वयव्यतिरेकाभ्यां पदप्रकृतिप्रत्ययार्थविभागं कल्पितवन्तः पाणिन्याद्याचार्याः । इयं च कल्पना खण्डशः शक्तिबोधनद्वारा अखण्डवाक्यार्थबोधिकेति, लोकसिद्धस्यैवार्थस्य प्रतिपादकत्वेन अस्याः कल्पनायाः प्रामाण्यमेव । न त्वप्रामाण्यम् । एतदेव "शक्तिग्रहं व्याकरणोपमाने" त्यादिना प्रतिपाद्यते । सर्वशास्त्रकाराभ्युपगतं चैतत्। ततश्च कल्पितानामपि तिङाम् यद्यर्थविशेषो निर्णयः, तर्हि व्याकरणमनुसृत्यैव निर्णय इति, तिङां तद्विरुद्धार्थं कल्पयतां, तदभिप्रायेण प्रयोगं कुर्वतां च मीमांसकानाम् अनृतवदननिषेधोल्लङ्घनप्रयुक्तं प्रायश्चित्तं स्यादेव । इदं च **शाङ्कर्यां** स्पष्टम् ।

एवं पूर्वोक्तेन ग्रन्थेन बोधजनकतावच्छेदकरूपसाधुत्वप्रतिपादकस्य व्याकरणस्य शक्तिग्राहकत्वसिद्ध्या, मीमांसकमते साधुत्वशक्तत्वयोरैक्येन पाणिन्यादिमुनित्रयान्यतमेन यस्य यस्मिन्नर्थे विधानं, तस्य तत्र साधुत्वमन्यस्मिंश्चार्थे असाधुत्वमिति, " लः कर्मणी " (पा. 3-4-69) ति सूत्रेण तिङां कर्तृकर्मादिबोधकत्वस्य अनुशासनात् , तेषां तस्मिन्नर्थे प्रयोगे एव साधुत्वमिति, तद्भिन्नेऽर्थे भावनायां प्रयोगे असाधुत्वमेव स्यादिति प्रतिपादितम् । इदानीं मीमांसकः पुनरेवं प्रत्यवतिष्ठते । अथैवं व्याकरणमाश्रित्य तिङां कर्त्राद्यर्थकत्वे " नानृतं वदेत् " इति निषेधस्य क्रत्वर्थत्वं न सिध्येत् । सिद्धान्तितं च तस्य क्रत्वर्थत्वम् । अन्यथा क्रतौ अपभाषणे क्रतुवैगुण्यनिवारणार्थं प्रायश्चित्तानुष्ठानं न स्यादिति सकलमीमांसकशिष्टाचारविरोधः स्यादिति शङ्कते – **नन्वित्यादिना।**

त्वन्मते। वैयाकरणमते । ॥**नानृतमिति** ॥ मीमांसाशास्त्रे तृतीयेऽध्याये चतुर्थे पादे अष्टमेऽधिकरणे "नानृतं वदेदि" ति निषेधस्य क्रत्वर्थत्वं वा पुरुषार्थत्वं वेति विचार्य, क्रत्वर्थत्वं सिद्धान्तितम्। अत्रायं संशयः किमयं पुरुषधर्मो विधिः, उत शुद्धक्रतुधर्मो विधिः, क्रतुयुक्तपुरुषधर्मो विधिरिति। अस्य च निर्धारणार्थं प्रथमम् वदेदित्याख्यातं(तिङ्) कर्तारमभिधत्ते वा न वेति विचारणीयम् । अत्रत्यमाख्यातं कर्तारमभिदधातीति पूर्वपक्षः । तथा हि –

> प्रतीतेः स्मरणात् कर्तृविशेषैरपृथक्श्रुतेः ।
> कर्तृवाच्यत्वमाख्यातप्रत्ययस्यावसीयते ॥ (शा.दी.3.4.1.1.)

(1) वदेदित्याख्यातात् कर्ता प्रतीयते।यश्च यतः प्रतीयते स तस्यार्थ इति अन्वयव्यतिरेकाभ्यां निश्चीयते ।

(2) व्याकरणस्मृतिरपि " कर्तरि कृत् " (पा. 3-4-67) इत्यधिकृत्य " लः कर्मणि च " (पा. 3-4-69) इति चकारेण कर्तरीत्यनुकर्षणात् आख्यातस्य कर्तृवाचित्वं बोधयति ।

(3) "पचति देवदत्त" इति कर्तृविशेषवाचकैः देवदत्तादिपदैः सामानाधिकरण्यादपि आख्यातस्य कर्तृवाचित्वं सिद्धम् ।

एवम् आख्यातस्य कर्तृवाचित्वे सिद्धे, कर्तुः प्रत्ययार्थत्वात् " प्रकृतिप्रत्ययार्थयोः प्रत्ययार्थः प्रधानम्" इति न्यायेन प्रकृत्यर्थवदनं प्रति कर्ता प्रधानभूत इति, वदनस्य पुरुषार्थत्वात् निषेधोऽपि पुरुषार्थ एव । यद्यपीदं दर्शपूर्णमासप्रकरणे

पठितम्। अथापि आख्यातात् कर्तुः बोधात् श्रुतिप्रमाणेन कर्त्रर्थत्वमेव (पुरुषार्थत्वमेव) स्यात्। न तु प्रकरणात् दर्शपूर्णमासादि क्रत्वर्थत्वम् । प्रकरणापेक्षया श्रुतेः बलवत्त्वात् । तथा च स्मृतिप्रतिपादितस्य अनृतवदननिषेधस्य मूलभूता इयं श्रुतिर्भवति । तथा च पुरुषेण न कदाचिदपि अनृतं वक्तव्यमिति सिद्ध्यति । अथवा श्रुतिप्रकरणयोरत्रविरोधाभावात् , अर्थात् श्रुत्या प्रकरणेन च प्रतिपाद्यमानयोः पुरुषार्थत्वक्रत्वर्थत्वयोः परस्परविरोधाभावात् द्वयोरपि स्वीकारे क्रतुयुक्तपुरुषधर्मोऽयं निषेधः सिद्ध्यति । तथा च पुरुषधर्म एवायं निषेध इति पूर्वपक्षः ।

अत्र सिद्धान्तः – क्रत्वर्थ एव प्रतिषेधः। अनृतवदनेन न केवलं पुरुषस्यैव प्रत्यवायः, अपि तु क्रतोः वैगुण्यमपि बोधनीयम् । तेन यः प्रत्यवायं ज्ञात्वा क्रतुमविगुणं चिकीर्षति, तेन क्रतौ अनृतं वर्जनीयम् । एतस्य नियमस्यातिक्रमे क्रतुदोषः स्यादिति, तदपाकरणाय पायश्चित्तमिति विशेषः। ननु व्याकरणेन आख्यातस्य कर्त्रर्थकत्वबोधनात् प्रकरणात् श्रुतेः बलवत्त्वाच्च निषेधः पुरुषार्थ एव स्यात् , न तु प्रकरणाद् क्रत्वर्थ इति चेदुच्यते –

आख्यातप्रत्ययाः सर्वे क्रियायाः अभिधायकाः ।
तत एव प्रतीतस्य न कर्तुरभिधेयता ॥
न स्मृतिः कर्तृवाचित्वे संख्यावाचित्वगोचरा ।
सामानाधिकरण्यं च लक्षणातो गवादिवत् ॥ (शा.दी.3.4.8.18)

अनन्यलभ्यः शब्दार्थ इति हि न्यायः। तथा च तिङा भावनायामभिहितायां तदविनाभावादेव लभ्यमानः कर्ता न आख्यातवाच्यो भवितुमर्हति। ननु कर्तुः आख्यातवाच्यत्वाभावे व्याकरणस्मृतिविरोध इति चेन्न। व्याकरणस्मृतिरपि आख्यातस्य कर्त्राद्यर्थकत्वं न वदति ।तथा हि –“ लः कर्मणी ” (पा. 3-4-69) ति शास्त्रस्य “ द्व्येकयोर्द्विवचनैकवचने ” (पा. 1-4-22) इति संख्याशास्त्रेण सह एकवाक्यतया अन्वयेन कर्तुरेकत्वे एकवचनं, तस्य द्वित्वे द्विवचनमित्येवार्थः सिद्ध्यति। ततश्च व्याकरणमपि कर्तुः संख्यामेव आख्यातार्थतया बोधयति । न कर्तारम्। संख्याशास्त्रे द्व्येकयोरिति भावप्रधानो निर्देशः। तथा च द्वित्वैकत्वयोरित्यर्थः । अतः आख्यातेन कर्तुरवाच्यत्वे स्मृतिविरोधोऽपि नास्ति । ननु तथापि “पचति देवदत्त” इत्यत्र सामानाधिकरण्यानुरोधात् कर्तृवाच्यत्वमावश्यकमिति चेन्न।आख्यातेन लक्ष्यमाणेन कर्त्रा सह सामानाधिकरण्यसम्भवात्। “ गौः शुक्ल ”

इतिवत् । शुक्लादिशब्दानां गुणे एव शक्तेः। तद्वति तु लक्षणा। तथा च आख्यातस्य कर्ता नार्थः। किन्तु भावनैव। अतोऽत्र श्रुत्या कर्ता न बोध्यत इति श्रुतिविरोधाभावात् दर्शपूर्णमासप्रकरणपाठात् अस्य निषेधस्य क्रत्वर्थतैवेति । ततश्च स्पष्टं कर्तुराख्यातार्थत्वे निषेधस्य क्रत्वर्थताऽसम्भवः इति ।तदेव सूचयति – **क्रत्वर्थ एव न सिद्ध्येत्** इति ॥ कुत इति चेदाह – **आख्यातेन** - तिङ्प्रत्ययेन, कर्तुः उक्तत्वात् ,कर्तुः श्रुतत्वेन श्रुतेः सर्वप्रमाणबलीयस्त्वात् पुरुषार्थत्वमेव स्यादिति भावः। नन्वस्तु नाम श्रुत्या पुरुषार्थत्वं प्रकरणात् क्रत्वर्थत्वम् चेति चेदुच्यते – **तच्च श्रुतिविरोधात् बाध्यते** इति । तथा हि –विधि –मन्त्र -नामधेय– निषेधार्थवादात्मको वेदः। तत्र विधिश्चतुर्विधः – उत्पत्तिविधिः, विनियोगविधिः, प्रयोगविधिः, अधिकारविधिरिति। तत्र अङ्गप्रधानसम्बन्धबोधकः विधिः विनियोग-विधिः। यथा – दध्ना जुहोति । अत्र दध्ना इति तृतीयया दध्नः अङ्गत्वं ज्ञातम् । तस्य चाङ्ग्यपेक्षायामिदं वाक्यं तस्य होमसम्बन्धम् अर्थात् होमे विनियोगं बोधयति । अस्य च विधिवाक्यस्य अङ्गप्रधानसम्बन्धबोधने सहकारिभूतानि षट् प्रमाणानि–श्रुति-लिङ्ग-वाक्य-प्रकरण-स्थान-समाख्या-रूपाणि। यत्र च विधिवाक्ये अङ्गत्वबोधनाय अनेकप्रमाणोपस्थितिः, तत्र प्राबल्यदौर्बल्यबोधकमिदं जैमिनिसूत्रं –"श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां पारदौर्बल्यमर्थविप्रकर्षात् "(मी. 3-3-14) इति। अनेन सूत्रेण श्रुत्यादिषु पूर्वापेक्षया परस्य दौर्बल्यम् , अर्थात् विरोधे सति पूर्वेण परस्य बाधः प्रतिपाद्यते। तत्र च हेतुः अर्थविप्रकर्षः। तत्तदर्थज्ञाने विलम्बः। एवं च यस्मादर्थः यस्मादपेक्षया शीघ्रमुपस्थितो भवति तत् प्रबलम्। विलम्बोपस्थितिकं दुर्बलमिति। अभिधया शक्यार्थबोधनमेव श्रुतिरित्युच्यते। शब्दश्रवणसमनन्तरमेव सङ्केतितार्थस्य अविलम्बेनान्यापेक्षां विना उपस्थितिः इति श्रुतिः सर्वापेक्षया प्रबला। तथा च प्रकृते यदि आख्यातस्य कर्तरि सङ्केतः, कर्ता च आख्यातेन अभिधया उच्येत, तर्हि आख्यातेनान्यप्रमाणापेक्षया शीघ्रमविलम्बेन कर्तुः उपस्थापनात् श्रुतिप्रमाणेन पुरुषार्थत्वमेव स्यात् । नानृतमिति वाक्यं दर्शपूर्णमासप्रकरणे वेदे पठितमिति प्रकरणमाश्रित्य विचारे अस्य क्रत्वर्थत्वं स्यात् । तथा चात्र कर्त्रर्थत्वम् , क्रत्वर्थत्वमिति प्रमाण -द्वयेनार्थद्वयोपस्थापनात् पूर्वोक्तन्यायमनुसृत्य प्रकरणात् श्रुतेः बलवत्त्वात् श्रुतिप्रमाणमाश्रित्य निषेधस्य पुरुषार्थत्वं स्यात् , न तु प्रकरणात् क्रत्वर्थत्वम् ।

इष्यते च क्रत्वर्थत्वम् । परन्तु आख्यातस्य कर्त्रर्थकत्वे श्रुत्या प्रकरणं बाध्यत क्रत्वर्थत्वं न सिद्ध्यति, ततश्च क्रतौ अपभाषणे क्रतुवैगुण्यनिवारणार्थं प्रायश्चित्तानुष्ठानं न स्यादिति सकलमीमांसकशिष्टाचारविरोधः स्यात्। आख्यातस्य कर्त्रर्थकत्वाभावे तु न दोषः। श्रुतिप्रमाणस्यानुपस्थितेः प्रकरणात् क्रत्वर्थत्वसिद्धेः। अतः वैयाकरणानामेतदधिकरणविरोधः दुष्परिहारः इत्याह – **श्रुतिविरोधे बाध्येतेति**॥ अत्र बाध्येतेति प्रतीकमुपादाय **काशिकायां** – "तथा च क्रतावपभाषणे क्रतुभ्रेष(दोष)प्रायश्चित्ताचरणरूपसकलयाज्ञिकमीमांसकशिष्टाचार-विरोधः स्यात् , अतो नेष्टापत्तिःकर्तुं शक्येति भावनावाचकत्वमेव तिबादीना-मभ्युपेयम् । न चैवं " लः कर्मणी" (पा. 3-4-69) ति व्याकरणस्याप्रामाण्यमिति वाच्यम्। वृद्ध्यादिपदस्य लोके आकारादिबोधकत्वेनादृष्टस्यापि स्वशास्त्रे तत्र वृद्ध्यादिपदं परिभाषितम्।एवं च व्याकरणस्य सर्वशक्तिनियामकत्वाभावेनाऽदोषात् । किं च असन्नेव लकारः यथा कल्पितः, तथैव कर्तृवाचकत्वस्यापि काल्पनिकस्यापि सम्भवात् । यत्र तु न्यायविरोधः तत्र लोकवेदयोरपि न तदुक्तार्थाभ्युपगमः। न चैतावतापि शास्त्रस्याप्रामाण्यम् । अर्थवादानामिव तात्पर्यार्थे प्रमाणनिर्वाहात् । "जञ्जभ्यमानो ब्रूयान्मयि दक्षक्रतू" इत्यादौ वाक्यात् पुरुषार्थत्वसिद्ध्ये कर्तुर्वाच्यत्व-मावश्यकमिति प्रतिबन्दिरपि नेति मीमांसकोक्तमेव आश्रयितुं युक्तमिति भावः " इति ग्रन्थः व्युत्पादकः ।

21.3. वैयाकरणमतेऽपि नानृतं वदेत् इति वचनस्य क्रत्वर्थत्वमेवेति निरूपणम्

॥ समाधत्ते - **नेति**॥ वैयाकरणानां मतेऽपि अधिकरणविरोधो नास्त्येव।तथा हि - वैयाकरणास्तु भावनां धात्वर्थतया, कर्त्रादिकम् आख्यातार्थतया च स्वीकुर्वन्ति । तथापि तिङन्ते "भावप्रधानमाख्यातम्" इत्यादिवचनबलात् प्रकृतिप्रत्ययार्थ-न्यायं न स्वीकुर्वन्ति। किन्तु धात्वर्थभावनाप्राधान्यमेवाङ्गीकुर्वन्ति। प्रधाने च धात्वर्थे तिङर्थः कर्त्रादि विशेषणम् । ततश्च पचतीति तिङन्तेन एककर्तृका पाकभावनेति बोधात् श्रुत्या प्रधानतया भावनाया एव उपस्थितिः न कर्तुरिति, प्रकरणात्क्रत्वर्थत्वमेव सिद्ध्यति । प्रत्ययार्थप्राधान्यमाश्रित्य भवद्भिरत्र श्रुतिविरोधः प्रदर्शितः।स च न सम्यक्।वैयाकरणानामस्माकं मते आख्यातस्थले तन्न्याय-त्यागात्। प्रकृत्यर्थस्यैव प्राधान्याभ्युपगमात्। एतदेवाह -**तिङर्थस्तु विशेषणम् इत्यनेन परिहृतत्वात्** इति ॥ फलव्यापारयोरिति द्वितीयकारिकायामेव तिङर्थस्य

धात्वर्थव्यापारविशेषणत्वस्य प्रतिपादितत्वात् , तेनैवायं दोषः अधिकरणासङ्गतिरूपः परिहृत इति भावः। नन्वेवमपि श्रुतिविरोधः स्यादेव। आख्यातेन कर्तुः श्रुत्या उपस्थापितत्वात् । इति चेदाह – **न हीत्यादि** । आख्यातश्रुत्या कर्तुरुपस्थापनेऽपि भावनावत् तस्य प्राधान्येन न भानम् , येन निषेधस्य पुरुषार्थता स्यात् । अपि तु विशेषणतयैव। तथोपस्थापितस्य विशेषणान्तरा -पेक्षाभावात् , विशेषणीभूतकर्त्रा सह श्रौतः नञ्सम्बन्धो न भवति। अतः अत्र श्रुत्या प्रकरणबाधो न भवति। तदेवाह – **गुणभूतः कर्तेत्यादि**। "**गुणभूतः** - धात्वर्थभावनायां विशेषणीभूतः कर्ता, नञा श्रुत्या प्रतिपाद्यं निषेधं, **स्वाङ्गत्वेन** - स्वविशेषणतया, ग्रहीतुं **नालम्** - न समर्थः। विशेष्ये एव अङ्गित्वस्य न्याय्यत्वात् , विशेषणेऽङ्गसम्बन्धे प्राधान्यमप्राधान्यं चेति विरुद्धद्वयमापद्येत। अत एव सोमेन यजेतेत्यत्र सोमस्य यागे करणत्वेनान्वयो निराकृतः सोमसाध्येन यागेनेति मीमांसकैः" इति **काशिका** ।

"न ह्युपाधेरुपाधिर्भवति , न हि भिक्षुको भिक्षुकान्तरं याचितुमर्हति सत्यन्यस्मिन्न भिक्षुके" इत्यादिन्यायविरोधात् नञर्थस्य प्रधानेन भावनया सह अन्वययोग्यत्वेन विशेषणीभूतकर्त्रा सह अन्वयायोगात् । ननु धात्वर्थभावनापि कथं निषेधेनान्वयं लभते, तस्या अपि प्रत्ययार्थकर्तृसम्बन्धात् इत्याशङ्क्याह – **भावनात्विति** । **भावना तु** - वदधात्वर्थभूतवदनभावना तु, **प्रधानं** - विशेष्यं, अतः **तं** - निषेधं, **ग्रहीतुं** - विशेषणत्वेन स्वीकर्तुं समर्थेति प्रकरणात् क्रत्वर्थत्वमेव सिद्ध्यति वैयाकरणमतेऽपि। विशेषणत्वेन इतरान्वितस्यान्यत्र विशेषणतया अन्वयासम्भवेऽपि तिङर्थं प्रति विशेष्यायास्तस्याः नञर्थे विशेषणतयान्वयो नानुपन्न इति सा ग्रहीतुं समर्थैवेति भावः। एवं च निषेधस्य तद्भावनाया वा कैमर्थ्याकाङ्क्षायां प्रकरणात् क्रत्वर्थतैवेति भावः। "श्रुतिप्रकरणयोरङ्गत्वग्राहकत्वसम्भवे एव श्रुतिरेव ग्राहिका, बलीयस्त्वात् , प्रकृते तु नैवमिति तात्पर्यम् " इति **काशिका** । अतः अधिकरणसिद्धान्तविरोधः वैयाकरणमतेऽपि नास्त्येव। तथा च मीमांसकमतमनुसृत्य यथा निषेधस्य भावना विशेष्यं, तथा वैयाकरणमतमनुसृत्यापि भावनैव विशेष्यम्। अतः नवा सिद्धान्ते, नवा बोधे विरोधः। निषेधभावनयोः विशेषणविशेष्यभावे भावनाविशेष्यं निषेधो विशेषणमिति मूलात् लभ्यते । व्याख्यातं च तथैव **दर्पणे परीक्षायां** च । **काशिकायां** तु नञर्थः विशेष्यम् ,भावना विशेषणमिति दृश्यते। **सरलायामपीत्थमेव** व्याख्यातम् । "विशेषणत्वेन

इतरान्वितस्य अन्यत्र विशेषणतया अन्वयासम्भवेऽपि तिङर्थं प्रति विशेष्यायाः तस्याः नञर्थे विशेषणतया अन्वयो नानुपपन्न इति सा ग्रहीतुं समर्थैवेति भावः। एवं च भावनायाः कैमर्थ्याकाङ्क्षाप्रकरणात् सिद्धं क्रत्वर्थत्वमि" ति तत्रत्यो ग्रन्थः ।

नन्वेवं निषेधस्य कुत्रापि श्रौतपुरुषार्थता न स्यात् । मीमांसकमते आख्याते कर्तुः श्रौतत्वाभावात् । वैयाकरणनये कर्तुः श्रौतत्वेऽपि तस्य विशेषणत्वात् । तथा च "न हिंस्यात् सर्वा भूतानि ,न कलञ्जं भक्षयेत् " इत्यादिनिषेधानामपि पुरुषार्थत्वं न स्यात्। यदि च कर्तुरप्राधान्येऽपि कर्तृवृत्तिभावनायाः प्राधान्यात्तस्याः नञर्थान्वये तद्वारा कर्तुरप्यन्वय इत्येतावतैव पुरुषार्थत्वं, तर्हि प्रकृते "नानृतं वदेत्" इत्यस्यापि पुरुषार्थत्वं सिध्यत्येव । तदेव प्रतिपादयति -**अस्तु वे**त्यादिना । **क्रतुयुक्तपुरुषधर्म** इति ॥ क्रतुयुक्तपुरुषसंस्कारद्वारा क्रतुयुक्तपुरुषधर्मः । **अनुष्ठाने** - क्रत्वङ्गक्रियाकरणे, **विशेषाभावात्** - निषेधस्य क्रत्वर्थत्वे वा क्रतुयुक्तपुरुषार्थत्वे वा भेदाभावात् इत्यर्थः। अत्रैव दृष्टान्तमग्रे प्रदर्शयति । ननु "नानृतं वदेत्" इति निषेधस्य क्रतुयुक्तपुरुषधर्मत्वे यजमानस्य प्राधान्यात् अनृतवदननिषेधः प्रधानकर्तृविषयक एव स्यात्। तथा च प्रधानीभूतकर्त्रैवानृतवदनं वर्ज्यं स्यात् । क्रत्वर्थत्वे तु यज्ञप्रवृत्तसर्वपुरुषविषयकः भवतीति अयं निषेधः यथा यजमानविषयकः तथा ऋत्विग्विषयकोऽपि भवति। तथा च अनुष्ठाने फलभेदात् अनुष्ठाने विशेषाभावादिति मूलमसङ्गतमिति चेन्न। श्रुतिप्रकरणाभ्यां क्रतुसम्बद्धपुरुषकर्तृकानृतवदनाभाव इति बोधेन क्रतुकर्तृकेतिबोधे मानाभावात् । एतदेव क्रतुयुक्तपुरुषधर्म इति शब्देन अभिप्रेतमिति **दर्पणः** ।

अत्र दृष्टान्तमाह – **जञ्जभ्यमाने**त्यादि॥ दर्शपूर्णमासप्रकरणे एव पठितोऽयं मन्त्रविधिः। अस्य क्रत्वर्थत्वं वा पुरुषार्थत्वं वा इत्यादिविचारः मीमांसाशास्त्रे तृतीयाध्यायस्य चतुर्थे पादे नवमेऽधिकरणे कृतः। अत्र हि जञ्जभ्यमान इति कर्तरि शानच् प्रत्ययः। "कर्तरि कृत्" (पा. 3-4-67) इत्यनुशासनेन कृतामुत्सर्गतः कर्तृबोधकत्वात्। तथा चास्य शुद्धपुरुषार्थत्वं, प्रकरणात् क्रत्वङ्गत्वमिति सन्देहे अनेन वाक्येन तावत् जञ्जभ्यमानपुरुषधर्मतैव प्रतीयते, प्रकरणेन तु क्रत्वङ्गत्वमिति विरोधस्य सत्त्वात् वाक्यात् पुरुषसंस्कारकत्वमेवेति पूर्वपक्षः। तत्रायं सिद्धान्तः – वाक्यप्रकरणयोः विरोधे बाध्यबाधकभावः। नास्त्यत्र तयोः विरोधः। जञ्जभ्यमानपदस्य कर्तृवाचकत्वेन तादृशपुरुषस्य क्रतावपि सत्त्वात् तत्संस्कारमुखेन क्रत्व–

नन्वाख्यातस्य भावनायामसाधुत्वे ततस्तद्बोधो न स्यात् , साधुत्वज्ञानस्य शाब्दबोधहेतुत्वात् , इत्यत आह - बोध इति - असाधुत्वेऽपि साधुत्वभ्रमाद् बोधोऽस्तु नाम , अपभ्रंशवत्। असाधुत्वन्तु स्यादेवेतिभावः।

ङ्गतायाः सम्भवात्। तथा च विरोधे एव बलाबलचिन्ता। अत्र तु वाक्यप्रकरणयोः विरोधाभावाज्जञ्जभ्यमानवाक्यानुवचनस्य वाक्यप्रकरणाभ्यां क्रतुयुक्तपुरुषधर्मत्वम्। तथा च यथा वाक्यप्रकरणयोः प्रमाणयोः विरोधाभावात् द्वयोरर्थयोः समन्वयेन क्रतुयुक्तपुरुषसंस्कारकत्वं जञ्जभ्यमानवचनस्य निर्णीतं, तथा नानृतं वदेत् इत्यत्रापि श्रुतिप्रकरणयोः विरोधाभावात् द्वयोरपि समन्वयेन अनृतवदनस्य क्रतुयुक्तपुरुषधर्मतैव सिद्ध्यति। एतन्मनसिकृत्याह – **अस्तु वेति** ॥

उक्तं च कुमारिलभट्टैः –

> स्त्र्युपायमांसभक्षादिपुरुषार्थमपि श्रितः ।
> प्रतिषेधः क्रतोरङ्गमिष्टः प्रकरणाश्रयात् ॥ इति ।(मी.1.3.8.9)

प्रतिषेधः "न स्त्रियमुपेयात्" "न कलञ्जं भक्षयेत्" "नानृतं वदेत्" इत्यादिरूपः । ततश्च आख्यातस्य कर्तृवाचकत्वेऽपि न मीमांसासिद्धान्तविरोधः, न वा अनुष्ठाने विशेषः।

तथा च "श्रुतिलिङ्गे" ति न्यायः न सार्वत्रिकः । अनारभ्याधीतः नानृतं वदेत् इति नियमः शब्दानृतस्येव अर्थानृतस्यापि । तथा हि – "यर्वाणस्तर्वाणो नाम ऋषयो बभूवुः परापरज्ञाः। ते खलु यद्वानस्तद्वान इति प्रयोक्तव्ये यर्वाणस्तर्वाण इति प्रयुञ्जते, याज्ञे कर्मणि पुनर्नापभाषन्ते" पस्पशाह्निकभाष्यस्वरसादर्थानृतपरोऽपि । पस्पशाह्निकस्थात् "तेऽसुराःहेलयो हेलय इति कुर्वन्तो पराबभूवुः" इति क्रतुप्रकरणपठितभाष्योल्लिखितश्रुत्यन्तराच्च नानृतमिति निषेधः शब्दानृतपरोऽपीति, नानृतमिति निषेधः उभयविधस्याप्यनृतस्येति ध्येयमिति **काशिका** । तदेतत् सर्वं ध्वनयन् आह – **भूषणे प्रपञ्चितमिति** ।

प्रकरणमिदमुपसंहर्तुमिच्छुः पुनश्शङ्कते – **नन्विति**।मीमांसाशास्त्ररीत्या शक्तत्वसाधुत्वयोरैक्यात् भावनायां तिङ्प्रयोगस्य असाधुत्वात् , तिङः तत्र शक्तेरभावे मीमांसकानां बोधो न स्यात्।साधुत्वशक्तत्वयोरैक्येन साधुत्वज्ञानस्य बोध हेतुत्वादिति । समाधत्ते – "**बोधो नेह निवार्यते**" इति । अपभ्रंशेषु यथा शक्त्य-

वस्तुतः साधुत्वज्ञानं न हेतुः, तद्व्यतिरेकनिर्णयोऽपि न प्रतिबन्धक इति "असाधुरनुमानेन" इत्यत्र वक्ष्यामः ॥ ॥ 21 ॥

रङ्गोजिभट्टपुत्रेण कौण्डभट्टेन निर्म्मिते।
पूर्णो भूषणसारेऽस्मिन् धात्वाख्यातार्थनिर्णयः ॥ 1 ॥

इति श्रीकोण्डभट्टविरचिते वैयाकरणभूषणसारे धात्वाऽऽख्यातसामान्यार्थयो र्निरूपणम् ॥ 1 ॥

भावेऽपि शक्तिभ्रमात् बोधः, तथा अत्रापीति भावः।तदेवाह – **साधुत्व-भ्रमादिति**॥ परन्तु बोधजनकत्वमात्रेण साधुत्वं तु न भवति। असाधुः बोधजनकोऽप्यसाधुरेवेति भावः। वस्तुतस्तु असाधौ साधुत्वभ्रमात् बोध इति नास्माकं मतम्। साधाविवासाधावपि शक्तिरस्त्येव। शक्तिग्राहकशिरोमणेः व्यवहारस्य उभयत्र समत्वात् । एतदेवोक्तं भाष्यकारेण "समानायामर्थावगतौ शब्देनापशब्देन च धर्मनियमः क्रियते" इति। समानायामर्थावगताविवत्युक्त्या उभाभ्यामेकविध एव अविलम्बेनैव च बोध इति सूचितम्। असाधुषु साधुस्मरणात् बोधाङ्गीकारे तु उभाभ्यामर्थावगतौ समानता एव न स्यात् । तदेव स्पष्टयति – **बोधे साधुत्वज्ञानं न हेतुः, न वासाधुत्वज्ञानं प्रतिबन्धकमित्यादिशक्तिनिर्णये "असाधुरनु मानेन"** इति कारिकाव्याख्यायां निरूपयिष्यते । इति सर्वं सुस्थम्॥

कौण्डभट्टः स्वपितरं पुम्भाववाग्देवतां सर्वतन्त्रस्वतन्त्रमुल्लिख्य, तस्य महात्मनः पुत्रताम् आत्मनः ख्यापयति – **रङ्गोजिभट्टे**त्यादिना ।प्रकरणं चेदमुपसंहरति – **पूर्ण** इत्यादिना॥

इति वाधूलकुलतिलकेन महामहोपाध्यायेन वेङ्कटरामकृष्णमाचार्येण स्वव्याकरणविद्यागुरोः पदवाक्यप्रमाणपारावारपारीणस्य शिष्यवत्सलस्य लङ्काभिजननरसिंहशास्त्रिवर्यस्य सार्थकनामधेयस्य दिव्यस्मृतौ कृतायां नरसिंहप्रियाख्यव्याख्यायां धात्वाख्यातसामान्यार्थनिर्णयः । शुभं भूयात् –

मङ्गलं महत् श्रीश्रीश्रीश्रीश्री

मूल-व्याख्ययोरुदाहृतश्लोकसूची

परामृष्टग्रन्थसूची

1. अथर्ववेदप्रातिशाख्या – चौखाम्बा, वाराणसी,1962
2. आचार्य हेमचन्द्र और उनका शब्दानुशासन – चौखाम्बा, 1963
3. आचार्य श्रीमलयगिरिविरचितं शब्दानुशासनम् – लालभाई दलपतभाई भारतीयसंस्कृतविद्यामन्दिर, अहमदाबाद, 1967
4. ऋग्वेदप्रातिशाख्यम् उव्वटवृत्तिसमेतम्, वाराणसी, 1959
5. कच्चायनव्याकरणम् तारा पब्लिकेशन्, वाराणसी, 1962
6. काणादसिद्धान्तचन्द्रिका अनन्तशयनप्रचुरणम्, 1923
7. कारकचक्रम् – माधवीप्रदीपयुतम् चौखाम्बा, वाराणसी, 1942
8. कारिकावली – मुक्तावली - प्रभा-मञ्जूषा-दिनकरीयादिव्याख्योपेता, बालमनोरमाप्रेस, मद्रास, 1923
9. काव्यानुशासनम् – हेमचन्द्रविरचितम् - महावीर जैनविद्याप्रकाशन, मुंबई, 1964
10. काशकृत्स्नधातुव्याख्यानम् - सं -व्युधिष्ठिरमीमांसक, वाराणसी, शक 1887
11. काशिकावृत्तिः - न्यासपदमञ्जरीयुता – षट् भागाः, प्राच्यभारती – प्रकाशनम् , वाराणसी, 1965-6
12. काशिकावृत्तिसिद्धान्तकौमुद्योः तुलनात्मकमध्ययनम् – डा.महेश - दत्तशर्मा, पूना 1974

13. कुवलयानन्दः – चन्द्रिकाव्याख्यायुतः –निर्णयसागरप्रेस् , मुम्बई-1912.
14. जैमिनीयसूत्रार्थसङ्ग्रहः- ऋषिपुत्रपरमेश्वरविरचितः, त्रिवान्कूर विश्वविद्यालयः, त्रिवेण्ड्रम् संस्कृतग्रन्थमाला – 156, त्रिंवेंड्रम् , 1951
15. जैमिनीयसूत्रविवृतिः- रामेश्वरसूरि रचिता, वाराणसी, 1923
16. जैनेन्द्रव्याकरणम् - भारतीयज्ञानपीठम्। काशी, 1956
17. तत्त्वबिन्दुः - अन्नामलैविश्वविद्यालयग्रन्थमाला – 3
18. तत्त्वमुक्ताकलापः-उभयवेदान्तग्रन्थमाला, मद्रास, 1973
19. तन्त्ररहस्यम् - गायकाडओरियण्टलसीरीज 24, बडौदा, 1923
20. त्रिकाण्डशेषः - पुरुषोत्तमदेवकृतः सटीकः, मुम्बई 1915
21. नञ्जराजयशोभूषणम् - गायकाड ओरियण्टल सीरीज 24, बडौदा
22. नञ्शिरोमणिटीका – आख्यातवादटिप्पणं च - रघुदेवकृतं, सरस्वतीमहलप्रकाशनम्, तंजावूरु 1972
23. नागेशभावप्रकाशः – लघुमञ्जूषाव्याख्या धात्वर्थमारभ्य कृदर्थान्ता – विजयनगरम्, आ. प्र., 1970
24. नानार्थार्णवसङ्क्षेपः – त्रिवेंड्रम् 1923
25. निरुक्तम् – दुर्गावृत्त्या युक्तम् - निर्णयसागरप्रकाशनम्, मुम्बई, 1926
26. निरुक्तम् - संस्कृतहिन्दीव्याख्योपेतम् – मेहरचन्दलक्ष्मणदास, दिल्ली, 1963
27. न्यायकुसुमाञ्जलिः – टीकाचतुष्टयोपेता - दर्भंगा, 1972
28. न्यायकुसुमाञ्जलिः – विस्तरोपेता - तिरुवाडि प्रकाशनम्, 1941

29. न्यायकुसुमाञ्जलिः – व्याख्यात्रयोपेतप्रकाशयुता - चौखम्बा, 1957
30. न्यायपरिशुद्धिः – श्रीविशिष्टाद्वैतप्रवचनसभाप्रकाशनम् तिरुवहीन्द्रपुरम्, मद्रास, 1913
31. न्यायदर्शनम् - भारतीयविद्याप्रकाशनम्, वाराणसी 1966
32. न्यायमञ्जरी - विजयनगरसंस्कृतग्रन्थमाला, वाराणसी 1934
33. न्यायलीलावती-व्याख्यात्रयोपेता-चौखम्बा-1991
34. न्यायवार्तिकम् - वाराणसी 1916
35. न्यायवार्तिकतात्पर्यटीका -विजयनगरसंस्कृतग्रन्थमाला 15, काशी, 1898
36. न्यायसिद्धान्तमञ्जरी - जानकीनाथभट्टाचार्यकृता, काशी, 1884
37. न्यायसुधा - तन्त्रवार्तिकटीका, वाराणसी 1902
38. पदवाक्यरत्नाकरः सटीकः वाराणसेयसंस्कृतविश्वविद्यालयप्रकाशनम्, वाराणसी, 1990
39. पदार्थदीपिका - राजराजेश्वरप्रेस। वाराणसी 1900
40. परमलघुमञ्जूषा - गायक्वाड ओरियण्टल सीरीज, बडौदा
41. पातञ्जलदर्शनम् - कलकत्ताप्रकाशनम्, 1940
42. प्रकरणपञ्चिका - न्यायशुद्धिसमेता, काशीहिन्दूविश्वविद्यालय, 1991
43. प्रक्रियाकौमुदी - के.पि. त्रिवेदिना सम्पादिता, मुम्बई, 1925
44. प्रतापरुद्रीयम् - रत्नापणसहितम्, मद्रास, 1970
45. प्रौढमनोरमा – शब्दरत्न-ज्योत्स्ना-प्रभा-विभा-कुचमर्दिनीयुता, हरिदास - संस्कृतग्रन्थमाला 23, चौखम्बा, वाराणसी।

46. प्रौढमनोरमा - शब्दरत्न-भैरवी-भावप्रकाश-सरलोपेता, चौखम्बा, वाराणसी

47. ब्रह्मसूत्रशाङ्करभाष्यम् - निर्णयसागरप्रकाशनम्, मुम्बई, 1938

48. भरतनाट्यशास्त्रम् – द्वितीयभागः - बडौदासंस्करणम्

49. भाट्टचिन्तामणिः – तर्कपादः समयूखः - चौखम्बा, 1934

50. भाट्टदीपिका – प्रभावलीयुता - निर्णयसागरप्रकाशनम्, मुम्बई 1922, मद्रास, 1957

51. भाट्टरहस्यम् - शास्त्रमुक्तावली, काञ्चीपुरम्, 1900

52. भावनाविवेकः-मण्डनमिश्रस्य– प्रथमद्वितीयभागौ, वाराणसी 1922-23

53. महाभाष्यम् - भारतीयाधिशासनसंरक्षकतायां प्रकाशितम्, भागत्रया - त्मकम्, मोतीलाल बनारसीदास, 1967

54. महाभाष्यटीका भर्तृहरिरचिता - हिन्दूविश्वविद्यालयीय नेपालसंस्कृत - ग्रन्थमालाकुसुमम् 11, हिन्दूविश्वविद्यालयः 1965

55. मीमांसादर्शनम् – षट्भागाः- तन्त्रवार्तिकशाबरभाष्यसमेतम्, आनन्दा - श्रमप्रकाशनम् 1947

56. मीमांसाश्लोकवार्तिकम् - तात्पर्यटीकासहितम्, मद्रास 1971

57. रसगङ्गाधरः - गुरुमर्मप्रकाशसरलायुतः, काव्यमाला, 12, निर्णयसागर -प्रकाशनम् 1947

58. लकारार्थनिर्णयः - भवानन्दसिद्धान्तवागीशकृतः, कलकत्ता 1915

59. वाक्यपदीयम्, प्रथमकाण्डः हरिवृषभटीका - दक्कनकालेज, पूना 1966

60. वाक्यपदीयम् - ब्रह्मकाण्डम् - हरिवृषभ अंबाकर्त्रीटीकाद्वयोपेतम्, संपूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी

61. वाक्यपदीयम् - प्रथमद्वितीयकाण्डौ, आन्ध्रव्याख्या, तेलुगु अकादमी, हैदराबाद, 1974

62. वाक्यपदीयम् - तृतीयकाण्डः प्रथमभागः, दक्कनकालेज पूना 1963

63. वाक्यपदीयम् - तृतीयकाण्डः द्वितीयभागः, वाराणसी 1928

64. वाक्यपदीयम् - वृत्तिविचारः, त्रिवान्कूर विश्वविद्यालयः त्रिवेंड्रम्, 1942

65. वाक्यार्थरत्नम् - मैसूर ओरियंटल लाइब्ररी प्रचुरणम्, 1943

66. विभक्त्यर्थनिर्णयः - चौखम्बा 1901

67. विधिसुधाकरः - वेदान्तवादावली सीरीज द्वि.भा. कल्याणपुरप्रकाशनम् 1899

68. वैयाकरणभूषणनिबन्धसङ्ग्रहः - चौखाम्बा, 1939

69. वैयाकरणभूषणसारः काशिकाव्याख्या - मुम्बई 1915

70. वैयाकरणभूषणसारः दर्पणपरीक्षायुतः - हरिदाससंस्कृतग्रन्थमाला 133, चौखम्बा, वाराणसी, 1939

71. वैयाकरणभूषणसारः प्रभादर्पणयुतः - आदर्शग्रन्थमाला2, वाराणसी 1947

72. वैयाकरणभूषणसारः तत्त्वदर्शिनीव्याख्यायुतः - विजयनगरम् आ.प्र. 1967

73. वैयाकरणभूषणसारः शाङ्करीयुतः - आनन्दाश्रमसंस्कृतग्रन्थावलिः 135, पूना 1957

74. वैयाकरणभूषणसारः सरलासुबोधिनीयुतः- श्रीहरिकृष्णनिबंधमणिमाला 7, बनारस, 1952

75. वैयाकरणभूषणसारः, भैमीभाष्योपेतः - दिल्ली 1969

76. वैयाकरणभूषणसारः – कुमारीसुदेशगिरिव्याख्या, दिल्ली 1969

77. वैयाकरणसिद्धान्तभूषणम् - काशीसंस्कृतग्रन्थमाला, 1900

78. वैयाकरणसिद्धान्तभूषणम् - आङ्ग्लटिप्पणीसहितम् मुम्बई, 1915

79. वैयाकरणसिद्धान्तमञ्जूषा - संपूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी, 1977

80. वैयाकरणसिद्धान्तलघुमञ्जूषा - चौखम्बासंस्कृतग्रन्थमाला 46, 1919

81. व्याकरणदर्शनबिन्दुः - रघुनाथशर्मणा रचितः, संपूर्णानन्दसंस्कृत - विश्वविद्यालयः, वाराणसी, 1977

82. व्याकरणसिद्धान्तसुधानिधिः - पर्वतीयविश्वेश्वरसूरिविरचितः - प्रथमभागः, चौखम्बा, 1924

83. व्युत्पत्तिवादः, मूलमात्रम् - शास्त्रमुक्तावली, काञ्ची 1900

84. शब्दकौस्तुभः प्रथमभागः - चौखम्बा, 1929

85. शब्दकौस्तुभः द्वितीयभागः - चौखम्बा, 1929

86. शब्दशक्तिप्रकाशिका सटीका -चौखंबा, 1934

87. शाब्दतरंगिणी - संस्कृतविद्यासमितिः, मद्रास 1969

88. शास्त्रदीपिका - मयूखमालिका – युक्तिस्नेहप्रपूरणीव्याख्याद्वययुता, निर्णयसागरप्रकाशनम्, मुम्बई, 1915

89. शौनकीयबृहद्देवता - चौखम्बा, 1963

90. षड्भाषाचन्द्रिका, निर्णयसागरप्रकाशनम्, मुम्बई 1916


91. सिद्धान्तकौमुदी – बालमनोरमातत्त्वबोधिनीयुता - मोतीलाल बनारसी - दास, दिल्ली 1964

92. सेश्वरमीमांसा – मीमांसापादुका, उभयवेदान्तग्रन्थमाला, 1971

93. संस्कृतव्याकरणशास्त्र का इतिहास भागद्वयम् - युधिष्ठिरमीमांसक ताराबुक्एजन्सी, वाराणसी-1989

94. History of Navya Nyaya in Mithila – Prof. Dinesh Chandra Bhattacharya Dharbhanga, 1958.
95. Studies in Indian literary history Vol.III – 1956.
96. Trends in Linguistics – Panini- A Survey of Research – George Cardona. Paris 1976.
97. Journal of Historical Research Vol.35.
98. Tanjore Descriptive Catalogue Vol.XII

Prof. K. V. Ramakrishnamacharya is a former Vice-Chancellor of Jagadguru Ramanandacharya Rajasthan Sanskrit University, Jaipur and retired Professor in Vyākaraṇa, Rashtriya Sanskrit Vidyapeetha, Tirupati. He has studied the *Vaiyākaraṇabhūṣaṇasāra* and all its available commentaries in depth, and this is the outcome of his efforts. He has been honoured with titles such as Mahāmahopādhyāya (Honoris Causa), Śāstravidvanmaṇi, Vyākaraṇa Śāstra Viśarada, and various awards including the Ramakrishna Award from the Sarasvati Vikas, Canada. He is currently associated with the French Institute of Pondicherry as Honorary Professor.



9789383097142

ISBN : 978-93-83097-14-2
Price: Rs. 820 /-